Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51, 5

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

V

Adhyāya 2 Pāda 1-4

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1978

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

SRI AUROBINDO LIBRARY
PONDICHERRY, INDIA

sa 1475.27 Mahabhasyam

Pata Patanjali

13.05

But thought nor word can seize eternal truth

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

(Vol. V)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51, 5

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

V

Adhyāya 2 Pāda 1-4

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1978

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

© Institut Français d'Indologie 1978

Sai 475 · 27
pata
13 · 05

Sai 79 - 066

Imprimerie de Sri Aurobindo Ashram,
Pondichéry, Inde

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उपोद्घातः

विदितचरमेतद्विश्वेषां विपश्चिताम्, यदस्मिन् विमर्शालये महाभाष्यप्रदीपयोर्व्याख्यानानि यानि प्राचीनान्येतावत्पर्यन्तमप्रकाशितानि तानि प्रचिकाशयिषितानि प्रकाश्यन्ते चेति। तत्रेतः प्राक्तने सन् १९७७ संवत्सरपर्यन्ते प्रथमाध्यायभागः संमुद्रच प्राकाश्यमनीयत। ऐषमः १९७८ सन् संवत्सरे द्वितीयाध्यायभागोऽत्र प्रकाश्यते। अस्य द्वितीयाध्यायभागस्य कार्त्स्न्येनोपलब्धं पूर्वसंपुटवत् श्रीमदन्नंभट्टकृतं महाभाष्यप्रदीपोद्द्योतनम्, श्रीशिवरामेन्द्रसरस्वतीविरचितो महाभाष्यसिद्धान्तरत्नप्रकाशश्चेति व्याख्यानद्वयमेव। तत्रोद्योतनस्यैतद्भागोपयुक्तास्तिस्रो मातृकाः, रत्नप्रकाशस्य च तिस्रो मातृकाः॥

अत्रोपयुक्तमातृकाणां संकेतादिनिर्देशः

अ. अडैयार्कोशागारालिलखिता आस्माकीनकोशालये T. No. 155 संकेतिता। इयमुद्द्योतनमातृका प्रथमाध्यायप्रथमपादतृतीयाह्निकारम्भे किंचिद्भागहीना पञ्चमाध्याये 'रजःकृषि' (५.२.११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तभागहीना च।

इ. G. O. M. L. R. No. 1500 अङ्कितान्ध्रलिपिमयी मातृकोद्द्योतनस्येयम्। अत्र प्रथमाध्यायप्रथमपादचतुर्थाह्निके 'तुल्यास्यप्रयत्नं सवर्णम्' (१.१.९) इति सूत्रान्तिमभागादारभ्य त्रिनवतितमपत्रान्तेऽष्टमाह्निके 'द्विर्वचनेऽचि' (१.१.५९) इति सूत्रे किंचिद्भागपर्यन्तमुपलभ्यते। मध्ये एकोनविंशतितमत्र्यशीतितमपत्रे न स्तः। चतुर्नवतितमपत्रादष्टसप्ततिशततमपत्रान्तं न दृश्यते। एकोनाशीतितमपत्रात् सप्तनवतिशततमपत्रान्त उपलभ्यमाने 'समर्थः पदविधिः' (२.१.१) इति सूत्रे 'संख्याविशेषो व्यक्ताभिधानम्' इति वार्तिकव्याख्यानात् प्रभृति 'चतुर्थी तदर्थार्थ' (२.१.३६) इति सूत्रे किंचिद्भागपर्यन्तं चोपलभ्यते।

ऋ. G. O. M. L. R. No. 2248 Vol. I देवनागरीलिपिमयी काकिदपत्रलिखितोद्द्योतनमातृका। अत्र प्रथमाध्यायद्वितीयपादारम्भात् प्रभृति द्वितीयाध्यायसमाप्त्यन्तं वर्तते। षष्ट्युत्तरचतुश्शती पत्राण्यस्यां सन्ति। प्रतिपुटं विंशतिः पङ्क्तयो वर्तन्ते।

R. No. 2248 Vol. II अत्र तृतीयाध्यायात् प्रभृति 'केशाद्वोऽन्यतरस्याम्' (५. २. १०९) इति सूत्रपर्यन्तं वर्तते त्रिनवतिचतुश्शतीपुटान्ते। 'रजःकृषि' (५. २. ११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तो भागो नास्ति। द्वितीयाह्निकात् षष्ठाध्यायसमाप्त्यन्तं वर्तते। पञ्चनवत्युत्तरषट्शती पुटान्यत्र कोशे सन्ति।

R. No. 2248 Vol. III षण्णवत्युत्तरषट्शतीतः पुटात् प्रभृति नवोत्तरशतसहस्रपुटपर्यन्तेऽस्मिन् कोशे सप्तमाष्टमाध्यायौ विद्येते।

प. वाराणसेयविश्वविद्यालयसरस्वतीभवने Ms. No. 38002 देवनागरीलिपिमयी पाण्डुपत्रलिखिता रत्नप्रकाशस्य मातृका। अत्र १-३३. ३५-३६. पत्राणि प्रथमतः, ३४ तमपत्रं नास्ति। अत्र

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रथमाध्यायद्वितीयपादारम्भात् 'त्यदादीनि सर्वैर्नित्यम्' (१.२.७२) इति सूत्रान्तं वर्तते। ६७ प्रभृति ९९ पत्रान्तं नास्ति। अथ १००-१२९ पत्राणि। अत्र प्रथमाध्यायतृतीयपादे 'क्रीडोऽनुसंपरिभ्यश्च' (१.३.२१) इति सूत्रात् 'विप्रतिषेधे परं कार्यम्' (१.४.२) इति सूत्रमध्यपर्यन्तं वर्तते। १३० तमपत्रं नास्ति। तदनु १३१-१९२ पत्राणि — अत्र प्रथमाध्यायचतुर्थपादद्वितीयसूत्रान्तिमभागात् प्रथमाध्यायसमाप्त्यन्तं वर्तते। ततः २-२९७ पत्राणि — अत्र 'समर्थः पदविधिः' (२.१.१.) इति सूत्रात् (आरम्भे कियांश्चिद् भागो नास्ति) 'आर्धधातुकं शेषः' (३.४.११४) इति सूत्रमध्यभागपर्यन्तं वर्तते। अनन्तरं २.७८ पत्राणि — अत्र (७४ तमपत्रं नास्ति) चतुर्थाध्यायारम्भात् (आरम्भे कियांश्चिद्भागो नास्ति) 'गोत्राद्यून्यस्त्रियाम्' (४.१.९४) इति सूत्रारम्भभागपर्यन्तं विद्यते। अथो (१२०-१४१) पत्राणि — अत्र 'छन्दोब्राह्मणानि च तद्विषयाणि' (४.२.६६) इति सूत्रमध्यभागात् चतुर्थाध्यायसम्माप्त्यन्तं विद्यते।

ब. वड़ोदा O. I. Acc. No. 11203 अङ्किता देवनागरीलिपिमयी पाण्डुपत्रलिखिता, अस्याः प्रतिकृतिरस्मदीयकोशालये T. No. 498 अङ्किता रत्नप्रकाशस्य मातृका। अस्यां प्रथमाध्यायारम्भात् चतुर्थाध्यायान्तो भागो वर्तते। प्रथमाध्यायद्वितीयपादे 'प्रथमानिर्दिष्टं समास उपसर्जनम्' (१.२.४३) इति सूत्रे 'अन्वर्थसंज्ञायामपि तत्र दोष इत्याशङ्क्यान्वर्थसंज्ञामाश्रित्यैव परिहृतत्वेन परिहारान्तराप्रसिद्धेः' इत्येतत्पर्यन्तं वर्तते, उपरि प्रथमाध्यायचतुर्थपादान्तिमभागपर्यन्तग्रन्थो नास्ति। द्वितीयाध्यायप्रथमपादे प्रथमाह्निकात् प्रभृति द्वितीयाह्निके 'नदीभिश्च' (२.१.२०) इति सूत्रव्याख्यानपर्यन्तं विद्यते। 'द्विगुश्च' (२.१.२३) इति सूत्राद् द्वितीयाह्निकसमाप्त्यन्तो ग्रन्थो नास्ति। अयं परित्यक्तभागः 'प' संकेतितकोशेऽपि नोपलभ्यते। वाराणसीविश्वविद्यालयसरस्वतीभवनस्थमातृकान्तरेऽप्ययं भागो न लभ्यते।

य. आस्माकीनकोशालये T. No. 444 रत्नप्रकाशस्य मातृका। अत्र द्वितीयाध्याये 'न निर्धारणे' (२.२.८) इति सूत्रात् 'रुजार्थानां भाववचनानामज्वरेः' (२.३.५४) इति सूत्रव्याख्यानपर्यन्तमुपलभ्यते।

एतद्ग्रन्थमातृकादानेनोपकृतवताम् वडोदाकोशागार-अडयार्कोशागार-मद्रपुरीराजकीयकोशागारवाराणसीविश्वविद्यालय-सरस्वतीभवनानामध्यक्षमहाशयानां, तथैतद्ग्रन्थमातृकालेखनेनोपकृतवद्भ्यो वाराणसीवास्तव्येभ्यः पण्डितवर्येभ्यः श्रीमध्वाचार्येभ्यः, मुद्रणशोधनादौ साहाय्यं कृतवद्भ्यां श्रीसंबन्धशिवाचार्यशेषाद्रिसंज्ञकाभ्यामस्मत्सुहृद्भ्यां च कृतज्ञतां निवेदयामः। सर्वस्यास्य महतः कार्यस्यारम्भात् प्रभृति मुद्रणपर्यन्तस्य निर्वहणेऽनितरसाधारणीं श्रद्धामुद्वहतामस्मद्विमर्शालयसंस्कृतशाखाध्यक्षाणां डाक्टर् N. R. भट्टमहाशयानां कृते केवलकृतज्ञतानिवेदनेनैव कृतार्था बुभूषामः। इति शम्।

इत्यम्

उभयवेदान्तविद्वान् M. S. नरसिंहाचार्यः व्याकरणशिरोमणिः

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

महाभाष्यप्रदीपव्याख्यानानि

(द्वितीयाध्याये १–४ पादाः)

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य प्रथमपादे प्रथममाह्निकम्

महाभाष्यप्रदीपोद्द्योतनम् अन्नम्भट्टकृतम्

समर्थः पदविधिः २. १. १.

[२, ४९१–४९६]

(उद्द्योतनम्) ननु [1]विधिशब्दे शब्दत्वव्याप्यपरस्परविरुद्धधर्मद्वयसहचरितधर्मानुपलब्धौ कथं प्रश्नहेतुसंशयः, अत आह — **अर्थेति** । अर्थद्वयाभिधानसमानाधिकरणविधिशब्दत्वमेव साधारणो धर्मः । किमर्थकोऽयमिति [2]प्रश्न इति यावत् । तदेवाह — **किमिति**। लक्ष्यभेदसिद्धये पक्षद्वयेऽर्थविशेषं दर्शयति — **तत्रेति** । विपूर्वस्य धाञः सकर्मकत्वात् कर्माकाङ्क्षायां संनिधानात् पदान्येव संबध्यन्त इति भावसाधनपक्षे [3]'कर्तृकर्मणोः कृति' इति कर्मणि षष्ठी। कर्मसाधनपक्षे तु विधिशब्देन कार्येऽभिहिते विशेषाकाङ्क्षायां संनिधानादेव पदानां कार्यित्वेन संबन्धात् शेषषष्ठीति भावः । नन्वेवमपि शब्दैक्याच्छब्दगोचरः संशयो न युक्तः, अत आह — **तत्र येषामिति** । अक्षादिष्वपीति भावः। [4]**विशिष्टशब्देति**। अर्थविशेषप्रतिपादकशब्दविशेषनिर्धारणायेत्यर्थः । ननु 'कर्मसाधनः' इत्येतावदेव वक्तव्यम्, [5]'उपसर्गे घोः किः' इति प्रसिद्धत्वात्, 'विपूर्वात्' इति न वक्तव्यम्, अत आह — **विधेति**। [6]तदेवास्तु, को विशेषः, अत आह — **स्वरे चेति**। इन्प्रत्यये [7]विकारेकार उदात्तः, किप्रत्यये [8]धिकारेकार इति भेदः। तथापि किप्रत्ययान्तस्यैव ग्रहणे को हेतुः, अत आह — [9]**तस्यैवेति। एतद् भावसाधनेति**। कर्मशब्देन कृत्रिमकर्मण एव ग्रहणात्, 'विधीयते' इति प्रदर्शनस्य भावसाधनपक्षेऽपि संभवादित्यर्थः। तर्हि 'कर्मसाधनः' इत्येवास्तु, अत आह — **सुखेति**। यद्यपि विपूर्वस्य धाञः सकर्मकत्वाद् विधीयत इति कर्मण एव प्रदर्शनम्, न भावस्येति 'कर्मसाधनः' इति व्यर्थम्, तथापि कर्मशब्दोऽपि क्रियारूपभावेऽपि प्रयुज्यते, आत्मनेपदमपि तत्र दृष्टमित्युभाभ्यामेव कर्मसाधनत्वं स्पष्टं प्रत्येतुं शक्यत इति भावः। विधेयस्य समासादेः स्पष्टत्वात् प्रश्नायोगः, अत आह — **कार्येति। इह सूत्रे**। नन्वानुलोम्येन निर्देशे पूर्वं पराङ्गवद्भावो वक्तव्यः, प्रातिलोम्येन चेद् विभक्तिविधानमिति मध्यमस्य समासस्य कथं प्रथमनिर्देशः, अत आह — **अनन्तरस्यापीति**। पश्चान्निर्देशेऽनादरमुख्यप्रयोजनत्वाभावौ हेतू। अल्पविषयत्वादित्यनादरहेतुः, तन्निमित्तग्रहणादिति मुख्यप्रयोजनत्वाभावे। [10]'आमन्त्रितनिमित्तं पराङ्गवदिति वक्तव्यम्, परशुना वृश्चन्, इह न, क्षत्रेणाग्ने स्वायुः संरभस्व' इत्युत्तरसूत्रे वक्ष्यति। **समुदायो वेति**। [11]'सह सुपा' इति वचनात् सुबन्तसमुदायः संज्ञी। यद्यपि संज्ञी न विधीयते, तथापि समुदायविषयसंज्ञाविधाने संज्ञिनोऽप्युद्देश्यत्वेन[12] विधिस्पर्शात् 'विधीयते'

---

[1] विधिशब्दत्वव्याप्य — अ.
[2] प्रश्न इत्यर्थः — अ.
[3] पा. सू. २. ३. ६५.
[4] विशिष्टशब्दोऽर्थ—अ; विशिष्टशब्दार्थ— ऋ.
[5] पा. सू. ३. ३. ९२.
[6] तद्वदेवास्तु — अ.
[7] विशब्दसंबन्धीकार इत्यर्थः।
[8] धिशब्दसंबन्धीकार इत्यर्थः।
[9] कस्यैवेति — ऋ.
[10] महाभाष्यम् २. १. २.
[11] पा. सू. २. १. ४.
[12] उद्देशत्वेन विधिशब्दात् — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]इत्यनेनान्वयोऽविरुद्धः। ननु प्रातिपदिकाद्विधीयमाना विभक्तिः कथं पदविधिः, अत आह — **विभक्तिविधानशब्देनेति**। [2]**सामान्येन** [3]"स्वौजस्' इत्यादिनार्थविशेषानादरेण। विभक्तिविधानशब्दस्य नियमलक्षकत्वे हेतुः — **एवं हीति**। ननु नियमाद्विधेर्ज्यायस्त्वाद्विधिपक्षे कथं पदविधित्वम्, अत आह — **अथापीति**। [4]"स्वौजस्' इत्यस्य [5]"कर्मणि द्वितीया' इत्यादेश्च वाक्यैकवाक्यतया विधित्वमित्यर्थः। **तथापीति**। सर्वविभक्तीनां [6]पदविधित्वाभावेऽप्युपपदविभक्तीनां तदस्तीति तदभिप्रायं विभक्तिग्रहणमित्यर्थः। ननु [7]"सुबामन्त्रिते' इति [8]"सह सुपा' इति वचनात् समासस्य [9]पराङ्गवद्भावस्य च पदविधित्वं युक्तम्, [10]"अन्तरान्तरेण' इत्यादौ सुबन्तेनेत्यनुक्तेः कथं पदविधित्वमित्याशङ्क्य पदस्वरूपाश्रयः सर्वोऽपि पदविधिरिति भगवदभिप्रेतमिति वक्तुमुदाहरणान्तरमाह — **तिङ्विभक्तीनां** [11]**चेति**। **तदाश्रयेण** पदस्वरूपाश्रयेण। **तथा चेति**। [12]"शदेः शितः' इति सूत्रे न्यविशतेत्यादावटा व्यवधानात् [13]"नेर्विशः' इत्यात्मनेपदं न प्राप्नोतीति शङ्कामनेकधा समाधाय [14]"अथवा निरपि पदम्, विशिरपि पदम्, पदविधिश्च समर्थानां [15]भवति, अटा व्यवहितेनापि च सामर्थ्यम्' इत्युक्तं भाष्ये। तत्र विशिशब्देन विशत इत्येतल्लक्षणयोच्यते। तथा च [16]"नेर्विशः' इत्यस्य निशब्दात् परमात्मनेपदान्तं विश्यवयवकं पदं साधु भवतीत्यर्थः। अडागमेऽप्यात्मनेपदान्तं निरन्तरमेवेति दोषाभावः। पदविधिश्चेत्येतत् स्वरूपकथनमात्रं, न तु तत्र तस्योपयोग इति तत्रैव प्रदीपे उक्तम्। ननु 'विधानं विधीयते' इत्यनन्वितम्, क्रियाकर्मभावस्य भेदगर्भतयैकस्मिन्नसंभवात्, अत आह — **तत्रेति**। विभक्तिविधानत्वेन [17]कर्मत्वं विधानत्वेन क्रियात्वमेकस्यैव सामान्यविशेषभेदेनोपपन्नम्। **सामान्येति**। [18]"तपस्तपःकर्मकस्यैव' इत्यत्राभेदे कथं क्रियाकर्मभाव इत्याशङ्क्य [19]"सामान्यतपेरवयवतपिः कर्म, तद्यथा 'स एतान् [20]पोषानपुष्यत्, गोपोषमश्वपोषम्' इति सामान्यपुषेरवयवपुषिः कर्म, एवमिहापि सामान्यतपेरवयवतपिः कर्म" इति भाष्यकृतोक्तम्। **कार्यविशेषेति**। विधिशब्देन कार्यसामान्यनिर्देशात् 'विशेष' इत्युक्तम्। **रूपद्वयमिति**। यद्यपि संज्ञाया अपि पारार्थ्यमस्ति, तथापीह संज्ञात्वं न संभवति। न तावत् समर्थस्य पदविधिरिति संज्ञा, गुरुत्वादावृत्त्यभावाच्च। अत एव न पदविधेः समर्थ इति संज्ञा। [21]"पदस्य' इत्यधिकारादेव षत्वस्य पदविधित्वसिद्धौ [22]"इसुसोः सामर्थ्ये' इति समर्थग्रहणानर्थक्यप्रसङ्गाच्च। तस्मात् [23]प्रकृते द्वयमेव संभवतीति द्वयोक्तिः। संशयमाक्षिपति — **नन्विति**। **युक्तेति**। अधिकारपरिभाषयोरित्यादिः। 'स्थितस्य गतिः' इति न्यायेनाह — **अधिकारपक्ष इति**। 'अन्यः' इत्यत्र

---

[1] इत्यनेनान्वयविरोधः — ऋ.
[2] प्रदीपे 'सामान्यविहितानाम्' इत्यत्र 'सामान्येन विहितानाम्' इत्यन्नंभट्टपाठ इति भाति।
[3] पा. सू. ४. १. २.
[4] पा. सू. ४. १. २.
[5] पा. सू. २. ३. २.
[6] पदविभक्तित्वाभावेऽपि — ऋ.
[7] पा. सू. २. १. २.
[8] पा. सू. २. १. ४.
[9] 'पराङ्गवद्भावस्य च' इति नास्ति — अ.
[10] पा. सू. २. ३. ४.
[11] चकारो न दृश्यते प्रदीपे। चकारसहितः पाठोऽभिमत इति भाति।
[12] पा. सू. १. ३. ६०.
[13] पा. सू. १. ३. १७.
[14] महाभाष्यम् १. ३. ६०.
[15] 'भवति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — अ.
[16] पा. सू. १. ३. १७.
[17] कर्तृत्वम् — अ.
[18] पा. सू. ३. १. ८८.
[19] महाभाष्यम् ३. १. ८८.
[20] पोषान् पुष्यति — अ, ऋ.
[21] पा. सू. ८. १. १६.
[22] पा. सू. ८. ३. ४४.
[23] प्रकृतिद्वयमेव — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हेतुः — **आद्येनेति**। 'प्रतियोगमुपस्थित्यर्थः' इति वक्तव्यम् , 'अनिर्देशार्थः' इति कथमुक्तम्, अत आह — **स्वरूप इति**। **स्वरूपेति**। प्रतियोगमुपस्थितिः स्वरूपम्। [1]फलत्वमेवाह — **अधिक्रियमाणस्येति**। सर्वशब्दस्य संकोचमाह — **लिङ्गेनेति**। **अधिकारो नामेति**। [2]'कुप्वोः ≍क≍पौ च' इत्यत्रत्यमिदम्। एकश्चानुकृष्टोऽधिकारः, द्वितीयः स्वरितलिङ्गेन, तृतीयः परिभाषारूपः। संज्ञातिदेशयोरपि परिभाषाव्यवहारो [3]दृष्ट इत्याह — **तच्चेति**। [4]'निपात एकाजनाङ्' इति सूत्रे इदमुक्तम्। अधिकारपरिभाषयोः [5]स्वरूपविशेषस्योक्तत्वात् पुनः प्रश्नायोगः, अत आह — **कस्मिन्निति**। स्वरशब्दस्य स्वरितगुणार्थकस्य मत्वर्थीयाकारान्तस्य [6]'तत्करोति' इति णिचि तव्यप्रत्यये 'स्वरयितव्यम्' इति रूपमित्यभिप्रेत्य विवक्षितार्थमाह — **स्वरितेति**। यद्वा, स्वरितपरस्वरशब्दस्य पूर्ववण्णिचि भावे तव्यप्रत्यय [7]इत्याह — **तत्रेति**। क्रियमाणगुणस्य क्रियात्वं विवक्षित्वा 'गुणः क्रियारूपेण' इत्युक्तम्। [8]**श्वेतितव्य इति**। आचारक्विबन्तात् तव्यः। 'श्वेतयितव्यः' इति पाठस्तु स्पष्टः। अस्मिन् पक्षे लाघवमप्याह — **पदविधीति**। इतरस्मिन् पक्षे कर्तव्यमिति गौरवं सूचयन् सर्वपदसंकोचमाह — [9]**यानीति**। 'तानि सर्वाणि' इत्ययुक्तम्, परिभाषान्तरेऽदर्शनात्, अत आह — [10]**अन्यासु चेति**। अन्यास्वपीत्यर्थः। द्वैतपदं संशयपरतया द्वेधा व्याचष्टे — **द्वयोरिति**। तत्र भवमित्युभयत्र विषयसप्तमी। **यत्र** यस्मिन्नर्थे प्रतिपाद्ये। अजहत्स्वार्था वृत्तिरिति पक्षे — **उपसर्जनीभूतेति**। जहत्स्वार्था वृत्तिरिति पक्षे — **निवृत्तेति**। उभयत्र हेतुः — [11]**परेति**। 'निवृत्त' इत्यत्र 'परार्थोपादानात्' इति हेतुः, 'उपसर्जनीभूत' इत्यत्र 'प्रधानार्थोपादानात्' इति विवेकः। 'कार्याः शब्दाः' इति दर्शने इदं कल्पद्वयमुक्तम्, नित्यशब्ददर्शने त्वाह — **व्यर्थानीति**। राजपुरुष इत्यत्र राजोपसर्जनकप्रधानपुरुषाभिधायित्वमाद्ये कल्पे। पदद्वयमपि स्वार्थं परित्यज्य राजविशिष्टं पुरुषं [12]प्रतिपादयति द्वितीये। राज्ञः पुरुष इति पदद्वयापेक्षया राजपुरुष इति शब्दान्तरं विशिष्टार्थाभिधायकम्, सादृश्यात्तु पदद्वयत्वभ्रमः, वस्तुतो न पदद्वयं नापि तदर्थद्वयमिति तृतीयः कल्प इति भेदो ज्ञेयः। **सः** तदर्थाभिधानपूर्वः, अभिधानाभिधेययोरभेदविवक्षया 'सः' इत्युक्तम्। संभावितेष्वनेकेषु पक्षेषु निर्णय इत्युच्यत इति वदन् 'अभिन्नतरकम्' इति पदसूचितां षट्पक्षीं दर्शयति — **एकार्थीभाव इति**। **द्विविधमिति**। तथा च प्रत्येकपक्षोक्तदोषाभावः। **एवमिति**। अधिकारपदस्थाने परिभाषापदप्रक्षेपे सतीत्येवंशब्दार्थः। [13]अभिन्नतरद्वयव्यावर्त्यमाह — **उभयविध इति**। तत्र हेतुः — **भिन्नेनेति**। अर्थे भेदेनेति यावत्। तरबर्थमाह — **व्यपेक्षायामपीति**। दोषाभावमेवाह — **तत्रेति**। **कारकेति**। कर्मत्वादेः क्रियापेक्षतया क्रियाकारकयोर्व्यपेक्षाया अनुक्ताया अपि सत्त्वात् यत्क्रियाकर्म यत् तत्प्रयोगे

---

[1] फलमेवाह — अ.

[2] पा. सू. ८. ३. ३७.

[3] 'दृष्टः' इति नास्ति — अ.

[4] पा. सू. १. १. १४.

[5] स्वरूपविषयस्योक्तत्वात् — अ.

[6] चुरादिगणसूत्रं प्रातिपदिकाद्धात्वर्थे इत्यस्य प्रपञ्चभूतम्।

[7] 'इत्याह' इत्यस्यानन्तरं 'यद्वेति' इत्यधिकम्–अ.

[8] प्रदीपे 'श्वेतो गुणः श्वेतत इति' इत्यत्र 'श्वेतो गुणः श्वेतितव्य इति' इत्यन्नंभट्टपाठ इति भाति।

[9] प्रदीपे 'यावन्ति पदकार्याणि' इत्यत्र 'यानि पदकार्याणि' इति पाठोऽन्नंभट्टस्येति प्रतीयते।

[10] प्रदीपे 'अन्यास्वपि परिभाषासु' इत्यत्र 'अन्यासु च परिभाषासु' इत्यन्नंभट्टपाठ इति भाति।

[11] एतत्प्रतीकधारणाद् उपरि प्रतिपादनग्रन्थाच्च प्रदीपे 'निवृत्तस्वार्थानि वा' इत्यस्यानन्तरं 'परार्थोपादानात् प्रधानार्थोपादानाद्व्यर्थानि स एकार्थीभावः' इति पाठोऽन्नंभट्टाभिसंहित इति भाति।

[12] प्रतिपादयतीति द्वितीयकल्पे तु राज्ञः — ऋ.

[13] अभिन्नपदद्वयव्यावर्त्यमाह — अ; अभिन्नपदव्यावर्त्यमाह — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]'तत्कर्मणि द्वितीयेत्यर्थलाभान्नाधिकारेण प्रयोजनमित्यर्थः। [2]**युक्तेति**। [3]"अन्तरान्तरेणयुक्ते' [4]"वषड्चोगाच्च' इत्यादावित्यर्थः। **क्वचिदिति**। [5]"पृथग्विनानानाभिः' इत्यादौ। [6]**एतदनुपस्थाने** समर्थपरिभाषानुपस्थाने। परिभाषायां बहूनि प्रयोजनानीत्याह — **परिभाषायामिति**। गौरवं प्रामाणिकत्वान्न दोषायेत्याह — **एकेति**। **इह** समर्थपरिभाषायाम्। **अन्यत्र** [7]"न चवाहाहैवयुक्ते' [8]"इसुसोः सामर्थ्ये' इत्यादौ। ननु प्रातिपदिकात् तद्धितविधानस्य पदविधित्वाभावेनास्या अनुपस्थानात् कथमकर्तव्यकरणम्, अत आह — **घकालेति**। एषु कालवाचिनः सप्तम्या अलुग्वा। प्राह्णेतरे, प्राह्णेतमे। सुबन्तात् तद्धितानुत्पत्तौ घे परतः सप्तम्या एवाभावादलुग्वचनं सुबन्तात्तद्धितोत्पत्तिं सामान्येन ज्ञापयतीत्यर्थः। कर्तव्याकरणदोषः पाक्षिक इत्याह — **पञ्चकेति**। **नास्तीति**। अतस्तद्दर्शने समर्थादिति वक्तव्यमित्यर्थः। **त्रिकादीति**। आदिना द्विकग्रहः। [9]तदागमन्यायेन स्त्रीत्वस्य ङ्यादिवाच्यत्वदर्शने स्वार्थद्रव्ये एव प्रातिपदिकार्थः। लिङ्गसंख्याकारकाणि प्रत्ययार्थः। प्रत्ययोत्पत्तये समर्थग्रहणे चोदिते प्रत्ययानन्तरभाविसामर्थ्येन कथं तत्समाधानम्, अत आह — **यदीति**। [10]**अधिकार इति**। 'कर्मण्यण् समर्थात्' इत्येवंरूप इत्यर्थः। **असमर्थानामिति**। 'पुत्रो राज्ञः पुरुषो देवदत्तस्य, वस्त्रमुपगोरपत्यं चैत्रस्य' इत्यादीनामित्यर्थः। **असामर्थ्ये** देवदत्तो गृह्णाति कुम्भम्, करोति कटं यज्ञदत्तः, इत्यादावित्यर्थः। सुज्ञानत्वमेवाह — **यत इति**। **उपपदमिति**। पदशब्दः परिभाषोपस्थानार्थ इत्यर्थः॥

रत्नप्रकाशः

श्रीशिवरामेन्द्रसरस्वतीकृतः

[२, ४९१–४९६]

(रत्नप्रकाशः) [11]**क इति**। भावसाधनः कर्मसाधनो वेत्यर्थः। अर्थभेदेऽपि शब्दभेद इति मतेऽर्थभेदप्रयुक्तं शब्दभेदमादाय प्रश्न उपपन्नः। पदस्य विधिः पदविधिरित्युभयसाधारणः [12]शेषषष्ठ्या समासः। **विपूर्वाद्धाञ इति**। यद्यपि 'विध विधाने' इति तौदादिकादौणादिकेन्प्रत्ययेऽपि सिध्यत्ययम्, तथापि यावदष्टाध्यायीस्थेनाविशेषरूपमिति 'विपूर्वाद्धाञः' इत्युक्तम्। एतेन 'स्वरे चानयोर्भेदः, इन्प्रत्ययान्तस्याद्युदात्तत्वात्, किप्रत्ययान्तस्यान्तोदात्तत्वात्। तस्यैव प्रयोगदर्शनमुत्तरे हेतुः' इति कैयटो निरस्तः। एतादृशक्लिष्टकल्पनया भाष्यव्याख्याने मानप्रयोजनयोरभावात्। एकश्रुत्या सूत्रपाठस्य प्रायिकत्वेन त्रैस्वर्येण [13]स चेदपि षष्ठीसमासप्रयुक्तान्तोदात्त-

---

[1] तत्तत्कर्मणि — ऋ.
[2] यत्रेति — अ, ऋ.
[3] पा. सू. २. ३. ४.
[4] पा. सू. २. ३. १६.
[5] पा. सू. २. ३. ३२.
[6] तदनुपस्थाने — अ.
[7] पा. सू. ८. १. २४.
[8] पा. सू. ८. ३. ४४.
[9] 'शब्दवत्तूपलभ्यते तदागमे हि तद् दृश्यते तस्य ज्ञानं हि यथान्येषाम् मीमांसासूत्रम् ४. १. १५. इत्यत्र प्रतिपादितोऽयं न्यायः।
[10] प्रदीपे 'यत्नः कर्तव्यः स्यात्' इत्यत्र 'अधिकारः कर्तव्यः स्यात्' इत्यन्नंभट्टपाठ इति भाति।
[11] 'क इति' इत्यादि 'अनादरात् तन्निमित्त' इत्यन्तं नास्ति — प.
[12] शेषषष्ठ्याः समासः — ब.
[13] सूत्रपाठश्चेदपीत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वसंभवेन क्वचिद् वेदे आद्युदात्तसंभवेन लोकेऽपि कस्यचिदाद्युदात्तप्रयुयुक्षायाः संभवेन चान्तोदात्तस्यैव प्रयोग इत्यवधारणानौचित्याच्च। **कर्मसाधन इति**। भावसाधनपक्षे सुवन्तस्य तिङन्तस्य वा विधानमप्रसिद्धमित्यसंभवदुक्तिकं सूत्रं स्यादिति भावः। विधेयविशेषजिज्ञासया पृच्छति — **किं पुनरिति**। **समास इति**। समाससंज्ञेत्यर्थः। **विभक्तिविधानमिति**। विभक्तेर्विधिर्नियमः [1]"कर्मणि द्वितीया' इत्यादिना क्रियमाणः। **पराङ्गवद्भाव इति**। क्रमादरे फलविशेषाभावादष्टाध्यायीक्रमानुसारेण प्रथमतोऽनिर्देश उपपन्नः। एतेन 'अनन्तरस्यापि पराङ्गवद्भावस्याल्पविषयत्वादनादरात् तन्निमित्तग्रहणाच्चातिप्रसङ्ग[2]निरासस्य सिद्धत्वान्मुख्यप्रयोजनत्वाभावात् पश्चान्निर्देशः कृतः' इति कैयटो निरस्तः। अल्पविषयत्वस्यानादरहेतुत्वायोगात्। [3]'तन्निमित्तग्रहणम्' इति वचनमाश्रित्योत्सर्गवचनप्रयोजनत्वनिराकरणानौचित्यात्। प्रयोजनत्वाभावे आदाविवान्तेऽपि निर्देशानौचित्यात्। अपूर्ववचनान्तरमपि विना सिध्यतो विभक्तिविधानस्य मुख्यप्रयोजनत्वाभ्युपगमे पराङ्गवद्भावस्य तदनभ्युपगमे मानाभावाच्च। यदप्युक्तं तेनैव 'तत्र समासशब्देन संज्ञा वोच्यते समुदायो वा संज्ञी' इति। तदपि न, समुदायस्याविधेयत्वात् संज्ञापक्षपरित्यागे मानप्रयोजनयोरभावाच्च। यदप्युक्तं तेनैव "अथाप्येकवाक्यताश्रयणेन विभक्तीनां विधानं, तथापि पदान्तरसंबन्धेन यासां विधानम् [4]'अन्तरान्तरेण युक्ते' [5]'नेर्विशः' इति, तदाश्रयेण पदविधित्वमस्त्येव। तथा चोक्तम् — [6]'निरपि पदं विशिरपि पदमिति" इति। तदपि न, [7]"कर्मणि द्वितीया' "[8]अनुदात्तङित आत्मनेपदम्' इत्यादीनां सुप्तिङविध्येकवाक्यतापक्षाश्रयणे मानप्रयोजनयोरभावात्, विधानशब्दानर्थक्यापातात्, नियमपक्षस्यैव सिद्धान्तितत्वेन तत्परित्यागानौचित्याच्च। यदप्युक्तं तेनैव 'तत्र विभक्त्यवच्छिन्नत्वाद्विशिष्टविधानं कर्म सामान्यविधानक्रियाया भवति। यथोक्तम् — [9]'सामान्यपुषेरवयवपुषिः कर्मेति' इति। तदपि न, [10]"कषादिषु यथाविध्यनुप्रयोगः' इति वचनबलात् कथञ्चित् सामान्यपुषेरवयवपुषिः कर्मेत्यस्य संभवेऽपि प्रकृते तादृशक्लिष्टकल्पना श्रयणे मानप्रयोजनयोरभावात्। **किं पुनरिति**। यद्यपि पदविधिग्रहणसामर्थ्यात् परिभाषेयमित्येव निर्णयः संभवति, तथापि समर्थपदमात्रमधिकर्तव्यं वा, यथाश्रुतं सूत्रं परिभाषात्वेनाश्रयणीयं वेति प्रश्नोपपत्तिः। तं प्रष्टारमन्यः पृच्छति — **कः पुनरिति**। **तस्यानिर्देशार्थ इति**। यः शब्दः स्वरितत्वयुक्तो निर्दिष्टः स उत्तरत्रानुवर्तत इति तस्य पुनःपुनरुच्चारणं न कर्तव्यमिति लाघवमिति भावः। **कः पुनरत्रेति**। लाघवगौरवनिर्णयाय प्रश्नोऽयम्। **स्वरयितव्यमिति**। स्वरितत्वयुक्तं पठनीयमित्यर्थः। पदविधिग्रहणं च न कर्तव्यमिति शेषः। तथा च शब्दकृतं लाघवमित्युक्तं भवति। **सर्वमपेक्ष्यमिति**। सर्वविषयसमर्पकं पदविधिग्रहणं कर्तव्यम्। तथा च तत्प्रयुक्तं गौरवमिति भावः। **द्वैतमिति**। द्वयोर्भावो द्विता, तत्र भवं द्वैतम्, संशय इत्यर्थः। [11]'सामान्ये नपुंसकम्। स हि विषयतासंबन्धेन स्थाणुत्वपुरुषत्वादिरूपद्वितायां भवति। यद्यपि 'घटपटौ' इत्यादिसमूहालम्बनात्मकमपेक्षाकृतं द्वैतं भवति, तथाप्यौचित्यात् संशयग्रहणम्। एतेन 'अथवा द्वाभ्यामितं प्रकारद्वयेन विरुद्धत्वाद् भिन्नाधारवर्तिना युक्तं वस्तु द्वीतम्, तत्र भवं द्वैतम्, तदेव संशयज्ञानम्' इति निरस्तम्। एकस्य वस्तुनो विरुद्धधर्मद्वययोगस्यासंभवेन तदाश्रयेण द्वैत-

---

[1] पा. सू. २. ३. २.
[2] निरासस्यासिद्धत्वात् — प.
[3] का. वा. २. १. २–२.
[4] पा. सू. २. ३. ४.
[5] पा. सू. १. ३. १७.
[6] महाभाष्यम् १. ३. ६०.
[7] पा. सू. २. ३. २.
[8] पा. सू. १. ३. १२.
[9] महाभाष्यम् ३. १. ८८.
[10] पा. सू. ३. ४. ४६.
[11] वार्तिकपाठः ५०४३ [कैयटाद्युक्तवार्तिकपाठः] कौमुदीपरिशिष्टे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शब्दव्युत्पादनानौचित्यात्। **एकार्थीभाव इति।** द्विविधस्यापि सामर्थ्यस्य लक्षणं वक्ष्यति भगवानेव। एतेन 'यत्र पदान्युपसर्जनस्वार्थानि [1]निवृत्तस्वार्थानि वा प्रधानार्थोपादानाद्द्व्यर्थान्यर्थान्तराभिधायीनि वा स एकार्थीभावः' इति निरस्तम्। अनेकार्थानामेकार्थरूपवृत्त्यात्मकत्वेन संपद्यमानताया एवैकार्थीभावस्वरूपस्य भगवता वक्ष्यमाणत्वेन जहत्स्वार्थाजहत्स्वार्था वा वृत्तिरित्यवैयाकरणाभिमतवृत्तिलक्षणयोर्भगवतैव निराकरिष्यमाणत्वेन च तदबुद्ध्वावैयाकरण[2]मतमवलम्ब्य विशेषणविशेष्यभावव्यत्ययाश्रयणेन [3]चतुर्विधैकार्थीभाववर्णने चातुर्याभावात्। **समास एकः संगृहीत इति।** सनादिकृत्तद्धितवृत्तिष्वेकार्थीभावसंभवेऽपि विभक्तिविधौ तदसंभवेनानभिहित[4]चरणेनास्याधिकारस्य निर्वर्तितत्वादिति भावः। पराङ्गवद्भावेन त्वधिकारविच्छेदो न भवति, अधिकारानर्थक्यापत्तेः। एतेन [5]"समास एवैकार्थीभाव[6]संभवादिति भावः' इति निरस्तम्। समासेतरवृत्तौ वाक्ये चैकार्थीभावसंभवात्। **विभक्तिविधानं पराङ्गवद्भावश्चासंगृहीत इति।** वाक्ये [7]वक्ष्यमाणलक्षणे वैयाकरणैर्विशिष्टैकार्थबोधकताया अभ्युपगमेऽपि तदवयवानां द्वित्राणां 'परशुना वृश्चन्, अन्तरा त्वां च' इत्यादीनामेकार्थपरत्वानभ्युपगमादिति भावः। **संगृहीत इति।** पराङ्गवद्भावमात्रविषयत्वेऽधिकारानर्थक्यात् [8]समासचरणद्वयव्यवहितेऽपि [9]विभक्तिचरणे समर्थपदमनुवर्तिष्यत इति भावः। **समासस्त्वेकोऽसंगृहीत इति।** वृत्तौ वैयाकरणैर्व्यपेक्षालक्षणसामर्थ्यानभ्युपगमादिति भावः। तस्मिन् द्विविधे पक्षे साधारणं दोषमाह — **अन्यत्र खल्वपीति। कर्तव्यानीति।** अस्याधिकारस्य कथंचिदनभिहितचरणसमाप्तिपर्यन्तमनुवृत्तावपि तदूर्ध्वमनुवृत्त्ययोगादिति भावः। एवं च समाससंग्रहाय द्विविधसामर्थ्याश्रयणेऽप्यधिकारपक्षेऽन्यत्र युक्तग्रहणादिकं कर्तव्यमित्ययं दोषः स्थित एवेत्युक्तप्रायम्। **सर्वः संगृहीत इति।** तथा चान्यत्र युक्तग्रहणादिकं न कर्तव्यमित्यस्मिन् पक्षे गुण इति भावः। दोषमाह — **समासस्त्वेक इति।** उक्तो भावः। तदेवं पक्षचतुष्टयं निरस्य सूत्रकारसंमतं पक्षमाह — **तत्रैकार्थीभाव इति। अभिन्नतरकमिति।** द्विविधसामर्थ्याश्रयणप्रयुक्तः सूत्रभेदस्तृतीयपक्षे भवतीति तदपेक्षया चतुर्थपक्षे सूत्रमभिन्नार्थकं भवतीति तदपेक्षयास्य प्रकर्षो निर्दोषत्वप्रयुक्तः। नन्वन्यत्र युक्तग्रहणादिकमस्मिन्नपि पक्षे कर्तव्यमेव भवतीति कथमस्य पक्षस्य निर्दुष्टतेति चेन्न, द्विविधसामर्थ्याश्रयेणास्य परिभाषात्वाश्रयणमिति षष्ठे पक्षे 'सापेक्षमसमर्थम्' इति निषेधस्योभयविधसामर्थ्यविषयत्वापत्त्या 'देवदत्तस्य सर्पिष्पिबति यज्ञदत्तः' इत्यादौ षत्वासिद्ध्या तन्निषेधस्यैकार्थीभावमात्रविषयत्वसिद्ध्येऽस्य पञ्चमस्य पक्षस्याश्रयणीयत्वे सत्यन्यत्र सूत्रकृतैव कृतस्य युक्तग्रहणादेरत्रादोषत्वात्। षष्ठे चतुर्थे च पक्षेऽन्यत्र [10]"व्याख्यानतो विशेषप्रतिपत्तिः' इति वा प्रकारान्तरेण वा क्वचित् किञ्चित्सामर्थ्याश्रयेणोक्तदोषपरिहारेऽपि[11] युक्तग्रहणादिकं न कर्तव्यं भवतीत्येतावन्मात्राशयेनाद्यपक्षेष्वभ्युच्चयपरतया तस्य दोषत्वकथनाच्च। एवं चान्यत्र सामर्थ्ययुक्तग्रहणादिकं कुर्वता सूत्रकारेणात्रैकार्थीभावलक्षणमेव सामर्थ्यमाश्रितम्, तस्य च 'सापेक्षमसमर्थम्' इति निषेधश्चाश्रित इति कल्पनापि युक्ता सुधियाम्। ज्ञापकसिद्धस्यासार्वत्रिकत्वात् 'देवदत्तस्य गुरुकुलम्' इत्यादौ संबन्धिशब्दस्य सापेक्षत्वेऽपि सामर्थ्यमस्तीति समासः सिध्यति। तादृशेन

---

[1] 'निवृत्तस्वार्थानि वा' इत्यस्यानन्तरं 'प्रधानार्थानि वा' इत्यधिकं दृश्यते — प, ब. तत् प्रदीपे नोपलभ्यते।

[2] अवैयाकरणेति छेदः।

[3] चतुर्थैकार्थीभाव — प.

[4] अनभिहिताधिकारीयेण तृतीयपादेनेत्यर्थः।

[5] 'तत्रैव' इत्यस्यार्थानुवादः।

[6] 'सद्भावात्' इति प्रदीपे पाठो दृश्यते। 'संभवात्' इति रत्नप्रकाशकृत्पाठ इति भाति।

[7] आख्यातं साव्ययेत्यादिनेत्यादिः।

[8] समासविधायकपादद्वयेत्यर्थः।

[9] विभक्तिविधायकपाद इत्यर्थः।

[10] परिभाषा १.

[11] अपिशब्दोऽधिको भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]सूत्रकारेणान्यत्रैतदविषये व्यपेक्षालक्षणं सामर्थ्यं तस्यैतस्य च 'समानाधिकरणमसमर्थम्' इति निषेध इति सूचितमित्यपि कल्पयितुं शक्यते, तदेव सूचितमिदं न सूचितमिति विनिगन्तुमशक्यत्वात्। तत्रापि ज्ञापकसिद्धस्यासार्वत्रिकत्वादेव 'सर्पिष्पीयते' इत्यादावाख्यातवाच्यं समानाधिकरणं समर्थमेव भवति। ननूक्तप्रकारेण व्यवस्थितं सामर्थ्यं क्वचित् प्रतिषिध्यत इति सामान्यत एव ज्ञापनं संभवति, न तु सापेक्षत्वसमानाधिकरणत्वरूपविशेषेणेति चेत्, सत्यम्, [2]'व्याख्यानतो विशेषप्रतिपत्तिः' इति विशेषरूपता ज्ञाप्यस्य ज्ञेया। न चैतावता तयोरपूर्ववचनत्वमभ्युपगन्तुं युक्तम्। पराङ्गवद्भावे तु तन्निमित्तग्रहणमपूर्वमभ्युपगम्यमेवेत्यलं प्रसक्तानुप्रसक्तेन। प्रकृतमनुसरामः। **एवमपीति**। प्रकृतसूत्रस्योक्तप्रकारेणाभिन्नतरकत्वेऽपीत्यर्थः। सूत्रकृतो दोषोऽस्त्येवेति शेषः। स क इत्यत आह — **क्वचिदिति**। **अकर्तव्यं तावदिति**। [3]'घकालतनेषु कालनाम्नः' इति सप्तम्या अलुग्विधानेन सुबन्तात् तद्धित इति ज्ञापितत्वेन [4]तद्धितविधेश्च पदविधित्वेन प्रकृतसूत्रेणैव तत्रेष्टसिद्धेरिति भावः। **कर्तव्यं न क्रियत इति**। [5]'तत्रोपपदं सप्तमीस्थम्' इति कर्मादिवाचकप्रातिपदिकस्यैवोपपदसंज्ञा विहितेति मन्यते। [6]'समर्थानाम्' इत्यस्यान्यार्थपरतया सार्थक्यं वक्ष्यामीत्याशयेन तदुत्तरमुपेक्ष्य द्वितीयस्योत्तरमाह — **ननु चेति**। **गम्यते तत्र सामर्थ्यमिति**। प्रकृतसूत्रविधेयं **सामर्थ्यं** समर्थाश्रितत्वं, **तत्र** [7]'कर्मण्यण्' इत्यादौ, **गम्यते** युज्यत इत्यर्थः। तथा च तत्र समर्थग्रहणं न कर्तव्यमेवेति शेषः। उपोच्चारितं पदमुपपदमित्यन्वर्थसंज्ञाविधानसामर्थ्याद् विभक्त्यन्तस्यैवोपपदसंज्ञा विहितेति [8]'कर्मण्यण्' इत्यादेः पदविधित्वं ज्ञेयम्। एतेन 'पञ्चक[9]प्रातिपदिकार्थपक्षे प्रातिपदिकेनैव कर्मण उपादानान्नास्ति पदविधित्वम्। त्रिकादिपक्षे तु विभक्तिवाच्यत्वेन कर्मणः पदविधित्वादेतत्परिभाषोपस्थानान्नास्ति दोषः' इति निरस्तम्। कर्मत्वेन कर्मवाचक उपपद इत्यर्थस्य तत्राश्रयणे संभवप्रमाणयोरभावेनैकादिप्रातिपदिकार्थपक्षपञ्चकसाधारण्येनैवाक्षेपसमाधानयोरुभयोरुपपन्नत्वात्। यदप्युक्तम् 'यदि कुम्भकारशब्दः समर्थाभिधायी चासमर्थाभिधायी च स्यात् ततोऽसमर्थाभिधायिप्रयोगनिवृत्त्यर्थो यत्नः कर्तव्यः स्यात्, न त्वन्यथेति भावः' इति। तदपि न, असंबद्धप्रलापत्वात्। न ह्याक्षेप्त्रा तस्यासमर्थाभिधायित्वमुक्तम्, येन तदुपपद्येत। तमेतं भगवतो भावमविद्वान् यथाश्रुताक्षरार्थग्राह्याह — **सत्यमिति**। **स एवेति**। प्रत्यय एवेत्यर्थः। **समर्थादुत्पाद्य इति**। समर्थादेवोत्पाद्य इत्यर्थः। तथा चासमर्थादुत्पत्त्यभावाय तत्र समर्थग्रहणं कर्तव्यमेवेति मन्यते। सुबुद्धिभिः कैश्चित् स्वाशयो ज्ञात एवेति मन्दबुद्धि[10]कृताशङ्काया उत्तरमुपेक्षितं भगवता॥

[२, ४९६–५०५]

(**उद्द्योतनम्**) ननु प्रधान[11]प्रतिपादकत्वे प्रधानाङ्गत्वं वाच्यम्, [12]सामर्थ्यस्याविधेयत्वेनाप्रधानत्वात् समर्थग्रहणं कथं प्रधानाङ्गम्, अत आह — **यद्यपीति**। 'समर्थपदस्य प्राधान्यमुच्यते' इति

---

[1] सूत्रकारेणान्यत्रैतद्विषये — प.
[2] परिभाषा १.
[3] पा. सू. ६. ३. १७.
[4] तद्धितविधौ पदविधित्वेन — प.
[5] पा. सू. ३. १. ९२.
[6] पा. सू. ४. १. ८२.
[7] पा. सू. ३. २. १.
[8] पा. सू. ३. २. १.
[9] प्रातिपदिकपक्षे — प, ब.
[10] मताशङ्कायाः — प.
[11] प्रतिपादकत्वेन प्रधानाङ्गत्वं — अ.
[12] सामर्थ्यस्याविधीयमानत्वेनाप्रधानत्वात् — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दर्शनात् [1]''प्रधानाङ्गपर्यनुयोग' इत्यपि क्वचित् पाठः साधुः। [2]**तस्य** [3]पदविधिरित्यस्य। ननु 'समस्यते' इत्ययुक्तम्, न ह्यश्लिष्टयोः संश्लेषः क्रियते, समासपदस्यापि नित्यत्वात्। [4]न चाक्रियारूपा संज्ञा समस्यत इति वक्तुं शक्या, अत आह — **यद्यपीति**। असत्येतस्मिन् [5]सूत्रे किमनिष्टम्, अत आह — **असतीति**। ननु भवतु समाससंज्ञा, अनर्थकत्वेन प्रातिपदिकसंज्ञाया अभावात् [6]''सुपो धातु' इति विभक्तेर्लुगभावेन [7]प्रयोगवैरूप्याभावात्, अत आह — **अनर्थकस्यापीति**। **वचनात्** [8]''कृत्तद्धित' इति सूत्रे समासग्रहणात्। ननु तत्र समासग्रहणं वाक्यव्यावृत्तये नियमार्थमित्युक्तम्, तथा चानर्थकस्य कथं तेन प्रातिपदिकसंज्ञा, अत आह — **विध्यर्थत्वेति**। तर्हि [9]वाक्यव्यावृत्तिः कथम्, अत आह — **वाक्यस्येति**। 'वाक्यं न प्रातिपदिकम्' इति वचनं कर्तव्यमित्यर्थः। तथा च 'पश्य देवदत्त कष्टम्, श्रितो विष्णुमित्रः' इत्यत्र द्वितीयाया लोपप्रसङ्ग इति भावः। ननु समुदायस्यानर्थक्ये संख्याकारकादौ विधीयमानविभक्तेरनुत्पादात् केवलप्रातिपदिकस्य प्रयोगानर्हत्वादनर्थकसमुदायस्य प्रातिपदिकत्वं न भविष्यतीत्यत आह — **एकार्थीभावेति**। समुदायादनुत्पत्तावप्यवयवादुत्पद्यते विभक्तिः। श्रित इत्यस्य कष्टमित्यनेन [10]समासावयवेनान्वयाभावेऽपि गुरुकुलमित्यनेनान्वययोग्यार्थ[11]प्रतिपादकत्वाद्विभक्तिरुत्पद्यत इत्यर्थः। यद्यपि संबन्ध्यन्तरानन्वयेऽपि प्रातिस्विकार्थमादाय 'दश दाडिमानि' इत्यादाविव विभक्त्युत्पत्तिरविरुद्धा, तथाप्यत्र वाक्यार्थसंभवात् तद्योग्यविभक्तिसमर्थनं कृतमिति ज्ञेयम्। न च [12]कृत्तद्धितसूत्रेऽर्थवद्ग्रहणानुवृत्त्यानर्थकसमुदायस्य न प्रातिपदिकत्वमिति वाच्यम्, अनुवृत्तौ मानाभावात्। तथापि [13]'समासस्य' इत्यन्तोदात्तत्वस्य दुर्वारत्वात् तत्र समाससंज्ञानिवृत्तये परिभाषावश्यकीति भावः। ननु शङ्कुलया कृतत्वाभावादत्र[14] समासो न स्यात्, अत आह — **तृतीयान्तेति**। उपलेनेत्येतत्कृतत्वसत्त्वादित्यर्थः। प्राप्तिमाह — **अस्त्येवेति**। कष्टद्वारा [15]महत्त्वस्य श्रयणान्वयात्। अत्र समाससंज्ञायां दोषानाह — **यदीति**। **इति स्यादिति**। [16]तच्च नेष्टमित्यग्रे व्यक्तीभविष्यति। **मध्यमेति**। आद्ययोः समासाभावेन महदित्यस्य कष्टमिति नोत्तरपदम्, तथा च 'महत्कष्टश्रितः' इत्येव स्यादित्यर्थः। **अथापीति**। [17]त्रयाणां द्वितीयासमासे पश्चादाद्ययोः कर्मधारये कष्टस्याप्युत्तरपदत्वादात्वे 'महाकष्टश्रितः' इति[18] रूपं सेत्स्यतीत्यर्थः। [19]''समासे' इत्यनन्तरमात्वं स्यादित्यनुषञ्जनीयम्। ननु द्वयोः समासे महाकष्टशब्दः [20]'समासस्य' इत्यन्तोदात्तः स्यात्, अत आह — **य एवेति**। **अहीन इति**। अहीनवाचिनि समासे क्तान्त उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरं स्यात्। कष्टश्रितः, कष्टशब्दोऽन्तोदात्तः[21]। अहीने किम्। अरण्यातीतः। हीनं त्यक्तं विभक्तमिति पर्यायः। **स एव**

---

[1] प्रधानांशपर्यनुयोग — ऋ.

[2] प्रदीपे 'सामर्थ्योपस्थानार्थत्वादस्य' इत्यत्र 'सामर्थ्योपस्थानार्थत्वात् तस्य' इत्यन्नंभट्टपाठ इति भाति।

[3] पदविधित्वस्य — अ.

[4] सा च क्रियारूपा — अ.

[5] 'सूत्रे' इत्यस्यानन्तरं 'तदत्र' इत्यधिकम् — ऋ.

[6] पा. सू. २. ४. ७१.

[7] प्रयोगे वैरूप्याभावेनात आह — अ.

[8] पा. सू. १. २. ४६.

[9] वाक्यनिवृत्तिः — ऋ.

[10] समासावयवत्वाभिमतेनेत्यर्थः।

[11] 'अर्थ' इति नास्ति — अ.

[12] पा. सू. १. २. ४६.

[13] पा. सू. ६. १. २२३.

[14] तत्र — अ.

[15] महत्त्वस्याश्रयणान्वयात् — अ.

[16] तच्च कष्टमित्यत्र व्यक्तीभविष्यति — अ.

[17] 'त्रयाणाम्' इत्यस्यानन्तरम् अपिशब्दोऽधिकः।

[18] इत्यस्या रूपं सिध्यतीत्यर्थः — अ.

[19] प्रदीपे 'द्वयोः समासः' इत्यत्र 'द्वयोः समासे' इत्यन्नंभट्टपाठः स्यादिति भाति।

[20] पा. सू. ६. १. २२३.

[21] क्तप्रत्ययान्तत्वेन प्रत्ययस्वरेणेत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ष्टकाराकारस्योदात्तस्वर एव। तथा च पश्चात् पदद्वयस्य कर्मधारयेऽपि स्वरभेदो नास्तीत्यर्थः। त्रयाणां समासानन्तरं द्वयोः समासे स्वरभेदमुपपादयति — **महारण्यमिति**। **थाथादीति**। [1]"थाथघञ्क्ताजवित्रकाणाम्'। थाथाद्यन्तानां गतिकारकोपपदात् परेषामन्त उदात्तः स्यात्। तथा च 'महारण्यातीतः' इत्यत्र तकाराकारस्योदात्तः सिध्यति। स एवेष्यते। अत्र हीनार्थत्वात् समासस्य [2]'अहीने द्वितीया' इति महारण्यशब्दस्यान्तोदात्तत्वं न भवति। पदद्वयसमासे तु त्रिपदसमासानन्तरं कृते सति शिष्टत्वादरण्यशब्दस्यैवान्तोदात्तः स्यात्। स च नेष्यते। **पूर्वेति**। तत्र बहुव्रीह्यनन्तरं कर्मधारय इति कर्मधारयस्वर एव भवति। यद्यप्युत्तरपदे विधीयमानकर्मधारयस्य पश्चाद्भावो युक्तः, अत्र तु न तथा पौर्वापर्यनियामकमस्ति, तथापि द्वयोस्त्रयाणां च युगपत्समासद्वयेऽप्यविरोधादरण्यशब्दस्याप्यन्तोदात्तत्वं स्यादेवेति भावः। भाष्योदाहरणं समाधातुमाह — **अन्ये त्विति**। **नास्तीति**। [3]'सन्महत्' इति वा [4]'विशेषणं विशेष्येण' इति वा द्वयोः समासो वाच्यः। परस्परसंबन्धाभावे द्वयमपि नास्तीति [5]न समास इत्यर्थः। अत एव न युगपत्समास[6]द्वयमपि। न चैवं 'पूर्वशालाप्रियः' इत्यत्र कथं द्वयोः समास इति वाच्यम्, [7]'तद्धितार्थोत्तरपद' इति वचनसामर्थ्यात् तत्र तत्संभवादिति भावः। त्रिपदसमासे स्वरभेदोऽपीत्याह — **अहीन इति**। तथा च 'स एव स्वरः' इत्यप्ययुक्तमिति भावः। असामर्थ्यान्न भवतीति [8]न वाच्यमित्याह — **यथेति**। आद्ययोः समासानन्तरं तृतीयेन समासाङ्गीकारादित्यर्थः। ननु प्रधानश्रितार्थाभिधायित्वाद् द्वयोः परस्परसंबन्धाभावान्न समासः, अत आह — **श्रित[शब्द]मिति**। नन्वेकस्य पदस्य समासाभावात् 'कस्य' इत्येकवचनमयुक्तम्, अत आह — [9]**सामान्येनेति**। कस्येत्यादिः। [10]'कस्य' इति पदपरं न भवति, किं तु समुदायसाधारणैकमात्रपरमित्यर्थः। तद्विशदयति — **पदद्वयेति**। असामर्थ्यान्नेति शङ्कां निराह — **द्वयोरिति**। [11]अरुणान्यायेनेति भावः। न्यायानङ्गीकारे त्वाह — **कष्टस्यैव वेति**। **विवक्षितत्वादिति**। संज्ञाविधौ द्वयोरपि विशेषणत्वादिति भावः। **जातीति**। [12]जातिनिमित्तकयोः प्रत्ययाभिधानयोः सद्भावादित्यर्थः। 'यावत्येतत्' इत्यादिभाष्यतात्पर्यमाह — **तत्रेति**। **अप्रातिपदिकत्वात्** अनर्थकतयेत्यादिः। समुदायात् सुबनुत्पादेन सुबन्तसमुदायस्यासुबन्तत्वात् समासाभाव इत्यर्थः। ननु यथा 'ब्राह्मणो न हन्तव्यः' इति निषेधः समुदायेऽपि प्रवर्तते तथा प्रातिपदिकसमुदायात् प्रत्ययः सुबन्तसमुदायस्य च समासः कुतो न स्यात्, अत आह — **प्रत्ययस्येति**। [13]प्रातिपदिकादित्यादिः। **अवयवयोः** समस्यमानपदसमुदायावयवयोः। **आधारेति**। प्रत्ययस्य प्रातिपदिकमाधारः, अवयवौ च समुदायस्येति विवेकः। आधारशब्देनापि गुणत्वमेव स्पष्टीकृतम्। स्पष्टं च वैषम्यमाह — **ब्राह्मणेति**। तत्रोद्देश्यगतत्वाद् ग्रहवदेकत्वमविवक्षितमिति भावः। **शास्त्रार्थ इति**। समुदायहननस्य प्रत्येकहनननान्तरीयकत्वादेकैकहनन[14]प्रयुक्त-

---

[1] पा. सू. ६. २. १४४.
[2] पा. सू. ६. २. ४७.
[3] पा. सू. २. १. ६१.
[4] पा. सू. २. १. ५७.
[5] 'न' इति नास्ति — अ.
[6] द्वयमिति — अ; द्वयेऽपि — ऋ.
[7] पा. सू. २. १. ५१.
[8] 'न' इति नास्ति — अ.
[9] प्रदीपे 'सामान्यनिर्देशः' इत्यत्र 'सामान्येन निर्देशः' इत्यन्नंभट्टपाठ इति भाति।
[10] एकस्येति पदपरं — अ, ऋ.
[11] अरुणयेति तृतीयाश्रुत्या यथा क्रयणे आरुण्यस्य प्रथमतः करणत्वेनान्वयो मीमांसकैरुच्यते, तद्वन्महच्छब्दोत्तरद्वितीयाश्रुत्या महत्त्वस्य श्रयणे कर्मत्वमित्याशयः।
[12] जातिनिमित्ततया प्रत्ययाभिधानयोः — अ.
[13] प्रातिपदिकस्येत्यादिः — अ.
[14] 'प्रयुक्त' इति नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निषेधोल्लङ्घनस्य सत्त्वादेकत्वविवक्षानर्थक्यमित्यर्थः । ननु सापेक्षस्य न समास इत्येव वक्तव्यम्, असामर्थ्यवचनस्यापि समासाभावार्थत्वात्, [1]तद्द्वारा तत्प्रतिपत्तौ गौरवप्रसङ्गात्, अत आह — **न्यायोऽयमिति**। कष्टशब्दस्य श्रितापेक्षया गुणत्वं महदपेक्षया प्रधानत्वं च युगपद्विरुद्ध-मित्यर्थः। **प्राधान्यादेवेति**। अभिरूपापेक्षयापि पुरुषस्य प्राधान्याद्युगपद्गुणप्रधानत्वाभावादिति भावः। ननु वचनपक्षे नेदं समाधानम्, अत आह — **सामान्येति**। 'पुरुषो व्याघ्र इव शूरः' इत्यत्रापि शूरसापेक्षतया पुरुषस्यासामर्थ्यादिव समासाभावात् [2]'सामान्याप्रयोगे' इति व्यर्थं सत् सापेक्षमसमर्थमिति वचनस्य प्रधानव्यतिरिक्तविषयत्वं ज्ञापयतीत्यर्थः। **व्यतिरेके** संबन्धे । तर्हि गुरुदेवदत्तयोः संबन्धो न प्रतीयेत, अत आह — **अवयवेति** । गुरुरूपावयवेत्यर्थः । **समुदायेन** गुरुकुलेन, **अवयवं** [गुरुं,] **विशेषणं** देवदत्तस्येति विशेषणम् । संमतिश्लोके गुरुकुलादिना समुदायेन येषाम् देवदत्तादीनां संबन्ध इत्यन्वयः। **अवयवान्** गुर्वादीन्। शालिसापेक्षस्य किंशब्दस्य समासाप्राप्तिरुक्ता । तत्सापेक्षत्वमाह — **केषामिति** । वाक्यार्थं तावदाह — [3]**कस्मादिति**। पाटलिपुत्रस्यैकत्वात् प्रश्नायोगः, अत आह — **अनेकत्वादिति**। एकत्वेऽप्याह — **तदवयवाना-मिति**। पाटलिपुत्रशब्दस्तदवयवपर इत्यर्थः। [4]तत्रासामर्थ्ये किमनुपपन्नम्, अत आह — [5]**अत्रेति**। रोपधादीकारान्ताच्च प्राग्देशवाचिनो वृद्धाद्वुञ् स्याच्छैषिकः । नन्ववयवद्वारकः संबन्ध इत्युक्तम्, अत आह — **समुदायेति**। देवदत्तस्य गुरुकुलादिना सामीप्यादिसंबन्धस्यापि संभवाद् देवदत्तस्य गुरुसंबन्धप्रतीतिनियमो न स्यादित्यर्थः। नन्वत्र गुर्वपेक्षा षष्ठी चेत्कथं समासः, अत आह — **संबन्धीति**। [6]स्वार्थवद्वृत्तावपि व्यपेक्षाया अहानादित्यन्वयः। यथा गुरोः कुलमित्यत्र 'किंसंबन्धिनो गुरोः' इत्यपेक्षा, तथा गुरुकुलमित्यत्रापि किंसंबन्धिनो गुरोः कुलमित्य-पेक्षादर्शनात् नित्यसापेक्षस्य वृत्तिर्भविष्यतीत्यर्थः। भाष्ये **इसुसोरिति**। अनयोर्विसर्जनीयस्य षो वा स्यात् कुप्वोः परतः सामर्थ्ये सति। सर्पिष्करोति, सर्पिः करोति, यजुष्करोति, यजुः करोति। सामर्थ्ये किम्। तिष्ठतु सर्पिः, पिब त्वमुदकम्। 'सापेक्षस्यापि' इति भाष्येण किमुक्तम्, अत आह — **तत इति**। उक्तबाधकमाह — **वाचनिक इति**। 'समानाधिकरणम्' इति वार्तिकम-त्रैवाह्निके आयास्यति। 'सविशेषणानाम्' इत्यनेन [7]समाधानकथनान्नैतत् समाधातृवचनमित्याह — **स एवेति**। 'न वक्तुं शक्यम्' इति येनोक्तं स एव। 'सापेक्षमसमर्थम्' इति त्यक्त्वा 'सविशेषाणानां वृत्तिर्न' इत्युक्तौ को लाभः, अत आह — **वृत्तिरिति**। **पूर्वोक्तेति**। गुणप्रधान-भावस्यैकस्मिन् विरोध इत्युक्तेत्यर्थः। ननु 'अगमकत्वात्' इत्यस्यापशब्दत्वप्रसङ्गादित्यर्थश्चेद् वृत्तिः प्राप्नोतीति वदतापशब्दत्वमेवापाद्यमिति तं प्रति तेनैव कथं वृत्त्यभावः साध्यते, [8]'अत उक्तम् — भाष्ये **एतस्माद्धेतोरिति**। **न्याय्य इति**। राजसंबन्धिपुरुषानयनबोधनाय द्वयोरपि पर्यायेण प्रयोगादिति भावः। 'नासौ जातुचित्' इत्येतदुपपादयति — **यः कष्टश्रित इति**। ननु संनिधानात् प्रकृतेनान्वय एव भविष्यति, अत आह — **क्रियेति**। महद्यथा तथा कष्टश्रित इत्ये-वमित्यर्थः। **न त्विति**। महाकष्टश्रित इत्यत्र यथा तद्विशेषणत्वं स्फुटं प्रतीयते नात्र तथेति भावः। [9]नन्वगमकत्वेऽपि तस्य साधुत्वं किं न स्यादित्यत आह — **लोक इति** । नन्वसाधु-

---

[1] असामर्थ्यद्वारा समासाभावप्रतिपत्तावित्यर्थः।
[2] पा. सू. २. १. ५६.
[3] तस्मादिति — अ.
[4] तत्र सामर्थ्ये — अ.
[5] तत्रेति — अ.
[6] स्वार्थवद्वृत्तावप्यपेक्षायाः — ऋ.
[7] समाधानवचनात् — अ.
[8] तदुक्तं — अ.
[9] नन्वगमकत्वेऽपि साधुत्वं तस्य किं — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्चेत् कथं गमकः, तस्य गमकत्वानङ्गीकारात्, अत आह — [1]**गमकत्वेनाभिमत इति**। उदाहरणेष्वसामर्थ्यं दर्शयति — **किंचिदिति**। **सूर्येति**। सूर्यं न पश्यन्तीत्यर्थः, न तु सूर्यभिन्नं पश्यन्तीति। एवमग्रेऽपि ज्ञेयम्। [2]**सूर्यस्थया सत्तया** सूर्यशब्दार्थेन। ननु [3]'अनपुंसकस्य' इति पर्युदासः, न प्रतिषेध इति कथमसामर्थ्यम्, अत आह — **प्रसज्येति**। स पक्षः किमर्थमङ्गीकार्यः, अत आह — **असमर्थेति**। तस्मिन् सूत्रे पक्षद्वयमुक्त्वा [4]प्रतिषेधपक्षे दोषानुद्धृत्य ज्ञापकत्वमपि भाष्य उक्तम्। [5]**दोषः** असामर्थ्यरूपः। यद्वा प्रतिषेधपक्षे कुण्डानीत्यत्र सर्वनामस्थानसंज्ञाप्रतिषेधरूपो यो दोषः स पर्युदासपक्षे नास्तीत्यर्थः। अतो ज्ञापनार्थमेव तत्र प्रतिषेधपक्षाङ्गीकार इति भावः। 'एतन्नियमार्थम्' इत्येतद्व्याचष्टे — **तदेवमिति**। [6]**वचनम्** असूर्यंपश्यादीनामसामर्थ्येऽपि समासो भवतीति वचनम्। 'एतेषाम्' इति वाच्ये 'एतस्यैव' इति कथम्, अत आह — **अभेदमिति**। असमर्थनञ्समासत्वेनेत्यर्थः। साक्षात्संबन्धाभावादत्रासामर्थ्यमुच्यते, न तु संबन्धसामान्याभावादित्यभिप्रेत्याह — **असमर्थेति**। **तद्द्वारकः** क्रियाद्वारकः॥

[२, ४९६–५०५]

(**रत्नप्रकाशः**) इदानीं सूत्रमेवेदं किमर्थमिति पृच्छति — [7]**अथेति**। उत्तरमाह — **वक्ष्यतीति**। तत्र कर्मतयान्वेति 'द्वितीया श्रितादिभिः' इत्यादि 'पानागारे [8]'इति' इत्यन्तम्। तेन प्रतिवाक्यं समर्थग्रहणं किमर्थमिति प्रश्नपरं वचनमुपपन्नम्, [9]अनुकार्यगतत्वेन पौनरुक्त्यदोषाभावात्। **समस्यत इति**। समसनं समास इत्यन्वर्थसंज्ञाविधानात् फलतः समाससंज्ञक इति ज्ञातुं शक्यत इति कर्मलकारेण निर्देशः। एवमेव हि लोपनं लोप इत्यन्वर्थसंज्ञाविधानात् 'एङन्ताद्ध्रस्वान्ताच्च परं हल् लुप्यते' इत्याधुनिका[10] अपि वदन्ति। एतेन 'यद्यपि समाससंज्ञामात्रं विधीयते, तथाप्यबुधबोधनाय भिन्नयोः संश्लेषः प्रक्रियायां क्रियत इति समस्यत इत्युक्तम्' इति निरस्तम्। बुधान् प्रत्यपि संश्लेषस्य बोधयितुमयुक्तत्वेनाबुधान् प्रति सुतरामयुक्तत्वात्। न हि शब्दानां संश्लेषो नाम कश्चन पदार्थः पुरुषयत्नसाध्योऽस्ति, [11]यद्विधिना तद्वचनं सार्थकं स्यात्। सत्यपि सूत्रेऽस्मिन्नतिप्रसङ्गो भवतीत्याह — **अथेति**। **महत्कष्टं श्रित इति**। अत्राकृतिपक्षे [12]'हलन्ताच्च' इत्यत्र हल्शब्दस्य हल्समुदायपरत्ववद् द्वितीयाशब्दस्य द्वितीयान्तसमुदायपरत्वसंभवेन महत् कष्टमिति पदद्वयस्य श्रितशब्देन सह समाससंज्ञापाद्यते। व्यक्तिपक्षे तु महच्छब्दे विद्यमानेऽपि कष्टशब्दस्य श्रितशब्देन सह समास आपाद्यः। उभयथापि 'महत्कष्टश्रितः' इति प्रयोगोऽनिष्ट

---

[1] प्रदीपे 'गमकत्वाभिमतः' इत्यत्र 'गमकत्वेनाभिमतः' इत्यन्नंभट्टपाठ इति भाति।

[2] सूर्यस्थसत्तया — अ.

[3] पा. सू. १. १. ४३.

[4] 'प्रतिषेधपक्षे' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — ऋ.

[5] प्रदीपे 'पर्युदासेऽपि ह्यत्र न क्षतिः' इत्यत्र 'पर्युदासेऽपि ह्यत्र न कश्चिद्दोषः' इत्यन्नंभट्टपाठः। अयं निर्णयसागरमुद्रिते पाठान्तरत्वेनाधो निर्दिष्टः।

[6] प्रदीपे 'एतेषां ग्रहणं कर्तव्यम्' इत्यत्र 'एतेषां वचनं कर्तव्यम्' इत्यन्नंभट्टपाठः। अयं पाठान्तरत्वेन निर्णयसागरमुद्रितेऽधो निर्दिष्टः।

[7] अथवेति — प, ब.

[8] भाष्ये 'पानागारे' इत्यस्यानन्तरम् इतिशब्दो न दृश्यते। इतिशब्दविशिष्टपाठो वार्थसिद्धानुवादो वा बोध्यः।

[9] अनुक्तार्थगतत्वेन — प.

[10] सिद्धान्तकौमुदीकारा इत्यर्थः।

[11] यद्विना — प.

[12] पा. सू. १. २. १०.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आपाद्यः। ननु त्रिपदसमासपक्षे[१] [२]"द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्' इत्युक्तत्वेन [३]"सन्महत्' इत्यादिना [४]"विशेषणं विशेष्येण' इत्यनेन वा महत्कष्टशब्दयोः समासे कृते तत्र कष्टशब्दमाश्रित्य महत आत्वे कृते 'महाकष्टश्रितः' इत्येव रूपं भवति। तच्चेष्टमेव रूपम्। नापि स्वरे भेदः, महाकष्टं श्रित इति द्विपदतत्पुरुषपक्षेऽपि [५]"अहीने द्वितीया' इति सूत्रेण महाकष्टेति द्वितीयान्त-पूर्वपदप्रकृतिस्वरस्य [६]"समासस्य' इत्यौत्सर्गिकान्तोदात्तत्वस्यैव व्यवस्थापितत्वेन त्रिपदतत्पुरुषेऽपि सति शिष्टावान्तरतत्पुरुषस्वरस्यैव [७]"समासस्य' इत्यौत्सर्गीकान्तोदात्तत्वस्य व्यवस्थापितत्वादिति चेत् तर्ह्याकृतिपक्षे "अहीने द्वितीया' इत्येतदविषयो 'महदरण्यमतीतः' इत्यादौ त्रिपदतत्पुरुष आ-पादनीयः। यत्तूक्तम् "अन्ये त्वाहुः – त्रयाणां समासे कृते प्रधानार्थाभिधायित्वान्महत्कष्टशब्दयोः परस्परं संबन्धाभावात् पूज्यमानत्वं विशेषणविशेष्यत्वं च नास्तीति समासो न स्यात्। तत-श्चात्वं न स्यात्। [८]"अहीने द्वितीया' इति महच्छब्दस्य प्रकृतिस्वरः प्रसज्येत" इति। तन्न, जहत्स्वार्थाजहत्स्वार्थपक्षयोरवैयाकरणाभिमतयोर्भगवतैव निराकरिष्यमाणत्वेन तन्मताश्रयेण यत्कि-चिज्जल्पनानौचित्यात्। द्वितीयान्तसमुदायस्य तत्र पूर्वपदत्वेन महच्छब्दमात्रप्रकृतिस्वरस्या-पादनानौचित्यात्। वस्तुतः प्रागस्मदुक्तरीत्या रूपस्वरयोः साम्यस्यैवौचित्याच्च। प्रष्टुराशय-माविष्कर्तुं समाधाता पृच्छति — **न वा भवतीति**। प्रष्टा स्वाशयमाह — **भवतीति**। समाधाता पुनः पृच्छति — **कस्य कस्मान्न भवतीति**। इति पृच्छसीति शेषः। प्रष्टाह — **बहूनां कस्मान्न भवतीति**। इति पृच्छामीति शेषः। एतदुपपत्तिस्तु प्रागेव दर्शिता। समाधत्ते — **सुप् सुपेति वर्तत इति**। सुबिति वर्तत इत्यत्रैव तात्पर्यम्, श्रितादीनां कृदन्तत्वेन सुबुत्पत्तेः पूर्वमेव तैः समासस्य विधेयत्वेन सुपेत्यस्यानुवृत्तौ प्रयोजनाभावात्। द्वितीयान्त-समुदायस्य सुबन्तत्वाभावादेव तस्य श्रितशब्देन समासवारणसंभवाच्च। ननु [१०]"कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणम्' इति कष्टश्रितशब्देन महच्छब्दस्य समासः प्रसज्यत एवेति त्रिपद-समासवारणं सुपेत्यस्याननुवृत्तौ न सिध्यतीति चेन्न, सुबुत्पत्तेः पूर्वं समस्यत इत्युक्त्या संयोगवद्वि-प्रयोगस्यापि विशेषावगतिहेतुत्वेन सुप्प्रकृतित्वार्हस्यैव तत्र कृदन्तस्य ग्रहीतुमुचितत्वेन कष्टश्रित-शब्दस्य तदनर्हत्वादेव तेन [११]समासाप्रसङ्गात्। एतेन 'संख्याया विवक्षितत्वादेकस्यैव सुबन्तस्यैकेन सुबन्तेन समासः, ततो बहूनां न भवतीत्यर्थः' इति निरस्तम्। संख्याया विवक्षामाश्रित्यैव सुबन्त-समुदायस्यैकस्य श्रितादिना समाससंज्ञाया आपादितत्वेन समुदाये आकृत्यपरिसमाप्त्या परिहरिष्य-माणत्वेन च तद्विरोधेन संख्याया विवक्षया समाधानानौचित्यात्। एकेन सुबन्तेनेत्यंशस्य प्रकृते ऽसंभवाच्च[१२]। प्रष्टाह — **ननु चेति**। **आकृताविति**। हल्समुदाये हल्त्वाकृतिवत् पदसमुदाये पदत्वाकृतिर्वर्तत इति मन्यते। एतेन "'यथा ब्राह्मणो न हन्तव्यः' इत्युक्ते [१३]सर्वब्राह्मणहनन-प्रतिषेधवत् तत्र बहूनां समासेन भाव्यमिति भावः" इति निरस्तम्। दृष्टान्तदार्ष्टान्तिकयो-वैषम्यात्। दृष्टान्ते ह्येकत्वसंख्याया विवक्षायामपि समुदाये ब्राह्मणत्वस्यापरिसमाप्तावप्येकब्राह्मण-हननं नरकसाधनमिति बोधिते कैमुतिकन्यायेनानेकब्राह्मणहननमत्यन्तनरकसाधनमिति गम्यते। यथा

---

[१] पदे — ब.
[२] का. वा. २. १. ५१–८.
[३] पा. सू. २. १. ६१.
[४] पा. सू. २. १. ५७.
[५] पा. सू. ६. २. ४७.
[६] पा. सू. ६. १. २२३.
[७] पा. सू. ६. १. २२३.
[८] पा. सू. ६. २. ४७.
[९] पा. सू. ६. २. ४६.
[१०] परिभाषा २८.
[११] समासप्रसङ्गात् — ब.
[१२] कृदन्तेनैव समासादिति भावः।
[१३] सर्वत्र ब्राह्मण — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्षपमात्रविषभक्षणं मरणसाधनमित्युक्तेऽनेकसर्षपतुल्यमत्यन्तं मरणसाधनमिति गम्यते। तथा च तत्र मरणभीरुणेव नरकभीरुणा न प्रवर्त्यते। प्रकृते तु संख्याया अविवक्षायामेव बहूनां [1]समासस्तवापाद्य इति तयोर्वैषम्यं स्पष्टं भवति। **प्रातिपदिकादिति वर्तमान इति।** प्रातिपदिकादित्यत्रैकवचने वर्तमानेऽपीत्यर्थः। **अन्यस्माच्चान्यस्माच्चेति।** तावतैव प्रातिपदिकसमुदाये शास्त्रप्रवृत्तिर्जातेति मन्यते। अर्धाङ्गीकारेण परिहरति — **सत्यमेवमेतदिति।** तत्र दृष्टान्ताभ्युपगमदार्ष्टान्तिकानभ्युपगमसाधारणीं युक्तिमाह — **आकृतिस्त्विति। प्रत्येकं परिसमाप्यत इति।** तथा च प्रत्येकं प्रातिपदिकात् सुबुत्पत्तिर्युक्तैव भवतीति [2]तद्दृष्टान्तेन सुबन्तसमुदायस्य सुबन्तत्वरहितस्य समासापादनं न युक्तमिति भावः। [3]हल्ग्रहणेन हल्समुदायग्रहणं तु [4]"निपात एकाजनाङ्' इत्येकग्रहणसामर्थ्यादङ्गीक्रियते। [5]तद्दृष्टान्तेनाप्यत्र समुदायस्य सुबन्तताश्रयणं न युज्यते। एतेन 'प्रत्ययस्य सुबन्तसमुदायस्य च [6]संचिस्कीर्ष्यस्य प्राधान्याद् गुणत्वाच्च प्रातिपदिकस्यावयवयोश्च सुबन्तयोराधारगताया एकत्वसंख्याया विवक्षणात् प्रातिपदिकसमुदायाद्विभक्त्यनुत्पत्तिवत् सुबन्तसमुदायस्य श्रितेन समासाभावः' इति निरस्तम्। एकत्वविवक्षाभ्युपगमेन समुदायस्य पदत्वाश्रयत्वानाश्रयत्वाभ्यामेव शङ्कासमाधानयोः प्रवृत्तत्वेन संख्याविवक्षोक्तेरजागलस्तनायमानत्वात्। संख्याविवक्षाविवक्षयोर्गुणप्रधानभावस्य हेतुत्वमित्यत्र मुनित्रयसंमत्यभावात्। [7]शकलकण्टकादिन्यायेन [8]लक्ष्यानुसारमवलम्ब्य विवक्षाविवक्षे उपपादयता भगवता निर्युक्तिकस्य जैमिनीयाभिमतस्य गुणप्रधानभावरूपस्य तद्धेतोरुपेक्षितत्वेन वैयाकरणैस्तस्य तत्त्वेनाश्रयणानौचित्याच्च। **तावत उत्पत्त्या भवितव्यमिति।** तावतः परेण प्रत्ययेन भवितव्यमित्यर्थः। **सुप् सुपेतीति।** एतदधिकारगतम् [9]"अव्ययम्' इत्यादिसमाससंज्ञाविधायकं सूत्रमित्यर्थः। **द्वयोश्चैतदिति।** प्रायोऽभिप्रायमेतत्। तेन द्वन्द्वबहुव्रीह्योस्तत्पुरुषविशेषस्य च बहुषु समाप्तावपि न दोषः। प्रच्छक आह — **द्वयोस्तर्हीति।** महच्छब्दे विशेषणे विद्यमानेऽपि कष्टश्रितशब्दयोः समाससंज्ञा कुतो न भवतीत्यर्थः। उत्तरमाह — **असामर्थ्यादिति। सापेक्षमसमर्थमिति।** ज्ञापकसिद्धमेतदित्युक्तम्। एतेन 'न्यायोऽयम्। वृत्तौ ह्युपसर्जनपदेन प्रधानार्थाभिधायिना भवितव्यम्। स्वविशेषणापेक्षायां च [10]तस्य प्राधान्यमिति कथमेकस्यैकदा प्राधान्यमेकार्थीभावश्च स्यात्' इति निरस्तम्। वृत्तौ शक्तिमभ्युपगच्छतां वैयाकरणानां मते वृत्तिघटकानां पदानां स्वार्थमात्रपरत्वात्। राजसेवकादौ राजाद्यपेक्षयाप्राधान्यस्य[11] स्वभृत्याद्यपेक्षया प्राधान्यस्य च दृष्टत्वेनैकस्यैकदा गुणप्रधानभावयोर्विरोधस्याप्रसिद्धेः। गुणप्रधानभावप्रयुक्तकार्यविशेषस्य यौगपद्यासंभवेऽपि विशेषणविशेष्यभावे विरोधासंभवात्। अन्यथा वाक्ये 'देवदत्तस्य गुरुकुलम्' इत्यादौ च तदभावापत्तेश्च। वचनस्य ज्ञापकसिद्धस्यातिप्रसङ्गं शङ्कते — **यदीति।** ज्ञापकसिद्धस्यासार्वत्रिकत्वात् [12]'उपमितं व्याघ्रादिभिः'

---

[1] समासस्तु नापाद्य इति — प.

[2] 'तद्' इति नास्ति — ब.

[3] 'हल्ग्रहणेन' इत्यस्यानन्तरं तुशब्दोऽधिकः — प, ब.

[4] पा. सू. १. १. १४.

[5] 'तद्' इति नास्ति — ब.

[6] प्रदीपे 'चिकीर्ष्यस्य' इत्यस्य स्थाने 'संचिस्कीर्ष्यस्य' इति पाठो निर्णयसागरमुद्रितेऽघो निवेशितोऽस्ति।

[7] अयं न्यायो महाभाष्ये १. २. ४१. सूत्रे प्रतिपादितः। 'कश्चिन्मांसार्थी मत्स्यान् सकण्टकान् सशकलानाहरति, नान्तरीयकत्वात्, स यावदादेयं तावदादाय शकलकण्टकानुत्सृजति' इति।

[8] लक्षणानुसारमवलम्ब्य — ब.

[9] पा. सू. २. १. ६.

[10] तत्र प्राधान्यमिति — प, ब.

[11] अप्राधान्यस्येति छेदः।

[12] पा. सू. २. १. ५६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यत्र सामान्याप्रयोग इत्युक्तेश्च प्रधानस्य सापेक्षत्वेऽपि [1]'सामर्थ्यप्रतिषेधो न भविष्यती-त्याशयेन समाधत्ते — **नैष दोष इति**। एतेन 'प्राधान्यादेवानेकेनोपकारकेणोपकार्यत्वा-विरोधात् प्रधानस्य सापेक्षत्वेऽपि समासो भवति' इति निरस्तम्। प्रतिज्ञामात्रेणाभिमतार्थासिद्धेः। अन्यथा 'जितमस्माभिः' इत्युक्त्या जयसिद्धौ चतुरङ्गबलसंपादनं राज्ञामनर्थकं स्यात्। ननु भवतु प्रधानस्य सापेक्षस्य समासः। अप्रधानस्यैव यस्य सापेक्षस्य समास इष्टस्तस्य न स्यादित्याशये-नाह — **यत्र तर्हीति**। आचार्यदेशीयः कश्चिदाह — **नैष दोष इति**। **समुदायापेक्षात्र षष्ठीति**। तथा च गुरोर्देवदत्तसापेक्षत्वाभावान्नोक्तदोष इति भावः। एतेन 'अवयवद्वारकश्च देवदत्तस्य समुदायेन संबन्ध इति सामर्थ्यादवयवमपि स्पृशति। तदुक्तम् — [2]'समुदायेन संबन्धो येषां गुरु-कुलादिना। संस्पृश्यावयवांस्तेऽपि[3] युज्यन्ते तद्वता सह॥ इति' इति निरस्तम्। षष्ठ्याः समु-दायापेक्षत्वं संबन्धस्त्ववयवद्वारक इत्यनयोः परस्परं विरोधात्। अन्यथा 'इह चापि' इत्युत्तर-भाष्यस्यायुक्तत्वापत्तेः। [4]"दृढेऽन्यदपि बाध्यताम्' इति न्यायेन दृष्टान्तस्याप्युपेक्षणीयत्वाच्च। समुदायापेक्षषष्ठ्याश्रयेण यत्र समाधानं न संभवति तत्राप्रधानस्य सापेक्षस्य वृत्तिर्न स्यादिति शङ्कते — **यत्र तर्हीति**। **किमोदनः शालीनामिति**। शालिभेदानां बहूनां सत्त्वेन केषां शालीनामोदन इत्यर्थकमिदम्। तत्र शालीनामिति षष्ठ्योदनापेक्षा, न तु 'किमोदनः' इति समुदायापेक्षा। किं-शब्दश्च शालिरूपविशेष्यसापेक्ष इति सत्यपि शालिद्वारके ओदनेन संबन्धे न समस्येतौदन-शब्देनेति भावः। **सक्त्वाढकमापणीयानामिति**। यद्यप्यत्र 'देवदत्तस्य गुरुकुलम्' इत्यत्रेव षष्ठ्याः समुदायापेक्षता वक्तुं शक्यते, तथापि सक्तुशब्दस्य संबन्धिशब्दत्वाभावात् समुदायषष्ठ्याश्रयसमा-धानस्य निराकरिष्यमाणत्वाच्च पार्थक्येनास्य निदर्शनम्। **कुतो भवान् पाटलिपुत्रक इति**। पाटलिपुत्रशब्दस्य समुदाये वर्तमानस्य पूर्वपश्चिमादिषु तदवयवेष्वपि वृत्तिसंभवेन 'कस्मात् पाटलि-पुत्रादागतो भवान्' इत्येतदर्थकमिदं वाक्यम्। तत्र 'कुतः' इत्यस्य पाटलिपुत्ररूपविशेष्यसापेक्ष-त्वेन सत्यपि तद्द्वारके विश्लेष्यविश्लेषकभावसंबन्धे भवच्छब्देन समासो न स्यात्, तथा पाटलि-पुत्रशब्दात् कुतश्शब्दसापेक्षात् [5]"रोपधेतोः प्राचाम्' इति वुञ् न स्यादिति भावः। एवं च [6]""रोपधेतोः प्राचाम्' इति तद्धितवृत्तिर्न प्राप्नोति" इति कैयटस्य समासाभावानापादन[7]प्रयुक्तन्यूनता स्पष्टैव। न च तत्र कुतःशब्दस्य भवच्छब्देन समासविधायकशास्त्राभावादेव समासाभावः सिद्ध इति स नापाद्य इति वाच्यम्, 'अत्रभवान्, तत्रभवान्, ततोभवान्' इत्यादाविव मयूरव्यंसकादि-त्वेन समाससंभवात्। 'कुतः पाटलिपुत्रको भवान्' इति स्पष्टप्रतिपत्तये वक्तव्यत्वेन तदपहाय 'कुतोभवान्' इति प्रयोगं दर्शयतस्तत्र समासाभ्युपगमस्य स्पष्टत्वाच्च। एवं च 'कुतोभवान् पाटलि-पुत्रात्' इत्यादौ केवलसमासाभावोऽपि तेनापादितप्राय इति शक्यते वक्तुम्, तस्य वाक्यस्य 'किमोदनः शालीनाम्' इति वाक्यसजातीयत्वसंभवात्। एवं च 'किमक्तं शालीनाम्, किंदुग्धं गोः, किंसूपो मुद्गानाम्, कुतोभवान् कौसलकः, कुतोभवान् पाञ्चालकः, कुतोभवान् कोसलेभ्यः, कुतोभवान् पञ्चालेभ्यः' [8]इत्यादयः ससमासप्रयोगाः सिद्धा भवन्ति। एवं 'सक्त्वाढकमापणीयानाम्' इत्येवं-

---

[1] "सामर्थ्यप्रतिषेधः' इत्यादि 'प्रधानस्य सा-पेक्षत्वेऽपि' इत्यन्तं नास्ति — व.

[2] वाक्यपदीयम् ३. १४. ४८.

[3] 'ते तु' इति पाठः प्रदीपे। वाक्यपदीये 'ते च' इति।

[4] 'बाधेऽदृढेऽन्यंसाम्यात्कि दृढेऽन्यदपि बाध्य-ताम्' इति न्यायाकारः। प्रौढमनोरमायां ष्णान्ता षडिति सूत्रव्याख्यानेऽयं न्याय उद्धृतः।

[5] पा. सू. ४. २. १२३.

[6] पा. सू. ४. २. १२३.

[7] प्रयुक्ता न्यूनता — प.

[8] इत्यादयः समास — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जातीयकाः 'व्रीह्याढकमापणीयानाम्' 'सक्तुप्रस्थमनापणीयानाम्' 'व्रीहिप्रस्थमनापणीयानाम्' [1]'इत्यादयोऽपि ससमासप्रयोगाः सिद्धाः। इदानीं 'देवदत्तस्य गुरुकुलम्' इत्यादावप्यवयवापेक्षैव षष्ठी भवतीत्याह — **इह चापीति**। अवयवापेक्षैव षष्ठीति शेषः। ननु तत्र समुदायापेक्षा षष्ठी चेत् को दोष इत्यत आह — **यद्येवेति। देवदत्तस्य किंचिदिति**। समीपमनन्तरं द्वेष्यं सेव्यमित्यादिरूपमित्यर्थः। 'सापेक्षमसमर्थम्' इति वचनस्य ज्ञापकसिद्धत्वमविद्वान् शङ्किता व्यपेक्षालक्षणस्यापि सामर्थ्यस्य तेन निषेधः स्यादित्याशयेनाह — **अन्यत्र खल्वपीति**। उक्तमुपसंहरति — **तस्मादिति**। आक्षेपमात्रे वा तस्य सामर्थ्यमुत समाधानेऽपीति विशेषजिज्ञासयाचार्यदेशीयः पृच्छति — **वृत्तिस्तर्हि कस्मादिति**। आक्षेप्ता तस्योत्तरमाह — **सविशेषणानां वृत्तिर्नेति**। एवं च 'ब्राह्मणस्य सर्पिष्पिबति' इत्यादौ षत्वे न काप्यनुपपत्तिरिति भावः। स एव स्वबुद्धिविभवप्रदर्शनाय तत्समानार्थकं वचनान्तरमाह — **वृत्तस्य वेति**। आचार्यदेशीयस्तस्यापि वचने अतिप्रसक्ते इत्याह — **यदीति**। आक्षेप्ता तद्दोषपरिहारार्थं किंचिद् विशेषणं [2]तत्र दास्यामीत्याशयेनाह — [3]**अगुरुपुत्रादीनामिति**। 'गुरुपुत्राद्यवयवभिन्नानां सविशेषणानां वृत्तिर्न, वृत्तानां विशेषणयोगो न' इति वचनाश्रयणान्नोक्तदोष इति भावः। इदानीमाक्षेप्ता स्वकीयसमाधानवचनं स्थिरीकर्तुं पृच्छति — **तर्तार्हि वक्तव्यमिति**। भगवानाह — **न वक्तव्यमिति**। इतरः पृच्छति — **वृत्तिस्तर्हि कस्मान्न भवतीति**। महत्कष्टं श्रित इत्यादाविति शेषः। उत्तरमाह — **अगमकत्वादिति**। सापेक्षविशेषणावयविकाया वृत्तेर्वाक्यार्थागमकत्वादित्यर्थः। तथा च गमकत्वं सामर्थ्यम्, तच्च स्वभावात् सापेक्षे विशेषणे क्वचिदस्ति गुरुकुलादौ, क्वचिन्नास्ति कष्टश्रितादाविति यथाश्रुतमेव सूत्रं निर्दुष्टमित्युक्तप्रायम्। **इहेति**। प्रकृतविचारविषय इत्यर्थः। **समानार्थेन वाक्येन भवितव्यमिति**। वाक्येन बोधयितुमिष्टस्यैवार्थस्य समासेन बोधनीयतयेति भावः। एतेन वृत्तिवाक्ययोर्भिन्नार्थकत्वमषष्ठचर्थबहुव्रीह्यादावङ्गीकुर्वन्तो निरस्ताः। प्रकृतभाष्यविरोधात्। तत्रापि यच्छब्दघटितेन विग्रहवाक्येन वृत्त्यर्थस्यैव कथनात्, अन्यथा तस्य विग्रहवाक्यत्वभङ्गाच्च। अत एव धात्वर्थविशेष्यकं शाब्दबोधमिच्छन्तोऽपि वैयाकरणंमन्या निरस्ताः। 'कुम्भं करोति, कुम्भकारः' इत्यादौ वृत्तिवाक्ययोर्भिन्नार्थकत्वापत्त्या प्रकृतभाष्यविरोधात्। यदि तत्रार्थो गम्येत तदा तस्यापशब्दस्य गमकस्य निवृत्तये 'सापेक्षमसमर्थम्' इति वक्तव्यं स्यात्। अर्थ एव त्वभिमतस्तत्र न गम्यत इति 'सापेक्षमसमर्थम्' इति निषेधोऽसंगत एव स्यादित्याशयेनाह — **एतस्मादिति**। यस्माद्वाक्यार्थस्तत्र समासेन न गम्यते, एतस्माद्धेतोः 'अगमकत्वात्' इत्येव तत्र वृत्त्यभावे हेतुं ब्रूमः, न तु वृत्तिसंभवं तस्यापशब्दत्वं चाश्रित्य 'सापेक्षमसमर्थम्' [4]इति ब्रूम इति भावः। एवं च देवदत्तस्य गुरुपुत्रः' इत्यादौ समासे न काप्यनुपपत्तिरित्याशयेनाह — [5]**यत्र चेति। गमक इति**। भावप्रधानो निर्देशः, यस्मिन्नर्थे वृत्तेर्गमकता [6]भवति, तत्र सा भवत्येवेत्यर्थः। तदेतद् भाष्यकृन्मतं प्रौढिप्रवृत्तं न तु सूत्रानुसारीत्याशयेनाक्षिपति — [7]**तत्र यदीति**। स्वाभिमतमेव सिद्धमित्युपसंहरति — **तस्मादिति**। यद्यबुधबोधनाय समर्थग्रहणं क्रियते तर्हि सापेक्षमगुरुपुत्राद्यवयवमसमर्थमित्यप्य-

---

[1] इत्यादयोऽपि समास — प.

[2] 'तत्र' इति नास्ति — प.

[3] 'अगुरुकुलपुत्रादीनाम्' इति भाष्यस्थाने 'अगुरुपुत्रादीनाम्' इति निर्णयसागरमुद्रिते पाठः।

[4] 'इति' इत्यस्यानन्तरं 'न' इत्यधिकम् — प, ब.

[5] यत्र वेति — ब.

[6] 'भवति' इत्यस्यानन्तरं 'वृत्तेः' इत्यधिकम् — प, ब.

[7] भाष्ये 'यद्यगमकत्वम्' इत्यत्र 'तत्र यद्यगमकत्वम्' इति चौखाम्बामुद्रिते पाठः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वश्यमभ्युपेयमिति भावः। भगवानाह — **इदं तर्हीति**। **अस्तीति**। अवैयाकरणैर्नैयायिकादिभिः प्रयुज्यमान इति शेषः। **अकिंचित्कुर्वाणमिति**। नञः कुर्वाणशब्देनान्वयः, न तु किंचिच्छब्देनेत्यसमर्थसमासोऽयम्। एवमुत्तरौ ज्ञेयौ। तदपि प्रयोजनमाक्षेप्ता निराकरोति — **एतदपीति**। **कस्यचिदिति**। तथा चासमर्थनञ्समासाः साधवोऽल्पे, असाधवो बहव इति सूचितम्। **असूर्यंपश्यानि मुखानीति**। राजदाराणामिति शेषः। सूर्येणापि न दृश्यन्त इत्यर्थावगमाल्लोकव्यवहारस्य[1] प्रकृतभाष्यस्य च तथैवोपपत्तेः [2]'कृत्यल्युटो बहुलम्' इत्यत्र कृत्यग्रहणस्य [3]कृन्मात्रोपलक्षणत्वाच्च कर्मणि तत्र खश् ज्ञेयः। एतेन 'सूर्यकर्मिकया दृशिक्रियया नञः संबन्धः, न तु सूर्यस्यया सत्तयेत्यसामर्थ्यम्' इति निरस्तम्। लोकव्यवहारानुसारिप्रकृतभाष्यविरोधात्। राजदारा हि सर्वान् पुरुषान् पश्यन्ति, तेषां मुखं तु केनापि न दृश्यत इति सर्वलोकप्रसिद्धम्। भाष्यस्थं मुखपदं तद्व्यवहारानुसारेणैवोपपद्यते, मुखानां दर्शनीयत्वेनैव[4] प्रसिद्धत्वात्। एवं चासूर्यंपश्या राजदाराः, सूर्यं न पश्यन्ति ते, इत्यर्थं वर्णयन्तोऽपि निरस्ता इति स्पष्टमेव सर्वेषाम्। किं च नञः सूर्यनिष्ठसत्तान्वये सूर्यो न भवतीत्यसूर्य इति समर्थसमास एव [5]स भवतीत्याशयेन नञस्तन्निष्ठसत्तान्वयनिषेधोऽपि तत्कृतोऽयुक्तः। आरोपितः सूर्योऽसूर्य इत्यादेरेव समर्थनञ्समासविग्रहस्य वैयाकरणैर्दर्शनीयत्वेन सूर्यो न भवतीत्यस्मिन्नर्थे नञ्समासासंभवात्। अन्यथा सूर्यस्याभवनम् 'असूर्यभवनम्' इत्यस्यापि समर्थसमासतापत्तेः। **अपुनर्गेया इति**। पुनर्न गेया इत्यर्थः। **अश्राद्धभोजीति**। [6]'श्राद्धं न भुङ्क्ते' इत्यर्थावगमादसमर्थसमासता। सूर्यो न भवतीत्यर्थेऽसूर्यशब्दस्य समर्थसमासत्वमभ्युपगच्छतां मते नञो धात्वर्थान्वयाविशेषेणाश्राद्धादेरपि समर्थसमासतापत्त्या प्रकृतभाष्यासंगतिः स्यात्। न हि तत्कर्तृकक्रियान्वयिनो नञस्तेन समासः समर्थः, तत्कर्मकक्रियान्वयिनस्तेन समासोऽसमर्थ इत्यत्र किंचिन्मानमस्ति। ननु तत्कर्तृकक्रियान्वयिनोऽपि नञस्तेन समासः समर्थ इत्याश्रीयमाणे देवदत्तो न पठतीत्यदेवदत्तः पठतीत्यदेवदत्तादेरपि नञ्समासस्य समर्थता स्यात्, अतस्तत्कर्तृकभवनान्वयिन एव नञस्तेन समासः समर्थ इति विशेषमुखेनाश्रीयत इति चेन्न, तत्रापि मानाभावस्य तुल्यत्वात्। अन्यथा 'असूर्यस्य भवनम्' इत्यादावपि सूर्यादिकर्तृकभवनाभावे बुबोधयिषितेऽसूर्यादेः समर्थतापत्तेश्च। तस्माद्यत्किंचिदेतत्। **सुडनपुंसकस्येति**। तत्र प्रसज्यप्रतिषेधपक्षेऽपि न दोष इति प्रागुक्तमिति कृत्वास्योपन्यसनम्, न तु स पर्युदासो न भवतीति, पर्युदासस्यैव तत्र न्याय्यत्वात्। **एतस्यैवेति**। सामान्यत एकवचनम्, एतेषामेवेत्यर्थः। उक्तं समर्थपदानर्थक्यमुपसंहरति — **तस्मादिति**॥

[२, ५०५–५०९]

(उद्द्योतनम्) ननु 'न कर्तव्यम्' इत्युक्तत्वात् 'क्रियमाणेऽपि' इत्ययुक्तम्, अत आह — **अबुधेति**। [7]आदिना व्यपेक्षा[8]सामर्थ्यग्रहः। **तस्य** सामर्थ्यस्य। ननु पूर्वत्रोभयस्य दर्शितत्वादिह कथमेकार्थीभाव एव प्रदर्श्यते, अत आह — **एकार्थीभावमिति**। 'पृथगर्थानाम्' इत्यत्र कर्मधारय-

---

[1] लोकव्यवहार उपरिष्टादत्रैव वक्ष्यते।

[2] पा. सू. ३. ३. ११३.

[3] कृन्मात्रोपलक्ष्यत्वाच्च — प.

[4] एवकारो नास्ति — प.

[5] 'स' इति [5]नास्ति — प.

[6] श्राद्धशब्दोऽत्र श्राद्धभोजनपरः।

[7] प्रदीपे 'एकार्थीभावो वा सामर्थ्यं व्यपेक्षा वेत्याद्युक्तम्' इत्युपलभ्यते। 'एकार्थीभावो वा सामर्थ्यमित्याद्युक्तम्' इत्यत्रंभट्टपाठः स्यादिति प्रतीयते।

[8] सामर्थ्यं ग्राह्यम् — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भ्रमं वारयति — **पृथगर्था इति**। विशिष्टं पदार्थान्तरमिति मतमाश्रित्याह — **अथवेति**। च्वि-प्रत्ययानुपपत्तिं परिहरति — **यद्यपीति**। सामानाधिकरण्यानुपपत्तिं निराह — **समर्थशब्दस्येति**। **कर्मणीति**। सामान्य[1]विवक्षायां क्लीबत्वम्। समर्थशब्दवाच्यमेकार्थीभावः। समर्थशब्देन स्वरूपलक्षणे [2]'कर्तृकरणे कृता' इति वा [3]'साधनं कृता' इति वा समासः। वाक्ये पृथगर्थत्वं समासे एकार्थत्वं चोपपादयति — **राज्ञ इत्यनेनेत्यादिना**। **स्वनिष्ठः** अन्यविशेषणत्वमनापन्नः, [4]स्वनिष्ठः सन्नभिधीयमानत्वादित्यर्थः। वृत्तौ षष्ठ्यभावम् [5]संबन्धोद्भवाभाव इति मनसि कृत्वा षष्ठ्य-भावमाह — **वृत्ताविति**। तत्र पुरुषस्यापि राजशब्दार्थत्वात् पुरुषप्रतियोगिकभेदो राजशब्दार्थस्य निवर्तत इत्यर्थः। **तदधिष्ठानस्य** भेदाधिष्ठानस्य। अर्थाभावादेव षष्ठ्यभावे लुग्विधानं व्यर्थम्, अत आह — [6]**सैव चेति**। अन्वाख्यानस्य प्रयोजनमाह — **प्रत्ययेति**। तथा च 'राजपुरुषः' इत्यत्र नलोपः सिध्यतीति भावः। वाक्यसमासयोरैकार्थ्यमुपपादयति — **एवं हीति**। वृत्ति-वाक्ययोरेकार्थे व्यपेक्षैकार्थीभावलक्षणसामर्थ्यभेदोऽपि नास्तीत्याह — **यत इति**। अन्यानयनप्रसङ्गं निराह — **वाक्य इति**। कथं तर्हि वृत्तिवाक्ययोर्भिन्नार्थत्वम्, अत आह — **न चेति**। ननु सुबलोपादिकमेकार्थीभावकृतं चेत् समास एवैकार्थीभावाङ्गीकारात् तत्रैव सुबलोपादिकं स्यात्, अत आह — **एकार्थीभावेति**। तत्र हेतुः — **संनिधानेति**। तत्र दृष्टान्तः — **यथेति**। **दुर्भिक्षमिति**। [7]तत्र वर्षशब्दोऽभावलक्षकः, [8]एकार्थीभावशब्दोऽपि तदभावलक्षकः, अभावसाध्ये प्रतियोगिनोऽकारण-त्वादिति ज्ञेयम्। वाक्ये सुबलोपनिमित्तमाह — **तत्र राज्ञ इति**। **सुब्लोपः** सुबभावः। **तदा-श्रय** तदाश्रयाश्रय। शब्दार्थयोः समनियतत्वादर्थभावाभावाभ्यां शब्दभावाभावानुमानमुक्त्वा शब्द-भावाभावाभ्यामर्थभावाभावानुमानमाह — **तदेवमिति**। वाक्यं षष्ठ्यर्थयुक्तम्, षष्ठीयुक्तत्वात्, वृक्षस्येतिवत्। समासः षष्ठ्यर्थरहितः षष्ठीरहितत्वात्, वृक्षस्तिष्ठतीतिवदित्यनुमानम्। समासोऽभिन्नार्थः, मध्ये श्रूयमाणविभक्त्यन्तपदरहितत्वात्, देवदत्तपदवत्, इति प्रयोगमभिप्रेत्याह — **व्यवधानमपीति**। **भार्येति**। 'राज्ञः ऋद्धस्य' इति भाष्योदाहरण एव तात्पर्यम्, अत्र पदान्तरेण व्यवधानाभावात्। पूर्वस्मिन्नेव साध्ये नियतपौर्वापर्यं हेत्वन्तरमभिप्रेत्याह — **वाक्य इति**। **यथेति**। कर्कशब्दार्थ एव विपर्यस्तप्रयोगो नास्ति, अर्थान्तरे[9] 'कर्क' इति प्रयुज्यत एव। पूर्व-स्मिन्नेव साध्ये एकोदात्तत्वादिति हेत्वन्तरं सूचयन्नाह — **अर्थभेद इति**। देवदत्तशब्दः [10]'आमन्त्रितस्य' इत्याद्युदात्तः, गोशब्दः [11]'फिषः' इति वा प्रत्ययस्वरेण वान्तोदात्तः। [12]'गतिर्गतौ' इत्य-भिशब्दोऽनुदात्तः। निपातस्वरेणाङ्दात्तः। [13]'तिङ्ङतिङः' इत्यजशब्दोऽनुदात्तः। प्रत्ययस्वरेण घटशब्दोऽन्तोदात्तः। राजन्शब्दः कनिन्प्रत्ययान्तः, पुरुषशब्दः [14]'पुरः कुषन्' इति कुषन्प्रत्ययान्तः। भाष्ये 'नैते' इत्यनेनानुमानानां व्यभिचारित्वमुक्तम्, 'वाचनिकानि' इत्यनेनाप्रयोजकत्वमित्युभयं विशदयति — **वचनेनेति**। अनेनाप्रयोजकत्वमुक्तम्। सुबलोपादिकमनुमानं न प्रमाणमित्यर्थः।

---

[1] विवक्षया — अ.

[2] पा. सू. २. १. ३२.

[3] का. वा. २. १.३३–२.

[4] प्रदीपे 'स्वनिष्ठो विधीयमानत्वात्' इत्यत्र 'स्वनिष्ठोऽभिधीयमानत्वात्' इत्यन्नंभट्टपाठ इति भाति।

[5] संबन्धाद्यभाव इति — अ.

[6] तस्यैव चेति — अ, ऋ.

[7] अत्र — ऋ.

[8] 'एकार्थीभाव' इत्यादि 'तदभावलक्षकः' इत्यन्तं नास्ति — अ.

[9] संज्ञारूपार्थे इति विवक्षितं स्यादिति भाति।

[10] पा. सू. ६. १. १९८.

[11] फिट्सूत्रम् १.

[12] पा. सू. ८. १. ७०.

[13] पा. सू. ८. १. २८.

[14] उणादिसूत्रम् ५२३.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

षष्ठीरहितत्वात् षष्ठ्यर्थरहित [1]इत्यत्राप्रयोजकत्वं सुबभावात् सुबर्थरहित इति। प्रयोगे व्यभिचारं चाह — **यथेति**। पय इत्यत्र [2]'स्वमोर्नपुंसकात्' इति विभक्तेर्लुक्। [3]प्रतीतौ हेतुः — **पञ्चकेति**। विभक्त्यभावेऽपि तदर्थप्रतीतिरेव तद्दर्शने मानम्। दार्ष्टान्तिके साध्यासिद्धिं विशदयति — **तथेति**। सुबलोपोऽर्थभेदहेतुरित्यत्र व्यभिचारमाह — **अर्थाभेद इति**। **वर्षास्विति**। [4]'विभाषा वर्ष' इति [5]'तत्पुरुषे कृति' इति चोभयत्र सप्तम्या अलुक्। नियतपौर्वापर्यस्य भागासिद्धिमप्रयोजकत्वं चाह — **तथेति**। व्यभिचारमप्याह — [7]'**वाक्येऽपीति**। एकस्वरत्वस्य व्यभिचारमाह — **ऐकस्वर्यं चेति**। **तीक्ष्णेनेति**। अत्र [8]'सुबामन्त्रिते' इति पराङ्गवद्भावात् [9]'आमन्त्रितस्य च' इत्याद्युदात्तत्वं वाक्यस्य भवति। तच्च [10]'समानाधिकरणस्योपसंख्यानम्' इति वचनात् तीक्ष्णशब्देकारस्य। अस्यापि भागासिद्धिमप्रयोजकत्वं समव्याप्त्यभाव आह — [11]'**अर्थाभेदेऽपीति**। उभयत्रापि [12]'कृत्यार्थे तवैकेन्' इति तवैप्रत्ययः। 'कर्तवै' इत्यत्र [13]'अन्तश्च तवै युगपत्' तवैप्रत्ययस्याद्यन्तावुदात्तौ युगपत् स्याताम्। [14]'तवै चान्तश्च युगपत्' तवैप्रत्ययान्तोऽन्तोदात्तो गतिश्चानन्तरः प्रकृतिस्वरो युगपत् स्यात्। अन्वेतवै। [15]'एकवर्जम्' इति वचनात्पर्यायनिवृत्त्यर्थमुभयत्र युगपद्ग्रहणम्। अव्यवधानस्यापि राज्ञः पुरुष इत्यत्र व्यभिचारः स्पष्ट इति नोक्तम्। न च मध्ये पदान्तरप्रवेशायोग्यत्वं हेतुः, तस्यैकपदत्वप्रातिपदिकत्वान्यतरप्रयोज्यत्वेनार्थभेदाप्रयोज्यतया तत्राप्रयोजकत्वादिति ॥

[२, ५०५–५०९]

(**रत्नप्रकाशः**) स एवाबुधबोधनाय समर्थग्रहणमभ्युपगम्य प्राग् दर्शितमेकार्थीभावलक्षणं व्यपेक्षालक्षणं च समर्थपदशक्यतावच्छेदकं विशिष्य ज्ञातुं पृच्छति — **अथेत्यादिना**। **किं समर्थं नामेति**। भावप्रधानो निर्देशः, किं सामर्थ्यं नामेत्यर्थः। एतेन 'यद्यपि पूर्वमेकार्थीभावो वा सामर्थ्यमित्याद्युक्तम्, तथाप्येतद् विचारस्थानं तस्य। एतत्सिद्धेन तु पूर्वं व्यवहारः कृतः' इति निरस्तम्। अत्रत्यविचारस्य प्रागुक्तत्वेन पौनरुक्त्यशङ्कासमाधानयोरसंबद्धप्रलापत्वात्। तत्रैकार्थीभावरूपं शब्दगतं सामर्थ्यं तावन्निर्वक्ति — **पृथगर्थानामिति**। **पृथक्** [16]'भिन्नोऽर्थो येषां ते पृथगर्थास्तेषामित्यर्थः। **एकार्थीभाव इति**। एको विशिष्टोऽर्थो यस्य स एकार्थः, वृत्तित्वेन व्यव-

---

[1] इत्यत्र प्रयोजकत्वं — अ, ऋ.

[2] पा. सू. ७. १. २३.

[3] 'प्रतीतौ' इत्यनन्तरं 'न' इत्यधिकम् — अ.

[4] पा. सू. ६. ३. १६.

[5] अत्र वर्षशब्देन लिङ्गविशिष्टपरिभाषया वर्षाशब्दस्यापि ग्रहणमित्याशयः। उपरि 'वर्षासुजः' इत्यत्र प्रदीपे तत्पुरुषे कृतीत्यनेनालुगिति कथनं तु तत्प्रपञ्चत्वादस्येत्यभिप्रायेणेति बोध्यम्।

[6] पा. सू. ६. ३. १४.

[7] प्रदीपे 'वाक्यं च प्रयोगनियमः' इत्यत्र 'वाक्येऽपि प्रयोगनियमः' इत्यन्नंभट्टपाठ इति भाति।

[8] पा. सू. २. १. २.

[9] पा. सू. ६. १. १९८.

[10] का. वा. २. १. २–४.

[11] प्रदीपे 'अर्थाभेदे च स्वरभेदः' इत्यत्र 'अर्थाभेदेऽपि स्वरभेदः' इत्यन्नंभट्टपाठ इति भाति।

[12] पा. सू. ३. ४. १४.

[13] पा. सू. ६. १. २००.

[14] पा. सू. ६. २. ५१.

[15] पा. सू. ६. १. १५८.

[16] 'भिन्नः' इति नास्ति — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ह्रियमाणः शब्दविशेषः, [1]तदात्मकत्वेन संपद्यमानता पृथगर्थानां शब्दानामेकार्थीभावलक्षणं सामर्थ्यमित्युच्यत इत्यर्थः। एतेन 'वाक्ये हि राज्ञः पुरुष इत्यत्र राजशब्दो राजार्थमेवाचष्टे, पुरुषशब्दोऽपि पुरुषार्थमेव। वृत्तौ तु राजपुरुष इत्यत्र राजशब्दोऽपि पुरुषार्थमेवाचष्ट इति द्वयोरेकार्थीभावः' इति निरस्तम्। तथात्वे पुरुषमात्रस्यानयनं स्यादित्यजहत्स्वार्था वृत्तिरित्यवैयाकरणमतस्य निराकरिष्यमाणत्वेन तदाश्रयेण प्रकृतभाष्यव्याख्यानानौचित्यात्। एकार्थकत्वैकार्थीभावयोरत्यन्तभेदेन तयोरैक्यकथनानौचित्याच्च। यदप्युक्तम् 'अथवावयवार्थान्वितः समुदायार्थः प्रादुर्भवतीति तदपेक्षयैकार्थीभाव उच्यते, पांसूदकवदविभागापन्नत्वात्'[2] इति। तदप्येकार्थकत्वैकार्थीभावयोरैक्यभ्रमप्रयुक्तमेवेति स्पष्टमेव। यदप्युक्तम् "यद्यपि शब्दान्तरमेव वृत्तिः, [3]अवयवो वर्णवदनर्थकः, तथापि सादृश्यात् तत्त्वाध्यवसायं पदानामाश्रित्य 'पृथगर्थानामेकार्थीभावः' इत्युक्तम्" इति। तदपि न, वृत्तेः शब्दान्तरत्वेऽपि वृत्त्यर्थस्यावयवार्थातिरिक्तत्वेऽपि वृत्त्यवयवानामानर्थक्याश्रयणे मानाभावात्। वाक्येऽपि पृथक्शक्तेरभ्युपगम्यमानत्वेन तत्रापि तदवयवानामानर्थक्ये तावदवयवाप्रसिद्ध्या सादृश्यात् तत्त्वाध्यवसायपरत्वस्यापि मिथ्याप्रलापत्वात्। प्रकृतभाष्यस्यावयवानामर्थवत्त्वेऽप्युपपन्नत्वाच्च। **समर्थवचनमिति**। उच्यत इति वचनम्, कर्मणि ल्युट्, समर्थमिति वचनं समर्थवचनम्, मयूरव्यंसकादित्वादिति। तदेतदाह — **समर्थमित्युच्यत इति**। तत्रापि समर्थशब्दो भावप्रधान एवेति समर्थत्वमित्युच्यत इत्यर्थः। एतेन 'समर्थशब्दस्य वाच्यमित्यर्थः' इति निरस्तम्। तत्र समर्थशब्दस्य स्वरूपपरत्वाश्रयणे मानप्रयोजनयोरभावात्। भाष्यकारैर्यथा व्याख्यातं तथैव तस्योपपन्नत्वाच्च। अवयवातिरिक्तमवयविनमविद्वान् एकार्थत्वानेकार्थत्वयोरेकत्रासंभवं मत्वाह — **क्व पुनरिति**। [4]यक्षानुरूपबलिन्यायेनोत्तरमाह — **वाक्य इति। समासे पुनरेकार्थानीति**। अवयव्यभेदोपचारादवयवानामेकार्थत्वोपपत्तिः। समासस्येव वाक्यस्याप्यवयवातिरिक्तत्वाभावेन समासेन प्रतीयमानस्यैव विशिष्टार्थस्य वाक्येन प्रतीयमानत्वेन च वाक्येऽपि पदानां पृथगर्थत्वमयुक्तमित्याशयेनाह — **किमुच्यत इति**। वृत्तिवाक्ययोस्तुल्यार्थकत्वमाश्रित्यैव समासादिवृत्तावेवावयवानां स्वतो भिन्नार्थकत्वं वृत्त्यात्मना त्वेकार्थत्वं ममाभिमतमिति मनसि निधायाह — **नापि ब्रूम इति**। पृथगर्थानामेकार्थीभावो वाक्येऽप्यस्तीति वृत्तावेवैकार्थीभावो न वाक्य इत्ययुक्तं मन्यमानः केन विशेषेणैकार्थीभावो वृत्तावेवावस्थाप्यत इत्याशयेन पृच्छति — **कस्तर्हीति**। वाक्यगतविशेषाभाव एव वृत्तावेकार्थीभावव्यवस्थापक इत्याशयेनोत्तरमाह — **सुबलोप इति**। तथा च [5]सुबलोपादिधर्मकाणां पृथगर्थानां पदानामेकार्थात्मकतैकार्थीभाव इति तस्य वृत्तिमात्रविषयत्वमिति भावः। एतेन 'एकार्थीभावाभावकृतोऽपि विशेष एकार्थीभावकृत इत्युच्यते, संनिधानासंनिधानाभ्यां क्रियानिर्वृत्तौ पदार्थानां कारणत्वात्। यथा वर्षकृतं सुभिक्षं, वर्षकृतं दुर्भिक्षमिति चोच्यते' इति निरस्तम्। सुबलोपादीनां वाक्ये दृष्टानामभावस्यैवैकार्थीभावकृतो विशेष इति स्पष्टमेव भगवता [6]दर्शितत्वेनैकार्थीभावाभावकृतविशेषप्रदर्शनपरतया भाष्यव्याख्याने मानप्रयोजनयोरभावात्। यदप्युक्तं तेनैव "तत्र राज्ञः पुरुष इति वाक्ये भेदाधिष्ठानस्य संबन्धस्य प्रत्याययिषितत्वाद् विना विभक्त्या तस्य प्रत्याययितुमशक्यत्वान्नास्ति सुपो लोपः। समासे तु [7]भेदनिवृत्तौ तदाश्रयस्य संबन्धस्यो-

---

[1] 'तदात्म' इत्यस्यानन्तरम् 'अवयविनमविद्वाने' इत्यन्तं नास्ति — ब.

[2] प्रदीपे 'एकभावापन्नत्वात्' इति दृश्यते। अत्रार्थानुवादो बोध्यः।

[3] 'अवयवा वर्णवदनर्थकाः' इति बहुवचनान्तपाठः प्रदीपे।

[4] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.

[5] सुब्लोपादि — प, ब.

[6] दर्शितत्वेनैकार्थीभावकृत — ब.

[7] भेदानिवृत्तौ — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

परमात् स्वाभाविकी सुपो निवृत्तिः। सैव च शास्त्रेणानुज्ञायते। तदेवं सुपो भावाभावाभ्यामर्थस्य [1]भावाभावानुमानं वाक्यसमासयोः। व्यवधानमपि सत्यर्थभेदे दृष्टं वाक्ये 'भार्या राज्ञः पुरुषो देवदत्तस्य' इति। असति न दृष्टम्, देवदत्त इत्यत्र पदमध्ये पदान्तरस्य [2]प्रक्षेप्तुमशक्यत्वात्" इति। तदपि तुच्छम्, वृत्तिवाक्ययोस्तुल्यार्थकत्वमभ्युपगम्यैव भगवता वृत्तावेकार्थीभावं व्यवस्थापयितुमस्य [3]यत्नस्य कृतत्वेनास्य भाष्यस्यार्थभेदाश्रयेण व्याख्यानानौचित्यात्। तयोरर्थैक्येऽपि भाष्यस्योपपन्नत्वात्, अर्थभेदे मानाभावाच्च। **द्वौ स्वराविति**। राजशब्दस्य कनिनन्तत्वात् पुरुषशब्दस्य कुषन्नन्तत्वान्नित्स्वरेणोभावाद्युदात्तौ। इदानीमाक्षेप्ता सुब्लोपादीनां वाक्येऽपि सत्त्वात् सुवलोपादीनां [4]व्यवधानेतराणां समासेऽपि सत्त्वान्न सुब्लोपादीनामेकार्थीभावव्यवस्थापकतेत्याशयेनाह — **नैत इति**। तत्र 'दध्यशान' इत्यादौ वाक्ये सुब्लोपः। 'वर्षासुजः', '[5]ज्वरान्मुक्तः' इत्यादौ समासेऽपि सुवलोपः। 'एधांचकार' इत्यादौ वाक्ये व्यवधानाभावः, यथेष्टानभिसंबन्धः, स्वरैक्यं च। 'अन्तादी, आद्यन्तौ' इत्यादौ समासे यथेष्टाभिसंबन्धः। 'देवदत्तः पचति' [6]इत्यादौ च वाक्ये स्वरैक्यम्, [7]"वनस्पतिः' इत्यादौ च स्वरभेद इति तेषां सांकर्यं बोध्यम्। **एकार्थीभावकृता इति**। यदि सुब्लोपादयो वृत्तिमात्रे स्युरवृत्तौ न स्युस्तदा त एकार्थीभावकृता एकार्थीभावव्यवस्थापकाः स्युः, न तु ते तथा, तेषां संकीर्णतायाः प्रसिद्धत्वादिति भावः। तदाशयं ज्ञातुं भगवान् पृच्छति — **किं तर्हीति**। किंकृतास्ते विशेषा इत्यर्थः। कुतस्त एकार्थीभावव्यवस्थापका न भवन्तीति भावः। **वाचनिकानीति**। वचनप्रयुक्ता एव ते, न त्वेकार्थीभावप्रयुक्ताः। वचनं च संकीर्णतामेव तेषां बोधयतीति स्पष्टमिति भावः। तत्संकीर्णता तु दर्शितैवास्माभिः॥

[२, ५०९–५१२].

(उद्द्योतनम्) वाक्ये संख्याविशेषावगमः, न तु समास इत्येतत् सहेतुकमुपपादयति — **वाक्य इति**। [8]**उपसर्जनानि** 'राज्ञः' इत्यादीनि विशेषणपदानि। **विभक्त्यर्थेति**। [9]"प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः' इति न्यायात्। अन्तर्भूतः स्वस्योपसर्जनस्यार्थो यत्र प्रधानार्थ इति विग्रहः। अभेदैकत्वसंख्यां [10]"द्विधा निर्वक्ति — **संख्याविशेषाणामिति**। **तां संख्याम्** अभेदैकत्वसंख्याम्। **तादृशीं** मधुसदृशीम्। **भेदानामिति**। **भेदानां** विशेषाणां, परित्यागात्, **जातिभागस्य** जातिविभागस्य, **व्यापारात्** व्यावर्तनात्, **जातिभागस्य** जातिसामान्यस्य, **व्यापारात्** प्रतीतेर्वा, [11]"यो भेदापोहेन वर्तते स संख्यात्मा, **तथाविधः** अभेदैकत्वसंख्येत्यर्थः। [12]"यथा रूपवानित्यत्र रूपसामान्यं प्रतीयते न विशेष इति 'अगृहीत' इति श्लोकार्थः। वृत्तौ सर्वत्राभेदैकत्वसंख्या चेत् कथं क्वचित्

---

[1] भावानुसंधानं वाक्य — प.

[2] प्रतिक्षेप्तुम् — ब.

[3] 'यत्नस्य' इति नास्ति — प.

[4] व्यवधानमितरत् येभ्यस्तेषामिति बहुव्रीहिर्बोध्यः, पञ्चमीतत्पुरुषे उत्तरपदार्थप्राधान्येन सर्वनामत्वात् व्यवधानेतरेषामित्यस्यैवोचितत्वात्।

[5] द्वारान्मुक्तः — ब.

[6] इत्यादौ न वाक्ये — प, ब.

[7] वनशब्दो नब्विषयस्येत्याद्युदात्तः। पतिशब्दो डतिप्रत्ययान्तत्वात् प्रत्ययस्वरेणाद्युदात्तः। समासे 'उभे वनस्पत्यादिषु युगपत्' इत्यनेनोभयपदप्रकृतिस्वरः।

[8] प्रदीपे 'उपसर्जनपदानि' इति दृश्यते। 'उपसर्जनानि' इत्यत्रंभट्टपाठ इति भाति।

[9] महाभाष्यम् ३. १. ६७.

[10] 'द्विधा' इति नास्ति — अ.

[11] यो भेदापोहो निवर्तते न संख्यात्मा — अ.

[12] यदा — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

संख्याविशेषावगतिः, अत आह — **क्वचिदिति**। **आदेशेति**। [1]'तवकममकावेकवचने' इति वचनादित्यर्थः। **शौर्पिकमिति**। [2]'तदस्य परिमाणम्' इति ठक्। [3]**प्रातिपदिकेनैवेति**। शूर्पपरिमाणमात्रं तत्र विवक्षितम्, तच्चैकत्व एव संभवतीत्येकत्वावगम इत्यर्थः। **मासजात इति**। [4]'कालाः परिमाणिना' इति समासः। अनेकमासत्वे ऋत्वयनादि परिमाणं स्यान्न मासः। **एवमिति**। 'शब्दानुशासनम्' इत्यत्र सर्वशब्दानामनुशास्यत्वात् शब्दानामनुशासनमिति [5]बहुत्वावगतिः। 'ननु च' इति समाधानभाष्यम्। तत्रार्थाभावादेव विभक्त्यभावाल्लुग्विधानं व्यर्थं स्यात्, अत आह — **न हीति**। शब्दस्यार्थकृतत्वे हेतुः — **प्रत्याययिषितेति**। शुक्लादिभ्रमं निराह — **अर्थस्वभाव इति**। नन्वर्थस्वभावस्यैव तादृशत्वे संख्याविशेषप्रतीतये विभक्तिविशेषप्रयोगो वाक्येऽपि न स्यात्, अत आह — **एतदुक्तमिति**। वृत्तिवाक्ययोः [6]शब्दभेदाद्वाक्यं संख्याविशेषयुक्तार्थप्रतिपादनसमर्थं न वृत्तिरिति शब्दस्वभावोऽपि भिन्नः, विशिष्टाविशिष्टरूपेणार्थोऽपीति भावः। [7]तत्र बहुत्वाप्रतीतौ हेतुमाह — **एकस्यामिति**। [8]तर्हि कथं बहुवचनम्, अत आह — **जातौ चेति**। [9]'जात्याख्यायाम्' इत्यनेन। जातिनिबन्धनबहुवचनेऽनुगत[10]प्रयोजकमाह — **यदि त्विति**। 'अप्सुचरः' इत्यत्राप्शब्दस्य [11]नित्यबहुवचनान्तत्वादेकस्मिन्नपि बिन्दौ बहुवचनान्तस्यैव प्रयोगाद्बहुत्वाविवक्षा[12] स्पष्टा। [13]संख्याविशेषवल्लिङ्गविशेषस्याप्येकार्थीभावकृतत्वं कुतो नोक्तम्, अत आह — **लिङ्गविशेषस्यापीति**। व्यभिचारित्वान्न तथोक्तमिति भावः। **कुक्कुटेति**। योग्यतया कुक्कुट्या अण्डमिति प्रतीतिसंभवात् [14]'कुक्कुट्यादीनामण्डादिषु' इति पुंवद्भावो न वक्तव्यः। वाक्येऽपि लिङ्गाविवक्षां क्वचिदाह — **वाक्येऽपीति**। **यद्यपीति**। षष्ठीसमासत्वे समासान्तोदात्ते शेषनिघातेन ब्राह्मणशब्दोऽनुदात्तः, संबुद्धित्वे [15]'आमन्त्रितस्य च' इत्याद्युदात्तः, कम्बलशब्दोऽन्तोदात्त इति स्वरभेदः। यत्र तर्हि स्वरभेदो नास्ति तत्राव्यक्ताभिधानं स्यात्, अत आह — **यत्रापीति**। **तिष्ठतीति**। अत्रामन्त्रितस्य पदात्परत्वेनाष्टमिकनिघातेन सर्वानुदात्तो ब्राह्मणशब्द इति नास्ति स्वरभेदः। **प्रकरणेति**। इदं सर्वत्र समाधानम्। वेदे सर्वत्र [16]स्वरान्निर्णयसंभवेऽपि लौकिके तेन निर्णयासंभवात्। ननु कम्बलशब्दस्य [17]'लघावन्ते द्वयोश्च बह्वषो गुरुः' इति [18]मध्योदात्तत्वेन भाव्यमिति कथमसमासे स्वरभेदाभावः, अत आह — **कम्बलशब्द इति**। **निपातनाद्वेति**। [19]'कम्बलाच्च संज्ञायाम्' इत्यत्र कम्बलशब्दोऽन्तोदात्तो निपातित इत्याहुः। कथमव्यक्ताभिधानमेकार्थीभावकृतमुच्यते, अत आह — **एकार्थीभाव इति**। **तत्कृतः** विभक्तिनिवृत्तिद्वारैकार्थीभावकृतः। संख्याविशेषस्यैकार्थीभावकृतत्वं स्थितमेवेत्यपिशब्दो न युक्तः, अत आह — **अपिशब्द इति**। वाक्यसमासयोर्विशेषणयोगायोगयोर्हेतुमाह — **राजेति**। **स्वार्थात्**

---

[1] पा. सू. ४. ३. ३.
[2] पा. सू. ५. १. ५७.
[3] प्रदीपे 'प्रातिपदिकेन विशिष्टस्यैव परिमाणस्य' इत्यत्र 'प्रातिपदिकेनैव विशिष्टस्य परिमाणस्य' इत्यन्नंभट्टपाठ इति भाति।
[4] पा. सू. २. २. ५.
[5] बहुत्वावगमः — ऋ.
[6] शाब्दभेदात् — अ.
[7] अत्र ० — अ.
[8] तत्र कथं — ऋ.
[9] पा. सू. १. २. ५८.
[10] प्रयोजनमाह — ऋ.
[11] नित्यं बहुवचनान्तत्वात् — अ.
[12] बहुत्वविवक्षा — ऋ.
[13] संख्याविशेषस्याप्येकार्थीभाव — अ.
[14] का. वा. ६. ३. ४२–२.
[15] पा. सू. ६. १. १९८.
[16] स्वरानियमसंभवेऽपि — अ; स्वरान्निर्णयसंभवेन — ऋ.
[17] फिट्सूत्रम् ४२.
[18] 'आद्युदात्तत्वेन' इति युक्तम्।
[19] पा. सू. ५. १. ३.

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्वस्वरूपात्। अप्रच्युतौ हेतुः — **पदान्तरेति**। भाष्ये '**स्वस्वामिचयोगः** स्वानां स्वामिनां चयोगः। तत्र हेतुमाह — **वाक्य इति**॥

[२, ५०९–५१२]

(**रत्नप्रकाशः**) तदेवं सुब्लोपादिष्वेकार्थीभावकृतत्वे निरस्तेऽन्यान्[2] परिगृह्णाति — **इमे तर्हीति**। **संख्याविशेष इति**। उपसर्जनार्थगत इति शेषः। एतेन 'वाक्ये उपसर्जनपदानि विभक्त्यर्थाभिधायित्वात् संख्याविशेषयुक्तं स्वार्थं प्रतिपादयन्ति। समासे त्वन्तर्भूतस्वार्थं प्रधानार्थमभिदधतीत्यभेदैकत्वसंख्यामवगमयन्ति। संख्याविशेषाणामविभागेनावस्थानमभेदैकत्वसंख्या। यथोक्तम् — [3]यथौषधिरसाः सर्वे मधुन्याहितशक्तयः। अविभागेन वर्तन्ते तां संख्यां तादृशीं विदुः, इति। अथवा परित्यक्तविशेषं संख्यासामान्यमभेदैकत्वसंख्या। तदुक्तम् — [4]भेदानां वा परित्यागात् संख्यात्मा स तथाविधः। व्यापाराज्जातिभागस्य भेदापोहेन वर्तते॥ अगृहीतविशेषेण यथा रूपेण रूपवान्। प्रख्यायते न शुक्लादिभेदरूपस्तु गम्यते॥ इति' इति निरस्तम्। वाक्ये 'उपसर्जनपदानि विभक्त्यर्थाभिधायीनि' इत्यत्र मानाभावात्। कथञ्चित् तेषां तदभिधायित्वे संख्याया अपि स्वार्थान्तर्गतत्वेन 'संख्याविशेषयुक्तं स्वार्थं प्रतिपादयन्ति' इत्यस्यासंगतत्वात्। अवैयाकरणाभिमताजहत्स्वार्थापक्षस्य निराकरिष्यमाणत्वेन समासे पृथगेव शक्तेर्वैयाकरणैरङ्गीक्रियमाणत्वेन च समासे उपसर्जनानां प्रधानपरामर्शित्वे मानाभावात्। समासे संख्याविशेषो न प्रतीयत इत्येतावन्मात्रस्यैव भगवतोक्तत्वेनाभेदैकत्वसंख्याख्यं कंचिदर्थं समासावयवोपसर्जनार्थगतं परिकल्प्य तन्निर्वचनस्य तत्र संमतिकथनस्य चासंबद्धप्रलापत्वाच्च। इदानीमाक्षेप्ता वृत्तौ संख्याविशेषानवगमो नैकार्थीभावप्रयुक्तः, किं तु संख्याविशेषसमर्पकवचनाभावप्रयुक्त इत्याशयेनाह — **अस्ति कारणमिति**। तन्निराकरोति भगवान् — **ननु च नैतेनैवमिति**। **एतेन** अर्थेन, **एवं** शब्दकृतेन, न भवितव्यमित्यर्थः। कुतो न भवितव्यं तेन तथेति चेत्, अनुभवविरोधादिति गृहाणेत्याशयेनाह — **न हीति**। हिशब्दः प्रसिद्धिपरः। प्रसिद्धश्च सार्वजनीनोऽनुभव एव। तथा चायमर्थः फलितः — न हि कश्चित् तत्रैकार्थीभावे गम्यमाने राजादिशब्दाद्विभक्तिमुच्चारयतीति। ननु ततो विभक्तिं कोऽपि नोच्चारयति चेत् किमायातमित्यत आह — **अर्थकृतेनेति**। अर्थकृतेन शब्देनैव भवितव्यमित्यर्थः। प्रतिपादितमर्थमुपसंहरति — **तदिति**। यस्मादर्थकृतेन नाम शब्देन भवितव्यं तस्मादित्यर्थः। **अर्थरूपमिति**। अर्थस्वभाव इत्यर्थः। **विशेष इति**। संख्याया इति शेषः। इदानीमेकार्थीभावस्थले उपसर्जनपदे विभक्तिश्रवणेऽपि संख्याविशेषानवगमात् तदनवगम एकार्थीभावकृत एवेत्यवश्यमभ्युपगन्तव्यमित्याह — **अवश्यं चैतदेवमिति**। **अप्सुचर इति**। मत्स्यादौ रूढोऽयम्। **गोषुचर इति**। कुक्कुटे रूढोऽयम्। **वर्षासुज इति**। इन्द्रगोपे रूढोऽयम्। वस्तुतस्तु 'द्विपुत्रः, पञ्चपुत्रः, मासजातः, तावकीनः, शौर्पिकम्' इत्यादावेकार्थीभावे सत्यपि संख्याविशेषः प्रतीयते। 'एधांबभूव' इत्यादौ वाक्येऽपि संख्याविशेषो [5]न प्रतीयत इत्ययमपि नैकार्थीभावकृतो विशेषः। **संदेहो भवतीति**। स्वरस्य लोकेऽनादरादिति भावः। [6]लोके ह्यस्मिन् काले

---

[1] भाष्ये 'स्वचयोगः स्वामिचयोगश्च' इति दृश्यते। स्वस्वामिचयोगः' इत्यत्रंभट्टपाठ इति भाति।

[2] अन्यत्-परं गृह्णाति — प.

[3] वाक्यपदीयम् ३. १४. १०२.

[4] वाक्यपदीयम् ३. १४. १०३.

[5] स्पष्टमिदं प्रदीपे।

[6] लोके त्वस्मिन् — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्रैस्वर्यप्रयोगो न दृश्यते। एतेन 'यद्यप्यत्र स्वरान्निर्णयः, तथापि शब्दस्वरूपमात्रान्निश्चयाभाव इत्येवंपरमेतत्' इति निरस्तम्। स्वरशास्त्रस्य लोकवेदसाधारण्येऽपि प्रकृतभाष्यानुसारेण लोके त्रैस्वर्यप्रयोगस्यैच्छिकत्वकल्पनेनैकश्रुतिपाठे भाष्यस्योपपन्नत्वेन शङ्काया मन्दत्वात्। गुणानां भेदकत्वेन स्वरभेदे शब्दभेदस्योचितत्वेन शब्दस्वरूपमात्रादेव तद्विशेषनिश्चयेन समाधानस्याप्यसंगतत्वाच्च। यदप्युक्तं तेनैव 'यत्र नास्ति स्वरभेदः संबुद्धिषष्ठीसमासयोः — तिष्ठति ब्राह्मणकम्बल इत्यादौ, तत्रापि प्रकरणादिवशान्निश्चयेन भाव्यम्। कम्बलशब्दो घृतादित्वान्निपातनाद्वान्तोदात्तः। एकार्थीभावे सति भेदनिबन्धनसंबन्धाभिधायिविभक्तिनिवर्तनात् तत्कृतो विशेषोऽव्यक्ताभिधानमुच्यते' इति। तदपि न, सत्येव संदेहे प्रकरणादेर्निर्णायकत्वेन भगवदभिहिताव्यक्ताभिधानस्य दूषणानौचित्यात्। अर्थस्य शब्दकृतत्वं नेति प्रागेव भगवतोक्तत्वेन विभक्तिनिवृत्तावपि विभक्त्यभिहितसंबन्धस्य तत्र भासमानत्वेन तत्र तन्निवृत्तिकृतविशेषान्तरस्याप्रसिद्धत्वेन च प्रकृतभाष्यस्यान्यथाव्याख्यानस्यासंबद्धप्रलापत्वाच्च। शङ्किताह — **एषोऽपीति। अविशेष इति।** वाक्येऽपि सत्त्वादिति भावः। **समासेऽपीति।** तथा च संबन्धिशब्दभिन्नत्वमेव गुरुपुत्राद्यवयवभिन्नत्वमेव वा तत्र विशेषणयोगाभावप्रयोजकम्, न त्वेकार्थीभाव इति भावः। एतेन 'राजा स्वार्थादप्रच्युतः पदान्तरार्थमप्रतिपन्नो वाक्ये योग्यत्वाद्विशेषणसंबन्धमनुभवति। वृत्तौ तूपसर्जनस्वार्थमर्थान्तरं प्रत्याययतीत्ययोग्यत्वाद्विशेषणेन न संबध्यते' इति निरस्तम्। अवैयाकरणाभिमताजहत्स्वार्थापक्षस्य निराकरिष्यमाणत्वेन तद्रीत्या यत्किंचित्प्रलपनस्य वैयाकरणैरपरिग्राह्यत्वात्। तदुक्तरीत्या 'देवदत्तस्य गुरुकुलम्' इत्यादौ विशेषणयोगानुपपत्तेश्च। **चयोग इति।** इदमपि व्यभिचरितमेव, घटमानयेत्यादौ वाक्ये चयोगाभावात्। तदेवं भाष्यकृन्निर्दिशिताः सर्वे एकार्थीभावव्यवस्थापकधर्माः संकीर्णा इत्युक्तप्रायमाक्षेप्त्रा। तत्रायं भगवतोऽभिप्रायः — एको विभक्त्यर्थान्वय्यर्थो यस्य स एकार्थः। पृथगर्थानामेकार्थात्मकता **एकार्थीभावः।** स च वृत्तावेव संभवति, न तु वाक्ये। वाक्ये तु वाक्यार्थस्यैकत्वेऽपि विभक्त्यर्थान्वयाभावात्। तथा चोक्तधर्माणां संकीर्णत्वेऽपि न काचिदनुपपत्तिरिति ॥

[२, ५१२–५१६]

(**उद्द्योतनम्**) 'अथैतस्मिन्' इति विचारस्य प्रकृतासंगतिं परिहरति — **अयं भाव इति।** [1]'चार्थे द्वन्द्वः' इत्यर्थनिर्देशात् तस्यानिर्देशोऽसिद्धः, अत आह — **अचतुरेति।** अर्थाभिधानस्य वाचनिकत्वे तत्राप्यर्थनिर्देशं कुर्यात्, तदभावात्तु स्वाभाविकत्वनिश्चय इत्यर्थः। भाष्यप्रणयनकाले पाणिनिकृतार्थादेशस्यातीतत्वाद्वर्तमानकालशतृप्रत्ययानुपपत्तिः, अत आह — **प्रवृत्तेति।** व्याख्यानविषयतया वर्तमानत्वमित्यर्थः। ननु तेन [2]तेन सूत्रेण समासादिकार्यं विधीयते नार्थादेशः, वाक्यभेदप्रसङ्गात्, अत आह — **वाक्यभेदेनेति।** एकवाक्यत्वे संभवति वाक्यभेदो न न्याय्य इति सूचयितुं 'मन्यते' इत्युक्तम्। वाक्यभेदमेवाह — **सुबन्तमिति।** नन्वर्थनिर्देशादेकवाक्यत्वमर्थानादेशनं च न संभवत्येव, अत आह — **यदा त्विति।** 'अर्थानभिनिविष्टानाम्' इति वक्तव्ये सप्तम्यनुपपत्तिं निराह — **अभिनिविशश्चेत्यत्रेति।** अजनकस्य कूपस्य कथं मार्गं प्रति निमित्तत्वम्, अत आह — **कूप इति।** भाष्ये **निमित्तत्वेन** उपलक्षणत्वेनेत्यर्थः। ननु लोकसिद्धार्थानुवादेन समासादिविधिसंभवादर्थादेशो न विधेय [3]एकस्मिन् वाक्ये, अत आह — **प्रकृतीति।** यथा लोक-

---

[1] पा. सू. २. २. २९.

[2] तेन सूत्रेण सामानाधिकरण्यं विधीयते —अ.

[3] एतस्मिन् वाक्ये — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सिद्धे शब्दे प्रकृति[1]प्रत्ययोपदेशस्तद्वदर्थोपदेशोऽप्यस्त्वित्यर्थः। किं तल्लघु, यदर्थमर्थानादेशनम्, अत आह — **लघुशब्द इति**। तदेवाह — **तथा हीति**। असंभवे हेतुः — **असामर्थ्यादिति**। पुरुषायुषेणापि वक्तुमशक्यत्वादित्यर्थः। नन्वनवस्थोक्तौ गौरवासामर्थ्ययोस्तन्मूलकत्वादेव प्राप्तेः पृथगुपन्यासो न युक्तः, अत आह — **दोषबाहुल्येति**। **परस्परेति**। हेतुहेतुमद्भावेन। यद्यपि भाष्ये गौरवं नोक्तम्, तथापि 'लघ्वर्थम्' इत्यनेन विपक्षे गौरवमुक्तप्रायमिति 'पृथगुपन्यस्ताः' इत्युक्तम्। ननु धातुपाठे निर्दिष्टार्थव्यतिरिक्तार्थसत्त्वे मानाभावात् कथं धातूनामनेकार्थत्वम्, अत आह — **तत्रेति**। [2]एवकारस्यार्थान्तरे धातुसंज्ञा[3]निरासार्थत्वादिति भावः। **विनियोगः** अनेकेष्वर्थेषु सैन्ववादीनां प्रयोगः। यद्वा, घटादिपदानामप्यर्थ[4]विशेषसंकेतः **विनियोगः**। [5]आदिना निर्वचनसंग्रहः। **आदिना** अनेकार्थत्वमित्यनुषङ्गः। अनेकार्थत्वे संकेतलक्षणपुरुषव्यापारस्य वैयर्थ्यं परिहरति — **शक्तिनियम इति**। संकेतरूपो व्यापारो नियतार्थप्रतीत्यर्थ [6]इत्यर्थः। **आरम्भात्** अनेकार्थत्वमित्यर्थः। एकस्यार्थ उक्ते इतरस्यानुक्तावप्यर्थनिश्चयसंभवान्नाशक्यत्वमिति शङ्काभिप्रायमाह — [7]**कस्यचिदिति**। भाष्ये प्रत्ययार्थे निर्दिष्टे कथं प्रकृत्यर्थो निर्दिष्ट इत्याशङ्क्य 'भवति हि' इत्युक्तम्। तत्र कर्मादिषु विधीयमानानां कथं गुणाभिधायित्वम्, अत आह — **एकत्वादिष्विति**। ननु मतुब्लोपेनाभेदोपचारेण [8]वा शुक्लादिशब्देन तद्वतोऽभिधानान्नाक्षेपेऽयं दृष्टान्तः, अत आह — **गुणमात्रेति**। भाष्ये गुणग्रहणं संबन्धिमात्रोपलक्षणमित्यभिप्रेत्याह — [9]**तयापत्य इति**। **विशेषस्य** पटादेः। एकत्वाधारद्रव्यमात्रप्रतीतौ को दोषः, अत आह — **तदेति**। [10]**एतत्** वृक्षत्वादिविशेषज्ञानम्। जर्भर्यादिशब्दानामप्यर्थान् सर्वज्ञः पाणिनिर्ज्ञास्यति, अत आह — **स्वर्गेति**। [11]'यत्राप्यतिशयो दृष्टः स स्वार्थानतिलङ्घनात्। दूरसूक्ष्मादिदृष्टौ स्यान्न रूपे श्रोत्रवृत्तिता' इति न्यायादिति भावः। कथमर्था इदन्तया निश्चीयेरन्, अर्थस्य लोकव्यवहारगम्यत्वेऽपि तदर्थाध्यवसायः कथम्, अत आह — **त्रैविद्येति**। ऋग्यजुस्सामलक्षणत्र्यवयवा विद्या त्रिविद्या, तामधीयते त्रैविद्याः, ते च ते वृद्धाश्च तेषां व्यवहारादिति विग्रहः। 'अन्तरेण' इति भाष्यस्य दृष्टान्तार्थतया न प्रकृतासंगतिरित्याह — **यथेति**। शास्त्रं प्रयोजनवत्त्वाय लोकसिद्धमप्यर्थं प्रतिपादयति, अत आह — **साध्विति**। अर्थाभिधानस्य स्वाभाविकत्वे स्थिते चशब्दयोगोऽप्येकार्थीभावकृतो[12] विशेष इति प्रतिपाद्यास्मिन् पक्षे लाघवमपीति प्रतिपादयितुं 'वावचनानर्थक्यम्' इति भाष्यम्, अतो न प्रकृतासंगतिरित्यभिप्रेत्य तात्पर्यमाह — **इहेति**। ननु संज्ञाया अप्यभावो वाक्य इष्यत एव, अत आह — **एकार्थीभाव इति**। यस्मिन्नर्थे पदानां समाससंज्ञा, न तस्मिन्नर्थे संज्ञाया अभाव इत्याशयः। [13]एवशब्दार्थमेव विशदयति — **ऐकपद्यमिति**। एकार्थीभाव इति सप्तम्यन्तम्॥

---

[1] प्रत्ययोपदेशस्तद्वदेवार्थोपदेशोऽस्त्वित्यर्थः — अ.

[2] एवं लकारस्यार्थान्तरे — अ.

[3] विधानार्थत्वादिति भावः — अ.

[4] विशेषे विनियोगः — इ.

[5] प्रदीपे 'विनियोगदर्शनात्' इत्यत्र 'विनियोगदर्शनादिना' इत्यन्नंभट्टपाठ इति भाति। अयं पाठो निर्णयसागरमुद्रिते पाठान्तरत्वेनापि निरदेशि।

[6] 'इत्यर्थः' इति नास्ति — अ.

[7] कश्चिदिति — अ, इ, ऋ.

[8] 'वा' इति नास्ति — इ.

[9] प्रदीपे 'एवमपत्ये' इत्यत्र 'तथापत्ये' इति निर्णयसागरमुद्रिते पाठः।

[10] प्रदीपे 'भवति च' इत्यत्र 'भवति चैतत्' इति पाठोऽन्नंभट्टस्याभिमतः स्यादिति प्रतीयते।

[11] मीमांसाश्लोकवार्तिकम् १९७१ मद्रपुरीविश्वविद्यालयप्रकाशितम्. पृष्ठम् ७३. श्लो. ११४.

[12] एकार्थीभावाभावकृत इत्यर्थः।

[13] एवमेव विशदयति — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ५१२–५१६]

(**रत्नप्रकाशः**) इदानीमाक्षेप्ता[1] दूषितमप्येकार्थीभावमभ्युपगम्य विचारान्तरमुपक्रमते — **अथेति। स्वाभाविकमिति।** [2]वस्तुस्वभावसिद्धम्, यथा जलस्य शैत्यम्, अग्नेरौष्ण्यमित्यर्थः। **शब्दैरर्थाभिधानमिति।** शब्दानामर्थस्मारणसामर्थ्यम्, अर्थैः सह संबन्ध इति यावत्। [3]**वाचनिकमिति।** उत्तरमाह — [**स्वाभाविकमिति**] **अर्थानादेशनादिति।** शास्त्रेणार्थैः सह शब्दानामपूर्वस्य संबन्धस्याबोधनादित्यर्थः। एतेन [4]'अचतुरविचतुर' [5]'इत्यादिविधिनेति भावः' इति निरस्तम्। केनापि सूत्रेणार्थादेशनं नेति सिद्धान्तस्येष्टत्वेनार्थादेशनप्रसक्तिशून्यसूत्रविशेषनिदर्शनानौचित्यात्। 'अर्थानादेशनात्' इति हेतुः स्वरूपासिद्ध इत्याशयेनाह — **कथं पुनरिति। आदिशन्निति।** प्रवृत्ताविरामलक्षणं वर्तमानत्वं शास्त्रस्यास्तीति वर्तमाननिर्देशः। **अनेकमन्यपदार्थ इति।** अनेकं सुबन्तमन्यपदार्थे वर्तते, तच्च बहुव्रीहिसंज्ञकमिति वाक्यभेदेनार्थादेशनं मन्यते। **अर्थेष्वभिनिविष्टानामिति।** [6]'एतद्भाष्याज्ज्ञायते [7]'अभिनिविशश्च' इति कर्म[8]संज्ञानित्येति। तेन पापेऽभिनिवेश इत्यादि सिध्यति। **निमित्तत्वेनेति।** वाक्यभेदाश्रयणे मानाभावादन्यपदार्थे वर्तमानमनेकं सुबन्तं बहुव्रीहिसंज्ञकं स्यादित्येव तत्सूत्रार्थाश्रयणात् संज्ञाविधावर्थस्य निमित्तत्वेनाश्रयणम्, एवमन्यत्रापि यथायथं निमित्तत्वेनैवार्थस्याश्रयणम्, न तु शब्दस्य तेनापूर्वं संबन्धं बोधयितुमिति भावः। अर्थानादेशने हेतुं पृच्छति — **किं पुनरिति।** उत्तरमाह — **तच्च लघ्वर्थमिति।** यस्मादिदं [9]शास्त्रं लघ्वर्थं भवति तस्मादर्थानादेशनं न क्रियत इति भावः। अर्थादेशने क्रियमाणे शास्त्रस्यानवस्थितिरेव स्यादिति प्रागुक्तं शब्दानां प्रतिपत्तौ लघूपायत्वं भज्येतेत्याशयेन तदनवस्थामुपपादयति — **अवश्यमिति। केनचिच्छब्देनेति।** [10]'चार्थे' इत्यादिना। **असाविति।** द्वन्द्वाद्यर्थनिर्देश इत्यर्थः। अनवस्थामात्रमेवार्थानादेशने [न] हेतुः, किं त्वसंभवोऽपीत्याह — **असंभवः खल्वपीति। को हि नाम समर्थ इति।** को वा समर्थो भवति, न कोऽपीत्यर्थः। तथा च धातुपाठे कोशे च साकल्येनार्थनिर्देशो न कृत इत्युक्तप्रायम्। एवं च 'कुर्द खुर्द गुर्द गुद क्रीडायामेव' इत्यत्रैवकारो व्यर्थः। अनुक्तसंभावितसमुच्चयार्थो वेति व्याख्यातुमुचितम्। एतेन 'कुर्द खुर्द गुर्द गुद क्रीडायामेवेति नियमार्थादेवकाराद्विज्ञायते धातूनामनेकार्थत्वमिति' इति निरस्तम्। प्रकृतभाष्यस्वरसभङ्गापत्तेः। एकस्यापि शब्दस्य साकल्येनार्थनिर्देशः कर्तुं न शक्यत इति हि प्रकृतभाष्यस्वारसिकोऽर्थः। शङ्कित्रा वक्तव्यं स्वयमेवानुवदति भगवान् — **न चैतन्मन्तव्यमिति। प्रत्ययार्थ इति।** एकत्वादाविति शेषः। **प्रकृत्यर्थ इति।** वृक्षादिरित्यर्थः। तत्र दृष्टान्तं शङ्कित्रभिमतमाह — **भवति हीति। गुणाभिधान इति।** शुक्लादिशब्दानां गुणविशेषपरत्वे कथिते विना कथनं तदाश्रयप्रतीतिर्यथा तथा प्रत्ययार्थे कथिते प्रकृत्यर्थस्य विना कथनं प्रतीतिर्भविष्यतीति भावः। **विषम उपन्यास इति।** वैषम्यादित्यर्थः। साध्यं हि हेतुसाकाङ्क्षं पूर्वं निर्दिष्टम्।

---

[1] आक्षेप्त्रा — ब.
[2] वस्तुतस्तु स्वभाव — ब.
[3] एतत्प्रतीकानन्तरमर्थविवरणाभावात् मध्ये ग्रन्थस्त्रुटितः स्यादिति भाति।
[4] पा. सू. ५. ४. ७७.
[5] प्रदीपे 'इत्यादाविति भावः' इत्यत्र 'इत्यादिविधिनेति भावः' इति पाठो निर्णयसागरमुद्रितेऽधो निर्दिष्टः।
[6] एतस्माद् भाष्यात् — प.
[7] पा. सू. १. ४. ४७.
[8] संज्ञा, अनित्येति छेदः।
[9] 'शास्त्रम्' इति नास्ति — प.
[10] पा. सू. २. २. २९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वैषम्यमेवाह — **सामान्यशब्दा एत इति**। शुक्लादय इति शेषः। [1]**एवं स्युः** एकत्र विनियुक्तास्तत्संबन्धिनि स्युः। सामान्यशब्दलक्षणं किमित्यत आह — **सामान्यशब्दाश्चेति**। य इति शेषः। **नान्तरेण विशेषमिति**। विशेष्यवाचकघटादिपदसमभिव्याहारं विनेत्यर्थः। ननु विशेष्यसमभिव्याहारमन्तरेणापि प्रकरणादिना शुक्लादिशब्दा अपि घटादिविशेषपरा भवन्तीत्यत आह — — **प्रकरणं वेति**। प्रकरणशब्दो जलाद्याहरणशब्दसमभिव्याहाराभावोपलक्षकः। वाशब्दश्चार्थः। ननु वृक्षादयोऽपि शब्दाः सामान्यशब्दा एवेति चेन्नेत्याह — **यतस्तु खल्विति**। सामान्यशब्दा न चेत् किमायातमित्यत आह — **प्रकृतिः प्रकृत्यर्थ इति**। तथा चार्थादिशनं कर्तुं न शक्यत इति व्यवस्थितमिति भावः। **अप्रवृत्तिः खल्वपीति**। क्वच्छिब्दार्थसंबन्धनिदर्शन इति शेषः। कुतस्तत्र प्रवृत्तिर्न भवतीत्यत आह — **बहवो हीति**। के ते, येषामर्था न विज्ञायन्त इत्यत आह — **जर्भरी तुर्फरीतू इति**। इत्यादय इति शेषः। एतेन 'स्वर्गापूर्वदेवतादिशब्दानामर्थाः प्रत्यक्षापरिच्छेद्यत्वादिदन्तया न ज्ञायन्ते। तत्र तेषां कथमर्था निर्दिश्येरन्नित्यर्थः' इति कैयटो निरस्तः। प्रत्यक्ष एव शब्दार्थ इत्यत्र मानाभावात्, अप्रत्यक्षार्थकशब्दैराभीरादीनामपि[2] व्यवहारस्य जायमानत्वात्, भगवन्निर्दशितजर्भरीप्रभृतीनां त्यागे मानाभावाच्च। शब्दाः केचन शिष्टैः प्रयुज्यमाना अनर्थका इत्येतावतैव तत्राप्रवृत्तिरिति न मन्तव्यम्, किं तु केषांचिदर्थानां वाचकाः शब्दा न सन्तीति कृत्वापीत्याह — **अन्तरेणेति**। अन्तरेणैवेत्यर्थः। **अक्षिनिकोचैरिति**। तैर्गम्यमानोऽर्थविशेषोऽनुभवैकवेद्यो दुग्धादिमाधुर्यविशेषवद्वक्तुं न शक्यते। [3]इतोऽप्यर्थादिशने न प्रवृत्तिरित्याह — **न खल्वपीति**। तदेवं शब्दानामर्थाभिधानं स्वाभाविकं व्यवस्थापितं भगवता। इदानीमाक्षेप्ता समर्थग्रहणवत् [4]"विभाषापपरिबहिरञ्चवः, [5]'पारेमध्ये षष्ठया वा' इत्यादिविकल्पवाचकशब्दोऽपि नाश्रयणीय इत्याह — **वावचनानर्थक्यमिति**। **वृत्तिपक्ष इति**। वृत्तयस्तु 'सनादिकृत्तद्धित[6]ङ्यावेकशेषसमासाख्याः षट्। **अवृत्तिपक्षश्चेति**। **अवृत्तिः** वाक्यम्। **न च संज्ञाया इति**। वृत्तिपक्ष इति शेषः। **तस्मादिति**। यस्माद्वृत्तिपक्षे वाक्यं न भवति, अवृत्तिपक्षे च वृत्तिः, वृत्तिपक्षे च संज्ञाविकल्पो नेष्टस्तस्मादित्यर्थः। वस्तुतस्तु क्वचिद्वृत्तिरेव, क्वचिदवृत्तिरेव, क्वचिदुभयमिति विशेषज्ञानाय वाग्रहणं तत्र तत्रावश्यकमेव। स्पष्टमिदं [7]"पारेमध्ये' सूत्रे॥

[२, ५१७–५२५]

(उद्द्योतनम्) 'अथ' इति विचारस्य [8]'प्रकृते संगतिमाह — **कार्येति**। विकल्पप्रसङ्गेनायं विचार इति भावः। 'किं ते' इत्यस्यार्थमाह — **किं वृत्तेरिति**। नित्यशब्दमते तु नायं प्रश्न इत्याह — **नैत्येति**। नित्याः शब्दा इत्यभ्युपगमशीलाः **नैत्यशब्दिकाः**। एवं कार्यशब्दिकाः। [9]"शीलम्' इति ठक्। **विविक्तेति**। अभिन्नविशिष्टार्थाभिधानं वृत्तौ, भिन्नार्थाभिधानं वाक्य इति विविक्तविषयत्वम्। परशब्दस्यार्थविशेषणत्वे वैयर्थ्यम्, अत आह — **परस्येति**। वृत्तौ पुरुषो-

---

[1] एव स्युः — ब.
[2] गोपालादीनामपीत्यर्थः।
[3] इतोऽप्यर्थातिदेशने — ब.
[4] पा. सू. २. १. ११, १२.
[5] पा. सू. २. १. १८.
[6] यद्यपि कौमुद्यां 'कृत्तद्धितसमासैकशेषसनाद्यन्तधातुरूपाः पञ्च वृत्तयः' इति पञ्चैव वृत्तयः प्रतिपादिताः, तथापि रत्नप्रकाशकृता षड् वृत्तयोऽङ्गीकृताः ङ्याब्वृत्तिरूपाधिक्येन।
[7] पा. सू. २. १. १८.
[8] प्रकृतसंगतिमाह — अ.
[9] पा. सू. ४. ४. ६१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऽपि राजशब्दार्थ एव, न परशब्दार्थः, अत आह — **वाक्यावस्थायामिति**। 'तेषाम्' इत्यस्य कृत्यमाह — **नित्यशब्देति**। **वाक्यविषयैः** वाक्यस्थैः पदैः सरूपा अवयवा येषामिति विग्रहः। **राजेति**। तत्सामर्थ्याद्विशिष्टप्रतीतेर्न केवलानयनमिति शङ्कार्थः। **तदा** जहत्स्वार्था वृत्तिरिति पक्षे। जहत्स्वार्थत्वे हेतुमाह — **न हीति**। **अत्रैव** परार्थवृत्तेः स्वार्थत्याग एव। समीपे स्वकर्माविरोधेनापि[1] राजकार्यं करिष्यति, अत आह — **दूत्येति**। अत्यन्तं न जहाति चेत् कथं जहत्स्वार्था वृत्तिरित्यत आह — **त्यागमात्रमिति**। वाक्ये राज्ञ इत्युक्ते यादृशार्थो भासते स्वप्रधानभूतो विशेषणान्वययोग्यस्तादृशो न वृत्तौ भासत इति जहत्स्वार्थत्वमुच्यते, न तु सर्वथा त्यागादित्यर्थः। तत्र हेतुः — **परेति**। परस्य पुरुषस्य राजसंबन्धित्वलाभायेत्यर्थः। **तस्य** राजशब्दस्य। वृत्तिवाक्ययोरविशेषं शङ्कते — **वाक्य इति**। **स्वविशेषणम्** ऋद्धस्येत्यादि। [2]**विशेषं** राजसंबन्धित्वरूपम्। अनेन भाष्यस्थविशेषणशब्दो विशेषपरो व्याख्यातः। ननु राजशब्दार्थनिमित्तो विशेषस्तन्निवृत्तौ निवर्तेत तन्तुसंयोगनिमित्तः पट इव तन्निवृत्तावित्यत आह — **न चेति**। निवृत्तिर्न भवतीत्यन्वयः। असमवायिकारणनिवृत्तावपि कार्यनिवृत्तिर्नास्तीति सूचयितुमग्निसंयोगपर्यन्तधावनम्। विशेषः किंनिष्ठः, अत आह — **विशेष इति**। **विशेषावगतिः** व्यावृत्त्यवगतिः। प्रत्येकं मिलितं वा सामर्थ्यमिति भाष्योक्तमुपपादयति — [3]**तत्रेति**। **भेदः** व्यावृत्तिः, सा च [4]व्यावर्तकस्य व्यावर्त्येन संसर्गं विना न संभवतीति भेदः संसर्गाविनाभूत उच्यते। संसर्गस्य भेदाविनाभावः संसृष्टस्येतरव्यावृत्तत्वनियमात् सिद्धः। ननु षष्ठ्याः संबन्धार्थकत्वात् 'सर्वं स्वम्' इत्ययुक्तम्, अत आह — **षष्ठ्येति**। षष्ठ्यभावात् पुरुषस्य [5]स्वाम्याक्षेपकत्वं कथम्, अत आह — **यदेति**। **अस्तीति**। [6]'अस्तिर्भवन्तीपरः' इति न्यायात्। ननु [7]राजवत् पुरुषोऽपि राजानं [8]स्वान्तरेभ्यो निवर्त्य स्वार्थं जह्यात्, अत आह — **तत्रेति**। **कृतकार्यस्येति**। स्वाम्यन्तरव्यावृत्तिमात्रं तत्कार्यम्। पुरुषस्य [9]त्वानयनाद्यन्वयरूपं च कार्यान्तरमस्तीति न स्वार्थत्याग इत्यर्थः। **एवमिति**। राजशब्दः पुरुषे विशेषमाधाय स्वार्थं जहाति, [10]न तं पुरुषशब्दः। 'उभयतः' इति सप्तम्यर्थे तसिरित्याह — **उभयस्मिन्निति**। **तेन** स्वार्थेन। दार्ष्टान्तिके विवक्षितमाह — **एवमिति**। **क्वचिद्विषये** वाक्ये। **क्वचित्** वृत्तौ। **एकयेति**। प्रथमा प्राधान्यमेवाह, षष्ठी गुणत्वमेवेति नैकयोभयप्रतिपादनमित्यर्थः। प्रथमाप्रवृत्तौ युक्तिमाह — **प्रधानेति**। प्रधाने पुरुषे कथं षष्ठी, अत आह — **संबन्धस्येति**। [11]**प्रतीयेत** न तु परस्परमिति शेषः। पदत्रयस्य प्रयोजनमाह — **कश्चिदिति**। कर्तुः कारकतया क्रियां प्रति गुणभावात् क्रियान्तर्भूतत्वात् 'गुणभावात्' इत्युक्तम्। पदकृत्यमुक्त्वा भाष्यं व्याचष्टे — **तत्रेति**। **व्यतिरेकाभावात्** संबन्धस्य [12]प्रातिपदिकार्थत्वाद्व्यतिरेकाभावादित्यर्थः। संघातस्यैकार्थ्येऽप्यवयवार्थभेदाद् द्विवचनं किं न स्यात्, अत आह — **इहेति**। **संघातादिति**। प्रातिपदिकत्वाद्विशिष्टैकार्थप्रतिपादकत्वाच्च। **न त्विति**। [13]प्रधानाप्रधानसंनिधौ प्रधाने कार्य-

---

[1] अपिशब्दो नास्ति — अ.
[2] विशेषणं — अ, इ, ऋ.
[3] 'तत्रेति' इति नास्ति — ऋ.
[4] व्यावर्तितस्य — अ.
[5] स्वाम्यपेक्षकत्वं — ऋ.
[6] का. वा. २. ३. १–११.
[7] राजपुरुषोऽपि — ऋ.
[8] अन्यानि स्वानि स्वान्तराणि, तेभ्य इति विग्रहः।
[9] तुशब्दो नास्ति — अ.
[10] न तु पुरुष — अ, ऋ.
[11] प्रतीयते — अ, इ, ऋ.
[12] प्रातिपदिकार्थाद्व्यतिरेकाभावादित्यर्थः — अ.
[13] परिभाषा १०६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संप्रत्ययादित्यर्थः। नन्वेकार्थीभावेऽपि परस्परापेक्षासत्त्वात् कथमेतन्मतान्तरम्, अत आह — **व्यपेक्षेवेति। गुणभावादिति।** "गुणानां च परार्थत्वात्' इति न्यायेन परस्परसंबन्धः शब्दयोः स्वतो नास्तीत्यर्थः। ननु प्रतिपत्तुर्जिज्ञासा व्यपेक्षा, [2]सार्थयोः कथं स्यात्, अत आह — **प्रमातृगतामिति।** प्रमातुराकाङ्क्षानिमित्तभूतस्वस्वामिभावसंबन्धो भाष्ये दर्शितः। तत्र हेतुमाह — **दानादीति।** द्रव्यं दत्त्वा यत्र पुरुषो [3]विक्रीयते तत्र दानं स्वामित्वनिमित्तम्। [4]आदिनोपायान्तरसंग्रहः। ननु कारकं शक्तिः, तद्वाचिका द्वितीया कथं क्रियाकारकसंबन्धवाचिकेत्युच्यते, अत आह — **कारकशब्देनेति। अभिसंबन्धः क्रियाकारकयोः** निर्वर्त्यनिर्वर्तकत्वलक्षणः। [5]उपक्रमाधिकरणन्यायेन[6] कारकशब्दे लक्षणामसहमान आह — **अथवेति।** [7]वाचकशब्दे गमकत्वलक्षणेति भावः॥

[२, ५१७–५२५]

(**रत्नप्रकाशः**) वृत्तेः स्वाभाविकत्वपक्षेऽपि वृत्तिशब्दार्थं पृच्छति — **अथेति। किं त आहुरिति।** वृत्तिशब्दार्थमिति शेषः। उत्तरमाह — **परार्थाभिधानमिति।** अवयवार्थात् **परस्य**

---

[1] मीमांसातृतीयाध्यायप्रथमपादद्वादशाधिकरणेऽयं न्यायः प्रकाशितः। तथाहि — आधानप्रकरणे 'वारणो यज्ञावचरः स्यात्, न त्वेतेन जुहुयात्, वैकङ्कतो यज्ञावचरः स्यात्, जुहुयादेवैतेन' इति दारुपात्रं यज्ञार्थं होमार्थं च श्रुतम्। यज्ञावचरः यज्ञप्रचारहेतुरित्यर्थः। तत्र वारणवैकङ्कतादि[दारु]पात्रं प्रकरणादाधाने प्रथममन्वेति। परं त्वनेन पात्रेणाधाने प्रयोजनाभावात् 'आनर्थक्यात् तदङ्गेषु' इति न्यायेनाधानाङ्गभूतपवमानहविष्षु तत्पात्रं निविशते। 'कृत्तिकास्वग्निमादधीत' इत्याधानप्रकरणे 'त्रीणि हवींषि निर्वपति' इत्यादिना तेषां विधानादाधानाङ्गत्वं सिध्यतीति प्राप्ते सिद्धान्तः — अग्निमुद्दिश्य यथाधानं विहितं तद्वदेव 'यदाहवनीये जुहोति, तेन सोऽस्याभीष्टः प्रीतः' इत्याहवनीयोद्देशेन पवमानहविर्होमविधानात् तेषामप्यग्न्यङ्गत्वमेव। अग्निसंस्कारत्वेन विहितानामाधानहविषां न परस्पराङ्गत्वम्। ततश्च पात्रं प्रति प्रकरणं न विनियोजकम्, किं तु 'वैकङ्कतो यज्ञावचरः' इति ततः प्रबलेन वाक्येन सर्वयज्ञेषु तद्विनियोग इति। गुणानामाधानपवमानेष्टीनां परार्थत्वाद् अग्न्यर्थसंस्काररूपत्वादङ्गत्वेन साम्यात् परस्परं नाङ्गाङ्गिभाव इति सूत्रार्थः।

[2] सा, अर्थयोरिति छेदः।

[3] 'क्रीयते' इत्येव युक्तम्।

[4] आदिनादानोपायान्तरसंग्रहः — इ, ऋ.

[5] वेदोपक्रमाधिकरण — अ, ऋ.

[6] अयं न्यायो मीमांसातृतीयाध्यायतृतीयपादप्रथमाधिकरणे लब्धः। तथाहि — ज्योतिष्टोमप्रकरणश्रुतानाम् 'उच्चैर्ऋचा क्रियते, उपांशु यजुषा, उच्चैः साम्ना' इत्युच्चैस्त्वादिधर्माणां किं मन्त्रधर्मत्वमुत वेदधर्मत्वमिति संशये विधिवाक्ये श्रुतानामृगादिशब्दानां मन्त्रवाचकत्वेन तद्धर्मत्वमेवेति यजुर्वेदोत्पन्ना अध्वर्युणा प्रयुज्यमाना अप्यृच उच्चैरेव पठितव्या इति पूर्वपक्षे सिद्धान्त्यते — 'त्रयो वेदा अजायन्त। अग्नेर्ऋग्वेदः, वायोर्यजुर्वेदः, आदित्यात् सामवेदः,' इत्युपक्रमे वेदशब्दानां श्रुतानामसंजातविरोधित्वेन प्रबलत्वात् तदनुरोधेनोपसंहारभूतविध्युद्देशस्य नेतव्यत्वेन ऋगादिपदानामपि वेदपरत्वमेवेति तेषामुच्चैस्त्वादीनां वेदधर्मत्वमेवेति यजुर्वेदोत्पन्नानामृचामुपांशूच्चार्यत्वमेवेति।

[7] वाचिकेति शब्द इत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अन्यस्य विशिष्टस्य विभक्त्यर्थान्वयार्हस्य, **अभिधानम्** अभिधायकमित्यर्थः। एवं च सुबन्तस्य तिङन्तस्य वाक्यस्य [1]चावयवार्थातिरिक्तार्थकत्वेऽपि तस्य धातुप्रातिपदिकान्यतरसंज्ञाभावेन विभक्त्यर्थान्वयानर्हत्वेन न वृत्तित्वप्रसङ्गः। वैयाकरणाभिमतमवयविनं विशिष्टार्थबोधकमविद्वान् कश्चिदवैयाकरणः परस्य शब्दस्यार्थोऽभिधीयते यत्र तत् परार्थाभिधानमिति मन्यमानः पृच्छति — **अथ तेषामिति**। **एवं ब्रुवतामिति**। 'परार्थाभिधानं वृत्तिः' इति ब्रुवतामित्यर्थः। एतेन 'नित्यशब्दवादिमते तु राजपुरुषादीनि [2]वर्णवदनर्थकवाक्यावयवसरूपावयवकानि तत्त्वतो निरवयवकान्येवासत्यप्रक्रियाश्रयेणान्वाख्यायन्ते' इति निरस्तम्। वाक्य इव वृत्तावप्यवयवानां स्वार्थपरतास्तीत्येवाभ्युपगन्तुमुचितत्वात्, अर्धजरतीये मानाभावात्, शास्त्रेण बोधितस्यासत्यत्वं स्वबुद्धिपरिकल्पितस्य सत्यत्वमित्यस्य सुबुद्धिहृदयङ्गमत्वाभावाच्च। **जहत्स्वार्थेति**। जहति **स्वानि** पदानि येषां ते जहत्स्वाः, तेऽर्था यस्यां सा जहत्स्वार्थेत्यर्थः। एतेन 'जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था' इति [3]व्यधिकरणतत्पुरुषोत्तरपदबहुव्रीहिमाश्रयन् निरस्तः। संभवत्समानाधिकरणपदबहुव्रीहिमुत्सृज्य व्यधिकरणपदस्य तस्याश्रयणे मानप्रयोजनचातुर्याणामभावात्। **अजहत्स्वार्थेति**। न जहति अजहति, तानि **स्वानि** पदानि येषां तेऽजहत्स्वाः, तेऽर्था यस्यां सेत्यर्थः। [4]तस्याशयमाविष्कर्तुमाह भगवान् — **किं चात इति**। कस्यां वृत्तावाश्रीयमाणायां किं स्यादिति भावः। इतरः स्वाभिप्रायं प्रकटयति — **यदीत्यादिना**। **पुरुषमात्रस्यानयनं** [5]**स्यादिति**। राजशब्दस्य स्वार्थत्यागपूर्वकं प्रधानभूतपुरुषार्थाभिधानादिति भावः। दोषोपलक्षणमेतत्। [6]तत्र राजपदप्रयोगश्चानर्थकः स्यात्, तस्य तत्र पुरुषपर्यायत्वात्। पर्यायशब्दानां यौगपद्यस्य मन्दबुद्धिनाप्यनाश्रितत्वादिति दूषणान्तरं बोध्यम्। एतेन 'यावयावकशब्दयोरिव पुरुषराजपुरुषशब्दयोः पर्यायत्वं स्यादिति राजशब्दस्य नानर्थक्यम्' इति निरस्तम्। राजशब्दस्य स्वार्थत्यागपूर्वकं पुरुषार्थबोधकत्वेऽभ्युपगम्यमाने राजशब्दोऽनर्थकः स्यादित्यापादिते राजपुरुषशब्दस्य पुरुषशब्दपर्यायत्वकथनस्यात्यन्तासंबद्धप्रलापत्वात्। **द्विवचनं प्राप्नोतीति**। राजशब्दस्य राजसंबन्धिपुरुषपरत्वात् पुरुषशब्दस्य केवलपुरुषपरत्वात् तदर्थयोर्भेदेन धवखदिरावित्यत्रेव द्विवचनप्रसङ्ग इति भावः। एतेन 'राजशब्दो राजसंबन्धिलक्षकः, तथा च [7]राजपुरुषार्थयोरभेदान्वयो भवति-राजसंबन्ध्यभिन्नः पुरुष इति' इति वदन्तोऽप्यवैयाकरणाः प्रत्युक्ताः। [8]संबन्धिज्ञानात् संबन्ध्यन्तरस्मरणमिति न्यायेन शब्दज्ञानाज्जायमानस्यार्थस्मरणस्यैव शाब्दबोधत्वस्याभ्युपगन्तव्यत्वेन तत्र तयोरभेदान्वयबोधकमानाभावेन विशिष्टार्थज्ञानस्य शाब्दस्यासिद्धिप्रसङ्गात्। क्लृप्तकल्प्ययोः क्लृप्तं बलवदिति न्यायविरोधेन प्रकारान्तरेण तस्य विशिष्टज्ञानस्यापूर्वानेकक्लिष्टकल्पनाभिः साधनानौचित्याच्च। तदेवमवैयाकरण आक्षेप्ता अवैयाकरण[9]मतमात्राभिज्ञः स्व[10]दत्तदूषणोद्धारपूर्वकं तयोरेव कश्चित् पक्षः स्थाप्यो भवत्यन्यस्यासंभवादित्याशयेन पृच्छति — **का पुनरिति**। पक्षद्वयमप्युपपादनव्याजेन दूषयित्वा वैयाकरणमतमेव स्थापयिष्यामीत्याशयेन भगवानुत्तरमाह — **जहत्स्वार्थेति**। आक्षेप्ता पृच्छति — **युक्तं पुनरिति**। व्यवस्थापनासंभवेऽपि पक्षस्यास्य संभावनामात्रं युज्यत एवेत्याशयेनोत्तरमाह — **बाढं युक्तमिति**। तस्य पक्षस्य संभावनां तावदुपपादयति दृष्टान्तद्वारेण — **एवं हीति**।

---

[1] वावयवार्थातिरिक्तार्थकत्वेऽपि — ब.
[2] अत्रार्थानुवाद इति बोध्यम्।
[3] व्यधिकरणतत्पुरुषोत्तरपदं बहुव्रीहिं — ब.
[4] तस्याशयं तन्मुखेनैवाविष्कर्तुमित्यर्थः।
[5] भाष्ये 'प्राप्नोति' इत्यस्य स्थाने 'स्याद्' इति पाठोऽभिमत इति भाति।
[6] तेन राजपद — ब.
[7] राजपुरुषयोरभेदान्वयः — प.
[8] लौ. न्या. साहस्री. पृष्ठम् १३.
[9] मतमात्राभिज्ञं — प.
[10] 'दत्त' इति नास्ति — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आक्षेप्ता स्वोक्तं दूषणं स्मारयति — **ननु चेति।** **जहदप्यसाविति।** प्राधान्येन स्वार्थमबोधयदपि स्वार्थविशिष्टमेव परार्थमभिधत्त इति न पुरुषमात्रस्यानयनमिति भावः। नन्वेवं सत्यजहत्स्वार्था-पक्षादस्य पृथक्त्वं नोपपद्यत इत्यत आह — **अथवान्वयादिति।** संबन्धादित्यर्थः। राजपुरुष-शब्दार्थयोः स्वस्वामिभावः संबन्धः स्वाभाविकः स्थित इति तावतैव राजशब्दस्य स्वार्थत्यागपूर्वकं पुरुषार्थपरत्वेऽपि राजसंबन्ध्येव पुरुषः प्रतीयते न केवल इति तस्यैवानयनं भविष्यतीति भावः। एतेन 'राजशब्दः स्वार्थनिमित्तं पुरुषार्थे विशेषमाधाय [1]स्वार्थं जहाति। न हि [2]तन्निमित्तं विशेष-दर्शनं निवर्तते। तद्यथा-अग्निसंबन्धजनितपाकजरूपादिनिवृत्तिर्घटेऽग्निसंयोगे निवृत्तेऽपि न भव-तीत्यर्थः' इति निरस्तम्। वृत्तावुपसर्जनपदानां [3]स्वार्थत्यागपूर्वकं परार्थाभिधानं यस्यां सा जह-त्स्वार्थेति स्वयमेवास्य पक्षस्य व्युत्पादितत्वेन तद्विरोधिस्वार्थविशिष्टार्थान्तरस्मारकत्वस्याङ्गीकर्तु-मनौचित्यात्। न हि शब्देन विशिष्टार्थस्मरणातिरिक्तं [4]किंचिदर्थे आधीयत इति वचनं युक्ति-मत्। **विषम उपन्यास इति।** तैलघृतावयवस्य कस्यचिच्चक्षुर्ग्राह्यस्य घटे सत्त्वाद् अयं घृतघटः, अयं तैलघट इति चाक्षुषज्ञानस्य संभवेऽपि शब्देन त्यक्तेऽर्थे [5]शब्दलेशस्यानुगत्यसंभवात् त्यक्त-स्वार्थेन शब्देन स्वार्थविशिष्टार्थान्तिरस्मारणं न युज्यत इति वैषम्यमिति भावः। एतद्भाष्य-विरोधेनापि विशेषाधानपरः [6]पूर्वकैयटो निरस्तः। इदानीं पूर्वोक्तदृष्टान्तविलक्षणदृष्टान्तेन विशि-ष्टार्थबोधमाह — **यथा तर्हीति।** ननु तत्र पुष्पानुगत्यभावेऽपि गन्धानुगते घ्राणेन्द्रियोपकृतेन चक्षुषा भवितुमर्हति मल्लिकापुटोऽयम्, चम्पकपुटोऽयमिति,[7] प्रकृते तु राजसंबन्धिनः कस्यचिद्वस्तुनः पुरुषा-न्वयिनोऽप्रसिद्धत्वेन तस्य प्रसिद्धत्वेऽप्युपस्थापकाभावेन राजविशिष्टपुरुषप्रतीतिर्भवितुं नार्हतीति स दोषस्तदवस्थ एवेत्यत आह — **अथवेति।** **[8]समर्थाधिकार इति।** 'समर्थः पदविधिः' इति प्रकृत-परिभाषैवाधिकारत्वेनोपचर्यते। **वृत्तौ क्रियत इति।** वृत्तिमात्रविषयकतया क्रियते, अन्यत्र प्रागुक्तैकार्थीभावलक्षणसामर्थ्यस्य प्रकृतपरिभाषाश्रयस्यासंभवादिति भावः। **भेदः संसर्गो वेति।** भेदप्रयुक्तं वाभेदप्रयुक्तं वोभयप्रयुक्तं वा विशिष्टमवयवार्थातिरिक्तं वृत्त्यर्थ इति राजपुरुषशब्दो राजसंबन्धिपुरुषबोधकः संपन्न इति तत्र राजपुरुषशब्दौ स्वार्थं जहितां वा, मा वा, वैयाकरणमतमेव युक्तमिति भावः। एतेन 'यदि च वृत्तौ भेदसंसर्गौ न स्यातां तदा सामर्थ्यमेव न स्यात्, तदा-त्मकत्वात् सामर्थ्यस्येत्यर्थः। तत्र भेदः संसर्गाविनाभावित्वादनुमेयसंसर्गः[9] सामर्थ्यम्, संसर्गो वा भेदाविनाभाव्यनुमेयभेदः, उभौ वा योगपद्येनाश्रीयमाणौ सामर्थ्यमित्यर्थः' इति निरस्तम्। तदुक्तस्य सामर्थ्यस्याग्रे भगवता वक्ष्यमाणार्थगतव्यपेक्षालक्षणसामर्थ्यात्मकतयानेन भाष्येण तस्य पौनरुक्त्य-परिहारायास्य भाष्यस्य शब्दगतैकार्थीभावलक्षणसामर्थ्यपरतयैव व्याख्यातुमुचितत्वात्। द्विविधस्यैव सामर्थ्यस्य भगवता प्रागुट्टङ्कितत्वेन सर्वैर्वैयाकरणैर्व्यवह्रियमाणत्वेन च सामर्थ्यान्तरकल्पनायां मान-प्रयोजनयोरभावाच्च। न हि सामर्थ्यान्तराश्रयणे क्रियमाणेऽपि जहत्स्वार्था वृत्तिर्व्यवस्थापयितुं शक्यते, येन सामर्थ्यान्तराश्रयणं सप्रयोजनं स्यात्। **सर्वं स्वं प्रसक्तमिति।** षष्ठ्या संबन्धि-मात्राक्षेपादिति भावः। **सर्वः स्वामी प्रसक्त इति।** पुरुषमात्रस्य प्रसक्तौ स्वामिविशेषाप्रसक्त्या योग्यतामात्रेण सर्वस्वामिप्रसक्तिरिति भावः। एतेन "यदा पुरुषस्य पारतन्त्र्यं प्रमाणान्तरेणाव-

---

[1] स्वार्थं न जहाति — प.
[2] तन्निमित्तविशेषप्रदर्शनम् — प. तन्निमित्त-विशेषदर्शनं — व.
[3] 'स्वार्थत्याग' इत्यादि 'तद्विरोधि' इत्यन्तं नास्ति — व.
[4] कश्चिद्विशेष इत्यर्थः।
[5] शब्दभेदस्यानु — प.
[6] पूर्वः कैयटः — व.
[7] प्रतीतिरिति शेषः।
[8] 'समर्थाधिकार इति' इति नास्ति — प.
[9] अनुमेयसंसर्गं — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गतं तदपेक्षयैतदुच्यते। अन्यथा पुरुष इत्युक्ते 'अस्ति' इति प्रतीतिः स्यात्, न तु स्वामिमात्राक्षेपः" इति निरस्तम्। प्रमाणान्तरावगतार्थस्य शब्देन प्रसक्त इत्युक्तौ मिथ्याभाषणत्वापत्तेः। शाब्दबोधीयपारतन्त्र्यहीनस्य वस्तुनोऽप्रसिद्धत्वेन यदा पारतन्त्र्येण ज्ञातमिति पारतन्त्र्यज्ञानस्य कादाचित्कत्वोपपादनानर्थक्याच्च। यदप्युक्तम् 'तत्र भेदपक्षे राजशब्दः पुरुषं स्वाम्यन्तरेभ्यो निवर्त्य स्वार्थं जहाति। पुरुषशब्दस्त्वजहदपि स्वार्थं स्वान्तरेभ्यो राजानमिति। ततश्च कृतकार्यस्य निवृत्तिः। अकृतकार्यस्य निवृत्तौ वृत्तिरेव न स्यात्। एवं संसर्गेऽप्यूह्यम्' इति। तदप्यसंबद्धप्रलापरूपमेव। राजशब्दस्य राजसंबन्धिपुरुषस्मारकत्वातिरिक्तस्य स्वाम्यन्तरेभ्यः पुरुषनिवर्तकत्वस्य ब्रह्मणापि दुरुपपादत्वेन जहत्स्वार्थ[1]पक्षप्रवेशापत्तेः। तत्र राजपुरुषशब्दयोरर्थपरत्वाश्रयेऽर्थानां परस्पर[2]व्यावर्तकत्वसामर्थ्यस्याप्रसिद्धस्य कल्पनापत्तेः। तत्कल्पनाश्रयणे जहत्स्वार्थाजहत्स्वार्थाश्रयणानर्थक्यापत्तेश्च। **राजपुरुषमानयेत्युक्त इति**। राजपुरुषशब्देन राजसंबन्धिपुरुषे बोधिते सतीति शेषः। **राजा पुरुषं निवर्तयतीति**। तत्र राज्ञः पुरुषनिवर्तकत्वं नाम पुरुषविशेषणत्वेन स्मृतत्वमेव। तथा पुरुषस्य राजनिवर्तकत्वं विशेष्यत्वेन स्मृतत्वं ज्ञेयम्। **उभयतो व्यवच्छिन्न इति**। विशेषणविशेष्यभावेन परिच्छिन्ने राजसंबन्धिपुरुषरूप इत्यर्थः। प्रतीयमान इति शेषः। **यदि स्वार्थं जहातीति**। अवयव इति शेषः। यदिशब्दोपादानात् 'न जहाति चेन्न जहातु' इत्यपि गम्यते। तदेवमुपपादनव्याजेन जहत्स्वार्थवृत्तिपक्षं पराभिमतं दूषयित्वा तथैव पक्षान्तरमपि पराभिमतं दूषयितुमाह — **अथवेति**। **संचयायैव प्रवर्तत इति**। तथा शब्दोऽपि स्वार्थविशिष्टमर्थान्तरं बोधयिष्यतीति युज्यतेऽयमपि पक्ष इति भावः। तत्र प्रागुक्तं दूषणं स्मारयति — **ननु चेति**। **प्रथमाया इति**। 'अभिहितः' इत्यादिना वक्ष्यमाणोऽभिप्रायः। [3]तदभिप्रायमाविष्कर्तुमन्य आह — **न प्रथमासमर्थ इति**। इतरोऽप्यन्यस्याशयं ज्ञातुमाह — **षष्ठ्यास्तर्हीति**। अन्य आह — [4]**न च षष्ठीसमर्थ इति**। इतरः स्वाशयमाविश्चिकीर्षुराह — **प्रथमाया एवेति**। अन्य आह — **ननु चेति**। इतरः स्वाशयमाविष्करोति — **अभिहित इति**। षष्ठ्या वाक्यावस्थायामभिहितः **सोऽर्थः** संबन्धः, वृत्तौ लक्ष्यार्थान्तर्गतः सन् राजशब्दरूपप्रातिपदिकार्थात्मकः संपद्यत इत्यर्थः। एतेन 'कश्चिदर्थोऽभिहितोऽपि नान्तर्भवति, यथा राज्ञ इति षष्ठ्या संबन्धोऽभिहितो न क्वचिदन्तर्भवति। कश्चिदन्तर्भूतोऽपि नाभिहितः। यथा राजसख इति तत्पुरुषे राजा सखास्येत्ययमर्थोऽन्तर्भवति, [5]नाभिधीयते। तथा कश्चिदर्थोऽभिहितोऽन्तर्भूतोऽपि न प्रातिपदिकार्थः। यथा पचतीति कर्ताभिहितो गुणभावादन्तर्भूतः, न त्वसौ प्रातिपदिकार्थ इति त्रयमुपात्तम्' इति निरस्तम्। षष्ठ्यन्तस्य तिङन्तस्य च प्रातिपदिकत्वाभावेनैव षष्ठीतिङर्थयोर्विशिष्टार्थान्तर्गतत्वेऽपि प्रातिपदिकार्थत्वाभावस्य सिद्धत्वात्। प्रातिपदिकार्थगतधर्माणां सर्वेषां प्रातिपदिकार्थत्वस्यानापादनीयत्वेन तदर्थविशेषणस्यानर्थक्यात्। प्रथमाया एव तत्र प्रसङ्ग इति सूचनाय प्रातिपदिकार्थत्वोक्तेश्चारितार्थ्याच्च। [6]तदेवमजहत्स्वार्थापक्षेऽपि दुष्टे सति वैयाकरणमतमेव युक्तमित्याह — **संघातस्यैकार्थ्यादिति**। राजपुरुष इत्यादिसमुदायस्य विशिष्टार्थाभिधायित्वाद्विशिष्टस्य चैकत्वान्न ततोऽवयवसंख्याप्रयुक्तं द्विवचनं भविष्यतीति भावः। तदेवं शब्दगत-

---

[1] 'पक्ष' इति नास्ति — प.

[2] व्यावर्तकत्वासामर्थ्यस्याप्रसिद्धस्य — ब.

[3] तदभिप्रायं तन्मुखेनैवाविष्कर्तुमित्यर्थः।

[4] भाष्ये 'न षष्ठीसमर्थः पुरुषः' इत्यत्र 'न च षष्ठीसमर्थः पुरुषः' इति पाठोऽभिमत इति भाति।

[5] 'न त्वभिधीयते' इति प्रदीपे दृश्यते। तुशब्दं विहायानुवादोऽत्र।

[6] तदेवं जहत्स्वार्थापक्षेऽपि — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मेकार्थीभावलक्षणं प्रकृतोपयोगि सामर्थ्यमुपपाद्य [1]"इसुसोः सामर्थ्ये' इति षत्वविध्युपयोग्यर्थगतं सामर्थ्यमाह — **परस्परव्यपेक्षामिति**। परस्परान्वययोग्यता व्यपेक्षालक्षणं सामर्थ्यमिति भावः। **एक इच्छन्तीति**। अवैयाकरणाः सर्वे व्यपेक्षालक्षणमेव सामर्थ्यमिच्छन्ति, न त्वेकार्थीभावमिति भावः। एवं चावैयाकरणानामजहत्स्वार्थावृत्तिपक्ष एवाभिमतः। सा च न वृत्तिमात्रे, किं तु बहुव्रीहिषष्ठीतत्पुरुषादिस्थले। राजपुरुष इत्यादौ च व्यपेक्षालक्षणसामर्थ्यवशाद् राजसंबन्ध्यभिन्नः पुरुष एक एवेति द्विवचनपरिहारो भवति। परं तु व्यपेक्षालक्षणसामर्थ्यस्य विशिष्टार्थबोधकत्वेऽभ्युपगम्यमाने प्रमाणान्तराभ्युपगमः स्यादिति दुष्टता तस्य मतस्य। एकार्थीभाव इवेदमपि सामर्थ्यं शब्दगतमेवोक्तमिति मन्यमानः पृच्छति — **का पुनरिति**। उत्तरमाह — **न ब्रूम इति**। व्यपेक्षास्वरूपं दर्शयति — **इह राज्ञ इति**। **राजा पुरुषमपेक्षत इति**। इदं चेतनस्थले संभवमात्रेण दर्शितम्। वस्तुतस्तु राज्ञ इति षष्ठ्यन्तपदश्रोतुरेव पुरुषापेक्षा प्रकृतोपयोगिनी। तस्या अर्थनिष्ठत्वं विषयतासंबन्धेन। **क्रियाकारकयोरभिसंबन्धस्येति**। अवैयाकरणमताभिप्रायेणेदम्। ते हि [2]'कर्मणि द्वितीया' इत्यादेः कर्मत्वादौ द्वितीयेत्यादिरर्थ इति वदन्ति। वैयाकरणमते तु यथाश्रुतं कर्मादय एव द्वितीयाद्यर्थाः। तत्र कर्मादिशब्दानां कर्मत्वादिलक्षणायां मानाभावात्॥

[२, ५२५–५३१]

(उद्द्योतनम्) प्रश्नस्य प्रकृतसंगतिमाह — **यदीति**। 'सं चोपसर्गः' इत्यस्य किं प्रयोजनम्, अत आह — **तस्येति**। उपसर्गत्वस्य क्रियायोगं विनासंभवादित्यर्थः। अग्रिमभाष्यानुरोधेन द्वयोर्द्वयोरैकार्थ्यं दर्शयति — **संगतेति**। शब्देऽसंभावितं व्यतिषङ्गशब्दार्थमाह — **रज्ज्वादीति**। 'एवंजातीयकेषु' इत्यस्य दृष्टान्तदार्ष्टान्तिकसाधारणमर्थमाह — **व्यपेक्षेति**। 'अहानावपि' इति [3]पूर्वसमाधानस्याव्यापकत्वं सूचयन्नाह — **सत्यामपीति**। ननु वृत्तावेकार्थीभावाङ्गीकारात् 'एकार्थीभावकृतो विशेषो वक्तव्यः' इति गौरवं कथमुच्यते, अत आह — **यदीति**। वृत्तावेकार्थीभावमनङ्गीकृत्य व्यपेक्षासामर्थ्याङ्गीकारेऽयं दोष इत्यर्थः। [4]**समानार्थस्येति**। वृत्तिवाक्ययोर्व्यपेक्षालक्षणसामर्थ्यस्य तुल्यत्वादित्यर्थः। शब्दस्य नित्यानित्यत्वेन द्वैविध्यमुक्तम्। तत्र [5]किमाश्रयणेनेदं शास्त्रं प्रवृत्तम्, अत आह — **तदेवमिति**। **स्वाभाविकं** वृत्तावेकार्थीभावः, वाक्ये व्यपेक्षेत्येतत् स्वाभाविकं न तु वाचनिकमित्यर्थः। [6]**कदाचित्** [7]'अचतुर' इत्यादौ। **कदाचित्** [8]"चार्थे द्वन्द्वः' इत्यादौ। अनित्यपक्षे गौरवप्रसङ्गान्नित्यपक्ष एव युक्त इत्याह — **कार्यपक्षे त्विति**। गौरवमेवाह — **तथा हीति**। निष्क्रान्तः कौशाम्ब्याः, गोयुक्तो रथः, घृतपूर्णो घटः, गुडमिश्रा धानाः, केशानां संघातश्चूडा अस्य, सुवर्णस्य विकारोऽलंकारोऽस्येति विग्रहः। 'द्विदशाः' इत्यत्र द्वित्वं न संख्याविशेषणम्, [9]तस्या एकत्वात्। न संख्येयस्य, बहुत्वात्। किं त्वावृत्तदशत्वविशेषणम्। [10]तच्च सुचं विना प्रदर्शयितुं न शक्यत इति द्विर्दश येषामिति सुजन्तेन विग्रहः। एतच्च [11]'संख्य-

---

[1] पा. सू. ८. ३. ४४.
[2] पा. सू. २. ३. २.
[3] पूर्वसमाधानस्य व्यापकत्वं — अ.
[4] समासार्थस्येति — अ.
[5] किमाश्रयं शास्त्रं प्रवृत्तम् — ऋ.
[6] 'कदाचित् अचतुरेत्यादौ' इति नास्ति — अ.
[7] पा. सू. ५. ४. ७७.
[8] पा. सू. २. २. २९.
[9] दशत्वसंख्याया इत्यर्थः॥ तस्य — अ.
[10] आवृत्तं दशत्वमित्यर्थः।
[11] पा. सू. २. २. २५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

याव्ययासन्न' इत्यत्र वक्ष्यते। पर्वणि पर्वणि सप्त पर्णानि यस्येति वीप्सार्थे बहुव्रीहिः [1]'अनभिहित' सूत्रे वक्ष्यते। 'गौरखरः' इति [2]जातिविशेषे समासः, अन्यत्र 'गौरः खरः' इत्येव। **प्रतिपादनीयं** वचनेनेत्यादिः। तच्छब्दस्य प्रकृतपरामर्शित्वादनन्तरोक्तव्यपेक्षासामर्थ्य एव दोषाभिधानमिति भ्रमं वारयति — **एवं व्यपेक्षेति**। उदाहरणद्वयानुरोधेन नानाकारकशब्दं द्वेधा व्याचष्टे— **नानाशब्द इति। न त्विति**। तथा च 'हर' इत्यस्य [3]'तिङ्ङतिङः' इति निघातो न भवति। 'पच तव' इत्यत्र त्वदर्थं पचेति प्रतीतावपि तवेत्यस्य कारकत्वेनाविवक्षितत्वादोदनरूपकारकान्तरसद्भावात् प्रतिषेधो युष्मदस्मदादेशस्य सिद्ध इत्यर्थः। [4]**भिन्नकारकत्वमिति**। भिन्नस्य कारकं भिन्नकारकम्, तस्य भावस्तत्त्वम्। तत्र हेतुः — **भिन्नक्रियेति**। अनेन पाठान्तरेण 'नानाकारकात्' इत्यस्य प्रथमोक्ततत्पुरुषपक्ष एव योजितः। हरतेर्दण्डापेक्षां दर्शयति — **अनेनेति। पदेनेति**। यद्यपि 'समानवाक्ये निघातयुष्मदस्मदादेशाः' इत्यनुपदं[5] वक्ष्यत इति नात्रातिप्रसङ्गः, तथाप्येतत्प्रतिषेधपक्षे तन्न वक्तव्यम्। व्यपेक्षासत्त्वे [6]समानवाक्यत्वमप्यस्तीति [7]वाभिप्रायेण नानाकारकात् प्रतिषेधवचनमिति भावः। **प्रतिपादनादिति**। [8]तवेति षष्ठ्येत्यादिः। **हरणं प्रतीति**। हरणमेव प्रतीत्यर्थः। ननु 'दण्डः' इत्युक्ते 'आनेयः' इत्यादेरपि प्रतीतिसंभवात् 'अस्तीति [9]गम्यते' इति कथमुच्यते, अत आह — **यत्रेति**। सतो द्रव्यस्यान्यत्र कारकत्वात् सत्तान्तरङ्गा। एकेन कारकेणैकशब्द[10]संबन्धिनः कारकान्तरेण शब्दान्तरसंबन्धे दृष्टान्तमाह — भाष्ये **तद्यथेति**। [11]'तत्र निर्ज्ञाते देवदत्ते प्रश्नायोगादाह — **यदेति**। क्व स्थितो देवदत्त इति प्रश्नः, यो वृक्षे तिष्ठति सोऽयमित्युत्तरं[12] भाष्ये। ननु सर्वेषामपि स्थितत्वात् 'तिष्ठति' इति विशेषणं व्यर्थम्, अत आह —**यदान्य इति**। **प्रचय**शब्दस्य प्रशिथिलावयवसंयोगार्थशङ्कां वारयति — **अनेकस्मिन्निति**। ननु द्वन्द्वानन्तरं षष्ठीतत्पुरुषस्येष्टत्वात् प्रतिषेधो व्यर्थः, अत आह — [13]**'यत्रेति**। स्वस्वामिभावसंबन्धे राज्ञा सामर्थ्यम्, इतराभ्यां चार्थे। भवतु द्वन्द्वपूर्वकस्तत्पुरुषः, अत आह — **पूर्वमिति**। परत्वाद् द्वन्द्वः पूर्वः, अत आह — **विप्रतिषेधेति**। विप्रतिषेधाभावे हेतुः — **भिन्नेति**। भवतु [14]'तत्पुरुषे प्राथम्यं, को दोषः, अत आह — **तत्र षष्ठीति**। द्वन्द्वपूर्वत्वेऽपि [15]'अवङ स्फोटायनस्य' इत्यवङि 'राजगवाश्वपुरुषाः' इति भवतीति रूपे न[16] कश्चिद्विशेषः, अत आह — **अर्थश्चेति**। द्वन्द्वपूर्वत्वेऽपि सिद्धान्ते व्यवस्थितविभाषया [17]'इन्द्रे च नित्यम्'[18] इति चकारस्यानुक्तसमुच्चयार्थत्वाद्वा 'राजगवाश्वपुरुषाः' इत्यत्रावङ नित्य इत्याहुः। एकार्थीभावसामर्थ्ये [19]'प्रकर्षाभावादाह — **शक्तेति**।

---

[1] पा. सू. २. ३. १.
[2] जातिविशेषसमासः — अ.
[3] पा. सू. ८. १. २८.
[4] प्रदीपे 'न तु भवतिक्रियां प्रतीति नानाकारकत्वम्' इत्यत्र 'न तु भवतिक्रियां प्रतीति भिन्नकारकत्वम्' इत्यन्नंभट्टपाठः।
[5] अस्मिन्नेव सूत्रे।
[6] समासवाक्यत्वमपि — अ.
[7] नानाभिप्रायेण — अ.
[8] तवेत्यादिः — ऋ.
[9] गमक इति — अ, ऋ.
[10] संबन्धिना — अ.
[11] तत्त्वनिर्ज्ञाते — अ, ऋ.
[12] प्रथमप्रश्नोत्तरमात्रमत्राभिप्रेतम्, न तु विशिष्टम्, तथा सति 'यो वृक्षस्तिष्ठति तस्मिन् स्थितोऽयम्' इति वाक्यविन्यासस्यावश्यकत्वात्।
[13] प्रदीपे 'तत्र गो राज्ञापि सामर्थ्यम्' इति दृश्यते। 'तत्रेति' इत्येवोचितं भाति।
[14] तत्पुरुषप्राथम्यं — अ.
[15] पा. सू. ६. १. १२३.
[16] न कश्चिद्दोषः — अ.
[17] पा. सू. ६. १. १२४.
[18] नित्यपदघटितः सूत्रपाठो वृत्त्यनुरोधेन।
[19] प्रकर्षभावादाह — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आशुतरत्वमन्तरङ्गत्वमभिप्रेतमित्याह — **प्रथमेति**। ग्रन्थस्याशुतरत्वं नास्ति, सत्त्वे वा सर्वसाधारण्याद् विशेषणानर्थक्यम्, अत आह — [1]**आशुतरेति**। समानविभक्तित्वस्य विनिगमकत्वमाह — **तुल्येति**। समुदायशब्देन द्वन्द्वार्थो विवक्षित इत्याह — [2]**समुदायं चेति**। पूर्वस्माद्व्याख्यानाद् भेदमाह — **अत्र पक्ष इति**। यद्वा, समुदायसामर्थ्यं सामर्थ्ये न हेतुः, अभेदात्, अविनिगमकत्वाच्च, अत आह — **अत्र पक्ष इति**। हेतुत्वमेवाह — **समुदायेति**। यद्यपि राज्ञोऽवयवेनापि समुदायद्वारकः संबन्धोऽस्ति, तथापि [3]व्यवहितः सः, समुदायेन तु साक्षादिति संबन्धप्रकर्षात् सामर्थ्ये प्रकर्ष इति भावः। वाकारस्य हेत्वन्तरद्योतकत्वेनोपयोगं भाष्योक्तमाह — **सापेक्षत्वेनेति**। राज्ञस्त्रितयविशेषणत्वस्य विवक्षितत्वादश्वपुरुषसापेक्षत्वम् ॥

[२, ५२५–५३१]

(रत्नप्रकाशः) इदानीं [4]व्यपेक्षालक्षणं सामर्थ्यं प्रकृतसूत्रोपयोगितयैव निर्दशितमिति मन्यमानः पृच्छति — **अथेति**। **गतमिति**। अवगतमित्यर्थः। सर्वे हि गत्यर्था ज्ञानार्थाः। समर्थशब्दस्य द्विविधसामर्थ्यपरत्वमुपपादयति — **समोऽयमिति**। **क्रियाविशेषमाहुरिति**। शक्यलक्ष्यद्योत्यभेदेन त्रिविधः शब्दार्थ इति सामान्यतः 'आहुः' इति निर्देशः। द्योतयन्तीति प्रकृतोचितार्थः। **तत्र प्रयोगादिति**। सम इति शेषः। प्रयोगार्हानिप्रयुक्तानाह — **संगतार्थमित्यादिना**। शब्दनिष्ठसामर्थ्ये संगतादयः सर्वे बहुव्रीहयः, अर्थगते तु संप्रेक्षितादी द्वौ कर्मधारयौ। तथा गतसृष्टप्रेक्षितबद्धशब्दानामन्यतमस्यार्थस्तत्र संशब्देन गम्यत इति पक्षद्वयेऽप्युपपन्नं सूत्रमिति भावः। **संप्रेक्षितार्थ इति**। अयमर्थः प्रागेव दर्शितः 'राजा पुरुषमपेक्षते, पुरुषो राजानम्' इति। **संबद्धार्थ इति**। राजपुरुषो हि [5]परस्परं स्वस्वामिभावेन संबद्धौ। एवमन्येष्वपि यथायथं संबद्धत्वमूहनीयम्। बध्नातिना व्यतिषङ्गो न गम्यत इति मन्यमानः पृच्छति — **कः पुनरिति**। उत्तरमाह — **व्यतिषङ्ग इति**। परस्परसंश्लेष इत्यर्थः। एतेन 'रज्ज्वादिनिमित्तः संश्लेषो व्यतिषङ्गः' इति निरस्तम्। 'संबद्ध इत्युच्यते [6]सः' इत्यादिना शङ्कितृनिर्दशित एवार्थो भगवतोऽभिमत इति वक्तुमनुचितत्वात्। 'नावश्यम्' इत्यादिना स्वाभिमतार्थस्य भगवतैव निदर्शयिष्यमाणत्वेन तद्विरोधाच्च। **व्यतिषङ्ग एवेति**। त्वदभिमत इति शेषः। एवं च व्यतिषङ्गशब्दस्याहानावपि वृत्तिर्भगवतोऽभिमता भवति। अन्यथा 'नावश्यम्' इत्यादिः 'वर्तते' इत्यन्ता फक्किका असंगता स्यात्, 'तर्ह्यहानिः' इत्येव वक्तुं युक्तत्वात्। **यावन्योन्यं न जहीत इति**। 'तावनुषक्तावित्यप्युच्यते' इत्युक्तप्रायं ज्ञेयम्। ननु पूर्वं दम्यौ रज्ज्वा बद्धावेव स्थितौ तदभ्यासपाटवेन तथैव संचरत इति तत्रापि मदभिमतव्यतिषङ्ग एव बध्नात्यर्थ [7]इत्यत आह — **अथवेति**। **एवंजातीयकेष्वपीति**। त्वदभिमतव्यतिषक्त-

---

[1] प्रदीपे 'आशुतरग्रन्थ इति। आशु प्रतिपत्तव्यो ग्रन्थ आशुतर उच्यते।' इति दृश्यते। अन्नंभट्टस्याभिमतस्तु 'आशुतरग्रन्थ इत्याशुप्रतिपत्तव्यो ग्रन्थ उच्यते' इति विशिष्टः कैयटग्रन्थतयेति भाति।

[2] प्रदीपे 'समुदायद्वन्द्वार्थं प्रति' इत्यत्र 'समुदायं च द्वन्द्वार्थं प्रति' इत्यन्नंभट्टपाठ इति भाति।

[3] व्यवहितः समुदायो न तु साक्षादिति — अ.

[4] व्यपेक्षालक्षणसामर्थ्यं — प.

[5] 'परस्परम्' इति नास्ति — ब.

[6] भाष्ये 'संबद्ध इत्युच्यते यो रज्ज्वा' इत्यत्र 'संबद्ध इत्युच्यते सः, यो रज्ज्वा' इति पाठो रत्नप्रकाशकृदभिमत इति भाति।

[7] इत्याह — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भिन्नजातीयेष्वपीत्यर्थः। **गर्गैः संबन्ध इति**। विवाहादिनिबन्धनो गर्गैः सह संबन्धः। इदानीं व्यपेक्षालक्षणसामर्थ्याश्रयेण प्रकृतपरिभाषाप्रवृत्तावतिप्रसङ्गापादकं वार्तिकमवतारयति — **अथैतस्मिन्निति**। **विशेष इति**। दोषाभाव इत्यर्थः। **वक्तव्य इति**। तथा च व्यपेक्षाश्रयणमत्र गौरवावहमिति भावः। वार्तिकं पठति — **तत्रेति**। **नानाकारकादिति**। नानाशब्दस्य क्रियान्तरलक्षकस्य कारकशब्देन मयूरव्यंसकादित्वात् समासः। क्रियान्तरकारकात् परस्य तिङन्तादेर्निघातादिप्रतिषेधो वक्तव्य इत्यर्थः। **अयं दण्डो हरानेनेति**। अयं दण्डोऽस्ति, हरानेनेति वाक्यद्वयमिदम्। तत्रास्तिक्रियाकर्तुर्दण्डस्य हरणस्य च क्रियाकरणभावयोग्यतारूपव्यपेक्षालक्षणसामर्थ्यसत्त्वान्निघातादेः पदविधित्वाच्चातिप्रसङ्ग इति भावः। एकार्थीभावाश्रयेण प्रकृतपरिभाषाप्रवृत्तौ तु तत्र दण्डहरशब्दयोरेकार्थीभावाभावादेवास्याप्रसक्तिः। एवं युष्मदस्मदादेशस्थलेऽपि ज्ञेयम्। यदि नानाकारकत्वं तदा व्यपेक्षैव न स्यात्, यदि व्यपेक्षास्ति तर्हि नानाकारकत्वाभावः, क्रियान्तरं प्रत्येव[१] कारकं नानाकारकमिति मन्यमानः कश्चिदाह — **किमुच्यत इति**। समाधत्ते — **नापि ब्रूम इति**। **यच्छब्द आह तदस्माकं प्रमाणमिति**। शाब्दबोधे शब्दोपात्तस्यैव [२]भानम्, दण्डस्तु प्रथमान्तोपस्थापितकर्तृत्वेन 'अस्ति' [३]इत्यनेनैवान्वयार्हः, न तु हरेत्यनेन करणत्वेनान्वयार्ह इति क्रियान्तरकारकमेव भवतीति भावः। **कर्ता भूत्वेति**। पूर्ववाक्येऽस्तिक्रियाया इति शेषः। उक्तार्थे दृष्टान्तमाह — **तद्यथेति**। सामर्थ्यद्वयसाधारण्येनान्यत्रातिप्रसङ्ग इत्याह — **प्रचय इति**। अनेकैः संबन्धे विवक्षिते एकवाचकेन समासो नेति वाच्यमित्यर्थः। अन्यथा गोः राजशब्देन सह तत्पुरुषेऽश्वपुरुषाभ्यां सह द्वन्द्वे च तत्पुरुषत्वप्रयुक्ते टचि 'राजगवाश्वपुरुषाः' इत्येकमेव रूपं स्यात्, न तु [४]राजगोश्वपुरुषाः, राजगोअश्वपुरुषा इति च। एतेन "अर्थश्च भिद्यते। 'राजगवाश्वपुरुषाः' इत्युच्यमानेऽश्वपुरुषयो राज्ञा संबन्धो न प्रतीयेत" इति निरस्तम्। यौगपद्येन समासद्वयमभ्युपगम्यार्थभेदापादनानौचित्यात्। प्रथमतो द्वन्द्वे सति द्वन्द्वोत्तरमेव तत्र तत्पुरुषो भविष्यतीति नोक्त [दोष] इत्याशयेन समाधत्ते — **समर्थतराणां [५]वेति**। समर्थतरत्वं द्वन्द्वभावित्वमिति वक्ष्यति भगवानेव। एतेन 'शक्ततराणामित्यर्थः' इति निरस्तम्। पर्यायशब्दोच्चारणमात्रेण प्रकृते नैराकाङ्क्ष्याभावात्। तदभावेऽपि यथाश्रुतमाष्येणैव नैराकाङ्क्ष्याच्च। **समासो भविष्यतीति**। आशुतरमिति शेषः। **कुत एतदिति**। द्वन्द्वभावीन्येव समर्थतराणि भवन्ति, न तत्पुरुषभावीनीत्यवधारणं कुत इत्यर्थः। सामर्थ्यातिशयकार्यस्याशुतरवृत्तित्वस्यानुभवेन तत्कारणं समर्थतरत्वं तत्रास्तीत्यनुमीयत इति मन्यते। एतेन "प्रथमा प्रातिपदिकार्थमात्रे विधीयमाना न किंचिद्वाह्यं वस्त्वपेक्षते। षष्ठी तु बाह्यसंबन्ध्यपेक्षत्वाद् बहिरङ्गा। तत्रान्तरङ्गप्रथमानिमित्तः [६]पूर्वं द्वन्द्वो भवति। [७]'असिद्धं बहिरङ्गमन्तरङ्गे' इति द्वन्द्वे कर्तव्ये षष्ठीसमासस्यासिद्धत्वात्" इति कैयटो निरस्तः। प्रथमान्तानामेव द्वन्द्व इत्यत्र मानाभावेन तदुक्तप्रकारासंभवात्। 'अपर आह' इत्युत्तरभाष्यस्यान्तरङ्गबहिरङ्गन्यायमूलत्वेनास्यापि तन्मूलत्वे मतभेदासंभवाच्च। **आशुतरग्रन्थ इति**। [८]आशु प्रतिपद्यमानो ग्रन्थो येन इत्यर्थः। नन्वाशुतरवृत्तित्वेन [९]समर्थतरत्वं ज्ञेयम्, [१०]समर्थतरत्वेनाशुतरवृत्तित्वमित्यस्वरसादाह — **अपर आहेति**।

---

[१] एवकारार्थे तात्पर्यमत्र।

[२] मानम् — ब.

[३] इत्यनेनान्वयार्हः — प; इत्यनेन करणत्वेनान्वयार्ह इति — ब.

[४] पूर्वरूपप्रकृतिभावाभ्यामिति भावः।

[५] चेति — ब.

[६] द्वन्द्वः पूर्वं भवतीत्यन्वयः।

[७] परिभाषा ५०.

[८] आशुतरप्रतिपाद्यमानः — प.

[९] 'समर्थतरत्वं ज्ञेयम्' इति नास्ति — ब.

[१०] समर्थतरत्वेन नाशुतर — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समानविभक्तीनीति। एकविभक्तीनीत्यर्थः। तथा चानेकविभक्त्याश्रयस्तत्पुरुषो वहिरङ्ग इति तस्यासिद्धत्वादादौ द्वन्द्व एव भवतीति भावः। एवं च समर्थतरत्वं नामान्तरङ्गत्वमिति फलितम्। ननु तत्र तत्पुरुषस्य भिन्नविभक्त्याश्रितत्वेऽपि द्विपदाश्रयत्वाद् द्वन्द्वस्यैकविभक्त्याश्रितत्वेऽपि बहुपदाश्रयत्वादुभयोस्तुल्यकक्षतैवेत्यत आह — **समुदायसामर्थ्याद्वेति**। तथा च राजशब्दस्य गोशब्देन सामर्थ्याभावात् तत्पुरुषाप्रसक्तौ द्वन्द्व एवादौ भविष्यतीति भावः। अन्यस्तु समर्थतरत्वमाशुतरवृत्तौ हेतुः, समर्थतरत्वे तु समुदायसामर्थ्यमिति व्याचष्ट इत्याह — **अपर आहेति**। **समुदायसामर्थ्यादेवेति**। तथा च राजशब्देन सह गोशब्दस्य सामर्थ्यमात्रं स्थितम्, अश्वपुरुषाभ्यां तु समर्थतरत्वमिति भावः। एकस्मिन् [1]साध्ये हेतुद्वयं चेत् समुच्चयो वा विकल्पो वा तत्र हेत्वोर्युज्यते, न तु साध्यभेद इति [2]वाशब्द एतस्मिन् पक्षे न युज्यत इत्याशयेनाह — **अस्मिन् पक्ष इति**। राजशब्दस्य सामर्थ्याभ्युपगमानभ्युपगमपरतया वाशब्दः समर्थितो भवतीत्याशयेनाह — **एतच्चेति**॥

[२, ५३२–५३७]

(उद्द्योतनम्) वाक्यसंज्ञाया उपयोगमाह — **नानेति**। **क्वचिदिति**। 'पटवे ते दास्यामि' इत्यादौ तेमयाद्यादेशस्य वाक्याधिकाराधीनत्वमनुपदं वक्ष्यते। आकाङ्क्षायोग्यतासंनिधिमत्पदकदम्बकं लौकिकं वाक्यम्, तद्ग्रहणे 'अयं दण्डो हरानेन' इत्यत्रापि निघातप्रसङ्ग इति भावः। [3]शास्त्रीयमप्युदाहरणमाह — **अट्कुप्विति**। **लक्षणेति**। एकत्वाविवक्षायां तिङरहितवाक्याभावेन [4]तिङ्ग्रहणं व्यर्थं स्यात्। अनेकतिङसहितस्यापि[5] वाक्यत्वे लौकिकस्यैव ग्रहणसंभवेन पारिभाषिकवाक्यलक्षणं च व्यर्थं स्यादित्यर्थः। एकत्वविवक्षायां संमतिमाह — **तथा चेति**। एकत्वाविवक्षायामनेकतिङ्युक्त[6]वाक्ये प्रतिषेध आवश्यक इति कथं तदानर्थक्यं स्यादित्यर्थः। नन्वसति तिङः प्रतिषेधे 'भवति पचति' इत्यत्र सामर्थ्यसद्भावान्निघातः कस्मान्न भवतीत्यत आह — [7]**भवतीति**। **साध्येति**। ओदनभवनक्रियायाः पाकक्रियासाध्यत्वादित्यर्थः। **यद्यपीति**। कारकाव्ययोरपि क्रियां प्रति विशेषणत्वात् [8]विशेषणग्रहणेनैव तयोः संग्रहात् पृथग्ग्रहणं व्यर्थमित्यर्थः। चशब्दस्य कारकं चेत्यन्वयः। ननु विशेषणशब्देन सामान्येन विशेषणमात्रस्य ग्रहणसंभवात् 'सक्रियाविशेषणम्' इति व्यर्थम्, अत आह — **प्रत्यासत्त्येति**। [9]**कृदन्तेष्वपीति**। तत्र प्लुतादिकं वाक्यसंज्ञाकार्यम्। एकत्वपरत्वे 'ब्रूहि ब्रूहि' इत्युदाहरणासंगतिः, अत आह — **एकशब्द इति**। समानस्तिङ यस्मिन् पदसमुदाय इति बहुव्रीहिः। समानत्वं च द्विरुक्त्या, न [10]तु तुल्यत्वमात्रम्, 'देवदत्त श्लोकं पठ, यज्ञदत्तानुवाकं पठ' इत्यत्र यज्ञदत्तेत्यत्र निघातप्रसङ्गात्, इति। **ब्रूहीति**। संज्ञाप्रयोजनकथनम्। भाष्ये [11]**विकल्पत इति**। प्रतिषेधो न वक्तव्य इत्येवं विजानीयादित्यर्थः।

---

[1] 'साध्ये' इत्यस्यानन्तरं तुशब्दोऽधिकः — प; न्यासे — व.

[2] वाशब्दस्तस्मिन् — व.

[3] शास्त्रीयमप्याह — ऋ.

[4] तिङन्तबोधकाख्यातग्रहणमित्यर्थः।

[5] अपिशब्दो नास्ति — अ.

[6] वाक्यप्रतिषेधः — अ, ऋ.

[7] प्रदीपे 'पचति भवतीत्यादौ' इत्यत्र 'भवति पचतीत्यादौ' इति निर्णयसागरमुद्रिते पाठः।

[8] विशेषणाग्रहणेनेह तयोः — अ.

[9] प्रदीपे 'क्रियाप्रधानत्वं लक्ष्यत इत्यतिङन्तेष्वपि' इत्यत्र 'क्रियाप्रधानत्वं लक्ष्यत इति कृदन्तेष्वपि' इत्यन्नंभट्टपाठ इति भाति।

[10] तुशब्दो नास्ति — अ.

[11] विकल्प्यत इति — अ, इ, ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]उदाहरणद्वयानुरोधादाह — **उपलक्षणमिति**। **आदेशाः** [2]अपीति शेषः। ननु 'नद्याः' इत्यादेरपि कूलादिद्वारा तिष्ठतिना संबन्धात् कथमसामर्थ्यम्, अत आह — **युक्तयुक्तेऽपीति**। समानवाक्याधिकारेऽपि कथं तत्र निघातसिद्धिः, उक्तवाक्यलक्षणाभावात्, अत आह — **नद्या इति**। कूलशाखौदनानां षष्ठीत्रयं विशेषणम्। **द्वयोरिति**। द्विशब्दस्य समासशब्देन षष्ठीसमासः, समाहारद्विगौ 'द्विसमासी' इति प्रसङ्गादिति चोदकस्याभिप्राय इति भावः। **समुदायस्य** राजगोपदसमुदायस्य। उभयोरपि षष्ठीसमास एवेति कथं द्विप्रकार इत्युच्यते, अत आह — **अमुमेवेति**। राज्ञो गोक्षीरमित्यर्थे राजगोक्षीरमितीष्यत एव, अत आह — [3]**एकस्मिन्निति**। राज्ञो या गौस्तस्याः [4]क्षीरमित्यर्थ इत्यर्थः। गो राज्ञा पूर्वं समासे 'राजगवीक्षीरम्, क्षीरेण समासे 'राजगोक्षीरम्'। समासद्वययौगपद्ये तु 'राजगवीक्षीरम्' इत्येव भवति। 'प्राप्नोति' इति वदता 'भवितव्यम्' इति कथमुक्तम्, अत आह — **अर्थान्तर इति**। 'नैव वा[5] पुनः' इत्यादेः पूर्वोक्तविवरणार्थत्वमाह — **एतदुक्तमिति**॥

[२, ५३२–५३७]

(रत्नप्रकाशः) [6]तदेवं सामर्थ्यद्वयसाधारणं दोषं परिहृत्य [7]प्रागुक्ता व्यपेक्षासामर्थ्यपक्षेऽतिव्याप्तिरेकार्थीभावसामर्थ्यपक्षेऽपि भवत्येव, युष्मदस्मदादेशानां वांनावादीनामेकार्थीभावविषयत्वासंभवेन तत्रैतत्परिभाषाप्रवृत्तौ सर्वत्रैव तेषां प्रसङ्गात्। अतः पक्षद्वयसाधारण्येन 'समानवाक्ये निघातयुष्मदस्मदादेशा वक्तव्याः' इति वचनं कर्तुं तदुपयोगितया वाक्यलक्षणमाह — **आख्यातमिति**। तिङन्तमित्यर्थः। **साव्ययकारकविशेषणमिति**। तत्र कारकशब्देन कारकविभक्त्यन्तं गृह्यते। विशेषणशब्देन तु विशेषणवाचकम्। अव्ययं च कारकं च विशेषणं चाव्ययकारकविशेषणानि, तैः सहितं साव्ययकारकविशेषणमित्यर्थः। तत्र संनिधानाद् विशेषणं कारकस्य गृह्यत इत्याशयेनोदाहरति — **सकारकविशेषणमिति**। अत एव न्यूनतादोषपरिहाराय वचनान्तरमाश्रितम् 'सक्रियाविशेषणं च' इति। उक्तनानाविधवाक्यलक्षणानि संगृह्यैकमेव लक्षणमाह — **आख्यातं सविशेषणमिति**। 'पचति भवति' इत्यादौ तु भवतीत्याख्यातं पचतीति विशेषणेन सहितं वाक्यं भवति। एतेन "आख्यातं क्रियाप्रधानम्, [8]तेन च प्रधाना क्रिया यस्मिंस्तत् प्रधानक्रियम्, तस्य भावस्तत्त्वं लक्ष्यत इत्यतिङन्तेष्वपि 'देवदत्तेन शयितव्यम्' इत्यादिषु वाक्यत्वं सिध्यति" इति निरस्तम्। तादृशस्थलेऽपि भवतीति वास्तीति वाध्याहर्तव्यत्वेन तावन्मात्रस्य वाक्यत्वाभ्युपगमे आख्यातशब्दस्य क्रियाप्रधानलक्षकताश्रयणे च मानप्रयोजनयोरभावात्। 'आख्यातं सविशेषणं वाक्यम्' इत्युक्ते क्वचित् तिङन्तमात्रे विशेषणशून्ये वाक्यत्वं न स्यादित्यस्वरसाल्लक्षणान्तरमाह — **एकतिङिति**। एको मुख्यः परमविशेष्यसमर्पकस्तिङ यस्मिन् विशिष्टैकार्थबोधके तद् **एकतिङ** वाक्यसंज्ञकं भवतीत्यर्थः। एतेन 'एकशब्दः समानवचनः, न तु संख्यावाची' इति निरस्तम्। 'पचति तिष्ठति' इत्यादेरप्येकवाक्यत्वापत्तेः[9]। **ब्रूहि ब्रूहीति**। यद्यप्येतस्य वाक्यसंज्ञाभावेऽपि प्रकृते न काप्यनुपपत्तिः, तथापि व्यव-

---

[1] उदाहरणानुरोधादाह — अ.
[2] 'तेन युष्मदस्मदादेशा अपि गृह्यन्ते' इत्यत्र प्रदीपे अपिशब्दरहितपाठोऽन्नंभट्टस्येति ज्ञायते।
[3] एतस्मिन्निति — अ, इ, ऋ.
[4] क्षीरमित्येतस्मिन्नर्थे इत्यर्थः — ऋ.
[5] 'वा' इति नास्ति — अ, इ.
[6] एतदेवं — ब.
[7] प्रागुक्तव्यपेक्षा — प, ब.
[8] 'तेन च' इत्यस्य 'लक्ष्यते' इत्यनेनान्वयः।
[9] पचतिना समानतिङ्त्वस्य तिष्ठतावपि विद्यमानत्वादिति भावः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हारोपयोगितया वैयाकरणाभिमतं वाक्यत्वमत्राप्यस्तीति ज्ञापयितुं व्यापकलक्षणाश्रयणम्। एतेन "'ब्रूहि ब्रूहि देवदत्त' इत्यत्र वाक्यत्वादामन्त्रितनिघातः सिध्यति" इति निरस्तम्। भगवता प्रकृत-लक्षणासाधारणस्य 'ब्रूहि ब्रूहि' इत्येतावन्मात्रस्य वाक्यत्वे दर्शिते तदपहाय पूर्वलक्षणसाधारण-[1]वाक्यप्रयोजननिदर्शनानौचित्यात्। अन्यथा 'एकतिङ' इति लक्षणं व्यर्थं स्यात्। 'समानवाक्ये निघात' इत्यादेर्वचनस्य प्रतिषेधमाह — **योगे प्रतिषेधश्चादिभिरिति**। चादिभिर्योगे 'समानवाक्ये' इत्यस्य संबन्धो नेति वाच्यमित्यर्थः। **तद् द्वेष्यमिति**। **तत्** सर्वमेव, **विकल्पते** व्याप्नोतीति द्वेष्यं कश्चिद्विजानीयात्, स तथा मा विज्ञायीत्याचार्यः सुहृद् भूत्वान्वाचष्ट इत्यन्वयः। यदि तत्र 'समानवाक्ये' इत्यस्य संबन्धः स्यात् तदैकवाक्यविषयकसमाहारेतरेतरयोगचकारयोगे निषेधः [2]स्यात्, भिन्नवाक्यविषयकसमुच्चयान्वाचयचकारयोगे न स्यादिति 'ग्रामस्तव च स्वम्, ग्रामो मम च स्वम्' इति भाष्यकृद्दर्शितस्थले भिन्नवाक्ये निषेधो न स्यादिति दोषो ज्ञेयः। ननु 'भिन्नवाक्ये निघाता-दयो न' इत्येव वचनं कर्तव्यम्। तथा च 'योगे प्रतिषेधश्चादिभिः' इति वचनान्तरं न कर्तव्य-मिति महल्लाघवमिति चेत्, सत्यम्, व्यपेक्षासामर्थ्याश्रयेण प्रकृतपरिभाषाप्रवृत्तावतिप्रसङ्ग आपा-दिते तत्परिहारसाधारण्येन 'समानवाक्ये' इत्यादिवचनमाश्रयणीयम्। तस्मिन्नाश्रिते तु 'योगे प्रतिषेधः' इति द्वितीयवचनमप्याश्रयणीयमित्याशयेनाह — **सा चावश्यमिति**। यद्यपि नैयायिका-द्यभिमतवाक्याश्रयणेऽपि न दोषः, तथापि लघुभूतं वैयाकरणाभिमतम् 'एकतिङ वाक्यम्' इत्येव लक्षणमाश्रयितुं युक्तमिति सूचयितुमिदमुक्तम्। ननु व्यपेक्षापक्षाश्रयेण प्रकृतसूत्रप्रवृत्तौ च भिन्नवाक्ये निघातादिनिषेधे क्रियमाणे किं न सिध्यतीत्यत आह — **समर्थनिघाते हीति**। निघात-शब्दो युष्मदस्मदादेशोपलक्षको ज्ञेयः। **पटवे त इति**। [3]"समानाधिकरणमसमर्थम्' इति निषे-धस्य वाचनिकस्यावश्यकत्वात् [4]तत्र समानाधिकरणग्रहणं कर्तव्यमिति भावः। **नद्यास्तिष्ठति कूल इति**। नद्याः कूलेनैव व्यपेक्षा, न तु तिष्ठतिनेति युक्तयुक्तग्रहणं कर्तव्यमिति भावः। इदानीं सामर्थ्यद्वयसाधारण्येनातिप्रसङ्गमाह — **राजगवीक्षीर इति**। **द्विसमासप्रसङ्ग इति**। द्वौ समासौ समाहृतौ द्विसमासम्, तस्य प्रसङ्ग इत्यर्थः। तत्र हेतुमाह — **द्विषष्ठीभावादिति**। द्वयोः षष्ठ्यन्तयोः क्षीरशब्देन [5]समास आपादित इति मन्यमानः कश्चिदाचार्यदेशीय आह — **किमुच्यत इति**। समाधत्ते — **द्विसमासेति**। **द्विप्रकारस्येति**। द्वयोः समासयोः प्रसङ्ग इत्यत्रैवास्य ता-त्पर्यम्, न तु समासयोर्वैजात्येऽपि[6]। स्यातां नाम तत्र द्वौ समासौ युगपत्, को दोष इत्यत आह — [7]**राजगोक्षीरमित्यपीति**। [8]राज्ञो गौः राजगवी, तस्याः क्षीरं 'राजगवीक्षीरम्' इति सिद्धेऽपीष्टे राज्ञो गोः क्षीरमित्येतद्वाक्यार्थे वृत्तिविवक्षायां 'राजगोक्षीरम्' इति रूपं स्यादिति भावः। किमिदं रूपं कदापि न भवतीत्याशयेनाचार्यदेशीयः पृच्छति — [9]**नैवं भवितव्यमिति**। उत्तरमाह — **भवितव्यमिति**। भगवानाह — **सिद्धं त्विति**। ननु वस्तुस्थितिमात्रे प्रदर्शितेऽप्यतिव्याप्तिर्न वारितैव, तादृशार्थं मनसि कृत्वैवातिव्याप्तेरापादितत्वादित्यत आह — **नैव वा पुनरत्रेति**॥

---

[1] वाक्ये प्रयोजन — प, ब.
[2] 'स्यात्' इत्यनन्तरं 'न तु' इत्यधिकम् —प, ब.
[3] अस्मिन्नेव सूत्रे उपरि वक्ष्यत इदम्।
[4] अस्मिन् समर्थनिघात इत्यर्थः।
[5] 'समास आपादित इति' इत्यादि 'द्विप्रकार-स्येति। द्वयोः' इत्यन्तं नास्ति — ब.
[6] वैतत्येऽपि — ब.
[7] राजगवीक्षीरमित्यपीति — प, ब.
[8] 'राज्ञः' इत्यस्मात् परं 'यदा' इत्यधिकम् — प, ब.
[9] भाष्ये 'न चैवं भवितव्यम्' इत्यत्र 'नैवं भवितव्यम्' इति चकाररहितः पाठोऽभिमत इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ५३७–५४६]

(उद्द्योतनम्) ननु [1]'परिभाषेयमित्युक्तत्वात् कथम् 'अधिकारः' इत्युच्यते, अत आह — **पारार्थ्येति**। तदेवाह — **विनियोग इति**। विध्यन्तरेणान्वय इत्यर्थः। ननु समर्थाधिकारस्याक्षेपसमाधानयोः कृतत्वात् पुनराक्षेपो न युक्तः, अत आह — **अत्र पदेति**। [2]एवकारार्थमात्रशब्देन विवक्षितमाह — **विनापीति**। ननु 'कुमारीच्छत्रम्' इति कथमुदाहरणम्, [3]'पदान्ताद्वा' इति विकल्पस्य पदविधित्वेनासामर्थ्ये सति तुकोऽप्रसङ्गात्, अत आह — **दीर्घादिति**। विकल्पमपि समर्थयते — **अन्ये त्विति**। **तदन्तत्वे** दीर्घान्तित्वे। **विप्रकर्षः** असंबन्धः। तमेवाह — **पदान्तस्येति**। **तुग् भवति**। विकल्पेनेत्यादिः। अनिवर्तनमेवाह — **तथा हीति**। **समर्थ एवेति**। तथा च न तत्प्रयोजनं सूत्रस्येत्यर्थः। व्यावर्त्यमपि नास्तीत्याह — [4]**योऽपीति**। **नियमाभावात्** समर्थपदानामेव समास इति नियमाभावात्। **निर्वृत्त एव** [5]'षष्ठी' इति सूत्रेण। ननु निर्वृत्तस्यापि समर्थ एव समासो नासमर्थ इति निवृत्तिः क्रियते, अत आह — **तस्येति**। 'न किंचित्' इत्यत्र हेतुः — [6]**निष्पन्नत्वादिति**। शास्त्रप्रवृत्तिप्रतिबन्धे सति निवृत्तिः शक्या। न च शास्त्रसिद्धस्य निवृत्तिरित्यर्थः। **साधुत्वेति**। शास्त्रगम्यत्वात् तस्येत्यर्थः। **तदर्थमपीति**। अपिना शास्त्रनिष्पन्नस्य निवृत्तिः कर्तुं न शक्यत इति पूर्वयुक्तिसमुच्चयः। व्याख्यानमेवाह — **समर्थेति**। उक्तव्याख्याने 'एवमपि' इत्ययुक्तम्, अत आह — **इतर इति**। **पाठः** वचनम्। **विवक्षितत्वात्** [7]बहुत्वस्येत्यादिः। **सामर्थ्यात्** द्वयेकयोरपि भविष्यतीत्यर्थः। **पर्यनुयुङ्क्ते** एवमपीत्यन्वयः। **तिङिति**। अतिङन्तात् परं तिङन्तं सर्वानुदात्तम्। **कुत्सन इति**। कुत्सने सुप्यगोत्रादौ परतः सगतिरगतिश्च तिङ [8]अनुदात्तः। पचति पूति, प्रपचति पूति। **पूति** कुत्सितं यथा भवति तथा पचतीत्यर्थः। नित्यं शब्दे लोपासंभवादाह — **गतार्थत्वादिति**। गतार्थत्वमेवाह — **समर्थेति**। **भेदाभेदेति**। प्रातिपदिकार्थविभक्त्यर्थयोरित्यर्थः। द्रव्याभिधानपक्षे उपसंख्यानं कर्तव्यमिति वक्तुं मतभेदमाह — **केचिदिति**। आकृतिपक्षे भाष्यस्थगुणशब्दानुपपत्तिं निराह — **गुणशब्देनापीति**। अपिर्भिन्नक्रमः, गुणशब्देनाकृतिरप्युच्यते। तत्र दृष्टान्तः — **यथेति**। [10]'याप्ये पाशप्' इति सूत्रे शब्दप्रवृत्तिनिमित्तकुत्सायां प्रत्यय [11]इति प्रतिपादनाय [12]'यस्य गुणस्य भावाद्द्रव्ये शब्दनिवेशः तस्मिन् गुणे वक्तव्ये प्रत्ययेन भवितव्यम्' इति भाष्ये, जातिसाधारणप्रवृत्तिनिमित्ते गुणशब्दः प्रयुक्तः, [13]'तस्य भावस्त्वतलौ' इत्यत्र [14]'यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशः तदभिधाने त्वतलौ' इति वार्तिकेऽपि प्रवृत्तिनिमित्तमात्रे गुणशब्दः प्रयुक्तः। कथं गुणशब्देन जात्यभिधानम्, अत आह — **संसर्गीति**। **संसर्गिभेदकं** स्वसंबन्धिव्यावर्तकम्। उपलक्षणव्यावृत्तये — **सव्यापार-**

---

[1] परिभाषेयमित्युक्त्वा कथम् — अ.
[2] 'एवकारार्थं' इत्यादि 'विनापीति' इत्यन्तं नास्ति — इ.
[3] पा. सू. ६. १. ७६.
[4] यो हीति — अ, इ, ॠ.
[5] पा. सू. २. २. ८.
[6] निश्चितत्वादिति — अ, इ.
[7] प्रदीपे 'तथेहापि विवक्षितत्वात्' इत्यन्नंभट्टपाठः। दृश्यमानेषु पुस्तकेषु तु 'तथेहापि बहुत्वस्य विवक्षितत्वात्' इत्येवोपलभ्यते॥ बहुवचनस्येत्यादिः — अ.
[8] उदात्तः — अ.
[9] शब्दलोपासंभवात् — अ, इ, ॠ.
[10] पा. सू. ५. ३. ४७.
[11] इत्युपादानाय — अ.
[12] महाभाष्यम् ५. ३. ४७.
[13] पा. सू. ५. १. ११९.
[14] का. वा. ५. १. ११९–५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मिति। कार्यपर्यन्तावस्थायीत्यर्थः। **शास्त्रे** [1]'यस्य गुणस्य' इत्यादौ। द्रव्यपक्षे वचनकर्तव्यतामाह — **तत्रेति**। **असंभवादिति**। यत्र [2]पदार्थद्वयसंबन्धस्तत्रैव सामर्थ्यम्, न तु 'घटः कलशः' इत्यादावित्यर्थः। गुणपक्षे वचननैरपेक्ष्यमाह — **वीरत्वमिति**। [3]**उपकारकत्वेति**। व्यावर्तकत्वविवक्षायामित्यर्थः। **नान्यत्वेति**। 'देवदत्तोऽश्वः' इत्यत्रापि [4]सामर्थ्यं स्यादित्यर्थः। नन्वेकस्य [5]भेदगर्भसंसर्गो [6]नास्तीत्युक्तम्, अत आह — **एकमपीति**। अशक्तौ हेतुमाह — **भेदहेतोरिति**। जातेर्द्रव्याद् भिन्नत्वादभ्यन्तरत्वं कथम्, अत आह — **द्रव्यस्येति**। 'यद्यपि' इति शङ्कातात्पर्यमाह — **अनभिधीयमान इति**। 'प्रतिजानीते' [7]इत्यस्याप्यर्थमाह — **अथेति**। **पक्षद्वये** द्रव्यगुणपदार्थपक्षद्वये। नन्ववाच्यस्याप्युपकारत्वे[8] पक्षद्वयेऽपि सामानाधिकरण्यसंभवात् 'क्व' इति प्रश्नायोगः, अत आह — **यदीति**। भाष्ये **समानाधिकरणेनेति**। [9]'पूर्वकाल' इत्यादिसूत्रस्थग्रहणम्। ननु भिन्नप्रवृत्तिनिमित्तानामेकार्थवृत्तित्वलक्षणसामानाधिकरण्यं पर्यायेषु कथम्, अत आह — **समानमिति**। 'यत्र सर्वम्' इति वदता विशेषणसमासोऽपि पर्यायेष्वङ्गीकृतः। तमाक्षिपति — **कथमिति**। **सामर्थ्येति**। संसर्गगर्भत्वात् तस्येत्यर्थः। मा भूदिति वदन्तं प्रत्याह — **अस्तीति**। **उपाधिः** प्रवृत्तिनिमित्तम्। ननु द्रव्यभेदात् कथमत्र सामानाधिकरण्यम्, अत आह — **यदीति**। **अपवादत्वाच्चेति**। किंचित्साम्येन सामानाधिकरण्यस्य राजपुरुषादावपि संभवेन [10]'येन नाप्राप्ति' न्यायेन विशेषणसमासस्य षष्ठीसमासो बाधक इति भावः। **नैतदिति**। [11]'पूरणगुण' इत्यादिना समानाधिकरणेन षष्ठीसमासनिषेधादित्यर्थः। षष्ठीसमास[12]विधिवैयर्थ्यपरिहाराय निषेधं बाधत इति शङ्कते — **विधेरिति**। **कोऽवकाशः** [13]किंचित्साम्येन सर्वत्र निषेधप्रवृत्तेरित्यर्थः। **इष्टेति**। राजपुरुषादौ कर्मधारयः, नीलोत्पलादौ षष्ठीसमास इत्यपि स्यादित्यर्थः। विधिप्रतिषेधयोः प्रयोगवशाद्व्यवस्था स्यात्, अत आह — **समानाधिकरणेति**। 'दर्शनीयामाता' इत्यत्र [14]'स्त्रियाः पुंवत्' इति पुंवद्भावः षष्ठी[15]समासेऽपि स्यादित्यर्थः। कर्मधारये भावशब्दवैयर्थ्यं प्रकृतानुपयोगश्चेति षष्ठीसमास इत्याह — **सत्तेति**। परिहारद्वयस्य भेदमाह — **पूर्व इति**। **पुनःश्रुतिः** समानाधिकरणेनेति [16]श्रुतिः। तदेव विशदयति — **दर्शनीयाया इति**। **अभिधेयस्येति**। सत्तायाः प्रातिपदिकार्थत्वात् सर्वपदाभिधेयत्वम्। कर्मणि निष्ठायां सप्तम्यनन्वयाद् भावे निष्ठेत्याह — **विवाद इति**। भूतार्थविवरणम् — **कृत इति**। **इसुसोरिति**। अनयोर्विसर्जनीयस्य षो वा स्यात् कुप्वोः परतः सामर्थ्ये सति। [17]'सापेक्षमसमर्थम्' इतिवन्न्यायसिद्धमेतन्न भवतीत्याह — **वाचनिकमिति**। ननु 'सर्पिष्पीयते' इत्यत्र सर्पिषो धात्वनभिहितत्वादसामर्थ्यं स्यात्, अत आह — **धात्विति**। ननु धातुसहचरितप्रत्ययाभिहितत्वाद्वाचनिकमसामर्थ्यं यत्र नास्ति तत्र वचनं सावकाशमिति शङ्कायामाह

---

[1] का. वा. ५. १. ११९–५. महाभाष्यम् ५. ३. ४७.

[2] पदार्थद्वये संबन्धः — अ.

[3] प्रदीपे 'उपकारविवक्षायाम्' इत्यत्र 'उपकारकत्वविवक्षायाम्' इत्यन्नंभट्टपाठ इति भाति।

[4] 'सामर्थ्यम्' इत्यस्यानन्तरं 'न' इत्यधिकम् — अ.

[5] भेदसंसर्गः — ऋ.

[6] नास्तीत्ययुक्तम् — अ.

[7] इत्यस्यार्थमाह — इ, ऋ.

[8] उपकारकत्वं इत्यर्थः।

[9] पा. सू. २. १. ४९.

[10] परिभाषा ५८.

[11] पा. सू. २. २. ११.

[12] विधिवैयर्थ्यं — अ.

[13] किंचित्सामान्येन — ऋ.

[14] पा. सू. ६. ३. ३४.

[15] समासोऽपि — अ.

[16] 'श्रुतिः' इत्यस्यानन्तरं 'तदेव विशदयति' इत्येवोपलभ्यते — अ, इ, ऋ. मध्ये कियांश्चिद् ग्रन्थः स्यादिति भाति।

[17] सापेक्षमसमर्थवदितिवत् — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

—**वीर इति**। [१]'विशेषणं विशेष्येण बहुलम्' इति बहुलग्रहणात्। ननु 'लुप्ताख्यातेषु च' इत्येकं वार्तिकमुपसंख्यानपरतया प्रतिविधानपरतया चावृत्त्या[२] भाष्यकृता व्याख्यातम्, तत्र कोऽभिप्रायः, यथाश्रुतवार्तिकस्य वा[३] कोऽभिप्रायः, अत आह—**वचनेति**। [४]**उपजीवनम्** [५]उपोद्बलनम्, [६]आवश्यकत्वमिति यावत्। निष्कौशाम्बिरित्यादावाख्यातलोपाभावादाह—**आख्यातशब्देनेति**। ननु क्रान्तक्रियाद्वारा सामर्थ्यसद्भावान्न वचनप्रामाण्यशरणत्वम्, अत आह—**पूर्वोत्तरेति**। तत्र हेतुः—**क्रियेति**। सूत्रमेव प्रमाणमिति भ्रमं निराह—**वार्तिककारेति**। न च वार्तिककारेण स्ववचन[७]प्रामाण्यमेव कथं पुरस्कृतमिति वाच्यम्, वार्तिके सूत्रप्रामाण्यमेवोक्तम्, तस्यान्यथासिद्धिशङ्कायां वार्तिकप्रामाण्यं भाष्यकृतोक्तम्, वार्तिक[८]परम्पराङ्गीकाराद्वेति। **तस्य** क्रान्तलक्षणस्यार्थस्य। सामर्थ्यादाक्षेपे हेतुः—**क्रियाविषयेणेति**। तस्याक्षेपे फलितमाह—**तद्द्वारेणेति**। **सामर्थ्यात्** समाससिद्धिरित्यर्थः। पूर्वस्माद् भेदमाह—**निस एवेति**॥

[२, ५३७–५४६]

(**रत्नप्रकाशः**) इदानीं प्रकृतसूत्रे पदग्रहणं किमर्थमित्याशयेन पृच्छति—**अथ किमर्थमिति**। समाधत्ते वार्तिककारः—**पदविधाविति**। **आनन्तर्यमात्र इति**। अत्र पदग्रहणाभावे विधिमात्रं समर्थाश्रितं स्यादिति भावः। **तिष्ठतु कुमारी च्छत्रं हरेति**। ननु [९]'पदान्ताद्वा' इति विकल्पस्य पदविधित्वेनात्र यथाश्रुतन्यासेऽपि तदप्रवृत्तिरिति चेन्न, विधीयमानेन तुका सह तत्र पदस्य साक्षात् संबन्धाभावात्, प्रकृतभाष्यस्वरसेन पदविधिशब्देन तादृशस्यैवार्थस्य विवक्षितत्वात्। एतेन "अत्र [१०]'दीर्घात्' इति नित्यस्तुग् भवति। यस्तु [११]'पदान्ताद्वा' इति विकल्पितः स पदविधित्वादसामर्थ्ये न भवति" इति निरस्तम्। तस्य पदविधित्वाभावस्योक्तत्वात्। अन्यथा [१२]'एङः पदान्तादति' इति [१३]पूर्वरूपस्यापि पदविधित्वापत्त्या 'आगच्छ हरेऽव माम्' इत्यादावतिप्रसङ्गात्। न चेष्टापत्तिः, 'वर्णाश्रये' इति वर्णसामान्यपरप्रकृतवार्तिकतद्भाष्यस्वरसभङ्गात्। इदानीं यथाश्रुतं प्रकृतसूत्रमनुपपन्नार्थकमिति शङ्कते—**समर्थाधिकारस्येति**। अधिक्रियत इत्यधिकारः। समर्थश्चासावधिकारश्च समर्थाधिकारः, तस्येत्यर्थः। सकलपदविधिविशेषव्यवस्थापकत्वेन निर्दिश्यमानस्य समर्थशब्दस्येति यावत्। **विधेयसामानाधिकरण्यादिति**। [१४]अनुवाद्यसमर्पकपदविधिशब्दसमानाधिकरणत्वादित्यर्थः। **निर्देशानर्थक्यमिति**। निर्दिश्यते उच्चार्यत इति **निर्देशः** प्रकृतसूत्रम्, तस्यानर्थक्यमित्यर्थः। **समास इति**। उपलक्षणमिदं कृदादीनाम्। **प्रवर्तयितुं निवर्तयितुं वेति**। समासादिविधायकेन शास्त्रेण समासादिषु विहितेषु तेषां प्रवृत्तिर्वा निवृत्तिर्वानेन कर्तुं न शक्यत इति मन्यते। यद्यपि सिद्धे सत्यारम्भो नियमार्थ इति पदविधिः समर्थ एव साधुर्नासमर्थ इति नियम-

---

[१] पा. सू. २. १. ५७.

[२] 'आवृत्त्या' इति नास्ति — अ.

[३] 'वा' इति नास्ति — अ.

[४] उज्जीवनम् — अ; उपसर्जनम् — ऋ.

[५] उपोद्बलकम् — अ, ऋ.

[६] आवश्यकमिति यावत् — ऋ.

[७] प्रामाण्यमिव — ऋ.

[८] वार्तिककार एव वार्तिकान्तरं प्रमाणत्वेनाश्रयतीत्याशयः।

[९] पा. सू. ६. १. ७६.

[१०] पा. सू. ६. १. ७५.

[११] पा. सू. ६. १. ७६.

[१२] पा. सू. ६. १. १०९.

[१३] पूर्वसूत्रस्यापि — ब.

[१४] अनुवादसमर्थकपद — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

परतया सार्थक्यं प्रकृतसूत्रस्य युज्यते, यथा [१]'कर्मणि द्वितीया' [२]'अनुदात्तङित आत्मनेपदम्' [३]'द्व्येकयोर्द्विवचनैकवचने' इत्यादीनाम्, तथापि 'सापेक्षमसमर्थम्' इत्यस्यावश्यकत्वेन पदस्यैव च सापेक्षत्वेनाप्रसक्तनिषेधस्य कर्तुमशक्यत्वात् समर्थशब्दस्य पदसामानाधिकरण्यमेवोचितमित्याशयेन समाधत्ते — **सिद्धं त्विति। समर्थानामिति वचनादिति।** समर्थमस्यास्तीति समर्थः, मत्वर्थलक्षणया अर्शआद्यचो वाश्रयेण व्याख्यानादिति भावः। फलितार्थमाह — **समर्थानां पदानां विधिरिति।** पदानां विधिः समर्थानां संबन्धी ज्ञेय इत्यन्वयः। एवं च फलतः समर्थपदशब्दयोः सामानाधिकरण्यमिति भावः। तत्र बहुत्वं विवक्षितमिति मन्यमानः शङ्कते — **एवमपीति**। अभ्युपगमवादेन समाधत्ते — **एकशेषनिर्देशाद्वेति**। वाशब्दः शङ्कानिषेधपरः। समुदाये वाक्यसमाप्तिमाश्रित्य पुनः शङ्कते — **एवमपीति**। लक्ष्यानुरोधेनात्रावयवे वाक्यसमाप्तिराश्रीयत इत्याशयेन समाधत्ते — **नैष दोष इति।** 'समर्थानां पदानाम्' इति वाचनिकं मत्वा तस्य षष्ठ्यन्तानुकरणत्वसंभवादषष्ठ्यन्तपदसंबन्धिविधौ प्रकृतपरिभाषाया अप्रवृत्तिं मन्यमानः पुनः शङ्कते — **एवमपीति। समर्थादिति।** [४]'तिङ्ङतिङः' इत्यादौ। **समर्थ इति।** [५]'कुत्सने च सुप्यगोत्रादौ' इत्यादौ। [६]यक्षानुरूपबलिन्यायेन तस्य वाचनिकत्वमभ्युपेत्यैव समाधत्ते — **एवं तर्हीति। समर्थः पदविधिरिति।** इति निर्दिष्टाविति शेषः। 'समर्थविधिः' इत्यस्यावयवो विधिशब्दः क्व गत इत्यत आह — **पूर्वः समास इति। उत्तरपदलोपीति।** छान्दसत्वात् तत्रोत्तरपदलोप इति भावः। तर्हि तत्र 'समर्थः' इति प्रथमा कथमित्यत आह — **यादृच्छिकी च विभक्तिरिति।** यौगपद्येन सर्वासां विभक्तीनां प्रयोगासंभवादिति शेषः। प्रागुक्तं भगवता 'भेदः संसर्गो वा भेदसंसर्गौ वा सामर्थ्यम्' इति, तत् समानाधिकरणस्थले न युज्यते, भेदाभावादित्यसामर्थ्यात् समासो न स्यादिति [७]मन्यमान आह — **समानाधिकरणेष्विति। उपसंख्यानमिति।** [८]पदविधेरिति शेषः। भेदाभावप्रयुक्तासामर्थ्यखण्डनपरवचनेऽनुवाद्यभागमवतारयति — **कथमसामर्थ्यमिति**। तत्रानुवाद्यभागं व्याख्यातुं पृथक् पठति — **द्रव्यं पदार्थ इति चेदिति**। तद्व्याचष्टे — **यदीति**। **अथ हि गुण इति।** गुणशब्दोऽत्र प्रवृत्तिनिमित्तजात्यादिपरः। **अन्यो हि पुरुषत्वमिति।** गुण इत्यनुषज्यते, इति चेदिति च। तद्दूषणांशं पृच्छति — **नान्यत्वमिति। न च तस्यैतावतेति।** गोभिरश्वैश्चेति शेषः। **सामर्थ्यमिति।** समानाधिकरणसमासोपयोगीति शेषः। तेन देवदत्तस्य गवाश्वाभ्यां षष्ठीतत्पुरुषोपयोगिसामर्थ्ये सत्यपि न दोषः। एतेन 'उपकारविवक्षायां सामर्थ्यं, नान्यत्वमात्रेण' इति निरस्तम्। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यापत्तेः। तदेवं दृष्टान्तद्वारा भेदमात्रस्य समानाधिकरणसमासोपयोगित्वं विदूष्य द्रव्यपदार्थपक्षे सामर्थ्यं कुतो न भवति, गुणपदार्थपक्षे भवतीत्यत्र युक्तिः केत्याशयेन पृच्छति — **को [वा] विशेष इति।** उत्तरमाह — **एष विशेषः, एकं तयोरधिकरणमिति।** तथा च वीरत्वपुरुषत्ववाचकयोः शब्दयोर्विशेषणतया स्थिताधिकरणैक्यात् समानाधिकरणसमासो भवतीति भावः। आचार्यदेशीय आह — **द्रव्यपदार्थिकस्यापीति।** द्रव्यं पदार्थ इति य आह स द्रव्यपदार्थिकः। **गुणभेदात् सामर्थ्यमिति।** विशेषणभेदाद्विशिष्टयोरपि भेदः, विशेष्यांशस्य चैक्यमिति युज्यत एव समानाधिकरणसमास इति भावः। आक्षेप्ताह — **अशक्य**

---

[१] पा. सू. २. ३. २.
[२] पा. सू. १. ३. १२.
[३] पा. सू. १. ४. २२.
[४] पा. सू. ८. १. २८.
[५] पा. सू. ८. १. ६९.
[६] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[७] मन्यमानमाह —ब.
[८] पदविधेरिति विशेषः — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। कुत इत्यत आह — **ननु चेति**। यत इत्यर्थः। [1]**अभ्यन्तरोऽसौ भवति गुण इति**। [2]द्रव्यस्येति शेषः। तथा च द्रव्यस्य गुणो भेदको न स्यादिति भेदघटितं सामर्थ्यं न युज्यत इति मन्यते। समाधाताह — **यद्यपीति**। **न तु गम्यत इति**। शक्यतावच्छेदकस्यैव गुणस्य तेन तेन द्रव्यपरेण शब्देनोपस्थापनादिति भावः। तथा च गुणस्य विशिष्टभेदकत्वाद्युज्यत एव तत्र सामर्थ्यमिति फलितम्। शक्यतावच्छेदक[3]भिन्नगुणस्य द्रव्यपरशब्देनानुपस्थाने दृष्टान्तमाह — **न हीति**। यद्युक्तप्रकारेण भेदाभेदौ नाङ्गीकरोषि तर्हि गुणपदार्थपक्षेऽपि समासो दुरुपपाद इत्याशयेनाह — **गुणपदार्थिकेनापीति**। **उपकारः** सामर्थ्यलक्षणः। स एवाह — **अथेति**। **प्रतिजानीत इति**। समानाधिकरणयोर्गुणपदयोः समासो भवतीति शेषः। **न प्रतिजानीत इति**। प्रतिजानीत एवेति शेषः। ननु प्रतिबन्दीमात्रमेतत् संपन्नम्, न चैतावता कश्चिदर्थो निर्णीत इति मन्यमान आक्षेप्ताह — **एवमनयोरिति**। वीरपुरुषयोरित्यनुषज्यते। आरम्भसामर्थ्यात् समासो भवतीति निश्चय एव भविष्यति, न तु संदेह इत्याशयेन समाधाताह — **क्व च तावदिदमिति**। **स्यादिति**। सावकाशमिति शेषः। **समानाधिकरणेनेतीति**। समानाधिकरणेन समस्यत इत्येवं समासविधायकं शास्त्रमित्यर्थः। आक्षेप्ताह — **यत्रेति**। आरम्भसामर्थ्याच्चेत् समासस्तर्ह्यतादृशस्थलेऽपि समासः स्यादिति भावः। एतेन 'कथं पुनरत्र विशेषणविशेष्यभावः। उच्यते, कंचित् प्रति कयाचित् संज्ञया सोऽर्थः प्रसिद्धः, [4]अन्यथा त्वप्रसिद्ध इति प्रसिद्धस्य विशेषणत्वमितरस्य तु विशेष्यत्वमिति' इति निरस्तम्। आक्षेप्तुरेतादृशमौर्ख्यकल्पनं विनैव तद्ग्रन्थस्य व्याख्यानसंभवेन स्वस्यैव मौर्ख्यसंबन्धात्। ययोः समानाधिकरणयोः सह प्रयोगो भवति वाक्ये, तयोरेव वचनप्रामाण्याद्वृत्तिर्भविष्यति, न तु पर्याययोरित्याशयेनाह समाधाता — **नैवंजातीयकानामिति**। परस्परमिति शेषः। **प्रत्ययेन वोत्पत्तव्यमिति**। नेत्यनुषज्यते। अपत्याद्यर्थविवक्षायामिन्द्रादिभ्यः पर्यायिभ्योऽनेकेभ्यः प्रत्ययो न[5] भवति, एकस्मादुत्पन्नेनैव प्रत्ययेन तदपत्यानामनेकेषामपि बोधनसंभवादिति भावः। आक्षेप्ता तत्र समासप्रत्ययाभावे हेतुं पृच्छति — **किं कारणमिति**। पर्यायशब्दानां सहप्रयोगाभाव एव तत्र हेतुरित्याशयेन सहप्रयोगाभावमुपपादयति — **अर्थगत्यर्थ इति**। **तत्रेति**। शब्दप्रयोगेऽर्थज्ञानार्थे सतीत्यर्थः। **न भवितव्यमिति**। प्रयोजनाभावादिति शेषः। तं शेषमविद्वान् तत्र हेतुं पृच्छति — **किं कारणमिति**। [6]यक्षानुरूपबलिन्यायेन न्यायसिद्धं वचनं हेतुमाह — **उक्तार्थानामिति**। भृत्यभरणीयशब्दयोः पर्यायत्वं मन्यमान आक्षेप्ता पृच्छति — **न तर्हीदानीमिति**। उत्तरमाह — **नैताविति**। असमानार्थतां तयोः प्रतिपादयति — **एकोऽत्रेति**। तदेवमपर्याययोः समानाधिकरणयोः सामर्थ्योपपादनपूर्वकं समास उपपादितेऽन्यत्रातिप्रसङ्गं[7] शङ्कते — **यदि तर्हीति**। **तत्र भवितव्यमिति**। समानाधिकरणसमासेनेति शेषः। [8]अयमेव 'इहापि तर्हि प्राप्नोति' इत्यस्यापि शेषः। **दर्शनीयामातेति**। समानाधिकरणसमासे सति पुंवद्भावे 'दर्शनीयमाता' इति स्यादिति भावः। **किं पुनस्तदिति**। समानं विशेषो वेति शेषः। **सद्भावान्यभावाविति**। सतो भावः सद्भावः सत्ता, तत् समानम्। अन्यस्य भावोऽन्यभावः, दर्श-

---

[1] भाष्ये 'ननु चाभ्यन्तरोऽसौ भवति' इत्येतावदेवोपलभ्यते। 'ननु चाभ्यन्तरोऽसौ भवति गुणः' इति पाठोऽभिमत इति भाति॥ आभ्यन्तरोऽसौ — प.

[2] 'द्रव्यस्येति शेषः' इत्यादि 'न तु गम्यत इति' इत्यन्तं नास्ति — प.

[3] भिन्नपरस्य द्रव्यपर — ब.

[4] अन्यथा त्वप्रसिद्धस्य विशेषणत्वं — प, ब.

[5] 'न भवति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — ब.

[6] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.

[7] अन्यत्रापि प्रसङ्गं — ब.

[8] समानाधिकरणसमास इत्येवेत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नीयत्वं मातृत्वं च, स विशेष इति भावः। सत्त्वस्य पदार्थमात्रवृत्तित्वात् तदादाय समानाधिकरणसमासो न भविष्यति, समानाधिकरणपदव्यावर्त्यालाभादित्याशयेन परिहरति — **न क्वचिदिति। यत्र सर्वं समानमिति**। तथा चैकद्रव्यवाचकयोरेव समानाधिकरणसमासो भवति, तत्रैव धर्मधर्मिणोर्भेदाभावेन सर्वस्यैक्यसंभवात्, न तु 'दर्शनीयाया माता' इत्यादौ, द्रव्ययोर्भेदादिति भावः। वस्तुतस्तु सर्वस्य सामान्यं न विवक्षणीयं गौरवात्, द्रव्यैक्यविवक्षयैवाभिमतसिद्धेश्चेत्याशयेनाह — **अथवेति। समानाधिकरणेनेतीति**। [1]"पूर्वकालैक" इत्यादिसमानाधिकरणसमासविधायकशास्त्र इत्यर्थः। [2]**भवति न भवति चेति**। सद्भावो भवत्येव, अन्यभावस्तु **न** भवत्येव। द्रव्यं तु भवति, न भवति चेति भावः। ननु तर्हि स्त्रीत्वं क्वचित् समानं भवति [3]क्वचिन्न भवतीति तदादाय 'दर्शनीयाया माता' इत्यत्र समानाधिकरणसमासः प्राप्नोत्येवेति चेन्न, अधिकरणशब्दस्य द्रव्यावाचकत्वात् [4]तस्यैव समानत्वमाश्रयितुमुचितत्वादित्याह — **अथवेति। उपचर्यत इति**। व्यवह्रियत इत्यर्थः। **व्युदितमिति**। विशेषेण विरोधेन वोदितम् उक्तमित्यर्थः। वदेर्भावे निष्ठायां संप्रसारणे रूपम्। इदानीमाक्षेप्ता 'सर्पिः कालकम्' इत्यादौ [5]"इसुसोः सामर्थ्ये" इति षत्वनिवृत्त्यर्थं 'समानाधिकरणमधात्वभिहितमसमर्थम्' इत्युक्ते समासेऽपि स निषेधः प्रसक्त इति वक्तव्य एव समानाधिकरणानां समास इति मन्यमान आह — **एवमपीति**। 'दर्शनीयाया माता' इत्यादावतिप्रसङ्गे वारितेऽपीत्यर्थः। समानाधिकरणेषूपसंख्यानं कर्तव्यमेवेति शेषः। कुत इत्यत आह — **इदमवश्यमिति। अधात्वभिहितमिति**। धातोर्विहितः कर्मकर्तृवाचकः प्रत्ययो धातुशब्देनात्र लक्ष्यते। उक्तमुपसंहरति — **एवं च कृत्वेति**। एतस्मात् कारणादित्यर्थः। परिहरति — **न वा वचनप्रामाण्यादिति। किंवचनप्रामाण्यमिति**। कस्य वचनस्य प्रामाण्यमित्यर्थः। हेतुत्वेनाश्रितमिति शेषः। उत्तरमाह — **समानेति**। [6]"पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च" इति वचनस्य प्रामाण्यं हेतुत्वेनाश्रितमिति भावः। इदं वीरपुरुषेत्युदाहरणाभिप्रायेणोक्तम्। एवमुदाहरणान्तरे यथोचितं वचनान्तरं निदर्शनीयं बुद्धिमता। इदानीमाक्षेप्ता स्थलान्तरे समासो विधेयो भवति, असामर्थ्यादित्याशयेनाह — **लुप्ताख्यातेष्विति**। आख्यातशब्दोऽत्र धातुप्रकृतिकक्तान्तादिलक्षकः। **निष्कौशाम्बिरिति**। निसः क्रान्तशब्देनैव सह सामर्थ्यम्, न तु कौशाम्ब्येति मन्यते। समाधत्ते — **लुप्ताख्यातेषु चेति**। एवं चेदमेव वचनम् 'उपसंख्यानम्, असमर्थत्वात्' इत्याक्षेपवाक्यशेषानुषङ्गेणाक्षेपपरम्, 'वचनप्रामाण्यात्' इति समाधानहेत्वनुषङ्गेण समाधानपरं च भवतीति फलितम्। **कुगतिप्रादय इति**। तत्र [7]प्रादिग्रहणस्यागतिसंग्रहार्थत्वात् सामर्थ्याभावेऽपि निसः कौशाम्ब्यादिना समासो भविष्यतीति मन्यते। **सुराजेति**। अत्र सुशब्द एव शोभनार्थं वदतीति तस्य राजशब्देन सामर्थ्यसत्त्वात् तत्रोपक्षीणं प्रादिग्रहणमिति भावः। **वृत्तिसूत्रवचनप्रामाण्यादिति**। वार्तिकानामपि सूत्रलक्षणसद्भावेनार्षत्वाविशेषेण [8]च सूत्रत्वमभ्युपगम्य पाणिनिसूत्राणामार्षवृत्तिसद्भावात् वार्तिकानां तदभावाच्च तयोर्वैषम्यमित्याशयेन 'वृत्तिसूत्र'शब्दः प्रयुक्तः। **वार्तिकवचनप्रामाण्यादिति**। ब्रूम इत्यनुषज्यते। किं तद्वार्तिकवचनमित्यत आह —

---

[1] पा. सू. २. १. ४९.

[2] भाष्ये 'भवति न च भवति' इत्यत्र 'भवति न भवति च' इति निर्णयसागरमुद्रिते पाठः।

[3] 'क्वचिन्न भवतीति' इति नास्ति — ब.

[4] 'तत्समानत्वस्यैवाश्रयितुमुचितत्वात्' इति युक्तं भाति।

[5] पा. सू. ८. ३. ४४.

[6] पा. सू. २. १. ५८.

[7] प्रादिग्रहणस्यागत्यर्थकसंग्रहार्थकत्वात् — प, ब.

[8] चशब्दो नास्ति — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon.

सिद्धं तु क्वाङिति। वस्तुगत्या तत्र सामर्थ्यसद्भावादाक्षेप एवासंगत इत्याशयेनाह — **तदर्थगतेर्वेति।** वृत्तिविषये प्रादीनामर्थविशेषपरत्वं संभवतीति भावः॥

[२, ५४७–५५४]

(उद्द्योतनम्) 'किं द्वयोर्द्वयोः' इत्याद्येव वक्तव्यम्, 'यत्र बहूनाम्' इति व्यर्थम्, अत आह — **यत्रेति।** [1]'कोटिद्वयस्य बीजमाह — **यदीति।** बहूनामिति निश्चयान्न संशय इति शङ्कते — **नन्विति।** ननु [2]'सप्तमीविशेषणे' इत्येव [3]पूर्वनिपातसिद्धेः किमुपसर्जनसंज्ञार्थेनानेकग्रहणेन, अत आह — **चित्रगुरिति।** उपसर्जनसंज्ञायाः [4]'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वं प्रयोजनमित्यर्थः। [5]'एकविभक्ति च' इत्येव गोशब्दस्योपसर्जनत्वसिद्धेस्तदर्थमप्यनेकग्रहणं व्यर्थमिति शङ्कते — **यदीति।** समासानन्तरं गोशब्दस्यानेकविभक्तियोगेऽपि समासकाले प्रथमान्तत्वनियमादेकविभक्तित्वं ज्ञेयम्। **बहूनां समासः सिध्यतीति।** यद्यप्येवं बहूनामेवेति निश्चयात् संशयो न युक्तः, तथापि युक्तायुक्तविचारः — द्वयोर्द्वयोर्युक्तत्वेऽनेकग्रहणं न कर्तव्यम्, बहूनां युक्तत्वे कर्तव्यमिति। बहुषु द्वित्वसत्त्वस्य प्रकृतोपयोगमाह — **तत्रेति। द्वन्द्वसमुदायस्य** द्वन्द्वद्वयस्य। **चत्वार इति।** युगपदधिकरणतायां द्वन्द्व इति वक्ष्यमाणत्वादित्यर्थः। **चार्थ इति।** अर्थद्वयमात्रवृत्तित्वं नास्तीत्यर्थः। 'चत्वारोऽर्थाः' इत्युक्तं निराह — **द्वयोरिति। एकस्यैव** नेष्टृशब्दस्यैव, तस्यैवोत्तरपदपूर्वत्वात्। **एकम्** अन्त्यमुद्गातृपदम्। **वचनेति।** [6]भाष्यकारस्येत्यादिः। [7]'अप्तृन्' इति दीर्घः किं न स्यात्, अत आह — **अन्यथेति।** तस्मिन् सूत्रे नप्त्रादिग्रहणमव्युत्पत्तिपक्षे[8] विध्यर्थम्, व्युत्पत्तिपक्षे नियमार्थम्? तत्र विधिपक्षे सूत्रेणैव सिध्यति। नियमपक्षे भाष्यकारवचनादिति ज्ञेयम्। **यद्यपीति।** द्वयोर्द्वयोः समासे 'वाक्त्वचस्रुग्दृषदम्' इति समासान्तद्वयस्येष्टत्वात् तत्प्रतिषेधः कथं चोद्यत इत्यर्थः। [9]**प्रक्रमान्तरे** द्वयोर्द्वयोः सहविवक्षापक्षे। **बहूनामिति।** द्वयोर्द्वयोरेवेति नियमाङ्गीकारादित्यर्थः। **एकेति।** 'वाक्त्वक्स्रुग्दृषदम्' इति। नन्वत्र यदि चतुर्णां बहुव्रीहिस्तदा पूर्वपदप्रकृतिस्वरेण सुशब्दोऽन्तोदात्तः, यदि सुसूक्ष्मशब्दस्य तत्पुरुषत्वं कृत्वा त्रयाणां बहुव्रीहिस्तदापि[10] [11]'तत्पुरुषे तुल्यार्थ' इत्यव्ययपूर्वपदप्रकृतिस्वरेण सुशब्दस्य यदुदात्तत्वं तदेव बहुव्रीहावपीति स्वररूपयोरविशेषात् कथं 'सुसूक्ष्मजटकेशेनेति न सिध्यति' इत्युक्तम्, सुसूक्ष्मेति तत्पुरुषस्य जटकेशेति द्वन्द्वस्य च बहुव्रीहौ द्वयोरिति पक्षेऽपि सामञ्जस्यात्, अत आह — **सुष्ठ्विति।** सोः सर्वविशेषणत्वं तत्पुरुषद्वन्द्वगर्भबहुव्रीहौ न संभवतीति भावः। जटाशब्दस्य ह्रस्वो भाष्यकारवचनात्। अत्र बहूनां [12]समासाप्रसङ्गे हेतुमाह — **यदीति।** स्वरभेदमाह — **यदेति।** फिट्सूत्रे **शिटां सर्वनाम्नाम्। नन्विति।**

---

[1] 'कोटि' इत्यादि 'यदीति' इत्यन्तं नास्ति — अ.

[2] पा. सू. २. २. ३५.

[3] पूर्वनिपाते सिद्धे — अ.

[4] पा. सू. १. २. ४८.

[5] पा. सू. १. २. ४४.

[6] प्रदीपे 'अत्र च वचनप्रामाण्यात्' इति पाठोऽन्नंभट्टस्वीकृत इति ज्ञायते। मुद्रितप्रदीपेषु 'अत्र च भाष्यकारवचनप्रामाण्यात्' इत्येवोपलभ्यते।

[7] पा. सू. ६. ३. ११.

[8] 'अव्युत्पत्तिपक्षे विध्यर्थम्' इति नास्ति — ऋ.

[9] प्रदीपे 'प्रक्रियान्तरे' इत्यत्र 'प्रक्रमान्तरे' इत्यन्नंभट्टपाठः। अयं निर्णयसागरमुद्रितेऽधो न्यदर्शि।

[10] तथापि — ऋ.

[11] पा. सू. ६. २. २.

[12] समासप्रसङ्गे — इ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथा च तत्पुरुषे सति समासान्तोदात्तत्वेन शालाशब्दस्योदात्तत्वं[1] सिध्यतीत्यर्थः। **न प्राप्नोतीति**। [2]'गोरतद्धितलुकि' इति टचस्तत्पुरुषाश्रितत्वात्। 'पञ्चनावप्रियः' इत्यत्र [3]'नावो द्विगोः' इति टच्। [4]त्रिपदे बहुव्रीहौ पुंवद्भावासिद्धिं तावदाह — **खादिरीति**। सिद्धान्तोपयोगितया द्विपदबहुव्रीहौ तत्सिद्धिमाह — **यदेति**। **क्वचिदिति**। 'पञ्चगवप्रियः' इत्यत्र। नन्वेकसंज्ञाधिकारात् कथमेकस्य संज्ञाद्वयम्, अत आह — **भिन्नेति**। **न त्विति**। बहूनामेवेति नियमाभावादिति भावः। [5]'वृद्धिनिमित्तस्य' इति पुंवद्भावप्रतिषेधोऽत्र नास्ति, [6]'अरक्तविकारे' इति प्रतिषेधपर्युदासादित्याह — **विकारे चेति**। 'स्वरः कथम्' इत्यस्य विषयमाह — **पूर्वेति**। समासान्तोदात्तत्वेन शालाशब्दाकारस्योदात्तत्वं किं न स्यात्, अत आह — **अपवादत्वादिति**। समासस्वरस्य येन नाप्राप्तिन्यायेन बहुव्रीहिस्वरोऽपवाद इत्यर्थः। 'विप्रतिषेधात्' इत्यत्र विभक्त्यर्थो [7]न विवक्षित इत्याह — [8]**विप्रतिषेधमात्रमिति**। [9]मात्रपदेन विप्रतिषेधमूलकपरत्वव्युदासः। यथाश्रुतेऽपि[10] परत्वलक्षणया पञ्चमी संगमनीया, [11]अत्र त्वन्तरङ्गत्वलक्षणयेति भावः। ननु बहुव्रीहितत्पुरुषस्वरयोर्विषयभेदेनाविरोधात् कथमत्रान्तरङ्गत्वेन व्यवस्था, अत आह — **अनुदात्तमिति**। बहुव्रीहिस्वरस्यापवादत्वमुक्तं निराह — [12]**कक्ष्यान्तरेति**। बहुव्रीह्यनन्तरभावित्वात् तत्पुरुषस्य प्रथमकक्ष्याप्राप्तो बहुव्रीहिस्वरो द्वितीयकक्ष्याप्राप्तं तत्पुरुषस्वरं न बाधत इत्यर्थः। [13]तत्पुरुषस्वरस्यान्तरङ्गत्वमाह — **अवयवेति**। **अन्तरङ्गोऽपीति**। यथा 'कर्तव्यम्' इत्यत्र धातुस्वरः प्रत्ययस्वरेण बाध्यते। बहुव्रीहेर्निमित्तत्वे हेतुः — **सतीति**। ज्ञापकत्वमुपपादयति — **युक्तारोहीति**। [14]'युक्तारोह्यादयश्च'। एते समासा आद्युदात्ताः, युक्तारोही, आगतयोधी, इत्यादि। **कन्नन्तत्वादिति**। [15]'इण्मीकापाशल्यतिमर्चिभ्यः कन्' इत्यनेन। **तत्पुरुष इति**। [16]'पूर्वकालैक' इत्यादिना। **ज्ञापनार्थ इति**। निमित्तिस्वरबलीयस्त्वस्य। तथा च तत्पुरुषस्वरेण बहुव्रीहिस्वरस्याद्युदात्तत्वस्य बाधात् तत्सिद्धये पाठः कृत इत्यर्थः। **सर्वथेति**। त्रिपदबहुव्रीहौ बहुव्रीहिगर्भबहुव्रीहौ च। तर्हि कथं निमित्तिस्वरबलीयस्त्वम्, अत आह — **निमित्तीति**। भाष्ये **इगन्त इति**। [17]'इगन्तकालकपालभगालशरावेषु द्विगौ'। इगन्ते कालवाचिनि च कपालादौ चोत्तरपदे पूर्वपदं द्विगुसमासे प्रकृतिस्वरं स्यात्। पञ्चारत्निः। 'एकशिति' इत्यस्य [18]'संख्यापूर्वः' इति द्विगुत्वादाद्युदात्तत्वं सिध्यतीति पाठो न कर्तव्य इत्यर्थः। 'पूर्वशालाप्रियः' इत्यत्र तत्पुरुषस्वरस्य सतिशिष्टत्वाद्बहुव्रीहिस्वराद्बलीयानित्याहुः[19]। भाष्ये **अन्तोदात्तत्वं स्यादिति**। 'सुसूक्ष्मजट' इत्यस्येत्यर्थः। भाष्ये **नेदमिति**। 'तस्यान्तोदात्तत्वं विप्रतिषेधात्' इत्यस्य बहुव्रीह्यवय-

---

[1] अन्त्याकारस्येति भावः।
[2] पा. सू. ५. ४. ९२.
[3] पा. सू. ५. ४. ९९.
[4] त्रिपदबहुव्रीहौ — अ.
[5] पा. सू. ६. ३. ३९.
[6] अविकार इति — अ.
[7] न निवर्तत इत्याह — अ.
[8] प्रदीपे 'विरोधमात्रम्' इति पाठ उपलभ्यते। तत्र 'विप्रतिषेधमात्रम्' इत्यन्नंभट्टपाठः स्यादिति भाति।
[9] सूत्रपदेन — अ.
[10] अपिशब्दो नास्ति — ऋ.
[11] अत्र त्वन्तरङ्गलक्षणयेति — ऋ.
[12] प्रदीपे 'कक्षान्तरप्राप्तत्वात्' इत्यत्र 'कक्ष्यान्तरप्राप्तत्वात्' इति निर्णयसागरमुद्रिते पाठः।
[13] तत्पुरुषस्यान्तरङ्गत्वमाह — अ, इ.
[14] पा. सू. ६. २. ८१.
[15] उणादिसूत्रम् ३३०.
[16] पा. सू. २. १. ४९.
[17] पा. सू. ६. २. २९.
[18] पा. सू. २. १. ५२.
[19] तत्पुरुषस्वर इति शेषः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वस्तत्पुरुषसंज्ञो भवति, तस्य स्वरो विप्रतिषेधेन भवतीति नार्थः। किं तु लक्षणान्तरेण बहुव्रीह्यवयवस्य तत्पुरुषत्वे सिद्धे विप्रतिषेधेन स्वरमात्रप्रतिपादनम्। तस्य तात्पर्यमाह — **यदीति**। **अत्र** 'सुसूक्ष्मजटकेशेन' इत्यत्र। **दोषः** सुसूक्ष्मजट[1]शब्दस्यान्तोदात्तत्वदोषः। तर्हि 'पूर्वशालाप्रियः' इत्यत्र कथं तत्पुरुषस्वरः, अत आह — **दिक्संख्ययोरिति**। संख्याग्रहणमेकशितिसंग्रहाय। भाष्ये **अस्यापि** 'सुसूक्ष्मजट' इत्यस्यापि। **बहुलेति**। [2]"क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः' इति वचनात् समासावयवस्य विशेषलक्षणं विना तत्पुरुषसंज्ञा न प्रवर्तत इत्यर्थः। **अधिकग्रहणं चेति**। [3]"अधिकग्रहणं चालुकि [4]समासोत्तरपदवृद्ध्यर्थम्' इति [5]"बहुगणवतुडति संख्या' इत्यत्र वार्तिकम्। **अधिकशब्द इति**। [6]"अधिकम्' इति सूत्रेण कन्नन्तस्य निपातनादित्यर्थः। कुत्र बहुव्रीहिसंज्ञापाद्यते, अत आह — **अधिकेति**। **दोषः** बहुव्रीहिसंज्ञानिमित्तः, तमेवाह — **त्रिपद इति**। 'न संख्यां संख्येये' इत्यनुपपन्नम्, तथा सत्यधिका षष्टिर्वर्षाण्यस्येति विग्रहाभावप्रसङ्गात्, अत आह — **अधिकषष्टिवर्ष इति**। [7]यथा 'अवेरिदम्' इति वाक्यमेव, अविकशब्दात् प्रत्ययः 'आविकम्' इति, तथेहापि संख्येयवृत्तेर्वाक्यमेव, संख्यावृत्तेः समास इत्यर्थः। भाष्ये **पूर्वेण** "अनेकमन्यपदार्थे' इत्यनेन। तत्र डच्प्रसङ्गमुपपादयति — **अधिका षष्टिरिति**। अधिकषष्टिशब्दस्य वर्षेऽन्यपदार्थ एको बहुव्रीहिरित्यर्थः। तर्हि वयःप्रतीतिः कथम्, अत आह — **बहुव्रीहिगर्भ इति**। अधिकषष्टानि वर्षाणि यस्याधिकषष्टवर्ष इति प्राप्नोतीत्यर्थः। भाष्ये [9]**संख्येयवार्थाभिधायित्वादिति**। [10]संख्येयाभिधायित्वाद्वाकारार्थाभिधायित्वाच्चेत्यर्थः। ननु तत्सूत्रप्रत्याख्याने 'अधिका षष्टिर्वर्षाणाम्' इत्यत्र [11]पूर्वेण बहुव्रीहिः स्यात्, तत्सत्त्वे संख्येयवृत्तेरेव संख्याया बहुव्रीहिरिति नियमान्न स्यात्। तथा चोक्तरीत्यावान्तरबहुव्रीहिणा डच्प्रसङ्गः, अत आह — **अव्यविकेति**। **अमत्वेति**। तथा चाधिका षष्टिर्वर्षाणामस्येत्यत्र समासार्थं तत्सूत्रं कर्तव्यमिति शङ्कित्राशयः। ननु 'उपदशाः' इत्यत्र दशादिशब्दानां संख्येयवृत्तित्वेन संख्यामात्रवृत्तित्वाभावात् संख्येयेऽन्यपदार्थे बहुव्रीह्यसंभवाड्डज् न स्यात्। तथा च कथं तत्सूत्रं प्रत्याख्यायते, अत आह — **वृत्तिविषय इति**। **द्व्येकयोरिति**। संख्येयपरत्वे द्व्येकेष्विति स्यादित्यर्थः। तत्र को दोषः, अत आह — **अधिकमिति**। **अन्तोदात्तत्वम्** [12]अधिकशतशब्दस्य। **आद्युदात्तत्वमिति**। अधिकशब्दस्य कन्नन्तस्याद्युदात्तत्वाद्बहुव्रीहिस्वरेणाद्युदात्तत्वमिष्यत इत्यर्थः॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यसूनोरन्नंभट्टस्य कृतौ भाष्यप्रदीपोद्द्योतने द्वितीयाध्यायस्य प्रथमे पादे प्रथममाह्निकम्॥

---

[1] शब्दस्यान्तोदात्तत्वे दोषः — अ.

[2] सारस्वतव्याकरणे विसर्गसंधिप्रकरणे इदं वचनम्।

[3] का. वा. १. १. २३ — ८.

[4] समासकन्विध्यर्थम् — अ.

[5] पा. सू. १. १. २३.

[6] पा. सू. ५. २. ७३.

[7] यदा — अ.

[8] पा. सू. २. २. २४.

[9] भाष्ये 'संख्येयवाभिधायित्वात्' इति दृश्यते। 'संख्येयवार्थाभिधायित्वात्' इत्यन्नंभट्टपाठः। अयं पाठान्तरत्वेन हरयाणामुद्रितेऽधस्तान्निर्दिष्टोऽस्ति॥ संख्येयार्थाभिधायित्वादिति — अ, इ, ऋ.

[10] संख्येयार्थाभिधायित्वात् — ऋ.

[11] अनेकमन्यपदार्थ इत्यनेनेत्यर्थः।

[12] अकथितशब्दस्य — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ५४७–५५४]

(रत्नप्रकाशः) इदानीं द्वन्द्वबहुव्रीहिपर्यवसायि [1]विचारान्तरमुपक्रमते — **अथेति**। **बहूनां समासप्रसङ्ग इति**। ऐकपद्येन प्रयुयुक्षायां तेषां तत्प्रसङ्गः। **द्वयोर्द्वयोरिति**। यत्र त्रयाणां तत्प्रसङ्गस्तत्र द्वयोः समासे तदेकं संपन्नमिति तस्यावशिष्टेन सह पुनर्जायमाने[2] द्वयोरेवेति युज्यते वीप्सा। एवं चतुरादिस्थलेऽप्युन्नेयम्। **अविशेषेणेति**। द्वयोर्द्वयोरेवेति विशेषमनपेक्ष्य द्वयोर्बहूनां चेत्यर्थः। **अनेकग्रहणं कर्तव्यमिति**। [3]'अनेकमन्यपदार्थे' इत्यत्रानेकग्रहणं स्वरयितव्यमिति भावः। विनाप्यनेकग्रहणानुवृत्तिं तत्रेष्टं साधयितुं शक्यत इति समाधत्ते — **नैष दोष इति**। **द्वयोर्द्वयोरिति**। द्वयोर्द्वयोर्द्वन्द्वं कृत्वा तयोर्द्वन्द्वयोः पुनर्द्वन्द्वे कृते 'प्लक्षन्यग्रोधखदिरपलाशाः' इति रूपं सिध्यतीति भावः। **बहुषु द्वित्वाभावादिति**। प्लक्षश्च न्यग्रोधश्च खदिरश्च पलाशश्च तिष्ठन्तीति वाक्यार्थे बहूनां सहविवक्षायां [4]द्वयोर्द्वयोर्द्वन्द्वो भवितुं नार्हतीति भावः। एवं च चतुर्षु द्वित्वाश्रययोर्द्वयोः सत्त्वेऽपि न दोषः। प्लक्षन्यग्रोधौ च खदिरपलाशौ च तिष्ठन्तीति प्रयोगस्यापि संभवेन तदर्थे [5]द्वयोर्द्वयोर्द्वन्द्वे तयोः पुनर्द्वन्द्वे इष्टं तत् सिध्यत्येवेत्याशयेनाह — **नावश्यमिति**। **एवमिति**। एवमेवेत्यर्थः। इममवधारणमजानन्नाक्षेप्ताह — **होतृपोतृनेष्टोद्गातारस्तर्हि न सिध्यन्तीति**। अर्थगतं बहुत्वं शब्द आरोप्य बहुवचननिर्देशः कृतः। एतद्भाष्यस्वरसेन उद्गातृशब्दस्योपधायाः सर्वनामस्थाने दीर्घो भवतीति ज्ञायते। [6]**इति च प्राप्नोतीति**। इत्येव प्राप्नोतीत्यर्थः। तदेवावधारणं विज्ञातुमितरः पृच्छति — **न चैवमिति**। इतर आह — **भवितव्यं चेति**। **होतापोतानेष्टोद्गातार इति**। इति तदेति शेषः। पृष्टस्योत्तरं दत्त्वोक्तदूषणेन सह दूषणान्तरं वक्तुमुक्तं दूषणमनुवदति — **होतृपोत्रिति**। **समासान्तस्य चेति**। [7]'द्वन्द्वाच्चुदषहान्तात् समाहारे' इत्यनेन प्राप्तस्य टच इत्यर्थः। समासान्तप्रतिषेधं तावन्निरस्यति — **नैष दोष इति**। तन्निराकरणमभ्युपगम्य तत्स्थाने दोषान्तरं वक्तुं स्थितपूर्वदूषणमनुवदति — **होतृपोत्रिति**। **सुसूक्ष्मेति**। शोभनाः सूक्ष्माः जटाः केशा यस्य स तथा। अत एव भाष्यात् जटशब्दः पुंसि। शोभनं नतमजिनं वासो यस्य स तथा। समन्तात् शिति रन्ध्रं यस्य तेन तथा। यद्यपि 'सुसूक्ष्मजटकेशेन सुनताजिनवाससा' इत्युदाहरणे तत्पुरुषपूर्वोत्तरपदबहुव्रीहित्वेन सिध्यतः, तथापि 'समन्तशितिरन्ध्रेण' इत्यादीनि बहून्युदाहरणानि न सिध्यन्तीत्यत्र तात्पर्यं बोध्यम्। अत एव 'समन्तशितिरन्ध्रेण' इत्युदाहरणमन्ते निवेशितम्। ननु तत्पुरुष[8]पूर्वोत्तरपदबहुव्रीहित्वाश्रयणे रूपस्वरयोः सिद्धावप्यभिमतार्थबोधसिद्धिर्नेति कृत्वा आद्ययोरप्युदाहरणत्वं युज्यत एवेति चेन्न, चतुष्पदबहुव्रीहौ तत्पुरुषपूर्वपदत्रिपदबहुव्रीहौ च सर्वसमानाधिकरणपदे प्रतीयमानार्थस्य तत्पुरुषपूर्वोत्तरपदद्विपदबहुव्रीहावपि प्रतीतेरसंभवात्। तदेवमाद्यपक्षे दूषिते द्वितीयपक्षं परिगृह्णाति — **अस्तु तर्हीति**। **अनेकपदप्रसङ्ग इति**। अनेकपदत्वप्रयुक्तदोषस्य प्रसङ्ग इत्यर्थः। दोषविशेषजिज्ञासया पृच्छति — **तत्र को दोष इति**। तत्राविशेषेण बहुव्रीहावापादितो दोषः क इत्यर्थः। उत्तरमाह — **स्वरसमासान्तपुंवद्भावेषु दोष इति**। तेषु दोषत्वमित्यर्थः। ते दोषा इति यावत्। दोषत्वं च तेषामि-

---

[1] विचारान्तरमुपक्रम्यते — ब.

[2] समासे इत्यनुषङ्गः।

[3] पा. सू. २. २. २४.

[4] द्वयोर्द्वयोर्द्वयोर्द्वन्द्वः — ब.

[5] द्वयोर्द्वयोर्द्वन्द्वयोः पुनः — प.

[6] 'इति प्राप्नोति' इत्येव भाष्य उपलभ्यते। 'इति च प्राप्नोति' इति पाठो रत्नप्रकाशकृत इति प्रतीयते।

[7] पा. सू. ५. ४. १०६.

[8] पूर्वोत्तरबहुव्रीहित्वाश्रयेण रूप — प; पूर्वोत्तरपदबहुव्रीह्याश्रयणे रूप — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ष्टानामसिद्धिरेव। **पूर्वशालाप्रिय इति**। [1]"स्वाङ्गशिटामदन्तानाम्' इति पूर्वशब्द आद्युदात्तः। स एव पूर्वपदप्रकृतिस्वरेण समासे स्यात्। लाशब्दाकारस्योदात्तत्वमिष्टम्, तन्न सिध्यतीति भावः। **पञ्चगवप्रिय इति**। [2]"गोरतद्धितलुकि' इति समासान्तष्टजिष्टो न स्यादिति भावः। **खादिरेतरशम्यमिति**। खादिरीशब्दस्योत्तरपदपरत्वाभावात् पुंवद्भावो न स्यादिति भावः। तेषां दोषत्वं परिहरति — **न वेति**। **अवयवतत्पुरुषत्वादिति**। बहुव्रीह्यवयवस्य पूर्वशालाशब्दादेः [3]"तद्धितार्थोत्तरपदसमाहारे च' इत्यनेनोत्तरपदे परे समाससंज्ञायास्तत्पुरुषसंज्ञायाश्च विधानात् तदाश्रयान्तोदात्तटच्पुंवद्भावा भविष्यन्तीति भावः। परत्वात् समासान्तोदात्तत्वं बाधित्वा पूर्वपदप्रकृतिस्वर एव स्यादिति मन्यमानः पृच्छति — **स्वरः कथमिति**। उत्तरमाह — **तस्यान्तोदात्तत्वमिति**। **इतीति**। संदेहे सतीति शेषः। तदाक्षिपति — **नैष युक्त इति**। परिहरति — **नेति**। **अन्तरङ्गविप्रतिषेधमिति**। परशब्दस्येष्टवाचकत्वादन्तरङ्गस्य चेष्टत्वादिति भावः। यथेदमुपपन्नं तथा [4]"विप्रतिषेधे परम्' इति सूत्रे [5]"अन्तरङ्गं च' इति वार्तिकं व्याख्यातम्। लक्ष्यभेदाल्लक्षणभेदस्याभ्युपेयत्वेन बहुव्रीहिसंज्ञके समासे प्रवर्तमानस्यैव [6]"समासस्य' इत्यन्तोदात्तत्वस्य पूर्व-[पद] प्रकृतिस्वरोऽपवादः, न तु बहुव्रीह्यवयवे तत्पुरुषे प्रवर्तमानस्येत्युत्सर्गापवादयोर्न विप्रतिषेधो युज्यत इति शङ्काप्यत्र नावतरति। तदेवं न्यायसिद्धे प्रौढिमाश्रित्य लिङ्गदर्शनमपि वक्तुं शक्यत इत्याशयेनाह — **निमित्तिस्वरबलीयस्त्वाद्वेति**। एतेन 'अन्तरङ्गोऽपि सतिशिष्टेन बहिरङ्गेणापि स्वरेण बाध्यत इत्यनैकान्तिकमन्तरङ्गत्वं मत्वाह — निमित्तिस्वरबलीयस्त्वादिति' [इति] निरस्तम्। बहुव्रीहिस्वरस्यात्र सतिशिष्टत्वासंभवात्। निमित्तिस्वरबलीयस्त्वज्ञापकताया एकशितिपाच्छब्दपाठस्य निराकरिष्यमाणत्वेनापूर्ववचनाश्रयणानौचित्येन च जारविश्वासेन भर्तृपरित्यागसम्यापत्तेश्च। **एकशितिपाच्छब्दं पठतीति**। एकः शितिः पादोऽस्यैकशितिपात्। [7]"पादस्य लोपोऽहस्त्यादिभ्यः' "संख्यासुपूर्वस्य' इति लोपः। तत्र पाच्छब्द उत्तरपदे परे एकशितिशब्दयोस्तत्पुरुषः। तत्रैकशब्दः कन्नन्तत्वाद्वा [8]"स्वाङ्गशिटाम्' इति वाद्युदात्त इति पूर्वपदप्रकृतिस्वरेणैव तस्याद्युदात्तत्वे सिद्धे तदर्थं युक्तारोह्यादिषु तस्य पाठो व्यर्थः सन् उक्तवचनज्ञापक इति मन्यते। तस्योक्तज्ञापकत्वं न युज्यते, कर्मधारयपूर्वपदद्विपदबहुव्रीहेरुपोत्तमोदात्तत्वबाधकतयाद्युदात्तविधानेन तस्य चारितार्थ्यादित्याशयेनाह — **कः पुनरर्हतीति**। **पठितुमिति**। ज्ञापनायेति शेषः। ज्ञापकत्वतत्खण्डनयोः साधारण्येनाह — **एवं किलेति**। **तच्च नेति**। चकारेणायमर्थः सूचितः — कर्मधारयपूर्वपदबहुव्रीहेराद्युदात्तार्थमपि तत्र स न पठनीयः, बहुव्रीहिपूर्वपदत्वाश्रयेणैव तत्राप्याद्युदात्तत्वस्य सिद्धत्वात्। दृष्टानुविधित्वाच्च[10] च्छन्दसः सर्वेषां विधीनां छन्दसि वैकल्पिकत्वेन चोपोत्तमोदात्तप्रसक्त्यभावात्। लोके च स्वरस्यैच्छिकत्वेन तस्य तादर्थ्यासंभवाच्चेति। वस्तुतस्तु व्यर्थ एव चकारः, लोके स्वरस्यैच्छिकत्वेऽपि यदा त्रैस्वर्येण प्रयोगेच्छा तदोपोत्तमोदात्तप्रयोगवारणार्थं तत्र तस्य पाठस्योचितत्वात्। ननु [11]"संख्यापूर्वो द्विगुः' इत्यत्र संख्यापूर्वः सर्वोऽपि तत्पुरुषो द्विगुसंज्ञक इति पक्षस्यापि सत्त्वेन कर्मधारयपूर्वपदद्विपदबहुव्रीहावपि [12]"इगन्तकाल' इति पूर्वपदप्रकृति-

---

[1] फिट्सूत्रम् २९.
[2] पा. सू. ५. ४. ९२.
[3] पा. सू. २. १. ५१.
[4] पा. सू. १. ४. २.
[5] का. वा. १. ४. २—८.
[6] पा. सू. ६. १. २२३.
[7] पा. सू. ५. ४. १३८.
[8] पा. सू. ५. ४. १४०.
[9] फिट्सूत्रम् २९.
[10] चकारो नास्ति — ब.
[11] पा. सू. २. १. ५२.
[12] पा. सू. ६. २. २९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्वरेणेष्टं सिद्धमिति चकारः सार्थक एव भवत्विति चेन्न, उपक्रमोपसंहारयोरनन्तरसूत्रविहिततत्पुरुषविषयतायास्तत्र स्थितत्वेन तस्यैव पक्षस्य निर्दुष्टस्य स्वीकर्तुमुचितत्वात्। अन्यथा 'एकवीर' इत्यादौ सर्वत्र [1]'अकारोत्तरपदो द्विगुः स्त्रियाम्' इति स्त्रीत्वे ङीप्प्रसङ्गः स्यात्। कुशकाशावलम्बनप्रवृत्तं [2]"लिङ्गमशिष्यं लोकाश्रयत्वाल्लिङ्गस्य' इत्येतदाश्रयेण तत्पक्षस्य पक्षान्तरसमकक्षतां संपाद्य तत्रैकशितिपाच्छब्दपाठप्रत्याख्यानानौचित्याच्च। 'न वावयवतत्पुरुषत्वात्' इति वचनेन बहुव्रीह्यवयवस्य तत्पुरुषसंज्ञा विहितेति मन्यमानोऽन्यत्र स्वरस्यातिप्रसङ्गमाह — **अस्य तर्हीति**। परिहरति — **नैष दोष इति**। **नेदमिति**। अवयवतत्पुरुषत्वादिति शेषः। **विप्रतिषेधेनेति**। इति वक्तुं सिद्धस्यानुवादमात्रं तेन कृतमिति शेषः। **ननु चास्येति**। सुसूक्ष्मादिशब्दस्येति शेषः। **अस्तीति**। तत्पुरुषलक्षणमित्यनुषज्यते। परिहरति — **बहुलवचनादिति**। **अधिकषष्टिवर्ष इति**। अधिका षष्टिर्वर्षाण्यस्येति त्रिपदे बहुव्रीहौ कृते [3]"अधिकग्रहणं चालुकि' इत्यधिकशब्दस्य संख्यासंज्ञकत्वेन [4]"तद्धितार्थोत्तरपद' इति षष्टिशब्देन तत्पुरुषे तत्प्रयुक्तान्तोदात्तत्वं स्यादिति भावः। **बहुव्रीहिसंज्ञेति**। तथा चेगन्तोत्तरपदेऽप्यन्तोदात्तत्वं स्यादिति भावः। वस्तुतस्तु त्रिपदे बहुव्रीहौ कृतेऽवान्तरबहुव्रीहेः प्रसक्तिरेव नास्ति, तस्य पृथगन्यपदार्थे शक्तिकल्पनायां मानाभावात्। द्वन्द्वतत्पुरुषौ तु पृथक्शक्तिमन्तरेणैव वचनबलाद् भवतः। अभ्युपगमवादेन समाधत्ते — **न संख्यामिति**। [5]'अव्यविकन्यायेन 'अधिका षष्टिर्वर्षाण्यस्य' इति वाक्यमेव भवति। समासस्तु 'अधिका षष्टिर्वर्षाणामस्य' इत्यर्थ एव भविष्यतीति भावः। **पूर्वेणेति**। अधिका षष्टिर्येषां तानि अधिकषष्टीनि, तानि वर्षाणि यस्य सोऽधिकषष्टिवर्ष इति बहुव्रीहिगर्भो बहुव्रीहिः स्यात्। तत्र चावान्तरबहुव्रीहेः संख्येयवृत्तित्वात् ततो डच् स्यादिति भावः। उत्तरमाह — **प्रत्याख्यात इति**। **अधिका षष्टिर्वर्षाण्यस्येति**। अस्मिन् पक्षेऽवान्तरबहुव्रीहिर्न भवति, अन्यपदार्थस्य तन्मात्रवाच्यस्याभावादिति भावः। अस्मिन् पक्षेऽव्यविकन्यायेन[6] 'अधिका षष्टिर्वर्षाणामस्य' इति वाक्यमेव भवति, न वृत्तिः। तं न्यायमविद्वानाह — **सर्वथेति**। [7]**अधिकषष्टवर्षादिति**। डचि सति ह्येवमनिष्टरूपं स्यात्, तस्मान्न मुच्यामहे, तत्परिहर्तुं न शक्नुम इति भावः। [8]'अव्यविकन्यायेनाधिकषष्टवारणं भवतीति मनसि निधायाधिकषष्टिवर्षस्तु मया साधित एव खल्वित्याशयेनाह — **यत्तु तदुक्तमिति**। 'बहुव्रीहिसंज्ञा तर्हि प्राप्नोति' इत्यादिनेति शेषः। अवान्तरबहुव्रीहिसंज्ञायां हि डचि 'अधिकषष्टवर्षः' इति स्यात्, न त्वधिकषष्टिवर्ष इति तन्न सिध्यतीत्युक्तप्रायम्। तदेवं [9]"संख्ययाव्यय' इति सूत्रे स्थिते प्रत्याख्याते चाधिकषष्टिवर्षशब्द आद्युदात्तः साधितः। आक्षेप्ताह — **अधिकशतवर्षस्त्विति**। [10]"अधिकं शतं वर्षाण्यस्येति त्रिपदे बहुव्रीहावुत्तरपदे परे पूर्वयोस्तत्पुरुषे तत्प्रयुक्तान्तोदात्तता स्यादिति दोषः। **कर्तव्योऽत्र यत्न इति**। युक्तारोह्यादिषु स पठनीय इति भावः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे द्वितीयस्याध्यायस्य प्रथमपादे प्रथममाह्निकम्

---

[1] का. वा. २. ४. ३०–४.

[2] महाभाष्यम्. २. १. ३६.

[3] का. वा. १. १. २३–८.

[4] पा. सू. २. १. ७१.

[5] महाभाष्येऽयं न्यायः ४. १. ८८. सूत्रे वर्णितः।

[6] अयं न्यायः महाभाष्ये ४. १. ८८ सूत्रे वर्णितः।

[7] भाष्ये 'अधिकषष्टिवर्षात्' इत्यत्र 'अधिकषष्टवर्षात्' इति पाठोऽभिमतः। अयं च पाठान्तरत्वेनाधो निर्दिष्टो हरयाणामुद्रित एव।

[8] महाभाष्ये ४. १. ८८. सूत्रेऽयं न्याय उक्तः।

[9] पा. सू. २. २. २५.

[10] अधिका षष्टिर्वर्षाण्यस्येति — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य प्रथमपादे द्वितीयमाह्निकम्

सुबामन्त्रिते पराङ्गवत् स्वरे २. १. २.

[२, ५५५–५६१]

(उद्द्योतनम्) ननु [१]'करोष्यटन्' इत्यादिवारणाय सुब्ग्रहणस्यावश्यकत्वात् प्रश्नायोगः, अत आह — **आमन्त्रितस्येति** । तिङन्तस्यासामर्थ्यमाह — **तथा हीति** । **व्यधिकरणस्य** 'देवदत्तो गच्छति, यज्ञदत्त भुङक्ष्व' इत्यादौ। **वाचनिकं** [२]'समानाधिकरणमसमर्थवत्' इति। सत्यपि सामर्थ्ये आह — **अतिव्याप्तीति**। अक्रियमाणेऽतिव्यार्प्ति निरस्य क्रियमाणेऽव्याप्तिमाह — [३]**क्रियमाणेऽपीति**। **सुबन्तसमुदायस्य** असुबन्तत्वादित्यर्थः। वाचनिकमसामर्थ्यं निराह — **अधात्विति** । साक्षादन्वय एवास्तीत्याह — **अथवेति** । **तथा च** संबोधनस्य साक्षात् क्रियाविशेषकत्वेन सामर्थ्ये सतीत्यर्थः। **निघातः** [४]'आमन्त्रितस्य च' इत्याष्टमिकः । तत्र [५]'समानवाक्ये निघातयुष्मदस्मदादेशाः' इति वचनात् सामर्थ्यपिक्षा। ननु 'पीडच्ये' इत्यस्य धातुस्वरेणाद्युदात्तत्वे पराङ्गवद्भावाभावेऽपि न कश्चिद्दोषः, अत आह — **पीडच्य इतीति** । [६]'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्नि्वङोः' तासेरनुदात्तेतो ङितोऽदुपदेशाच्च परं लसार्वधातुकमनुदात्तं ह्नि्वङभ्यां परं वर्जयित्वा। 'पीड अवबाधने' इति चुरादिण्यन्तात् कर्मण्यात्मनेपदोत्तमपुरुषैकवचने यकि णिलोपे च 'पीडच्ये' इति रूपम्। तत्र यकः प्रत्ययस्वरेणोदात्तत्वम्। तस्यादुपदेशत्वात् ततः पर [७]एकारोऽनुदात्तः। तस्य "अतो गुणे' इत्येकादेश उदात्तः। शेषनिघातेन [८]पकारेकारोऽनुदात्तः। तस्य पराङ्गवद्भावेनोदात्तत्वं [१०]न भवतीत्यर्थः। **पदादिति**। आष्टमिकनिघाते [११]'पदस्य' [१२]'पदात्' [१३]'अपादादौ' इत्यधिकारात्। ननु 'अधात्वभिहितम्' इति [१४]वाचनिकासामर्थ्यस्यापवादो न संभवति, सर्वस्यापि धातुसहचरितप्रत्ययाभिहितत्वेन 'सर्पिः कालकम्' इत्यत्रापि सामर्थ्यापत्तेः, अत आह — **सर्वमिति** । **यत्रेति**। 'सर्पिष्पीयते' इत्यादौ। [१५]'अर्चिशुचिहुसृपिच्छादिच्छर्दिभ्य इसिः' इतीसिप्रत्ययान्तः सर्पिःशब्दः। तत्र घृतत्वजातिः प्रतीयते, न तु सर्पणक्रिया। तत्कर्तृत्वेऽप्यधात्वभिहितं [१६]तत्। नन्वामन्त्रितस्य पराङ्गवद्भावो न विधीयते, किं तु तस्मिन् परतः पूर्वपदस्य। ततः 'आमन्त्रितस्य' इत्ययुक्तम्, अत आह — **आमन्त्रित इति**। **आमन्त्रितस्य** आमन्त्रितसंबन्धिनं

---

[१] करोम्यटन् — ऋ.
[२] महाभाष्यम् २. १. १.
[३] प्रदीपे 'क्रियमाणे च' इत्यत्र 'क्रियमाणेऽपि इत्यन्नंभट्टपाठः।
[४] पा. सू. ८. १. १९.
[५] का. वा. २. १. १–११.
[६] पा. सू. ६. १. १८६.
[७] इकारोऽनुदात्तः — ऋ.
[८] पा. सू. ६. १. ९७.
[९] पकारोत्तर ईकार इत्यर्थः।
[१०] 'न' इति नास्ति — इ.
[११] पा. सू. ८. १. १६.
[१२] पा. सू. ८. १. १७.
[१३] पा. सू. ८. १. १८.
[१४] वाचनिकसामर्थ्यस्यापवादः — अ.
[१५] उणादिसूत्रम् २७३.
[१६] 'सर्पिः कालकम्' इत्येतदित्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यर्थः। ननु कारकं [1]क्रियाया भवति, आमन्त्रितशब्दस्तदर्थो वा [2]द्रव्यम्, न क्रियेति 'आमन्त्रित-कारकम्' इत्ययुक्तम्, अत आह — **आमन्त्रित इति**। प्रातिपदिकस्वरेणान्तोदात्तत्वे विशेषमा-शङ्क्याह — **कुण्डेति**। फिट्सूत्रे **नब्विषयस्य** क्लीबस्य। 'अटन्' इत्यस्याष्टमिको निघातः। तथा च समुदाय आद्युदात्तः। पराङ्गवद्भावेऽपि स एवेति स्वरे न विशेष इत्यर्थः। अत्र स्वर-विशेषोऽस्तीत्याह — **परशुशब्द इति**। **अन्तोदात्तः** प्रत्ययस्वरेण। आमन्त्रितस्वरस्त्वाद्युदात्तः। पूर्वोक्तपक्षव्यावृत्त्यर्थतां संशयार्थतां च व्यावर्तयति — **वाशब्द इति**। विकल्पपक्षे पूर्वत्र यावत् संगृहीतं तावदनेनापि संग्राह्यम्, अन्यथा विकल्पासंभवात्। अतो निमित्तशब्देन षष्ठयन्तसंग्रहः कथम्, अत आह — **मद्राणामिति**। **भृत्येति**। राजशब्देन प्रभुत्वमुच्यते। तच्च ससं-बन्धिकमिति संबन्ध्यन्तरं निमित्तमित्यर्थः। भृत्या देशाश्च निमित्तं यस्या इति विग्रहः। 'क्षत्रेण' इत्यस्यामन्त्रितं प्रति निमित्तत्वाभावमाह — **क्षत्रेति**। **आख्यातेति**। संरभस्व, यतस्वेति क्रिया-पेक्षयेत्यर्थः। ननु समर्थपरिभाषयैवात्र पराङ्गवद्भावव्यावृत्तेः किं निमित्तग्रहणेन, अत आह — **क्रियाद्वारकं त्विति**। नन्वत्र व्यपेक्षालक्षणसामर्थ्योपपादनं व्यर्थम्। न च परिभाषयात्राति-[3]प्रसङ्गनिवारणशङ्कानिरासार्थमिति वाच्यम्, तत्रैकार्थीभावसामर्थ्यस्य गृहीतत्वेनात्र तदभावेन परि-भाषाया अनुपस्थानात्, अत आह — **इहेति**। **वचनेन** 'तन्निमित्तग्रहणम्' इत्यनेन। **अन्यथा** एतद्वचनाभावे। **द्विविधमपीति**। 'भुङ्क्ते देवदत्तो यज्ञदत्त गच्छ' इत्यादौ पराङ्गवद्भावनिरा-सार्थमित्यर्थः। ननु कारकत्वापेक्षया निमित्तत्वं लघु, सामान्यत्वात्। षष्ठीग्रहणं च न कर्तव्य-मिति लाघवे विनिगमके सति प्रश्नो न युक्तः, अत आह — **गुर्विति**। कस्मिन् पक्षेऽनेकसंग्रह-रूपप्रयोजनमिति प्रश्न इत्यर्थः। कारकत्वमेव नास्ति [4]सुतरामामन्त्रितकारकत्वमिति प्रतिपादनाय कारकत्वाभावमाह — **स्वामीति**। **शेषेति**। षष्ठीसाहचर्यादुपपदविभक्तित्वाच्च। **पूर्वोक्तेति**। भृत्यदेशनिमित्ता राजतेत्युक्तन्यायेन। उपसंख्यानस्यावश्यकत्वमाह — **क्रियमाण इति**। यद्यपि तन्निमित्तपक्षे सुब्ग्रहणं न कर्तव्यम्, [5]तथाप्यङ्गीकृत्य वार्तिके सुबन्तस्येत्युक्तम्। **पूर्वस्येति**। सुब्ग्रहणाभावेऽप्ययं दोषः। आमन्त्रितानुप्रवेशशङ्कानिरासार्थं 'स्वरेऽवधारणात्' इति वार्तिकं व्याचष्टे — **प्रसिद्धे हीति**। लौकिक आनन्तर्ये शास्त्रनिरपेक्षे प्रसिद्धे सतीत्यन्वयः। लक्षणैकत्वादपि पराङ्गवद्भावे कर्तव्ये पराङ्गवद्भावो विधातुं न शक्यत इत्याह — **स्वात्मनीति**। **अतिदेशेति**। पराङ्गवद्भावे कार्ये पराङ्गवद् भवतीत्येवंरूपेत्यर्थः। स्वात्मन्यप्रवृत्तौ दृष्टान्तः — **यथेति**। [6]'अणु-दित् सवर्णस्य चाप्रत्ययः' इत्यत्र यदण्ग्रहणं तद्ग्रहणात् तत्र सवर्णानामाकारादीनां ग्रहणं नास्ति, स्वात्मनि [7]वृत्तिविरोधादित्यर्थः। स्वरग्रहणाभावे तु पराङ्गवद्भावेऽपि पराङ्गवद्भावोऽनेन विधातुं शक्यत इत्याह — **असतीति**। ननु लक्षणया स्वरशब्देन [8]स्वरनिमित्तमानन्तर्यं कथ्यते। तेन व्यवहितस्यापि भविष्यति, अत आह — **न चेति**। न च निर्दिष्टपरिभाषाया अत्रानुपस्थानाद् व्यवहितस्यापि भविष्यतीति वाच्यमित्याह — **न चेति**। पूर्वाङ्गत्वेनात्र [9]कः स्वरः, अत आह — **पितरिति**। **निघातेन** आष्टमिकेन। मरुच्छब्दः प्रातिपदिकस्वरेणान्तोदात्तः[10], तस्य पूर्वाङ्गत्वेन

---

[1] क्रियया भवति — ऋ.
[2] प्राप्यम् — अ.
[3] प्रसङ्गनिवारणं शङ्का — अ; प्रसङ्गवारण-शङ्का — ऋ.
[4] सुतरामामन्त्रितत्वमिति — अ.
[5] तथाप्यङ्गीकृतवार्तिके — अ.
[6] पा. सू. १. १. ६९.
[7] प्रवृत्तिविरोधादित्यर्थः।
[8] स्वरनिमित्तमानन्त्यं न व्यवहितस्यापि — अ.
[9] न स्वरः — अ.
[10] आमः सुप्त्वादनुदात्तत्वम्। ततश्च 'मरुताम्' इति मध्योदात्तम्। इदानीं पूर्वाङ्गवद्भावेन 'पितर्मरुताम्' इति सर्वानुदात्तमित्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्वानुदात्तत्वम्। ननूच्चैरित्यस्याद्युदात्तत्वे[1] आमन्त्रितस्याष्टमिकनिघाते [2]समुदायस्याद्युदात्तत्वात् प्रतिषेधेन कः स्वरः सिध्यतीत्यत आह — **उच्चैरिति**। तन्निमित्तग्रहणेन व्यावृत्तिशङ्कां निराह — **अधिकरणेति**। 'अनव्ययीभावस्य' इत्यनेन फलितमाह — **प्रतिषेधप्रतिषेधादिति**। ननु [3]'अव्ययीभावश्च' इत्यत्र स्थलत्रय एवास्याव्ययसंज्ञा नान्यत्रेत्युक्तत्वात् प्रतिषेधो व्यर्थः, अत आह — [4]**एतत्त्विति**। 'उपाग्नि' इत्यत्र [5]'अव्ययादाप्सुपः' इति सुपो लुक्। मुखस्वरो निषेध्यत्वेन प्रयोजनम् — उपाग्निमुखः। [6]'मुखं स्वाङ्गम्' इति बहुव्रीहौ मुखशब्दस्यान्तोदात्तत्वं प्राप्तम्, [7]'नाव्ययदिक्शब्द' इति निषिध्यते। विसर्जनीयस्थानिकसकार उपचार उच्यते। सोऽपि निषेध्यत्वेन प्रयोजनम्। उपपयःकारः, [8]'अतः कृकमि' इत्यत्र 'अनव्ययस्य' इति प्रतिषेधः सिद्धो भवति। **अन्यथा** तदपेक्षायाम्। अत्र सुब्लोपप्रसङ्गमुपपादयति — **वृश्चन्निति**। **ज्ञापकादिति**। 'राजन्' इत्यत्र प्रत्ययलक्षणेन प्रातिपदिकसंज्ञानिषेधे प्रातिपदिकान्तत्वाभावादेव नलोपाप्रसक्तेर्निषेधोऽनर्थक इति प्रत्ययलक्षणेन प्रातिपदिकसंज्ञानिषेधो नास्तीति ज्ञापयतीत्यर्थः। 'पराङ्गवद्भावः' इत्यनेन तत्कार्यलक्षणेत्याह — **पराङ्गेति**। 'पराङ्गवत्' इत्यविशेषेणोक्तत्वात् कथं सुबन्तैकान्तत्वम्, अत आह — **पराङ्गवदिति**। प्रथमोपस्थितत्वम् **अन्तरङ्गत्वम्**। संनिधानात् सुबन्तैकान्तविषयत्वमुक्तं विघटयति — [9]**अस्यायमिति**। प्रत्ययलक्षणेनेत्यस्य [10]'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेणेत्यर्थोऽनुपपन्नः, सुबन्तैकान्तत्वस्य प्रत्ययलक्षणत्वाभावात्, अत आह — **प्रत्ययो निमित्तमिति**। तदेवाह — **विशेषणत्वेनेति**। आमन्त्रिते परतो यत् सुबन्तमित्येवं विशेषणत्वेनेत्यर्थः। **परशब्देनेति**। परशब्दस्य विशेषाकाङ्क्षायां संनिधानादामन्त्रितमादायैव पर्यवसानम्, नानुपस्थितप्रातिपदिकमादायेत्यर्थः। षत्वप्रसङ्गमुपपादयति — **पराङ्गवदिति**। [11]'सात्पदाद्योः' इति निषेधो न प्रवर्तत इत्यर्थः। ननु स्वाश्रयस्याबाधेऽतिदेशस्य किं प्रयोजनम्, अत आह — **यच्चेति**। [12]**शब्देन** [13]'आमन्त्रितस्य च' इत्याद्युदात्तत्वम्। **अत्र** सिञ्चन्नित्यत्र। आतिदेशिकं पदादित्वविरुद्धं कार्यं नास्ति। आतिदेशिकाभावे स्वाश्रयकार्यप्रवृत्तौ दृष्टान्तः — **यथेति**। [14]'न दुहस्नुनमां यक्चिणौ' इति कर्मवद्भावाश्रयस्य यकः प्रतिषेधे कर्त्राश्रयः शप् प्रवर्तते। **व्याप्तीति**। लक्ष्यानुरोधादिति भावः। एतावता प्रपञ्चेन निष्पन्नमर्थमाह — **एवमिति**। स्वात्मनि [15]'क्रियाविरोधं

---

[1] निपात इति मत्वा शङ्केति भाति ॥ उच्चैःशब्दादेः 'फिषोऽन्त उदात्तः' इत्यन्तोदात्तत्वमव्युत्पत्तिपक्षे। व्युत्पत्तिपक्षे च 'उदि चेर्डैसिः' इत्युणादिसूत्रेण डैसिप्रत्ययान्तत्वात् प्रत्ययस्वरेण प्रत्ययस्याद्युदात्तत्वे उच्चैश्शब्दादेरन्तोदात्तत्वमेव। अत एव 'स्वरादिष्वन्तोदात्तपाठः किमर्थ इति चिन्त्यम्' इत्युद्द्योते उक्तम्। वृत्तौ स्वरादिष्वन्तोदात्तपाठ इत्युक्तत्वात् कैयटेनापि तदेवानुसृतमिति भाति।

[2] समुदायस्याप्युदात्तत्वात् — अ.

[3] पा. सू. १. १. ४१.

[4] 'एतच्च' इति प्रदीपे 'एतत्तु' इत्यन्नंभट्टपाठ इति भाति।

[5] पा. सू. २. ४. ८२.

[6] पा. सू. ६. २. १६७.

[7] पा. सू. ६. २. १६८.

[8] पा. सू. ८. ३. ४६.

[9] प्रदीपे 'अस्याभिप्रायः' इत्यत्र 'अस्यायमभिप्रायः' इत्यन्नंभट्टपाठ इति प्रतीयते।

[10] पा. सू. १. १. ६२.

[11] पा. सू. ८. ३. १११.

[12] शब्दस्य — अ.

[13] पा. सू. ६. १. १९८.

[14] पा. सू. ३. १. ८९.

[15] क्रियाविरुद्धं — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निराह — **विषयभेदादिति** । परशुनेत्यस्य पराङ्गवद्भावेनामन्त्रितान्तर्भावे सति पुनस्तीक्ष्णेनेत्यस्य पराङ्गवद्भावः प्रवर्तत इत्यर्थः ॥

[१, ५५५–५६१]

(रत्नप्रकाशः) सुबिति किमर्थमिति । 'असामर्थ्यात्' इत्यादिना वक्ष्यमाणोऽभिप्रायः । तिङन्तव्यावृत्त्यर्थं सुब्ग्रहणमित्युत्तरमाह — **करोष्यटन्निति** । **असामर्थ्यादिति** । आमन्त्रितस्य पदत्वात् समर्थपरिभाषया तिङन्तेऽतिप्रसङ्गो वार्यत इति मन्यते । वस्तुतस्त्वेकार्थीभावलक्षणमेव सामर्थ्यं तत्राश्रितमिति तस्याः परिभाषाया अत्र प्रसक्तिरेव नास्ति । **समानाधिकरणमिति**। 'करोषि' इत्यत्राख्यातार्थस्य प्राधान्यादामन्त्रितपदार्थस्यैव सिपं प्रत्यप्रयुज्यमानेन युष्मच्छब्देनाभिधेयत्वात् तस्यैवाख्यातार्थत्वात् सामानाधिकरण्यमामन्त्रिताख्यातयोरिति भावः । [1]'तुष्यतु दुर्जनः' इति न्यायेन समर्थपरिभाषाया अत्र प्रवृत्तिमभ्युपेत्य प्रत्युदाहरणान्तरमाह — **पीडचे पीडचमानेति**। आख्यातार्थस्यास्मदर्थाभिन्नत्वेनामन्त्रितसामानाधिकरण्याभावादामन्त्रितान्तस्य च क्रिययैवान्वयाद् व्यपेक्षालक्षणसामर्थ्याश्रययापि समर्थपरिभाषया तत्रातिप्रसङ्गवारणं कर्तुं न शक्यत इति भावः । तत्र 'पीडचे' इत्यन्तोदात्तम्, इटो लसार्वधातुकानुदात्तत्वे सति तस्योदात्तयगकारेण सहैकादेशस्योदात्तत्वात् । ततः परस्यामन्त्रितस्याष्टमिको निघातः । एतेन [2]"व्यधिकरणाख्यातेनामन्त्रितस्य स्वत एव सामर्थ्यं नास्ति' इति निरस्तम्। आमन्त्रितस्य तिङन्तेनैवान्वय इति सिद्धान्तात्, व्यपेक्षालक्षणसामर्थ्याश्रययैव समर्थपरिभाषया सुब्ग्रहणस्याक्षिप्तत्वाच्च । **आमन्त्रितस्य पराङ्गवद्भाव इति** । आमन्त्रिते परे विधीयमानः पराङ्गवद्भाव आमन्त्रितसंबन्धीति संबन्धसामान्ये षष्ठी । **आमन्त्रितकारकमिति** । आमन्त्रितार्थं प्रति यत् कारकं तद्वाचकमित्यर्थः । **नास्त्यत्रेति** । कुण्डशब्दस्य [3]"नब्विषयस्य' इत्याद्युदात्तत्वात् ततः परस्यामन्त्रितस्याष्टमिकनिघातात् पराङ्गवद्भावेऽपि षाष्ठिकामन्त्रिताद्युदात्तत्वेन तस्य तथात्वादिति भावः। **परशुनेति** । परशुशब्दः [4]"आङ्परयोः खनिशृभ्यां डिच्च' इति कुप्रत्ययान्तोऽन्तोदात्तः । **तन्निमित्तग्रहणं वेति**। तस्यामन्त्रितस्य निमित्तं संबन्धि यत् सुबन्तं तद्वा पराङ्गवद् भवतीति वक्तव्यमिति भावः। तत्संबन्धित्वं तस्यार्थद्वारकम्। एतेन 'तस्यामन्त्रितस्य यन्निमित्तं तद्वाचि पराङ्गवद् भवतीत्यर्थः । **मद्राणां राजन्निति** । मद्रनिमित्तं राजत्वमित्यस्ति तन्निमित्तत्वम् । भृत्यदेशनिमित्तं हि राजत्वम्' इति निरस्तम् । देशभृत्ययोः सर्वसाधारणत्वेन राजत्वनिमित्तत्वासंभवात् । निमित्तं हि कारणम् । **तच्चावश्यमन्यतरद्वक्तव्यमिति**। समर्थपरिभाषाया एकार्थीभावलक्षणसामर्थ्याश्रयत्वादिति शेषः । **क्षत्रेणाग्न इति**। क्षत्रस्य क्रियां प्रति करणत्वमित्यामन्त्रितसंबन्धित्वाभावान्न पराङ्गवद्भावः । एवं 'मित्रेणाग्ने' इत्यत्र ज्ञेयम् । एतेन 'क्षत्रमित्रयोराख्यातवाच्यक्रियापेक्षया करणत्वादामन्त्रितं प्रति निमित्तत्वाभावः। क्रियाद्वारकं तु व्यपेक्षालक्षणं सामर्थ्यमस्तीति स्यात् पराङ्गवद्भावः । इह वचनेनातिप्रसङ्गे निरस्ते पूर्वसूत्र एकार्थीभाव एव सामर्थ्यमाश्रितम् । अन्यथा तु द्विविधमपि सामर्थ्यंनाश्रीयेत' इति निरस्तम् । व्यपेक्षालक्षणसामर्थ्यनिमित्तत्वयोरैक्यस्यैवात्र भगवतोऽभिमतत्वेन निमित्तत्वाभावव्यपेक्षालक्षणसामर्थ्ययोः स्वीकारस्यानौचित्यात् । पूर्वसूत्र एकार्थीभाव एव सामर्थ्यमित्यत्र [5]"कारणा-

---

[1] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[2] अयमर्थानुवादो बोध्यः ।
[3] फिट्सूत्रम् २६.
[4] उणादिसूत्रम् ३४.
[5] करणान्तरस्यैव — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न्तरस्यैव निर्दशितत्वेनात्रत्यं वचनविशेषमाश्रित्य तत्र [1]तद्व्यवस्थापनानौचित्याच्च। पृथग्वचनान्तरापेक्षया हि द्विविधसामर्थ्याश्रयप्रयुक्तवाक्यभेदाश्रयणमेव युक्तम्। **किं पुनरत्र ज्याय इति।** अनयोर्वचनयोः किं वचनं ज्याय इत्यर्थः। **तन्निमित्तग्रहणमेव ज्याय इति।** व्यापकत्वादिति शेषः। **गोषु स्वामिन्निति।** [2]''स्वामीश्वर' इति विहिता सप्तमीयम्, न त्वधिकरण इति कारकग्रहणेनाग्रहणमिति भावः। **समानाधिकरणस्योपसंख्यानमिति।** यस्य पराङ्गवद्भावो विहितस्तत्समानाधिकरणस्य तद्घटितामन्त्रिताङ्गता वक्तव्या स्वरे कर्तव्य इत्यर्थः। **अनन्तरत्वादिति।** सप्तमीनिर्देशेन विधीयमानस्य पराङ्गवद्भावरूपस्य कार्यस्याव्यवहितपूर्वस्यैवौचित्यादिति भावः। **स्वरेऽवधारणादिति।** स्वरे कर्तव्ये पराङ्गवद्भावस्य विहितत्वादित्यर्थः। **नानन्तर्यं इति।** आनन्तर्यनिमित्तकपराङ्गवद्भाव इत्यर्थः। **पितर्मरुतामिति।** 'पितः' इत्यस्यामन्त्रितस्य जायमान आष्टमिकनिघातो 'मरुताम्' इत्यस्यापि भवति। **उच्चैरधीयानेति।** उच्चैरित्यस्य क्रियाविशेषणत्वादामन्त्रितसंबन्धित्वमिति पराङ्गवद्भावप्रसक्तिः। तस्य निषेधे सति फिट्स्वरेणोच्चैःशब्दोऽन्तोदात्तः। ततः परस्यामन्त्रितस्याष्टमिको निघातः। **अनव्ययीभावस्येति।** [3]''अव्ययीभावस्याव्ययत्वे लुङ्मुखस्वरोपचाराः' इति प्रयोजनपरिगणनमनपेक्ष्येदम्। **सुबलोपार्थमिति।** प्रायेणामन्त्रितस्य प्रातिपदिकत्वात् तदवयवत्वात् सुपः [4]''सुपो धातुप्रातिपदिकयोः' इति लुक्प्रसङ्ग इति भावः। [5]**सुबन्तैकान्तत्वादिति।** आमन्त्रितस्य सुबन्तत्वात् [6]तस्याङ्गतानेन सूत्रेण बोधिता, न तु प्रातिपदिकस्येति सुब्लोपप्रसङ्गाभाव इति भावः। **प्रातिपदिकैकान्तस्तु सुब्लोप इति।** परत्वादादौ लोप इति भावः। तथा च [7]''सामन्त्रितम्' इति संबोधनप्रथमान्तस्यैवामन्त्रितसंज्ञायां [8]तस्यैवाङ्गता प्रकृतसूत्रेण बोधिता, न तु प्रातिपदिकाङ्गतेति न सुब्लोपप्रसङ्ग इति भावः। ननु सुब्लोपोत्तरं प्रत्ययलक्षणेन यत् सुबन्तं तत् प्रातिपदिकमेवेत्यामन्त्रितावयवः प्रातिपदिकावयवोऽपि भवत्येवेति चेन्न, [9]''यावद्वचनं वाचनिकम्' इति न्यायेन वचनमन्तरेण प्रातिपदिकावयवत्वाभ्युपगमानौचित्यात्। ननु [10]''सुट् तिथोः' इति तथयोर्विहितस्य सुटः प्रत्ययावयवत्ववत् प्रकृतेऽपि प्रातिपदिकावयवत्वं भविष्यतीति चेन्न, वैषम्यात्। लोके ह्यवयवावयवः समुदायावयवोऽपि भवति। यथा हस्तावयवा अङ्गुलयो हस्तावयवकशरीरावयवा अपि भवन्ति, एवं तकारथकारयोरवयवस्तदवयवकप्रत्ययावयवो भवति। प्रकृते तु प्रातिपदिकावयवकसुबन्तावयवः प्रातिपदिकावयवो न भवति। यथा हस्तावयवकशरीरावयवोऽङ्घ्रिर्हस्तावयवो न भवति, यथा वा पञ्चारत्निनी इत्यादावुत्तरपदावयवकाङ्गभक्तो नुमुत्तरपदभक्तो न भवति। एवं च स्वरेऽवधारणस्य वैयर्थ्यमेवेत्युपसंहरति — **तस्मादिति। प्रातिपदिकस्याया इति।** हीति शेषः। सुपो विभक्तित्वात् स्त्रीत्वम्। एतेन 'भाष्यकारवचनप्रामाण्यात् सुप्शब्दस्य स्त्रीलिङ्गत्वम्' इति निरस्तम्। मदुक्तरीत्या भाष्यस्योपपन्नत्वेन सुप्शब्दस्य स्त्रीलिङ्गत्वकल्पने मानाभावात्। सुब् यः प्रत्ययः, सुब् या विभक्तिः, सुबिदं वचनमिति लिङ्गत्रयसामानाधिकरण्यदर्शनाच्च। **कूपे सिञ्चन्निति।** इडागमे सति [11]''वलस्तः प्रत्ययादित्वाभाववत् सुपः पराङ्गवत्त्वे सति सिञ्चन्नित्यत्र सकारस्य पदादित्वाभावात् षत्वप्रति-

---

[1] तद्व्यवस्थापनौचित्याच्च — ब.
[2] पा. सू. २. ३. ३९.
[3] का. वा. १. १. ४१–१.
[4] पा. सू. २. ४. ७१.
[5] सुबन्तैकाङ्गत्वादिति — ब.
[6] तन्निरूपिताङ्गतेत्यर्थः।
[7] पा. सू. २. ३. ४८.
[8] तन्निरूपिताङ्गतेत्यर्थः।
[9] लौ. न्या. साहस्री पृष्ठम् २०२.
[10] पा. सू. ३. ४. १०७.
[11] वल्रूपस्य तकारस्येत्यर्थः॥ 'तः' इति नास्ति — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

षेधाभावे षत्वं स्यादिति भावः। **चर्म नमन्निति**। [1]'रषाभ्यां नो णः समानपदे' इति समानपदत्वप्रयुक्तं णत्वं स्यादिति भावः। **स्वाश्रयमिति**। वत्करणसामर्थ्यात् स्वरे कर्तव्ये समुदायस्यामन्त्रितपदत्वयोः सतोरपि षत्वनिषेधे सकारस्य पदादित्वं स्वाश्रयं भविष्यत्येवेति भावः। इडागमस्त्ववयव एव, न त्ववयवसदृश इति वैषम्यम्। **पूर्वपदात् संज्ञायामिति**। एतेनायमेव पक्षः प्रबलो व्यापकत्वात्। यत्तु [2]'समानमेव यन्नित्यं तत् समानपदम्' इति [3]पक्षान्तरमुदाहरणविशेषे युक्त्यन्तरप्रदर्शनमात्रपरमिति सूचितं भगवता। एवं च तमेव [4]दुर्वलं पक्षमवलम्ब्य प्रकृतभाष्यमुपेक्षमाणो निरस्तः। 'मातृभोगीणः, पितृभोगीणः, स्तुतिपराणाम्, भक्तिपराणाम्' इत्यादौ णत्वानापत्तेः। ननु [5]'आचार्यादणत्वं च' इति वचनात् क्वचित् सखण्डेऽपि पदे णत्वं भविष्यतीति चेन्न, ज्ञापकस्य सजातीयापेक्षत्वेन कथंचित् 'मातृभोगीणः, पितृभोगीणः' इत्यत्र तत्सिद्धावप्यन्यत्र तदसिद्धेः। सामान्यतो ज्ञापकत्वाश्रयणे त्वव्यवस्था। तत्परिहारस्तु [6]'पूर्वपदात् संज्ञायामगः' इत्यस्य नियमार्थत्वाश्रयेणेति चेत् तर्हि तेनैव सर्वनिर्वाहे समानमखण्डमित्याश्रयणं निरर्थकम्। [7]'समानवाक्ये निघातयुष्मदस्मदादेशाः' इत्यत्रेव समानपदस्योपपत्तिः। पूर्वपदोत्तरपदशब्दयोः समासपूर्वोत्तरावयवयो रूढत्वान्नात्र तेन नियमेन वारणमिति शङ्कते — **ननु चेति**। समाधत्ते — **नेत्याहेति**। **पूर्वं पदं पूर्वपदमिति**। 'समानपदे' इत्यनुवर्तनादैकपद्याभावे विध्यर्थता नाशङ्क्येति भावः। एवं च 'पठ राम नामानि' इत्यादावपि णत्वनिषेधः सिध्यति। अन्यथा रामशब्दस्य समासप्रथमावयवत्वाभावान्नियमाप्रवृत्तौ णत्वं स्यात्। तदेवं स्वरेग्रहणं प्रत्याख्यातम्। यत्तूक्तम् 'एवं स्वरग्रहणे प्रत्याख्याते समानाधिकरणस्योपसंख्यानं न कर्तव्यम्, परस्य पराङ्गवद्भावे कृते विषयभेदाल्लक्षणस्यावर्तनात् पूर्वपराङ्गवद्भावस्य सिद्धत्वात्' इति। तन्न, 'देवदत्तस्य परशुना वृश्चन्' इत्यादौ व्यधिकरणस्य पराङ्गवद्भावापत्तेः। 'शोभनया दीर्घया ऋज्व्या तीक्ष्णया सूच्या सीव्यन्' इत्यादौ बहूनामपि समानाधिकरणानां पराङ्गवद्भावप्रसङ्गाच्च। तद्वचने स्थिते तु तत्सामर्थ्येनोक्तदोषद्वयवारणं भवति॥

प्राक् कडारात् समासः २. १. ३.

[२, ५६१–५६५]

(उद्द्योतनम्) नन्वसति प्राग्ग्रहणे 'कडारात् समासः' इत्युच्यमानेऽनन्वयः स्यात्, अत आह — **अत्रेति**। ननु तत्पुरुषादेः समाससंज्ञा कथं स्यात्, अत आह — **समास इति**। एकसंज्ञाधिकारात् समाससंज्ञायाः [8]संज्ञान्तरसमावेशः कथम्, अत आह — **अनवकाशत्वादिति**। ननु [9]स्वविषये निवर्तकाभावादनिवृत्तिः सिद्धा, अत आह — **समाससंज्ञाया इति**। नन्वधिकारसामर्थ्यादनिवृत्तिः स्यात्, अत आह — **अन्यथेति**। अनवकाशत्वात् संज्ञान्तरसमावेशशङ्कां निराह — **पर्याय इति**। प्रागवचनेऽपि[10] 'सत्याम्' इति कथं लभ्यते, तद्बोधकाभावात्। प्राग्ग्रहणस्याधिकार-

---

[1] पा. सू. ८. ४. १.
[2] महाभाष्यम् ८. ४. ३.
[3] 'पक्षान्तरम्' इत्यस्यानन्तरं 'तु' इति 'प' मातृकायामुपलभ्यते। 'तत्तु' इत्युचितं भाति।
[4] दुर्वचनं पक्षं — प.
[5] क्षुभ्नादिषु चेति सूत्रीयक्षुभ्नादिगणसूत्रमिदम्.
[6] पा. सू. ८. ४. ३.
[7] का. वा. २. १. १–११.
[8] 'संज्ञान्तर' इति नास्ति — अ.
[9] स्वविषयनिवर्तकाभावात् — अ.
[10] अपिशब्दो नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्योतकत्वं स्यात्, अत आह — **स्वरितत्वादेवेति**। आवृत्तौ लब्धमाह — **तेनेति** । संज्ञान्तरस्य कथमवयवसंज्ञात्वम्, समाससंज्ञाया अपि [1]प्रत्येकमेवाङ्गीकारात्, अत आह — **समासेति** । अनवकाशत्वकथनस्य प्रकृताक्षेपपरत्वमाह — **ततश्चेति**। [2]**यत्नमिति**। अवधिवचनरूपम् । [3]तस्यावकाशत्वं वक्तुं विग्रहमाह — **विस्पष्टमिति** । पटुरित्येतद्विशेषणस्य विस्पष्ट इति विग्रह उचितः, अत आह — **विस्पष्टादय इति**। पाटवविशेषणत्वे फलितमाह — **अत एवेति** । **तत्पुरुषेति** । [4]'विशेषणं विशेष्येण' इत्यनेन। नन्वत्र समास[5]विधायकाभावात् कथं समाससंज्ञा। न च [6]'सह सुपा' इति विधायकम्, अधिकारत्वेन विधायकत्वाभावात्, अत आह — [7]**यथा त्विति**। यथा चक्षुषा गृह्यते चाक्षुषं रूपम्, दृषदि पिष्टा दार्षदाः सक्तवः, इत्यादिसिद्धचर्थं [8]'शेषे' इति सूत्रमण्विधायकमधिकारश्च, तथास्याप्युभयरूपत्वमविरुद्धमित्यर्थः। **लक्षणं** स्वतन्त्रप्रत्ययविधायकम् । **पूर्वपदेति** । विस्पष्टादीनि पूर्वपदानि गुणवचनेषु परतः प्रकृतिस्वराणि भवन्ति। विस्पष्टशब्दो [9]'गतिरनन्तरः' इत्याद्युदात्तः। **वृद्धकुमारीति**। पुंसा सहासंप्रयोगादपत्याभावाद्वा कुमारी, वयसा वृद्धा। तस्या वरः, सा इन्द्रं प्रार्थयामास — मदीयाः पुत्राः सुवर्णपात्रेण चिरकालं भुञ्जीरन्निति। तत्र यथान्यथानुपपत्त्या संभोगापत्यसिद्धिस्तथात्र पूर्वपदस्य [10]समासावयवे रूढत्वात् तस्य प्रकृतिस्वरविधानानुपपत्त्या समाससिद्धेः [11]'सह सुपा' इत्येतन्न [12]लक्षणमित्यर्थः। ननु विस्पष्टपट्वादेः [13]सकाशात् काकतालीयादेः को विशेषः, [14]येन 'इदं तर्हि' इत्यादिना पृथगुपन्यासः, अत आह — **समासाच्चेति**। 'विस्पष्टादीनि' इत्यत्रार्थात् समासानुवादः, इह तु साक्षादिति विशेष इति भावः। तत्र [15]'अनेकमन्यपदार्थे' [16]इत्येव विशेषलक्षणं भविष्यति, अत आह — **इवार्थस्येति**। ननु मत्वर्थग्रहणं तत्र न कर्तव्यम्, कष्टं श्रितमनेनेत्यत्रानभिधानादेव बहुव्रीह्यभावात्, अत आह — **उपमानशब्दस्येति** । काकशब्दस्तदागमनसदृशे तालशब्दस्तत्पतनसदृशे [17]च वर्तत इत्यर्थः। **अनेनैवेति** । तत्र संज्ञान्तराभावात् समाससंज्ञायाः सोऽवकाश इति भावः। इवार्थविषयात् समासादिवार्थे छप्रत्यय इति [18]'समासाच्च' इति सूत्रार्थमुदाहरण उपपादयति — **तत्रेति** । काकतालीयशब्द इत्यर्थः। एकसमासवाच्यत्वात् 'एक इवार्थः' इत्युक्तम् । [19]**ज्ञापकेन** [20]'समासाच्च' इत्यनेन। ननु पुनाराजः' इत्यत्र तत्पुरुषानङ्गीकारे [21]'राजाहस्सखिभ्यः' इति टजभावात् कथं रूपसिद्धिः, अत आह — [22]**अत्रा-**

---

[1] प्रत्येकमेवाङ्गीकारोऽत आह — अ.
[2] यत्नेति — अ, इ, ऋ.
[3] विस्पष्टपट्वादेरित्यर्थः।
[4] पा. सू. २. १. ५७.
[5] विधायकत्वाभावात् — अ.
[6] पा. सू. २. १. ४.
[7] प्रदीपे 'यथा शेषे' इत्यत्र 'यथा तु शेषे' इत्यन्नंभट्टपाठ इति भाति।
[8] पा. सू. ४. २. ९२.
[9] पा. सू. ६. २. ४९.
[10] समासावयवरूढत्वात् — अ.
[11] पा. सू. २. १. ४.
[12] विधायकमित्यर्थः।
[13] 'सकाशात्' इत्येव 'अ, इ, ऋ' कोशेषु दृश्यते। 'अवकाशात्' इत्युचितं भाति।
[14] येनैवं तर्हीत्यादिना — ऋ; एवं तर्हीत्यादिना — अ.
[15] पा. सू. २. २. २४.
[16] इत्येवं शेषलक्षणं — अ.
[17] चकारो नास्ति — अ.
[18] पा. सू. ५. ३. १०६.
[19] प्रदीपे 'ज्ञापनेन समाससिद्धिः' इत्यत्र 'ज्ञापकेन समाससिद्धिः' इत्यन्नंभट्टपाठ इति भाति।
[20] पा. सू. ५. ३. १०६.
[21] पा. सू. ५. ४. ९१.
[22] प्रदीपे 'अजिति योगविभागेन' इत्यत्र 'अत्राजिति योगविभागेन' इत्यन्नंभट्टपाठ इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

जिति। [1]'अच् प्रत्यन्ववपूर्वात्' इत्यत्राजिति योगविभागेनेत्यर्थः। **रूपसिद्धि** [2]'नस्तद्धिते' इति टिलोपे सति। अचा रूपसिद्धिं निराह — **पुनर्गवीति**। 'पुनर्गवी' इत्यत्र केन तत्पुरुषः, अत आह — [3]**अत्रेति**। [4]'कुगतिप्रादयः' इत्यत्रत्यम् [5]'अव्ययं प्रवृद्धादिभिः' इति वार्तिकम्। [6]'अव्ययं प्रवृद्धादिभिः' इत्येवात्रापि तत्पुरुषसंज्ञा सिद्धा, अत आह — **विशेषेति**। गतिसंज्ञायां कः समासः, अत आह — **ततश्चेति**। तस्मिन् सति विशेषकार्यं किम्, अत आह — भाष्ये **गतीति**। गतेः कारकादुपपदाच्च परं कृदन्तं प्रकृतिस्वरमित्येतत् प्रकृते उपपादयति — **यत इति**। यत्-प्रत्ययान्तं नौशब्दवर्जं द्वयच्कमाद्युदात्तमिति सूत्रार्थः। घाञः [7]'अचो यत्' ''ईद्यति' गुणः, घेयम्। नन्वत्रापि स्वरविशेषसत्त्वात् 'इदं तर्हि' इत्ययुक्तम्, अत आह — **पुनःशब्दस्येति**। [8]'थाथ-घञ्क्ताजबित्रकणाम्' गतिकारकोपपदात् परेषां थाथाद्यन्तानामन्त उदात्तः। 'अवभृथः' इत्यादि। [10]'अवे भृञः' इति क्थन् प्रत्ययः। **समाससंज्ञा[याः]** केवलेत्यादिः। ननु गतिसंज्ञायामपि [11]'स्वरा-विशेष उक्तः, अत आह — **सत्यां त्विति**। **अनन्तरेति**। यत्र गतिसमासस्तत्रानन्तरस्य गतेः परमपि थाथादिस्वरं बाधित्वा [12]'गतिरनन्तरः' इति प्रकृतिस्वर एव यथा [13]स्यादित्येवमर्थानन्तर-ग्रहणसामर्थ्यादित्यर्थः। तथापि पुनश्शब्दस्य गतिसंज्ञायाः किं प्रयोजनमित्याशङ्क्य भाष्योक्ताष्ट-मिकनिघातः प्रयोजनमित्याह — **पुनश्शब्दस्येति**। **शेषेति**। [14]'अनुदात्तं पदमेकवर्जम्' इति वि-हितम्। गतौ परे गतिरनुदात्तः। उभयथापि [15]पुनश्शब्दस्यानुदात्तत्वमेवेति तदर्थं गतिसंज्ञा व्यर्थे-त्याहुः। ननु [16]'गतिश्च' इति सूत्रे स्वरार्थं 'पुनश्चनसौ छन्दसि गतिसंज्ञौ' इत्युक्तत्वात् 'यदि तन्नास्ति' इत्ययुक्तम्, अत आह — **छन्दसीति**। तस्मिन् कृतेऽपि पुनश्शब्दस्य गतिसंज्ञा वक्तव्ये-त्याह — **भाषायामिति**। **स्वरः** कृदुत्तरपदप्रकृतिस्वरः। ननु पुनरुत्स्यूतादौ वेदे थाथादिस्वर एव दृश्यते, न तु गतिप्रकृतिस्वरः, अत आह — **काठके त्विति**। उपलक्षणमिदम्, तैत्तिरीय-संहितायामपि तथैव पाठात्। [17]'प्रवृद्धादीनां च'[18] अन्तोदात्तः। [19]'सह'सूत्रभाष्यानुरोधेन सावकाश-त्वेऽपि समाससंज्ञायाः सर्वविषयत्वमाह — **असंयुक्तेति**। तर्ह्यवकाशनिरासः किमर्थः, अत आह — **न्यायेति**। अन्यथानुपपत्ति[20]रूपन्यायेत्यर्थः॥

[२, ५६१–५६५]

(रत्नप्रकाशः) 'समासः' इत्येवाधिकारः कर्तव्यः। आरम्भसामर्थ्यादव्ययीभावादिसंज्ञाभिः समावेशो भविष्यतीति मन्यमानः पृच्छति — **प्राग्वचनं किमर्थमिति**। प्राग्ग्रहणद्वारा 'प्राक् कडा-

---

[1] पा. सू. ५. ४. ७५.
[2] पा. सू. ६. ४. १४४.
[3] प्रदीपे 'तत्राव्ययम्' इत्यत्र 'अत्राव्ययम्' इत्यन्नं-भट्टपाठ इति ज्ञायते।
[4] पा. सू. २. २. १८.
[5] का. वा. २. २. १८–५.
[6] का. वा. २. २. १८–५.
[7] पा. सू. ३. १. ९७.
[8] पा. सू. ६. ४. ६५.
[9] पा. सू. ६. २. १४४.
[10] उणादिसूत्रम् १६८.
[11] स्वरविशेषो युक्तः — अ.
[12] पा. सू. ६. २. ४९.
[13] स्यादित्येवमर्थान्तिरग्रहण — अ.
[14] पा. सू. ६. १. १५८.
[15] पुनश्शब्दस्यानुदात्तमेवेति — अ.
[16] पा. सू. १. ४. ६०–२.
[17] पा. सू. ६. २. १४७.
[18] इति सूत्रेणेति भावः।
[19] पा. सू. २. १. ४.
[20] 'रूप' इति नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रात्' इत्यंशस्यायं प्रश्नः, प्राक्पदाभावे कडारपदस्याप्यानर्थक्यात्। [1]'प्रत्ययः' इत्यादौ ह्यवधिसमर्पकशब्दमन्तरेणैवेष्टसिद्धिर्भवति। एकसंज्ञाधिकारविहितत्वाद्विशेषसंज्ञाभिरव्ययीभावादिभिः समाससंज्ञाबाधनं मा भूदिति प्राग्ग्रहणं कृतमिति समाधत्ते — **प्राग्वचनमिति**। कथं प्राग्वचनमात्रेण विशेषसंज्ञाभिरबाधः सामान्यसंज्ञाया इति पृच्छति — **अथेति**। उत्तरमाह — **क्रियमाणे हीति**। **सत्यां समाससंज्ञायामिति**। [2]'कडाराः कर्मधारये' इत्यतः प्राग्विहितसंज्ञकाः समाससंज्ञाः स्युरिति प्रकृतसूत्रव्याख्यानात्। अत्र तासां संज्ञानां सामान्यतोऽनुवाद्यत्वेऽप्येतत्सूत्रार्थज्ञानोत्तरं विशेषरूपेणोत्तरसूत्रार्थज्ञानमिति तदुपपत्तिः। एतेन 'प्राक् कडारादित्युपादानसामर्थ्यात् प्राग्ग्रहणमावर्तते। तेन प्राक्समाससंज्ञका भवन्ति, समासाः सन्तोऽव्ययीभावसंज्ञका इति समावेशः सिध्यति' इति निरस्तम्। तादृशवाक्यभेदेन व्याख्याने मानप्रयोजनयोरभावात्। प्रतिसूत्रं समासविधानार्थं वाक्यभेदाश्रयणेऽत्यन्तगौरवात्, तद्गौरवाभ्युपगमे त्वस्याधिकारत्वेऽपि प्राक्कडाराच्छब्दसामर्थ्येनेष्टसिद्धेश्च। **अवयवसंज्ञा इति**। समाससंज्ञकानां यः समुदायस्तदवयवानां संज्ञा इत्यर्थः। शङ्कते — **समाससंज्ञापीति**। **अनवकाशेति**। अव्ययीभावादि[3]विशेषसंज्ञाविषय एव तस्या आरम्भादिति भावः। आचार्यदेशीयः परिहरति — **सावकाशेति**। **विस्पष्टादीन्यवकाश इति**। [4]'सह सुपा' इत्युत्तरसूत्रेण विस्पष्टादीनां पट्वादिभिः सह समाससंज्ञा विधीयते। तस्य च समासस्य कापि विशेषसंज्ञा न प्रवर्तत इति भावः। आक्षेप्ता परिहरति — **नैषोऽस्त्यवकाश इति**। **एषा** वक्ष्यमाणा। **शैलीति**। शीले भवा शैली, अभिप्रायः, संमतिरिति यावत्। का सेत्यत आह — **येनैवेति**। [5]अनेन समस्तज्ञापकविषयव्याप्तिप्रदर्शनं क्रियते। **अवयवकार्यमिति**। विशेषकार्यमित्यर्थः। **समुदायकार्यमिति**। सामान्यकार्यमित्यर्थः। तद्यथा — [6]'ङमो ह्रस्वादचि ङमुण् नित्यम्' इति नित्यग्रहणघटितेन विशेषकार्यं ङमुडागमो भवति। तेनैव [7]'संज्ञापूर्वको विधिरनित्यः' इति संज्ञापूर्वकविधिमात्रस्य सामान्यतोऽनित्यत्वं भवति। एवं सर्वत्र ज्ञापकस्थले ऊहनीयम्। व्याप्तिमुक्त्वा प्रकृतोपयोग्याह — **येनैवात्रेति**। केनात्रावयवकार्यं भवतीत्यत आह — **विस्पष्टादीनि गुणवचनेष्वितीति**। अनेन हि विस्पष्टादीनां पूर्वपदरूपाणां पट्वादिषु गुणवचनेषु परतः प्रकृतिस्वरो विधीयते। पूर्वपदं च समासपूर्वावयवो[8] भवतीति समुदायस्य समाससंज्ञापि तेनैव ज्ञाप्यत इति भावः। वस्तुतस्तु सिद्धान्ते मयूरव्यंसकादेराकृतिगणत्वादेवैवंजातीयकास्तत्पुरुषास्तत्र सन्त एव समाससंज्ञा भवन्ति। विशेषसंज्ञाशून्यस्य समाससंज्ञा नेति तत्र तत्र भगवतैव वक्ष्यमाणत्वात्। [9]'ओरावश्यके' इति सूत्रे विस्पष्टादिसाधारण्येनावश्यादेर्लाव्यादिना मयूरव्यंसकादित्वात् [10]समास इति स्पष्टमेव वक्ष्यमाणत्वाच्च। तदेवं विस्पष्टादीनां तावदुत्तरसूत्रेण समाससंज्ञा न विधेयेति स्थिते काकतालादीनां तर्हि तेन समाससंज्ञा विधेयेति सावकाशा समाससंज्ञेत्याशयेनाह — **इदं तर्हीति**। पूर्वोक्त एवात्रापि परिहार इत्याह — **अत्रापीति**। **समासाच्चेति**। समासाच्छप्रत्ययविधानसामर्थ्यात् काकतालादीनां समाससंज्ञा ज्ञापयितुं शक्यत इति भावः। सिद्धान्ते तु काकशब्दः काकमरणलक्षकः, तालशब्दस्तालपतनलक्षकः, तयोर्द्वन्द्वः। तत इवार्थे छः। काक-

---

[1] पा. सू. ३. १. १.

[2] पा. सू. २. २. ३८.

[3] 'विशेष' इति नास्ति — प.

[4] पा. सू. २. १. ४.

[5] अनेकसमस्त — ब.

[6] पा. सू. ८. ३. ३२.

[7] परिभाषा ९४.

[8] 'पूर्वावयवः' इत्यस्यानन्तरं 'सः' इत्यधिकम् — प.

[9] पा. सू. ३. १. १२५.

[10] 'समास इति' इत्यादि 'उत्तरसूत्रेण' इत्यन्तं नास्ति — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तालयोरिव काकतालीयमिति। एतेन "विशेषलक्षणाभावात् [1]'सह सुपा' इत्यनेनैव समासः कार्यः" इति निरस्तम्। विशेषसंज्ञाशून्यस्य समाससंज्ञा नेति सिद्धान्तविरोधात्। [2]'समासाच्च तद्विषयात्' इति सूत्रविषये यदुक्तमत्र कैयटेन तत् तत्सूत्रार्थाज्ञानविजृम्भितमिति स्पष्टमेव। तत्सूत्रार्थनिर्णयस्तत्रैव करिष्यते। **अवश्यमिति**। 'पुनाराजः' इत्यस्य [3]'अच् प्रत्यन्वव' इत्यत्राजिति योगविभागेन पद्मनाभवत् सिद्धावपि 'पुनर्गवी' इत्यत्र ङीपोऽसिद्धेरिति भावः। **तत्पुरुषसंज्ञा वक्तव्येति**। तत्पुरुषसंज्ञार्थं मयूरव्यंसकादित्वमाश्रयणीयमिति भावः। **गतिसंज्ञा वक्तव्येति**। [4]'पुनश्चनसौ छन्दसि' इति वार्तिकमाश्रयणीयमिति भावः। **यदि तन्नास्तीति**। तदापूर्वं[5] वचनं कर्तव्यम्, अस्त्येव तदिति शेषः। तदेवं समाससंज्ञाया अपि[6] निरवकाशत्वे व्यवस्थापिते विशेषसंज्ञाभिः सह यौगपद्याय प्राग्ग्रहणं कर्तव्यमिति समाधत्ते — **एवमपीति**। समाससंज्ञाया निरवकाशत्वेऽपीत्यर्थः। **पर्यायः प्रसज्येतेति**। [7]एकैव संज्ञेति नियमादिति भावः॥

सह सुपा २. १. ४.

[२, ५६५–५६९]

(उद्द्योतनम्) सहार्थलाभाय सहग्रहणमावश्यकमिति प्रश्नायोगः, अत आह — **सुपेति**। ननु सहार्थ[8]लाभादेवैकैकस्य न भविष्यति, अत आह — **यथेति**। **एकेति**। सहग्रहणसामर्थ्यान्मिलितयोरेका संज्ञेत्यर्थः। ननु कथं दोषाभावः, प्रत्येकं संज्ञापक्षे समस्यमानपदस्य [9]'अप्रत्ययः' इति पर्युदस्तप्रातिपदिकसंज्ञाविध्यर्थं समासग्रहणं स्यादिति [10]वाक्यनिवृत्तिर्न स्यात्, अत आह — **कृत्तद्धितेति**। **अन्यथा** एकशेषानङ्गीकारे। **एकशेषे त्विति**। समुदाये वाक्यपरिसमाप्तिराश्रीयत इति भावः। **समूहस्येति**। तस्य प्रत्ययान्तत्वाभावादर्थवत्त्वाच्च[11] संज्ञाप्राप्तेर्नियमार्थो विधिः संपद्यत इत्यर्थः। ननु प्रत्येकसंज्ञापक्षे [12]'समासाच्च' इति छप्रत्ययः प्रत्येकं स्यात्, अत आह — **समासाच्चेति**। **प्रातिपदिकेति**। [13]तथा च समुदायस्यैव प्रातिपदिकत्वं नावयवस्येति भावः। ननु [14]समूहस्य प्रातिपदिकसंज्ञायां सुपो लुकि [15]'न ङिसंबुद्ध्योः' इति निषेधाल्लिङ्गात् प्रत्ययलक्षणेन [16]'अप्रत्ययः' इति निषेधाभावादवयवस्यापि प्रातिपदिकत्वात् समासत्वाच्च प्रातिपदिकाधिकारे सत्यप्येकैकस्मात् छः स्यात्, अत आह — **अनभिधानाद्वेति**। **ऋचपाद इति**। [17]'ऋक्पूः' इत्यकारेण समासान्तेनेत्यर्थः। **स्वरद्वयेति**। पदद्वयस्यापि प्रत्येकं समासत्वादुभयोरपि समासान्तोदात्तत्वं स्यादित्यर्थः। प्रत्येकवाक्यपरिसमाप्तिन्यायं निराह — **एकार्थीभाव इति**। **तस्यैव** समुदायस्यैव। **संस्कार्यत्वात्** समास-

---

[1] पा. सू. २. १. ४.
[2] पा. सू. ५. ३. १०६.
[3] पा. सू. ५. ४. ७५.
[4] का. वा. १. ४. ६०–२.
[5] अपूर्वमिति छेदः।
[6] अपिशब्दो नास्ति — प.
[7] एकैकसंज्ञेति — ब.
[8] लाभादेकैकस्य — अ.
[9] पा. सू. १. २. ४५.
[10] वाक्यव्यावृत्तिः — इ, ऋ.
[11] अर्थवत्त्वाभावाच्च — अ.
[12] पा. सू. ५. ३. १०६.
[13] 'तथा च' इति नास्ति — अ.
[14] समुदायस्य — अ.
[15] पा. सू. ८. २. ८.
[16] पा. सू. १. २. ४५.
[17] पा. सू. ५. ४. ७४.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संज्ञयेत्यादिः। [१]'प्रधानाप्रधानयोः' इति न्यायादपि समुदायस्यैव संज्ञेत्याह — **प्राधान्यादिति** । 'समुदायावयवसंनिधौ समुदाये कार्यसंप्रत्ययः' इति न्यायान्तरमाह — **समुदायस्यैवेति**। **द्विर्वचनवदिति**। [२]'एकाचो द्वे प्रथमस्य' इत्यत्रैकाच्[३]समुदायस्यैव द्वित्वम्, नावयवस्य, अन्यथा 'अनेनिजुः' इत्यत्र निमात्रस्य द्वित्वे जकारेण व्यवधानादभ्यस्ताज्जुस् [४]न स्यात्। **अन्वर्थेति**। समस्यते संबध्यते एकमन्येनेति समासः। संबन्धश्च द्विष्ठ इति नैकस्य संज्ञा। **पक्षद्वये** समुदायप्रत्येकग्रहणपक्षद्वये। **सामर्थ्यात्** [५]प्रयोजनवशात्। **क्वचिदिति**। वृद्धिगुणयोः प्रत्येकपक्षः, समासे समुदायपक्ष इत्यर्थः। अत्र समुदायग्रहणे हेतुमाह — **तत्रेति** । **संयोगेति**। [६]तत्रान्वर्थत्वात् समुदायस्यैव संज्ञा। [७]**पूर्वोक्तेति**। 'एकार्थीभावे' इत्यादि 'अन्वर्थसंज्ञाविज्ञानाद्वा' इत्यन्तोक्तन्यायेन। 'यदि' इति भाष्यं व्यत्यासेन [८]योजयति — **अथेति**। मन्दबुद्ध्यनुग्रहायेति यावत्। लक्ष्यदर्शनादीत्यादिना [९]'मालादीनां च' इति ज्ञापकसंग्रहः। **सामर्थ्यात्** न्यायात्। अङ्गशब्दस्य शेषपरत्वं निरस्यति — **योगावयव इति** । अतिप्रसङ्गं निराह — **योगविभागश्चेति**। समास[१०]संज्ञायां प्रयोजनमाह — **तत्रेति** । **शाकलेति** । [११]'सिन्नित्यसमासयोः शाकलप्रतिषेधः' इत्यनेन। स्वरोऽपि प्रयोजनं स्यात्, अत आह — **समासेति**। **निघातेनेति**। परत्वादिति भावः। [१२]तिङन्तस्य निघाते सत्यवशिष्टस्य स्वरमाह — **तत्रेति**। तिङन्तस्य निघाते सतीत्यर्थः। **विशब्द इति**। [१३]'गतिरनन्तरः' इत्यनेन। **उदात्तेति**। उदात्तस्थानिकः स्वरितस्थानिकश्च यो यण् ततः परस्यानुदात्तस्य स्वरित इति सूत्रार्थः। एतन्मतदूषणपूर्वकं मतान्तरमाह — **एवं त्विति** । शाकलप्रतिषेधमात्रस्य प्रतिषेधे सति। समासेऽसमासे च [१४]'तिङ्ङतिङः' इति निघातः। तस्मिन् सत्येव समासानन्तरं समासान्तोदात्तत्वं सतिशिष्टम्। तिङन्तस्य समासप्रातिपदिकत्वे स्वाद्युत्पत्तिशङ्कां वारयति — **तत्रेति**। मतान्तरमाह – **अन्ये त्विति** । प्रातिपदिकार्थसूत्रे वचनग्रहणाद् यथा 'एकः' इत्यादौ प्रातिपदिकेनोक्तेऽप्येकत्वादौ विभक्तिस्तथा तिङोक्तेऽपि प्रथमा [१५]स्यादेवेत्यर्थः। सोः श्रवणं निराह — **तस्येति**। अस्मिन्मते द्विवचनबहुवचनान्ते दोषः स्यात्। न च तेन समासो नास्तीति वाच्यम्, [१६]'यत् परियन्ति' इत्यनेन [१७]तिङन्तस्य समासदर्शनात्। तस्मात् पूर्वपरिहार एव सम्यगिति केचित्। तिङन्तात् स्वाद्युत्पत्त्यङ्गीकारे प्रयोजनमाह — **अत एवेति** । [१८]'आम एकान्तरमामन्त्रितमनन्तिके'। आमः परमेकपदान्तरमामन्त्रितमनन्तिके नानुदात्तम्। आम् पचसि देवदत्त। एकान्तरं किम्। आम् प्रपचसि देवदत्त। **तिङन्तनिघातेति**। 'अनुप्राविशत्' इति यथाश्रुतभाष्यस्य प्रयोजनानभिधानात् समासान्तोदात्तत्ववादिनां पक्ष एव सम्यगित्याहुः। ननु द्वितीया

---

[१] परिभाषा १०६.

[२] पा. सू. ६. १. १.

[३] कर्मधारयसमासो बोध्यः। एकाज्रूपसमुदायस्येत्यर्थः।

[४] 'न' इति नास्ति — अ.

[५] प्रयोजनवचनात् — अ.

[६] 'तत्र' इति नास्ति — अ.

[७] प्रदीपे 'पूर्वोक्तेनैव न्यायेन' इत्यत्र 'पूर्वोक्तन्यायेन' इति पाठोऽन्नंभट्टस्येति भाति।

[८] योजनीयमिति — अ.

[९] पा. सू. ६. २. ८८.

[१०] संज्ञायाः — ऋ.

[११] का. वा. ६. १. १२७–१.

[१२] तिङन्तनिघाते — अ.

[१३] 'उपसर्गाश्चाभिवर्जम्' इत्यनेन इति युक्तम्, क्तान्तोत्तरपदकत्व एवानन्तरगतेः प्रकृतिस्वरविधानात् अत्र च तिङन्तोत्तरपदकत्वात्।

[१४] पा. सू. ८. १. २८.

[१५] स्यादित्यर्थः — अ.

[१६] कुगतिप्रादय इति सूत्रे भाष्योदाहरणेन समासप्रदर्शनादित्यर्थः।

[१७] बहुवचनान्तस्येत्यर्थो विवक्षितः।

[१८] पा. सू. ८. १. ५५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्रितादिभिरित्यादावतिप्रसङ्गाभावादधिकारस्य किं प्रयोजनम्, अत आह — **देवदत्त इति**। न तिङेति [1]तत्र नास्तीति तिङन्तेनापि समासप्रसङ्गादिति भावः। [2]सर्वतिङन्तेन समासव्यावृत्तये 'कतिपय' इत्युक्तम्। **एतच्च** तिङन्तमात्रविषयत्वम्। योगविभागं विनापि 'सुप् सुपा' इत्येव समर्थसर्वसुवन्तसमाससिद्धेर्योगविभागस्तिङमात्रविषय एवेत्यर्थः। ननु पुनश्शब्दस्य गतिसंज्ञकत्वाद् गतिसमासः सिद्ध एवेति न सामान्यलक्षणविषयत्वम्, अत आह — **पुनश्शब्दस्येति**। **असत्यामिति**। [3]'पुनश्चनसौ' इति गतिसंज्ञा 'पुनराधेयम्' इत्यादावेव, न सर्वत्र। तथा सति 'पुनरुत्स्यूतम्' इत्यत्र [4]'गतिरनन्तरः' इति स्वरप्रसङ्गादिति भावः। **परेति**। परपदस्यादिरुदात्तः, चित्पतिः। [5]अत्र समासान्तोदात्त एव दृश्यते, नोत्तरपदाद्युदात्तत्वम्, अत आह — **अथवेति**। गतित्वे स्वर[6]व्यत्ययोऽङ्गीकार्यः, तदपेक्षया गतित्वाभाव एवाङ्गीकारार्ह इति भावः। **कार्यान्तरम्** विभक्त्यलोपपूर्वपदप्रकृतिस्वरौ। ननु समासे प्रातिपदिकत्वात् सुबुत्पद्येत, अत आह — **समासादिति**। **अव्ययादिति**। [7]'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इति वचनात् 'परमोच्चैः' इत्यादिवदिवान्तस्याप्यव्ययत्वादिति भावः॥

[२, ५६५–५६९]

(**रत्नप्रकाशः**) **सहवचनं किमर्थमिति**। सुबित्यनुवृत्त्यैवाव्ययं सुप् [8]'चाव्ययीभावसंज्ञमित्यादिसिद्धेः सूत्रमेवेदं किमर्थमिति भावः। एतेन "सुपेति तृतीया सहार्थमाक्षिपति। [9]'वृद्धो यूना' इति यथेति प्रश्नः" इति निरस्तम्। [10]'वृद्धो यूना' इत्यत्र सहशब्दाध्याहारेण वाक्यार्थो वर्णनीयो भविष्यतीत्याशयेन तत्र सहशब्दप्रयोगस्याकृतत्वेऽपि तदनुरोधेन [11]'सहयुक्तेऽप्रधाने' इति सूत्रानुसारिप्रयोगस्यासंदिग्धस्य निराकरणानौचित्यात्। कथंचित् तृतीयायाः सहाद्याक्षेपकत्वे आश्रिते तेनैव सिद्धौ समाधानपर[12]भाष्यस्यात्रत्यस्य [13]'सर्वस्यासंगतत्वापत्तेश्च। **एकैकस्येति**। गुणवृद्धिसंज्ञावदिति शेषः। एतेन 'यथा पुत्रेण सहागत इति द्वयोरपि पितापुत्रयोरागमनेन संबन्धः' इति निरस्तम्। दृष्टान्ते पितुरेवागतशब्देनान्वयेन दार्ष्टान्तिके समासशब्देन प्रत्येकमन्वयस्यापाद्यत्वेन तयोर्वैषम्यात्। पुत्रस्य सहार्थविशेषणस्य सहार्थविशेष्यपित्रन्वितागमने संबन्धासंभवेन 'पितापुत्रयोरागमनेन संबन्धः' इत्युक्तेर्मिथ्याप्रलापत्वात्। स्वमौर्ख्यपरिकल्पिताक्षेपाशयानुसारेण भाष्यकारसंमतगुणवृद्धिसंज्ञादृष्टान्तपरित्यागस्यानुचितत्वाच्च। **ऋक्पाद इति**। [14]'ऋक्पूरब्धूः' इति समासान्तेऽकारे 'ऋचपादः' इति रूपं स्वरद्वयं च स्यादिति भावः। **राजाश्व इति**। यद्यप्यत्रापि समासान्तः प्राप्नोति, तथापि समासान्तकृतरूपभेदाभावात् स्वरद्वयमेव दोषः। दोषोपलक्षणमेतत्। तेन [15]'कृत्तद्धितसमासाश्च' इति समासग्रहणस्य विभक्त्यन्तस्याप्राप्तप्रातिपदिकसंज्ञाविधानेन चारितार्थ्यान्नियमार्थत्वाभावे सति वाक्यस्य प्रातिपदिकसंज्ञा स्यात्। तथा [16]'समासाच्च तद्विषयात्' इति

---

[1] तत्रापि नास्ति तिङन्तेनापि — अ, इ, ऋ.
[2] 'सर्वतिङन्तेन' इति नास्ति — अ.
[3] का. वा. १. ४. ६०–२.
[4] पा. सू. ६. २. ४९.
[5] पुनरुत्स्यूतमित्यत्रेत्यर्थः।
[6] व्यत्ययाङ्गीकारः — अ.
[7] का. वा. १. १. ७२–८.
[8] वाव्ययसंज्ञमित्यादि — ब.
[9] पा. सू. १. २. ६५.
[10] पा. सू. १. २. ६५.
[11] पा. सू. २. ३. १९.
[12] भाष्यस्यात्र तस्य — प, ब.
[13] 'सर्वस्य' इति नास्ति — ब.
[14] पा. सू. ५. ४. ७४.
[15] पा. सू. १. २. ४६.
[16] पा. सू. ५. ३. १०६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

छे प्रत्येकमुत्पन्ने सति 'काकीयतालीयम्' इत्यादि स्यादित्याद्युन्नेयम्। एतेन "[1]'कृत्तद्धितसमासाश्च' इत्यत्र सूत्रे समासश्च समासश्चेत्येकशेष आश्रयिष्यते वाक्यस्य प्रातिपदिकसंज्ञाव्यावृत्त्यर्थम्। अन्यथा प्रत्ययान्तत्वादेकैकस्य समासस्य विध्यर्थं समासग्रहणं स्यात्। एकशेषे तु समाससमूहस्य संज्ञाविधिर्नियमार्थो भविष्यतीति न कश्चिद्दोषो भवति" इति निरस्तम्। एकशेषनिर्देशे कृते समुदाये कार्यं भवतीत्यत्र मानाभावात्। [2]'दाधा घ्वदाप्' इत्यत्रैकशेषनिर्दिष्टानां प्रत्येकं संज्ञादर्शनात्। राजपुरुष ब्राह्मणग्रामं गच्छेत्यादौ समासचतुष्टयादेरपि सह प्रातिपदिकसंज्ञापत्तेर्विधिनियमसंभवे विधेर्बलीयस्त्वाच्च। एतेन "[3]'समासाच्च तद्विषयात्' इत्यत्र प्रातिपदिकाधिकारात् समाससमूहस्य च प्रातिपदिकत्वात् समासादित्येकवचनं न विवक्ष्यते। अनभिधानाद्वैकस्माच्छप्रत्ययो न भविष्यति" इत्यपि निरस्तम्। समाससमुदायस्य प्रातिपदिकत्वेऽप्यवयवस्यापि प्रातिपदिकत्वानपायात्। अगतिकगतिभूतानभिधानाश्रयेण निर्णायकवचननिरासानौचित्यात्। अन्यथा [4]कृत्तद्धितसमासानामभिधानलक्षणत्वादेव विशेषे व्यवस्थितिसंभवेन तद्विशेषशास्त्रानर्थक्यापत्तेश्च। 'प्रत्येकं वाक्यपरिसमाप्तिः' इत्यादिः 'नार्थः सहग्रहणेन' इत्यन्तो ग्रन्थो वृद्धिसंज्ञासूत्र एव व्याख्यातः। यत्तु 'एकार्थीभावे समासविधानात् समुदायस्य विशिष्टार्थाभिधायित्वात् तस्यैव संस्कार्यत्वात् प्राधान्यात् तत्परतन्त्रत्वादवयवानामप्रधानत्वात् समुदायद्विर्वचनवत् समाससंज्ञा भविष्यति' इति। तत्तुच्छम्, वाक्यस्यैव विशिष्टार्थबोधकत्वेन तस्यैव संस्कार्यत्वात् प्राधान्यात् सर्वासां संज्ञानां वाक्यस्यैव प्रसङ्गात्। [5]तत्तत्सूत्रे संज्ञिसमर्पकशब्देनोपस्थापितस्यैव तत्र तत्संज्ञाविधौ प्राधान्याश्रये तु प्रत्येकं सुबन्तस्य संज्ञाप्रसङ्गेन तद्वारणाय सहग्रहणस्यावश्यकत्वाच्च। यदप्युक्तम् 'अन्वर्थसंज्ञा[6]विज्ञानाद्वा समुदायस्य संज्ञा भविष्यति' इति। तदपि न, अन्वर्थसंज्ञाश्रयणेऽपि समसनप्रयुक्तसुब्लोपस्य प्रत्येकं संज्ञापक्षेऽपि संभवात्। [7]'तुष्यतु दुर्जनः' इति न्यायेन सहग्रहणं विना समुदायस्य समाससंज्ञामभ्युपगम्य प्रकृतसूत्रस्यान्यार्थकतामाह — **एवं तर्हीति**। **सहग्रहणं करोतीति**। सहग्रहणघटितं सूत्रं करोतीत्यर्थः। **योगाङ्गमिति**। विभागार्हाङ्गकयोगो यथा विज्ञायेतेत्यर्थः। **सति [च] योगाङ्ग इति**। सति च तादृशे योग इत्यर्थः। **केनेति**। सहशब्दाक्षिप्ततृतीयान्तपदवाच्यविषयकः प्रश्नः। **समर्थेनेति**। सहशब्दस्य पदत्वात् तत्संबन्धिनि संज्ञाविधौ समर्थपरिभाषोपस्थानात् समर्थशब्द एव तृतीयान्तोऽध्याहार्य इति भावः। **अनुव्यचलदिति**। योगविभागस्येष्टसिद्ध्यर्थत्वात् तिङन्तमेवात्र समर्थं गृह्यते। तथा च [8]'कुगतिप्रादयः' इति सूत्र[9]गत [10]'उदात्तवता गतिमता च तिङाव्ययं समस्यत इति वाच्यम्' इति वार्तिकार्थः संगृहीत इति भावः। एतेन 'सुबिति संख्याया विवक्षितत्वात् पूर्वं वेः समासः, पश्चादनोः' इति निरस्तम्। अनुवीत्युपसर्गसमुदायस्य सुबन्तत्वाभावादेव तिङन्तेन समासाप्रसक्त्यैकत्वविवक्षोक्तेरानर्थक्यात्। अनोर्व्यचलच्छब्देन समासोपपत्तौ समासद्वयाश्रयणे मानाभावाच्च। यदप्युक्तम् "समासान्तोदात्तत्वं न भवति, [11]'तिङ्ङतिङः' इति निघातेन बाधितत्वात्" इति। तदपि न, समाससंज्ञानिरपेक्षस्य निघातस्य

---

[1] पा. सू. १. २. ४६.

[2] पा. सू. १. १. २०.

[3] पा. सू. ५. ३. १०६.

[4] अभिधानलक्षणाः कृत्तद्धितसमासा इति 'अकर्तरि च कारके संज्ञायाम्' इति सूत्रे भाष्योक्तत्वादित्याशयः।

[5] तत्र सूत्रे — ब.

[6] विधानाद्वा — ब.

[7] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

[8] पा. सू. २. २. १८.

[9] गतेत्येतद् वार्तिकेत्यस्य विशेषणम्।

[10] का. वा. २. २. १८–८.

[11] पा. सू. ८. १. २८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पूर्वमेव प्रवृत्तत्वेन सतिशिष्टस्य समास[1]स्वरस्यैवौचित्यात्। अत एव "तत्रानोः [2]'गतिर्गतौ' इति निघातः। विशब्द उदात्तः। [3]'उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्य' इत्यकारः स्वरितः" इत्यपि निरस्तम्। सतिशिष्टसमासस्वरविषये [4]"निपाता आद्युदात्ताः' [5]'उपसर्गाश्चाभिवर्जम्' इति स्वरस्य व्यवस्थित्यसंभवात्। यदप्युक्तम् 'एवं चानुप्राविशदिति प्रयोजनाभावाद् भाष्यकारेणोदाहरणमवक्तव्यं स्यात्' इति। तदपि न, [6]'तिङ्ङतिङः' इति निघातस्य समासान्तोदात्तत्वबाधकत्वमभ्युपगच्छतां मते 'अनुप्राविशत्' इत्यत्रापि प्राशब्दस्योदात्तत्वसिद्ध्या योजनात्तदुदाहरणस्य निष्प्रयोजनत्वासंभवात्। यदप्युक्तम् 'तिङैकत्वस्योक्तत्वेन प्रातिपदिकत्वेऽपि सुबनुत्पत्तिः' इति। तदपि न, हुंफडादिभ्य इव ततोऽपि सुबुत्पत्तेर्दुर्वारत्वात्। यदप्युक्तम् 'वचनग्रहणादुक्तेष्वप्येकत्वादिषु प्रथमा स्यात्। केवलायाश्च प्रकृतेः प्रयोगाभावाद् भवितव्यमत्र प्रथमैकवचनेन। तस्य तु हल्ङ्यादिलोपः क्रियते' इति। तदपि न, वचनग्रहणात् संख्याशब्देभ्य एकद्वित्र्यादिभ्यः प्रथमाविधानेऽप्यव्ययेभ्य इवैतादृशसमासेभ्योऽपि तेन प्रथमाविधानासंभवात्। 'अनुव्यचलाव, अनुव्यचलाम' इत्यादौ हल्ङ्यादिलोपासंभवाच्च। ननु योगविभागस्येष्टसिद्ध्यर्थत्वात् 'अनुव्यचलाव' इत्यादौ समाससंज्ञा न भविष्यतीति चेन्न, [7]'उदात्तवता गतिमता च तिङाव्ययं समस्यते' इति वार्तिकविषयसंग्रहायात्र योगविभागस्य कृतत्वेन तद्वचनविषये तत्रापि समाससंज्ञाया आश्रयितुमुचितत्वात्। वस्तुतस्तु विशेषसंज्ञाशून्यस्य समाससंज्ञा नेत्येव भगवतोऽभिमतम्। [8]तथा च [9]'उदात्तवता गतिमता च तिङाव्ययं समस्यते स तत्पुरुषसंज्ञकः' इत्येतदर्थकं वार्तिकमेवाश्रयणीयम्। तस्मिन्नाश्रिते च 'अनुव्यचलत्' इत्यादौ समासान्तोदात्तत्वापवादं [10]'तत्पुरुषे तुल्यार्थ' इति पूर्वपदप्रकृतिस्वरं बाधित्वा परत्वात् [11]'गतिर्गतौ' इत्याष्टमिके निघाते सत्युदात्तस्वरितान्यतरविषयकपूर्वपदप्रकृति[12]स्वराप्रवृत्तौ चौत्सर्गिकसमासान्तोदात्तत्वमेव भवति। 'यत् परियन्ति' इत्यादौ तु पूर्वपदप्रकृतिस्वर एवेति। [13]द्विविधस्याप्येतस्य समासस्य स्वरादेराकृतिगणत्वादव्ययत्वे [14]'अव्ययादाप्सुपः' इति सुपो लुगिति सर्वमनवद्यम्। 'अनुव्यहन्' इत्यादौ नलोपो न भवति, 'प्रतान्' इति स्वरादौ नलोपमकुर्वता सूत्रकारेणाव्ययानां नलोपाभावस्येष्टत्वेन ज्ञापितत्वात्। **अधिकारश्च लक्षणं चेति**। अधिकार इत्यत्रैव तात्पर्यम्, इतरांशस्य पूर्वसूत्र एव निराकृतत्वात्। 'पुनरुत्स्यूतम्' इत्यादेः [15]'अव्ययं प्रवृद्धादिभिः' इति कुगतिसूत्रगतेन वार्तिकेन सिद्धत्वाच्च। **इवेन विभक्त्यलोप इति**। इदमपि कुगतिसूत्रगतं वार्तिकमेव। एवं च 'सह सुपा' इत्यधिकारसूत्रमेवेति भगवतोऽभिमतम्, अस्य तु न किंचिद् बाधकमिति स्थितम्। 'सह सुपा' इत्यधिकारफलं तु तिङन्तेन सहाव्ययीभावस्य [16]'विशेषणं विशेष्येण' इति तत्पुरुषस्य च वारणम्। एतेन 'देवदत्तः पचतीति विशेषणसमासनिवृत्त्यर्थोऽधिकारोऽतिङित्यादावुत्तरपदानुपादानादुत्तरपदोपस्थापनार्थश्च' इति निरस्तम्। आख्यातस्य धात्वर्थविशेष्यकत्वमभ्युपगच्छतां मते क्रियावाचकेन तिङन्तेन सह देवदत्तादिकर्तृवाचकस्यसामाना-

---

[1] स्वरस्यैवोचितत्वात् — प.

[2] पा. सू. ८. १. ७०.

[3] पा. सू. ८. २. ४.

[4] फिट्सूत्रम् ८०.

[5] फिट्सूत्रम् ८१.

[6] पा. सू. ८. १. २८.

[7] का. वा. २. २. १८–८.

[8] यथा च — व.

[9] का. वा. २. २. १८–८.

[10] पा. सू. ६. २. २.

[11] पा. सू. ८. १. ७०.

[12] स्वराप्रवृत्तेश्चौत्सर्गिक — प.

[13] सहेति योगविभागलब्धस्य, उदात्तवतेति वार्तिकलब्धस्य चेत्यर्थः।

[14] पा. सू. २. ४. ८२.

[15] का. वा. २. २. १८–५.

[16] पा. सू. २. १. ५७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धिकरण्याभावादेव विशेषणसमासस्याप्रसक्तेः। [1]'उपपदमतिङ्' इत्यत्र सुबुत्पत्तेः पूर्वमेव कृदन्तेन समासस्येष्टत्वेन सुपेत्यस्य तत्रोत्तरपदोपस्थापकत्वासंभवात्। अन्यथातिङ्ग्रहणानर्थक्याच्च। **वाससी इवेति**। वासस्शब्दः [2]'वसेर्णित्' इत्यसुन्नन्त आद्युदात्तः। अस्यापि समासस्याव्ययत्वात् ततः सुपो लुक्। **कन्ये इवेति**। [3]'कन्याराजन्यमनुष्याणामन्तः' इति फिट्सूत्रेणान्तस्वरितः कन्याशब्दः॥

अव्ययीभावः १. २. ५.

[२, ५६९]

(उद्द्योतनम्) बृहत्संज्ञयाव्ययकार्यस्य [4]कथं लाभ इति शङ्कानिरासाय[5] 'अनव्ययम्' इति भाष्यम्। तेन कथं तल्लाभः, अत आह — **अव्ययेति**। 'ब्राह्मणीभवति क्षत्रियः' [6]इत्यत्रैवानव्ययेऽव्ययशब्दस्तत्कार्यलक्षणया प्रवर्तत इत्यर्थः। **इहेति**। अत्रैव सूत्रे तत्परिगणनं कर्तव्यमित्यर्थः। अत्रापि न कर्तव्यमित्याह — **अन्वर्थत्वेन वेति**। [7]लुगादित्रयार्थमेवान्वर्थसंज्ञाकरणमिति भावः। अन्वर्थसंज्ञया पूर्वपदार्थप्राधान्यं सूच्यत इति केचित्। तन्निरस्यति — **पूर्वपदेति**। असूचने प्रायिकत्वं हेतुः। अन्वर्थसंज्ञयापि[8] तन्न सूच्यत इत्यन्वयः। अपिना युक्तिशून्यत्वसमुच्चयः। प्रायिकत्वमेवाह — **सूपेति**। 'सूपप्रति' इति [9]'सुप् प्रतिना मात्रार्थे' इत्यव्ययीभावः। **उत्तरेति**। अत्र प्रतिशब्दार्थाल्पत्वं प्रधानमित्यर्थः। आदिना अक्षपर्यादिग्रहः। **उन्मत्तेति**। [10]'अन्यपदार्थे च संज्ञायाम्' इत्यव्ययीभावः। [11]'**अन्यपदार्थप्रधानता**' यत इति शेषः।

[२, ५६९]

(रत्नप्रकाशः) [12]**न वक्तव्यमिति**। [13]'अव्ययीभावस्याव्ययत्वे लुङ्मुखस्वरोपचाराः प्रयोजनम्' इति परिगणनमत्रैव कर्तव्यमिति भावः॥

अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु २. १. ६.

[२, ५६९–५७०]

(उद्द्योतनम्) ननु विभक्त्यादीनामव्ययार्थत्वविवक्षणात् 'सुमद्राः' इत्यादौ नातिप्रसङ्गः, अत

---

[1] पा. सू. २. २. १९.
[2] उणादिसूत्रम् ६६७.
[3] फिट्सूत्रम् ७६.
[4] कथं बाध इति — अ.
[5] 'निरासाय' इत्यनन्तरम् 'आह' इत्यधिकम्—ऋ.
[6] इत्यत्रैवानव्ययेऽप्यव्यय — अ.
[7] लुगादिसंज्ञार्थमेवान्वर्थं — अ.
[8] प्रदीपे 'न तदन्वर्थसंज्ञया सूच्यते' इत्यत्र 'न तदन्वर्थसंज्ञयापि सूच्यते' इत्यत्रंभट्टपाठ इति प्रतीयते।
[9] पा. सू. २. १. ९.
[10] पा. सू. २. १. २१.
[11] प्रदीपे 'अन्यपदार्थस्य प्रधानता' इत्यत्र 'अन्यपदार्थप्रधानता' इति निर्णयसागरमुद्रिते पाठः।
[12] अवक्तव्यमिति — प, ब.
[13] का. वा. १. १. ४१–१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आह — **समुदायस्येति**। [1]अत्र क्व साकल्यप्रत्ययः, अत आह — **सपुत्र इति**। 'अर्धपिप्पली' इत्यत्र [2]तत्पुरुषे पूर्वपदार्थप्राधान्याद् भाष्योक्तं प्रायिकमित्यर्थः। 'न चात्र' इति भाष्यं संगमयितुमाह — [3]**अन्यतमेति**। तर्हि 'सूपप्रति' इत्यादौ कथं सा[4], अत आह — **वचनेति**। **अव्ययस्येति**। समुदायस्य प्राधान्येऽप्यश्रुतत्वादव्ययस्य [5]श्रुतत्वेनान्तरङ्गत्वात् तस्यैव विभक्त्यर्थादयो विशेषणानीत्यर्थः। अव्ययस्य तदर्थत्वमुपपादयति — **तत्रेति**। **तदेति**। शब्दशक्तिस्वाभाव्यमेवात्र शरणम्। **तेषां** विभक्त्यादीनाम्। सहशब्दस्यापि साकल्यं नार्थ इत्याह — **सपुत्र इति**। **तत्** साकल्यम्॥

[२, ५६९–५७०]

(रत्नप्रकाशः) अव्ययं सुपा सहाव्ययीभावो भवति विभक्त्यर्थादिषु वाच्येषु सत्स्विति सूत्रार्थं मन्यमानः पृच्छति — **इह कस्मादिति**। **सुमद्रा इति**। समासेनात्र मद्राणां समृद्धिर्गम्यते। 'सपुत्रः' इत्यत्र तु साकल्यं गम्यते, सर्वे आगता इति प्रतीतेः। इदानीमुक्तस्थले यथाश्रुतसूत्रेणाव्ययीभावप्रसक्तिमभ्युपगम्य पारम्पर्यप्रसिद्धलक्षणाभावात् तावदत्राव्ययीभावसंज्ञा न भविष्यतीति समाधत्ते — **नैष दोष इति**। **पूर्वपदार्थप्रधान इति**। 'शाकप्रति' इत्यत्राल्पः शाक इति पूर्वपदार्थप्राधान्यम्। 'उन्मत्तगङ्गम्' इत्यत्र तु गङ्गयोन्मत्त इति, उन्मत्ता गङ्गा यस्मिन्नस्ति स हि गङ्गयोन्मत्तो भवतीत्यन्यपदार्थे फलतो वर्तमानतामाश्रित्य विधीयमानाया अप्यव्ययीभावसंज्ञायाः पूर्वपदार्थप्राधान्येऽपि युक्तत्वात्। **उत्तरपदार्थप्रधानस्तत्पुरुष इति**। अतिक्रान्तो मालामतिमाल इत्यादावुपसर्जनह्रस्वार्थं द्वितीयान्तादिना समासः कृतश्चेदपि 'अतिक्रान्ता माला अतिमालः' इत्यर्थसंभवेनोत्तरपदार्थप्रधानता। नञ्तत्पुरुषस्य तूत्तरपदार्थप्राधान्यं सर्वैर्वैयाकरणैर्ज्ञातमेव। एकदेशिसमासस्तु 'अर्धपिप्पली' इति विशेषणसमासमवलम्ब्य भगवतैव निराकृतः। **अन्यपदार्थप्रधानो बहुव्रीहिरिति**। यथेदं तथा भाष्यकार एव स्वस्थाने वक्ष्यति। **उभयपदार्थप्रधानो द्वन्द्व इति**। संज्ञा च परिभाषा च समाहृते संज्ञापरिभाषमिति समाहारद्वन्द्वेऽप्युभयपदार्थप्राधान्यं बोध्यम्। तदेवं वैयाकरणपरम्परागतानि भगवता निर्दर्शितानि लक्षणानि निर्दुष्टतया व्यवस्थापितानि। एतेनैषामव्याप्त्यतिव्याप्ती वदन्तो मूढाः प्रत्युक्ताः। इदानीं यथाश्रुतसूत्रस्यात्र प्रसक्तिरेव नास्तीत्याह — **अथवेति**। **अव्ययार्था इति**। व्याख्यानतो विशेषप्रतिपत्तिरिति भावः। एतेन "अव्ययस्य श्रुतत्वादन्तरङ्गत्वात् तस्यैव विभक्त्यादयो विशेषणानि। तत्र यदोत्तरपदार्थावच्छिन्नाः समृद्ध्यादयः प्रतिपिपादयिषिता भवन्ति तदाव्ययं समृद्ध्यादीनां वाचकमिति तेषां तदर्थता भवति। [6]"सुमद्राः' इत्यत्र तु [7]मद्रशब्द एव समृद्धिविशिष्टमर्थमाह। सुशब्दस्तु समृद्धेर्द्योतको न तु वाचकः" इति निरस्तम्। श्रुतस्यान्तरङ्गत्वेऽन्तरङ्गस्यैव विशेषणमित्यत्र च मानाभावात्। अव्ययस्य समृद्ध्यादिवाचकतायाः स्वभावसिद्धत्वेनोत्तरपदार्थावच्छिन्नसमृद्ध्यादिप्रतिपिपादयिषाहेतुकत्वासंभवात्। [8]"सुमद्राः' इत्यत्र समासेन मद्राणां शोभनत्वे बोधिते तस्य शोभनत्वस्य समृद्धिपर्य-

---

[1] अत्र त्वसाकल्य — अ.
[2] तत्पुरुषस्य — अ.
[3] अन्यतरेति — अ, इ.
[4] अव्ययीभावसंज्ञेत्यर्थः।
[5] श्रुतत्वादन्तरङ्गत्वात् — अ.
[6] सुभद्रा इत्यत्र तु — ब.
[7] भद्रशब्द एव — ब.
[8] सुभद्रा इत्यत्र — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वसानमात्रस्यैव तत्र जायमानत्वेन मद्रशब्दस्य समृद्धिवाचकतोक्तेः सुशब्दस्य तद्द्योतकतोक्तेश्चासंवद्धप्रलापत्वाच्च ॥

यथासादृश्ये २. १. ७.

[२, ५७१–५७२]

(**उद्द्योतनम्**) अस्मिन् प्रश्ने कारणत्रयम्। तदेवाह — **सापेक्षत्वादिति**। 'यथा' इत्यस्य 'तथा' इत्येतदपेक्षत्वेनासामर्थ्यात् 'यथा देवदत्तः' इत्यत्र समासो न भविष्यतीति निषेधो व्यर्थ इत्यर्थः। **वृत्तिरिति**। [1]प्रकारवचनथाल्प्रत्ययान्तयथाशब्दस्य सादृश्यमात्रवाचित्वेन तस्य **वृत्तिः** समासः सादृश्य एवेति तत्र तन्निषेधवचनानर्थक्यमित्यर्थः। **पूर्वेति**। [2]'अनन्तरस्य' इति परिभाषयानेन प्राप्तस्य निषेधेऽपि पूर्वसूत्रे 'यथार्थे' इत्यनेन 'सादृश्ये' इत्यनेन वा [3]प्राप्तस्यानिषेधादयं निषेधो व्यर्थ इत्यर्थः। प्रथमं कारणं निराह — **समुदायस्येति**। 'यथा देवदत्तः' इति समुदायाद् देवदत्तसादृश्यं प्रतीयते, न तु यथाशब्दमात्रात्। तत्र देवदत्तस्य प्राधान्यात् प्रधानस्य सापेक्षस्यापि समासः। यथाशब्दमात्रस्य सापेक्षत्वेऽप्याह — **उपमानस्येति**। 'वृत्तिः सादृश्य एव' इति [4]शङ्कार्थं 'स च' इति भाष्यं व्याचष्टे — **प्रकारशब्दस्येति**। अव्युत्पत्ति[5]पक्षस्य मूलमप्याह — **अर्थवदिति**। अन्यथा कृदन्तत्वेनेव प्रातिपदिकत्वसिद्धावर्थवत्सूत्रं व्यर्थं स्यादित्यर्थः। 'शक्तिमनतिक्रम्य यथाशक्ति' इत्यादिसिद्धयर्थमाह — **वीप्सेति**। कथं वीप्सादिवाचिन एव ग्रहणम्, अत आह — **सूत्रेऽस्मिन्निति**। 'असादृश्ये' इति प्रतिषेधसंनिधानादिति भावः। अनेन 'वृत्तिः सादृश्य एव' इति निरस्तम्। 'पूर्वप्राप्तानिषेधश्च' इत्येतत्समाधानाय 'प्रतिषेधसामर्थ्यात्' इति भाष्यं व्याचष्टे — **यथार्थ इति** ॥

[२, ५७०–५७२]

(**रत्नप्रकाशः**) यथाशब्दस्यालन्त एव। स च सादृश्यवचन एव। तस्य च समर्थेन समास इष्ट एव। स च पूर्वसूत्रे सादृश्ययथाशब्दयोर्निर्देशात् सिद्ध एवेति व्यर्थमनर्थावहं चेदं सूत्रमिति मत्वा पृच्छति — **असादृश्य इति किमर्थमिति**। एतेन 'सापेक्षत्वादसामर्थ्यं वृत्तिः सादृश्य एव च। पूर्वप्राप्त्यनिषेधश्च प्रश्नेऽस्मिन् कारणत्रयम्' इति निरस्तम्। [6]सापेक्षत्वस्य हेतोः स्वरूपासिद्धत्वात्। असामर्थ्यमभ्युपगच्छतामत्र[7] वृत्तेरभ्युपगन्तुमनौचित्यात्। पूर्वप्राप्तस्यैवायं निषेध इति वक्तुं शक्यत्वेन तदनिषेधोक्तेरसंगतेश्च। यथाशब्दो द्विविधः — व्युत्पन्नोऽव्युत्पन्नश्च। तत्र व्युत्पन्नस्थालन्तः सादृश्यवचनः। अव्युत्पन्नस्तु योग्यतावीप्सापदार्थानतिवृत्तिवचनः। द्विविधस्यापि

---

[1] प्रकारवचने थाल् — अ.

[2] परिभाषा ६२.

[3] प्रदीपे श्लोके 'पूर्वप्राप्त्यनिषेधश्च' इति निर्णयसागरचौखाम्बामुद्रितयोः पाठ उपलभ्यते। 'पूर्वप्राप्तानिषेधश्च' इत्यन्नंभट्टपाठ इत्यनेन ज्ञायते। उत्तरत्र च 'पूर्वप्राप्तानिषेधश्चेत्येतत्समाधानाय' इति स्पष्टतयानुवादः क्रियते। हरयाणामुद्रिते तु 'पूर्वप्राप्तनिषेधश्च' इति दृश्यते।

[4] शङ्कार्थकमित्यर्थः। बहुव्रीहिर्बोध्यः।

[5] पक्षमूलमाह — अ.

[6] सापेक्षत्वहेतोः — प.

[7] अभ्युपगच्छता तत्र — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पूर्वसूत्रेण समासे प्राप्तेऽनेन नियमः क्रियते — असादृश्ये वर्तमान एव यथाशब्दः समस्यते नान्य इति। एवं च नास्य सूत्रस्यानर्थक्यमनर्थावहता वेत्याशयेनोत्तरमाह — **यथा देवदत्त इति**। देवदत्तसदृशो यज्ञदत्त इत्यस्मिन्नर्थे 'यथादेवदत्तं यज्ञदत्तः' इति प्रयोगो मा भूदित्येवमर्थं सूत्रमिति भावः। एतेन 'समुदायस्यात्र सापेक्षत्वात् तस्य च प्राधान्यादुपमानस्य चोपमेयं प्रति नित्यसापेक्षत्वात् समासः प्राप्नोति' इति निरस्तम्। व्यर्थप्रलापत्वात्। न हि तत्र समासो न प्राप्नोतीति शङ्का संभवति, येन तत् सार्थकं स्यात्। शङ्कितो समाधातुराशयमविद्वानाह — **असादृश्य इति**। **यथाशक्तीति**। शक्तिसदृशं 'यथाशक्ति' इति मन्यते। सिद्धान्ते तु पदार्थानतिवृत्तिवाचिनः समासः, शक्तिमनतिक्रम्य 'यथाशक्ति' इति प्रतीतिसंभवात्। **स च सादृश्य इति**। सादृश्य एवेत्यर्थः। परिहरति — **नैष दोष इति**। **वीप्सावाचीति**। वीप्साशब्दो योग्यतापदार्थानतिवृत्त्योरुपलक्षणम्। **तस्येदं ग्रहणमिति**। 'यथाशक्तीति' इति शेषः। एतेन 'सूत्रेऽस्मिन्नित्यर्थः' इति निरस्तम्। तस्यैवात्र ग्रहणे 'असादृश्ये' इति विशेषणानर्थक्यापत्तेः। 'यथाशक्ति' इति रूपसाधनार्थमव्युत्पन्नस्योट्टङ्कितत्वेन[1] तत्परताया एवास्य ग्रन्थस्यौचित्याच्च। 'यथाशक्ति' इति समासे सादृश्यवाचिन एव यथाशब्दस्य ग्रहणं कुतो नेति शङ्कते — **अथ य इति**। **तस्येति**। तदन्तस्येत्यर्थः। तत्र तस्य संभावनामाह — **पूर्वेणेति**। हीति शेषः। उत्तरमाह — **प्रतिषेधवचनसामर्थ्यादिति**। पूर्वसूत्रेण [2]प्राप्तस्यैव प्रतिषेधार्थमेतद् वचनमिति तस्यानेनानिषेधेऽस्यानर्थक्यं स्यादिति भावः॥

सुप् प्रतिना मात्रार्थे २. १. ९.

[२, ५७२]

(उद्द्योतनम्) ननु सुबव्ययमिति वचनाभावात् 'अव्ययमित्येवं तदभूत्' इति कथम्, अत आह — **अव्ययेति**। ननु [3]'यावदवधारणे' इत्यत्राव्ययासंबद्धं सुब्ग्रहणमितीहापि [4]'तदसंबद्धमेवानुवर्तिष्यते, अत आह — [5]**तेनेति**। अव्ययसंबद्धस्यैवानुवृत्तत्वेनेत्यर्थः। अव्ययस्यैव ग्रहणे हेतुः — **तथा चेति**। अव्ययस्यैव ग्रहणे सतीत्यर्थः। **यावन्तीति**। यावदमत्रं ब्राह्मणानामन्त्रयस्वेत्युदाहरणे[6]। **अन्यथा** अनव्ययस्य सुपो ग्रहणे। [7]नन्वसत्त्ववचनस्याव्ययस्य मात्रार्थे वृत्त्यसंभवात् सामर्थ्यादव्ययं निवर्तिष्यते, सुब्मात्रमनुवर्तिष्यते, अत आह — **स्वरादीनामिति**। **स्यादिति**। तथा [8]चाव्ययनिवृत्तये सुब्ग्रहणं कर्तव्यमिति भावः॥

[२, ५७२]

(रत्नप्रकाशः) सुबिति वर्तमान इति। [9]'सुबामन्त्रिते' इत्यत इति शेषः। **अव्ययमित्येवं**

---

[1] उट्टङ्कितत्वे तत्परतायाः — ब.
[2] प्राप्तस्यैव प्रतिषेधार्थमेव — ब.
[3] पा. सू. २. १. ८.
[4] तदसंबन्धमेवानुवर्तिष्यते — अ.
[5] प्रदीपे 'यावदवधारणे' इत्येवारभ्य वाक्यं दृश्यते। 'तेन यावदवधारणे' इत्यत्रंमङ्क्ष्ठ पाठ इति ज्ञायते।
[6] इत्युदाहरणम् — अ.
[7] नन्वसत्त्ववचनस्याप्यव्ययस्य — अ.
[8] चकारो नास्ति — अ.
[9] पा. सू. २. १. २.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तदभूदिति । अव्ययग्रहणसमानाधिकरणं तदभूदित्यर्थः। तथा चाव्ययेतरग्रहणफलकं सुब्ग्रहणमिति फलितम्। अनेन [1]'यावदवधारणे' इति पूर्वसूत्रे यावदित्यव्ययमेव गृह्यते। तेन 'यावन्तः श्लोकाः' इति वाक्यमेव भवति। अव्ययस्य तु 'यावच्छ्लोकम्' इति वृत्तिरेव भवतीति सूचितम्॥

अक्षशलाकासंख्याः परिणा २. १. १०.

[२, ५७३–५७४]

(**उद्द्योतनम्**) कितवव्यवहारे [2]चान्यथाभावे [3]चायं समासः। पञ्चिका नाम द्यूतं पञ्चभिरक्षैः शलाकाभिर्वा भवति। तत्र यदा सर्वे उत्ताना अवाञ्चो वा तदा पातयितुर्जयः, अन्यथा त्वपजयः। अक्षेण न तथावृत्तं यथा जये — अक्षपरि, शलाकापरि, द्विपरि। एतदुपपादनार्थम् 'अक्षादयः' इत्यादिवार्तिकम्। ननु सुबन्तानां परिणोच्यमानः समासस्तृतीयान्तानामपि भविष्यतीत्यत आह — **विभक्त्यन्तरेति** । [4]वचनं विनापि नियमसिद्धिमाह — **न्यायादिति** । **वर्तनेति** । [5]'न लोक' इत्यादिना [6]षष्ठीनिषेधात् तृतीयैव भविष्यतीति भावः। सर्वत्रापि वचेर्वर्तने प्रयोगप्रसङ्गं निराह — **नियतेति** । अत्रैव वचेर्वर्तनार्थत्वे हेतुः। **तदेव** पूर्ववर्तनमेव। तथा च पूर्ववृत्तस्य यथावर्तनं तथा तद्वर्तनं न चेदिति [7]'न तत्' इति वार्तिकार्थः। अभिधानार्थे तु तच्छब्देनाभिधानस्यैव परामर्शः स्यात्। स च प्रकृतानुपयुक्त [8]इत्याह — **अभिधानेति**। 'यथा न तत्' इत्यस्यैव विवरणम् [9]'अयथाद्योतने' इति वार्तिकम्। तत्र [10]किमपेक्षया अयथात्वम्, अत आह — **जयेति । एकरूपं** सर्वेषामुत्तानत्वमवाचीनत्वं वा। [11]एतेन 'पूर्ववृत्तस्य' इत्यस्य जयकालीनस्येत्यर्थ उक्तो भवति। [12]एकवचनान्तत्वमपि न्यायसिद्धमित्याह — **समास इति**। तर्ह्येकत्वस्य कथमवगमः, अत आह — **एकत्वस्येति** । द्वित्वादेरेकत्वादि[13]सापेक्षत्वं संख्येयान्तरसापेक्षत्वं च। एकत्वस्य तु संख्यान्तर[14]संख्येयान्तरानपेक्षत्वादन्तरङ्गत्वम्। ननु समर्थसूत्रे 'वृत्तौ संख्याविशेषाणामविभागेनावस्थानरूपा त्यक्तविशेषसंख्यासामान्यरूपा वा **अभेदैकत्वसंख्या**' इत्युक्तम्। तत्कथमत्रैकत्वप्रतीतिरुक्ता, अत आह — [15]**यत्त्विति**। अत्र वृत्तावेकत्वं प्रतीयते, अप्रतीतस्य वचनेन प्रत्याययितुमशक्यत्वादित्यर्थः॥

---

[1] पा. सू. २. १. ८.

[2] वान्यथा — अ.

[3] वायं — अ, इ.

[4] वचनादिनापि समयसिद्धिमाह — अ.

[5] पा. सू. २. ३. ६९.

[6] वृत्तमिति भावक्तान्तेन योगे कर्तृकर्मणोरिति प्राप्तकर्तृषष्ठ्या निष्ठायोगे निषेधादित्यर्थः।

[7] 'न तदिति' इति नास्ति — अ.

[8] इत्यत आह — अ.

[9] 'यथा न तत्' इत्यस्यानन्तरम् 'अयथाद्योतने' इति पाठो निर्णयसागरमुद्रिते।

[10] किमपेक्षायामयथात्वम् — अ.

[11] अत्र 'एकस्य' इति 'अ, इ' मातृकयोः, 'एकेन' इति 'ऋ' मातृकायां च दृश्यते।

[12] एकवचनान्तमपि — अ, इ, ऋ.

[13] आदिशब्दो नास्ति — अ.

[14] संख्येयान्तरनिरपेक्षत्वात् — ऋ.

[15] 'यदुक्तम्' इति प्रदीपे दृश्यते। 'यत्तूक्तम्' इत्यन्नंभट्टपाठ इति भाति॥ यद्वेति — अ, ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ५७३–५७४]

(रत्नप्रकाशः) सामान्यतः प्रवृत्तं सूत्रं विशेषे व्यवस्थापयति — **अक्षादय इति। पूर्वोक्तस्येति।** पूर्ववृत्तस्येत्यर्थः। धातूनामनेकार्थत्वाद् वचिरत्र वर्तने ज्ञेयः। 'यथा न तत्' इति समुदायो 'विजातीये' इत्यर्थे वर्तते। तथा च पूर्ववृत्तविजातीये द्योत्य इत्यर्थः संपन्नः। तदेतदभिप्रेत्य व्याचष्टे — **अक्षादय इति। एकवचनान्तयोरिति।** एतेन [१]"समासेऽभेदैकत्वसंख्यैव विशेषणे भासते वृत्तिविषये' इति वदन्तः परास्ताः। प्रकृतवार्तिकभाष्यविरोधात्। अनेन हि प्रकरणादिवशेन तत्रापि संख्याविशेषप्रतिपत्तिर्भवतीति गम्यते। **कितवव्यवहार इति।** पञ्चिका नाम द्यूतम्, पञ्चभिरक्षैः शलाकाभिर्वा भवति। तत्र यदा सर्वे एकरूपाः पतन्ति तदा पातयिता जयति। [२]अन्यथा तु पाते पराजीयते। **शकटेनेति।** शकटावयवेनेत्यर्थः॥

विभाषापपरिबहिरञ्चवः पञ्चम्या २. १. ११–१२.

[२, ५७४–५७५]

(उद्द्योतनम्) [३]एकयोगत्वेन पाठाद्विभागश्चोद्यते, विभागेन पठितयोर्वा तदावश्यकत्वमुच्यते। तस्य प्रयोजनमाह — **अन्यथेति।** यद्वा [४]"धातोरेकाच,' इत्यत्र [५]"यथा धातोरित्यस्य तस्मिन् सूत्रेऽन्वितस्यापि स्वरितत्वेनाधिकारत्वमपि, एवमिहैकयोगत्वेऽप्यधिकारः स्यात्, अत आह — **अन्यथेति। अधिकारः स्पष्ट इति शेषः।** ननु लक्षणादौ कर्मप्रवचनीयस्य परेर्योगे पञ्चमी न विधीयत इति पञ्चमीग्रहणाभावे तस्य पञ्चम्या समासो न स्यात्, अत आह — **अपपरीति।** [६]"अपपरी वर्जने' इति कर्मप्रवचनीयसंज्ञायां द्वयोः साहचर्यादत्रापि [७]"तदर्थाविव गृह्येते। तत्र च[८] [९]"पञ्चम्यपाङ्परिभिः' इति पञ्चम्येव विहितेत्यर्थः। **अञ्चूत्तरेति।** [१०]"अन्यारात्' इति सूत्रेण। ननु पञ्चमीग्रहणाभावे यदाञ्चूत्तरपदात् प्रथमान्तादस्तातिं विधाय [११]"अञ्चेर्लुक्' इति लुक् क्रियते तदा प्रथमान्तेनापि समानाधिकरणेन तस्य समासः स्यात्, अत आह — **प्राग् ग्राम इति।** नन्वस्मिन् सूत्रे अपपरी एव कर्मप्रवचनीयाविति बहुवचनानुपपत्तिः, अत आह — **वक्ष्यमाणेति।** [१२]आङपेक्षयेत्यर्थः। 'अथ' इत्यस्य ज्ञापकत्वाक्षेपपरत्वमाह — **बहिर्गत इति।** भाष्ये 'एतत्सिध्यति' इत्यनन्तरम्

---

[१] 'समासे' इत्यधिकं भाति, 'वृत्तिविषये' इत्युपरि विद्यमानत्वात्।
[२] अन्यत्तु पाते — ब.
[३] एकत्वेन पाठात् — अ.
[४] पा. सू. ३. १. २२.
[५] 'यथा' इति नास्ति। धातोरित्यस्यैतस्मिन् — अ.
[६] पा. सू. १. ४. ८८.
[७] तावर्थाविव — ऋ.
[८] चशब्दो नास्ति — अ.
[९] पा. सू. २. ३. १०.
[१०] पा. सू. २. ३. २९.
[११] पा. सू. ५. ३. ३०.
[१२] प्रदीपे 'वक्ष्यमाणाङपेक्षया' इत्यत्र 'वक्ष्यमाणापेक्षया' इत्यन्नंभट्टपाठ इति प्रतीयते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'अपादानपञ्चम्या समासश्चेत् पञ्चमीग्रहणं व्यर्थम्' इत्याशयः पूरणीयः। **षष्ठीविषये** ग्रामस्य वहिर्देश इत्यर्थे। तर्हि "वहिर्योगे चोपसंख्यानम्' इति किमर्थम्, अत आह — [२]**तेनेति**॥

[२, ५७४–५७५]

(रत्नप्रकाशः) **योगविभाग इति**। यद्यपि[१] [३]"स्वरितेनाधिकारः' इति स्वरितयोगमात्रेणैवाधिकारत्वं विभाषाशब्दस्य सिध्यति, तथापि स्पष्टप्रतिपत्त्यर्थं तस्य स्वरितयोग एवैवं प्रदर्श्यते। **एतैः [च] कर्मप्रवनीयैरिति**। अपपर्योः परस्परसाहचर्येण [४]"अपपरी वर्जने' इति सूत्रोपात्तयोः कर्मप्रवचनीययोरत्र निर्देशः। [५]छत्रिन्यायेन च कर्मप्रवचनीयाकर्मप्रवचनीयसमुदाये कर्मप्रवचनीयशब्दः। **पञ्चमी विधीयत इति**। [६]"पञ्चम्यपाङ्परिभिः' [७]"अन्यारादितरर्ते दिक्छब्दाञ्चूत्तरपदाजाहियुक्ते' इति सूत्राभ्यां [८]"वहिर्योगे चोपसंख्यानम्' इति वार्तिकेन चेति भावः। **इदं तर्हि प्रयोजनमिति**। पञ्चमीग्रहणस्येति शेषः। **तत्रापीति**। वहिर्योगेऽपीत्यर्थः। **यथा स्यादिति**। पञ्चमीति शेषः। यदि बहिर्योगे पञ्चमी न स्यात् तर्हि बहिश्शब्दस्य पञ्चम्यन्तेन समासविधानमसंगतं स्यादिति तद्योगे पञ्चमीज्ञापनार्थमत्र पञ्चमीग्रहणमिति फलितम्। एवं च बहिर्योगे पञ्चम्यर्थमपूर्वं वचनं नाश्रयणीयमेव। समाधातुराशयं बोद्धुं पृच्छति — **अथेति**। एतेन 'वहिर्गतो ग्रामादित्यपादाने पञ्चमीसद्भावात् कथं तद्विधानं ज्ञाप्यत इति प्रश्नः' इति निरस्तम्। तत्र बहिःशब्दार्थेन सहापादानस्य [९]संवन्धाभावेनापादाने पञ्चमीमादाय प्रश्नोपपादनानौचित्यात्। **पञ्चमीग्रहणसामर्थ्यादिति**। उक्ताभिप्रायः॥

आङ् मर्यादाभिविध्योः २. १. १३.

[२, ५७५]

(रत्नप्रकाशः) **शक्यमकर्तुमिति**। एतेन [१०]"आङ् मर्यादावचने' इति सूत्रमत्रत्यमर्यादाभिविधिशब्दसापेक्षतया व्याचक्षाणा निरस्ताः। प्रकृत[११]"वार्तिकभाष्यविरोधात्॥

---

[१] यद्यप्येतादृशं वचनं नास्ति, वचनस्य सिद्धवत्कारेण कैयटेनोक्तत्वात् तदभिप्रायकमिदम्। अत एव 'बहिर्योगेऽपि बहिर्योगे चोपसंसंख्यानमिति विहिता' इति प्रदीपव्याख्यानावसरे नागेशेन '**विहितेति**। कर्तव्येति शेषः। अन्यथास्योपसंख्यानस्य खपुष्पायमाणत्वादेवं सिद्धवदुक्तिरसंगता स्यात्। अत एव भाष्यकारोऽपि वहिःशब्देन पञ्चमी न विधीयत इत्याह' इत्युक्तम्।

[२] प्रदीपे 'ततस्तदुपसंख्यानम्' इत्यत्र 'तेन तदुपसंख्यानम्' इत्यन्नंभट्टपाठ इति भाति।

[३] पा. सू. १. ३. ११.

[४] पा. सू. १. ४. ८८.

[५] लौ. न्या. प्रथमभागे पृष्ठम् २८.

[६] पा. सू. २. ३. १०.

[७] पा. सू. २. ३. २९.

[८] यद्यपीदं वार्तिकं नास्ति, तथापि सिद्धवत्कारेणोक्तिः। उद्द्योते चेदं स्पष्टम्।

[९] ग्रामाद् गतो यः स बहिर्वर्तत इत्यर्थादिति भावः।

[१०] पा. सू. १. ४. ८९.

[११] प्रकृतसूत्रे वार्तिकस्यैवाभावाद्वार्तिकग्रहणं संपातायातमिति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यस्य चायामः २. १. १६.

[२, ५७५–५७६]

(उद्द्योतनम्) 'अनुगङ्गम्' इति प्रसिद्धोदाहरणे प्रश्नायोगादाह — **लक्ष्येति**। गङ्गाहास्तिनपुरयोरित्यर्थः। लक्षणत्वेऽपि वैपरीत्यशङ्कां निराह — **अनेकेति**। 'अनेकदेश' इति विशेषणकृत्यं दर्शयति — **ततो यद्यपीति**। पूर्वस्माद् भेदमाह — **लक्षणेनेति**। तदेवोपपादयति — **उपमानेति**। [1]अभिधानलक्षणत्वात् समासस्येति भावः। अस्तु प्रकर्षगतिः, समासे किं विनिगमकम्, अत आह — **प्रकृष्टेति**॥

[२, ५७५–५७६]

(रत्नप्रकाशः) उदाहरणविशेषपरिज्ञानाय पृच्छति — **किमुदाहरणमिति**। **अनुगङ्गमिति**। अनुगतं गङ्गामित्यर्थः। अनुनानुगमने बोधिते गङ्गाया दीर्घत्वेन प्रसिद्धत्वात् तदनुगमनेन हास्तिन-[2]पुरस्य दैर्घ्यं गम्यते। एतेन [3]'गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः' इति वदन्तः परास्ताः। फलतस्तादृशार्थकत्वसंभवेऽपि वृत्त्या तदनुपस्थितेः। 'अनुगङ्गं हास्तिनपुरम्' इतिवत् 'अनुहास्तिनपुरं गङ्गा' इत्युदाहरणं भवति वा न वेत्याशयेन पृच्छति — **यस्य चेत्यादिना**। तदुदाहरणं न भवतीत्याशयेन समाधत्ते — **एवं तर्हि लक्षणेनेति**। [4]**गङ्गा चैव लक्षणमिति**। गङ्गैव तत्र लक्षणं भवति, दीर्घत्वेन सर्वलोकप्रसिद्धत्वात्। वाराणसीहास्तिनपुरे तु नगरत्वेन विदेशस्थैर्ज्ञाते चेदपि दीर्घत्वेन न ज्ञाते इति न लक्षणे। निर्ज्ञातो ह्यर्थो लक्षणं भवति। शब्दप्रयोगश्चार्थबोधार्थः। 'अनुवाराणसि गङ्गा' इत्युक्ते च वाराणसीमनुगता गङ्गेत्येतावदेव प्रतीयेत, न तु फलतोऽपि वाराणसीव गङ्गा दीर्घेतीति न भवति तदुदाहरणमिति भावः। लक्षणेनेत्यस्यानुवृत्तिमन्तरेणापि तस्यानुदाहरणत्वं सिध्यतीत्याशयेनाह — **अथवेति**। **प्रकर्षगतिर्विज्ञास्यत इति**। 'प्रसिद्धाप्रसिद्धयोः प्रसिद्धस्यैव ग्रहणम्' इति दीर्घत्वेन प्रसिद्धमेव 'यस्य' इत्यनेन परामृश्यत इति भावः। एतेन 'उपमानोपमेयभावे चायं समास इष्यते। न्यूनगुणं चोपमेयम्, परिपूर्णगुणमुपमानम्। तत्र संपूर्णगुणसंनिधौ न्यूनगुणमसद्गुणमिव प्रतिभातीति सामर्थ्यात् प्रकर्षगतिर्विज्ञायते। प्रकृष्टाप्रकृष्टसंनिधौ च प्रकृष्टस्य कार्यसंबन्धो नेतरस्य' इति निरस्तम्। उपमानोपमेयभावेऽयं समासो विधीयत इत्यत्र मानाभावात्। तत्र [5]प्रथमसूत्रेणैव समासस्य विहितत्वात्। [6]प्रसिद्धत्वाप्रसिद्धत्वयोरेवोपमानोपमेयलक्षणयोरुचितत्वेनाप्युक्ततल्लक्षणान्तर[7]करणानौचित्यात्। प्रकृष्टाप्रकृष्टन्यायस्य निर्मूलत्वाच्च॥

---

[1] 'अभिधानलक्षणाः कृत्तद्धितसमासाः' इति 'अकर्तरि च कारके संज्ञायाम्' इति सूत्रभाष्य उक्तत्वादिति भावः।

[2] पुरपारम्पर्यं गम्यते — प.

[3] सिद्धान्तकौमुद्यां यस्य चायाम इति सूत्र इदं व्याख्यानम्।

[4] भाष्ये 'गङ्गा चैव हि लक्षणम्' इत्यत्र 'गङ्गा चैव लक्षणम्' इति पाठो निर्णयसागरमुद्रिते।

[5] अव्ययं विभक्तीत्यनेनेन 'सादृश्य' इत्यनेनेति भावः।

[6] प्रसिद्धाप्रसिद्धत्वयोः — ब.

[7] उचितत्वेनायुक्ततल्लक्षणान्तर — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तिष्ठद्गुप्रभृतीनि च २. १. १७.

[२, ५७६–५७७]

(उद्द्योतनम्) समुच्चेतव्यस्येति । अधिकारेणैवाव्ययीभाव[1]संज्ञासंवन्धसिद्धेरिति भावः। अवधारणप्रयोजनमाह — **तेनेति**। **न त्विति**। 'परमतिष्ठद्गु' इति समासो नास्तीत्यर्थः। 'तिष्ठद्गु कालविशेषे' इत्युक्तेः 'वहद्गु' इत्यभिधानमयुक्तम्, अत आह — **अस्येति**। वार्तिके तिष्ठद्गुशब्द उपलक्षणार्थ इति भावः। ननु [2]प्रातिपदिकार्थातिरिक्ते कथं प्रथमान्तप्रयोगः, अत आह — **अव्यतिरिक्त इति**। **नान्यत्र** प्रातिपदिकार्थव्यतिरिक्तार्थे। तथा चैषां समासानां प्रथमान्तानामेव प्रयोगो न [3]द्वितीयाद्यन्तानामित्यर्थः। यद्यन्यपदार्थग्रहणेन कालविशेष एव विवक्षितस्ततोऽनुषङ्गेणैव तत्सिद्धेरन्यपदार्थग्रहणं व्यर्थम्, अत आह — **न काल एवेति**॥

[२, ५७६–५७७]

(रत्नप्रकाशः) किमर्थश्चकार इति। चकारं विनापि [4]'अव्ययीभावः' इत्यस्यानुवृत्तिसंभवात् [5]समुच्चेयान्तराभावाच्चेति भावः। **एवकारार्थ इति**। धातुवदव्ययानामप्यनेकार्थत्वादिति भावः। किं तत इति चेद्वाक्यभेदेनैषां समासान्तराघटकत्वमिति गृहाणेत्याशयेनाह — **तिष्ठद्गुप्रभृतीन्येवेति**। न त्वन्यानीत्यवधारणफलमन्यत्वनिराकरणम् । अन्यत्वप्रसवितश्चावयवावयविनोर्भेदाभेदविवक्षया। तथा चान्यात्मकत्वावहमेषां समासान्तरघटकत्वं नेति फलितम् । एतेन 'तिष्ठद्गुप्रभृतीन्येवैकार्थीभावविषयाणि भवन्ति, न तु शब्दान्तरेणैकार्थीभावं प्रतिपद्यन्त इत्यर्थः' इति निरस्तम्। एकार्थीभावविषयाणीत्यस्याप्रस्तुतत्वात्। तिष्ठद्गुप्रभृतीन्येवैकार्थीभावविषयाणीत्युक्ते नान्यानीत्येतावत एव वाक्यशेषस्योचितत्वेन प्रतीयमानत्वेन चान्यथा वाक्यशेषपरिकल्पनानौचित्याच्च। न हि 'देवदत्त एव पण्डितः' इत्युक्ते न त्वन्येन सह पण्डितत्वं प्रतिपद्यत इति गम्यते। अर्थविशेषपुरस्कारेण तिष्ठद्गुप्रभृतीनि व्यवस्थापयति — **तिष्ठद्गु कालविशेष इति**। [6]तत्र तिष्ठद्गुशब्द उपलक्षणमिति मत्वाह — **तिष्ठद्गु वहद्गु इति**। तत्र तिष्ठद्वहच्छब्दयोः स्थितिवहनकाललक्षकयोर्गोशब्देन समासः। गवां स्थितिकालो वहनकालश्चेति तयोरर्थः। **प्रथमान्तानीति**। तथा चैषां द्वितीयाद्यन्तानां प्रयोगोऽसाधुरिति भावः। एवं च खलेबुसमयं काल इत्यादिस्तेषां प्रयोगो भवति। बुसकर्तृकखलाधिकरणकावस्थानसंबन्धीत्यादिस्तेषामर्थः। **अन्यपदार्थ इति**। अत्र कालशब्दस्य प्रयोगो [न] भवतीति 'तिष्ठद्गु कालविशेषे' इत्यनेन न गतार्थता। तथा च 'लूनयवं देवदत्तः' इत्यादौ यवकर्मकातीतलवनसंबन्धी देवदत्त इत्यादिरर्थो युक्तो भवति॥

---

[1] 'संज्ञा' इति नास्ति — अ.
[2] प्रातिपदिकादतिरिक्ते — अ.
[3] द्वितीयान्तानामित्यर्थः — अ.
[4] पा. सू. २. १. ५.
[5] समुच्चयान्तराभावाच्चेति — प.
[6] 'तत्र' इत्यादि 'वहद्गु इति' इत्यन्तं नास्ति — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पारे मध्ये षष्ठ्या वा २. १. १८.

[२, ५७७–५७९]

(उद्द्योतनम्) वाग्रहणसाध्यं महाविभाषया सिध्यतीत्यभिप्रायेण पृष्टे कथमन्यथासिद्धमेव प्रयोजनमुच्यते, अत आह — **इतर इति**। विभाषाग्रहणानुवृत्तिः **न्यायः**। **स्ववाचेति**। [1]प्रष्टा स्वशब्दार्थः। प्रष्टा स्ववाचा हृदिस्थामन्यथासिद्धिं वदतु, पश्चादुत्तरं देयमिति मनसि निधायाहेत्यर्थः। नन्वत्र विभाषाग्रहणेन वाक्येऽभ्यनुज्ञायमाने कथं षष्ठीसमाससिद्धिः, अत आह — **षष्ठीसमास इति**। 'अतः' इत्यनेन [2]कस्मात् परत्वमुच्यते, अत आह — [3]**एतस्मादिति**। सूत्रस्थस्य वाकारस्यापूर्वतया वक्तव्यत्वं कथमुच्यते, अत आह — **आवश्यक इति**। [4]'कृत्याश्च' इत्यनेनेत्यर्थः। [5]एकदेशि प्रधानं यस्मिन् समास इत्यत्रानुपपत्तिं शङ्कते — **नन्विति**। षष्ठीसमासेन समाधातुं तदुपयुक्तमाह — **एवं तर्हीति**। [6]**समासः** प्रधानशब्देनेत्यादिः। [7]तथा चैकदेशप्रधाने एकदेशिना समास [8]इत्यर्थलाभ इत्यर्थः। [9]वहुव्रीहावपि नानुपपत्तिरित्याह — **अथवेति**। [10]अविधेयत्वसामान्येन प्रधानशब्देन निमित्तं लक्ष्यते। तथा चैकदेशि प्रधानं निमित्तं यस्य समासस्येति वहुव्रीहिर्णैकदेशिसमास उच्यत इत्यर्थः। तद्धितग्रहणस्य प्रकृतासंगतिं निराह — **तुल्येति**। [11]प्रसङ्गः संगतिरित्यर्थः। महाविभाषया षष्ठीसमासासिद्धिमाह — **इहेति**। **वाक्यस्यैवेति**। [12]'अपपरि' इत्यत्र विभाषाग्रहणं वाक्याभ्यनुज्ञाने क्लृप्तसामर्थ्यमत्रापि वाक्यमेवानुजानाति, न षष्ठीसमासम्, अक्लृप्तकल्पने मानाभावादिति भावः। 'एकया' इत्यस्य स्त्रीत्वनिर्वाहार्थमाह — **विभाषयेति**। एवं न्यायसिद्धेऽर्थे लिङ्गमप्याह — **इदमेवेति**। **उदश्वित इति**। सप्तमीसमर्थादुदश्विच्छब्दात् संस्कृतार्थे वा ठक्। औदश्वित्कम्, औदश्वितम्। [13]तत्रापि महाविभाषयैव ठको विकल्पे पक्षेऽण् भविष्यति, किमन्यतरस्यांग्रहणेन। कृतं च तत् महाविभाषयोभयविकल्पे उत्सर्गाप्रवृत्तिं ज्ञापयति। तेन [14]'दध्नष्ठक्' [15]'दध्नि संस्कृतं दाधिकम्। अत्र महाविभाषया ठका मुक्ते वाक्यमेव भवति, [16]नाण्। **पारेगङ्गादिति**। तत्र गङ्गायाः परादित्यर्थः। पारशब्दस्य पञ्चम्यर्थवृत्तित्वेन सप्तम्यसंभवादलुग्[17] न सिध्यतीत्येदन्तत्वं वक्तव्यमित्यर्थः। अत्र [18]'नाव्ययीभावात्' इति पञ्चम्या अलुक्।

---

[1] पृष्टः स्वशब्दार्थः — इ.
[2] तस्मात् — अ.
[3] 'एतस्मादिति' इत्यादि 'कथमुच्यतेऽत आह' इत्यन्तं नास्ति — अ.
[4] पा. सू. ३. ३. १७१.
[5] एकदेशी प्रधानं — ऋ.
[6] 'समासः' इत्यतः प्राक् 'न' इत्यधिकम् — अ.
[7] तद्वाचकैकदेशप्रधाने — अ.
[8] 'इत्यर्थलाभः' इति नास्ति — अ.
[9] 'वहुव्रीहावपि' इत्यनन्तरम् 'इति' इत्यधिकम्।
[10] अभिधेयत्वसामान्येनाभिधानशब्देन — अ.
[11] प्रसङ्गसंगतिरित्यर्थः — अ.
[12] पा. सू. २. १. १२.
[13] अत्रापि — अ.
[14] पा. सू. ४. २. १८.
[15] दध्ना संस्कृतं — अ.
[16] 'नाण्' इत्यस्यानन्तरं 'भवति' इत्यधिकम् — अ.
[17] अलुकि न — ऋ.
[18] पा. सू. २. ४. ८३.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ५७७–५७९]

(रत्नप्रकाशः) महाविभाषाधिकारे पुनर्वाग्रहणप्रयोजन[1]कथनपरं वार्तिकमवतारयति — **वावचनं किमित्यादिनोत्तरं पठतीत्यन्तेन। पारे मध्ये षष्ठ्या वावचनमिति।** 'पारे मध्ये षष्ठ्या' इति सूत्रे वावचनमित्यर्थः। कर्तव्यमेवेति शेषः। तदेतद्व्याचष्टे — **पार इति। वक्तव्यमिति।** [2]'कृत्याश्च' इत्यावश्यके कृत्यः। **यथैकदेशिप्रधान इति।** एकदेशी अवयवी प्रधानं यस्मिन् स एकदेशिप्रधानः, तस्मिन् निवृत्ते सति यथेत्यर्थः। तत्पुरुषस्योत्तरपदार्थप्रधानत्वात् पूर्वः कायस्येत्यर्थे समासेऽपि कायशब्दार्थस्य पूर्वार्थाभेदारोपेण पूर्वः काय इत्यर्थबोध इत्येकदेशिप्रधानता। इदं तु वार्तिकाशयवर्णनमात्रम्। भगवता त्वेकदेशिसमासो निराकरिष्यते। एतेन 'ननु पूर्वकाय इत्यादौ पूर्वपदार्थ एकदेशः प्रधानम्, न त्वेकदेशी। एवं तर्ह्येकदेशिनोऽनूद्यमानत्वादप्राधान्यम्, समासस्य तु विधेयत्वात् प्राधान्यम्। तत्रैकदेशिनः प्रधानमिति षष्ठीसमासेन समास उच्यते। अथवा प्राधान्येन [3]निमित्तं लक्ष्यत इति बहुव्रीहावपि न दोषः' इति निरस्तम्। तत्पुरुषमात्रस्योत्तरपदार्थप्राधान्यस्य भगवतैव प्रागुक्तत्वेन शङ्काया मन्दत्वात्। समाससंज्ञाया विधेयत्वेऽपि संज्ञिनोऽविधेयत्वेन तस्य विधेयत्वप्रयुक्तप्राधान्यमाश्रित्य षष्ठीतत्पुरुषाश्रयेण समाधानस्याप्ययोगात्। यथाश्रुतार्थस्यैव भाष्यस्योपपन्नत्वेन प्रधानशब्दस्य निमित्तलक्षकत्वाश्रयेण समाधानान्तरस्याप्ययोगाच्च। दृष्टान्त एव साध्यसिद्धिः कुत इति पृच्छति — **किं पुनरिति।** उत्तरमाह — **समासतद्धितानामिति।** प्रसङ्गात् तद्धितांशेऽप्ययं न्यायो बोध्य इत्याशयेन तद्धितनिर्देशः कृतः। **वृत्तिर्विभाषेति।** एकार्थीभावो विभाषेत्यर्थः। अपपरिबहिरञ्चवः पञ्चम्यन्तेन समर्थेन सहाव्ययीभावसंज्ञका भवन्ति, सामर्थ्यं तु तत्र विकल्पेन भवति। प्राग् दीव्यतः समर्थादण् भवति, सामर्थ्यं तु तत्र वेत्येवंप्रकारेण व्याख्यानात् तदुपपत्तिः। इदं स्वभावसिद्धवृत्त्याश्रयेण समासाव्ययीभावादयः संज्ञा नित्यतया क्रियन्त इति मताश्रयेण। वस्तुतस्तु योग्यताश्रयेण संज्ञातद्धितादयः क्रियन्ते, तद्वशाच्च तेषां वृत्तित्वमिति मुख्यमते वाग्रहणेन [4]'द्वितीयतृतीय' इत्यादिसूत्रगतान्यतरस्यांग्रहणेनेव महाविभाषाधिकारेऽपवादेन मुक्ते उत्सर्गो नेत्येतदेव ज्ञापनीयम्। **वृत्तिविषये नित्योऽपवाद इति।** महाविभाषया वाक्यस्यैवानुमतिः पक्षे क्रियते, [5]न तूत्सर्गस्येति कृत्वेति भावः। **एकयेति।** महाविभाषया। **अपरयेति।** अवान्तरया प्रकृतविभाषया [6]'उदश्वितोऽन्यतरस्याम्' इति विभाषया च। **एकारान्तनिपातनमिति।** पारमध्यशब्दयोरिति शेषः। **कर्तव्यमिति।** कृतमिति व्याख्येयमिति भावः। [7]**सप्तम्या अलुकेति।** [8]'तत्पुरुषे कृति बहुलम्' इति बहुलग्रहणादिति भावः। **यदा त्वन्या इति।** पारेगङ्गादागत इत्यादाविति भावः॥

---

[1] कथनपरे — ब.

[2] पा. सू. ३. ३. १७१.

[3] प्रदीपे 'प्राधान्येन निमित्तत्वम्' इत्यत्र 'प्राधान्येन निमित्तम्' इति पाठोऽभिमत इति भाति।

[4] पा. सू. २. २. ३.

[5] न त्वपवादस्येति कृत्वेति — प, ब.

[6] पा. सू. ४. २. १९.

[7] 'सप्तम्या अलुकेति' इत्यादि 'इत्यादाविति भावः' इत्यन्तं नास्ति — ब.

[8] पा. सू. ६. ३. १४.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नदीभिश्च २. १. २०.

[२, ५७९–५८२]

(उद्द्योतनम्) ननु शेषग्रहणस्य प्रत्याख्यातत्वादन्यपदार्थे परत्वाद्बहुव्रीहिरेव भविष्यतीति किं प्रतिषेधेन, अत आह — **अर्थेति**। पूर्वपदार्थप्राधान्य एवाव्ययीभाव इति कथं लभ्यते, अत आह — **पूर्वाचार्येति**। अव्ययीभावसंज्ञा गुर्व्यपि पूर्वाचार्यकृतेहाश्रिता। तस्याः प्रयोजनं यादृशार्थविशेषे या [1]संज्ञा तैः कृता तस्मिन्नेव सा संज्ञाभिमतेति सूचनम्। **व्यधिषत** विहितवन्तः। वचनसामर्थ्यात् पूर्वपदार्थप्राधान्याभावे[2]ऽप्यव्ययीभावः स्यादित्याशयेन शङ्कते — **नन्विति**। **मूलं** [3]सूत्रारम्भः। समाहारशब्दस्य भावार्थत्वं कर्मार्थत्वं च, उभयथापि पूर्वपदार्थप्राधान्यं नास्तीत्याह — **स चेति**। समाहारः। [4]'भावे, [5]'अकर्तरि च कारके' इत्युभयत्र घञ्विधानात्। कर्मरूपमङ्गीकृत्य समाधत्ते — **नैष इति**। ननु [6]वाक्ये व्यस्तप्रयोगात् कथंचिद् द्विशब्दार्थस्य प्राधान्येऽपि समासे तत्प्रधान्ये न किंचिन्मानम्, अत आह — **अथवेति**। ननु 'द्वीरावतीकः' इत्यत्र पूर्वपदार्थप्राधान्याभावादव्ययीभावो न भवतीत्युक्ते 'ननु' इत्यादिना किं चोद्यते, अत आह — **इदानीमिति**। बहुव्रीहावपि पूर्वपदार्थप्राधान्यमस्तीत्यव्ययीभावप्रसङ्ग इति चोदयतीत्यर्थः। ननु केवलेन द्विशब्देनेरावतीशब्देन वा देशविशेषो न प्रतीयत इति कथं समासोऽन्यपदार्थको न स्यात्, अत आह — **अयं भाव इति**। ननु यद्येनोच्यते स [7]तस्याभिधेय इति स्थिते कथम् 'एतदेव' इत्युक्तम्, अत आह — **अस्याभिप्राय इति**। अर्थान्तराभिधायित्वमेवाह — **तथा हीति**। 'अपि च' इत्यनेन विवक्षितमाह — **त्वत्पक्षेति**। अन्यपदार्थ एव नास्तीति पक्षे चित्रगुरित्यादावपि बहुव्रीहावन्यपदार्थाभावेन 'अन्यपदार्थप्रधानो बहुव्रीहिः' [8]इत्यप्ययुक्तं स्यादित्यर्थः। **चोदक इति**। येन 'ननु च यद्येनोच्यते' इति चोद्यते स एव चित्रगुरित्यादावन्यपदार्थे बहुव्रीहिर्न स्यादित्युद्भावितचोद्यं परिहरतीत्यर्थः। **परस्य** 'न वक्तव्यः' इति वादिनः। ननु पूर्वपदार्थस्य प्राधान्येऽव्ययीभावः, [9]तच्च तत्र नास्तीति [10]कथमव्ययीभावप्राप्तिरित्याशङ्क्य 'अस्यायमभिप्रायः' इत्येतन्निरासपूर्वकं प्राप्तिमाह — **अयमभिप्राय इति**। **पूर्वोक्तेति**। 'संहितयोरर्थ उभाभ्यां व्यपदिश्यते' इति देशविशेषस्य पूर्वपदार्थत्वात् प्रधानत्वाच्चाव्ययीभावः प्राप्नोतीत्यर्थः। ननूत्सर्गापवादयोर्न विप्रतिषेधः, अत आह — **पुरस्तादिति**। ननु तत्र शेष इति ग्रहणादव्ययीभावव्यतिरिक्तविषयो बहुव्रीहिरिति कथं [11]तं बाधेत, अत आह — **शेषग्रहणं चेति**। पदानामर्थानां च सामान्यविशेषरूपेण सर्वेषामुपयुक्तत्वाच्छेषग्रहणेऽसंभव इति तद्वचर्थमित्यर्थः। **त्रिकेति**। 'स्वौजस्' इति प्रथमाया वचनत्रिकं त्रिकशब्देनोच्यते। द्वितीयादीनां प्रतिपदं समासविधानात् प्रथमायाः शेषत्वम्। ततश्च प्रथमान्तानां बहुव्रीहिरित्यर्थात् 'समानाधिकरणानाम्' इत्युक्तं भवति। तथा च बहुव्रीहिरव्ययीभावं बाधत एवेत्यर्थः। आवश्यकत्वमेवाह — **यदीति**। [12]**इह** 'नदीभिश्च' इति सूत्रे। **बाधेत**

---

[1] संज्ञात्वेन कृता — अ.
[2] अपिशब्दो नास्ति — ऋ.
[3] सूत्रारम्भस्य — अ, इ, ऋ.
[4] पा. सू. ३. ३. १८.
[5] पा. सू. ३. ३. १९.
[6] वाक्येऽभ्यस्तप्रयोगात् — अ.
[7] तस्यार्थोऽभिधेय इति — अ.
[8] इत्ययुक्तं — अ.
[9] 'तच्च' इति नास्ति — ऋ.
[10] कथमव्ययीभावः प्राप्त इत्याशङ्क्य — ऋ.
[11] 'तम्' इति नास्ति — अ.
[12] प्रदीपे 'यदि समाहारग्रहणम्' इत्यत्र 'यदीह समाहारग्रहणम्' इत्यन्नंभट्टपाठ इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न तु द्विगुमिति शेषः। तर्हि समाहारे कः समासः स्यात्, अत आह — **समाहार इति**। तथा च पञ्चानां नदीनां समाहार इत्यत्र द्विगुरेव स्यान्नाव्ययीभाव इत्यर्थः। ननु समाहारग्रहणाभावे ऽव्ययीभावेन [1]'पूर्वकाल' इति समासो बाध्यताम्, को दोषः, अत आह — **ततश्चेति**। **अव्ययीभावे** [2]'पूर्वकाल' इति समासं बाधित्वेत्यादिः। तथा च 'एकनदम्' इति स्यादित्यर्थः। ननु तत्पुरुषेऽप्यचा समासान्तेन भाव्यमिति न कश्चिद्विशेषः, अत आह — **यस्त्विति**। वचनस्य का गतिः, अत आह — **अव्ययीभावे त्विति**। अत्र समाहारग्रहणे सति द्विगोरेवायं बाधकः, न [3]'पूर्वकाल'समासस्येति 'पञ्चनदम्' इत्यत्राव्ययीभाव एव न द्विगुः। 'एकनदी' इत्यत्र [4]'पूर्वकाल' इति समास एव, नाव्ययीभाव इति सर्वेष्ट[5]सिद्धिरित्याशयः। अव्ययीभावेनाप्येकनदीशब्दः सिध्यतीत्याह — **एकेति**। वृत्तिविषयेऽपूपशब्दस्यावयववृत्तित्वेन समाहारसंभवाद् द्विगौ सति [6]'द्विगोः' इति ङीपि यथा 'एकापूपी' इति भवति, तथात्रापि समाहारे द्विगुं बाधित्वाव्ययीभावे विकल्पेन टचि सति 'एकनदम्, एकनदि' इति रूपद्वयं भवतीत्यर्थः। एतदपि रूपद्वयं संभवतीति स्वरूपकथन[7]मात्रमेव, न प्रकृतोपयोगि, अव्ययीभावे नपुंसकह्रस्वत्वेन 'एकनदि' इत्यस्य ह्रस्वान्तत्वात्। 'एकनदीतरे' इत्यत्र नदीशब्दस्य दीर्घान्तत्वस्य समानाधिकरणसमासं विनासंभवात्[8]। एकापूपीदृष्टान्तदर्शनात् समाहारद्विगावच्प्रत्ययस्य भावाभावाभ्यां रूपद्वयप्रदर्शनमिति केचित्। तन्न, अव्ययीभावेन द्विगुबाधाङ्गीकारात्॥

[२, ५७९–५८२]

(**[9]रत्नप्रकाशः**) संख्या नदीभिः समस्यत इत्युक्ते समाहारद्विगुमिव बहुव्रीहिमप्यव्ययीभावो बाधेतेति मन्यमान आह — **नदीभिरिति**। **द्वीरावतीक इति**। द्वे इरावत्यौ नद्यौ यस्मिन् स इत्यर्थः। समाहारद्विगोर्बहुव्रीहेश्च नापवादोऽयमव्ययीभावः। पञ्चकं नदीनाम्, द्विकं यमुनयोरित्यादिरूपेण पूर्वपदार्थप्राधान्ये तस्य प्रवर्तनादित्याशयेन परिहरति भगवान् — **न वक्तव्य इति**। **न चात्रेति**। द्वीरावतीक इत्यादावित्यर्थः। नन्ववयवातिरिक्तस्य समासरूपावयविनोऽभावाद् 'द्वीरावतीकः' इत्यत्र पूर्वोत्तरपदाभ्यां देशोऽभिधीयत इति पूर्वपदार्थप्राधान्यमप्यस्तीत्यव्ययीभावः प्राप्नोत्येवेत्याशयेन शङ्कते — **ननु चेति**। **अत्र** 'द्वीरावतीकः' इत्यादौ। **एताभ्यां** पूर्वोत्तरपदाभ्याम्। **एतमर्थं** देशविशेषरूपम्। **पश्यामः** जानीमः। तथा चाव्ययीभावसंज्ञा तत्र प्राप्नोत्येवेति भावः। अवयवातिरिक्तेनावयविना समासेन तत्रान्यपदार्थो देशविशेष उच्यते, पूर्वपदेन तु द्वित्वादिविशिष्टम्, उत्तरपदेन तु नदीविशेषः। तथा च तत्र पूर्वपदार्थप्राधान्याभावादव्ययीभावस्य प्रसक्तिरेव नास्तीत्याशयेनाह — **एतदेवेति**। एवकारोऽप्यर्थे। एतदपीत्यर्थः। युक्तमिति शेषः। एतच्छब्दनिर्दिष्टमाह — **यद्येनोच्यते स तस्यार्थ इतीति**। उपलक्षणमिदम् 'अत्र च वयमेताभ्यामेतमर्थमुच्यमानं 'पश्यामः' इत्यस्य। 'द्वीरावतीकः' इत्यादौ देशविशेषस्य पूर्व-

---

[1] पा. सू. २. १. ४९.

[2] पा. सू. २. १. ४९.

[3] पा. सू. २. १. ४९. पूर्वकालेति समासस्येत्यर्थः।

[4] पा. सू. २. १. ४९.

[5] सिद्धिरित्याहुः — अ.

[6] पा. सू. ४. १. २१.

[7] मात्रमेतत्, न प्रकृतोपयोगि — अ.

[8] असंभवादिति छेदः।

[9] 'पश्यामः' इत्यादि 'स्यादित्याशयेनाह' इत्यन्तं नास्ति — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पदार्थत्वाभ्युपगमेऽन्यपदार्थः कुत्रापि नास्ति प्रधानभूत इति बहुव्रीह्युच्छेदः स्यादित्याशयेनाह — **अपि चेति**। **अत्रापीति**। [1]हीति शेषः। **एताभ्यामिति**। चित्रगोप्रभृतिभ्याम्। **एतमर्थमिति**। चित्रगवीस्वामिप्रभृतिम्। आक्षेप्ताह — **यद्यपीति**। **एषः** चित्रगवीस्वामिप्रभृतिः। **अन्यपदार्थोऽपि त्विति**। अपि त्वन्यपदार्थत्वमपीत्यर्थः। **गम्यत इति**। तस्य चित्रगवीप्रभृतेरिति शेषः। किं तत इत्यत आह — **तत्रेति**। तदेवं [2]सिद्धान्त्यापादितं दोषं परिहृत्य 'द्वीरावतीकः' इत्यादावव्ययीभावातिव्याप्तिः स्थितैवेत्याह — **इहापि तर्हीति**। एवं चेहापीत्यर्थः। **अन्यपदार्थ इति**। वाक्ये यौ स्वपदार्थौ द्वित्वविशिष्टश्च नदीविशेषश्च ताभ्यामन्यो देशविशेष इत्यर्थः। **स्वपदार्थ इति**। स्वपदार्थत्वमित्यर्थः। **गम्यत इति**। देशविशेषस्येति शेषः। किं तत इत्यत आह — **तत्रेति**। तदेवं वर्तिपदातिरिक्तं समासमविदुषो मन्दबुद्धेराशङ्कां [3]'तुष्यतु दुर्जनः' इति न्यायेनाभ्युपगम्य समाधत्ते — **एवं तर्हीति**। **संप्रधार्यमिति**। [4]पुरस्तादपवादन्यायेन पञ्चानां नदीनां समाहारः पञ्चनदमित्यादौ समाहारद्विगुबाधेनाव्ययीभावसंज्ञा सावकाशा, बहुव्रीहिसंज्ञा तु चित्रगुरित्यादाविति भवति तयोः संप्रधारणा। आक्षेप्ताह — **भवेदिति**। समाधत्ते — **परंकार्यत्वे चेति**। [5]**संख्यासमाहार इति**। संख्यारूपसमाहार इत्यर्थः। संख्यारूपसमाहारो हि द्वित्वादिरेव भवति, न त्वेकत्वम्, समाहारस्यानेकनिष्ठत्वनियमात्। **स चावश्यं** [6]**वक्तव्य इति**। एकसंज्ञाधिकारपक्षेऽपीति शेषः। तथा नोक्तं चेत् को दोष इत्यत आह — **सर्वमेकनदीतर इति**। क्वचिदनुष्टुप्श्लोके समचरणे स प्रयुक्त इति सर्वशब्दोऽप्युपात्तः। तत्रैकत्वस्य समाहारत्वाभावादव्ययीभावस्य प्रसक्त्यभावात् [7]'पूर्वकाल' इति तत्पुरुष एव भवति। अन्यथा [8]'पुरस्तादपवाद'-न्यायेन 'एकनदी' इत्यादावेकशब्दस्य नद्यादिभिर्यस्तत्पुरुषस्तस्यैवाव्ययीभावो बाधकः स्यादिति 'द्वियमुनम्' इत्यादावव्ययीभावसंज्ञा न स्यादिति भावः। यद्यपि [9]'संख्यापूर्वो द्विगुः' इति सूत्रे 'एकापूपी' इत्यत्र भगवतैव समाहारद्विगोरभ्युपगम्यमानत्वेनैकत्वस्यापि संख्यासमाहारत्वाविशेषात्[10]॥

द्विगुश्च २. १. २३.

[२, ५८२]

(उद्द्योतनम्) 'पञ्चगवम्' इत्यत्र [11]'गोरतद्धितलुकि' इति टच्। 'द्व्यङ्गुलम्' इत्यत्र [12]'तत्पुरुषस्याङ्गुलेः संख्याव्ययादेः' इत्यच्। [13]'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः' इति 'पञ्चराजम्' इत्यत्र [14]'द्विगोः' इति ङीप् कस्मान्न भवतीत्यत आह — **अकारान्तेति**। राजन्शब्दस्य नकारान्त-

---

[1] भाष्ये 'अत्रापि हि वयम्' इत्यत्र हिशब्द-रहितः पाठो रत्नप्रकाशकृत इति प्रतीयते।
[2] सिद्धान्त्यापादितदोषं — प, ब.
[3] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[4] परिभाषा ६०.
[5] भाष्ये 'संख्यायाः समाहारे' इत्यत्र 'संख्या-समाहारे' इति रत्नप्रकाशकृत्पाठ इति भाति।
[6] कर्तव्य इति — प, ब.
[7] पा. सू. २. १. ४९.
[8] परिभाषा ६०.
[9] पा. सू. २. १. ५२.
[10] एतावत्पर्यन्तमेवोपलभ्यते। उपरि द्वितीयाह्निकसमाप्तिपर्यन्तं नास्ति 'प, ब' मातृकयोः॥
[11] पा. सू. ५. ४. ९२.
[12] पा. सू. ५. ४. ८६.
[13] का. वा. २. ४. ३०–४.
[14] पा. सू. ४. १ २१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वादित्यर्थः। न च टचि कृतेऽकारान्तत्वम्, तस्य समासावयवत्वादिति भावः। उत्तरपदावयवत्वे त्वाह — **यदा त्विति**। पात्रादेराकृतिगणत्वादिति भावः॥

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २. १. २४.

[२, ५८२–५८७]

(उद्द्योतनम्) आदिग्रहणावश्यकत्वे [1]द्वयोपादानं व्यर्थम्, अत आह — **औणादिकानामिति**। यद्यप्यादिशब्दस्यात्र प्रकारवाचित्वादेकोपादानेऽप्यपेक्षितं सिध्यति, तथाप्यादिशब्दस्य [2]प्रकारार्थत्वद्योतनायैवोभयोपादानमिति भावः। ननु [3]'कर्तृकर्मणोः' इति षष्ठ्यात्र भाव्यमिति कथं द्वितीयासमासः, अत आह — **गत्यर्थेति**। **अपवादेति**। 'गत्यर्थकर्मणि चतुर्थी वा'[4] इत्येव वाच्ये द्वितीयाग्रहणं [5]'कर्तृकर्मणोः कृति' इति षष्ठीबाधनार्थमित्यर्थः। कैश्चिदत्र [6]'कर्तृकर्मणोः' इति षष्ठ्याः [7]'अकेनोः' इति प्रतिषेध उक्तः, तन्मतं निरस्यति — **ये त्विति**। **पूर्वेति**। "गत्यर्थ'सूत्रे द्वितीयाग्रहणस्यापवादविषये विधानार्थत्वेन तत्र षष्ठ्या [8]अप्रसक्तौ निषेधायोगादित्यर्थः। तर्हि भविष्यदिन्विषयप्रतिषेधस्य को विषयः, अत आह — **भाष्यकारेणेति**। [10]'क्रियया यमभिप्रैति सोऽपि संप्रदानम्' [11]'इत्युक्तेः [12]'कर्मणि द्वितीया' [13]'चतुर्थी संप्रदाने' [14]'इत्येव तयोः सिद्धत्वात् [15]सूत्रमिदं प्रत्याख्यातम्। तन्मते ग्रामस्य गमीत्यत्र षष्ठीप्रतिषेधः सौत्रः प्रवर्तते। [16]अप्रत्याख्याने त्विन्विषयप्रतिषेधः [17]'नान्तरिक्षेऽग्निश्चेतव्यः' इतिवन्नित्यानुवाद इति भावः। [18]**येनेति**। बहुव्रीह्यर्थकथनम्। [19]अर्थरूपस्वराणां भेदेति विग्रहः। [20]'अहीने द्वितीया' [21]इति द्वितीयासमासे पूर्वपदप्रकृतिस्वरः, बहुव्रीहावपि स एवेति स्वरभेदाभावः। 'कष्टश्रितः' इति समासस्याहीनवाचित्वमाह — **य इति**। **न हीनं** [22]न त्यक्तम्। ननु [23]'तयोरेव' इति नियमात् कथमत्र [24]कर्तरि क्तः, अत आह — **श्रयतिरिति**। कष्टं श्रितः, कष्टं गत इत्यर्थः। **कर्तरीति**। [25]'गत्यर्थाकर्मक' इत्यनेन। 'अहीनवाचिन्याः' इत्यनेन प्राप्तापन्नयोरप्याक्षेपः प्रतीयते, तन्निरासायाह — [26]**तत्रेति**। **स्वरेति**। अहीनवाचिनि समासे

---

[1] गमीगामीति शब्दद्वयोपादानमित्यर्थः।
[2] प्रकारार्थद्योतनायैव — अ.
[3] पा. सू. २. ३. ६५.
[4] 'वा' इति नास्ति — अ, इ.
[5] पा. सू. २. ३. ६५.
[6] पा. सू. २. ३. ६५.
[7] पा. सू. २. ३. ७०.
[8] पा. सू. २. ३. १२.
[9] अप्रसक्तायाः — अ.
[10] महाभाष्यम् १. ४. ३२.
[11] इत्यर्थं उक्तः — अ.
[12] पा. सू. २. ३. २.
[13] पा. सू. २. ३. १३.
[14] इत्येतयोः — अ.
[15] सूत्रं प्रत्याख्यातम् — अ, इ.
[16] अत्र प्रत्याख्याने निर्विषय — अ.
[17] तै. सं. ५. २. ७.
[18] प्रदीपे 'कष्टमनेन श्रितमिति' इत्यत्र 'कष्टं येन श्रितमिति' इत्यन्नंभट्टपाठः।
[19] प्रदीपे 'अर्थस्वरूपस्वराणाम्' इत्यत्र 'अर्थरूपस्वराणाम्' इति निर्णयसागरमुद्रिते पाठः।
[20] पा. सू. ६. २. ४७.
[21] इति पूर्वपदप्रकृतिस्वर इत्यन्वयः।
[22] न व्यक्तम् — ऋ.
[23] पा. सू. ३. ४. ७०.
[24] कर्तर्युक्तः — अ.
[25] पा. सू. ३. ४. ७२.
[26] प्रदीपे 'ततः श्रितपतित' इत्यत्र 'तत्र श्रितपतित' इति पाठोऽन्नंभट्टस्येति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्तान्त उत्तरपदे द्वितीयान्तं पूर्वपदं प्रकृतिस्वरम्, गतिकारकोपपदात् परेषां थाथाद्यन्तानामन्तोदात्तत्वम्, [1]तत्रेष्टस्वरसिद्धयर्थमित्यर्थः। तत्र कः स्वर इष्टः, अत आह — **तर्हीति**। तत्राप्यहीनस्वर एव कुतो न स्यात्, अत आह — **अतीतेति**। **हीनं** त्यक्तं विभक्तमित्यनर्थान्तरम्। प्राप्तापन्नयोरहीनत्वेऽपि 'अनुपसर्गात्' इति निषेधान्नाहीनस्वरः। सुखप्राप्तः, सुखापन्नः। थाथादिस्वर एव। बहुव्रीहौ स न सिध्यतीत्याह — **बहुव्रीहाविति**। ननु श्रितादिभिर्द्वितीयासमासानङ्गीकारे 'गोगतः, मासश्रितः, सुखगतः' इत्यादौ पूर्वपदप्रकृतिस्वरो न स्यात्। बहुव्रीहौ [2]'जातिकाल' इत्यन्तोदात्तत्वं स्यादिति स्वरभेदः स्यात्, अत आह — **यदा त्विति**। बहुव्रीहिकृतत्वं द्वितीयासमासस्य नास्ति, अत आह — **बहुव्रीहिणेति**। [3]**रूपस्य** स्वरस्य च। आच्छादनव्यतिरिक्ताज्जातिवाचिनः कालवाचिनः सुखादिभ्यश्च कृतादिवर्जं क्तान्तमन्तोदात्तं बहुव्रीहौ। सुरापीतः, मासजातः, सुखजातः। जात्यादिभ्यः किम्। पुत्रजातः। अनाच्छादनात् किम्। वस्त्रच्छन्नः। अकृतादि किम्। कुण्डकृतः, कुण्डमितः, कुण्डप्रतिपन्नः। पूर्वपदप्रकृतिस्वरः प्रत्युदाहरणम्। जातिकालसुखादिभ्यो जातस्यान्तोदात्तो वा स्याद् बहुव्रीहौ। तर्हि सूत्रभेदः स्यात्, अत आह — [4]**तत्रेति**। 'जातादिषु' इति सूत्रे कृते सतीत्यर्थः। **अहीन इति**। तत्सूत्रं तु श्रितगतपतितार्थमेव। तच्चान्यथासिद्धमिति तन्न कर्तव्यमित्यर्थः। ननु कष्टशब्दस्य प्रत्ययस्वरेणान्तोदात्तत्वादाद्युदात्तत्वं कथम्, अत आह — **निष्ठेति**। अनाकारात् परा या निष्ठा तदन्तं द्वयच्कमाद्युदात्तम्। **न त्विति**। दुःखविशेषजातिवाचकः कष्टशब्द इति भावः। 'न तस्य दण्डवारितः' इत्युक्तेर्बहुव्रीहिः[5] कथं वारणीयः, अत आह — **अव्यविकेति**। कष्टं श्रितं येनेति वाक्यमेव भवति, न बहुव्रीहिरित्यर्थः। ननु राज्ञः सखेत्यत्र राजा सखा यस्येत्यर्थाभावाद् [6]बहुव्रीहेः प्रसङ्ग एव नास्ति, किं [7]तदभावज्ञापनेन, अत आह — **सख्यस्येति**। 'नैतत्' इति न बहुव्रीहिवादिनः, अपवादेन तस्य निरासाभिधानात्। किंतु तटस्थस्येत्याह — **अत्रेति**। ननु समानाधिकरणानां बहुव्रीहिः। द्वितीयातत्पुरुषस्तु व्यधिकरणानामिति कथमुत्सर्गापवादत्वम्, अत आह — **अर्थभेद इति**। 'कष्टं श्रितः' इत्यत्र कष्टं श्रितं [8]येनेत्यर्थस्याप्यन्तर्भूतत्वादित्यर्थः। अपवादेन [9]वा ज्ञापकेन वा बहुव्रीह्यभाव इति स्वरूपविचारमात्रम्, न तु फलभेद इत्याह — **ज्ञापकेति**। नन्वर्थाभेदेनोत्सर्गापवाद[त्वं]स्योक्तत्वात् 'अथ न' इत्ययुक्तम्, अत आह — **कष्टमिति**। तथा च ज्ञापकादेवात्र बहुव्रीह्यभाव इति भावः। [10]'एतदयुक्तम्' इत्यस्य तात्पर्यमाह — **अर्थभेदादिति**। अर्थभेदेन बहुव्रीहिकृतत्वासंभवादित्यर्थः। **समासेति**। कष्टं श्रितः, कष्टं श्रितं येनेति विग्रहवाक्येऽर्थभेद[11]प्रतीतावपि समासभेदो न भवतीत्यभिमानः। **पूर्वोक्तेनेति**। 'बहुव्रीहिणैव विवक्षितार्थावगमात्' इत्यादिनेत्यर्थः। भवतु रुहादीनां क्तः कर्तरि धात्वर्थस्यानपवर्गे, कष्टश्रितादिषु किमायातम्, अत आह — **आदिशब्द इति**। यदि धात्वर्थस्यानपवर्गस्तर्हि कथं भूतकालनिष्ठा, अत आह — **सर्वस्येति**। अवयवे [12]समुदायारोपेण भूतप्रत्ययः, यथा पचत्येव देवदत्तेऽपाक्षीदिति [इति]

---

[1] तत्र स्वर — अ.

[2] पा. सू. ६. २. १७०.

[3] प्रदीपे 'स्वरूपस्य साधितत्वात्' इत्यत्र 'रूपस्य साधितत्वात्' इति निर्णयसागरमुद्रिते पाठः।

[4] प्रदीपे 'ततश्चाहीने' इत्यत्र 'तत्राहीने' इति पाठोऽन्नंभट्टस्येति भाति।

[5] बहुव्रीहेः कथं वारणम् — अ.

[6] बहुव्रीहिप्रसङ्ग एव — अ.

[7] तदपवादज्ञापनेन — ऋ.

[8] येनेत्यर्थस्यान्तर्भूतत्वादित्यर्थः — अ.

[9] वाशब्दो नास्ति — अ, इ.

[10] एतदुक्तमित्यस्य — ऋ.

[11] प्रतिपत्तिरापतति समास — अ.

[12] समुदायत्वारोपेणेत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भावः। **निष्ठिते** परिसमाप्ते। ननु शब्दादर्थप्रत्ययः कथं 'प्रत्यक्षेण' इत्युच्यते, अत आह — **अव्यवधानेनेति**। **ज्ञापकफलमिति**। राज्ञः सखा राजसखः, राजा सखास्येति वाक्यमेव भवति, न बहुव्रीहिरिति यदुक्तं तदपीत्यर्थः। **तत्पुरुष इति**। तत्र 'बहुलम्' इति योगविभागेन षष्ठ्या अप्यलुगित्यर्थः। एकयोगत्वेऽप्याह — **षष्ठ्या इति**। अत्र ज्ञापकफलनिरासात्। श्रितगतपतितानां जातादिपाठात् [1]'स्वरद्वयसिद्धेर्द्वितीयासमासो न वक्तव्यः, [2]अतः [3]'अहीने द्वितीया' [4]इति च न कर्तव्यमिति स्थितम्॥

खट्वा क्षेपे २. १. २६.

[२, ५८७]

(उद्द्योतनम्) 'खट्वारूढः' इत्युदाहरणस्य स्पष्टत्वात् प्रश्नायोगः, अत आह — **खट्वेति**। **समासस्येति**। तथा च तद्धेतुधर्मानुपादानेऽपि समासादेव क्षेपप्रत्यय इत्यर्थः। भाष्ये **स्नानं** समावर्तनम्, तस्याध्ययनानन्तर्यमाह — **ब्रह्मचारिणेति**। क्षेपस्योक्तत्वात् [5]'नातिव्रतवान्' इत्यधिकम्, अत आह — **खट्वेति**॥

अत्यन्तसंयोगे च २. १. २९.

[२, ५८८]

(उद्द्योतनम्) [6]'कालाः' इति सूत्राभावे 'अत्यन्तसंयोगे च' [7]इत्यत्राकालवाचिनामपि समासः स्यात्, अत आह — **काला इति**। 'आक् च' इति चकाराद् द्विर्वचनम्। अभ्यासदीर्घं [8]'विहायागागमविधानाद्धलादिशेषो न, [9]'दाश्वान्' इति सूत्रस्थमिदम्। षण्णां मुहूर्तानां युगपद् गमनाभावात् 'गच्छन्ति' इति [कथं] [10]बहुवचनप्रयोगः, अत आह — **क्रमेणेति**। **अथवेति**। एकैकमुहूर्तगमने सर्वमुहूर्तकर्तृकत्वोपचारेण बहुवचनमित्यर्थः। [11]क्वत्यं गतग्रहणम्, अत आह — **द्वितीयेति**। कर्तरि क्तमुपपादयति — **आदीति**॥

तृतीया तत्कृतार्थेन गुणवचनेन २. १. ३०.

[२, ५८९–५९२]

(उद्द्योतनम्) दध्नः पाटवहेतुत्वमाह — **विशिष्टेति**। **तदेति**। साक्षात् सामर्थ्याभावा-

---

[1] रूपद्वये सिद्धे द्वितीयासमासः — अ.
[2] 'अतः' इति नास्ति — ऋ.
[3] पा. सू. ६. २. ४७.
[4] इति वचनं न कर्तव्यमिति — इ.
[5] नापि व्रतवान् — ऋ.
[6] पा. सू. २. १. २८.
[7] इत्यत्र कालवाचिनामपि — अ, इ, ऋ.
[8] विधायागम — ऋ.
[9] पा. सू. ६. १. १२.
[10] बहुवचनप्रसङ्गः — अ.
[11] कृत्यं — अ, इ, ऋ.

6

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दित्यर्थः। 'असामर्थ्यान्न समासः' इत्युक्तं निराह — **सर्वत्रेति**। क्षीरौदन इत्यादौ। **दध्योदन इति**। दध्ना सिक्त ओदनः **दध्योदनः**। [1]'अन्नेन व्यञ्जनम्' इति समासः। **इह त्विति**। [2]खडिधातुवाच्यक्रियापेक्षयेत्यर्थः। उक्तं साक्षात् सामर्थ्यं निराह — **खण्डशब्दस्येति**। अतः साक्षात् सामर्थ्यं नास्तीत्यर्थः। क्रियाद्वारकं सामर्थ्यमाह — [3]**करोतिक्रियेति**। 'शङ्कुलया खण्डः' इत्यत्र करोतिक्रियापेक्षा, 'दध्ना पटुः' इत्यत्र भुजिरूपक्रियाविशेषापेक्षेति वैषम्यमाशङ्क्याह — **परस्परेति**। योग्यक्रियापेक्षायाः सर्वत्रावश्यकत्वादित्यर्थः। जातिक्रियाद्रव्यवाचिभिः समासनिरासाय गुणवचनग्रहणम्। तत्र जातिद्रव्ययोस्तत्कृतत्वाभावात् क्रियावाचिना च समासस्येष्टत्वाद् 'गुणवचनेन' इति व्यर्थमित्याह — **अयं भाव इति**। ननु वपावच्छब्दस्य जातिक्रियाशब्दत्वाभावेन गुणवचनत्वात् कथं तेन तद्व्यावृत्तिः, अत आह — **वपावच्छब्दस्त्विति**। [4]'सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते' इति द्रव्यवचनोऽयमित्यर्थः। **केवलेति**। अनभिधानादनङ्गीकाराच्चेति भावः। ननु गुणवाचिशब्दलाभाय वचनग्रहणमावश्यकमिति 'इयता सिद्धम्' इत्ययुक्तम्, अत आह — **अर्थेनेति**। 'गुणमुक्तवता' इत्येतदुपपादयति — **तत्रेति**। यद्वा 'दध्ना पाटवम्' इत्यादावतिप्रसङ्गं निराह — **तत्रेति**। गुणमुक्त्वाभेदोपचारेण गुणिवचनेनेति यावत्। मतुब्लोपेन द्रव्यवाचित्वे शब्दानित्यत्वमाशङ्क्याह — [5]**अर्थभेद इति**। सैन्धवादावपीत्यर्थः। [6]'सैन्धवमानय' इत्यादावनेकशब्दकल्पनायां मानाभावादाह — **एकत्वे** [7]**वेति**। [8]**प्रयोगभेदेनेति**। 'पटस्य शुक्लः, शुक्लः पटः' इत्यादावपीत्यर्थः। ननु 'भवति हि' इत्ययुक्तम्, कारकाणां क्रिययैव साक्षात् संबन्धात्, क्रियाद्वारा तु द्रव्येण। [9]स च 'दध्ना पटुः' इत्यत्रापि [10]तुल्यः, अत आह — **अव्यतिरिक्तेति**। अव्यतिरिक्तकल्पत्वं [11]समासान्तर्भावे हेतुः, [12]तत्रान्तरङ्गप्रतीयमानत्वम्। **विपर्ययादिति**। बहिरङ्गभुजिक्रियापेक्षं तत्र सामर्थ्यम्, नान्तरङ्गकरोतिक्रियापेक्षमित्यर्थः। तत्कृतोऽर्थोऽभिधेयो यस्य गुणवचनस्येति विग्रहं मत्वा 'अर्थग्रहणमनर्थकम्' इति वार्तिकम्। **तत्कृतस्येति**। तत्कृतेन गुणवचनेनेत्युक्ते तत्कृतगुणस्य वाचकेनेत्यर्थप्रतीतेरित्यर्थः। अन्यथापि लभ्यस्य निर्देशो व्यर्थः, अत आह — **सामर्थ्येति**। ननु समस्तस्य 'अर्थेन' इत्यस्य कथं विभागः, 'कृत' [13]इत्यविभक्तिकस्य कथं वा प्रयोगः, अत आह — [14]**तत्कृतेति**। **वाक्यभेद इति**। योगविभागशब्देन वाक्यभेद एव विवक्षितः। अर्थशब्देन समासस्य [15]वाक्यभेदमात्रेण [16]सिद्धेरिति भावः। ननूनशब्दपर्यायग्रहणायार्थग्रहणं तत्र कर्तव्यमेव, अत आह — **अर्थशब्देनेति**। ननु 'शङ्कुलया खण्डः' इत्यत्र [17]खडिधातुवाच्य[18]क्रियापेक्षसामर्थ्यसंभवात् करोति[19]क्रियापेक्षं सामर्थ्यं किमर्थमुक्तम्, अत आह — **सत्त्व इति**।

---

[1] पा. सू. २. १. ३४.
[2] खण्डिधातु — ऋ.
[3] खण्डशब्दस्येति — अ, इ, ऋ.
[4] तन्त्रवार्तिकम् ३. १. ६. मीमांसाभाष्यव्याख्याने।
[5] प्रदीपे 'अर्थभेदेन शब्दभेदात्' इत्यत्र 'अर्थभेदे शब्दभेदात्' इत्यन्नंभट्टपाठ इति भाति।
[6] सैन्धवानानयेत्यादौ — अ.
[7] चेति — अ.
[8] क्रियाभेदेनेति — अ.
[9] सा च — ऋ.
[10] तुल्या — ऋ.
[11] समासार्थान्तर्भाव इत्यर्थः।
[12] अव्यतिरिक्तकल्पत्व इत्यर्थः।
[13] इत्यविभक्तिः। तस्य कथं वा — इ.
[14] तत्कृतेनेति — अ, इ, ऋ.
[15] वाक्यभेदेन — अ.
[16] सिद्धिरिति — अ, इ.
[17] खण्डिधातु — ऋ.
[18] क्रियापेक्ष्यसामर्थ्य — अ.
[19] क्रियापेक्ष्यं — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]'सत्त्वे निविशतेऽपैति पृथग्जातिषु दृश्यते। आधेयश्चाक्रियाजश्च सोऽसत्त्वप्रकृतिर्गुणः' इति [2]'वोतो गुणवचनात्' इत्यत्रोक्तम्। [3]यो द्रव्यमाश्रयति, तत एव द्रव्यात् पाकेनापैति, [4]भिन्नजातीयेषु स्फटिक[5]वज्रादिषु दृश्यते स गुणः। अनेन जातिव्यावृत्तिः। क्रियायामनतिव्याप्तये 'आधेयश्चाक्रियाजश्च' इति। **आधेयः** उत्पाद्यः, **अक्रियाजः** अनुत्पाद्यः। नित्यानित्योभयरूप इति यावत्। क्रिया सर्वाप्यनित्यैव। गुणस्तु नित्यगतो नित्यः, अनित्यगतोऽनित्य इत्युभयरूपः। एवमपि हस्तपादादिविजातीयावयवसमवेतावयविद्रव्येऽनतिव्याप्तये 'असत्त्वप्रकृतिः' इति, अद्रव्यस्वभावः। द्रव्यजातिक्रियाभिन्नो गुण इति [6]विवक्षितं भवति॥

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः २. १. ३१.

[२, ५९२–५९३]

(उद्द्योतनम्) साधयतीति। तथा च पूर्वसूत्रे समासार्थमत्रत्यमर्थग्रहणं न भवतीत्युक्तमिति भावः। प्रौढिवादेनाह — **पूर्वसूत्र इति**। विवक्षावशादेव शब्दप्रधानत्वार्थप्रधानत्वयोरभ्युपगमे [7]'स्वं रूपम्' इति सूत्रं व्यर्थं स्यात्, सर्वत्र विवक्षाज्ञापकाभावेन संदेहापत्तेश्चेति प्रौढिवादोऽयम्। **हेत्विति**। शास्त्रारम्भप्रयोजकप्रयत्नो हेतुः, तस्य [8]भूतकालत्वेन **संप्रेक्षितत्वात्** विवक्षितत्वात्, [9]कार्यशब्दस्य कारण उपचाराद् भूतप्रत्यय इति भावः। क्व वक्ष्यते, अत आह — **सदृशेति**। एतयोरुत्तरपदयोः सादृश्यवाचिनि तत्पुरुषे पूर्वपदं प्रकृतिस्वरम्। पितृसदृशः, मातृप्रतिरूपः। पितृमातृशब्दावन्तोदात्तौ निपातितावुणादिषु। पूर्ववार्तिकं व्याचष्टे — **पूर्वपदेति**। **तत्पुरुष इति**। [10]'तत्पुरुषे तुल्यार्थतृतीयासप्तम्युपमानाव्ययद्वितीयाकृत्याः'। तत्पुरुषे तुल्यार्थादीनि पूर्वपदानि प्रकृतिस्वराणि। 'षष्ठ्यर्थमिति चेत्' इत्युत्तरवार्तिकं व्याचष्टे — **अथेति**। **षष्ठ्यपीति**। [11]'तुल्यार्थैरतुलोपमाभ्याम्' इत्यनेन। 'मातृसदृशः' इत्यत्र तृतीयासमास एव, 'मातुः सदृशः' इत्यव्यविकन्यायेन[12] वाक्यमेवास्तु, अत आह — **तथा चेति**। **अलुकीति**। [13]'षष्ठ्या आक्रोशे' इत्यनेन। **अथेति**। हेतौ षष्ठ्यभावेन षष्ठीसमासेनान्यथासिद्ध्यभावादित्यर्थः। **पूर्वेति**। [14]'तृतीया तत्कृत'

---

[1] महाभाष्यम् ४. १. ४४.

[2] पा. सू. ४. १. ४४.

[3] यद् द्रव्यमाश्रयति — अ.

[4] भिन्नजातिस्फटिक — अ; भिन्नजातीये स्फटिक — ऋ.

[5] वज्रादौ — ऋ.

[6] विवक्षितो भवति — अ.

[7] पा. सू. १. १. ६८.

[8] दूरकालत्वे संप्रेक्षितत्वात् — अ.

[9] 'कारणशब्दस्य कार्यं उपचारात्' इति युक्तं भाति। उद्द्योते तु कैयटेनेदं वचनं भाष्यकारीयमिति धिया 'हेतुकालसंप्रेक्षितत्वात्' इति द्वितीयं समाधानमुक्तमिति तत्र हेतुशब्देन वार्तिककारोच्चारणं विवक्षित्वा तस्य यः कालस्तस्य मनसि स्थापितत्वादित्यर्थमुक्त्वा कारणकालं कार्यं उपचर्य प्रयोगः, इत्युक्तम्। अन्नंभट्टेन त्वस्यापि समाधानस्य वार्तिकारीयवचनत्वाशयेनैव प्रवृत्तिः प्रतिपाद्यते।

[10] पा. सू. ६. २. २.

[11] पा. सू. २. ३. ७२.

[12] अयं न्यायः ४. १. ८८ सूत्रे महाभाष्य उक्तः।

[13] पा. सू. ६. ३. २१.

[14] पा. सू. २. १. ३०.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। सादृश्यस्य [1]विद्याकृतत्वात् तत्कृतत्वमस्तीत्यर्थः। [2]स्वरसूत्रे सदृशग्रहणं कर्तव्यम्, अस्मिन् सूत्रे न कर्तव्यमिति स्थितम् ॥

कर्तृकरणे कृता बहुलम् २. १. ३२.

[२, ५९३]

(उद्द्योतनम्) ननु 'कृता बहुलम्' [3]इति त्यक्त्वा 'कर्तृकरणे क्तेन' इत्युक्तौ लाघवम्, अत आह — **अयं भाव इति** ॥

कृत्यैरधिकार्थवचने २. १. ३३.

[२, ५९४]

(उद्द्योतनम्) पूर्वसूत्रेणान्यथासिद्धिं निराह — **स्तुतेरिति**। 'काकपेया नदी' इत्यत्र स्तुतिर्निन्दा वा विवक्षिता। तत्र काकानां कर्तृकरणत्वे मुख्ये न स्त इति पूर्वसूत्रेण प्राप्तिर्नास्तीत्यर्थः। **अन्ये त्विति**। पूर्वसूत्रस्यैवायं प्रपञ्चः। बहुलग्रहणाद् गौणमुख्यन्यायो नाश्रीयत इति भावः। प्रपञ्चार्थत्वे लाभमाह — **तथा चेति**। 'काकपीता' इत्यत्राधिकार्थेऽपि पूर्वपूत्रेण समासः सिध्यतीत्यर्थः। कृत्यैरित्यस्य नियमार्थत्वे कथं तत्सिद्धिः, अत आह — **ततश्चेति**। 'काकपीता' इत्यादिप्रयोगदर्शनादित्यर्थः। 'बुस' [4]इत्यादावनधिकार्थत्वमाह — **अग्नेरिति**। [5]अग्नेरल्पत्वमत्र प्रतिपाद्यत इत्यर्थः। 'कृत्यैरधिकार्थे' इत्यनेन 'साधनं कृता' इत्यस्य समानार्थत्वाभावाद्वाशब्दोऽनुपपन्नः, अत आह — **बहुलेति**। **चुपेरिति**। 'चुप मन्दायां गतौ' इति भौवादिकः ॥

अन्नेन व्यञ्जनम् २. १. ३४.

भक्ष्येण मिश्रीकरणम् २. १. ३५.

[२, ५९५–५९७]

(उद्द्योतनम्) असामर्थ्योपपादनपूर्वकं वार्तिकमवतारयति — **दधीति**। ननु समासात् क्रियावगमोऽस्तीत्युक्तम्[6], अत आह — **तस्याश्चेति**। समासात् पूर्वं सामर्थ्येन भाव्यम्। तदानीं क्रियोपस्थापकं नास्तीत्यर्थः। दीर्घकाष्ठद्वयस्य निःश्रेण्यन्तर्भावात् ताभ्यां तस्याः सामर्थ्यमयुक्तम्, अत आह — [7]**निःश्रयणीशब्देनेति**। नानाशब्दस्य कारकविशेषणत्वे दध्योदनयोः कर्मकरणभावेन नाना-

---

[1] निराकृतत्वात् — अ.
[2] स्वरमात्रे — अ.
[3] इत्युक्त्वा — अ.
[4] इत्यादावनधिकारार्थत्वमाह — अ; इत्यादावधिकार्थत्वमाह — इ, ऋ.
[5] अग्निकल्पत्वमत्र — अ.
[6] अस्तीत्ययुक्तम् — अ.
[7] निःश्रेणिशब्देनेति — इ, ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कारकत्वात् समासनिषेधः स्यात्, अत आह — **भिन्नेति**। स्थितौ दध्नः करणत्वासंभवादाह — **ध्रियतामिति**। [1]'धृङ् धारणे' इति तौदादिकस्य कर्तरि शे [2]रिङादेशे च रूपम्। सामान्यशब्दस्य विशेषपरत्वमभिप्रेत्याह — **जीवत्विति**। दध्नो भुजिद्वारा प्राणधारणकरणत्वमस्तीत्यर्थः। **तत्र** प्राणधारणे। 'षष्ठीसमासश्च' इत्यस्य संगतिमाह — **उत्तरपदेति**। [3]'न लोक' इत्यादिना षष्ठीनिषेधात् 'अश्वानाम्' इत्ययुक्तम्, अत आह — **संबन्धेति**। [4]'कर्तृकर्मणोः' इत्यादिषष्ठ्यास्तेन निषेधः, अत्र तु [5]शेषे षष्ठीत्यर्थः। नन्वेवं 'दधिघटः' इत्यस्य दधिपूर्णो घट इति विग्रहवाक्यं न स्यादित्यत आह — **दधिपूर्ण इति**। [6]**समानार्थं** 'दधिघटः' इत्यनेन। नन्वेवं हल्ङ्यादिलोपविधानमपि व्यर्थं स्यात्, विभक्तिरहितस्य शब्दान्तरत्वात्, अत आह — **अन्यत्रेति**। **अग्निचिदिति**। हल्ङ्यादिलोपः। **दधि** [7]'स्वमोर्नपुंसकात्' इति लुक्। **पञ्च** [8]'षड्भ्यो लुक्'। प्रत्ययलक्षणेन तत्र पदत्वम्। दध्योदन इत्यत्र युक्तार्थाभावादाह — **युक्तग्रहणमिति**। समासे उपसेचनादिप्रतीतिप्रकारमाह — [9]**तदेतदिति**। संप्रतीयत इति कथमिति प्रश्ने 'संप्रत्ययाच्च' इति साध्यस्यैव हेतुत्वाभिधानमयुक्तम्, अत आह — **सर्वेति**। [10]व्याख्यानस्य फलमाह — **अत एवेति**। प्रतिज्ञातस्य साध्यविशिष्टस्य [11]धर्मिण एकदेशः साध्यरूपो न हेतुरित्यर्थः। एषां [12]विशेषणानां 'दधि' इत्युक्ते संप्रत्ययः। तत्र हेतुः — **संभवादिति**। शब्दप्रयोगं विनाप्यर्थप्रतीतौ शब्दाप्रयोगे दृष्टान्तं व्याचष्टे — **प्रकारान्तरेणेति**। **चरितार्थत्वादिति**। तावतैव [13]प्रवृत्तिनिवृत्तिसिद्धेरित्यर्थः। [14]एतेन चेष्टायाः पृथक् प्रामाण्यं सूचितम्॥

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २. १. ३६.

[२, ५९८–६०३]

(उद्द्योतनम्) सूत्रे चतुर्थीग्रहणस्य संकोचमाह — **चतुर्थीति**। तथा च 'देवदत्ताय हितं भूयात्' इत्यत्र हितशब्देन चतुर्थ्यन्तस्य समासो न भवति। 'रन्धनाय स्थाली' इत्यत्रातिव्याप्तिः, बलिरक्षितग्रहणेन पौनरुक्त्यम्। 'विकृतिश्चतुर्थ्यन्ता' इति [15]पूर्वाचार्यन्यासः, तत्राश्वघासादिष्वव्याप्तिः। **इतरः** तटस्थः। **स्ववचनेन** प्रष्टृवचनेनैव। यूपदार्वादौ समासस्येष्टत्वात् सर्वशब्दस्य संकोचो वाच्यः, तत्र केनाकारेण संकोचः, अत आह — **असत्यपीति**। **देयस्येति**। [16]'कर्मणा यमभिप्रैति' इत्युक्तेरित्यर्थः। अत्र सूत्रे वाग्रहणाभावाद्वचनं व्यर्थम्, अत आह — **महेति**। सामान्येनोक्तौ

---

[1] धृङ् अवस्थान इत्यस्यार्थानुवादोऽयम्।
[2] रिङादेशेन रूपम् — अ.
[3] पा. सू. २. ३. ६९.
[4] पा. सू. २. ३. ६५.
[5] शेषषष्ठीत्यर्थः — ऋ.
[6] प्रदीपे 'तत्समानार्थम्' इत्यत्र 'समानार्थम्' इत्यन्नंभट्टपाठ इति भाति।
[7] पा. सू. ७. १. २३.
[8] पा. सू. ७. १. २२.
[9] 'तदेतदिति' इत्येव प्रतीकः अ, इ, ऋ, मातृकासूपलभ्यते। 'एतदिति' इति युक्तं भाति।
[10] व्याख्यानफलमाह — अ.
[11] 'धर्मिणः' इति नास्ति — अ.
[12] प्रदीपे 'विशेषाणाम्' इत्यत्र 'विशेषणानाम्' इत्यन्नंभट्टपाठ इति भाति।
[13] प्रकृतिनिवृत्ति — ऋ.
[14] एतेन चापृथक्प्रामाण्यम् — ऋ.
[15] पूर्वाचार्याः, तत्राश्व — अ.
[16] पा. सू. १. ४. ३२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'किं विकृतिः' इति प्रश्नो न युक्तः, अत आह — **तदनन्तरेति**। **आनन्तर्यमिति**। [1]'अर्थतो ह्यसमर्थानामानन्तर्यमचोदना' इति न्यायादिति भावः। **पूर्ववदिति**। आनन्तर्यं मत्वा प्रश्नः। तदनुपयोगेन प्रतिवचनम्। [2]तादर्थ्यान्तिर्गतसंबन्धसामान्यस्य तादर्थ्यमविवक्षित्वा विवक्षा न संभवति, अत आह — **अथवेति**। तर्हि [3]'रन्धनस्थाली' इत्यपि षष्ठीसमासः स्यात्, अत आह — **रन्धनेति**। नन्वश्वघासादिवद्यूपदार्वादिष्वपि षष्ठीसमास एवास्तु, किं चतुर्थीसमासेन, अत आह — **यूपेति**। चतुर्थ्यन्तं [4]'चतुर्थ्यन्तार्थार्थवाचिन्युत्तरपदे प्रकृतिस्वरम्। भाष्ये **प्रकृतिस्वरत्वेन** [5]'चतुर्थी तदर्थे' इति विहितेन। भाष्ये **अर्थे क्ते चेति**। अर्थशब्दे परे चतुर्थ्यन्तं प्रकृतिस्वरम्। मात्र इदं मात्रर्थम्। क्तान्ते चोत्तरपदे चतुर्थ्यन्तं प्रकृतिस्वरम्। गोहितम्, गोरक्षितम्। भाष्ये **यथाजातीयकानामिति**। [6]'चतुर्थी तदर्थे' इति सूत्रे। एवं चाश्वघासादीनां चतुर्थीसमासेऽप्यन्तोदात्तत्वमेव। 'गुर्वर्थम्' इत्यस्य तु [7]'अर्थे च'[8] इति पूर्वपदप्रकृतिस्वरत्वमिति ज्ञेयम्। ननु प्रत्ययपक्षे तादर्थ्यप्रतीतिश्चतुर्थ्यन्तादुत्पत्तिश्च कथं लभ्यते, अत आह — **तदर्थमिति**। विकृतिवाचिनश्चतुर्थ्यन्ताच्छः स्यात्, विकृत्यर्थायां प्रकृतावभिधेयायाम्। अङ्गारेभ्य एतानि काष्ठान्यङ्गारीयाणि। **तदर्थ इति**। चतुर्थ्यन्तात् प्रकृत्यर्थार्थे सर्थप्प्रत्यय इत्यर्थः। **आक्षिप्यत इति**। चतुर्थ्यैव [9]तादर्थ्यभानात्। अश्वघासादौ चतुर्थीं विनापि तादर्थ्यं भासते, अत आह — **तस्मै हितमिति**। तेन [10]'तस्मै हितम्' इत्यनन्तरं वा [11]'तदर्थे सर्थप्' इति वक्तव्यम्। निष्पन्नमर्थमाह — **तेनेति**। [12]'अर्थे' इति सूत्राकरणं [13]पकारस्य प्रयोजनमित्याह — **तेनेति**। ननु 'राज्ञे [14]इदम्' इति विग्रहो भवत्येव, अत आह — **प्रत्यय इति**। प्रत्ययेन सह विग्रहो नास्तीत्यर्थः। लक्षणाभावात् 'अथापि' इत्ययुक्तम्, अत आह — **आदिरिति**। [15]'षः प्रत्ययस्य' इत्यत्र द्विषकारनिर्देशाभावात् 'संहितया' इत्युक्तम्। **कृतेति**। [16]'ष्टुना' इत्यनेन। **सुशब्दस्य त्विति**। वृत्तिविषय एव तस्य सत्त्ववाचित्वमिति भावः। [17]विग्रहमात्रं न निषिध्यत इत्याह — [18]**अत्र चेति**। **तादर्थ्ये इति**। ब्राह्मणस्य पय इति संबन्धे भवत्येवेत्यर्थः। आदेशेन विग्रहाभावे हेतुमाह — [19]**तादर्थ्ये इति**। समासानन्तरभावित्वादादेशस्येत्यर्थः। ननु पयश्शब्दस्यार्थशब्द आदेशश्चेत् 'ब्राह्मणार्थं पयः' इति सह प्रयोगो न स्यात्, अत आह — **अर्थेति**। दध्यादीनामप्यर्थशब्द आदेश इति तद्व्यावृत्त्यर्थमित्यर्थः। सूत्रे

---

[1] 'आनन्तर्यमचोदना' इति मीमांसासूत्रम् ३. १. २४. एतन्मूलकोऽयं न्यायः 'यस्य येनार्थसंबन्धो दूरस्थस्यापि तेन सः। अर्थतो ह्यसमर्थानामानन्तर्यमकारणम्' इति। अयं न्यायः न्यायसुधायां २. २. ९. सूत्रीयविचारे उक्तः। अयमत्र 'आनन्तर्यमचोदना' इत्यर्थानुवादेन निर्दिष्टः। न्यायसुधायां बनारस् विद्याविलासमुद्रालयमुद्रिते 'आनर्थक्यमकारणम्' इति दृश्यते। तत्र मुद्रणाशुद्धिरिति भाति।

[2] तादर्थ्यानिन्तर्गत — ऋ.

[3] रन्धनाय स्थालीत्यपि — अ.

[4] चतुर्थ्यान्तार्थवाचिनि — अ.

[5] पा. सू. ६. २. ४३.

[6] पा. सू. ६. २. ४३.

[7] पा. सू. ६. २. ४४.

[8] चकारोऽधिकः। 'अर्थ इति' इति युक्तम्।

[9] 'तादर्थ्यभावात् — अ, इ, ऋ.

[10] पा. सू. ५. १. ५.

[11] तादर्थ्ये — अ.

[12] पा. सू. ६. २. ४४.

[13] प्रकारस्य प्रयोजनमत आह — अ.

[14] हितमिति — अ.

[15] पा. सू. १. ३. ६.

[16] पा. सू. ८. ४. ४१.

[17] विग्रहवाक्यं न निषिध्यते — अ.

[18] 'अत्र चेति' इत्यन्तमेव 'इ' मातृकायामुपलभ्यते।

[19] प्रदीपे 'चतुर्थ्याश्च समासे निवृत्तत्वात्' इति प्रदीपे पाठो दृश्यते। 'तादर्थ्ये चतुर्थ्याश्च समासे निवृत्तत्वात्' इत्यन्नंभट्टपाठ इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वाशब्दो न दृश्यते, अत आह — **महेति**। ज्ञापकत्वमुपपादयति — **कुबेरेति**। हितसुखयोस्तादर्थ्यं[1] नास्ति, अत एव हितसुखग्रहणं तादर्थ्यचतुर्थीसमासज्ञापनार्थमित्युक्तम्। बलिरक्षितयोस्तु[2] 'चतुर्थी' इत्यनेनैव [3]समासे [4]वावचनेनार्थादेशविकल्पे च सिद्धेऽनयोर्ग्रहणं प्रकृतिविकृतिव्यतिरिक्ततदर्थसमासे उत्तरपदस्य नित्योऽर्थादेश इति ज्ञापकं संपद्यत इत्यर्थः। **पक्ष इति**। तथा च 'उदार्थः' इत्यपि स्यात् प्रयोग इत्यर्थः। **एतयोः** [5]चतुर्थ्यर्थशब्दयोः। युगपत्प्रयोगेऽसत्यपीत्यन्वयः। **प्रक्रियायां** समासवृत्तौ। ननु [6]'परवल्लिङ्गम्' इति वचनात् कथं वचनं विना सर्वलिङ्गता, अत आह — **ततश्चेति**। [7]'परवल्लिङ्गम्' इत्यपि न वक्तव्यमित्यर्थः॥

पञ्चमी भयेन २. १. ३७.

[२, ६०४]

(उद्द्योतनम्) [8]'स्वं रूपम्' इति स्वरूपग्रहणं वा, व्याख्यानतोऽर्थग्रहणं वा। उभयथापि वार्तिकमावश्यकमित्याह — **भयेनेति**॥

सप्तमी शौण्डैः २. १. ४०.

[२, ६०४]

(उद्द्योतनम्) ननु 'शौण्डैः' इत्यनेन शौण्डादि[9]गणग्रहणादादि[10]ग्रहणं न कर्तव्यम्, अत आह — [11]**शौण्डैरिति**। ननु धूर्तादीनां शौण्ड[12]शब्देनानभिधानात् कथं बहुवचनेन तल्लाभः, अत आह — **धूर्तादीनामिति**। शौण्डमात्रग्रहणे बहुवचनानर्थक्यादजहल्लक्षणात्राश्रीयत इत्यर्थः। अक्षेष्विति कथमधिकरणसप्तमी, अत आह — **वृत्तीति**। **शौण्डः** प्रवीणः, तस्याक्रियार्थत्वात् 'वृत्ति' इत्युक्तम्। अक्षेषु प्रसक्तो [13]व्यासक्तो वाक्षशौण्डशब्दार्थ इत्यर्थः। **अन्तःशब्द इति**। अवयव[14]वाच्यन्तःशब्दः, अगारेऽन्तः अगारान्तः, [15]वृक्षे शाखादिवदित्याहुः॥

ध्वाङ्क्षेण क्षेपे २. १. ४२.

[२, ६०५]

(उद्द्योतनम्) समासादेवेवार्थो गम्यत इत्याह — **उपमानेति**॥

---

[1] तादर्थ्यमस्ति — अ.

[2] तुशब्दो नास्ति — अ.

[3] 'समासे' इति नास्ति — अ.

[4] वाचनिकार्थादेशविकल्पे — अ; वावचनेनार्थदेव विकल्पे — ऋ.

[5] चतुर्थ्यन्तार्थशब्दयोरित्यर्थः।

[6] पा. सू. २. ४. २६.

[7] पा. सू. २. ४. २६.

[8] पा. सू. १. १. ६८.

[9] 'गण' इति नास्ति — ऋ.

[10] ग्रहणमकर्तव्यम् — अ.

[11] प्रदीपे 'बहुवचनमर्थग्रहणे' इति दृश्यते। 'शौण्डैरिति बहुवचनमर्थग्रहणे' इत्यन्नंभट्टपाठ इति भाति।

[12] शब्देनाभिधानात् — अ.

[13] 'व्यासक्तः' इति नास्ति — अ.

[14] वाच्यन्तशब्दः — अ.

[15] वृक्षशाखादि — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कृत्यैर्ऋणे २. १. ४३.

[२, ६४५]

(उद्द्योतनम्) देयविशेषे ऋणशब्दस्य प्रसिद्धेर्नियोगतः कर्तव्ये कथं वृत्तिः, अत आह — **अवश्येति।** **क्वचित्** कूलं पिपतिषतीत्यादौ। पातानुकूलव्यापारमात्रमिच्छाशब्देन गृह्यते॥

क्षेपे २. १. ४७.

[२, ६०५]

(उद्द्योतनम्) उपमेयेऽनवस्थाने हेतुमाह — [1]**चापल्यादिति**॥

पात्रेसमितादयश्च २. १. ४८.

[२, ६०६]

(उद्द्योतनम्) 'परमम्' इत्यत्रासामर्थ्यादेव न समास इत्यवधारणं व्यर्थम्, अत आह — — **वैयधिकरण्येऽपीति।** [2]विस्पष्टं पटुरिति विस्पष्टशब्दस्य पाटवविशेषणत्वात् सामर्थ्याभावेऽपि यथा सुप् सुपेति समासस्तथेहापीत्यर्थः। क्लीबत्वं निर्वहति — **क्रियेति।** ननु तत्र [3]'विस्पष्टादीनि गुणवचनेषु' इति ज्ञापकादसमर्थसमासो युक्तः, नेह तथा ज्ञापकम्, अत आह — **परमा इति।** अत्र [4]'सन्महत्' इति समासः प्राप्नोति॥

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन २. १. ४९.

[२, ६०६]

(उद्द्योतनम्) [5]**वस्तु** अर्थम्। एकत्वं विशेषणं यस्या नद्या इति [6]विग्रहः॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ द्वितीयाध्यायस्य प्रथमे पादे द्वितीयमाह्निकम्॥

---

[1] प्रदीपे 'चापलादिति भावः' इत्यत्र 'चापल्यादिति भावः' इति निर्णयसागरमुद्रिते पाठः।
[2] विस्पष्टपटुरिति — अ.
[3] पा. सू. ६. २. २४.
[4] पा. सू. २. १. ६१.
[5] 'वस्तु, अर्थम्' इति नास्ति — अ.
[6] प्रदीपे 'एकत्वविशेषणान्नदी' इति पाठो दृश्यते। 'एकत्वविशेषणा नदी' इत्यन्नंभट्टपाठ इति ज्ञायते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य प्रथमपादे तृतीयमाह्निकम्

तद्धितार्थोत्तरपदसमाहारे च २.१.५१.

[२, ६०७–६१२]

(उद्द्योतनम्) शब्दस्वरूपविषयोऽयं न प्रश्नः, किं त्वर्थविशेषविशिष्टशब्दविषय इत्याह — **किमिति।** उभयत्र को दोषः, अत आह — **तत्रेति।** तयोर्मध्य इत्यर्थः। **द्रव्यस्येति।** 'पञ्चपूलीमानय' इत्यत्र द्रव्यस्याशब्दार्थत्वादिति भावः। दोषान्तरमाह — **समूहेति।** [1]"तस्य समूहः' इति समूहस्य तद्धितार्थत्वात् तद्धितार्थग्रहणेनैव [2]सिद्धेः समाहारग्रहणम् न कर्तव्यम्। [3]न च समाहारः समूहादन्यः, [4]तस्य समूहरूपत्वादित्यन्वयः। **उपसर्जनेति।** पञ्च कुमार्यः समाहृताः पञ्चकुमारीत्यत्र कुमारीणां प्राधान्यात्। समाहारप्राधान्ये तूपसर्जनत्वमित्यर्थः। **द्विगुरिति।** समाहारप्राधान्ये तस्यैकत्वान्न वक्तव्यम्। समाहृतप्राधान्ये तु द्विवचनादिनिवृत्तये वक्तव्यम्। विनिगमकमाह — **द्रव्यस्यैवेति।** ननु [5]"अकर्तरि' इति सूत्रे संज्ञाग्रहणादत्र कथं घञ्, अत आह — **संज्ञेति।** 'को [6]भवता लाभो लब्धः' इत्याद्यर्थमित्यर्थः। वास्तवप्राधान्येऽपि[7] राजपुरुषादाविव शास्त्रीयमुपसर्जनत्वं स्यात्, अत आह — **समासेति।** 'पञ्च कुमार्यः समाहृताः, पञ्च कुमारीः समाहृताः पश्य' इत्याद्यनेकविभक्त्यन्तविग्रहसंभवात् [8]"एकविभक्ति च' इत्यपि नोपसर्जनत्वमिति भावः। **यद्यपीति।** [9]"द्विगुरेकवचनम्' [10]"स नपुंसकम्' इत्युक्तेरित्यर्थः। 'पञ्चकुमारि' इति [11]भाष्यमुपलक्षणार्थमित्याह — [12]**पञ्चखट्वीति।** अत्र [13]"वा टाबन्तः' इति यदा स्त्रीत्वं तदा नपुंसकह्रस्वत्वाभावात् [14]"गोस्त्रियोः' इति ह्रस्वत्वं वाच्यम्, तदभावे [15]"द्विगोः' इति ङीबभावात्। ह्रस्वत्वं चोपसर्जनत्वाभावान्नास्तीति 'पञ्चखट्वी' इति न सिध्यतीत्यर्थः। [16]तस्य क्वचित् संभवमाह — **पञ्चपूलीति।** पूलसंग्रहाय 'गुणे वा'[17] इत्युक्तम्, पूलानां समानपरिमाणत्वात्। **तत्र** बुद्ध्या समीपीकरणे। कार्ये कारणवदुपचार इत्यर्थः। **तच्च** अर्जनम्। तर्हि 'यद्येवम्' इति शङ्कानुत्थानम्, अत आह — **यथोक्तमिति।** गोषूक्तसमाहाराभावमाह — **नानेति।** ग्रामेषु किं सादृश्यम्, अत आह — **लाभादीति।** ग्रामनगर[18]पुरादौ प्रायशो याचकानामन्येषां चार्थलाभ-

---

[1] पा. सू. ४. २. ३७.
[2] सिद्धे समाहार — अ.
[3] न च समूहः समाहारादन्यः — अ.
[4] समूहस्य समाहाररूपत्वात् — अ; तस्य समूहारोपत्वात् — ऋ.
[5] पा. सू. ३. ३. १९.
[6] भवतो लाभः — अ.
[7] अपिशब्दो नास्ति — अ.
[8] पा. सू. १. २. ४४.
[9] पा. सू. २. ४. १.
[10] पा. सू. २. ४. १७.
[11] भाष्यमपलक्षणमित्याह — अ.
[12] पञ्चखट्वेति — अ, ऋ.
[13] का. वा. २. ४. ३० – ४. 'वाबन्तः' इति वार्तिकानुवादः।
[14] पा. सू. १. २. ४८.
[15] पा. सू. ४. १. २१.
[16] औत्तराधर्यस्येत्यर्थः।
[17] चेत्युक्तम् — अ, ऋ.
[18] बहुग्रामीयव्यवहारस्थानं पुरम्, तत्र प्रधानं नगरमित्यनयोर्भेदः, इति शब्दकल्पद्रुमे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संभवात् तन्निमित्तं सादृश्यमित्यर्थः। किमिति तावत्येव नावतिष्ठते, अत आह — **केवलेनेति**। क्रिया[1]गुणसंवन्धव्यतिरेकेण केवलपदार्थप्रतीतिमात्रपर्यवसायिवाक्यप्रयोगाभावादित्यर्थः। तथापि कथं समाहारः, अत आह — **तत्रेति**। एकेन रमणीयत्वादिगुणेन दर्शनादिक्रियया वा बुद्ध्या संवन्ध एव समीपीकरणमित्यर्थः। गुणक्रिययोः समाहारनिमित्तत्वात् तद्व्यपदेश इत्याह — **तन्निमित्तत्वादिति**। द्रव्यद्वारा संभवादाह — **द्रव्यानयनमिति**। कल्पद्वयस्य भेदमाह — **पूर्वमिति**। द्रव्याकृत्योरभेदे भावसाधनपक्षेऽपि कर्मसाधनपक्षोक्तदोषमाशङ्क्याह — [2]**बुद्धिकल्पितेति**। अनुगतप्रतीतिगम्याकृतिरेका, द्रव्यं त्वनेकमिति प्रमाणसिद्धो भेदः। गवाश्वादिवदत्यन्तभेदाभावादभेदश्चास्तीति भावः। ननु पाणिन्यनुक्तस्य 'प्रत्ययोत्तरपदयोश्च' इत्यस्य विचारोऽसंगतः, अत आह — **काशेति**। **पश्चादिति**। प्रसङ्गाल्लक्षणान्तरेऽपि गुणदोषविचारः क्रियत इत्यर्थः। **दोषस्येति**। 'सिद्धं तु' इत्यादिना वक्ष्यमाणप्रकारेणेत्यर्थः। ननु 'द्विगोः' इति प्रत्ययो न विधीयत इति कथं द्विगुनिमित्तः प्रत्ययः, तदभावे कथमितरेतराश्रयता, अत आह — **पञ्चस्विति**। प्रातिपदिकत्वमत्र द्विगुनिमित्तकमिति तन्निमित्तकप्रत्ययोऽपि द्विगुनिमित्तक इतीतरेतराश्रय इत्यर्थः। ननूत्तरपदे कथमितरेतराश्रयता, द्विगोरुत्तरपदनिमित्तकत्वेऽप्युत्तर[3]पदत्वस्य द्विगुनिमित्तकत्वाभावात्, त्रयाणामपि 'बहुव्रीहिसंभवात्, अत आह — **पञ्चेति**। इतरेतराश्रयमुपपादयति — **धनशब्दस्येति**। 'बहुव्रीहिणा, उत्तरपदत्वेन' इत्युभयत्र [4]भाव्यमित्यनुषङ्गः। **तस्मिन्** बहुव्रीहौ। तत्पुरुषात् प्रागेव त्रयाणां कुतो न बहुव्रीहिः, अत आह — **सुप् सुपेति**। 'मन्यते' इत्यनेन सूचितमनु[5]शयमाह — **यदा त्विति**। द्वयोर्बहूनां वा बहुव्रीहिरिति पक्षस्य सिद्धान्तितत्वात् पूर्वोक्तरीत्येतरेतराश्रयो नास्तीत्यत आह — **अथवेति**। **एकार्थीभावादिति**। संक्षिप्तत्वे हेतुः — **किमपर इति**। ततश्च बहुव्रीह्यनन्तरं न तत्पुरुषः, किं तु ततः पूर्वमेवेत्यर्थः। [6]लक्षणे काशकृत्स्नीये 'एवं तर्हि' इत्ययुक्तम्, अर्थस्य विशेषणाभावेन सर्वस्मिन्नर्थे समासप्रसङ्गात्, अत आह — [7]**पाणिनीयमिति**। नन्वस्मिन् पक्षे उत्पन्नेन तद्धितेनाभिधेयेऽर्थे द्विगुरितीतरेतराश्रयतादवस्थ्यम्, अत आह — **तद्धितार्थ इति**। 'समासतद्धितविधौ' इति 'किमियान् न्यासः, अत आह — **न्यासद्वय इति**। अपूर्वमेतद्वचनं न कस्यचिदित्यर्थः। अस्मिन् न्यासे इतरेतराश्रयो नास्तीत्याह — **समास इति**। तत्र हेतुः — [9]**अर्थेति**। तद्धितार्थस्योत्तरपदप्रत्यययोश्च निमित्तत्वानाश्रयणान्न्यासद्वयोक्तेतरेतराश्रयो न प्रसज्यत इत्यर्थः। **तद्विषये** अर्थप्रत्ययविषये। सदृष्टान्तमन्यत्राप्रसङ्गमाह — **यथेति**। **षत्व** कूपे सिञ्चन्। **णत्व** चर्म नयन्। नन्विगन्ते द्विगाविति स्वरविधानसामर्थ्यात् 'पञ्चारत्निः' इत्यादौ द्विगुः स्यात्, अत आह — [10]**इगन्तेति**। **समाहारेति**। 'पञ्चकुमारि'

---

[1] गुणानुवन्वव्यतिरेकेण — अ.

[2] प्रदीपे 'बुद्धिपरिकल्पितभेदं' इत्यत्र 'बुद्धिकल्पितभेदं' इति पाठोऽन्नंभट्टस्येति भाति।

[3] पदस्य — अ.

[4] प्रदीपे 'समासेन भवितव्यम्' इत्यत्र 'समासेन भाव्यम्' इत्यन्नंभट्टपाठ इति भाति।

[5] अनुबन्धमित्यर्थः।

[6] लक्षणं काशकृत्स्नीयम् — ऋ.

[7] प्रदीपे 'पाणिनीयलक्षणम्' इत्यत्र 'पाणिनीयं लक्षणम्' इति पाठोऽन्नंभट्टस्येति भाति।

[8] 'किमीयोऽयं न्यासः' इति युक्तं भाति। कस्यायमित्यर्थे।

[9] प्रदीपे 'परनिमित्तानपेक्षणात्' इत्यत्र 'अर्थपरनिमित्तानपेक्षणात्' इत्यन्नंभट्टपाठः स्यादिति भाति।

[10] 'द्विगाविति' इत्येव प्रतीकोऽत्रोपलभ्यते — अ, ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादौ । नन्वेवं 'पञ्चकपालः' इत्यादौ [1]तद्धितस्य लुकि कर्तव्ये द्विगुसंज्ञा [2]न स्यादित्यपि कुतो नोक्तम्, अत आह — **यानीति**। इगन्तादौ परे द्विगुसमासे पूर्वपदं प्रकृतिस्वरमिति [3]'इगन्त-कालकपाल' इत्यादिसूत्रार्थः। नित्यशब्दपक्षे कल्पितप्रकृतिप्रत्ययविभागेनान्वाख्यानमात्रं क्रियते, न त्वपूर्वप्रत्ययः समासो वा क्रियत इति नान्योन्याश्रय इत्याह — **पाञ्चनापितिरिति**। पञ्चानां नापितानामपत्यमिति [4]'अत इञ्'। [5]'अनपत्ये' इत्युक्तेर्नेञो लुक्। कथमत्र संज्ञायाः प्रवेशः, कथं च तस्या अनित्यत्वम्, अत आह — **प्रत्ययसंज्ञा[6]संबन्धमिति**। संज्ञासंबन्धमुत्तरपदत्वं [7]चाश्रित्येत्यन्वयः। समाससंज्ञाप्रतिबद्धमित्युत्तरपदत्वस्य विशेषणम्। नन्वसंज्ञाश्रयोऽयं नेतरेतराश्रयः, किं तु संज्ञाश्रयः, तत्र कथं भाविसंज्ञाश्रयेण परिहारः, अत आह — **प्रत्ययोत्तरेति**। अर्थशब्दस्य प्रयोजनवाचित्वमाश्रित्यान्योन्याश्रयं निराह — **तद्धितश्चासाविति**। 'स्यात्' इत्यनेन प्रयोजनवाचित्वं कथं लभ्यते, अत आह — **स्यादितीति**। [8]प्रार्थनस्य प्रयोजनविषयत्वादर्थशब्दस्य प्रयोजन[9]वाचित्वं तेन लभ्यत इत्यर्थः। अत्रारुचिमाह — **अत्रापीति**। **इत्याह** इत्यरुचेराह॥

[२, ६०७–६१२]

(**रत्नप्रकाशः**) **कोऽयं शब्द इति**। कथं व्युत्पन्नोऽयं शब्द इत्यर्थः। **ह्रस्वत्वं न प्राप्नोतीति**। समाह्रियमाणोत्तरपदार्थप्राधान्यादिति शेषः। ननु [10]'स नपुंसकम्' इति नपुंसकत्वे सति [11]'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वो भविष्यति तत्रेत्यत आह — **द्विगुरिति**। **वक्तव्यमिति**। वचनबलाद्बहुष्वप्येकवचने सिद्धेऽपि वचनाश्रयणाद् गौरवमिति मन्यते। तदेवं सूत्रकारमते प्राचीनाभिमतसमासचातुर्विध्यमभ्युपगच्छतो भाष्यकारस्य मते च समाहारशब्दस्य कर्मघञन्तत्वे बाधकाभावेऽपि [12]'तुष्यतु दुर्जनः' इति न्यायेनाह — **एवं तर्हीति**। यत्तु "नपुंसकह्रस्वत्वे पञ्चखट्वीति न सिध्यति। पक्षे हि क्लीबत्वम्, [13]'वा टाबन्तः' इति स्त्रीत्वविधानात्। तत्र स्त्रीत्वपक्षे ह्रस्वाभावे 'पञ्चखट्वा' इत्येव स्यात्। [14]'द्विगोः' इत्यदन्तादेव ङीपो विधानात्। नपुंसकत्वपक्षे 'पञ्चखट्वम्' इति स्यादिति। तन्न, सत्यपि समासार्थस्य बहुत्वे एकत्वातिदेशवत् सत्येवान्तरङ्गे नपुंसकत्वे तत्प्रयुक्तह्रस्वे च ततः पाक्षिकस्त्रीत्वातिदेशे सति [15]'द्विगोः' इति ङीपि 'पञ्चखट्वी' इत्यादिरूपस्य सिद्धेः, 'पञ्चखट्वा' इति रूपापादनस्य निर्युक्तिकत्वाच्च। ननु [16]'येन नाप्राप्तिन्यायेन स्त्रीत्वं नपुंसकत्वापवाद इति [17]'पूर्वं त्वपवादाः' इति न्यायेन स्त्रीत्वमेव नपुंसकत्वं बाधित्वादौ भवतीति चेन्न, येन यो व्यर्थीक्रियते स तस्यापवाद इति युक्तिसहापवादलक्षणानुसारेणात्र स्त्रीत्वस्य नपुंसकत्वापवादत्वानभ्युपगमात्। अन्यथा गाः पान्ति गोपायन्ति वा गोपाः, पञ्च ते

---

[1] तद्धितलुकि — अ.

[2] न भवतीत्यपि — अ.

[3] पा. सू. ६. २. २९.

[4] पा. सू. ४. १. ९५.

[5] पा. सू. ४. १. ८८.

[6] 'नि, चौ' पुस्तकयोः 'प्रत्ययसंज्ञासंबन्धम्' इति दृश्यते। हरयाणामुद्रिते 'प्रत्ययसंज्ञासंबद्धम्' इति दृश्यमानमशुद्धमिति भाति।

[7] चाश्रित्येत्यर्थः — ऋ.

[8] 'प्रार्थनस्य' इति नास्ति — अ.

[9] वाचित्वं न लभ्यत इत्यर्थः — अ.

[10] पा. सू. २. ४. १७.

[11] पा. सू. १. २. ४७.

[12] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

[13] का. वा. २. ४. २९–५.

[14] पा. सू. ४. १. २१.

[15] पा. सू. ४. १. २१.

[16] परिभाषा ५८.

[17] परिभाषा ६३.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समाहृताः 'पञ्चगोपी' इति न स्यात्, [1]"अकारान्तोत्तरपदो द्विगुः स्त्रियाम्' इति स्त्रीत्वेन नपुंसकत्वे बाधिते ह्रस्वाभावे 'पञ्चगोपा' इत्याकारान्तस्य श्रवणापत्तेः। यद्युच्येत [2]"अकारान्तोत्तरपदो द्विगुः स्त्रियां भाष्यते' इति वचनस्य [3]'द्विगोरदन्तान्ङीबर्थत्वाद् 'अदन्तोत्तरपदो द्विगुः स्त्रियाम्' इत्येतदर्थकत्वमाश्रीयत इति, तर्हि [4]"वा टाबन्तः' इत्यस्यापि तदर्थत्वाविशेषेणाबन्तादन्तोत्तरपदो द्विगुर्वा स्त्रियामित्यर्थकत्वाश्रयणात् सिद्धमित्यवेहि। समाहरणं नाम समाह्रियमाणान्नातिरिच्यत इति स दोषस्तदवस्थ इति मन्यमानः पृच्छति — **अथेति**। 'पञ्चपूली, दशपूली' इत्यादौ समाह्रियमाणेभ्यः पूलादिभ्योऽतिरिक्तः समाहारः समुदायोऽवयवी प्रसिद्ध इत्याशयेनोत्तरमाह — **यत्तदौत्तराधर्यमिति**। अभिधीयत इत्यनुषज्यते। पूलानां यादृशः समाहारस्तादृशो गवां न संभवतीत्याशयेन पृच्छति — **कः पुनरिति**। तत्राप्यर्जनादिक्रियाप्रयुक्तैकदेशावस्थित्या गोसमूहोऽयमित्यनुभवसिद्धः समाहारोऽस्तीत्याशयेन समाधत्ते — **यत्तदर्जनमिति**। अर्जनादयस्तत्प्रयुक्तसमाहारलक्षकाः। बन्धनार्जनादिक्रियाप्रयुक्तं समाहरणं यत्र नास्ति तत्र कथं समाहारव्यवहार इत्याशयेनाह — **यद्येवमिति**। लक्षणान्तरमवलम्बते — **एवं तर्हीति**। **समभ्याशीकरणमिति**। समीपीकरणमित्यर्थः। संभवति हि विक्षिप्तेषु पूलेषु चरन्तीषु च गोषु समभ्याशीकरणम्। तथापि क्वचिदव्याप्तमेव लक्षणमित्याह — **एवमपीति**। तत्र समभ्याशीकरणं कथं न संभवतीत्यत आह — **समेकत्ववाचीति**। **देशान्तरप्रापण इति**। तथा च देशान्तरस्थानामेकस्मिन् देशे आभिमुख्येन प्रापणं समभ्याशीकरणम्, तद्गृहसमुदायरूपाणां ग्रामादीनां न संभवतीति भावः। देशान्तरप्रापणार्थकस्य हरतेरुपादाने खलु स दोषः, अन्यार्थक एव हरतिस्तत्राश्रीयत इत्याशयेनाह — **नावश्यमिति**। नन्वस्तु तत्र सादृश्यवाचिनो हरतेर्ग्रहणम्, न तु तावता व्यवहारोपपत्तिः, 'पञ्चग्रामी' इत्यादिप्रयोगेण ग्रामादीनां सादृश्यस्याप्रतीतेरित्यत आह — **अथवेति**। **नैवेदमिति**। इदं पञ्चपूलीत्यादिपदम्, **इयत्येव** ग्रामादिमात्र एव, नावतिष्ठत इत्यर्थः। **असाविति**। शब्दप्रयोक्तेत्यर्थः। **तत इति**। ग्रामादित इत्यर्थः। अतिरिक्तमिति शेषः। **आकाङ्क्षतीति**। बोधयितुमिति शेषः। **क्रियामिति**। नदीतीरस्थितत्वादिरूपाम्। **गुणमिति**। पञ्चत्वादिसंख्यारूपम्। तदेवमुपपादितं समाहारमतिरिक्तमभ्युपगम्य दोषान्तरमाह — **अयं तर्हीति**। **भावानयन इति**। भावस्य समासवाच्यस्य प्राधान्यात् तस्यैवानयनान्वय इति वाक्येन भावानयनमेव बोधितमिति तेनाबोधितस्य द्रव्यस्यानयनं न स्यात्। अबोधितस्यानयने तु [5]"पञ्चपूलीमानय' इत्युक्ते घटपटादिकमप्यानयेदिति भावः। प्रतिबन्द्या द्रव्यानयनं साधयिष्यामीत्याशयेन परिहरति — **नैष दोष इति**। द्रव्याकृत्योर्भेदाभ्युपगमेन समाधानमुक्त्वा वास्तवाभेदमादाय तदाह — **अथवेति**। इदानीं 'तद्धितार्थोत्तरपद' इति सूत्रावयवविचारं तदर्थककाशकृत्स्नीय 'तद्धित्तोतरपदयोः' इति सूत्रेणोपक्रमते — **किं पुनर्द्विगुसंज्ञेति**। **प्रत्ययेति**। तद्धितेत्यर्थः। प्रष्टुराशयं तद्वचनेनैवावगन्तुमाह — **एवमिति**। इतरः स्वाशयमाह — **द्विगुसंज्ञेति**। तदेवं काशकृत्स्नसूत्रे दूषिते यथाश्रुतं पाणिनीयं सूत्रं परिगृह्णाति — **एवं तर्हीति**। तदपि दूषयति — **अर्थे चेदिति**। तस्मिन्नपि न्यासे दूषिते न्यासान्तरं परिगृह्णाति — **एवं तर्हीति**। **समासतद्धितविधाविति**। समासे तद्धिते च विधित्सित इत्यर्थः। तस्मिन्नपि दूषिते आद्यमतं परिगृह्णाति — **सिद्धं त्विति**। **नित्यशब्दत्वादिति**। तथा च सिद्धायामेव वृत्तौ प्रत्ययोत्तरपदे विभज्यान्वाख्यायेते इति नोक्तान्योन्याश्रय इति भावः। **न हि संज्ञा नित्येति**।

---

[1] का. वा. २.४.३०–४.

[2] का. वा. २.४.३०–४.

[3] 'द्विगोरदन्तात्' इत्यनन्तरम् 'इति'शब्दोऽधिकः — प, ब.

[4] का. वा. २.४.३०–५.

[5] पञ्चमूलीमानय — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रत्ययसंज्ञाया उत्तरपदसंज्ञायाश्च व्याकरणैकसमधिगम्यत्वादिति मन्यते। तदभ्युपेत्य समाधत्ते —**एवं तर्हीति। संज्ञे भविष्यत इति।** तथा च प्रत्ययोत्तरपदाभिनिर्वृत्तेः पूर्वमेव द्विगुसंज्ञा, ततोऽभिनिर्वृत्तिः[1] प्रत्ययोत्तरपदयोः, तयोस्ते संज्ञे भवत इति भावः। तदेवमाद्यं पक्षं व्यवस्थाप्य द्वितीयं परिगृह्णाति — **अथवेति। अभिधेय एवेति।** तदैव हि तद्धितार्थेऽभिधेये द्विगोर्विधानात् [2]'उक्तार्थानामप्रयोगः' इति तद्धितो न स्यात्। **स्यादर्थेऽपीति।** तत्र प्रार्थनायां लिङ्। **दारार्थं घटामह इति।** दारा नः स्युरिति चेष्टामह इत्यर्थः। क्रियाविशेषणत्वाद्दारार्थमित्यस्य नपुंसकत्वम्। **तद्धितार्थ इति।** तद्धितः स्यादिति प्रार्थनायां सत्यामित्यर्थः। अस्मिन् व्याख्याने स्वरो न प्राप्नोतीत्यभिधेयपरमेवार्थशब्दमाश्रित्य तद्धितोत्पत्तिं ज्ञापकेन साधयति — **द्विगोर्वेति।** वस्तुतस्तु तद्धितार्थे विषये सति द्विगुसंज्ञा विधीयत इति न काप्यनुपपत्तिः॥

[२, ६१२–६१६]

(उद्द्योतनम्) ननु वक्रदण्डकुटिलदण्डवद्द्विरूपाणामप्येकार्थानामेकशेषः किं न स्यात्, अत आह —**स्वरूपेति।** स्वरूपविशेषसत्त्वात् 'अविशेषात्' इत्ययुक्तम्, अत आह — **एकार्थत्वादिति।** भाष्ये **तद्धितोत्पत्तिः** समूहार्थे [3]'प्राग्दीव्यतोऽण्'। तस्य [4]'द्विगोर्लुगनपत्ये' इति लुक्। पञ्चानां पूलानां समाहार इत्यपरिमाणान्तत्वात् [5]'ङीब्निषेधप्रसङ्गः। तत्र दृष्टान्तमाह — **यथेति। पञ्चाश्वेति।** [6]'तेन क्रीतम्' इति ठक्, तस्य [7]'अध्यर्धपूर्व' इति लुक्। [8]'अपरिमाण' इति ङीब्निषेधे टाप्। ननु 'समाहारे' इत्युच्यमानेऽपि पञ्चपूलीत्यत्र ङीपो निषेधः प्राप्नोति, समाहारद्विगुतद्धितलुकोः सत्त्वात्। पञ्चाश्वेत्यत्र च समाहारद्विगुत्वाभावात् प्रतिषेधो न स्यात्, अत आह —**न तद्धितलुकीति। सूत्रद्वये** [9]'अपरिमाण'सूत्रे [10]'गोरतद्धित'सूत्रे च। **समाहार एवेति।** तथा च 'पञ्चपूली, पञ्चगवम्' इति सिध्यति। 'पञ्चाश्वा' इत्यत्र न ङीप्। 'तद्धितलुकि' इति स्वरूपकथनमात्रम्, समाहारस्थले सर्वत्र तद्धितलुक आवश्यकत्वात्, न तु व्यावर्तकम्, सूत्रद्वये तद्ग्रहणस्यापास्तत्वाच्चेति ज्ञेयम्। ब्राह्मणस्य गौरिति विग्रहः। राजगवादिसंग्रहाय 'द्विगोः' इत्युक्तम्। [11]समाहार एवेति नियमात् पञ्चभिर्गोभिः क्रीतः पञ्चगुरित्यत्र टजभावः। समाहारेण कस्याभिधानम्, अत आह — **समाहार इति।** समासस्य समाहारेणाभिधाने प्रयोजनमाह — **एवं चेति।** तद्धितार्थेनाभिधाने को दोषः, अत आह — **एवमभिधान इति।** ननु [12]समासेनोक्तत्वात् तद्धितार्थस्य [13]'उक्तार्थानामप्रयोगः' इति तद्धितो न भविष्यति, अत आह — **अर्थशब्दस्येति। स्यादर्थत्वं** [14]प्रयोजनपरत्वम्। [15]'द्विगोर्लुगनपत्ये' इति लुग्वचनं ज्ञापकमुक्तार्थेऽपि तद्धितोत्पत्तेः। 'द्वन्द्व' इत्यस्य प्रकृतासंगतिं निराह — **उत्तरपदेति।** नित्यवचनस्यावश्यकतां तत्प्रयोजनं च दर्श-

---

[1] ततोऽभिनिर्वृत्तेः — ब.
[2] महाभाष्यम् १. १. ४४.
[3] पा. सू. ४. १. ८३.
[4] पा. सू. ४. १. ८८.
[5] लुक्प्रसङ्गः — अ, ऋ.
[6] पा. सू. ५. १. ३७.
[7] पा. सू. ५. १. २८.
[8] पा. सू. ४. १. २२.
[9] पा. सू. ४. १. २२.
[10] पा. सू. ५. ४. ९२.
[11] समाहारे चेति नियमात् — अ.
[12] समासस्योक्तत्वात् — अ.
[13] महाभाष्यम्. १. १. ४४.
[14] प्रयोजनवत्त्वम् — अ.
[15] पा. सू. ४. १. ८८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यति — **वाक् चेति**। **जातिरिति**। [1]समाहारस्यैकत्वादेकवद्भावे सिद्धे प्राण्यङ्गादीनां समाहार एव, दधिपयआदीनामितरेतरयोग एव, वृक्षमृगादीनामुभयथा, इत्येवमर्थं [2]'द्वन्द्वश्च प्राणितूर्य' इत्यादि-प्रकरणमिति भावः। **यदि त्विति**। [3]तदा समासान्ताभावेन समासासमासयो रूपभेदो नास्ती-त्यर्थः। **कार्ये** रूपे। 'धवखदिरपलाशाः' इति [4]द्वन्द्वेऽवयवयोरवृत्तिप्रसङ्गाभावादाह — **बहुव्रीहा-विति**। त्रयाणामेकार्थीभावे द्वयोः स कथम्, अत आह — **न चेति**। [5]अवृत्तिपक्षे हेतुमाह — — **द्वन्द्वेति**। व्यपेक्षापक्षे वाक् च दृषच्च प्रिये इति वाक्यमेव भवतीत्यर्थः। द्विगुसंज्ञकस्यो-त्तरपदेन परिमाणिना समासो वक्तव्य इति प्रतिभाति, स चायुक्तः, स्वरे दोषप्रसङ्गात्, [6]'कालाः परिमाणिना' इति समासस्य सिद्धत्वाच्च, अत आह — **द्विगोर्निष्पत्तय इति**। [7]परिमाणिवाचिनो-त्तरपदेन हेतुना द्विगोर्निष्पत्तये बहूनां समासो वक्तव्य इति वार्तिकार्थः। बहूनां समासवचन-स्यावश्यकतामाह — [8]**द्वौ मासाविति**। **न प्राप्नोति** अतो [9]वक्तव्य एवेति शेषः। [10]त्रिपदसमा-सस्य प्रयोजनमाह — **तस्मिंश्चेति**। त्रिपदसमासे। **समासः** द्विगुसमासः। तस्य प्रयोजनमाह — **कालान्त इति**। [11]'इगन्तकाल' इत्यनेनेत्यर्थः। **समासान्तः** यथा स्यादित्यनुषङ्गः। द्वे अहनी जातस्येति त्रिपदतत्पुरुषानन्तरं द्व्यहन्शब्दयोर्द्विगौ कृते [12]'अह्नोऽह्न एतेभ्यः' इत्यह्नादेशः सिध्यति। द्वे अहनी समाहृते इति समाहारे द्विगुं कृत्वा पश्चात् [13]'कालाः परिमाणिना' इति समासे कृते [14]'न संख्यादेः समाहारे' इति निषेधात् 'द्व्यह्नजातः' इति कदापि न स्यादित्यर्थः। **पात्रादिभ्य इति**। पात्रादेराकृतिगणत्वात्। [15]**समासान्तोदात्तत्वेनेति**। पूर्वं द्विगुः, पश्चात् परिमाणिना समासे समा-सान्तोदात्तत्वं स्यात्। पश्चाद् द्विगौ द्विगुस्वर एव भवति, स एवेष्यत इत्यर्थः। अन्यत्रोत्तरपदे परतो द्विगुसमासे प्रयोजनमाह — **पञ्चगवेति**। [16]समासान्तरूपस्य कार्यस्य सिद्धये, समासान्तस्य 'पञ्चकुमारीप्रियः' इत्यादौ स्वररूपकार्यस्य च सिद्धय इति वा विग्रहः[17]। सिद्धये पुनः समासः क्रियत इत्यन्वयः। [18]**एतेनेति**। उत्तरपदस्य द्विगुनिमित्तत्वाभावेनेत्यर्थः। ननु मत्वर्थे परत्वात् [19]बहुव्रीहिरेव स्यादिति प्रतिषेधो व्यर्थः, अत आह — **यदीति**। अनवकाशो बहुव्रीहिर्द्विगुं [20]बाधेत; अत आह — **तस्येति**। संख्या[21]पूर्वपदत्वाभावेन द्विगोरभावादित्यर्थः। पञ्च खट्वा यस्या इति विग्रहे बहुव्रीहावुपसर्जनह्रस्वत्वेऽजाद्यतष्टापि 'पञ्चखट्वा' इति भवति। [22]द्विगुपक्षे तन्न सिध्यती-

---

[1] समाहारस्यैकत्वेनैकवद्भावे — ऋ.

[2] पा. सू. २. ४. २.

[3] तथा — ऋ.

[4] द्वन्द्वेऽवयवयोरावृत्ति — अ.

[5] आवृत्तिपक्षे — अ, ऋ.

[6] पा. सू. २. २. ५.

[7] परिमाणवाचिनोत्तरपदेन — अ.

[8] 'द्वौ मासौ जातस्येति कालाः परिमाणिनेति' इति विशिष्टः प्रदीपग्रन्थत्वेनाभिमतः, न तु 'द्वौ मासौ जातस्येति' इति प्रतीकतयेति भाति।

[9] वक्तव्यमिति शेषः — ऋ.

[10] प्रतिपदसमासस्य — अ.

[11] पा. सू. ६. २. २९.

[12] पा. सू. ५. ४. ८८.

[13] पा. सू. २. २. ५.

[14] पा. सू. ५. ४. ८९.

[15] समासान्तोदात्तेति — ऋ; समासान्तोदात्त-तेति — अ.

[16] समासान्तकार्यसिद्धये — अ.

[17] एतेन प्रदीपे 'समासान्तकार्यसिद्धये' इति पाठः सूच्यते। दृश्यमानेषु प्रदीपपुस्तकेषु 'समासान्तादिकार्यसिद्धये' इत्युपलभ्यते।

[18] तेनेति — अ, ऋ.

[19] बहुव्रीहिः स्यादित्यप्रतिषेधोऽत आह — अ.

[20] बाधत - इत्याह — अ.

[21] पूर्वत्वाभावेन — अ.

[22] द्विगुपक्षेऽपि सिध्यतीत्याह — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्याह — **यदीति** । **[नन्विति]** मत्वर्थे द्विगौ ज्ञापकात् तद्धितोत्पत्त्यङ्गीकारान्मतुपः प्राग्दीव्यतीयत्वाभावेन [1]"द्विगोर्लुगनपत्ये' इति लुगभावात् श्रवणप्रसङ्ग इत्यर्थः। **दोषेति**। मत्वर्थे प्रतिषेधावचने मतुपो लुग् वक्तव्यः स्यादित्येवंपरमित्यर्थः। [2]नन्वेवं [3]दोषान्तरमस्तु, अत आह[4] — **तल्लुकि चेति**। **प्रतिषेधात्**। [5]"न तद्धितलुकि' [6]"अतद्धितलुकि' इति द्वयोः प्रतिषेधात्। [7]अत्र पञ्चखट्वा पञ्चगुरित्यत्र। मत्वर्थे द्विग्वङ्गीकारे क्वचिदनिष्टमाह — **पञ्चेति**। अपरिमाणान्तात् तद्धितलुकि ङीपो निषेधः, परिमाणान्तात्तु तद्धितलुक्यपि [8]"द्विगोः' इति ङीप्प्रसङ्ग इति भावः॥

[२, ६१२–६१६]

(**रत्नप्रकाशः**) समाहारग्रहणानर्थक्यं शङ्कते — **समाहारसमूहयोरिति**। तयोरैक्यस्येदानीं साधनीयत्वेनैकशेषाभावः। **अविशेषादिति**। भेदाभावादित्यर्थः। एतेन 'स्वरूपपदार्थ[क]-त्वाद् भिन्नार्थत्वादेकशेषाभावः। **अविशेषादिति**। एकार्थत्वादित्यर्थः' इति निरस्तम्। 'समाहारः समूह इत्यविशिष्टावर्थावितौ' इति भाष्यकारीयव्याख्यानविरुद्धव्याख्यानाश्रयणे मानप्रयोजनयोरभावात्। **समाहार इति**। 'न तद्धितलुकि' इत्यंशस्य त्यागात् साम्यमेवेति भावः। **नियमार्थमिति**। अपरिमाणाद्यन्ताद् द्विगोः समाहार एव ङीप् नान्यत्रेति नियमः। **गोष्टज् भवतीत्युक्त्वेति**। 'गोः' इति सूत्रं कृत्वा गोन्तात् तत्पुरुषाट्टजिति व्याख्याय ततः 'द्विगोः समाहारे' [9]इति 'अतद्धितलुकि' इत्येतत्स्थानापन्नं सूत्रं नियमपरतया व्याख्येयम् — गोन्ताद् द्विगोः समाहार एव टच्, नान्यत्रेतीति भावः। समाधत्ते — **अभिधानार्थं त्विति**। तुशब्दः शङ्कापनोदाय। समाहारशब्देन समाहारस्याभिधानमत्र यथा स्यात्, तद्धितार्थशब्देन मा भूदित्येवमर्थमित्यर्थः। एतेन 'समासेन समाहारस्याभिधानं यथा स्यात्, तद्धितेन मा भूदित्यर्थः' इति निरस्तम्। अत्र समाहारशब्दाभावेऽपि तद्धितलुकि सति समासेनैव समाहारस्याभिधेयत्वात्। भाष्यकृत्कृतव्याख्यानस्योपेक्षायां मानप्रयोजनयोरभावाच्च। **समाहारेणेति**। समाहारशब्देनेत्यर्थः। **अभिधानमिति**। समाहारस्येति शेषः। एतेन 'समाहारेऽभिधेये द्विगुरित्यभिधानं यथा स्यात्। एवं चाभिधाने समासेनोक्तत्वात् तद्धितो नोत्पद्यते' इति निरस्तम्। पूर्वापरविरोधात्। पदसमन्वयमनादृत्यातिमूर्खवत् पिण्डितार्थस्य कथंचिदुपयोगिनः कथनानौचित्याच्च। **तद्धितार्थेनेति**। तद्धितार्थशब्देनेत्यर्थः। एतेन 'तद्धितार्थे द्विगुरित्यभिधानं मा भूदित्यर्थः। एवमभिधाने हि तद्धितः स्यात्, अर्थशब्दस्य स्यादर्थत्वात्, ज्ञापकाद्वा' इति निरस्तम्। वार्तिकमन्यथा व्याख्याय तद्व्याख्यानभाष्यस्यान्यथाव्याख्यानानौचित्यात्। **किं च स्यादिति**। तद्धितार्थशब्देनात्र समाहारेऽभिहित इति शेषः। महाविभाषाधिकारादवान्तरद्वन्द्वतत्पुरुषयोर्वैकल्पिकत्वे प्राप्ते नित्यत्वमाह — **द्वन्द्वतत्पुरुषयोरिति**।

---

[1] पा. सू. ४. १. ८८.
[2] 'नन्वेवम्' इत्येवोपलभ्यते — अ, ऋ. 'नन्विदम्' इति 'नन्वेतत्' इति वा युक्तं भाति।
[3] दोषान्तरमस्त्यत आह — अ, ऋ.
[4] आह — लुकि चेति — अ, ऋ.
[5] पा. सू. ४. १. २२.
[6] पा. सू. ५. ४. ९२.
[7] प्रदीपे 'प्रतिषेधादेव न भविष्यतः' इत्यत्र 'प्रतिषेधादत्र न भविष्यतः' इत्यन्नंभट्टपाठ इति भाति।
[8] पा. सू. ४. १. २१.
[9] 'इति' इत्यस्यानन्तरं 'सूत्रे' इत्यधिकं दृश्यते — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वाग्दृषदप्रिय इति। वाक् च दृषच्च प्रिये अस्येति त्रिपदे बहुव्रीहौ कृते [1]"जातिरप्राणिनाम्' इति पूर्वयोः समाहारद्वन्द्वे सति [2]"द्वन्द्वाच्चुदषहान्तात् समाहारे' इति समासान्तष्टच्। एवं 'छत्रोपानह्प्रियः' इत्यत्र। यत्तु 'इतरेतरयोगेऽप्यत्र द्वन्द्वः स्यात् तदा कार्ये भेदो न स्यात्' इति। तन्न, पुत्राश्च पौत्राश्च प्रिया यस्य सः 'पुत्रपौत्रप्रियः' इत्यादाववान्तरद्वन्द्वान्तोदात्तत्वरूपस्य [3]भेदस्य सत्त्वात्। [4]"वावचनानर्थक्यं च स्वभावसिद्धत्वात्' इति महाविभाषाप्रत्याख्यानं प्रौढिप्रवृत्तमाश्रित्योक्तं वचनं प्रत्याचष्टे — **न वक्तव्यमिति।** त्रिपदबहुव्रीहेः प्रसिद्धत्वात् तत्रोत्तरपदे परतो द्विगुसंज्ञाविधानेनोत्तरपदग्रहणस्य प्रकृतसूत्रस्थस्य चारितार्थ्येन त्रिपदतत्पुरुषाक्षेपकता न संभवतीत्याशयेनाह — **उत्तरपदेन परिमाणिनेति।** परिमाणिवाचकेनोत्तरपदेन साधनेनेत्यर्थः। **द्विगोरिति।** सिद्धय इति शेषः। **समासवचनमिति।** समासशब्दस्य सामान्यशब्दत्वेऽपि तत्पुरुषेऽत्र पर्यवसानं ज्ञेयम्। त्रयाणामिति तु शेषः। तथा चायमर्थः फलितः — परिमाणिवाचकोत्तरपदेन साधनेन तत्पूर्वयोः पदयोर्द्विगुसंज्ञासिद्धये त्रयाणां तत्पुरुषसंज्ञा वक्तव्येति। **द्विमासजात इति।** द्वौ मासौ जातस्य यस्य स इति विग्रहे [5]"कालाः परिमाणिना' इति त्रिपदे तत्पुरुषे सत्युत्तरपदे परे प्रकृतसूत्रेण पूर्वयोर्द्विगुसंज्ञायां तस्यान्तोदात्तत्वं स्वरः सिध्यतीति भावः। **इदमिति।** तत्र समाधानमिति शेषः। **द्वौ मासाविति।** समाहृताविति शेषः। **द्विमासमिति।** पात्रादित्वात् स्त्रीत्वाभावः। **द्विमासं जातस्येति।** यस्य स इति शेषः। 'उत्तरपदार्थप्रधानस्तत्पुरुषः' इति भाष्यकृत्संमतमते तु द्विमासस्य जात इति विग्रहो ज्ञेयः। तत्र परिच्छेद्यपरिच्छेदकभावे षष्ठी। **द्विमासजात इति प्राप्नोतीति।** तत्र तकाराकार उदात्तः स्यादिति भावः। **द्विमासजात इति चेष्यत इति।** तत्र सकाराकार उदात्त इष्यत इति भावः। स्वरासिद्धिरेव न दोषः, किं तु रूपासिद्धिरपीत्याह — **द्व्यह्नजातश्च न सिध्यतीति।** त्रिपदे तु तत्पुरुषे पूर्वयोर्द्विगुसंज्ञायां [6]"राजाहःसखिभ्यः' इति टचि [7]"अह्नोऽह्न एतेभ्यः' इत्यह्नादेशे सति तत्सिध्यतीति भावः। **द्व्यहजात इति प्राप्नोतीति।** [8]"न संख्यादेः समाहारे' इत्यह्नादेशप्रतिषेधादिति शेषः। किं 'द्व्यहजातः' इति रूपेण न भवितव्यमेवेत्याशयेन पृच्छति — **न चैवं भवितव्यमिति।** समासशब्दं बहुव्रीहिसाधारणं मन्यमानः शङ्कते — **किमुच्यत इति।** बहुव्रीहेर्बहुपदत्वस्य सिद्धत्वात् प्रकृतवचनस्य तत्पुरुषमात्रविषयकत्वान्नात्रातिव्याप्तिदोष इत्याशयेनाह — **अन्यत्रेति।** पञ्चगवप्रिय इत्यादावित्यर्थः। **सर्वेषु पक्षेष्विति।** तद्धितार्थेऽभिधेये सति विषये सति तद्धितः स्यादिति वा द्विगुरिति पक्षेष्वित्यर्थः। **मत्वर्थ इति।** मतोस्तद्धितत्वात् तदर्थे द्विगुरेव स्यात्, प्रकृतसूत्रविषयस्याशेषत्वेन बहुव्रीहेरप्रसक्तेरिति मन्यते। **पञ्चखट्वेति।** पञ्च खट्वा यस्याः सेत्यर्थः। तत्र यदि द्विगुसंज्ञा स्यात् तर्हि ततो मतुप् स्यात्, तस्य निषेधेऽपूर्ववचनेन कृतेऽपि [9]"वा टाबन्तः' इति [10]"नपुंसकत्वाभावे [11]"द्विगोः' इतीकारः स्यादिति मन्यते। **पञ्चगुरिति।** अत्रापि मतुपो निषेधः कर्तव्यः, तदनन्तरं

---

[1] पा. सू. २. ४. ६.
[2] पा. सू. ५. ४. १०६.
[3] भेदकस्य सत्त्वात् — प, ब.
[4] का. वा. २. १. १–२.
[5] पा. सू. २. २. ५.
[6] पा. सू. ५. ४. ९१.
[7] पा. सू. ५. ४. ८८.
[8] पा. सू. ५. ४. ८९.
[9] का. वा. २. ४. ३०–५. 'वावन्तः' इत्यस्यार्थानुवादो बोध्यः।
[10] नपुंसकत्वे — प, ब.
[11] पा. सू. ४. १. २१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

टचोऽपीति मन्यते। वस्तुतस्तु [1]'त्रिकतः शेषे बहुव्रीहेराश्रयणात् प्रथमान्तानामप्रथमार्थे विधीयमानस्य बहुव्रीहेस्तत्र परत्वाद् द्विगुसंज्ञां बाधित्वा प्रवृत्त्येष्टसिद्धेर्नारम्भणीयो मत्वर्थे प्रतिषेधः।।

संख्यापूर्वो द्विगुः २. १. ५२.

[२, ६१७–६१८]

(उद्द्योतनम्) ननु [2]'अनन्तरस्य' इति न्यायेन व्यवहितग्रहणासंभवात् कथं संशयः, अत आह — **इहेति**। प्रत्येकापेक्षायां स न्यायः, न तु समुदायापेक्षायाम्। तत्र दृष्टान्तः — **यथा नान्तरिति**। [3]'प्रकृत्यान्तःपादमव्यपरे'। अवकारयकारपरेऽति परे एङ प्रकृत्या स्यात् निमित्तनिमित्तिनौ चेदृक्पादमध्ये स्याताम्। 'सुजाते अश्वसूनृते अध्वर्यो अद्रिभिः सुतम्'। अन्तःपादमिति किम्, तेऽर्चन्ति। अव्यपरे किम्, तेऽवदन्, [4]तेऽयजन्। एङ किम्, [5]'अन्वग्निरुषसाम्'। अत्र 'नान्तःपादम्' इति पाठान्तरम्। अत्रानन्तरस्य पूर्वरूपस्य निषेधेऽयवादेशः प्राप्नोति। तन्निरासाय संहिताकार्यसमुदायस्य निषेध आश्रित इत्यर्थः। [6]'पूर्वमात्रे' इत्यस्य संकोचमाह — **अत्रेति**। **त्रिसूत्रीति**। [7]'पूर्वकालैक' [8]'दिक्संख्ये' [9]'तद्धितार्थ' इति त्रिसूत्री। **स्वरः** पूर्वपदप्रकृतिस्वरः। समासान्तोदात्त एवेष्यते। ननु शाटीशब्द एवास्ति, न शाटशब्दः, अत आह — **शाटशब्द इति**। ननु 'एकभिक्षा' इत्यत्र द्विगुसंज्ञायामप्यकारान्तत्वाभावात् ङीप् न भविष्यति, अत आह — **भिक्षशब्द इति**। 'भिक्षदम्' इति ह्रस्वपाठः [10]प्रामाणिक इति भावः। **पूर्ववत्** [11]'पूर्वकालैक' इति। **समासार्थस्येति**। [12]'अकारान्तोत्तरपदो द्विगुः स्त्रियाम्' इति वचनादिति भावः। तस्य समाहारद्विगुविषयत्वे त्वाह — **यथेति**। [13]'लोकाश्रयत्वाल्लिङ्गस्य' इति भावः। ननु द्विगुं विना कथमीकारान्तत्वम्, अत आह — **शाटशब्दादिति**। 'अपूपी' इत्यपि जातिलक्षणङीष् किं न स्यात्, अत आह — **केवल इति**। **अधिकारादिति**। [14]'द्विगोः' इत्यत्र। ननु भिक्षशब्दोऽकारान्त इत्युक्तम्, अत आह — **भिक्षेति**। स्त्रियां घञपवादोऽकारप्रत्यय इत्यर्थः। ननु 'एकभिक्षा' इत्यत्र द्विगुत्वाङ्गीकारे [15]'आबन्तो द्विगुर्वा स्त्रियाम्' इति पक्षे नपुंसकत्वं स्यात्, अत आह — [16]**वा टाबन्त इति**। समाहारद्विगुविषयत्वान्नात्र प्रसङ्ग इति समाधानान्तरमाह — **यत्रेति**। पञ्चानां

---

[1] शेषो बहुव्रीहिरित्यत्र यस्य त्रिकस्यानुक्तः समासः स शेष इति प्रथमान्तस्य बहुव्रीह्यङ्गीकारादित्यर्थः।
[2] परिभाषा ६२.
[3] पा. सू. ६. १. ११५.
[4] तेऽजयन् — अ, ऋ.
[5] तै. सं. ४. १. २.
[6] पूर्वसूत्र इत्यस्य — अ.
[7] पा. सू. २. १. ४९.
[8] पा. सू. २. १. ५०.
[9] पा. सू. २. १. ५१.
[10] प्रामादिक इति — ऋ.
[11] पा. सू. २. १. ४९.
[12] का. वा. २. ४. ३०–४.
[13] महाभाष्यम् २. १. ३६.
[14] पा. सू. ४. १. २१.
[15] का. वा. २. ४. ३०–५. वाबन्त इत्यस्यार्थानुवादः।
[16] प्रदीपे 'वाबन्त इत्यनेन' इत्यत्र 'वा टाबन्त इत्यनेन' इति चौखाम्बामुद्रिते पाठः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

खट्वानां समाहार इति द्विगौ [1]"द्विगुरेकवचनम्'। [2]"स नपुंसकम्' इति नपुंसकत्वेन ह्रस्वत्वे [3]"वा टाबन्तः' इति स्त्रीत्वे विकल्पिते 'पञ्चखट्वम्, पञ्चखट्वी' इति भवति। यदा भिक्षशब्देन समासस्तदा ङीप् स्यात्, अत आह — **भिक्षशब्देनेति**। दानसंभ्रमाभ्यां कथं समाहारलाभः, अत आह — **एकमपीति**। बुद्धिकृतमनेकत्वमादाय समाहार इति भावः। अपरितोषमेवाह — **भाषायामपीति**। द्विगुत्वे तु [4]"इगन्ते द्विगौ' इति पूर्वपदप्रकृतिस्वरः स्यादित्याह — **प्रकृतीति**। अत एव अनन्तरे योगे यः संख्यापूर्व इत्यङ्गीकारादेव ॥

[२, ६१७–६१८]

(रत्नप्रकाशः) **किमनन्तर इति**। उभयथा संभवाद्दोषदर्शनाच्च प्रश्नः। एतेन "इह क्वचिदवयवोऽपेक्ष्यते — यत्रैतदुच्यते [5]"अनन्तरस्य विधिर्वा भवति प्रतिषेधो वा' इति। क्वचित्तु समुदायः, यथा [6]"नान्तःपादम्' इति पाठे संहिताधिकारविहितस्य सर्वस्य कार्यस्य निषेधः क्रियते। ततः संदेहात् पृच्छति" इति निरस्तम्। अस्य सूत्रस्य नियमनिषेधान्यतरपरत्वाभावेन [7]"अनन्तरस्य' इति परिभाषाविषयत्वाभावात्। "नान्तःपादमव्यपरे' इति निषेधसूत्रस्य [8]"अनन्तरस्य' इति परिभाषाविषयत्वेन तत्परिभाषया सह कोटचन्तरपरतयोपन्यासासंभवात्। प्रत्यासत्त्यानन्तरसूत्रविहितो वा संख्यापूर्वस्तत्पुरुषो द्विगुसंज्ञः, समानाधिकरणेन यस्तत्पुरुषः संख्यापूर्वः स वेति विकल्पस्यात्र दृष्टान्तं विनैव संभवाच्च। **एकशाटीति**। एकः शाट इति विग्रहे [10]"पूर्वकाल' इति समासे द्विगुसंज्ञायामदन्तोत्तरपदत्वेन स्त्रीत्वे सति [11]"द्विगोः' इति ङीपि तद्रूपमिति मन्यते। **एकभिक्षेति**। एको भिक्ष इति [12]"पूर्वकाल' इति समासे द्विगुसंज्ञायामदन्तोत्तरपदत्वेन तस्य स्त्रीत्वे [13]"द्विगोः' इति ङीप् स्यात्। द्विगुसंज्ञाभावे तु लोकत एव तस्य स्त्रीत्वे टापि तत् सिध्यतीति मन्यते। **ईकारान्तेनेति**। शाटशब्दाज्जातिलक्षणे ङीषि सतीति भावः। **एकापूपीति**। एकोऽपूप इति [14]"पूर्वकाल' इति समासे द्विगुसंज्ञायां [15]"द्विगोः' इति ङीविति मन्यते। **टाबन्तेनेति**। [16]"गुरोश्च हलः' [17]"इत्यङन्तादापि तदन्तेन भिक्षाशब्देनेत्यर्थः। तत्र [18]"वा टाबन्तः' इति स्त्रीत्वातिदेशेऽपि न क्षतिः। तावतादन्ताद् द्विगोर्विधीयमानस्य ङीपोऽप्रसक्तेः। **सप्तर्षय इति**। [19]"दिक्संख्ये संज्ञायाम्' इति तत्पुरुषः। **एष स्वर इति**। [20]"पूर्वपदप्रकृतिस्वर इत्यर्थः। **समाहार इत्येव सिद्धमिति**। अपूप-

---

[1] पा. सू. २. ४. १.

[2] पा. सू. २. ४. १७.

[3] का. वा. २. ४. ३०–५. वावन्त इत्यस्यार्थानुवादः।

[4] इगन्तकालेत्यनेनेत्यर्थः।

[5] परिभाषा ६२.

[6] प्रकृत्यान्तःपादमव्यपर इति सूत्रस्थाने नान्तःपादमित्यादि पाठान्तरम्।

[7] परिभाषा ६२.

[8] पा. सू. ६. १. ११५. पाठान्तरमिदम्।

[9] परिभाषा ६२.

[10] पा. सू. २. १. ४९.

[11] पा. सू. ४. १. २१.

[12] पा. सू. २. १. ४९.

[13] पा. सू. ४. १. २१.

[14] पा. सू. २. १. ४९.

[15] पा. सू. ४. १. २१.

[16] पा. सू. ३. ३. १०३.

[17] 'इत्यप्रत्ययान्तात्' इत्युचितम्, अनेनाप्रत्ययस्यैव विधानात्, 'षिद्भिदादिभ्योऽङ्' इत्युत्तरसूत्रेणैवाङ्विधानात्।

[18] का. वा. २. ४. ३०–५. वावन्त इत्यस्यार्थानुवादोऽयम्।

[19] पा. सू. २. १. ५०.

[20] 'पूर्वपद' इत्यादि 'समास इति' इत्यन्तं नास्ति—प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शब्दः स्त्रीलिङ्गो न भवतीत्येकशाटीवदीकारान्तेन समास इति नोक्तम्। वस्तुतस्तु लोकाश्रयत्वाल्लिङ्गस्यापूपशब्दस्य शाटशब्दवत् स्त्रीत्वमभ्युपेत्य जातिलक्षणे ङीषीकारान्तेन समास इत्यत्रैवास्य भाष्यस्य तात्पर्यं बोध्यम्। अन्यथैकस्य सर्वानुभवविरुद्धसमाहारत्वाश्रयणेन यथाश्रुतभाष्ये व्याख्यायमाने [1]"नदीभिश्च" इति सूत्रगतेन सर्वानुभवानुसारितया युक्तियुक्तेन भाष्येण विरोधः स्यात्। 'समाहारे' इति न सिध्यति, एकस्य समाहारत्वेन व्यवहाराभावादित्याशयेन पृच्छति — **कः पुनरिति**। अनेकेषु यः समाहारपदार्थः क्रिया गुणो वा स एकस्मिन्नपि संभवतीति प्रष्टृबुद्धिपरीक्षणायाह — **यत्तदिति**। प्रष्टा तदभ्युपगम्यान्यत्राव्याप्तिमाह — **इह तर्हीति**। **पञ्चहोतार इति**। [2]"दिक्संख्ये संज्ञायाम्' इति समासः। **एष स्वर इति**। पूर्वपदप्रकृतिस्वर इत्यर्थः। सप्तर्षिशब्दो लोकेऽप्यन्तोदात्त इष्टः। स पूर्वमात्रस्य द्विगुसंज्ञायां न सिध्यति। किं च 'एकशाटी' इत्यादौ च [3]"इगन्त' इति पूर्वपदप्रकृतिस्वरत्वं स्यात्। तत्रापि ह्यन्तोदात्तत्वमिष्यते। अपि चैकवीरादयः स्त्रीलिङ्गा मा भूवन्निति वीरादिशब्दानामदन्तानां सर्वेषां पात्रादित्वं कल्पनीयं स्यात्। तस्मिन् कल्पिते [4]"अदन्तोत्तरपदो द्विगुः स्त्रियाम्' इति वचनं निर्विषयं स्यात्। तदर्थं [5]"पात्राद्यन्तस्य न'[6] इतिवत् 'एकपूर्वस्य च' इति निषेधपरं वचनान्तरमङ्गीकर्तव्यं स्यादित्यस्वरसान्निर्दुष्टोऽनन्तरपक्ष[7] एवेत्याशयेनाह — **अथवेति**। **दिवोदासादीनां छन्दसीति**। लोके तु पञ्चहोत्रादेरन्तोदात्ततैवेष्टेति भावः। तदेवमुपक्रमोपसंहाराभ्यासैरनन्तरसूत्रविहित एव तत्पुरुषः संख्यापूर्वो द्विगुरिति पक्षः स्थितः॥

कुत्सितानि कुत्सनैः २. १. ५३.

[२, ६१९]

(उद्द्योतनम्) विशेष्यस्य [8]पूर्वनिपातार्थं वचनम्। कुत्सितवचनानि कुत्सनवचनैः समस्यन्ते। वैयाकरणखसूचिः। यः पृष्टः सन् निष्प्रतिभः स उच्यते। प्रश्न[9]विस्मारणाय 'अहो खमतिनिर्मलम्' इति सूचयतीत्यर्थः। शब्दप्रवृत्तिनिमित्तकुत्सायामिष्यते। नेह — वैयाकरणश्चोरः। ननु खसूचिरित्यनेनैव कुत्सितत्वं गम्यत इति 'किं व्याकरणम्' इति प्रश्नो न युक्तः, अत आह — **अयं भाव इति**। **मा भूदिति**। चोरत्वं न वैयाकरणपदप्रवृत्ति[10]निमित्तमिति समासाभावः। [11]**अङ्गाध्यायिनोऽपि** न कुत्सेत्यनुषङ्गः। वैयाकरणस्य कुत्सितत्वमुपपादयति — **य इति**। [12]**आश्रितस्येति**। आश्रयस्य बुद्धि[13]हीनत्वेनाश्रितस्यापि निष्फलत्वेन कुत्सेत्यर्थः॥

---

[1] पा. सू. २. १. २०.
[2] पा. सू. २. १. ५०.
[3] पा. सू. ६. २. २९.
[4] का. वा. २. ४. ३०–४.
[5] का. वा. २. ४. ३०–७. पात्रादिभ्यः प्रतिषेध इत्यस्यार्थानुवादोऽयम्।
[6] वेतिवत् — प, ब.
[7] अनन्तर इति पक्ष एवेत्यर्थः।
[8] पूर्वनिपातनार्थं — अ.
[9] विस्मरणाय — अ, ऋ.
[10] 'निमित्तकुत्सनमिति' इत्युचितं भाति।
[11] प्रदीपे 'नापि तदधीयानस्य' इत्यस्य स्थाने 'अङ्गाध्यायिनोऽपि' इत्यन्नंभट्टपाठ इति भाति।
[12] आश्रयस्येति — ऋ.
[13] हीनत्वेन तस्यापि — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ६१९]

(रत्नप्रकाशः) स्वरूपतो वेदाङ्गस्य व्याकरणस्य तावत् कुत्सितत्वं न घटते। व्याकरणस्याकुत्सितत्वेऽपि 'वैयाकरणश्चोरः' इत्यादावनेन समासो नेष्ट इत्याशयेन पृच्छति — **किं व्याकरणमिति।** शब्दप्रवृत्तिनिमित्तं कुत्सितमाश्रीयत इत्याशयेनोत्तरमाह — **वैयाकरण इति।** भावप्रधानो निर्देशः, वैयाकरणत्वमित्यर्थः। व्याकरणमधीते वेत्ति वा वैयाकरण इति व्युत्पत्त्याश्रयणाद्यस्य व्याकरणाध्ययनं व्याकरणज्ञानं च केनचिन्निमित्तेन विकलं सत् कुत्स्यते, तत्कुत्सनेन तद्विशिष्टोऽपि पुरुषः कुत्स्यते। चौर्यादिना तु व्याकरणाध्ययनज्ञानयोर्वैकल्यमनुमातुं न शक्यते, अवैकल्येऽपि तयोश्चौर्यसंभवात्। खसूचित्वादिना तु तद्वैकल्यमनुमीयते। कथमिदं रूपं सिद्धमिति पृष्टस्य वैयाकरणस्य 'अहो गगनमतिनिर्मलम्' इति प्रत्युत्तरेण रूपविशेषप्रश्नविस्मरणार्थेन तद्वैकल्यप्रतीतेः सार्वजनीनत्वादिति भावः। **तस्मिन्** वैयाकरणत्वे इत्यर्थः। **तत्स्थमिति।** तस्मिन् कुत्सितेऽध्ययने ज्ञाने च [1]विषयतया वर्तमानं व्याकरणमपि कुत्सितं भवति, यथा जपाकुसुमसंनिधौ स्फटिको लोहित इति भावः॥

उपमानानि सामान्यवचनैः २. १. ५५.

[२, ६१९–६२७]

(उद्द्योतनम्) उपमानसामान्यस्य प्रश्नादेकवचनेन भाव्यम्, अत आह — **सूत्रेति।** बहुवचनोपक्षिप्तस्यैकवचनेन निर्देशो न युक्तः, अत आह — [2]**किमिति। नन्विति।** उपमीयते येन तद् **उपमानम्** करणम्। [3]उपमीयते यत् तद् **उपमेयम्**, कर्म। [4]**एकत्वविषयः** एकत्वकोटिकः। **सर्वाश्रयेति।** नीलादिव्यक्तीनामेकत्वमतेनेत्यर्थः। अभेदपक्षो न युक्त इत्याह — **न चेति।** उभयाधारश्यामत्वयोरभेदे 'श्यामा देवदत्ता' इत्येव प्रयोगः स्यात्। अभेदे उपमानोपमेयभावाभावेन शस्त्रीपदवैयर्थ्यप्रसङ्ग इत्यर्थः। **नास्तीति**[5]। अत्यन्तभेदे गवाश्ववदुपमानोपमेयभावाभावादित्यर्थः। कल्पद्वयेऽपि स्वयं दोषोक्तेः प्रश्नायोगः, अत आह — **स्ववाचेति।** तत्रापि व्यक्तिभेदात् सादृश्यं स्यात्, अत आह — **व्यक्तिगतानामिति।** पाक्षिकमेतदुदाहरणमित्याह — **अत्यन्तेति।** गोत्वाश्वत्वरूपेणेत्यर्थः। **गुणजातेः** श्यामत्वरूपगुणत्वावान्तरजातेः। **उपवर्णितं** 'यत्र किंचित् सामान्यम्' इत्यादिनोक्तम्। परिच्छेदकत्वसामान्याद् गौणसामीप्यमुच्यते, न तु मुख्यं सामीप्यमुपमानस्यास्तीत्याह — **परिच्छेदेति।** तर्ह्यव्ययीभावः स्यात्, तथा च कथम् 'उपमानानि' इति, अत आह — **उपमानानीति।** अव्ययीभाव एवास्तु, अत आह — **अव्ययीभाव इति।** उप-

---

[1] विपयितया — प, व.

[2] 'किं यदेवोपमानमित्यत्र तु' इति विशिष्टः कैयटग्रन्थत्वेनाभिमतः, न तु 'किं यदेवोपमानमिति' इति प्रतीकतया। प्रतीकतया तु मुद्रणं दृश्यते।

[3] उपमातुं यद्युक्तं तदुपमेयम् — अ.

[4] प्रदीपे हरयाणानिर्णयसागरमुद्रिते 'एकत्वविषये संदेहाभावात्' इति दृश्यते। चौखाम्बामुद्रिते 'एकत्वविषयसंदेहाभावात्' इति। अयं पाठोऽन्नंभट्टस्वीकृतः स्यादिति भाति। अतः '**एकत्वविषय** एकत्वकोटिक' इति युक्तं भाति।

[5] इतिशब्दो नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुम्भमितिवदुपमानमिति स्यात्, न [1]तूपमानानी[ती]त्यर्थः। **पितेति**। यथा पितापि कस्यचित् पुत्रः, पुत्रोऽपि कस्यचित् पिता विवक्ष्यते तथा गवयोऽप्यारण्यकानां गोरुपमानम्, नगरस्थानां गौर्गवयस्येति विवक्षावशात् प्रयोगद्वयमस्तीत्यर्थः। 'शस्त्रीश्यामा' इत्युदाहरणस्य स्पष्टत्वात् प्रश्नायोगः, अत आह — **अयं भाव इति**। **वैयधिकरण्यादिति**। 'समानाधिकरणेन' इत्यधिकाराद्वैयधिकरण्ये समासाप्रसङ्ग इति भावः। वचनेन प्रकरणबाधाङ्गीकारे दोषमाह — **वचनेति**। [2]'स्त्रियाः पुंवत्' इति समानाधिकरणे तद्विधानादित्यर्थः। ननु देवदत्तायां वर्तमानः श्यामशब्दो विशेषवचन एव, न सामान्यशब्द इति कथं तेन समासः, अत आह — **साधारणेति**। एतच्चानुपदं [3]स्पष्टीभविष्यति। **उभयथेति**। शस्त्र्यां [4]देवदत्तायां वा, उभयथेत्यर्थः। ननु देवदत्ताशब्देनैव तस्या अभिधानमिति 'केन' इत्ययुक्तमित्याशङ्क्य समासेनानभिधाने 'शस्त्रीश्यामा देवदत्ता' इति सामानाधिकरण्यं न स्यादित्यभिप्रेत्य समासेनानभिधाने हेतुमाह — **पूर्वेति**। ननु 'उपमानानि सामान्यवचनैरुपमेये' इत्यनुक्तौ कथमुपमेयस्य समासवाच्यत्वम्, अत आह — **स्वाभाविकत्वादिति**। जातिविशेषेऽनुशासनं विनापि यथाश्वकर्णादिसमासस्य जातिविशेषवाचकत्वं तथात्रोपमेयग्रहणं विनाप्युपमेयवाचकत्वं प्रयोगवशादेव भविष्यतीत्यर्थः। **स्त्रीलिङ्गेनेति**। शस्त्रीवृत्तेस्तल्लिङ्गत्वनियमात्। **रूपस्य** 'शस्त्रीश्यामः' इति रूपस्य। प्रथमानिर्दिष्टत्वाभावादेकविभक्तित्वाभावाच्च कथमुपसर्जनत्वम्, अत आह — **अप्राधान्यादिति**। श्यामशब्दस्येत्यादिः। तत्र हेतुः — **समासेति**। शस्त्रीश्यामेत्यत्रोपसर्जनह्रस्वत्वमुक्तं निराह — **ह्रस्वविधाविति**। लौकिकग्रहणे भाष्योक्तं दूषणमुपपादयति — **लौकिकग्रहण इति**। ननु 'लोहिनी' इति [5]'वर्णादनुदात्तात्' इति ङीप्, कल्माषी' इत्यत्र [6]'अन्यतो ङीष्' समासात् पूर्वमेवास्तु। तेन [7]'अनुपसर्जनात्' इति निषेधो न भविष्यति, [8]अत आह — **उपमानस्येति**। तित्तिरिशब्दस्य पुँल्लिङ्गत्वात् [8]तद्वृत्तेः कल्माषशब्दस्य [9]पुँल्लिङ्गत्वम्, कुम्भकपालशब्दस्य नपुंसकत्वात् तद्वृत्तेर्लोहितशब्दस्य नपुंसकत्वमित्यर्थः। [10]ङीबिति ङीषोऽप्युपलक्षणम्। ननु समासावयवकल्माषशब्दस्योपमानवृत्तित्वेऽपि समासस्य गुण[11]विशिष्टोपमेयवृत्तित्वं वाच्यम्। अन्यथा समासाद् गुणविशिष्टोपमेयप्रतीत्यनुपपत्तेः। उपमानगुणादुपमेयगुणोऽन्य एव। तत्र च समासोऽनुपसर्जनमिति ङीप्ङीषौ समासाद् भविष्यतः, अत आह — **सत्यपीति**। ङीपोऽनुदात्तत्वात् स्वरभेदो नास्तीति 'ङीषि' इत्युक्तम्। **उपमानस्वरं** [12]'तत्पुरुषे तुल्यार्थ' इति पूर्वपदप्रकृतिस्वरम्। **ङीष्स्वरः** प्रत्ययाद्युदात्तत्वम्। [13]तमेव स्पष्टयति — **शस्त्रीति**। देवदत्तवृत्तित्वात् [14]पुंस्त्वोपपत्तिरित्यर्थः। **उपमेयवृत्तिनेति**। तथा च समासात् पूर्व-

---

[1] तुशब्दो नास्ति — अ.

[2] जातेश्चेति निषेधात् चपलाशब्दस्य प्रियादिगणपठितत्वाच्च नात्र 'स्त्रियाः पुंवत्' इति सूत्रोपादानम्, किं त्वर्थोपादानं बोध्यम्। 'पुंवत्कर्मधारय' इति स्त्रीवाचकशब्दस्य समानाधिकरणसमासे कर्मधारये पुंवद्भावस्य विहितत्वादित्यर्थः।

[3] स्पष्टं भविष्यति — अ.

[4] देवदत्तायां च — अ.

[5] पा. सू. ४. १. ३९.

[6] पा. सू. ४. १. ४०.

[7] पा. सू. ४. १. १४.

[8] तद्वृत्तिकल्माष — अ.

[9] 'पुँल्लिङ्गत्वम्' इत्यादि 'समासावयवकल्माषशब्दस्य' इत्यन्तं नास्ति — अ.

[10] प्रदीपे 'समासात् स्त्रीप्रत्ययो नास्ति' इत्यत्र 'समासात् ङीप्प्रत्ययो नास्ति' इत्यन्नंभट्टपाठ इति भाति।

[11] विशिष्टोपमेयत्वं वाच्यम् — अ.

[12] पा. सू. ६. २. २.

[13] दोषाभावमेवेत्यर्थः।

[14] पुंस्त्वापत्तिरित्यर्थः — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मेव ङीषित्यर्थः। भाष्ये शस्त्र्यां शस्त्रीशब्द एव वर्तत इत्यन्वयः। **देवदत्ताभिधान इति**। केवलेत्यादिः। कैमुतिकन्यायेनाह — **यत्रेति**। **अनिर्दिष्टः** प्रियदर्शनतारूपः। [1]**उपमेयश्रुतं** श्यामत्वम्। **प्रकरणम्** अधिकारलक्षणम्। ननु [2]'जातेश्च' इति प्रतिषेधात् कथं पुंवद्भावः, अत आह — **पुंवदिति**। अत्र [3]पुंवद्भावाभावेऽपि रूपसिद्धि शङ्कते — **नन्वस्त्रीपूर्वपदस्येति**। स्त्रीत्वाविवक्षायां स्त्रीचापल्यविशेषाप्रतिपत्तिः स्यादिति शङ्कते — **यद्यपीति**। पुंवद्भावेऽपि स विशेषः शब्दान्न गम्यत इत्याह — **तथापीति**। **सा** प्रकरणादिवशात् स्त्रीत्वप्रतिपत्तिः। 'ननु' इत्यादिशङ्कां समाधत्ते — **एवं तर्हीति**। लघुप्रकारासंभवे गौरवमप्याश्रयणीयम्, अत आह — **गत्यन्तरेति**। **तत्** गत्यन्तरम्। भाष्ये **तस्यामेव** देवदत्तायामेव। शस्त्रीशब्दस्य देवदत्तायां कथं वृत्तिः, अत आह — **शस्त्रीसादृश्यादिति**। ननु शस्त्रीशब्दस्योपमेयवृत्तित्वेऽप्युपमानवाचित्वाभावात् 'उपमानानि समस्यन्ते' इति कथम्, अत आह — **पूर्वेति**। उभयस्याप्युपमेयवृत्तित्वानङ्गीकारे [4]बह्वपेक्ष्यं स्यादिति यदुक्तं तदुपपादनार्थं 'यदि तावत्' इत्यादिभाष्यम्। तद्व्याचष्टे — **यदेति**। **न चेति**। आवृत्तिं विनैवोभयगतत्वेन श्यामत्वप्रतीतिसंभवाद् व्युत्पत्तिविरहाच्चेति भावः। **अत्रापि** उभयमुपमेयगतमित्यत्रापि। **उत्तरमिति**। 'यत्रानिर्दिष्टोऽपि गुणः' इत्यादिना व्याख्यातम्। **यद्यपीति**। शस्त्र्यां शब्दद्वयम्, शस्त्र्यां शस्त्रीशब्दो देवदत्तायां श्यामाशब्द इति पक्षद्वयेऽपीत्यर्थः। [5]**एषः** अनिर्दिष्टस्यापि संप्रत्यय इत्येष परिहारः। शस्त्र्यामेवोभयमित्यत्र 'शस्त्रीश्यामो देवदत्तः' इति ह्रस्वत्वं न स्यात्। लौकिकोपसर्जनत्वेन ह्रस्वाङ्गीकारे वा 'तित्तिरिकल्माषी' इत्यत्रेकारो न स्यात्। समासान्ङीषि पूर्वपदप्रकृति[6]स्वरो न स्यात्। द्वितीयपक्षे सामानाधिकरण्याभावेन पुंवद्भावो न स्यात्। श्यामाशब्दस्य कथं विशेषभाक्त्वम्, अत आह — **शस्त्रीश्यामेति**। उभयवृत्तिश्यामत्ववाचकत्वमुपपादयति — **शस्त्रीशब्देति**। नन्वधिष्ठानद्वयगतश्यामत्वयोर्भेदात् कथं सामान्यत्वम्, अत आह — [7]**अत्रेति**। केतकीगन्धसदृशः सर्पगन्ध इति प्रतीत्या गुणेऽपि सादृश्याङ्गीकारात् शस्त्रीदेवदत्ताश्यामत्वयोरपि सादृश्यविशेषसद्भावात् तदेव श्यामत्वद्वयस्य सामान्यमित्यर्थः। अतिरिक्तसादृश्यानङ्गीकारेऽप्याह — **गुणो वेति**। श्यामत्वावान्तरजातेरेकत्वेन तया तयोरभेदात् सामान्यत्वमित्यर्थः। 'सर्वश्च' इति भाष्यमुपपादयति — **शब्दान्तरेति**। **समासात्** प्राक् सामान्यवचनत्वमस्तीत्याह — **केवल इति**। **सांप्रतिकेति**। समासानन्तरं विशेषवाचित्वेऽपि ततः पूर्वं सामान्यवाचित्वमस्तीत्यर्थः। वास्तवकथनमेतत्। समासात् पूर्वमेव सामान्य[8]वचनत्वस्यापेक्षितत्वात्॥

[२, ६१९–६२७]

(**रत्नप्रकाशः**) अत्यन्तं भेदेऽभेदे [9]चोपमानोपमेयभावो न घटते। प्रकारान्तरं च न संभवति,

---

[1] प्रदीपे 'उपमेये श्रुतः' इत्यत्र 'उपमेयश्रुतम्' इत्यन्नंभट्टपाठ इति भाति॥ उपमेयविश्रुतं — अ.

[2] पा. सू. ६. ३. ४१.

[3] पुंवद्भावेऽपि — अ.

[4] बह्वपेक्षा स्यात् — अ; बह्वपेक्षं स्यात् — ऋ.

[5] एवम् — अ.

[6] 'स्वरः' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — अ.

[7] प्रदीपे 'तत्र सादृश्यम्' इत्यत्र 'अत्र सादृश्यम्' इति पाठोऽन्नंभट्टस्येति भाति।

[8] वचनत्वस्यापि विशेषितत्वात् — अ.

[9] वोपमानोपमेय — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

येनोपमानोपमेयभावः स्यादित्याशयवान् पृच्छति — **उपमानानीति** । प्रष्टुराशयं वोद्धुं तमन्यः पृच्छति — **किं चात इति**। प्रष्टा स्वाशयमाह — **यदीति**। **क इहोपमार्थ इति**। न कोऽपीति भावः। तथा च 'गौरिव गौः' इति प्रयोगान्नोपमानोपमेयभावो बुध्यत इत्युक्तं भवति। अत्यन्तभेदेऽपि तथैवेत्याह — [1]**अथेति**। **गौरिवाश्व इति**। अनयोरुपमानोपमेयभावो लोकेऽप्रसिद्ध इति भावः। वस्तुतस्त्वत्रापि किंचित् सामान्यमाश्रित्योपमानोपमेयभावेऽभ्युपगम्यमाने न काप्यनुपपत्तिः। उत्तरमाह — **एवं तर्हीति**। **किंचित् सामान्यमिति**। श्यामत्वादिकमिति भावः। आश्रयभेदेन गुणस्य भेदेऽप्यनुगताकारप्रतीत्या तद्गतं सामान्यमेकमभ्युपगम्यत इत्युपपन्नं तत्। वचनमन्तरेणायमर्थो वोद्धुं न शक्यत इति मन्यमान आह — **किं वक्तव्यमेतदिति**। इतर आह वक्ष्यमाणाशयेन — **न हीति**। स पुनः पृच्छति — **कथमिति**। इतरः स्वाशयमाह — **मानं हीति**। **उपादीयत इति**। चक्षुर्द्रोणाढकादिरिति शेषः। **तत्समीप इति**। तस्य मानस्य समीप इत्यर्थः। किं तस्य मानस्य सामीप्यमित्यत आह — **नात्यन्ताय मिमीत इति**। येनेति शेषः। यथा चक्षुरादिना घटादिकं जानाति, यथा वा द्रोणादिना व्रीह्यादिकम्, तथा गवादिना गवयादिकं न जानातीति गवादिकं प्रत्यक्षादिमानसमीपमित्युपचर्यत इति भावः। लोकेऽपि हि श्रेष्ठस्य राजादेः समीपे भृत्यादेरवस्थानमुच्यते, न तु भृत्यादेः समीपे राजाद्यवस्थानम्। तदेतदुपमानशब्दार्थनिदर्शनं फलतः कृतम्। शब्दव्युत्पत्तिस्तूपमीयते येन स उपमानमिति करणे ल्युट्, [2]'कुगतिप्रादयः' इति समासः। एतेन 'उपमानानीति निपातनात् तत्पुरुषः' इति निरस्तम्। निपातनाभ्युपगमे मानप्रयोजनयोरभावात्। उक्तार्थे उदाहरणं दर्शयति — **गौरिव गवय इति**। गौरुपमानमेव भवति, न तूपमेयमिति मन्यमानः शङ्कते — **कामं तर्हीति**। इष्टापत्त्योत्तरमाह — **बाढमिति**। विचारान्तरं कर्तुं प्रकृतसूत्रोदाहरणं पृच्छति — **किं पुनरिति**। उदाहरणमाह — **शस्त्रीश्यामेति**। **क्व पुनरिति**। उपमानभूते स्वार्थ एव वर्तते, उतोपमेय इति भावः। उत्तरमाह — **शस्त्र्यामिति**। उपमान एवेत्यर्थः। समानाधिकरणाधिकारात् श्यामाशब्दस्यापि शस्त्रीवृत्तितैव स्यादिति देवदत्तादिरूपोपमेयप्रतीतिर्न स्यादित्याशयेन पृच्छति — **केनेति**। [3]अश्वकर्णादिवत् शब्दशक्तिस्वाभाव्यात् समासस्योपमेयपरत्वं भविष्यतीत्याशयेनोत्तरमाह — **समासेनेति**। पूर्वोत्तरपदयोरुपमानवृत्तित्वं समासस्य तूपमेयवृत्तित्वमित्यभ्युपगम्यमाने समासस्योपमेयलिङ्गता न सिध्यति, [4]'परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः' इत्युक्तेरित्याशयेनाह — **यद्येवमिति**। समासस्यान्यपदार्थपरत्वे वर्तिपदानामुपसर्जनार्थपरत्वं न्यायसिद्धम्, यथा बहुव्रीहौ। तथा चोपसर्जनह्रस्वत्वेनाभिमतसिद्धिर्भविष्यतीति मन्यमान आचार्यदेशीय आह — **उपसर्जनस्येति**। आक्षेप्ता तद् दूषयति — **यदि तर्हीति**। **तित्तिरिकल्माषीति**। तित्तिरिशब्दस्य पुंल्लिङ्गत्वात् तत्समानाधिकरणस्य कल्माषशब्दस्यापि पुंल्लिङ्गत्वेन समासात् पूर्वं तावत् [5]'अन्यतो ङीष्' इति ङीष् न भवति। समासस्य तु स्त्रियां वृत्तौ स्त्रीप्रत्ययविधौ [6]तदन्तविधिना [7]'अनुपसर्जनं वर्णवाचको यस्तोपधभिन्नस्तदन्तात् प्रातिपदिकात् ङीष् स्यात्' इत्यर्थकेन [8]'अन्यतो ङीष्' इति सूत्रेण ङीष् इष्टः, स न स्यात्, तत्र कल्माषशब्दस्योपसर्जनत्वादिति भावः। **कुम्भकपाललोहिनीति**। अत्र कुम्भकपालशब्दस्य नपुंसकलिङ्गत्वात् तत्समानाधिकरणस्य लोहितशब्दस्यापि नपुंसकलिङ्गत्वेन समासात् पूर्वं [9]'वर्णादनुदात्तात् तोपधात्तो

---

[1] अथापीति — प, ब.
[2] पा. सू. २. २. १८.
[3] अश्वकर्णशब्दो वृक्षजातिविशेषवाचकः।
[4] पा. सू. २. ४. २६.
[5] पा. सू. ४. १. ४०.
[6] तदन्तविधिसत्त्वेन — प.
[7] अनुपसर्जनो वर्णवाचकः — प.
[8] पा. सू. ४. १. ४०.
[9] पा. सू. ४. १. ३९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नः' इति ङीष् न भवति। समासस्य तु स्त्रीत्वे तदन्तविधिना स तत्रेष्टो न स्यादिति भावः। वस्तुतस्तु तत्र पूर्वमेव ङीष्ङीपोः सतोस्तदन्तेनैव समासो व्यवस्थापयिष्यत इति "समासान्ङीषि कृते सति सतिशिष्टङीष्स्वरेणान्तोदात्तता स्यात्, इष्यते तु [1]"तत्पुरुषे तुल्यार्थ' इत्युपमानपूर्वपद-प्रकृतिस्वरः" इति नापादनीयम्। तदेवं पूर्वपदस्योपमानवृत्तित्वे उत्तरपदस्यापि तत्रैव वर्तनमापाद्य तन्मते दूषिते इदानीमुत्तरपदस्योपमेयवृत्तित्वं पूर्वपदस्य तूपमानवृत्तित्वमाश्रित्य व्यधिकरणसमासम-भ्युपगच्छति — **एवं तर्हीति। देवदत्तायां श्यामाशब्द इति।** तथा च 'शस्त्रीश्यामो देवदत्तः' इत्यादौ शस्त्रीशब्दादेः स्त्रीलिङ्गस्य पुंल्लिङ्गेन समासात् प्रागुक्तदोषाभावः। एवं 'तित्तिरिकल्माषी, कुम्भकपाललोहिनी' इत्यत्रोत्तरपदस्य स्त्रियां वर्तनात् समासात् पूर्वमेव ङीष्ङीपोः कृतयो-स्ततः समास इतीष्टसिद्धिः। अस्मिन् पक्षे सामान्यवाचकस्योपमेयरूपविशेषपरत्वे सामान्यधर्म-स्य [2]भानं न स्यादिति शङ्कते — **एवमपीति।** यद्यपि श्यामत्वगुणस्य देवदत्तायामपि सत्त्वेन तद्गुणपुरस्कारेणैव श्यामाशब्दस्य देवदत्तायां वर्तनेन श्यामत्वगुणस्य [3]भानं स्पष्टमेव, तथापि तेन तदभानमभ्युपगम्योपमेयवाचकोपमानवाचकयोः समास इवात्रापि साधारणधर्मस्य भानं संभवतीति समाधत्ते — **अनिर्दिश्यमानस्यापीति। चन्द्रमुखीति।** चन्द्रो मुखं यस्याः सेति बहुव्रीहौ [4]"स्वा-ङ्गाच्चोपसर्जनात्' इति ङीष्। तत्र चन्द्रशब्दश्च[न्द्र][5]सदृशलक्षकः, सादृश्यं तु प्रियदर्शनत्वेनेति भावः। 'समानाधिकरणेन' इत्यधिकाराद्व्यधिकरणयोः समासो न स्यादित्याह — **एवमपीति।** उत्तरमाह — **किं हि वचनान्न भवतीति।** वचनबलात् समानाधिकरणाधिकारेऽपि व्यधिकरणयोः समासो भविष्यतीति भावः। इतरो व्यधिकरणयोः समासमभ्युपगम्य सामानाधिकरण्यप्रयुक्त-कार्याभावं दोषमाह — **यद्यपीत्यादिना। पुंवद्भाव इति।** [6]"पुंवत् कर्मधारयजातीयदेशीयेषु' इत्यनेन। **न प्राप्नोतीति।** तथा च 'मृगीचपला' इत्यनिष्टं रूपं स्यादिति भावः। यद्यप्य-व्यविकन्यायेन[7] मृग इव चपलेति विग्रहे मृगचपलेति समासः, मृगीव चपलेति तु वाक्यमेवेत्युक्त-दोषपरिहारः संभवति, तथापि समानाधिकरणाधिकारानुसारेण पूर्वपदस्य तत्सदृशलक्षकत्वाश्रयणमेव युक्तमित्याशयेनाह — **एवं तर्हीति। तस्यामेवोभयं वर्तत इति।** देवदत्तायामुपमेयायामेवोभयं [8]पूर्वपदमुत्तरपदं च वर्तत इत्यर्थः। तत्र लक्षणया पूर्वपदं वर्तते, उत्तरपदं तु सामान्यगुणपुरस्कारे-णैव विशेषे पर्यवसानरूपेण वर्तत इति भावः। प्रागुक्तपक्षद्वयापेक्षयायमेव पक्षः समीचीन इत्याह — **एतच्चेति।** चोऽवधारणार्थः। एतदेवेत्यर्थः। **इतरथा हीति।** प्रागुक्तपक्षद्वये हीत्यर्थः। तत्र द्वितीयपक्षे तावद्दोषमाह — **यदि तावदिति। शस्त्रीव श्यामा देवदत्तेति।** देवदत्ता शस्त्रीव श्यामा भवतीत्यर्थः। **शस्त्र्यां श्यामेत्येतदपेक्ष्यं स्यादिति।** एकार्थीभावसिद्धय इति शेषः। अयं भावः — यदि शस्त्रीशब्दः शस्त्र्यामेव वर्तते श्यामाशब्दो देवदत्तायां, तदा [9]"नामार्थयोरभेद एव संसर्गः' इति व्युत्पत्तिबलेन शस्त्रीश्यामाशब्दयोरभेदसंसर्गेणैकार्थीभावलाभाय शस्त्रीशब्दस्य श्यामार्थ-परत्वमकामेनाप्यभ्युपेयम्। तथा च तृतीयपक्ष एव संपन्नः। यदि तस्य तत्परत्वं नाङ्गीक्रियते तदा [10]"नामार्थयोरभेद एव संसर्गः' इति व्युत्पत्तिविरोधं समानाधिकरणाधिकारविरोधं चाङ्गीकृत्य व्युत्पत्त्यन्तरेण तयोरेकार्थीभावं परिकल्प्य समासो विधेय इत्यत्यन्तक्लिष्टकल्पना स्यात्। तदपि

---

[1] पा. सू. ६. २. २.
[2] मानं — ब.
[3] मानं — ब.
[4] पा. सू. ४. १. ५४.
[5] सदृशलक्षणकः — ब.
[6] पा. सू. ६. ३. ४२.
[7] अयं न्यायो महाभाष्ये ४. १. ८८. सूत्रे प्रतिपादितः।
[8] पूर्वमुत्तरपदं च — प.
[9] लौ. न्या. साहस्री पृष्ठम् १६५.
[10] लौ. न्या. साहस्री. पृष्ठम् १६५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]लशुनमक्षणीयमेव, समानाधिकरणप्रयुक्तकार्यालाभात्। तदर्थमगतिकगतिभूताव्यविक[2]न्यायाश्रयणे तु [3]वृश्चिकभीन्याय आपतेदिति। नन्वव्यविकन्यायं[4] समानाधिकरणाधिकारविरोधं चाश्रित्य मृगस्य चपला मृगचपलेति षष्ठ्यन्तस्योपमानवाचकस्य सामान्यवाचकेन समासोऽभ्युपगन्तव्यः, तथा च व्युत्पत्तिविरोधो न भवतीति चेन्न, [5]"षष्ठी' इति सूत्रेणैव सिद्धे प्रकृतसूत्रस्यानर्थक्यापत्तेः। न चैव-मप्यनर्थकमेतत् सूत्रं [6]"विशेषणं विशेष्येण बहुलम्' इत्यनेनैव सिद्धत्वादिति वाच्यम्, उपमानवाचिनः पूर्वनिपातनियमेनास्य सार्थक्यात्। आद्यपक्षे दूषणमाह — **अथापीति**। **यथा शस्त्री श्यामा तद्वदियं देवदत्तेति**। [7]यद्यपि 'शस्त्रीव श्यामा देवदत्ता' इति वाक्येन प्रतीयमान एवार्थोऽनेनापि प्रतीयते, तथाप्यत्र वाक्ये शस्त्रीश्यामाशब्दयोरेकार्थकत्वं पूर्ववाक्ये तु भिन्नार्थकत्वमित्येतावान् विशेषो ज्ञेयः। **देवदत्तायां श्यामेत्येतदपेक्ष्यं स्यादिति**। अयं भावः — देवदत्तायां श्यामाशब्दो वर्तत इत्यवश्यमङ्गीकर्तव्यम्। तस्मिन्नङ्गीकृते शस्त्रीशब्दोऽपि देवदत्तायामभ्युपगन्तव्यः, तथा च तृतीयपक्ष एव संपन्नः। यदि श्यामाशब्दो देवदत्तायां नाभ्युपगम्यते तदा शस्त्रीश्यामाशब्दस्य [8]शस्त्र्यभिन्नश्यामार्थकत्वेन देवदत्ताशब्देन सामानाधिकरण्यं न स्यात्। शस्त्रीश्यामाशब्दे लक्षणया तत्सामानाधिकरण्यनिर्वाहे तु 'शस्त्रीश्यामो देवदत्तः' इत्यादौ पुँल्लिङ्गताद्यसंभवः स्यात्। न हि लक्षणया वर्तमानस्य शब्दस्य लक्ष्यलिङ्गता क्वचिद् दृष्टास्ति। अन्यथा 'चन्द्रो मुखम्' इत्यादौ चन्द्रादेर्नपुंसकत्वादिकं स्यादिति। तदेवं पूर्वमतद्वयं निराकृत्य तृतीये मते परिगृहीते सति तत्रापि किंचिद् दूषणमस्त्येवेत्याह — **एवमपीति**। तृतीयपक्षपरिग्रहेऽपीत्यर्थः। [9]**गुणो न निर्दिष्टो भवतीति**। श्यामाशब्दो देवदत्तात्वेन रूपेण देवदत्तायां वर्तते, न तु श्यामत्वेन रूपेणेति विपरीतं जानत उक्ति-रियम्। वस्तुतस्तु श्यामत्वगुणपुरस्कारेणैव स तत्र वर्तत इति निर्दिष्ट एव गुणस्तत्र भवति। [10]तुष्यतुदुर्जनन्यायेनोत्तरमाह — **अनिर्दिश्यमानस्यापीति**। बाधितार्थकं सूत्रं स्यादिति शङ्कते — **उपमानसमास इति**। विशेषवचनत्वं सामान्यवचनत्वं चैकस्यैकदा न संभवतीति तदुभयाश्रयेण समासविधानमयुक्तमिति भावः। एतेन "'शस्त्रीश्यामा देवदत्ता' इत्यत्र शस्त्रीशब्दसंनिधौ श्यामा-शब्दः प्रयुज्यमानः शस्त्रीगतं श्यामत्वगुणं प्रतिपादयति। न च शस्त्रीस्थो गुण आश्रयान्तरे वर्तत इति सामान्यवचनत्वाभाव इत्यर्थः।" इति निरस्तम्। शस्त्रीश्यामाशब्दयोर्देवदत्तास्थत्वमभ्युपगम्य समासे कथिते तत्रोभयोरुपमानवृत्तित्वकथनेनाक्षेपासंभवात्। उपमेयपरत्वाश्रयेणैवाक्षेपग्रन्थस्योपपन्न-त्वाच्च। परिहरति — **न वेति**। श्यामत्वगुणपुरस्कारेणैवोपमेये श्यामाशब्दः प्रवर्तत इति तस्य तेन रूपेण शस्त्रीबोधकतापि संभवतीति तावन्मात्रेण युगपत्सामान्यविशेषपरतामाश्रित्य समास-विधाने न काप्यनुपपत्तिरिति भावः। ननु बहूनां सामान्यं य आह स एव सामान्यवचनः, श्यामा-शब्दस्तु द्वयोरेव सामान्यमाहेति नायं सामान्यवचन इति वदन्तं मन्दबुद्धिं प्रत्याह — **नावश्यं स एवेति**। वस्तुतस्तु 'शस्त्रीश्यामा देवदत्ता' इति प्रयोगे शस्त्रीदेवदत्ताशब्दसंनिधिबलेनोभयनिष्ठ-सामान्यपर्यवसानेऽपि श्यामाशब्दस्य केवलस्य सकलवस्तुगतसामान्याभिधानसामर्थ्यसत्त्वेन बहूनामपि

---

[1] लौ. न्या. साहस्री पृष्ठम् ७०.

[2] अयं न्यायो महाभाष्ये ४. १. ८८. सूत्रे प्रतिपादितः।

[3] लौ. न्या. द्वितीयभागे पृष्ठम् ७६.

[4] अयं न्यायो महाभाष्ये ४. २. ८८. सूत्रे।

[5] पा. सू. २. २. ८.

[6] पा. सू. २. १. ५७.

[7] 'यद्यपि' इत्यस्यानन्तरं 'वाक्ये' इत्यधिकम् — प, ब.

[8] शस्त्रीभिन्न — प, ब.

[9] भाष्ये 'गुणोऽनिर्दिष्टो भवति' इत्यत्र 'गुणो न निर्दिष्टो भवति' इति पाठो निर्णय-सागरमुद्रिते।

[10] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सामान्यमाहेति तथात्वेऽपि न दोषः। इदानीं विशेषवचनत्वसमये मास्तु सामान्यवचनत्वम्, तथापि न दोषः, वचनारम्भसामर्थ्येन भूतपूर्वसामान्यवचनत्वमाश्रित्य समासकरणसंभवादित्याशयेनाह — अथवेति ॥

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २. १. ५६.

[२, ६२७–६२८]

(उद्द्योतनम्) शूरशब्दाप्रयोगेऽप्यत्र समासाप्रसङ्गान्नेदं प्रत्युदाहरणमित्याह — **उपमानेति**। **वैयधिकरण्यादिति**। पुरुषव्याघ्रपदयोरित्यर्थः। तर्हि 'सामान्याप्रयोगे' इत्यस्य किं प्रत्युदाहरणमित्याकाङ्क्षायामाह — **यदा त्विति**। शौर्यादेरिति पञ्चमी। **नियतेति**। शौर्यगुणेत्यर्थः। न्यायसिद्धत्वमेवाह — **प्राधान्यादेवेति** ॥

[२, ६२७–६२८]

(रत्नप्रकाशः) [1]'सापेक्षमसमर्थम्' इति निषेधादेव सामान्यप्रयोगे समासाभावोपपत्तौ किं 'सामन्याप्रयोगे' इत्यनेनेत्याशयेन पृच्छति — **सामान्याप्रयोग इति किमर्थमिति**। प्रधानं सापेक्षमपि समर्थं भवतीति ज्ञापनार्थं तदित्याशयेनोत्तरमाह — **इह मा भूदित्यादि**। यत्तु '**पुरुषोऽयं व्याघ्र इव शूर इति**। उपमानप्रतिपादनपरमेतत्। वैयधिकरण्यादेवात्र समासस्याप्रसङ्गः' इति। तन्न, व्याघ्रशब्दस्य व्याघ्रसदृशलक्षकत्वमिति व्याघ्र इवेत्यनेन सूचितत्वेन पुरुषव्याघ्रशब्दयोः सामानाधिकरण्यस्य सत्त्वेन वैयधिकरण्याश्रयेण समासाप्रसङ्गोक्तेरयोगात्। **प्रधानस्य सापेक्षस्यापीति**। ननु सामान्यवाचकसापेक्षता प्रधानस्येवोपसर्जनस्यापि वर्तते। अन्यथा शूरादेः सामान्यवचनत्वमेव न स्यात्। तथा चोभयोरेकसापेक्षत्वे समासो भवतीत्येतावदनेन ज्ञापनीयम्। एवं च 'राजपुरुषोऽभिरूपः' इत्यत्र प्रधानमात्रस्य सापेक्षत्वे समासो न स्यात्। यद्युच्येत — उपसर्जनस्य सापेक्षत्वेऽपि तदंशमुपेक्ष्य प्रधानस्य सापेक्षत्वेऽपि समासो भवतीत्येतज्ज्ञाप्यत इति। तर्हि 'ऋद्धस्य राज्ञः पुरुषोऽभिरूपः' इत्यादावपि समासप्रसङ्गादिति चेन्न, व्याघ्रशब्दस्य व्याघ्रसदृशलक्षकत्वे सति तस्य पुरुषवृत्तित्वेन पुरुषस्यैव व्याघ्रसाधारणधर्माकाङ्क्षासत्त्वात्, शौर्यस्य वस्तुगत्या व्याघ्रनिष्ठत्वमप्यस्तीत्येतावन्मात्रेण तस्य तदाकाङ्क्षाकल्पने मानाभावाच्च। यत्तु 'न्यायसिद्धेऽर्थे लिङ्गदर्शनमिदम्। प्राधान्यादेवानेकोपकार्यत्वाविरोधात् समासस्य सिद्धत्वात्' इति, तत्तु समर्थसूत्र एव निराकृतम् ॥

विशेषणं विशेष्येण बहुलम् २. १. ५७.

[२, ६२८–६३२]

(उद्द्योतनम्) ननु 'विशेषणविशेष्ययोः' इति किमपेक्षया षष्ठी। उपसर्जनाप्रसिद्धिरित्ये-

---

[1] महाभाष्यम् २. १. १.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तदपेक्षया वा, उभयविशेषणत्वादित्येतदपेक्षया वा। आद्ये इष्टापत्तिः, उभयोर्युगपदुपसर्जनत्वा[न]ङ्गीकारात्। द्वितीयेऽपि किमुभयापेक्षया, विशेषणत्वादित्येतदपेक्षया वा। आद्ये उभयशब्दस्य विशेषणत्वादित्यनेन समासो न स्यात्, असामर्थ्यात्। न द्वितीयः, उभयस्य विशेषणत्वादित्युभय-[1]संबन्धित्वेन प्रतीतस्य संबन्ध्यन्तरानपेक्षत्वात्, अत आह — **उभयापेक्षेति**। **शब्दान्तरेण** विशेषणत्वादित्यनेन। विशेषणविशेष्ययोरुभयस्य विशेषणत्वं व्याहतमित्याशङ्क्य तात्पर्यमाह — **विशेषणेति**। 'द्वयोः' इत्यनेनोभयोर्विशेषणत्वं सूचितम्। विशेषणविशेष्यशब्दयोरेकविशेष्यपरत्वेन [2]पर्यायत्वादसमासमाशङ्क्य प्रवृत्तिनिमित्तभेदेन पर्यायत्वाभावात् समाससंभव इति [3]"वैरूप्य" इत्यनेनोक्तम्। उभयोरपि विशेषणत्वं विशेष्यत्वं चोपपादयति — **कृष्णशब्द इति**। **नियम्यते** [4]अतिलेभ्यो व्यावर्त्यते। अतो विशेष्यत्वं व्यावर्त्यस्य। **विशेषणं** व्यावर्तकत्वात्। **एवमिति**। कृष्णाकृष्णसाधारणतिलशब्दस्य कृष्णशब्देन कृष्णेष्वेव नियमनादित्यर्थः। अन्यतरस्येत्युक्ते पूर्वदोषानतिवृत्तिः, अत आह — **द्रव्यस्यैवेति**। अत्र सूत्रे विशेषणविशेष्यशब्दाभ्यां प्रधानाप्रधाने विवक्षिते। अत्र द्रव्यं प्रधानम्, [5]गुणोऽप्रधानमिति नाव्यवस्थेति वार्तिकतात्पर्यम्। तिलानां प्राधान्येन विवक्षायां हेतुमाह — **ते हीति**। **स्वातन्त्र्यादिति**। इच्छायाः पुरुषाधीनत्वाभावादिति भावः। प्राधान्यप्रयुक्तसमासमात्रं गुणवचनस्य नास्तीति प्रतिपादयितुं 'न ह्ययम्' इति भाष्यम्। तद्व्याचष्टे — **न हीति**। सापेक्षनिरपेक्षयोः सहविवक्षापि न संभवतीत्याह — **द्रव्येणेति**। ननु यदा प्रकरणादिनाश्रयविशेषज्ञानं तदा गुणवचनस्यापि सहविवक्षा स्यात्, अत आह — **यदि त्विति**। **गुणेनेति**। [6]"पूरणगुण" इत्यादिना। गुणस्याप्रधानत्वात् 'प्रधानशब्दौ' इत्ययुक्तम्, अत आह — **प्रथमान्ताविति**। विशेषणद्वयस्य कृत्यमाह — **अनेनेति**। प्रथमान्तावित्यनेन। [7]अत्र हेतुः — **द्वन्द्वे हीति**। **एतच्च** एकस्मिन्नर्थेऽनवस्थानम्। [8]**पदार्थानां** द्वन्द्वपदार्थानाम्। प्रधानत्वस्य गुणेऽनङ्गीकारात् परस्परानुपकारकत्वं विवक्षितमित्याह — **परस्परेति**। द्रव्यप्राधान्ये हेतुः — **साक्षादिति**। तिलशब्दस्य द्रव्यवाचित्वं नास्तीति शङ्कते — **नन्विति**। जातेर्द्रव्याव्यभिचारेण तदभेदाज्जातिशब्दो द्रव्यवचनः। गुणस्य तु व्यभिचारेणाभेदाभावाद् गुणशब्दो न द्रव्यवचन इति वैषम्यमिति परिहरति — **नैष इति**। **उत्पत्तीति**। द्रव्यस्येत्यादिः। तदुदाहरति — **न हीति**। गौरिति गोत्वमात्रविवक्षया न भवतीत्यर्थः। गुणे तद्वैपरीत्यमाह — **गुणा इति**। पाकेन पूर्वगुणस्य नाश उत्तरगुणस्य चोत्पत्तिरित्युत्पत्ति[9]प्रभृत्याविनाशादव्यभिचारो नास्तीत्यर्थः। अनेन पिठरपाकः सूचितः। 'न हि भवति' इत्येतद्वैषम्यमाह — [10]**पटस्येति**। [11]**एतन्न्यायः** जातिवचनस्य द्रव्यवाचित्वं न गुणवचनस्येति [12]न्यायः। **श्वेताभाव इति**। उभयोर्द्रव्यवचनत्वे एतद्वैलक्षण्यं न स्यादित्यर्थः। यद्यपि [13]काम्ये प्रतिनिधिर्नास्ति, नित्ये आरब्धकाम्ये वा छागमात्रालाभे तत्सदृशमेषस्य शुक्लस्यैवोपादानम्, न कृष्णस्य, तथापि कृष्णच्छागलाभे न श्वेतमेषस्योपादानमिति जाति-

---

[1] संबन्धत्वेन — अ.
[2] पर्यायपदसमासमाशङ्क्य — अ, ऋ.
[3] प्रदीपे 'द्वयोर्वैरूप्यसद्भावात्' इत्यत्र 'द्वयोर्वैरूप्यसद्भावात्' इति पाठोऽन्नंभट्टस्येति प्रतीयते।
[4] अन्येभ्यो व्यावर्त्यंते — ऋ.
[5] गुणोऽप्रधानमिति व्यवस्थेति — अ.
[6] पा. सू. २. २. ११.
[7] 'अत्र' इति नास्ति — अ.
[8] प्रदीपे 'सर्वेषां पदानां वृत्तिरस्त्येव' इत्यत्र 'सर्वेषां पदार्थानां वृत्तिरस्त्येव' इति निर्णयसागरचौखाम्बामुद्रितयोः पाठः।
[9] प्रभृत्याविनाशाद्व्यभिचारः — अ.
[10] घटस्येति — अ, ऋ.
[11] 'एतन्न्याय' इति युक्तम्।
[12] 'न्याय' इति युक्तम्।
[13] काम्यप्रतिनिधिः — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शब्दवाच्यस्यैव प्रधानत्वं न गुणशब्दवाच्यस्येति भावः। **आवश्यकमिति**। [१]मनोज्ञादित्वात् [२]'आवश्यकाधमर्ण्ययोः' इति निपातनाद्वा भावे वुञ्। [३]'अव्ययानां भमात्रे टिलोपः'। तथा च तस्य समावेशशब्देन सामानाधिकरण्यासंभवादाह — **आवश्यकमस्मिन्निति**। कथं नावश्यकः समावेशः, अत आह — **अयं भाव इति**। [४]'वृक्षः शिंशपा'[५] इत्यपि प्रयोगोऽस्तीति केषांचिन्मतमुपन्यस्य दूषयति — **अत्र केचिदिति**। फलत्वेऽपि [६]शिंशपायाः फलप्रत्ययस्य [७]'फले लुप्' इति [लुपि] [८]'लुपि युक्तवत्' इति युक्तवद्भावेन फलमपि [९]शिंशपाशब्देनोच्यत इति तद्व्यावृत्तये वृक्ष इति विशेषणं युक्तमित्यर्थः। वृक्षत्वस्य प्राधान्ये प्रथमत उपलभ्यमानत्वं महाविषयत्वं च हेतुः, महाविषयत्वे व्यापकत्वमिति विवेकः। अस्मिन्नर्थे स्वयमपि वैदिकव्यवहारनिदर्शनायोपन्यस्यति — **तथा चेति**। [१०]**विशेषस्य** वृक्षविशेषस्य। [११]'खादिरो यूपः' इत्यादौ खदिराभावे [१२]कदरः प्रतिनिधीयते। वृक्षसामान्याभावे पुष्पादिकं न[१३] प्रतिनिधीयते। तथा च यागादेरिव [१४]वृक्षस्यापि प्रतिनिध्यभावेन प्राधान्यनिश्चय इत्यर्थः। **नैतदस्तीति**। तथा च [१५]शिंशपाशब्दाद् वृक्षत्वमेव पूर्वं प्रतीयत इति प्रतीत्यपेक्षया 'न ह्यवृक्षः' इति भाष्यमित्यर्थः। विशेषणमित्युक्ते विशेष्यस्य, विशेष्येणेत्युक्तौ विशेषणस्याक्षेपादेव[१६] लाभादुभयोपादानं स्पष्टार्थमित्याह — **विशेषणमिति**। महाविभाषया [१७]वाक्यसिद्धेर्बहुलग्रहणस्य प्रयोजनमाह — **बहुलेति**॥

[२, ६२८–६३२]

(रत्नप्रकाशः) [१८]विशेषणविशेष्ययोः संकीर्णत्वात् किं वोपसर्जनमिति संदेहात् समासनिर्णयो न स्यादिति मन्यमान आह — **विशेषणविशेष्ययोरिति**। **उभयविशेषणत्वादिति**। उभयशब्दस्य [१९]गुरुपुत्रादित्वात् सापेक्षत्वेऽपि समासः। द्रव्यगुणयोः संबन्धे द्रव्यं प्रधानमेव, गुण उपसर्जनमेवेति नियमान्नोक्तदोष इति परिहरति — **न वेति**। **अन्यतरस्येति**। द्रव्यगुणयोरन्यतरस्य द्रव्यस्येति भावः। **अपरस्य** गुणस्य। **उपसर्जनप्रसिद्धिरिति**। यद्विशेषकं तदेवोपसर्जनमिति तस्य गुणस्य वाचको द्रव्यवाचकेन समस्यत इति भावः। विशेषणविशेष्यभावः 'खञ्जकुब्जः,

---

[१] मनोज्ञादित्वाभावात् — ऋ.

[२] पा. सू. ३. ३. १७०.

[३] का. वा. ६. ४. १४४–५.

[४] वृक्षशब्दस्य विशेषणत्वेन 'वृक्षशिंशपा' इति प्रयोगे तात्पर्यं बोध्यम्।

[५] शिंशुपा — अ.

[६] शिंशुपायाः — अ.

[७] हरीतक्यादिभ्यश्चेत्यनेनेत्याशयः स्यादिति भाति। शिंशपाशब्दस्य हरीतक्यादिषु पाठो न दृश्यते। नापि हरीतक्यादेराकृतिगणत्वम्। अतः कथमिदमिति पर्यालोचनीयम्।

[८] पा. सू. १. २. ५१.

[९] शिंशुपा — अ.

[१०] प्रदीपे 'वृक्षविशेषस्य खदिरादेः' इत्यत्र 'विशेषस्य खदिरादेः' इत्यन्नंभट्टपाठ इति प्रतीयते।

[११] मीमांसायां ६. ३. १७. अधिकरणे एतदनुबन्ध्यर्थो विचारितः।

[१२] खादिरः प्रतिविधीयते — अ.

[१३] न प्रतिविधीयते — अ.

[१४] वृक्षत्वस्यापि — अ.

[१५] शिंशुपाशब्दात् — अ.

[१६] 'एव लाभात्' इति नास्ति — अ.

[१७] वाक्ये सिद्धे बहुल — ऋ.

[१८] भावप्रधाननिर्देशो बोध्यः।

[१९] सविशेषणानां वृत्तिर्नेत्यत्र 'अगुरुपुत्रादीनाम्' इति पर्युदासादिति भावः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुब्जखञ्जः' इत्यादाविव सर्वत्र विवक्षाधीन एव, न तु वस्तुस्वभावसिद्ध इति मन्यमान आह — **यदेति**। अयं ग्रन्थः समाधातुरेवेति तु भ्रम एव, तत्र समाधातृमते गुणप्रधानभावस्य वस्तुव्यवस्थितत्वात्। **तेन कर्तव्यमिति**। सामान्ये नपुंसकम्। यस्य तादृशी विवक्षा तेन तिलशब्दस्य कृष्णशब्देन सह तत्पुरुषः कर्तव्य इति भावः। प्रागुक्तो द्रव्यगुणयोर्विशेषणविशेष्यभावो वस्तुस्वभावव्यवस्थित एव। ततोऽन्यत्र तु विवक्षाधीन इत्याशयेन परिहरति — **न कर्तव्यमिति। न ह्ययं द्वन्द्व इति**। चार्थस्याविवक्षितत्वादिति भावः। एतेन 'न हि द्रव्यगुणवाचिनोर्द्वन्द्व उपपद्यते, गुणवचनस्य द्रव्यसापेक्षत्वेनासामर्थ्याद् द्रव्येण सहविवक्षासंभवात्'[1]। यदि तु द्वन्द्वः स्यात् स्यादेव तिलकृष्णा इति प्रयोगः' इति निरस्तम्। तिलातिरिक्तस्य कस्यचित् [2]कृष्णविशेष्यत्वेनानुपात्तत्वेन तत्र गुणवाचकस्य सापेक्षत्वाभावेन सहविवक्षाया अपि संभवेन सहविवक्षाभावस्यैव तत्र द्वन्द्वत्वाभावे हेतोरुचितत्वात्। अन्यथा 'यदि तु' इत्याद्युत्तरस्वग्रन्थासंगतेश्च। नन्विदमनुक्तोपालम्भनं भवति। न हि केनचिद् द्वन्द्वः कर्तव्य इति षष्ठीतत्पुरुषः कर्तव्य इति वापादितम्, येन तन्निषेधो युक्तः स्यात्। किं तु समानाधिकरणपदस्तत्पुरुष आपादितः, अतस्तत्परिहारमात्रमेवोचितमिति चेत् सत्यम्, अस्य तिलकृष्णशब्दस्य द्वन्द्वत्वं षष्ठीतत्पुरुषत्वं बहुव्रीहित्वं कर्मधारयत्वं च संभाव्यते। तत्र कर्मधारयत्वमात्रं पूर्वपक्षिणापादितम्। तदापादनेन बहुव्रीहित्वमप्यापादितप्रायमेव। तन्निराकरणेन च तदपि निराकृतमेव भवति। किं तु प्रसङ्गात् कश्चिदत्र द्वन्द्वः षष्ठीतत्पुरुषो वा कुतो न भवतीति प्रक्ष्यति, स मा प्राक्षीदित्याशयेन तावपि निराक्रियेते इति ज्ञेयम्। **न खल्वपि षष्ठीसमास इति**। तिलकृष्णपदार्थयोर्भेदस्य तत्राविवक्षितत्वादिति भावः। एतेन 'गुणेन सह षष्ठीसमासस्य निषेधादिति भावः' इति निरस्तम्। अत्र कृष्णशब्दस्यापि द्रव्यपरत्वेन गुणप्रधानशब्देन निषेधपरस्य गुणशब्दस्यात्र निषेधकत्वासंभवात्। न च 'ब्राह्मणस्य शुक्लाः' इति द्रव्यप्रधानेनापि तेन निषेध उदाहृत इति वाच्यम्, तत्र सापेक्षत्वादेव समासो नेति [3]"षष्ठी' इति सूत्रे भाष्य एव व्यवस्थापितत्वात्। साहित्यभेदौ न विवक्षितौ चेत् किं तर्हि विवक्षितमिति पृच्छति — **किं तर्हीति**। उत्तरमाह — **द्वाविमाविति**। [4]**प्रधानशब्दाविति**। वाक्यार्थे यन्मुख्यविशेष्यं तदभिन्नार्थकत्वात् प्रथमान्तस्यात्र प्रधानशब्दत्वं विवक्षितम्। इदं च प्रथमान्तेन विग्रह इति मताभिप्रायेण। परिनिष्ठितविभक्त्या विग्रह इति मतं चानुसृत्याह — **एकस्मिन्नर्थ इति। अवरुध्येते इति**। प्रयुज्येते इत्यर्थः। किं तत इत्यत आह — **न च द्वयोरिति**। ह्यर्थे चः। **किंचिदपि प्रयोजनमस्तीति**। प्रधानगुणभावाभाव इति शेषः। एतेन '**प्रधान[शब्द]योरिति**। परस्परविशेषणत्वेनानुपकारकयोः स्वतन्त्रयोरित्यर्थः' इति निरस्तम्। 'प्रथमान्तावित्यर्थः' इति प्राचीनस्वग्रन्थेन सह विरोधात्। प्रधानशब्दस्यैतादृशार्थपरत्वकल्पनायां मानप्रयोजनयोरभावाच्च। ततोऽपि किमायातमित्यत अह — **तत्रेति**। एकस्मिन्नर्थ इत्यर्थः। तदेतावत् सर्वं शङ्कासमाधानसाधारणमुपपाद्य शङ्कित्रभिमतं संदेहमनुवदति — **तत्र त्विति**। सोऽपि संदेहोऽन्यत्रैवोचितो न प्रकृत इत्याशयेनाह — **स चापीति। गुणशब्दाविति**। क्रियाशब्दौ, गुणशब्दौ, क्रियागुणशब्दौ चेत्यर्थः। **खञ्जकुब्ज इति**। खञ्जति वैकल्येन गच्छतीति खञ्जः, पचाद्यच्। यस्य पादे [5]किंचिद्वैगुण्यं वर्तते तस्मिन् रूढोऽयम्। तथा च तस्य क्रियाशब्दत्वं गुणशब्दत्वं च। कुब्जो वामन इति गुणशब्द एव सः। तथा च तौ गुणशब्दावपि भवतः, क्रियागुणशब्दावपि। केवलक्रियाशब्दयोस्तु 'पाचकपाठकः' इत्युदाहरणम्। केवलगुणशब्दयोस्तु 'कृष्णसारङ्गः' इति। **तत्प्रधानमिति**। तद्

---

[1] असंभवादिति छेदः।

[2] कृष्णविशेषत्वेनानुपात्तत्वेन — प, ब.

[3] पा. सू. २. २. ८.

[4] 'प्रधानशब्दाविति' इति नास्ति — प.

[5] किंचिद्वैवर्ण्यं वर्तते — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गुणापेक्षया प्रधानमेव, स्वभावात्, साक्षात्क्रियानिर्वर्तकत्वाच्च। तथा चात्रोक्तसंदेहो नोचित इति भावः। जातेरुत्पत्तिप्रभृत्याविनाशाद् द्रव्ये सत्त्वाज्जातिद्रव्ययोरभेदोपचाराज्जातिशब्दा एव द्रव्यशब्देन व्यवह्रियन्ते, न तु गुणक्रियाशब्दाः। गुणक्रिययोः सत्यपि द्रव्ये नाशदर्शनात्। तथा च तत्रोक्तसंदेहो नोचित इति भावः। द्रव्यस्यैव तत्र प्राधान्येऽलौकिकं दृष्टान्तमाह — **तद्यथेति**। **शुक्लमालभेतेति**। 'शुक्लं छागमालभेत' 'कृष्णं छागमालभेत' इति छागशब्दघटितमेव तद्वाक्यद्वयं ज्ञेयम्। अन्यथा 'न पिष्टपिण्डीमालभ्य कृती भवति' इत्युत्तरभाष्यमसंगतं स्यात्। तत्र छागशब्दाभावे हि पिष्टपिण्डचा अपि द्रव्यत्वेन द्रव्यप्रधानपक्षेऽपि पिष्टपिण्डीमालभ्य कृती भवति। तत्र छागशब्दे विद्यमाने तु गुणप्राधान्ये पिष्टपिण्डीमप्यालभ्य कृती भवति, द्रव्यप्रधाने तु तामालभ्य कृती न भवतीत्युपपन्नं तद् भाष्यं भवति। इदानीं ययोः प्रधानशब्दयोर्गुणप्रधानभावो न संभवति तयोरेकस्मिन् प्रयोगः कथं क्रियत इति पृच्छति — **कथमिति**। उत्तरमाह — **नैतयोरावश्यक इति**। शिंशपाशब्दो वृक्षवाचक एवेति यो न जानाति तं प्रत्युभयोः प्रयोग एकत्र सार्थकः। अन्यं प्रति तु व्यर्थ एवेत्याशयेनावश्यकशब्दप्रयोगः कृतः। एतेन 'यदा प्रथमत एव विशेष उपक्रम्यते शिंशपेति, तदा वृक्षविशेषस्यैव प्रक्रान्तत्वाद् विशेषस्य च सामान्याव्यभिचाराद्वृक्षशब्दस्य नैव प्रयोगेण भाव्यम्। यदा तु प्रथमं सामान्यमुपक्रम्यते वृक्ष इति, तदा [1]तद्विशेषणाय शिंशपाशब्द उपादीयमानो विशेषणमेव भवतीति शिंशपावृक्ष इत्येव भाव्यम्' इति निरस्तम्। शिंशपावृक्ष इति समासे शिंशपाशब्दस्यैव प्रक्रान्तत्वेन व्याहतत्वात्। आनुपूर्वीभेदेनार्थवत्त्वसंपादनानौचित्यात्। तदपेक्षया 'द्वावपूपावानय' इत्यादाविवोक्तार्थानामपि प्रयोगो भवतीत्याशयस्यैव श्रेष्ठत्वाच्च। 'केचित्तु शिंशपाया अपि फलव्यवच्छेदायोपादीयमानो वृक्षो विशेषणं भवतीति वृक्षशिंशपेत्यपि भवति' इति, तत्तुच्छम्। [2]'संभवव्यभिचाराभ्यां स्याद्विशेषणमर्थवत्' इति न्यायेन वृक्षत्वस्य शिंशपातिरिक्तस्थलेऽपि सत्त्वेन शिंशपाया वृक्षविशेषणत्वस्य संभवेऽपि शिंशपात्वस्य वृक्षादन्यस्मिन्नसत्त्वेन वृक्षस्य तद्विशेषणत्वासंभवात्। शिंशपाशब्दस्य प्लक्षादित्वसंभवेन[3] फले [4]'शांशपम्' इत्येव भवतीत्यस्य प्रकृतभाष्यस्वरसलभ्यत्वेन 'फलव्यवच्छेदाय' इत्युक्तरेसंगतत्वाच्च ॥

पूर्वापरप्रथमचरमजघन्यसमानमध्यममध्यमवीराश्च २. १. ५८.

[२, ६३३–६३४]

(उद्द्योतनम्) 'एवमादि' इति भाष्ये एवंशब्दार्थमाह — **एतदिति**। आदिशब्दो व्यवस्थायां, न प्रकार इत्याह — **उत्तरेति**। तद्गुणसंविज्ञानश्च बहुव्रीहिः। ननु पूर्वसूत्रसंग्रहाय प्रकार एवादिशब्दोऽस्तु, अत आह — **पूर्वेति**। यद्यपि 'स्नातानुलिप्तः' इत्यत्रोभयोरपि विशेषणत्वात् पूर्वनिपातार्थं ग्रहणं युक्तम्, 'एकशाटी' इत्यादावेकत्वस्यैव विशेषणत्वान्नानियमः, तथापि 'एकपटुः', [5]'सर्वः शुक्लः' इत्यादावनियमनिरासाय तेषामपि ग्रहणं नियमार्थमिति भावः। **अन्यत्र** उत्तर-

---

[1] तद्विशेषाय — प, ब.

[2] लौ. न्या. साहस्री पृष्ठम् ७९. तन्त्रवार्तिकम् १. ३. ८. आनन्दाश्रममुद्रितम् पृष्ठम् २६४. अत्र 'स्याद्विशेषणसंभवः' इति पाठ उपलभ्यते।

[3] 'संभवेन' इत्यस्यानन्तरं 'न' इत्यधिकम् — प, ब.

[4] 'प्लक्षादिभ्योऽण्' इत्यणि देविकाशिंशपेत्यादिनात्वे शांशपमिति रूपं बोध्यम्।

[5] 'सर्वशुक्लः' इत्यत्र तात्पर्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्रापि। [1]'पोटायुवति' इत्यत्र जातेः पूर्वनिपातार्थमजातेः समासनिरासार्थं च। अकृत्स्नशब्दस्य सर्वलक्ष्याव्यापकत्वपरत्वशङ्कां वारयति — **अकृत्स्नेति**। तत्र हेतुः — **न हीति**। **ततश्च** अव्यापकत्वात्। पदचतुष्टयस्य प्रयोजनमाह — **पर्यायेति**। फलतः पर्यायत्वं, न तु प्रवृत्तिनिमित्तैक्येन। व्याख्यानान्तरमाह — **चतुर्भिरिति**। **क्वचिदिति**। [2]'क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद् विभाषा क्वचिदन्यदेव'। **अवयवेति**। पदचतुष्टयस्य बहुव्रीहिरेव भवति, न तु सुशब्दसूक्ष्मशब्दयोस्तत्पुरुषः, सुशब्दस्य [3]प्रियविशेषणत्वाभावप्रसङ्गादिति समर्थसूत्र उक्तम्। उक्तार्थचतुष्टयस्य पदचतुष्टयं न वाचकमिति प्रकारान्तरमाह — **अन्ये त्विति**। 'सुसूक्ष्म' इत्यादाववयवसमास[4]निवर्तने प्रवृत्तिदर्शनात् [5]"निर्वर्तकम्' इत्येतदन्यथावतारयति — **अथवेति**। **इत्याह** इत्यत आह। हेतौ 'भूयस्त्वेन' इति तृतीयया भाव्यम्, कथं पञ्चमी, अत अह — **विभाषेति**। **अस्यैव** [6]"विशेषणं विशेष्येण' इत्यस्यैव। **केवलेन** प्रपञ्चरहितेन सामान्यलक्षणेन। **व्यवस्थितेति**। महाविभाषैव [7]व्यवस्थिताङ्गीक्रियतामित्यर्थः। **इत्याह** इत्यत आह। **पत्रेति**। पत्रवाचिनोऽध्वर्युपरिषद्भ्यां चाञ् स्यात् [8]"तस्येदम्' इत्यर्थे। अश्वस्येदमाश्वम्, आध्वर्यवम्, पारिषदम्। शास्त्रस्य लोकवेदसांधारणत्वेऽपि वेदाङ्गत्वाद्वेदप्राधान्यसूचनाय वेदग्रहणमित्याह — **वेदाङ्गत्वादिति**॥

[२, ६३३–६३४]

(रत्नप्रकाशः) [9]"विशेषणं विशेष्येण' इति पूर्वसूत्रेणैव सर्वेषां विशेषणवाचकानां विशेष्यवाचकैः समासे सिद्धे सति पुनर्विशेषणवाचकानां विशेषरूपेण विशेष्यवाचकैः समासविधानं व्यर्थमित्याशयेनाह — **अथेति**। **उत्तरत्रेति**। अन्यत्रेत्यर्थः। विशेषविषय इति यावत्। तेनायमाक्षेपः [10]"पूर्वकाल' इति सूत्रे सर्वजरत्पुराणनवकेवलविषयकोऽपि भवति। एतेन "एतत्सूत्राद्युत्तरसूत्रानुक्रमणमित्यर्थः। [11]"पूर्वकालैक' इत्ययं योगः पूर्वकालादीनां पूर्वनिपातार्थः" इति निरस्तम्। [12]'पूर्वकाल' इत्यादिसूत्रे पूर्वकालशब्दमात्रस्य पूर्वनिपातनियमार्थत्वेऽप्यन्येषां तदसंभवेनोत्तरत्रशब्दस्य मद्वर्णितार्थकताया एवोचितत्वात्। तत्रैकशब्दः [13]'दिक्संख्ये संज्ञायाम्' इति नियमबाधनार्थक इत्यन्यदेतत्। [14]"पापाणके कुत्सितैः' इति सूत्रं तु [15]"कुत्सितानि कुत्सनैः' इति विशेष्यपूर्वनिपातबाधनार्थम्। **न विशेषणमिति**। पूर्ववाक्यगतकिंशब्दानुषङ्गेणेदं वचनं व्याख्येयम् — [16]"विशेषणं विशेष्येण बहुलम्' इत्येव सिद्धं न किमिति। वस्तुगत्या पूर्वसूत्रेणैव सिद्धे पुनर्विधानं व्यर्थमेवेति मनसि निधाय 'स्थितस्य गतिश्चिन्तनीया' इति न्यायेन समाधत्ते — **बहुलवचनस्येति**। **अकृत्स्नत्वादिति**। न विद्यते कृत्स्नं विषयो यस्य तत्त्वादित्यर्थः। पुनराक्षिपति — **यद्यकृत्स्न-**

---

[1] पा. सू. २. १. ६५.
[2] इदं वचनं सारस्वतव्याकरणे।
[3] इष्टसर्वविशेषणत्वेत्यर्थः।
[4] निर्वर्तने — ऋ.
[5] निवर्तकम् — अ.
[6] पा. सू. २. १. ५७.
[7] व्यवस्थिता क्रियतामित्यर्थः — अ.
[8] पा. सू. ४. ३. १२०.
[9] पा. सू. २. १. ५७.
[10] पा. सू. २. १. ४९.
[11] पा. सू. २. १. ४९.
[12] पा. सू. २. १. ४९.
[13] पा. सू. २. १. ५०.
[14] पा. सू. २. १. ५४.
[15] पा. सू. २. १. ५३.
[16] पा. सू. २. १. ५७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मिति। [1]बहुलग्रहणस्याकृत्स्नत्वेन पुनर्विशेषमुखेन विधाने आश्रीयमाणे सामान्यसूत्रं [2]व्यर्थमेव स्यात्, अत्यन्तगौरवग्रासश्चेति भावः। परिहरति — **एवं तर्हीति**। **कृत्स्नमिति**। मत्वर्थलक्षणया कृत्स्नविषयकपरम्। [3]साधककारकनिर्वर्तकशब्दानां पर्यायोपादानं बहुलग्रहणघटितवचनस्य प्रशंसार्थम्। लोकेऽपि हि स्वामी प्रभुरीश्वरो भगवानयमस्माकमिति स्तुत्यर्थं वदन्ति। प्रकृते स्तुतिप्रयोजनं शङ्कितृसंतोषः। तेन च तस्याग्रहस्य शान्तौ व्यर्थकालक्षेपाभावः। तेषां प्रयोजनान्तरकथनं तु कैश्चित् कृतमसंबद्धप्रलापमात्रमित्युपेक्षितम्। **उदाहरणभूयस्त्वादिति**। [4]"विभाषा गुणेऽस्त्रियाम्' इति पञ्चमी। उदाहरणभूयस्त्वाद्धेतोरेते एवंजातीयका अपि विधयः सार्थका भवन्तीति भावः। किंजातीयका एत इत्यत आह — **येषु लक्षणं प्रपञ्चश्चेति**। तत्र लक्षणशब्देन सामान्यसूत्रमभिमतम्, प्रपञ्चशब्देन विशेषसूत्रम्। तथा चोदाहरणप्रपञ्चार्थं विशेषसूत्रोपक्रम इति भावः। **केवलं लक्षणमिति**। उदाहरणप्रपञ्चपरविशेषसूत्ररहितं सामान्यलक्षणं सामान्यलक्षणरहितोदाहरणप्रपञ्चपरविशेषसूत्रं च तथा कारकं [5]बोधकं न भवति, यथा सप्रपञ्चलक्षणमिति भावः। केवललक्षणेन हि मन्दबुद्ध्यनुग्रहो न भवति। केवलप्रपञ्चस्तु प्रतिपदपाठात्मको गौरवग्रस्तः। ननु लक्षणप्रपञ्चोभयाश्रयणे क्रियमाणे सामान्य[6]लक्षणे बहुलग्रहणादिकं किमर्थं क्रियत इत्यत आह — [7]**अवश्यं खल्वपीति**। महाविषयत्वाच्छास्त्रस्य सर्वो विषयो विशेषमुखेन प्रदर्शयितुं न शक्यते, आनन्त्यात्। अत्यन्तं सामान्यमुखेन [8]"पृषोदरादीनि यथोपदिष्टम्' इत्येतावन्मात्रेणापि न शक्यते, तेन लक्षणेन साक्षादेकस्यापि लक्ष्यस्यासिद्धेः। तस्य विशेषमुखेन व्याख्याने शरणीकरणीये तु तेनैव सिद्धे सामान्यसूत्रं व्यर्थं स्यादिति यथान्यासं सर्वमनवद्यमिति स्थितम्। **सर्ववेदपारिषदमिति**। [9]"पत्राध्वर्युपरिषदश्च' इत्यञ्। सर्वे परिषदः समुदायस्येदं **पारिषदम्** साधारणमित्यर्थः। सर्वे वेदाः सर्ववेदाः, सर्ववेदानां पारिषदं सर्ववेदपारिषदम्॥

श्रेण्यादयः कृतादिभिः २. १. ५९.

[२, ६३५]

(उद्द्योतनम्) 'पठ्यन्ते' इत्यस्य कृत्यमाह — **अत एवेति**। कृतादयोऽपि वृत्तौ पठिताः, अत आह — **प्र योगेति**। श्रेणिशब्दार्थमाह — **एकेति**। एकेन शिल्पेन पण्येन वा जीविनामित्यर्थः। **श्रेणीकरणं** संघीकरणम्। 'किंचित् क्रियन्ते' इत्यस्यार्थमाह — **दण्डनादीति**। [10]"अन्यत्रायम्' इति भाष्ये **अयं** वार्तिककारः। 'अन्यत्र'शब्दार्थमाह — **साक्षादिति**। समाधानतात्पर्यमाह — **साक्षात्कृत्येति**। साक्षादित्यस्य च्व्यर्थत्वे विकल्पिता गतिसंज्ञा, साक्षात्कृत्य, साक्षात् कृत्वा। च्व्यन्तत्वे तु [11]"ऊर्यादयः' इति नित्या गतिसंज्ञा, साक्षात्कृत्य। तत्र च्व्यन्त-

---

[1] 'बहुलग्रहणस्य' इत्यतः प्राक् 'यदि' इत्यधिकं वर्तते — प, ब. तस्यास्मिन् वाक्येऽन्वयास्वारस्यात् त्यागः कृतः।

[2] व्यर्थमिव स्यात् — ब.

[3] 'कारकसाधक' इत्युचितम्।

[4] पा. सू. २. ३. २५.

[5] 'बोधकम्' इति नास्ति — ब.

[6] लक्षणबहुलग्रहणादिकं — ब.

[7] भाष्ये 'अवश्यं खल्वस्माभिः' इत्यत्र 'अवश्यं खल्वप्यस्माभिः' इति निर्णयसागरमुद्रिते पाठः।

[8] पा. सू. ६. ३. १०९.

[9] पा. सू. ४. ३. १२३.

[10] अन्यस्यायं — ऋ.

[11] पा. सू. १. ४. ६१. 'ऊर्यादिच्विडाचश्च' इत्यस्य पृथक्कृत्य निर्देशोऽयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रतिषेधाभावे च्व्यन्तस्यापि च्व्यर्थत्वेन परत्वाद्विकल्पः स्यादिति तन्निवृत्तये च्व्यन्तप्रतिषेधः [1]क्ृतः। इह तु च्व्यन्ते समासद्वयप्रसङ्गे परत्वान्नित्यो गतिसमास एव स्यात्, नानेन विकल्पितसमास इति च्व्यन्तप्रतिषेधो न कर्तव्य इति समुदायार्थः। [2]"ऊर्यादयः' इत्यनेन नित्या, [3]"साक्षात्प्रभृतीनि च' इति विकल्पिता। **तत्र** [4]"साक्षात्प्रभृतीनि च' इत्यत्र। **पूर्वा** [5]"ऊर्यादि' इति विहिता॥

[२, ६३५]

(रत्नप्रकाशः) श्रेण्यादयः पठ्यन्त इति। श्रेण्यादिरनाकृतिगणः। तत्र यावन्त ऋषिणा पठितास्तावन्त एव श्रेण्यादयः, न त्वन्यः कश्चिदिति भावः। **कृतादिराकृतिगण इति।** तथा च तत्रर्षिणा ये न पठितास्तेऽपि केचन शिष्टप्रयोगानुसारेण कृतादय इति कल्पयितुं शक्यन्त इति भावः। एतेन 'अत एवात्रादिशव्दो व्यवस्थावाची, कृतादिरित्यत्रादिशव्दः प्रकारवाची। प्रयोगदर्शनाच्चोदाहरणस्थानीयाः [6]कतपये वृत्तिकारैः प्रदर्शिताः' इति निरस्तम्। आकृतिगणपाठस्यानार्षत्वे [7]"उरण्' सूत्रगतस्य कस्कादिगणे भ्रातुष्पुत्रशव्दपाठादेकादेशविसर्गस्य षत्वं नेत्येवंपरभाष्यस्यासंगतत्वापत्तेः। न ह्याधुनिकपाठस्य ज्ञापकता भाष्यकृताश्रितेति कल्पयितुं युक्तं भवति। एकशिल्पपण्याद्याश्रयणोपजीविनां संघः **श्रेणिः। किंचित् क्रियन्त इति।** अभूतप्रादुर्भावातिरिक्तक्रियाकर्म भवन्तीत्यर्थः। 'श्रेणयः कृताः' इत्युक्ते हि श्रेणयः स्थापिता इत्यप्यर्थो गम्यते। **अन्यत्रेति।** [8]"साक्षात्प्रभृतीनि च' इत्यत्र। **अयं** वार्तिककारः। **च्व्यर्थग्रहणेष्विति।** [9]"साक्षात्प्रभृतिषु च्व्यर्थवचनम्' इत्युक्त्वेति भावः। **च्व्यन्तप्रतिषेधं शास्तीति।** [10]"तत्र च्व्यन्तस्य प्रतिषेधः' इत्येवमिति भावः। **तत्** प्रतिषेधम्, सामान्ये नपुंसकनिर्देशः। **न तथा** न शास्तीत्यर्थः। [**किं कारणमिति**]। तत्रेति शेषः। उत्तरमाह — **अन्यत्रेति।** गतिसंज्ञाविधावित्यर्थः। **च्व्यन्तकार्यमिति।** [11]"ऊर्यादिच्विडाचश्च' इति नित्या गतिसंज्ञेत्यर्थः। **च्व्यर्थकार्यमिति।** [12]"साक्षात्प्रभृतीनि च' इति वैकल्पिकी गतिसंज्ञेत्यर्थः। तथा च तत्र परत्वाद्वैकल्पिकी गतिसंज्ञा प्रसक्ता, सा मा भूदिति च्व्यन्तप्रतिषेधः कर्तव्य इति भावः। **इहेति।** समासविधौ। **च्व्यर्थकार्यमिति।** प्रकृतसूत्रेण विधीयमाना वैकल्पिकतत्पुरुषसंज्ञेत्यर्थः। **च्व्यन्तकार्यमिति।** [13]च्व्यन्तत्वनिमित्तगतिसंज्ञाप्रयुक्तं कार्यं [14]"कुगतिप्रादयः' इति सूत्रेण विधीयमाना नित्या तत्पुरुषसंज्ञेत्यर्थः॥

---

[1] 'कृतः' इति नास्ति — अ.
[2] पा. सू. १. ४. ६१.
[3] पा. सू. १. ४. ७४.
[4] पा. सू. १. ४. ७४.
[5] पा. सू. १. ४. ६१.
[6] कतिपयवृत्तिकारैः — प, ब.
[7] पा. सू. १. १. ५१.
[8] पा. सू. १. ४. ७४.
[9] का. वा. १. ४. ७४–१.
[10] का. वा. १. ४. ७४–३.
[11] पा. सू. १. ४. ६१.
[12] पा. सू. १. ४. ७४.
[13] च्व्यन्तत्वनिमित्तेति बहुव्रीहिः।
[14] पा. सू. २. २. १८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्तेन नञ्विशिष्टेनानञ् २. १. ६०.

[२, ६३५–६३८]

(उद्द्योतनम्) विशिष्टशब्दस्य [1]सावधारणाधिक्यवाचित्वे [2]भिन्नप्रकृतिके प्रसङ्ग एव नास्तीति समानप्रकृतिग्रहणं न कर्तव्यम्, अत आह — **विशिष्टशब्द इति**। **अर्थेति**। विद विचारणे, [3]'नुदविद' इति वा निष्ठानत्वम्, विन्नम्। विद सत्तायां, [4]'रदाभ्याम्' इति नत्वम्, विन्नं चाविन्नं चेत्यर्थभेदात् समासो न। ननु 'अनञ्' इत्युक्तेऽपि नञ्व्यतिरिक्तत्वात् कर्तव्यशब्दस्य, 'कर्तव्यमकृतम्' इत्यत्र समासः स्यादेव, अत आह — **न विद्यत इति**। तथापि कथं 'कर्तव्यमकृतम्' इत्यस्य व्यावृत्तिः, अत आह — **तच्चेति**। 'अनञ्' इत्यकृतेऽतिप्रसङ्गमुपपादयति — **तदयमिति**। मात्रशब्देनावधारणनिरासः। वार्तिकेनापि न[5] तन्निरास इत्याह — **समानेति**। अनञिति कृते तन्निरास इत्याह — **ततश्चेति**। [6]नन्ववधारणरहिताधिक्यवचने विशिष्टशब्दे [7]नु[डि]डधिकेऽपि भविष्यतीति 'नु[डि]डधिकेन च' इति व्यर्थम्, अत आह — **अवधारणेति**। **उपलक्षणं** नुडिड्ग्रहणमित्यनुषङ्गः। **'कृतेत्वेनापीति**। [8]'शाच्छोरन्यतरस्याम्' इति तादौ कितीकारोऽन्तादेशः। यद्यपि 'अर्थभेदमकुर्वतः' इति पूर्वसमाधानमत्राप्यस्ति, तथापि वास्तवसमाधानमाह — **न त्वस्येति**। नन्वाढ्यत्वादिगुणोक्तिपूर्वकं 'स्वाध्यायेन विशिष्टः' इति साधारणोक्तौ क्वचिदवधारणे क्वचिदाधिक्यमात्रे विशिष्टशब्द इत्यत्र किं नियामकम्, अत आह — **यदेति**। द्वयोः स्वाध्यायव्यतिरिक्तसर्वगुणसाम्यतात्पर्यकप्रयोगेऽवधारणे वर्तते। इतरगुण[10]साम्याविवक्षायामाधिक्यमात्र इत्यर्थः। अत्रावधारणस्यैव ग्रहणे विनिगमकमाह — **इह क्तेन सनञेति**। 'सनञा' इति सहार्थतृतीययैव नञ्विशिष्टेनेत्यर्थलाभाद् विशिष्टग्रहणमवधारणार्थमित्यर्थः। नन्वेवमाधिक्यमात्रपक्षोऽपि भाष्ये कथमङ्गीकृतः, अत आह — **गुरुलाघवेति**। भाष्ये 'प्रतिषेधेन' इत्येतदनन्तरमर्थ इत्यनुषङ्गः। अवधारणपक्षेऽप्युक्तदोषानुवादः — भाष्ये **नु[डि]डधिकेनापीति**। [11]तदापीत्यन्वयः। नन्वार्यायां पूर्वोक्तस्य 'अनञिति कर्तव्यम्' इत्यस्य कथमसंग्रहः, अत आह — **अनञिति**। विसमाप्तिशब्दार्थमाह — **विसमाप्तिरिति**। उदाहरणेऽसमाप्तिं दर्शयति — **कृतेति**। अव्याप्तिं निराह — **कृतापकृतमिति**। [12]विमुक्तस्याभुक्तत्वं कथम्, अत आह — **विशब्दस्येति**। अतिव्याप्तिं निराह — **सिद्धमिति**। **सर्वथा** यथाश्रुतसूत्रे, न्यासान्तरे च। **अल्प इति**। अल्पत्वे वर्तमानात् [13]कः स्यात्, अल्पं घृतं घृतकम्। क्रयाक्रयिकेत्यादौ क्रयश्चासावल्पक्रयश्चेति विग्रहः॥

---

[1] साधारणाधिक्य — अ.

[2] भिन्नप्रकृतिप्रसङ्ग एव — अ.

[3] पा. सू. ८. २. ५६.

[4] पा. सू. ८. २. ४२.

[5] 'न' इति नास्ति — अ.

[6] नन्ववधारणाधिक्यवाचिनि विशिष्टशब्दे — अ.

[7] 'नुडिडधिकेऽपि भविष्यतीति' इति नास्ति — अ.

[8] प्रदीपे 'कृते तदधिकेनापि' इत्यत्र 'कृतेत्वेनापि' इत्यन्नंभट्टपाठ इति भाति।

[9] पा. सू. ७. ४. ४१.

[10] साम्यविवक्षायाम् — अ.

[11] 'नुडिडधिकेनापि' इत्यत्रत्यापेस्तदेत्यनन्तरं मेलनं कर्तव्यमित्याशयः॥ तथापीत्यन्वयः — अ, ऋ.

[12] मुक्तस्याभुक्तत्वं — अ, ऋ.

[13] कन् स्यात् — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ६३५–६३८]

(**रत्नप्रकाशः**) विशिष्टशब्दोऽधिकार्थकः, नञधिकेन क्तान्तेन नञ्शून्यं क्तान्तं समस्यत इत्यर्थं सूत्रस्य मन्यमानो वार्तिककार आह — **नञ्विशिष्ट इति**। 'क्तेन नञ्विशिष्टेन' इति सूत्र इत्यर्थः। **समानप्रकृतिग्रहणमिति**। 'समानप्रकृति' इति प्रथमान्तमनञ्शब्दसमानाधिकरणं पठनीयमिति भावः। तत्र प्रकृतेः समानत्वं नामार्थकृतं रूपकृतं च ज्ञेयम्। तेन भक्षणार्थकभुजिप्रकृतिकं क्तान्तं पालनार्थकभुजिप्रकृतिकक्तान्तेन नञ्विशिष्टेन न समस्यते। समानप्रकृतिग्रहणेनैव सिद्धेऽनञ्ग्रहणं न कर्तव्यमिति न भ्रमितव्यम्, तस्य क्तान्तपरिग्रहार्थस्यावश्यकत्वादित्याशयेनाह — **अनञिति चेति**। न विद्यते नञ् यस्मिन् सोऽनञ्। नञ्विशिष्टेन क्तेनेत्येतत्प्रत्यासत्त्यानञित्यत्रान्यपदार्थः क्तान्त एव लभ्यत इति भावः। अन्यदपि किंचिद्वक्तव्यं भवतीत्याह — **नुडिडधिकेन चेति**। इडधिकेनेति व्यर्थम्, "अर्थवत आगमः'[1] इति परिभाषयेडागमविशिष्टस्यापि क्तग्रहणेन ग्रहणात्। नुड्ग्रहणं तु कर्तव्यमेव, समानत्वेन प्रकृतेर्विशेषितत्वात्। एतेन 'यद्यपि नुडिटौ तद्भक्तौ, तथापि श्रुतिभेदहेतुत्वादवधारणेन च श्रुतिभिन्नस्य निराकरणात् तदधिकस्याप्राप्तिरिति भावः' इति निरस्तम्। समानशब्देन प्रकृत्यंशे श्रुतिभेदस्य निराकरणेऽपि प्रत्ययांशे श्रुतिभेदस्य केनाप्यनिराकरणात्। विशिष्टशब्दस्यानवधारणपरत्वाश्रयेणैव पूर्ववार्तिकयोः प्रवृत्तत्वेन तत्समुच्चयेन प्रवृत्तस्याधिकशब्दघटितस्य तृतीयस्यापि वार्तिकस्य तदाश्रयेणैव प्रवृत्तेरुचितत्वात्। 'नुडिडधिकेनापि तदा समासः सिद्धो भवति' इत्युत्तरभाष्यस्येडागममात्रपरत्वेनैवोपपन्नत्वाच्च। इदानीं विशिष्टशब्दस्यावधारणपरत्वाश्रयेणोक्तवार्तिकानां मध्ये आद्यवार्तिकद्वयं निराकृत्य तृतीयं स्वीकर्तुमाह — **किमुच्यत इति**। अत्र सिद्धं चाभुक्तं चेत्यत्र। **देवदत्तयज्ञदत्तावित्यादि**। अत्र 'आढ्यौ' इत्यादिना सर्वैर्गुणैस्तुल्यावित्यर्थोऽभिमत इति कृत्वा 'स्वाध्यायेन विशिष्टः' [2]इत्यनेन स्वाध्यायेनैव विशिष्ट इत्यवधारणमुपपन्नम्, उत्तरवाक्ये तु 'आढ्यौ' इत्यादावाढ्यत्वादिगुणसाम्ये औदासीन्यमिति कृत्वा 'स्वाध्यायेन विशिष्टः' इत्यनेनाधिक्यप्रतीतिरुपपन्ना। **नाप्यनञिति प्रतिषेधेनेति**। नञैव विशिष्टेन विरूपेण क्तान्तेन समस्यत इत्युक्ते क्तान्तमेव तेन समस्यत इति विशेषावगतिसंभवादिति भावः। **समासो न प्राप्नोतीति**। तथा च 'क्तेन नञ्नुडिड्विशिष्टेन' इति सूत्रं कर्तुमुचितमिति भावः। **समासः सिद्ध इति**। [3]इडधिकेन समासः सिद्ध इत्यत्रैव तात्पर्यम्। नुडधिकेन तु न प्राप्नोत्येव, समानप्रकृतिग्रहणेन नुट्[4]शून्यनञो वारणात्। तथा चास्मिन् पक्षे 'क्तेन नञ्नुड्विशिष्टेनानञ् समानप्रकृति' इति सूत्रं कर्तुमुचितमिति भावः। तथा चोभयथापि यथाश्रुतं दुष्टमेव। तत्र 'अनञ्' इति पदस्य स्पष्टप्रतिपत्त्यर्थकत्वं 'नुडिडधिकेन च' इति वार्तिकं चाश्रित्य यथाश्रुतं सूत्रं भगवताभ्युपगतमिति भाष्यस्वरसो गम्यते। उक्तपक्षद्वयमार्यया संगृह्णाति — **अवधारणं नञा चेदिति**। **कार्यं तुल्यप्रकृतिकेनेति**। उपलक्षणमिदं नुडधिकेन चेति कार्यमित्यस्य। इदानीं मतद्वयसाधारण्येन वक्तव्यमाह — **कृतापकृतादीनामिति**। एतद्वार्तिकान्तेन भाष्येण यल्लक्ष्यं सिध्यति तत् सर्वं सूत्रे नञ्विशिष्टेनेत्यस्य विसमाप्तिवाचिनेत्यर्थपरत्वाश्रयणात् सूत्रेणैव सिध्यतीत्याह — **सिद्धं तु क्तेन विसमाप्तावनञिति**। विसमाप्तौ वर्तमानेन क्तान्तेनानञ् क्तान्तं समस्यत इत्यर्थलाभात् 'कृतापकृतम्' इत्यादि च सिध्यति, अपकृतादावपादेरुपसर्गस्य

---

[1] का. वा. १. १. २०–५.

[2] 'इत्यनेन स्वाध्यायेनैव' इत्यादि 'स्वाध्यायेन विशिष्टः' इत्यन्तं नास्ति — ब.

[3] इडधिके च समासः — ब.

[4] 'शून्यनञोऽवधारणात्' इति युक्तं भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नञ इव विसमाप्तिवचनत्वात्। 'सिद्धं चामुक्तं च' इत्यादौ समासो न भवति, विसमाप्ता-वित्येतत्प्रत्यासत्त्या परिसमाप्तौ वर्तमानमनञ् क्तान्तं समस्यत इत्यर्थलाभेन समस्यमानयोः शब्दयो-विसमाप्तिमात्रकृतस्यैव भेदस्य स्वीकारात्। नुडिटोरागमयोः प्रकृतिप्रत्ययान्तर्गतत्वादनर्थकत्वाच्च तत्कृतो भेदो विसमाप्तिकृत एवेत्यशितानशितादि च सिध्यतीति सर्वमनवद्यम्। एवं व्या-ख्यायमानेऽपि सूत्रेऽवश्यं किंचिद्वचनमधिकमाश्रयणीयमेवेत्याशयेनाह — **गतप्रत्यागतादीनां चेति**। **गतप्रत्यागतमिति**। गतं गमनं तदात्मकमेव प्रत्यागमनं तथोच्यते। यस्तु ग्रामान्तरं प्रति निर्गम्य तं ग्राममप्राप्य मध्यत एव प्रत्यागतस्तदीये गमनप्रत्यागमने एकत्वेन तथा व्यवहृते इति यावत्। एवं यातानुयातमित्यस्याप्यर्थो ज्ञेयः। **क्रयाक्रयिकेति**। [1]'अल्पे' इति [2]कनि तदन्तस्य स्वभावात् स्त्रीत्वमिति क्रयश्चासौ क्रयिका चेति समासे [3]'अन्येषामपि' इति दीर्घः। सामान्यक्रयस्याल्प-क्रयस्य चैक्यविवक्षया समासः। एवं पुटापुटिकेत्यादावपीत्याहुः। वस्तुतस्तु क्रयश्चाक्रयश्चेति समासे स्वार्थे [4]कनि तदन्तस्य स्वभावात् स्त्रीत्वे टापीत्वे रूपं तत्। तथान्यत्रापीति ज्ञेयम्। तत्र क्रयाद्याभासस्य क्रयादित्वं तदभावत्वं चारोप्य तथा प्रयोगसंभवः॥

युवा खलतिपलितवलिनजरतीभिः २. १. ६७.

[२, ६३९]

(उद्द्योतनम्) ज्ञापकत्वमुपपादयति — **पुंल्लिङ्गस्येति**। युवेत्यस्य [5]जरतीशब्देनेत्यर्थः। **युवति-रिति**। युवन्शब्दस्य ग्रहणे युवतिशब्दस्यापि ग्रहणं [6]सामानाधिकरण्यानुपपत्त्या ज्ञाप्यत इत्यर्थः। **नन्विति**। अवस्थाद्वयस्य यौगपद्यासंभवादित्यर्थः। **नैष इति**। अन्यतरस्यारोपेण सामानाधि-करण्योपपत्तिरित्यर्थः। [7]वचनस्य प्रयोजनमाह — **युवतिशब्दस्यैवेति**। अवचनेऽनिष्टमाह — **अनियमो हीति**। **गुणेति**। [8]युवतिजरतीशब्दयोर्द्वयोरप्यवस्थारूपगुणवाचित्वाद्विनिगमकाभावा-दित्यर्थः। सूत्रस्य पाठान्तरमाह — **जरद्भिरिति**। अस्मिन् पाठे [9]प्रातिपादिकग्रहणपरिभाषया 'युवजरती' इत्यपि सिध्यति॥

[२, ६३९]

(रत्नप्रकाशः) अयुक्तोऽयं निर्देश इति। इदं स्त्रीलिङ्गपुंल्लिङ्गयोः समासविधानमयुक्तमिति भावः। तदयुक्तत्वमुपपादयति — **समानाधिकरणेनेति**। समाधत्ते — **एवं तर्हीति**। **ज्ञापय-त्याचार्य इति**। ज्ञाप्यांशस्तु 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति मनसि निधाय तदुदाहरणमुखेन दर्शयति — **यथाजातीयकमिति**। **तथाजातीयकेनेति**। स्त्रीलिङ्गेन युवति-शब्देनेति यावत्। यद्यपि 'तथाजातीयस्य पूर्वपदस्य' इति वक्तुमुचितम्, तथापीदं समास-

---

[1] पा. सू. ५. ३. ८५.

[2] 'कप्रत्यये' इत्युचितं भाति।

[3] पा. सू. ६. ३. १३७.

[4] 'कप्रत्यये' इत्युचितं भाति।

[5] खलतिशब्देनेत्यर्थः — अ; जरतीशब्दस्येत्यर्थः — ऋ.

[6] सामानाधिकरण्येऽनुपपत्त्या — ऋ.

[7] वचनशब्दस्य प्रयोजनमाह — अ.

[8] युवतीजरती — अ, ऋ.

[9] परिभाषा ७२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विधायकवचनं नेति न दोषः। युवत्यां वा जरतीधर्माणां जरत्यां वा [1]युवतिधर्माणां दर्शनात् तयोः सामानाधिकरण्यलाभः। लिङ्गविशिष्टपरिभाषा वाचनिकी, तयैव सिद्धे प्रकृतसूत्रस्य ज्ञापकत्वं न युज्यत इति मन्यमानः कश्चित् पृच्छति — **किमेतस्येति**। एतत्सूत्रज्ञापितैव सा परिभाषा, न वाचनिकीत्याशयेन समाधत्ते — **प्रातिपदिकेति**। इदं सूत्रं पूर्वपदनियमार्थम्। तेन युवशब्दवत् खलतिपलितवलिनजरतीशब्दानां गुणवचनत्वाविशेषेऽपि न युवतिशब्दापेक्षया पूर्वनिपातः। बहुव्रीहौ तु भवत्येव — जरती युवतिर्यस्य स जरद्युवतिरित्यादि। यत्तु "जरद्भिरित्यपि पाठं शिष्या आचार्येण बोधिता इति 'युवजरन्' इत्यपि भवति" इति। तन्निर्मूलम्, भाष्यानारूढत्वात्। ज्ञापकोपपादनपरभाष्यविरोधाच्च। तथा [2]"युवजरन्' इतिवत् 'जरद्युवा' इत्यपि भवत्येव॥

वर्णो वर्णेन २. १. ६९.

[२, ६३९–६४२]

(उद्द्योतनम्) वक्ष्यमाणस्येदंशब्देन निर्देशमुपपादयति — **बुद्धचेति**। अयं विचार इदानीं सूत्रप्रत्याख्यानपरो न भवति, तथा सति [3]"लक्षणप्रतिपदोक्तयोः' इत्यभिधानासंगतिरित्यभिप्रेत्याह — **न तावदिति**। किं त्वेतत् सूत्रं तृतीयासमासप्रकरणे कृत्वा कृष्णसारङ्गादिस्तृतीयासमासः, उत यथान्यासं कर्मधारय इतीदानीं विचार इति भावः। समासद्वयसंभवमाह — **इहेति**। सूत्रप्रत्याख्यानं सूचयितुमाह — **स चेति**। मुख्यमेव [4]"विशेषणं विशेष्येण' इति सूत्रे गृह्यते, इदं सूत्रं गौणग्रहणार्थं स्यात्, अत आह — **गौणेऽपीति**। तत्कृतत्वसंपादनायाह — **हेतुतृतीयेति**। [5]समासविधावेष प्रतिषेधो नास्ति, अत आह — **स्वर इति**। नन्वनेते वर्णग्रहणं पूर्वपदप्रकृतिस्वरार्थं चेत्, तन्न, [6]"तत्पुरुषे तुल्यार्थ' इत्यनेनैव सिद्धत्वात्, अत आह — **कृष्णसारङ्ग इति**। **सिद्ध इति**। [7]कृष्णेन सारङ्ग इति तृतीयान्तं कृष्णपदं प्रकृतिस्वरमित्यर्थः। 'वर्णो वर्णेन' इति सूत्रस्य प्रयोजनमाह — **कृष्णेनेति**। [8]"कृष्णैतः' इत्यत्र कृष्णेनेति हेतुतृतीयासंभवात्[9] [10]सहाद्यर्थतृतीयया समासः, तृतीयासमासवादिना तत्प्रकरण [11]एवास्य सूत्रस्य पठनीयत्वात्। वर्णवाचितृतीयान्तं वर्णवाचिना समस्यत इति [12]तन्मते सूत्रार्थ इत्यर्थः। 'अनेते' इत्यस्य प्रयोजनमुक्त्वा 'वर्णः' इत्यस्य [13]तदाह — **वर्णग्रहणाच्चेति**। एतशब्द उत्तरपदे वर्णवाचि पूर्वपदं प्रकृतिस्वरं न भवतीति निषेधेऽवर्णवाचिनो हिमशब्दस्य प्रकृतिस्वरत्वं सिद्धमित्यर्थः। तृतीयासमासे पूर्वपदप्रकृतिस्वरः स्यात्, स एव कुतः, अत आह — [14]**हिमेनेति**। हिमस्यैतत्वगुणं प्रति [15]हेतुत्वसंभवादित्यर्थः। नन्वेतशब्दस्येणः

---

[1] युवतिधर्मदर्शनात् — प, ब.

[2] विशेषणविशेष्यभावस्य तत्र वैवक्षिकत्वेन 'विशेषणं विशेष्येण' इत्यनेनेति भावः।

[3] परिभाषा ११४.

[4] पा. सू. २. १. ५७.

[5] समासविधावेव — ऋ.

[6] पा. सू. ६. २. २.

[7] कृष्णसारङ्ग इति — अ.

[8] कृष्णेत इत्यत्र — ऋ.

[9] असंभवादिति छेदः।

[10] सहार्थ — अ.

[11] एव तस्य सूत्रस्य — अ.

[12] 'तन्मते' इति नास्ति — अ.

[13] प्रयोजनमाहेत्यर्थः॥ तावदाह — अ.

[14] 'हिमेनेति' इत्यादि 'न कारकत्वम्, क्रिया' इत्यन्तं नास्ति — अ.

[15] हेतुत्वासंभवादित्यर्थः — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]तप्रत्यये व्युत्पादितस्य कृदन्तत्वात् परत्वात् [2]'गतिकारकोपपदात् कृत्' इति कृदुत्तरपदप्रकृतिस्वरः 'हिमैतः' इत्यत्र स्यात्, अत आह — **कृत्स्वर इति**। व्युत्पत्तावप्याह — **अकारकत्वादिति**। हिमस्यैतं प्रति न कारकत्वम्, क्रियाविषयत्वात् कारकत्वस्य। हेतुतृतीयाया अकारकविषयत्वादिति भावः। 'यदि' इत्यस्य वर्णग्रहणनिषेधतात्पर्यमाह — **वर्णग्रहणस्येति**। व्यवच्छेद्यत्वेन प्रयोजको नास्तीत्युक्तेऽवर्णवाचिनः सत्ताप्रतिपादनमयुक्तम्, अत आह — **इतर इति**। कर्मवाचिनि क्तान्त उत्तरपदे तृतीयान्तं प्रकृतिस्वरम्। अस्यापि 'अनेते' इति [3]प्रतिषेधः कुतो न स्यात्, अत आह — **अनेत इति**। भाष्ये **कर्तरि** [4]**क्त इति**। [5]'गत्यार्थाकर्मक' इत्यनेन। ननु 'परत्वात्' इत्ययुक्तम्, असति ह्येतविशेषणे वर्णग्रहणे 'कृष्णेतः' इत्यत्रैते परतः 'अनेते' इति प्रतिषेधेन पूर्वपदप्रकृतिस्वरप्राप्त्यभावेन परत्वात् [6]तद्बाधकत्वायोगात्, अत आह — **कृष्णेनेति**। 'अनेते' [7]इति प्रतिषेधो वर्णवाचिपूर्वपदस्य, इह तु द्रव्यवाचि कृष्णपदमिति तृतीयान्तस्य प्रकृतिस्वरः प्राप्नोत्येवेत्यर्थः। अत्र थाथादिस्वरोपलक्षणं भाष्यमित्याह — **अत्रेति**। **विशेषेति**। थाथादिस्वरोऽप्यन्तोदात्तत्वम्, कृत्स्वरोऽपि प्रत्ययस्वरेणान्तोदात्तत्वमिति विशेषाभाव इत्यर्थः। भाष्यमपि [8]समाधत्ते — **अथवेति**। [9]'तत्पुरुषे तुल्यार्थ' इति तृतीयास्वरं बाधित्वा थाथादिस्वरः प्रवर्तते। तदनन्तरं विरोधाभावात् कृत्स्वर इत्यर्थः। कृत्स्वरस्य थाथादिस्वरात् पूर्वत्वादाह — **उत्कृष्टत्वादिति**। उत्कर्षमेवाह — **कक्ष्यान्तरेति**। अत्र थाथादिस्वरस्य कृत्स्वरापवादत्वात् तद्विषये कृत्स्वरो [10]न प्रवर्तत इति पूर्वव्याख्यानमेव सम्यगित्याहुः। **स्वरविधौ** [11]'वर्णो वर्णेष्वनेते' इति स्वरविधौ। अत्र तत्कृतत्वाभावमाह — **शुक इति**। **कर्तव्येति**। ततश्च 'शुकबभ्रुः' इत्यादौ तृतीयासमासार्थं 'वर्णो वर्णेन' इति सूत्रं कर्तव्यमित्यर्थः। समानाधिकरणपक्षः कथं ज्यायान्, अत आह — **एतत्सूत्रेति**॥

[२, ६३९–६४२]

(**रत्नप्रकाशः**) इदं सूत्रं [12]'पूर्वापरप्रथम' इत्यादिसूत्रवदुदाहरणप्रपञ्चपरमेव, न तु [13]'वर्णो वर्णेष्वनेते' इति स्वरसूत्रविषयसमर्पणार्थमिति व्यवस्थापयितुमाह — **इदं विचार्यत इति**। **तृतीयासमासो वेति**। युक्त इति शेषः। 'कृष्णसारङ्गः, लोहितसारङ्गः' इत्यादौ सारङ्गत्वादेः कृष्णादिकृतगुणत्वमस्तीति [14]'तृतीया तत्कृतार्थेन' इति समाससंभवः। **कृष्णेनेति**। हेतौ तृतीया। यस्मिन्नेव पक्षे लाघवं स एव युक्त इत्याशयेन कश्चित् पृच्छति — **कश्चात्र विशेष इति**। कस्मिन् पक्षे को विशेष इत्यर्थः। उत्तरमाह — **वर्णेनेति**। **एतप्रतिषेध इति**। [15]'तत्पुरुषे तुल्यार्थ'

---

[1] 'हसिमृग्रिण्वामिदमिलूपूर्धुर्विभ्यस्तन्' इत्युणादिसूत्रेण तन्प्रत्यय इति भावः॥ क्तप्रत्यये — ऋ.

[2] पा. सू. ६. २. १३९.

[3] प्रतिषेधो न कुतः स्यात् — अ.

[4] 'क्तः' इत्यनुपक्तम्।

[5] पा. सू. ३. ४. ७२.

[6] 'तद्' इति नास्ति — अ.

[7] इत्यत्र प्रतिषेधः — अ.

[8] समर्थयत इत्यर्थः।

[9] पा. सू. ६. २. २.

[10] अनेन प्रदीपे 'कक्ष्यान्तरप्राप्तत्वात् कृत्स्वरः।' इत्यन्तमेव वाक्यमन्नंभट्टस्वीकृतमिति ज्ञायते। उपलभ्यमानेषु कोशेषु 'कृत्स्वरस्थाथादिस्वर इत्यर्थः।' इति दृश्यते।

[11] पा. सू. ६. २. ३.

[12] पा. सू. २. १. ५८.

[13] पा. सू. ६. २. ३.

[14] पा. सू. २. १. ३०.

[15] पा. सू. ६. २. २.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति सूत्रेण पूर्वपदप्रकृतिस्वरे प्राप्ते तत्प्रतिषेधार्थम् 'अनेते वर्णः' इति सूत्रं कर्तव्यम्। प्रकृतसूत्रं तु न कर्तव्यम्। बहुलग्रहणाद्विशेषणसमासोऽपि न भविष्यतीति भावः। **हिमेनेति**। हेतौ तृतीया। **हिमैत इति**। [1]"तृतीया तत्कृतार्थेन" इति समासः। अत्र पूर्वपदप्रकृतिस्वर एवेति मन्यते। तमपरः पृच्छति — **अथेति**। **एतविशेषेणेनेति**। 'वर्णेषु' इति सप्तम्यन्तेनेति भावः। स उत्तरमाह — **बाढमर्थ इति**। **यद्यवर्ण एतशब्दोऽस्तीति**। वर्णवाचकेतर एतशब्दो नास्तीति मन्यते। **कृष्णेत इति**। कृष्णेनाश्वादिनागत इत्यर्थः। **एवमर्थेन** कर्मकर्तृक्तान्तैतशब्दव्यावृत्त्यर्थेनेत्यर्थः। **तृतीया कर्मणीत्यनेनेति**। पूर्वपदप्रकृतिस्वरेणेति शेषः। 'अनेते वर्णः' इति निषेधस्तु [2]"अनन्तरस्य विधिर्वा" इति न्यायेन [3]"तत्पुरुषे तुल्यार्थ" इति पूर्वसूत्रविहितस्वरस्यैव प्रतिषेध इति भावः। एतेन [4]"मध्येऽपवादन्यायेन [5]स तस्य बाधकः' इति निरस्तम्। निषेधस्यापवादत्वाप्रसिद्धेः। [6]"अनन्तरस्य' इति न्यायस्य निर्विषयत्वापत्तेश्च। **कृत्स्वरेणेति**। [7]"गतिकारकोपपदात् कृत्' इति कृदुत्तरपदप्रकृतिस्वरेणेत्यर्थः। तदेवं तृतीयासमासपक्षप्रतिपादनपरं वार्तिकं व्याख्याय समानाधिकरणसमासपक्षप्रतिपादनपरं वार्तिकमवतारयति — **अथ समानाधिकरण इति**। को विशेष इति शेषः। **द्विर्वर्णग्रहणमिति**। पूर्ववार्तिकात् 'एतप्रतिषेधे' इत्यनुषज्यते। तथा चास्मिन् मते एकं वर्णग्रहणमधिकमिति मन्यते। प्रकृतसूत्रमस्मिन्नपि पक्षे न कर्तव्यम्, [8]"विशेषणं विशेष्येण' इत्येव सिद्धेः। आचार्यदेशीयः कश्चित् प्रकृतसूत्रं स्थापयित्वा पक्षद्वयसाधारण्येन 'वर्णोऽनेते' इत्येव सूत्रान्तरं कर्तव्यम्। तथा च पक्षद्वयं सममेवेत्याशयेनाह — **एकं वर्णग्रहणमनर्थकमिति**। प्रथमान्तं सप्तम्यन्तं वैकमेवैतप्रतिषेधे वर्णग्रहणमाश्रयणीयम्। उभयथापि तस्य प्रतिपदोक्तप्रकृतसमासविषयत्वादेवेष्टसिद्धेरिति भावः। **अवर्णस्य वर्ण इति**। परमकृष्ण इत्यादौ। **वर्णस्य**[9] **वावर्ण इति**। कृष्णतिला इत्यादौ। **लक्षणप्रतिपदोक्तयोरिति**। प्रकृतसूत्रस्य स्थापितत्वादेतद्विषय एव स स्वरो भविष्यतीति भावः। तदेवमाचार्यदेशीयेनोक्तमतसाम्ये प्रतिपादिते तृतीया[10]समासपक्षपात्याह — **सामान्येन ममेति**। आचार्यदेशीय आह — **अवश्यमिति**। **शुकबभ्रुरिति**। **बभ्रुः** कपिलः। कपिलत्वं शुकहरितादिभेदेनानेकप्रकारम्, तत्र विशेषेण सामान्यं न कृतमिति तृतीयासमासो न स्यादिति भावः। तदेवमाचार्यदेशीयेन पक्षद्वयसाम्ये व्यवस्थापिते सतीदानीं भगवानाह — **अथेदानीमिति**। **एवमपि द्वे इति**। एवं च द्वे एवेत्यर्थः। प्रकृतसूत्रं ह्यस्मिन् पक्ष उदाहरणमात्रपरम्। **तस्मादिति**। यस्माद् द्वे एव वर्णग्रहणेऽस्मिन् पक्षे कर्तव्ये तस्माल्लाघवादित्यर्थः। वस्तुतस्तु तृतीयासमासस्य संभव एव नास्ति, सारङ्गत्वादिधर्माणां खण्डनादिक्रियावन्नित्यसापेक्षत्वाभावात्। प्रतिपादितं चेदं तत्रैव भगवता। ननु हिमेनैत इति तृतीयासमासाभावात् तत्र पूर्वपदप्रकृतिस्वराभावः स्यादिति चेत् सत्यम्, अन्तोदात्ततैव तत्रेष्टा भगवत इति न काप्यनुपपत्तिः। यथोत्तरं हि मुनीनां प्रामाण्यम्। यदि तत्र तृतीयासमासः पूर्वपदप्रकृतिस्वरत्वं च [11]सर्वेषामिष्टमित्याग्रहः क्रियते, तर्हि 'तृतीया' इति योगविभागाद्वा मयूरव्यंसकादित्वाद्वा तृतीयासमासस्तत्राभ्युपगन्तव्यः॥

---

[1] पा. सू. २. १. ३०.
[2] परिभाषा ६२.
[3] पा. सू. ६. २. २.
[4] परिभाषा ६१.
[5] एतस्य — प.
[6] परिभाषा ६२.
[7] पा. सू. ६. २. १३९.
[8] पा. सू. २. १. ५७.
[9] एवं वर्ण — ब.
[10] समासपक्षपक्षपात्याह — प, ब.
[11] मुनीनां पाणिन्यादीनामित्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ६४३–६५३]

(उद्द्योतनम्) ननु तत्पुरुषे कथमुभयोः प्राधान्यमुपसर्जनत्वं वा, अत आह — **प्रधानेति**। स्वपदार्थे विधीयमानत्वेनान्तरङ्गस्य तत्पुरुषस्यान्यपदार्थे विधीयमानत्वेन बहिरङ्गस्य बहुव्रीहेश्च कथं विप्रतिषेधः, अत आह — **वार्तिककारेणेति**। प्रत्यासत्तेरिति पञ्चमी। **सामर्थ्यस्य** अन्तरङ्गत्वरूपस्य। अन्यपदार्थस्योपस्थितिरूपप्रत्यासत्तेः कर्मधारयस्य स्वपदार्थवृत्तित्वादन्तरङ्गसामर्थ्यम्। 'कण्ठेकालः' इति व्यधिकरणबहुव्रीहौ मानमाह — [1]**व्यधिकरणानां चेति**। तत्पुरुषाद्बहुव्रीहेर्विशेषमाह — **बहुव्रीहिसंज्ञायामिति**। ननु [2]शेषो बहुव्रीहिः, तत्पुरुषाद्युपयुक्तादन्यः शेष इति तत्पुरुषविषये बहुव्रीहिप्राप्तेरभावात् कथं विप्रतिषेधः, अत आह — **शेषग्रहण इति**। ननु 'कदाचित्' इत्युक्ते सर्वत्र बहुव्रीहिविषये[3] पक्षे कर्मधारयः स्यात्, स चानिष्टः, अत आह — **विषयविशेषेति**। **वस्तुभेदः** फलभेदः, अर्थभेदो वा। 'सर्वधनी' इत्यत्र कर्मधारयानन्तरमिनिप्रत्यय इत्याह — **सर्वाणीति**। बहुव्रीहिविषयेऽपेक्षितोऽपि कर्मधारयः कथं लभ्यते, अत आह — [4]**तदर्थमिति**। [5]'किमुच्यते' इत्याक्षेपस्याभिप्रायमाह — **सर्वधनाद्यर्थ इति**। [6]**केवलस्य** मत्वर्थीयरहितस्य। 'सर्वधनाद्यर्थः' इत्युक्ते कथं मत्वर्थीय[7]प्रकृतिरिति लभ्यते, अत आह — **मत्वर्थीयेति**। **वार्तिके** 'सर्वधनाद्यर्थः' इति वार्तिके। [8]**न स्वतन्त्र इति**। तथा चानुक्तसिद्धत्वं नास्तीत्यर्थः। कर्मधारयेण मत्वर्थीयस्यानुक्तत्वात् 'यदि' इत्ययुक्तम्, अत आह — **सर्वाणीति**। 'न खल्वपि संज्ञाश्रयः' इति भाष्यतात्पर्यमाह — **न हीति**। **स्वरेति**। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः, कर्मधारये समासान्तोदात्तत्वम्। **तस्याः** अर्थाभिधानव्यवस्थायाः। स्वार्थे कर्मधारयमुपपादयति — **अनपेक्षितेति**। यथा पूर्वत्र 'कदाचित्' इत्यस्य विषयविशेषपरत्वमुक्तं तथात्र 'नित्यम्' इति सकलविषयसंग्राहकम्, न तु विकल्प[9]निवारकम्, तस्याप्रसक्तत्वादित्याह — **यथेति**। 'तत्र यदुक्तम्' इति भाष्यतात्पर्यमाह — **अनेनेति**। 'अनपेक्षितान्यपदार्थः' इत्युक्तेन न्यायेन सर्वत्र स्वपदार्थे कर्मधारयः स्यादेवेत्यर्थः। ननु पूर्वं स्वपदार्थे कर्मधारये मत्वर्थीयस्य सिद्धत्वात् 'एवं तर्हि' इत्यादिना किमुच्यते, अत आह — **इदानीमिति**। सर्वाणि धनान्यस्येति विग्रहेऽपि पूर्वं कर्मधारयः पश्चान्मत्वर्थीय इति [10]प्रकारेणेत्यन्यथाशब्दार्थः। क्रियाद्वयस्यैकस्मिन् वाक्येऽनन्वयं परिहरति — **एवंजातीयकमिति**। **वस्तु** अर्थरूपम्। **इत्याह** इत्यत आह। एकवाक्यत्वमपि संभवतीत्याह — **अथवेति**। कार्यवद्बुद्धिं कृत्वा किंचित् पठन्तीति भवतीति भाष्यान्वय इत्यर्थः। कार्यपक्षे कथं [11]प्रकृते सिद्धिः, अत गाह — **कार्या इति**। किं ततः, अत आह — [12]**तत्रेति**। एवकारस्य व्य-

---

[1] प्रदीपे 'व्यधिकरणानां बहुव्रीहिः' इत्यत्र 'व्यधिकरणानां च बहुव्रीहिः' इत्यन्नंभट्टपाठ इति भाति।

[2] शेषे वहु — अ.

[3] विषयपक्षे — अ, ऋ.

[4] तत्रेति — अ, ऋ.

[5] भाष्ये 'लोहितशालिमान् ग्रामः' इत्यस्यानन्तरं 'किं प्रयोजनम्' इति दृश्यते कोशेषु। अत्र 'किमुच्यते प्रयोजनम्' इति पाठोऽन्नंभट्टाभिमतः स्यादिति भाति।

[6] 'केवलस्य' इत्यादि 'सर्वधनाद्यर्थ इति' इत्यन्तं नास्ति — अ.

[7] प्रकृतेरिति — ऋ.

[8] प्रदीपे 'न तु स्वतन्त्रः' इत्यत्र तुशब्दरहितोऽन्नंभट्टपाठ इति भाति।

[9] निरासकम् — ऋ.

[10] प्रकारेणान्यथा — अ.

[11] प्रकृतवुद्धिः — अ; प्रकृतिसिद्धिः — ऋ.

[12] प्रदीपे 'ततोऽन्यपदार्थे' इत्यत्र 'तत्रान्यपदार्थे' इत्यन्नंभट्टपाठ इति प्रतीयते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वच्छेद्यमाह — **न त्विति**। मत्वर्थीयोत्पत्तिमाह — **सर्वाणीति**। **पूर्वेति**। बहुव्रीह्यपेक्षयेत्यादिः। **नाभिधत्त इति**। अनुशासनाभावादित्यर्थः। नन्विष्टसिद्धये विप्रतिषेधो न युक्त इत्यर्थश्चेत् तन्न, उक्तरीत्येष्टसिद्धेर्भावात्, अत आह — **विप्रतिषेधेति**। **स्वपदार्थेति**। समानाधिकरणेन समासविधानादित्यर्थः। ननु बहुव्रीहेरपि [1]'स्वपदार्थाश्रयत्वादन्तरङ्गत्वं स्यात्, अत आह — **अन्यपदार्थेति**। 'स्वपदार्थमात्राश्रयेण' इति पाठे तु कर्मधारयस्य तन्मात्रापेक्षत्वं न संभवति, [2]सामानाधिकरण्यस्याधिकस्यापेक्षणात्, अत आह — **अन्यपदार्थेति**। ननु 'अस्तु' इत्यनेन विप्रतिषेधासमर्थनात् प्रकृतासंगतिरित्याशङ्क्य तत्फलसाधनात् तदसमर्थनं न दोषायेत्यभिप्रेत्याह — **इतर इति**। **विषयविशेषे** अन्यपदार्थे, वीरपुरुषक इत्यादौ वा। **व्यपेक्षैव** वाक्यमेव, तस्मिन् प्राप्ते समासारम्भात्। कस्तर्हि विभाषाशब्दार्थः, अत आह — **तस्मादिति**। वाकारं विना कथं विकल्पः, अत आह — **विषयेति**। तदेवाह — **स्वपदार्थ इति**। प्राधान्येन विवक्षित इत्यादिः। **असौ** कर्मधारयः। सत्यन्यपदार्थे कथं स्वपदार्थप्राधान्यविवक्षा, अत आह — **एतदुक्तमिति**। 'एवमपि' इत्यनेनोक्तं दोषं स्पष्टयति — **पूर्वमिति**। इष्टिरित्यनेन कथम् 'एवमपि' इत्युक्तदोषनिरासः, अत आह — **वीरेति**। तथा च 'वीरपुरुषवान्' इति न भवतीत्यर्थः। **पश्चादिति**। [3]ततश्च कर्मधारयान्मत्वर्थीयसिद्धिरित्यर्थः। भाष्ये **अनेन** 'समानाधिकरणसमासात्' इत्यादिवार्तिकेन। तत्र हेतुमाह — **न्यायेति**। भाष्ये 'लघुत्वात्' इत्यनेन प्रतिपत्तिलाघवं विवक्षितमित्यभिप्रेत्य कर्मधारये तद्गौरवमाह — **यदीति**। बहुव्रीहौ लाघवमाह — **यदेति**। शब्दलाघवमाह — **अन्ये त्विति**। तर्हि लाघवाद् वृक्षस्यैव प्रयोगः स्यात्, न वनस्पत्यादेः, वर्णाधिक्येन गौरवात्, अत आह — **एतच्चेति**। ननु कर्मधारयान्मत्वर्थीये गौरवमुक्तम्, अत आह — **ततश्चेति**। 'अवश्यम्' इत्यस्य तात्पर्यमाह — **योऽपीष्टिमिति**। तथापि कथं कर्मधारयसिद्धिः, अत आह — **जातिश्चेति**। जातित्यागे शब्दस्य कोऽर्थः, अत आह — **विशिष्टेति**। बहुव्रीहिः। पूर्ववदियमिष्टिरित्याह — **इष्यत इति**। तर्हि कथमग्रिमभाष्यसंगतिः, अत आह — **भाष्यकार इति**। **प्रत्यासत्त्या** प्रथमोपस्थितया। **सामर्थ्येति**। अनपेक्षस्वरूपेत्यर्थः। 'असामर्थ्याश्रयेण' इति पाठ. सम्यक्। **नन्विति**। प्रातिपदिकाधिकारेऽपि सामर्थ्यात् सुबन्तादेवोत्पत्तव्यमित्यर्थः। **समाप्तार्थस्य** व्यवहारार्हस्य। **अधिकार[मात्र]मिति**। शङ्कामात्रमेतदित्यर्थः। सुबन्तादुत्पत्तिर्भाष्यकृतैवोच्यत इत्याह — **अत एवेति**। सामर्थ्यं प्रति साक्षान्न हेतुत्वम्, किं तु तदनुभवं प्रतीत्याह — **सुबन्तेनेति**। पूर्वोत्तरयोरर्थभेदं दर्शयति — [4]**आतिशायिकस्येति**। स्वाम्यापेक्षां दर्शयति — **अस्येति**। भाष्ये [5]**वस्त्रान्तरैः स्पर्धा** अतिशयापेक्षा। ननु प्रतियोग्यपेक्षायां प्रत्ययेऽपि तद्वदपेक्षायां कथं प्रत्ययः, अत आह — **ततश्चेति**। कानि वस्त्राणि वस्त्रान्तराण्यपेक्षन्ते, अत आह — **अतिशयानानीति**। अतिशयवन्तीत्यर्थः। **अतिशय्यमानानि** निकृष्टानि। **द्वयोः** [6]बहुव्रीह्यातिशायिकयोः। 'यैषा' इति यच्छब्दान्वयार्थमाह — **सेति**। **इत्याह** इत्यत आह। 'यदा हि' इत्यनेन का युक्तिरुक्ता, अत आह — **अन्येति**। भाष्ये 'न तर्हि' इत्यादिनेष्टिपक्षे दोष उक्तः, तं विशदयति — **अतिशयमात्रेति**। 'सूक्ष्मतरवस्त्रः' इत्यत्र शङ्कानुपपत्तेराह — **यदुक्तमिति**। शङ्का-

---

[1] प्रदीपे 'स्वपदार्थमात्राश्रयेण विधानात्' इत्यत्र 'स्वपदार्थाश्रयेण विधानात्' इति पाठोऽत्राश्रितः।

[2] सामानाधिकरण्यापेक्षणात् — अ.

[3] तथा च — अ.

[4] अतिशायनिकस्येति — अ.

[5] भाष्ये 'वस्त्राणां वस्त्रैर्युगपत् स्पर्धा' इत्यत्र 'वस्त्राणां वस्त्रान्तरैर्युगपत् स्पर्धा' इत्यन्नंभट्टाभिमतः पाठ इति भाति।

[6] बहुव्रीह्यातिशायनिकयोः — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शयमाह — **अतिशयेनेति**। अन्यपदार्थस्यातिशयप्रदर्शनमिदम्। [1]"प्रकर्षेण न भवितव्यं च' इति काक्वा सूचितमर्थं विशदयति — **सर्वत्रैवेति**। **द्रव्यस्येति**। तथा चाहुः — 'गौर्न स्वरूपेण गौः, नाप्यगौः, गोत्वाभिसंबन्धात्तु गौः' इति। **गुणः** परतन्त्रः। कथं पारतन्त्र्यम्, अत आह — **भेदक इति**। 'नैव च' इत्यस्य प्रकर्षाभेदे तात्पर्यमित्याह — **एक एवेति**। **यद्यपीति**। अन्यपदार्थसंबन्धिवस्त्रगतसूक्ष्मत्ववृत्तिप्रकर्षोऽन्यपदार्थे कथं स्यादित्यर्थः। भाष्ये 'यथैवायम्' इत्यादिना सूक्ष्मत्वप्रकर्षस्यान्यपदार्थसंबन्ध उक्तः। भाष्योक्तं स्वरभेदं विशदयति — **यदीति**। उत्तरपदार्थबहुत्वे वर्तमानाद्बहुशब्दात् परं बहुव्रीहावन्तोदात्तं स्यान्नञ उत्तरस्येव। नञ उत्तरस्य यावन्तः स्वरा उक्तास्तत्सर्वप्राप्त्यर्थं 'नञ्वत्' इत्युक्तम्। नेदं वचनसाध्यमित्याह — **अयमर्थ इति**। न्यायमेवाह — **यदीति**। **अन्यपदार्थस्य** विवक्षेति संबन्धः। **तद्व्यपदेशः** [2]शाकशब्दव्यपदेशः। वृत्तौ शाकशब्दस्तद्भोजिनि वर्तत इति यावत्॥

[२, ६४३–६५.३]

(रत्नप्रकाशः) [3]"विप्रतिषेधे परम्' इति सूत्रविषयं कंचिद्दर्शयति — **समानाधिकरणाधिकार इति**। **प्रधानोपसर्जनानामिति**। उत्तरपदार्थप्रधानस्तत्पुरुष इत्युक्तत्वात् तत्र तृतीयान्तनिर्दिष्टाः सर्वे प्रधानभूता भवन्ति, प्रथमानिर्दिष्टास्तूपसर्जनभूताः। एतेन 'प्रधानग्रहणेन समासशास्त्रे [4]तृतीयान्तं लक्ष्यते, उपसर्जनशब्देन प्रथमान्तम्' इति निरस्तम्। लक्षणां विनैवोपपन्नत्वात्। **प्रधानानां प्रधानमिति**। पूर्वपरसूत्रोपात्तयोः प्रधानयोः सह समाससंज्ञाप्रसङ्गे तत्र [5]परं प्रधानं प्रधानं भवति, पूर्वं प्रधानमुपसर्जनं भवतीति भावः। **उपसर्जनानामुपसर्जनमिति**। परमुपसर्जनमुपसर्जनं भवति, पूर्वमुपसर्जनं प्रधानं भवतीति भावः। **इभयुवतिरश्वयुवतिरिति**। अत्र 'इभ्ययुवतिः, आढ्ययुवतिः' इति तु क्वाचित्कोऽपपाठः, इभ्याढ्यशब्दयोरजातिवाचित्वेन [6]"पोटायुवति' इत्यादिना समासस्याप्रसक्तेः। **वृन्दारकयुवतिरिति**। वृन्दारकत्वं मनुष्यत्ववज्जातिरिति भावः। कर्मधारयात् सामान्येन मत्वर्थीयः प्रत्ययो नेष्टः, कस्माच्चित् कर्मधारयात्त्विष्टः। तदुभयं यथाश्रुतसूत्राभ्यामेव सिध्यति, परशब्दस्येष्टवाचकत्वात्। लक्ष्यानुरोधेन चेष्टताव्यवस्थितेः वीराः पुरुषा अस्मिन्निति मत्वर्थविवक्षापरत्वाद्बहुव्रीहिरेव भवति क्वचित्, क्वचित् कर्मधारय इति यथाश्रुतसूत्राभ्यामेव सर्वेष्टसिद्धिरित्याशयेनाह वार्तिककारः — **समानाधिकरणसमासादिति**। **वीरः पुरुष इति**। मत्वर्थीयाविवक्षायामयमवकाश इति भावः। **कण्ठेकाल इति**। उक्तादन्यः शेष इत्यभिप्रायेणेदम्। [7]"सप्तमीविशेषणे बहुव्रीहौ' इत्यत्र विशेषणग्रहणं परत्वाद्बहुव्रीहिप्रवृत्त्याप्युपपन्नम्। त्रिकतः शेष इति पक्षे त्वपवादत्वादेव बहुव्रीहिः। एतेन 'बहुव्रीहिसंज्ञायां शेषग्रहणे प्रत्याख्याते विप्रतिषेधश्चिन्त्यते' इति निरस्तम्। शेषग्रहणस्याप्रत्याख्यातत्वात्। 'पूर्वपदार्थप्रधानोऽव्ययीभावः, उत्तरपदार्थप्रधानस्तत्पुरुषः' इति प्राचीनमतरीत्या शेषेऽन्यपदार्थप्राधान्ये बहुव्रीहिरिति शेषग्रहण-

---

[1] भाष्ये 'नैवान्यस्य प्रकर्षेणान्यस्य प्रकर्षेण भवितव्यम्' इत्यत्र 'नैव चान्यस्य' इति पाठोऽभिसंहित इति भाति।

[2] शाकशब्दस्य व्यपदेशः — अ.

[3] पा. सू. १. ४. २.

[4] 'तृतीयान्तानि लक्ष्यन्ते' इति बहुवचनान्तपाठः कैयटकोशेषूपलभ्यते। अत्र जात्येकवचनान्तता बोध्या।

[5] परप्रधानं — प.

[6] पा. सू. २. १. ६५.

[7] पा. सू. २. २. ३५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्योक्तान्यपरत्वसंभवाच्च। **कदाचित् कर्मधारय इति।** क्वचित् कर्मधारय इत्यर्थः। कदेत्यव्ययस्य कालपरस्य लक्षणयोदाहरणपरत्वं ज्ञेयम्। प्रतिलक्ष्यं लक्षणभेदाश्रयणाल्लक्ष्यविशेषे पूर्वविप्रतिषेध इति भावः। **सर्वधनाद्यर्थ इति।** सर्वधनादिप्रकृतिकमत्वर्थीयान्तार्थमिति भावः। तदेतदाह — **सर्वधनीत्यादि।** सर्वाणि धनान्यस्येत्यर्थविवक्षायां बहुव्रीहिं बाधित्वा कर्मधारये कृते ततो मत्वर्थीय इति भावः। उक्ताशयानभिज्ञः पृच्छति — [1]**किमुच्यत इति।** कर्मधारयस्य सावकाशतायाः प्रागेव दर्शितत्वात् सर्वं धनं सर्वधनमिति कर्मधारयो भवत्येवेति किं तदर्थेन यत्नविशेषेणेति भावः। इतरः स्वाशयं प्रकटयति — **कर्मधारयप्रकृतिभिरिति।** मत्वर्थाविवक्षायां कर्मधारयसावकाशत्वमुक्तम्, मत्वर्थे विवक्षिते तु परत्वाद्बहुव्रीहौ प्राप्ते तद्बाधित्वा क्वचित् कर्मधारय एव यथा स्यादिति तदर्थं यत्नान्तरमवश्यमाश्रयणीयमिति भावः। ननु तत्र कर्मधारयो मा भून्नाम, बहुव्रीहेरेव मत्वर्थीयः क्रियताम्, तावतैव सर्वधनीत्यादिः सिध्यतीत्याशयेनाह — **किं च कारणं न स्यादिति।** बहुव्रीहिप्रकृतिकत्वेनैव सर्वधन्यादिकं सिद्धमिति शेषः। उत्तरमाह — **बहुव्रीहिणोक्तत्वादिति।** इदानीं मत्वर्थविवक्षायां जायमानयोः कर्मधारयबहुव्रीह्योर्मत्वर्थबोधकत्वस्य तुल्यत्वात् कर्मधारयसंज्ञाया मत्वर्थीयप्रत्ययनिमित्तत्वाभावाच्च बहुव्रीहेरिव कर्मधारयादपि मत्वर्थीयो न स्यादित्याशयेनाह — **यद्युक्तत्वं हेतुरिति। न प्राप्नोतीति।** मत्वर्थीय इति शेषः। तदेवं वार्तिककाराभिमते विप्रतिषेधे दूषित आचार्यदेशीयः कश्चिदाह — **एवं तर्हीदं स्यादिति।** उत्तरपदार्थप्राधान्यविवक्षायां कर्मधारये सति ततः [2]'तदस्यास्त्यस्मिन्' इत्यर्थविवक्षायां मत्वर्थीयो भविष्यतीति मन्यते। तदप्यन्यो दूषयति — **नैवं शक्यमिति। नित्यमेवमिति।** एवं सति कर्मधारय[3]मात्रान्मत्वर्थीयः स्यादिति भावः। इदानीं स्वपदार्थे कर्मधारयं कृत्वा ततो मत्वर्थीयः कर्तव्यो वा, मत्वर्थे बहुव्रीहिः कर्तव्यो वेति विचारे परत्वाद्बहुव्रीहिरेव कर्तव्य इत्येवंपरतया तद्वार्तिकं व्याचष्टे — **एवं तर्हीति। भवति वै किंचिदिति।** एवंजातीयकमपि किंचिद्वचनं भवति खल्वित्यर्थः। किंजातीयं भवतीत्यपेक्षायां 'कार्याः शब्दाः' इति यद्वचनं तज्जातीयमित्युत्तरं विवक्षुः 'कार्याः शब्दाः' इति वचनमेव केनाभिप्रायेण पठितमित्यपेक्षायामाह — **आचार्याः कार्यवद्बुद्धिं कृत्वा पठन्तीति।** यथा घटादयः कार्यास्तद्वत् शब्दाः कार्या भवन्तीति बुद्धिं कृत्वा पठन्तीत्यर्थः। कथं पठन्तीत्यपेक्षायामाह — **कार्याः शब्दा इति।** तदेवं दृष्टान्तमुपपाद्य प्रकृतोपयोग्याह — **तद्वदिदं पठितमिति।** तत्परत्वमपि तद्वार्तिकस्य न युज्यत इत्याशयेनाह — **यदुच्यत इति। कान्तरङ्गतेति।** कथमन्तरङ्गता कर्मधारयस्येति भावः। **स्वपदार्थे कर्मधारय इति।** स्वपदार्थे विधीयमानत्वात् कर्मधारयस्यान्तरङ्गतेति भावः। मास्तु वार्तिकम्, अस्तु कर्मधारयोऽन्तरङ्गः, तस्य वैकल्पिकत्वात् तदभावे बहुव्रीहौ 'वीरपुरुषको ग्रामः' इत्यादिकं भविष्यत्येवेति मन्यमानः कश्चिदाह — **अस्त्विति।** 'वीरपुरुषको ग्रामः' इत्यादिप्रयोगो न सिध्यतीति तत्साधनार्थमयं यत्नो न कृत एव, किं तु कर्मधारयान्मत्वर्थीयो मा भूदिति। तथा च पाक्षिकेऽपि कर्मधारये ततो मत्वर्थीयः स्यादिति स दोषस्तदवस्थ एवेत्याशयेनाह — **एवमपीति।** इदानीं भाष्यकारस्तद्वार्तिकं व्यवस्थापयति — **एवं तर्हीति।** नेदं वार्तिकं विप्रतिषेधसूत्रोदाहरण[4]प्रदर्शनपरम्, किं त्वपूर्वार्थबोधनपरमेवेत्यन्तरङ्गं कर्मधारयं बाधित्वा बहुव्रीहिर्भविष्यति, क्वचित् कर्मधारयोऽपि भविष्यतीति भावः। एतद्वार्तिकसिद्ध एवार्थः 'न कर्मधारयान्मत्वर्थीयः' इति व्यवह्रियते। इदानीमाचार्यदेशीयः

---

[1] भाष्ये 'लोहितशालिमान् ग्रामः' इत्यस्यानन्तरं 'किं प्रयोजनम्' इत्यत्र 'किमुच्यते प्रयोजनम्' इति पाठोऽभिमत इति प्रतीयते।

[2] पा. सू. ५. २. ९४.

[3] मात्रशब्दः कार्त्स्न्यपरः।

[4] 'प्रदर्शनपरम्' इत्यस्यानन्तरं 'न भवति' इत्यधिकम् — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कश्चित् तर्कवासनया प्रौढिमाश्रित्योक्तवार्तिकं निराकरोति — **यदीत्यादिना**। **अल्पेन यत्नेनेति**। यत्नसाध्यत्वाद् द्रव्यस्य [1]यत्नत्वोपचारः, अल्पेन द्रव्येणेत्यर्थः। तदेव विशेषमुखेनाह — **एकेनेति**। **माषेणेति**। माषपरिमितेन स्वर्णेनेत्यर्थः। **शतसहस्रमिति**। शतं च सहस्रं चेत्यर्थः। वस्त्राणि गा वेति शेषः। **एकेन [2]कुद्दालकेनेति**। पर्वतीयाः प्रायेण कुद्दालकैरेव भूमेः कर्षणं कृत्वा सस्यं संपादयन्तीति तद्व्यवहारानुसारेणैवमुक्तम्। **लघुत्वादिति**। प्रतिपत्तितः शब्दतश्चेति शेषः। कर्मधारयान्मत्वर्थीये हि कर्मधारयार्थज्ञानपूर्वकं [3]मत्वर्थज्ञानं भवति, मत्वर्थ[4]प्रत्ययाधिक्यं चेति गौरवम्। बहुव्रीह्याश्रयणे तु मत्वर्थस्यैव झटिति बोधो मत्वर्थप्रत्ययाभावश्चेति लाघवम्। **इनिप्रकरण इति**। [5]'अत इनिठनौ' इत्यत्र। **सर्वादेरिति**। सर्वधनादेरित्यर्थः। वचनबलाद् गौरवाश्रयणं भविष्यतीति भावः। **तच्चावश्यमिति**। वार्तिके विद्यमानेऽपि कर्तव्यत्वादिति भावः। **ठनो बाधनामिति**। सर्वधनादेरिनिरेवेति नियमाट्ठनो बाधनमिति भावः। भवतु तत्र वचनाद् गौर श्रयणम्, यत्र तु वचनं नास्ति तत्र कथं गौरवाश्रयणमित्याशयेन पृच्छति — **कथमिति**। **अस्त विशेष इति**। गौरवाश्रयणमूलभूत इति शेषः। कः स विशेष इत्यत आह — **जात्यात्रा संबन्ध इति**। मत्वर्थस्येति शेषः। तथा च कर्मधारयमन्तरेण जातिविशेषस्य मत्वर्थसंबन्धो बो यितुं न शक्यत इति गौरवमगत्याश्रणीयमिति भावः। **कृष्णसर्पो नाम [सर्प]जातिरिति** जातिव्यक्त्योरभेदोपचारादेवमुक्तम्। **यदा हीति**। हिस्त्वर्थः। **अन्तरेण जातिमिति**। जातिनैरपेक्ष्येणेत्यर्थः। **तद्वता** कृष्णगुणविशिष्टसर्पयुक्तेनेत्यर्थः। **अभिसंबन्धः क्रियत इति**। कृष्ण सर्पशब्दयोरिति शेषः। वार्तिकान्तरं पठति — **पूर्वपदेति**। पूर्वपदशब्दः पूर्वपदार्थलक्षक इत्यभिप्रेत्य व्याचष्टे — [6]**पूर्वपदार्थेति**। सूक्ष्मतराणि वस्त्राण्यस्येति विवक्षायामित्यर्थः। **सूक्ष्मवस्त्रतर इति**। सूक्ष्मवस्त्रेति बहुव्रीहौ सति ततस्तदर्थप्रकर्षविवक्षायां [7]तरप्। तेनोच्यमानः प्रकर्षः सूक्ष्मवस्त्रगत एव भवतीति भावः। **ङ्याप्प्रातिपदिकादिति**। तथा चैकप्रातिपदिकाश्रयत्वादातिशायिकोऽन्तरङ्ग इति भावः। **सुबन्तानामिति**। तथा चानेकसुबन्ताश्रयत्वाद्बहुव्रीहिर्बहिरङ्ग इति भावः। **समर्थादिति**। तद्धितान्वय्यर्थाभिधाने शक्तादित्यर्थः। **सुबन्तेनेति**। संगतमिति शेषः। सुबन्तस्यैव तदभिधानसामर्थ्यमिति भावः। **एवमपीति**। सुबन्तात् तद्धिते विधीयमानेऽपीत्यर्थः। **एवमपीति**। स्वपदार्थाश्रयत्वेऽपीत्यर्थः। **न चान्तरेण प्रतियोगिनमिति**। तथा चान्यार्थापेक्षा बहुव्रीहाविव तत्रापीति तयोः साम्यमेवेति भावः। तदेवमन्तरङ्गबहिरङ्गभावनिराकरणेन वार्तिककाराभिमते विप्रतिषेधे व्यवस्थापिते इदानीमातिशायिकबहुव्रीह्योरेकत्र प्रसक्त्यभावादेव विप्रतिषेधो न घटत इत्याशयेनाह — **नैव वात्रेति**। **सापेक्षमसमर्थमिति**। व्याख्यातमिदं समर्थसूत्रे। सापेक्षतामुपपादयति — **यावतेति**। **तद्वन्तमिति**। अन्यपदार्थमित्यर्थः। **अपेक्षन्त इति**। अतः सूक्ष्मशब्दः सापेक्ष इति शेषः। **तद्वन्तं चापेक्ष्येति**। अस्यापि सूक्ष्माणि वस्त्राणि, अस्यापि सूक्ष्माणि वस्त्राणि, अनयोरस्यातिशयेन सूक्ष्माणि वस्त्राणीति विवक्षायां खल्वातिशायिकबहुव्रीह्योरेकत्र प्रसक्तिर्वक्तव्या। तत्र सूक्ष्मशब्दस्य सापेक्षत्वादुभयोरप्रसक्तिरित्ययुक्तो विप्रतिषेध इति भावः। वचनप्रामाण्यादातिशायिकस्तत्र भविष्यत्येवेति मन्यमानः शङ्कते — **ननु चेति**। **तस्यां**

---

[1] यत्नोपचारः — प.

[2] भाष्ये 'कुद्दालपदेन' इत्यत्र 'कुद्दालकेन' इति पाठः पूनामुद्रिते।

[3] मत्वर्थे ज्ञानं — प, ब.

[4] प्रयासाधिक्यं चेति — प, ब.

[5] पा. सू. ५. २. ११५.

[6] भाष्ये 'पूर्वपदातिशये' इत्यत्र 'पूर्वपदार्थातिशयविवक्षायाम्' इति पाठो रत्नप्रकाशकृदभिमतः॥ 'पूर्वपदातिशयविवक्षायाम्' इति पाठो निर्णयसागरमुद्रिते।

[7] तरबन्तेनोच्यमानः — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सत्यामिति। तस्यामेव सत्यामिति भावः। वचनं हि तावतैव चरितार्थं भवति। तदेवमातिशायिकाप्रसक्तिमुपपाद्य बहुव्रीहेरपि तामुपपादयति — **बहुव्रीहिरपीति** । तदेवमस्य वार्तिकस्य विप्रतिषेधसूत्रोदाहरणदर्शनपरत्वे निराकृतेऽपूर्वमेवेदं वचनमित्याशयेनाह — **एवं तर्हीति**। 'सूक्ष्मतरवस्त्रः, सूक्ष्मवस्त्रतरः' इत्युभयोरपीष्टत्वादयुक्तमिवेदं वचनमित्याह — **यदीष्टिरिति। कथमिति।** कुत इत्यर्थः। उत्तरमाह — **यैषा युक्तिरुक्तेति** । तयैवेति शेषः। सा केत्यपेक्षायामाह — [1]**वस्त्राणां चेति। युगपत्स्पर्धा तद्वता चाभिसंबन्ध इति।** तथा च तत्रातिशायिको बहुव्रीहिश्चोभौ नेष्टाविति भावः। तर्हि 'सूक्ष्मवस्त्रतरः' इति रूपं कथं साधनीयमित्यपेक्षायामाह — **यदा हीति। तद्वता चाभिसंबन्ध इति।** तद्वताभिसंबन्ध एवेत्यर्थः। बहुव्रीहेः क्रियमाणेनातिशायिकेन बहुव्रीह्यर्थान्यपदार्थविशेषणवस्त्रगतप्रकर्ष एव वक्तुमुचितो न तु तद्विशेषण[2]वस्त्रगतसूक्ष्मत्वस्येति मन्यमान आह — **कथं पुनरिति।** उत्तरमाह — **नैवान्यस्येति । प्रकर्ष इति।** उच्यमान इति शेषः। किं तर्हीति चेत् तत्र सूक्ष्मत्वप्रकर्ष एव तेनोच्यत इति गृहाणेत्याशयेनाह — **यथैवायमिति। वस्त्राणि मे स्युरिति।** वस्त्रस्य द्रव्यत्वात् तत्र प्रकर्षो न संभवतीत्याशयेन तरप् न कृतः। **सूक्ष्मतराणि मे स्युरिति** । सूक्ष्मत्वस्य गुणत्वात् तत्र प्रकर्षसंभवाद् बहुव्रीहेरुत्पन्नेनाप्यातिशायिकेन परम्परासंबद्धस्य तस्यैव प्रकर्ष उच्यत इति भावः। [3]इदानीं बहुव्रीहेर्गुणवचनत्वाभावात् तत आतिशायिकस्य प्रसक्तिरेव नास्ति, न हि भवति [सूक्ष्म]वस्त्रतर इ[ती]ति मन्यमान आह — **नात्रातिशायिक इति। समासोऽपि गुणवचन इति।** गुणविशिष्टवचनो गुणवचनः। सूक्ष्मवस्त्रशब्दोऽपि सूक्ष्मत्वगुणविशिष्टवस्त्रविशिष्टपुरुषवचनतया गुणविशिष्टवचनो भवतीति भावः। समासे शक्तिमाश्रयतां मतेऽन्यपदार्थे बहुव्रीहे रूढत्वाद् गुणवचनत्वं न युज्यत इत्याशयेन पृच्छति — **कथमिति।** विशिष्टेऽन्यपदार्थे बहुव्रीहेः शक्तिरिति युज्यत एव गुणवचनत्वमिति मनसि निधाय [4]यक्षानुरूपबलिन्यायेनोत्तरमाह — **अजहत्स्वार्था वृत्तिरिति।** [5]**जहत्स्वार्थायां चेति।** चस्त्वर्थः। अनुभवबलात् जहत्स्वार्थापक्षेऽपि गुणवचनत्वं भविष्यतीति [6]यक्षानुरूपबलिन्यायेनैवाह — **जहत्स्वार्थायां च न दोष इति। भवति बहुव्रीहाविति** । तथा च जहत्स्वार्था[7]पक्षोऽपि युक्त एवेति भावः। **उत्तरपदातिशय इति** । अत्राप्युत्तरपदशब्दस्तदर्थपरो ज्ञेयः। 'बह्वाढ्यतरः' इति रूपमुभयथा सिध्यतीति मत्वा पृच्छति — **कः पुनरत्र विशेष इति। एवं स्वर इति** । पूर्वपदप्रकृतिस्वर इत्यर्थः। एतज्जातीये भाष्ये तत्र तत्रोच्चारणेनैव स्वरनिदर्शनादपि ज्ञायतेऽध्यापनसमये तत्तदृषिमुखाद्यादृशाः शब्दा निस्सृतास्ते तथैव निकटस्थैर्लेखनतत्परैर्लिखिताः, तत्समुदायात्मकमिदं भाष्यमिति। एवं चात्र सर्वं भाष्यकारवचनं न भवतीति युक्तियुक्तमेव युक्तिपरवचनं ग्रहीतुमुचितमिति किमु वक्तव्यम् । [8]"युक्तियुक्तमुपादेयं वचनं बालकादपि। अन्यत् तृणमिव त्याज्यमप्युक्तं पद्मयोनिना' इत्युक्तेः। **उपसंख्यानमिति।** [9]"विशेषणं विशेष्येण' इति सिद्धस्यैवानुवादोऽयम्। अत्र विधेयं तूत्तरपदलोपमात्रम्। यत्तु 'शाकभोजित्वात् तत्साहचर्यात्

---

[1] भाष्ये 'वस्त्राणां वस्त्रान्तरैः' इत्यत्र 'वस्त्राणां च वस्त्रान्तरैः' इति निर्णयसागरमुद्रिते पाठः।

[2] वस्तुगत — प.

[3] 'इदानीम्' इत्यस्यानन्तरं चशब्दोऽधिकः — ब.

[4] लौ. न्या. द्वितीयभागे पृष्ठे ६४-६५.

[5] भाष्ये 'जहत्स्वार्थायां तु दोष एव' इत्यत्र 'जहत्स्वार्थायां च दोष एव' इति पाठो रत्नप्रकाशकृदभिमत इति भाति।

[6] लौ. न्या. द्वितीयभागे पृष्ठे ६४-६५.

[7] पक्षोऽयुक्त एवेति — प, ब.

[8] योगवासिष्ठे मुमुक्षुव्यवहारप्रकरणे सर्ग १८. श्लो. ३.

[9] पा. सू. २. १. ५७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तद्व्यपदेशान्नार्थं उत्तरपदलोपेनेत्याहुः' इति। तन्न, एवंप्रकारेण वचनप्रत्याख्याने एतच्छास्त्रस्यैव प्रत्याख्यानापत्तेः॥

चतुष्पादो गर्भिण्या २. १. ७१.

[२, ६५३]

(उद्द्योतनम्) 'वक्तव्यम्' इति नापूर्ववचनाभिप्रायम्, किं तु व्याख्यानाभिप्रायमित्याह— **केचिदिति**। [1]'पोटायुवति' सूत्रगतं जातिग्रहणम्। अनुवृत्तिं विनापि साधयति— **अन्ये त्विति**॥

[२, ६५३]

(रत्नप्रकाशः) कालाक्षीस्वस्तिमतीप्रभृतयः शब्दा गुणविशेषविशिष्टचतुष्पाद्वाचका भवन्तीति तेषामपि गर्भिणीशब्देन समासः प्राप्त इति तद्व्यावृत्त्यर्थमाह— **चतुष्पाज्जातिरितीति**। **वक्तव्यमिति**। [2]'पोटायुवति' इति सूत्रान्मण्डूकप्लुत्यानुवर्तनीयमिति भावः। एतेन 'शब्दान्तरसंनिधिनिरपेक्षा ये चतुष्पाज्जातिवचनास्त एवान्तरङ्गत्वाद् गृह्यन्ते, न तु कालाक्ष्यादयो यौगिकाः शब्दान्तरसंनिधानाच्चतुष्पाज्जातिविषयाः' इति निरस्तम्। सूत्रे जातिशब्दाभावेन तस्यासंबद्धप्रलापत्वात्, स्वेच्छयान्तरङ्गबहिरङ्गकल्पनानौचित्याच्च॥

मयूरव्यंसकादयश्च २. १. ७२.

[२, ६५४]

(उद्द्योतनम्) सूत्रे मयूरव्यंसकादिग्रहणस्य[3] विशेषणस्यापि परनिपातः प्रयोजनम्। असाधारणं प्रयोजनान्तरमाह— **मयूर इवेति**। **उपमानसमासेति**। [4]'उपमानानि सामान्यवचनैः' इति विहितेत्यर्थः। **प्रतिपदेति**। [5]'तत्पुरुषे तुल्यार्थ' इत्युपमानपूर्वपदप्रकृतिस्वरो [6]लक्षणप्रतिपदोक्तपरिभाषया [7]'उपमानानि' इति विहितसमासविषयः, तद्बाधनार्थ इत्यर्थः॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलार्यवर्यसूनोरन्नंभट्टस्य कृतौ व्याकरणमहाभाष्यप्रदीपोद्द्योतने द्वितीयाध्यायस्य प्रथमे पादे तृतीयमाह्निकम्॥

॥ इति प्रथमः पादः॥

---

[1] पा. २. १. ६५.
[2] पा. सू. २. १. ६५.
[3] अस्य प्रयोजनमित्यनेनान्वयः।
[4] पा. सू. २. १. ५५.
[5] पा. सू. ६. २. २.
[6] परिभाषा ११४.
[7] पा. सू. २. १. ५५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ६५४]

(रत्नप्रकाशः) 'किमर्थः' इत्यादिभाष्यं [1]"तिष्ठद्गुप्रभृतीनि च' इत्यत्रैव व्याख्यातप्रायम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्य-
श्रीशिवरामेन्द्रसरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
द्वितीयस्याध्यायस्य प्रथमे पादे तृतीयमाह्निकम् ॥

॥ समाप्तोऽयं चरणः ॥

[1] पा. सू. २. १. १७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य द्वितीयपादे प्रथममाह्निकम्

अर्धं नपुंसकम् २. २. २.

[२, ६५५-६५६]

(**उद्द्योतनम्**) 'नपुंसकम्' इत्युक्ते 'ग्रामार्धः' इत्यत्र कथं प्राप्तिः, अत आह — **नपुंसकस्येति**। नपुंसकग्रहणं तस्यैव समासाय, समासगतरूपविशेषाय वा। नाद्य इत्युक्त्वा न द्वितीय इत्याह — **कृते चेति**। नपुंसकत्वलक्षणविशेषानवधारणात् तत्कृतरूपविशेषस्याप्यभावादिति भावः। न च 'ग्रामार्धः' इति षष्ठीसमाससिद्धये तत्, [१]उपरितनान्यतरस्यांग्रहणस्यात्रैव करणेनापि तत्सिद्धेः। [२]अधिकरणस्याकाशस्य प्रसिद्धत्वात् प्रश्नायोगादाह — **नपुंसकत्वेति**। पुँल्लिङ्ग एवेति भ्रमं निराह — **नियमेनेति**। [३]**अपूपार्धमिति**। न च समांशवाच्येवायमर्धशब्द इति वाच्यम्, तथा सति षष्ठीसमासापवादैकदेशिसमासेऽर्धशब्दस्य पूर्वनिपातप्रसङ्गात्। नन्वर्थान्तरेऽपि नपुंसकत्वे समांशवाचिन एव ग्रहणं कथं सेत्स्यतीत्यत आह — **तदत्रेति**। 'नपुंसकम्' इत्यस्य प्रयोजनान्तरमाह — **अर्धमिति**। **ज्ञापकमिति**। तथा च 'प्राप्तजीविकः' इति पुँल्लिङ्गेनापि समाससिद्धिः। 'अर्धं पिप्पलीनाम्' इत्यत्र समासे सति 'अर्धपिप्पल्यः' इत्यस्य योऽर्थः स न लभ्यत इत्याह — **अर्थश्चेति**। भेदमाह — **समासे [च] कृत इति**। राशेरेकत्वात् प्रश्नायोगः, अत आह — **राशेरिति**। समुदायस्य समुदाय्यनतिरेकेऽप्येकत्वगोचरप्रतीतिप्रयोगयोरबाधितत्वादेकत्वमस्तीत्याह — [४]**राशिशब्दादिति**॥

[२, ६५५-६५६]

(**रत्नप्रकाशः**) नपुंसकग्रहणे कृतेऽपि खण्डवाचकस्यार्धशब्दस्य पुंनपुंसकस्य ग्रहणं स्यादेवेति मन्यमानः पृच्छति — **इह कस्मादिति**। अर्धमित्येव सिद्धे नपुंसकग्रहणाद् यस्मिन्नर्थेऽर्धशब्दो [५]नपुंसक एव, तदर्थपर एव सोऽत्र गृह्यत इत्याशयेन समाधत्ते — [६]**अर्धशब्दस्येदमिति**। 'पुँल्लिङ्गश्च' इति चकारान्नपुंसकलिङ्गश्चेत्यर्थः। **नपुंसकलिङ्ग इति**। नपुंसकलिङ्ग एवेत्यर्थः। **क्व पुँल्लिङ्ग इति**। नपुंसकलिङ्गश्चेति शेषः। **तदा न भवितव्यमिति**। ननु समासात् पूर्वं वा पश्चाद्वैकशेष आश्रीयमाणे तदेव रूपं स एव स्वर इति किमुच्यते 'न भवितव्यम्' इति, [इति] चेन्न, पिप्पलीनां समांशा एव ये वर्तन्ते तत्रैव 'अर्धपिप्पल्यः' इति प्रयोगस्येष्टत्वात्। चतुःप्रभृतीनामखण्डानां पिप्पलीनामर्धमित्यर्थे समासे कृते तस्य द्विप्रभृत्यखण्डपिप्पलीपरत्वाच्च। **एकाधिकरण**

---

[१] 'द्वितीयतृतीय' इति सूत्रे विद्यमानस्येत्यर्थः।

[२] शब्देत्यादिः।

[३] अपूर्वार्थमिति — ऋ.

[४] प्रदीपे 'शब्दादेकस्यैव' इति पाठो दृश्यते। 'राशिशब्दादेकस्यैव' इत्यन्नंभट्टपाठः।

[५] नपुंसकशब्दोऽत्र अर्शआद्यजन्तो बोध्यः।

[६] भाष्ये 'अर्धशब्दस्य नपुंसकलिङ्गस्येदम्' इत्यत्र 'अर्धशब्दस्येदं नपुंसकलिङ्गस्य' इति पाठोऽभिमत इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति। अधिकरणमत्रावयवी गृह्यते, एकत्वविशिष्टेऽवयविनीत्यर्थः। तथा च 'अर्धं पिप्पलीनाम्' इत्यत्रावयवी बहुत्वविशिष्ट इति न समासः। राशिशब्देनानेकेऽवयविन उच्यन्त इति समासाभावं शङ्कते — **न तर्हीति**। राशित्वेन रूपेण निर्दिष्टस्यावयविन एकत्वविशिष्टत्वं वर्तत एवेति तत्रापि भविष्यत्येव समास इत्याह — **भवतीति**॥

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् २. २. ३.

[२, ६५७–६६०]

(उद्द्योतनम्) अन्यतरस्यामिति। अपवादेन मुक्ते उत्सर्गाप्रवृत्तेः [1]'पूर्वमेव ज्ञापितत्वात् षष्ठीसमासप्राप्त्यर्थमिदमित्यर्थः। तर्हि भाष्ये ज्ञापकत्वसमर्थनं किमर्थम्, अत आह — [2]**तस्येति**। विशेषविधानेऽवयवविधानशब्दस्य प्रवृत्तिं दर्शयति — **सामान्याश्रयेति**। **न्यायात्** तक्रकौण्डिन्यन्यायात्। न्यायादेवात्र शब् न भविष्यतीत्याशङ्क्य वार्तिककारमतेनेदं प्रयोजनमित्युपपादयति— **विरोधादिति**। एकफलत्वे द्वयोः समुच्चयासंभवाद्विशेषेण सामान्यबाधः सिध्यति। अनिच्छायां ज्ञापकमाह — [3]**तथा हीति**। वार्तिककारः। **भाष्यकारस्त्विति**। तक्रकौण्डिन्यन्यायेनेत्यर्थः। एकफलत्वमप्यत्रास्तीति न्यायप्रवृत्तिरविरुद्धेत्याह — **अर्थेति**। विकरणरहितस्यार्थ[4]बोधकत्वाभावेनार्थाभिधानोपयोगरूपं फलं द्वयोरेकमित्यर्थः। अस्मिन् सूत्रे वाकारो न श्रूयते, अत आह — **अस्वाङ्गेति**। 'ङीब्विधाने हि' इति वार्तिकार्थमाह — **यदीति**। **प्राग्गुल्फेति**। [5]'दिक्पूर्वपदात्' इत्यत्र 'असंयोगोपधात्' इत्यनुवृत्त्यङ्गीकारे प्रतिपत्तिगौरवप्रसङ्गादिति भावः। **ङीष एवेति**। दिक्पूर्वपदान्ङीषोऽनुदात्त इत्येवमित्यर्थः। **अत्र** प्राग्गुल्फेत्यादौ, [6]'असंयोगोपधात्' [7]'न क्रोडादिबह्वचः' इति ङीषो निषेधात् टाप् सिध्यतीत्यर्थः। [8]'स्वरविधानाभिधानस्याप्रयोजनत्वाभिधानपर्यवसानमाह — **तदेवमिति**। वृत्तिशब्दस्य शक्तिलक्षणादिपरत्वशङ्कां निराह — **एकार्थीभावेति**। [9]नन्वनोऽपि स्वार्थिकत्वेन पूरणार्थत्वात् पूरणान्तत्वं स्यात्, अत आह — [10]**पूरणेत्यत्रेति**। तीय एव तदधिकारविहितः, नान्प्रत्यय इत्यर्थः। **न त्विति**। पूरणशब्दस्य स्वरितत्वं विना तदधिकारविहितप्रत्ययालाभात्, तत्प्रतिज्ञाने च मानाभावात्, अधिकारविहितप्रत्ययग्रहणे च 'भिक्षाद्वितीयम्'[11] इत्यत्र [12]'पूरण' इति निषेधाभावेन षष्ठीसमासप्रापकत्वेन चरितार्थस्यान्यतरस्यांग्रहणस्य 'भिक्षाचतुर्थम्' इत्यादौ [13]'पूरण' इति निषेधबाधकत्वायोगात् षष्ठीसमासो न स्यात्। अर्थग्रहणे तु 'भिक्षाद्वितीयम्' इत्यत्रापि निषेधप्रवृत्तेरन्यतरस्यांग्रहणं शब्दचतुष्टयनिषेधबाधेन षष्ठीसमासं प्रापयतीति भावः॥

---

[1] पारे मध्ये षष्ठ्या वेत्यत्रेत्यर्थः।

[2] प्रदीपे 'कृतस्य ज्ञापकत्वम्' इत्यत्र 'कृतस्य तस्य ज्ञापकत्वम्' इत्यन्नंभट्टपाठ इति भाति।

[3] प्रदीपे 'तथा चाह' इत्यत्र 'तथा ह्याह' इत्यन्नंभट्टपाठ इति प्रतीयते।

[4] बाधकत्वाभावेनार्थाभिधानोपयोग — अ, ऋ.

[5] पा. सू. ४. १. ६०.

[6] पा. सू. ४. १. ५४.

[7] पा. सू. ४. १. ५६.

[8] स्वरविधानाभिधानस्य प्रयोजकत्वानभिधान — अ; स्वरविधानाभिधानस्य प्रयोजनत्वानभिधान — ऋ.

[9] नन्वस्यापि — अ.

[10] प्रदीपे 'पूरणगुणेत्यत्र' इत्यत्र 'पूरणेत्यत्र' इत्यन्नंभट्टपाठ इति ज्ञायते।

[11] अन्नन्तोऽयं शब्दो बोध्यः।

[12] पा. सू. २. २. ११.

[13] पा. सू. २. २. ११.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ६५७–६६०]

(रत्नप्रकाशः) अन्यतरस्यांग्रहणप्रयोजनवार्तिकमवतारयति — **अन्यतरस्यांग्रहणं किमर्थमित्यादिना**। एतेन "अन्यतरस्यांग्रहणस्य पक्षे षष्ठीसमासप्राप्तये कृतस्य [1]ज्ञापकत्वं नान्तरीयकतया प्रतिपादयितुं पूर्वपक्षोपन्यासः। यद्यपि [2]"पारे मध्ये' इत्यत्रायमर्थो ज्ञापितः, तथापीह स्मरणाय पुनर्ज्ञाप्यते" इति निरस्तम्। प्रतीकनैरपेक्ष्येणावतारिकाया असंगतत्वात्। [3]"पारे मध्ये' इति सूत्रेऽत्र ज्ञापितार्थो ज्ञापित इति भाष्यानारूढत्वात्। षष्ठीसमाससंग्रहार्थत्वाविशेषेण तत्र ज्ञापितोऽत्रानूद्यते न तु विपरीतमित्यत्र विनिगमनाविरहाच्च। **द्वितीयादीनामिति**। षष्ठीयं 'विभाषावचनम्' इत्येतद्व्यतिरेकजनिता। तथा च 'द्वितीया' इत्यादिसूत्रगतं यदन्यतरस्यांग्रहणं तदिति फलितम्। **अवयवविधान इति**। अवयवशब्दो विशेषपरः। विशेषविधिविषये सामान्यविध्यभावस्य सामान्यापेक्षं ज्ञापकमन्यतरस्यांग्रहणमिति फलितम्। एवं चैतदनुरोधेन 'येन प्राप्ते यो विधिरारभ्यते स तस्यापवादः' इत्येवापवादलक्षणं व्यापकं ज्ञेयम्। एतदभिप्रायेणैव [4]"सत्यपि संभवे बाधनं भवति' इति परिभाषा। अस्यैव ज्ञापकस्योपष्टम्भकस्तक्रकौण्डिन्यन्यायः। [5]"ज्ञापकसिद्धं न सर्वत्र' इति न्यायेन क्वचिदेतदुत्सर्गोऽपवादविषयेऽपि प्रवर्तते। 'येन यो व्यर्थीक्रियते स तस्यापवादः' इत्येतल्लक्षणलक्षितापवादविषये उत्सर्गो न प्रवर्तते, विशेषवचनानर्थक्यापत्तेः। तदेतत् सर्वं भाष्यपरिशीलनवतां सूक्ष्मबुद्धीनां प्रकटमेव। **श्नमि कृते शब् न भवतीति**। शप्श्नमोर्विरोधाभावाद्वचनसामर्थ्येन वाधाभावात् ज्ञापकसाध्यः शबभाव इति भावः। शबभावे उपायान्तरमपि कथंचित् संभवतीत्येतावन्मात्राशयेनाह — **नैतदस्ति प्रयोजनमिति**। **शबादेशाः श्यन्नादय इति**। सामान्यापेक्षज्ञापने प्रयोजनाभावमभ्युपेत्य विशेषापेक्षं तदाह — **एवं तर्हीति**। [6]**उत्सर्गापवादाविति**। सामान्यविशेषावित्यर्थः। **ङीपा मुक्त इति**। [7]"अस्वाङ्गपूर्वपदाद्वा' इत्यतो वाग्रहणं [8]"स्वाङ्गाच्चोपसर्जनात्' इत्युत्सर्गङीष्विधाविव तदपवादङीब्विधावप्यनुवर्तत इति भावः। **वक्ष्यत्येतदिति**। [9]"दिक्पूर्वपदान्ङीप्' इति सूत्र इति शेषः। **ङीषोऽनुदात्तत्वमिति**। ङीषो ङीबादेशविधानाश्रयेण तस्य प्रत्याख्यास्यमानत्वेऽपि तत्र वाग्रहणं नानुवर्तत एवेति तस्य प्रयोजनत्वाभावः। वाग्रहणं ङीष्विधिपक्ष एव [10]"स्वाङ्गाच्चोपसर्जनादसंयोगोपधात्' इत्यादिभिः सह [11]"दिक्पूर्वपदात्' [12]इत्यत्रानुवर्तितम्, न तु पक्षान्तरे। **बहुव्रीहिर्न भवतीति**। इदम् [13]"अन्यपदार्थे च संज्ञायाम्' इति यथाश्रुतसूत्राभिप्रायेण। 'पूर्वपदार्थप्रधानोऽव्ययीभावः' इति मते तु नास्य प्रयोजनत्वम्, तस्य बहुव्रीह्यपवादत्वाभावात्। तस्मिन् पक्षे 'उन्मत्तगङ्गः' इति बहुव्रीहिर्भवत्येव। एवमेव हि 'द्वीरावतीको देशः' इति बहुव्रीहिरङ्गीकृतो[14] भगवता। उक्तज्ञापकसिद्धार्थस्यातिप्रसङ्गं शङ्कते — **यदीति। उपग्वपत्यमिति न सिध्यतीति**। उत्सर्गषष्ठीतत्पुरुषस्य तदपवादतद्धितस्य च वैकल्पि-

---

[1] ज्ञापकतां — ब.
[2] पा. सू. २. १. १८.
[3] पा. सू. २. १. १८.
[4] महाभाष्ये १. १. ४७. सूत्रे उक्ता.
[5] परिभाषा १२५.
[6] भाष्ये 'उत्सर्गापवादं विभाषा' इत्यत्र 'उत्सर्गापवादौ विभाषा' इति पाठोऽभिमतः।
[7] पा. सू. ४. १. ५३.
[8] पा. सू. ४. १. ५४.
[9] पा. सू. ४. १. ६०.
[10] पा. सू. ५. १. ४५.
[11] पा. सू. ४. १. ६०.
[12] 'पूर्वपदात्' इत्यादि 'सूत्राभिप्रायेण' इत्यन्तं नास्ति — ब.
[13] पा. सू. २. १. २१.
[14] नदीभिश्चेति सूत्र इति शेषः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कत्वादिति भावः। इदं दूषणं स्वभावसिद्धवृत्त्याश्रयेण समासादिसंज्ञावत् तद्धितो विधीयत इति मतानुसारेण। तस्मिन् मते हि वृत्तिपक्षे षष्ठीतत्पुरुषरूपवृत्तेरेव प्रयोगे प्राप्ते तन्निवृत्त्यर्थं तद्धित-वृत्तेः साधुत्वं बोधितमिति युज्यत इदं दूषणम्। वस्तुतस्त्वयं पक्षोऽनेकेषु वाक्यभेदावहत्वेन गौरव-ग्रस्त इति कृत्वा तमुपेक्ष्यैकार्थीभावयोग्यताश्रयेण समासादिसंज्ञासु तद्धितादिषु च कृतेषु वृत्तित्व-व्यवहार इति मुख्ये मते आश्रीयमाणे समासादिसंज्ञानां तद्धितानां च भिन्नविषयत्वादुत्सर्गापवाद-भाव एव नास्तीति तस्य दोषस्य तत्र प्रसक्तिरेव नास्ति। तस्मिन्नपि पक्षे स दोषः परिहर्तुं शक्यत इत्याह — **अस्त्यत्र विशेष इति।** **द्वे ह्यत्रेति।** प्राग्दीव्यतः समर्थादण् वा स्यात्, तद्-घटिता वृत्तिश्च स्यादिति वाक्यभेदेन व्याख्यानात् 'उपग्वपत्यम्' इति समासवृत्तिरपि भविष्यतीति भावः। पूरणप्रत्ययान्तेन षष्ठीतत्पुरुषस्य निषिद्धत्वेन तेन सहास्यैकदेशिसमासस्य सामान्यविशेष-भाव एव नास्तीति व्यर्थमेवान्यतरस्यांग्रहणमत्रेत्याशयेन शङ्कते — **क्रियमाणेऽपि वा इति।** **अनेति।** [1]"पूरणाद् भागे तीयादन्' इति विहितेनेत्यर्थः। **पर्यवपन्नमिति।** नष्टमित्यर्थः। [2]'यस्य' इति लोपेनान्प्रत्ययनिमित्तेन तीयादिप्रत्ययाकारे नष्टे हि परिदृश्यमानद्वितीयादिशब्दस्य तीयाद्यन्तत्वा-भावात् तीयाद्यन्तं तत्र नष्टप्रायमेव भवति। नन्वन्त्याकारविनिर्मुक्तमेकदेशविकृतन्यायेन[3] पूरण-प्रत्ययान्तमेवेति चेन्न, तस्य तथात्वेऽपि तेन वा तत्प्रकृतिकसुबन्तेन वा [4]समासाप्रसक्तेः। न[5] ह्यन्प्रत्ययान्तात् सुपि विहिते तत् सुबन्तं पूरणप्रत्यायान्तप्रकृतिकमिति वक्तुं शक्यम्, प्रकृत्येक-देशस्य प्रकृतित्वकल्पने मानाभावात्। **पूरणं नामार्थ इति।** तथा च पूरणप्रत्ययान्तात् स्वार्थे विहितस्यानः पूरणार्थकत्वात् तदन्तप्रकृतिकमपि सुबन्तं पूरणार्थप्रकृतिकसुबन्तमिति स्यादेव स निषेध इति भावः। **अन्यतरस्यांग्रहणसामर्थ्यादिति।** उत्सर्गसंग्रहसामर्थ्यमपवादसंबद्धविकल्प-वाचकशब्दस्य [6]'पारे मध्ये'सूत्रे दृष्टमित्यन्यतरस्यांग्रहणस्याप्यत्रोत्सर्गसंग्राहकतैवोचितेति तत्सामर्थ्यात् [7]'पूरणगुण' इति निषेधोऽनित्य इति वा द्वितीया[द्य]न्तैरेव न भवतीति वा कल्पनीयमिति भावः॥

प्राप्तापन्ने च द्वितीयया २. २. ४.

[२, ६६०]

(उद्द्योतनम्) [8]'प्राप्ता जीविकां [9]प्राप्तजीविकेत्यत्र पुंवद्भावासंभवात् स्त्रीप्रत्ययस्य ह्रस्वत्व-[10]सिद्धयेऽकारोऽन्तादेशः प्राप्तापन्नयोर्विधीयते। तत्राकारप्रश्लेषे हेतुमाह — **चकारेणेति।** तथा च चकारो [11]नानर्थक इति भावः। द्विवचनान्तत्वेन प्रगृह्यत्वात् प्रकृतिभावः स्यात्, अत आह — **सौत्रत्वादिति।** **विषयेति।** प्राप्तापन्नस्थानिकोऽकारो भवतीत्यर्थः। ननु [12]सप्तम्यन्तत्वे प्रथमा-निर्दिष्टत्वाभावादुपसर्जनसंज्ञा न स्यात्, अत आह — **सुबिति चेति।** **सूत्रेति।** यद्यत्र द्वितीयान्तं पूर्वं निपतेत् तदा [13]'द्वितीया श्रित' इत्यनेनैव सिद्धत्वात् सूत्रमेतदनर्थकं स्यादित्यर्थः। ननु

---

[1] पा. सू. ५. ३. ४८.
[2] पा. सू. ६. ४. १४८.
[3] परिभाषा ३७.
[4] समासप्रसक्तेः — ब.
[5] न त्वन्प्रत्ययान्तात् — प.
[6] पा. सू. २. १. १८.
[7] पा. सू. २. २. ११.
[8] प्राप्तो जीविकां — अ, ऋ.
[9] प्राप्तजीविक इत्यत्र — अ.
[10] सिद्धयेऽकारान्तादेशः — अ.
[11] 'न' इति नास्ति — अ.
[12] सप्तम्यन्तत्वेन प्रथमा — ऋ.
[13] पा. सू. २. १. २४.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'प्राप्तो जीविकाम्' इत्यत्र समाससिद्धये प्राप्तशब्दस्य निर्देष्टव्यत्वात् कथं प्राप्ताशब्दस्य समासः, येन तस्य ह्रस्वार्थमकारविधानं स्यात्, अत आह — **लिङ्गेति** ॥

[२, ६६०]

(रत्नप्रकाशः) अत्वं च भवतीति । अकारस्य विधीयमानत्वात् सवर्णग्राहकत्वाभावादेकमात्र एव विधीयते । तद्विधानफलं तु स्त्रीलिङ्गयोः प्राप्तापन्नाशब्दयोर्ह्रस्वान्ततासिद्धिः । सूत्रेऽकारप्रश्लेषस्तु 'द्वितीयया अ' इति ज्ञेयः । एतेन "[1]'प्राप्तापन्ने अ' इत्येवं प्रश्लिष्यते । सौत्रत्वात् प्रकृतिभावो न" इति निरस्तम् । आर्जवेन तत्प्रश्लेषकल्पनोपपत्तौ क्लिष्टकल्पनानौचित्यात् । न च सूत्रान्तेऽकारप्रश्लेषे चकारस्य भिन्नक्रमताश्रयदोष इति क्लिष्टत्वमविशिष्टमिति वाच्यम्, लौकिकेषु श्लोकेषु बहुधा चकारादीनां भिन्नक्रमतादर्शनेन तस्य दोषत्वाभावात् । एतेन 'यद्वा समाहारद्वन्द्वे कृते विषय[2]सप्तम्यकारादेशापेक्षा क्रियते । सुबिति चानुवर्तनात् प्राप्तापन्नयोरेव संनिधानादुपसर्जनसंज्ञा भवति, सूत्रारम्भसामर्थ्याद्वा' इति च निरस्तम् । एतत्कल्पनापेक्षया पूर्वकल्पनाया एव किंचित् समीचीनत्वेन तदपहायैतत्कल्पनाश्रयणस्य [3]वृश्चिकाशीविषीयत्वात् । **प्राप्ता जीविकामिति** । अस्मिन्नर्थे समासे जाते प्राप्ताशब्दस्योपसर्जनत्वेऽपि 'प्राप्ताजीविका' इति प्रातिपदिकस्य तदन्तत्वाभावेनोपसर्जनह्रस्वासंभवात् प्रकृतसूत्रेणाकारोऽपि विधेय इति भावः । तत्र लिङ्गविशिष्टपरिभाषयाबन्तयोः समासः ॥

कालाः परिमाणिना २. २. ५.

[२, ६६१–६६६]

(उद्द्योतनम्) वृत्तिवाक्ययोर्भिन्नार्थत्वात् कथं तयोः साम्यापादनम्, अत आह — **इहेति** । वाक्येनाभिधाने प्राप्ते समासारम्भादिति भावः । स्वयमर्थतो वैधर्म्यमुक्त्वा भाष्योक्तं विभक्तितोऽप्याह — **अन्येति** । [4]षष्ठीत्यागेन प्रथमोपादानमित्यर्थः । यद्वा भाष्योक्तविभक्तिकृतवैधर्म्योपपादनाय 'मासो जातस्य' इत्यादि 'प्राधान्यम्' इत्यन्तो ग्रन्थ इत्येकग्रन्थत्वेन योज्यम् । अस्मिन् पक्षे 'वैधर्म्यं च' इति चकारोऽवधारणार्थः । संबन्धनिवृत्ति[5]कथनस्य प्रयोजनमाह — **षष्ठीनिवृत्ताविति** । अभिधेयनिवृत्तावभिधाननिवृत्तेर्युक्तत्वादित्यर्थः । संबन्धनिवृत्तिश्चेत् समासाद्विशिष्टार्थबोधो न स्यात्, अत आह — **संबन्धस्य चेति** । यदि निवृत्तः संबन्धस्तर्हि कथमभिहितः, अत आह — **अनुद्भूतोऽपीति** । पदद्वयस्य कृत्यमाह — **तत्रेति** । **राजेति** । 'राज्ञः सखा' इत्युक्ते संबन्धिशब्दत्वाद् राजा सखास्येत्यर्थोऽपि प्रतीयत इत्यर्थः । यत्तु वृत्तिवाक्ययोर्गुणप्रधान[6]भाववैपरीत्यमुक्तं तत्राह — **इहेति** । वृत्तिवाक्ययोर्गुणप्रधानभाववैपरीत्ये दृष्टान्तः — **तत्र यथेति** । [7]तत्रापि 'चित्राणां गवामयम्' इत्युक्ते विवक्षितोऽर्थो न प्रतीयत इति बोध्यम् । मासो जातस्य

---

[1] आभिप्रायिकार्थानुवादो बोध्यः ।

[2] सप्तम्याकारादेशापेक्षा — प, ब.

[3] 'वृश्चिकभिया पलायमान आशीविषमुखे निपतितः' इति न्यायः — लौ. न्या. द्वितीयभागे पृष्ठम् ७६. एतत्सदृशत्वादित्यर्थः ।

[4] षष्ठीसमासेन — अ.

[5] कथनप्रयोजनमाह — अ.

[6] भाववैपरीत्यमुक्तं — अ.

[7] तथापि — अ; अत्रापि — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

परिमाणमित्यत्र जनिकर्तुः प्रत्ययार्थस्य पिण्डस्य वा, तद्गतसत्ताया वा, प्रकृत्यर्थजन्मनो वेति विकल्प्य क्रमेण निराह — **तस्या हीत्यादिना**। **नन्विति**। परिमाणपरिमाणिभावस्य भेदगर्भत्वादित्यर्थः। **नैष इति**। मासः कालस्य परिमाणम्, न तु त्रिंशद्रात्रस्येति नोक्तदोष इत्यर्थः। कालपरिच्छेदकत्वमेवाह — **कियानिति**। मासः कालस्य परिमाणं चेत्[1] 'त्रिंशद्रात्रस्य' इति कथमुक्तम्, अत आह — **स चेति**। **सः** कालः, **परिच्छिद्यमानः** मासेनेत्यादिः। एवं च त्रिंशद्रात्रात्मकस्य कालस्य मासः परिमाणम्, यथा कुडपचतुष्टयपरिमितधान्यस्य प्रस्थः परिमाणमिति भाष्यार्थः। **एतदेव** यद्येन परिच्छिद्यते तत्तस्य परिमाणमित्येतदेव। ननु 'कालपरिमाणम्' इत्यत्र कालशब्देन मासादिविशेषविवक्षायां 'सः' इत्यनेनोपसर्जनस्य[2] मासस्य परामर्शो न स्यात्, अत आह — **कालशब्देनेति**। नन्वेवं 'यस्य' इत्येतदपेक्षमाणस्य कालशब्दस्य परिमाणशब्देनासामर्थ्यात् समासो न स्यात्, अत आह — **अथवेति**। उपसर्जनस्यापि सर्वनाम्ना परामर्शः [3]"केषां शब्दानाम्' इतिवदुपपन्न इति भावः। **तत्** कालसामान्यम्। **यस्य** जातस्य। 'कं पुनः' इति प्रष्टुः सिद्धान्तिनोऽभिप्रायमाह — **यदीति**। **उपाधिः** सूर्यपरिस्पन्दरूपः। **जातमपीति**। एतच्च 'भवति जातस्य मासः परिमाणम्' इत्यत्रानुपदं साधयिष्यते। **प्रत्ययान्तरेति**। कारणान्तराविशेषेऽपीत्यर्थः। **इत्याह** इत्यत आह। **सर्वस्य** द्रव्यस्य। अन्यथा भेदकस्यापि परोपाधिकभेदेऽनवस्थाप्रसङ्गात्। द्रव्यस्य तु परोपधिक एव भेदः। अत एव वैशेषिका [4]विशेषमिच्छन्ति। इयान् विशेषः — नानाव्यक्तिषु विद्यमानोऽपि भेदोऽसाधारणधर्मव्यङ्ग्यः। एकव्यक्तौ भेदोऽप्यौपाधिक इति। धर्मान्तराधीनप्रतीतिकत्वं तु सर्वत्र। **तस्य** कालस्य, **आत्मा** स्वरूपं, **भेदैः** सूर्यगत्यादिभिः, [5]**द्रव्यान्तराश्रयैः** सूर्याद्याश्रितैः, 'धर्मान्तराश्रयैः' इति पाठेऽप्ययमेवार्थः। स्वत [6]एव किं न स्यात्, अत आह — **न हीति**। [7]**विद्यते** प्रतीयते। किंचिदपि **वस्तु** द्रव्यम्, स्वरूपेण भिन्नतयाभिन्नतया वा न प्रतीयते, किं तु धर्मविशेषावच्छिन्नतयैवेत्यर्थः। न केवलं [8]द्रव्यस्य भेदव्यवहारः सोपाधिकः, एकत्वादिव्यवहारोऽपीत्याह — **नैक इति**। प्रथमान्तचतुष्टयेन द्रव्यात्मेति प्रत्येकं संबध्यते। **अस्ति** प्रकाशते। द्रव्यस्वरूपमात्रं नैकत्वादिप्रतीतिविषयः, एकस्मिन्नपि द्वित्वादिप्रतीतिप्रसङ्गात्। किं त्वेकादि[9]विशिष्टमेवेत्यर्थः। 'तस्यात्मा' इत्युक्तं विवृणोति — **संसर्गिणामिति**। कालसंबन्धिनां सूर्यादीनां ये **भेदाः** परिस्पन्दरूपास्त एव **तस्य** कालस्य **विशेषाः** भेदका अभिमताः, अतस्तैः परिस्पन्दैः **संभिन्नः** भिन्नः सन्, कालो **व्यवस्थानां** मासजात इत्यादिव्यवस्थानां भेदाय **कल्पते** युज्यते। गोदोहनादेरपि कालोपाधित्वेन क्रियामात्रस्य तथात्वात् 'कया' इत्ययुक्तम्, अत आह — **क्रियाया इति**। 'देवदत्तो गच्छति, यज्ञदत्तो गच्छति' इत्यनुगतप्रतीतेर्बाधकाभावेनैक[10]वृत्तिविषयकत्वात् सामग्र्या व्यञ्जकत्वोपपत्तेरिति भावः। **आदित्येति**। अबाधितोत्पादविनाशप्रत्ययात् क्रिया

---

[1] चेत् कथमुक्तं त्रिंशद्रात्रस्येति — अ; चेत् त्रिंशद्रात्रात्मकस्येति कथमुक्तम् — ऋ.

[2] हेतुगर्भविशेषणम्। उपसर्जनत्वादित्यर्थः।

[3] महाभाष्ये पस्पशाह्निके।

[4] परमाणुष्वाकाशादिषु च नित्यद्रव्येषु वर्तमानः स्वाश्रयस्य व्यावर्तकः स्वस्य स्वत एव व्यावर्तकः सामान्यरहितः कश्चन धर्मः 'विशेषः' इत्यङ्गीकुर्वन्ति।

[5] 'भेदैर्धर्मान्तराश्रितैः' इत्यत्र 'धर्म्यन्तराश्रितैः' इति निर्णयसागरमुद्रिते पाठः। स एव नागेशेन स्वीकृतः। तत्स्थाने 'द्रव्यान्तराश्रयैः' इत्यन्नंभट्टाभिमतः पाठः।

[6] भिन्नमिति शेषः।

[7] विद ज्ञान इति धातोः कर्मणि बोध्यम्॥ वेद्यते — ऋ.

[8] द्रव्यभेद — अ.

[9] विशिष्ट एवेत्यर्थः — अ.

[10] वृत्तिर्व्यापार इत्यर्थो विवक्षितः स्यादिति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नैका। प्रत्यभिज्ञा तु [1]जात्यालम्बना गवादाविव। **निवृत्तेति**। गोशब्देनेव गौरिति भावः। ननु जातस्य वितस्त्यादिः परिमाणमित्युक्तम्, अत आह — **जातस्येति**। जननक्रियाक्षणस्य वर्तमानक्षणोऽवधिः, स मासेन **परिच्छिद्यते** ज्ञाप्यते। कियान् कालो जातस्येति [2]प्रश्नस्य जननक्षण-वर्तमानक्षणयोर्मध्ये कियान् कालो वृत्त इत्यर्थः। तस्य मासो जातस्येत्युत्तरमुक्तार्थं युक्तम्। ननु तथापि कालस्येदं परिमाणम्, न जातस्य, अत आह — **न चेति**। भेदाभावात् त्रिशद्रात्रस्य मासो न परिमाणमित्युक्त्वा कालसामान्यस्यापि नेत्याह — **न चेति**। [3]मास उक्तरीत्या क्रियोपाधिक-परिच्छेदको न कालसामान्यस्य। 'कियान्' इत्यनिर्धारितविशेषविषयप्रश्नस्य विशेषनिर्धारणे-नैवोत्तरत्वौचित्यादित्यर्थः। **क्रियाया इति**। क्रियाद्वारा तद्विशिष्टद्रव्यस्यापि परिमाणमिति भावः। लोकव्यवहारे शब्दादर्थप्रतीतिनिबन्धनमभिधानम्, तद् द्वित्वादौ नास्तीत्याह — **द्वित्वादेरिति**। **तथा-भूतत्वात्** एकत्वात्। अन्तरङ्गत्वमप्याह — **वस्त्वन्तरेति**। श्लोके **परिमाणम्** एकत्वं, **स्वभावतः** प्रातिपदिकार्थस्य तथाभूतत्वात्। 'द्विमासजातः' इत्यादौ [4]तु वस्त्वन्तरापेक्षालक्षणोपाधिना [5]भूतां जातां, **संख्यां** द्वित्वादिकामाश्रित्य [6]मासादिः, **भेदेन** द्वित्वादिवैशिष्ट्येन, वर्तत इत्यर्थः॥

[२, ६६१–६६६]

(**रत्नप्रकाशः**) 'पूर्वपदार्थप्रधानोऽव्ययीभावः' उत्तरपदार्थप्रधानस्तत्पुरुषः, अन्यपदार्थप्रधानो बहुव्रीहिः, सर्वपदार्थप्रधानो द्वन्द्वः' इति प्राचीनानां लक्षणानि [7]भगवता कथं स्वीकृतानि सर्वेषां तेषामव्याप्त्यतिव्याप्तिग्रस्ततां विदित्वापीति मनसि निधाय [8]स्थालीपुलाकन्यायेन सर्वेषां लक्षणानां युक्तत्वमयुक्तत्वं वा ज्ञास्यामीति पृच्छति — **किंप्रधान इति**। उत्तरमाह — **उत्तरपदार्थप्रधान इति**। विग्रहे यत् प्रथमान्तं तदर्थ एव समासे प्रधानमिति द्वितीयादितत्पुरुषे दृष्टत्वादत्र विग्रहे उत्तरपदस्य षष्ठ्यन्ततादर्शनादुत्तरपदार्थप्राधान्यं न युज्यते, [9]पूर्वपदार्थप्राधान्यं तु युज्यत इति मन्य-मानः शङ्कते — **यदीति**। विग्रहे यत् प्रथमान्तं तदर्थस्यैव समासे प्राधान्यमिति तावन्नियमोऽ-संगतः, पीतमम्बरं यस्येत्यादौ बहुव्रीहिविग्रहे यत् प्रथमान्तं [10]तदर्थस्य समासे प्राधान्यादर्शनात्। यद्युच्येत — पीतमम्बरं यस्येत्येतावानेव न विग्रहः, किं तु 'सः' इति प्रथमान्ततच्छब्दघटितः। तथा च तत्र विग्रहे यत् प्रथमान्तं तदर्थप्राधान्यमस्त्येवेति, तर्हि प्रकृतेऽपि 'मासो जातस्य यस्य परिमाणं स मासजातः' इति प्रथमान्ततच्छब्दघटितताया विग्रहस्य संभवादित्याशयेनाह — **योऽसौ मास-जातयोरिति**। **अभिसंबन्ध इति**। भेदघटित इति शेषः। **स समासे निवर्तत इति**। समासस्य विशिष्टैकार्थप्रतिपादकत्वादिति भावः। ननु तयोरभिसंबन्धस्य निवृत्तौ समासस्य विशिष्टार्थ-परत्वमेव न संगच्छत इत्यत आह — **अभिहितः सोऽर्थोऽन्तर्भूत इति**। व्याख्यातमिदं समर्थसूत्रे। नन्वे-कदेशिसमासादौ कथमुत्तरपदार्थप्राधान्यानुगुणो विग्रह इति चेत् शृणु, पूर्वः कायस्यावयवो यः, कायरूपः

---

[1] जात्यालम्बिनि गवादाविव — अ.
[2] प्रश्ने जनन — अ.
[3] 'मासः' इत्यादि 'औचित्यादित्यर्थः' इत्यन्तं नास्ति — अ.
[4] तुशब्दो नास्ति — अ.
[5] प्रदीपे 'उपाधिभूतमाश्रित्य संख्या भेदेन वर्तते' इत्यत्र 'उपाधिभूतामाश्रित्य संख्यां भेदेन वर्तते' इत्यत्रंभट्टपाठः।
[6] मासादेर्भेदेन — ऋ.
[7] भगवतान्ते स्वीकृतानि — ब.
[8] लौ. न्या. साहस्री. पृष्ठम् ८२.
[9] 'पूर्व' इत्यादि 'युज्यते' इत्यन्तं नास्ति — प.
[10] 'तदर्थस्य' इत्यस्यानन्तरम् एवकारोऽधिकः — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स पूर्वकायः। प्राप्तो जीविकां यः, जीविकारूपः स प्राप्तजीविकः। ब्राह्मणो न भवति ब्राह्मणसदृशो यः सोऽब्राह्मणः। मालामतिक्रान्तो यो मालारूपः सोऽतिमालः। अवक्रुष्टः कोकिलया यः कोकिलात्मकः सोऽवकोकिलः। परिग्लानोऽध्ययनाय योऽध्ययनरूपः स पर्यध्ययनः। निष्क्रान्तः कौशाम्बचा यः, कौशाम्बीरूपः स निष्कौशाम्बिरित्यादिरिति गृहाण। एवमन्यत्रापि समासे तल्लक्षणानुगुणो विग्रह ऊह्यः। ननु मासस्य जातो मासजात इत्यादिरूपो विग्रहस्तत्र कुतो नाश्रीयत इति चेन्न, तेन विग्रहेण तत्राभिमतार्थस्याप्रतीतेः। पलायमानः शङ्कते — **न तर्हीति**। समाधत्ते — **भवतीति**। इदानीं कश्चिन्मन्दबुद्धिर्मासादिशब्दानामहरादिर्त्रिशदादिशब्दपर्यायत्वं मन्यमानः शङ्कते — **कालस्य येनेति। अगमको निर्देश इति**। तथा चाभिमतार्थावोधकत्वादयुक्तं सूत्रमिदमिति मन्यते। **न हि जातस्येति**। अहान्येव जातस्य परिमाणं, न मासादिरिति मन्यते। एतेन 'तस्य हि [1]दिष्टिवितस्त्यादिकं परिमाणम्, न तु मासः, नापि तत्सत्ताया मासः परिमाणम्, सत्ताया नित्यत्वात्। नापि तज्जन्मक्रियायाः, तस्या एकक्षणभावित्वेन मासेन संबन्धाभावात्' इति निरस्तम्। 'तद्यथा — द्रोणो वदराणां देवदत्तस्य' इति दृष्टान्तानुसारिणा 'त्रिंशद्रात्रस्य' इत्युत्तरग्रन्थेन विरोधात्। तेन हि जातस्य परिच्छेदिका रात्रयः, रात्रीणां परिच्छेदको मास इति गम्यते, न तु दिष्टिवितस्त्यादिकमिति। अन्यथा दृष्टान्तदार्ष्टान्तिकयोरत्यन्तवैषम्यं स्यात्। **त्रिंशद्रात्रस्येति**। त्रिंशद्रात्रयः समाहृतास्त्रिंशद्रात्रम्, तस्येत्यर्थः। तथा च रात्रीणाम् त्रिंशदित्यर्थे मासशब्दो वर्तत इति फलितम्। तत्र त्रिंशद्रात्रादेः संख्यापूर्वपदस्य [2]'स नपुंसकम्' इति परत्वान्नपुंसकत्वम्, परशब्दस्येष्टवाचित्वात्। तथा च [3]'रात्राह्नाहाः पुंसि' इत्यस्य पाठतः परत्वेऽपि न तत्र प्रवृत्तिः। तत्र नपुंसकत्वमिष्टमित्यत्र मानं तु [4]'अपथपुण्याहौ नपुंसकौ' [5]'संख्यापूर्वा रात्रिः' इति लिङ्गानुशासनम्। यत्तु "ननु [6]त्रिंशद्रात्र एव मासो नापर इति भेदाभावादयुक्तमेतत्। नैष दोषः, कालो जातस्य मासेन परिच्छिद्यते। तथा हि — कियान् कालोऽस्य जातस्येति प्रश्ने 'मासः' इत्यादि प्रतिवचनम्। स च परिच्छिद्यमानस्त्रिंशद्रात्रात्मक एव संपद्यत इत्यभिप्रायेणैतदुक्तम्" इति। तन्न, वक्ष्यमाणसिद्धान्तरीत्या मासादिशब्दानां त्रिंशद्रात्रादिपरत्वेऽपि तत्रत्यशङ्कितुस्तदनभिमतत्वेन शङ्कायास्तुच्छत्वात्। सूर्यक्रियापरिच्छिन्नकालविशेषवाचकताया मासादिशब्दानां भगवता व्यवस्थापयिष्यमाणत्वेन कालविशेषरूपमासादीनां कालपरिच्छेदकत्वासंभवेन समाधानस्यापि तुच्छत्वात्। न हि घटकलशयोः परिच्छेद्यपरिच्छेदकभावो भवति। दृष्टान्तमाह — **तद्यथेति**। तत्र द्रोणो मासस्थानापन्नः। बदराणि रात्रिस्थानापन्नानि। देवदत्तो जातस्थानापन्नः। तदेव स्पष्टं दर्शयति — **न देवदत्तस्येति**। [7]'तुष्यतु दुर्जनः' इति न्यायेन वचनान्तराश्रयेण समाधत्ते — **सिद्धं त्विति। कालपरिमाणमिति**। कालस्य त्रिंशद्रात्रादेः परिमाणं **कालपरिमाणं** मासादि, तद्वाचको मासादिशब्दः स्ववाच्यमासादिपरिच्छिन्नः कालस्त्रिंशद्रात्ररूपो यस्य परिच्छेदकस्तद्वाचकेन जातादिना समस्यते, स तत्पुरुष इति वचनार्थः। एतेन 'कालशब्देन कालसामान्यमुच्यते। यस्य जातादेः संबन्धिनः कालसामान्यस्य परिमाणं मासादिस्तेन स कालो मासादिः समस्यते' इति [8]निरस्तम्। 'यस्य' इत्येतत्सापेक्षत्वेनासमर्थस्य 'कालस्य परिमाणेन समासासंभ-

---

[1] 'दिष्टचादि' इत्यस्यार्थानुवादोऽयम्।
[2] पा. सू. २. ४. १७.
[3] पा. सू. २. ४. २९.
[4] लिङ्गानुशासनम् १३१. तत्र 'अपथपुण्याहे नपुंसके' इति दृश्यते।
[5] लिङ्गानुशासनम् १३२.
[6] अत्र बहुव्रीहिर्बोध्य इति नागेशः।
[7] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[8] कालशब्दस्य परिमाणशब्देनेत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वात्। मासादिशब्दस्य [1]कालविशेषपरत्वाश्रयेण शङ्काया अप्रवृत्तत्वेन तदभिमतमासादिशब्दाश्रयेण प्रवृत्तस्यास्य वचनस्य सिद्धान्त्यभिमतसमासादिशब्दाश्रयेण कुकविकृतेरिव व्याख्यानानौचित्याच्च। अत एव 'अथवा कालशब्देन मासादिः कालविशेष उच्यते। स कालः परिमाणं यस्य कालसामान्यस्य तद्यस्य संबन्धि तेन स कालो मासादिः धमस्यत इत्यर्थः' इत्यपि निरस्तम्। असमर्थसमासतादोषातिरिक्तदोषस्यात्रापि सत्त्वात्। शङ्किता पुनराह — **सिध्यतीति**। भगवानाह — **यथान्यासमिति**। शङ्किताह — **ननु चेति**। भगवानाह — [2]**कं पुनर्भवानिति**। शङ्किताह — **येनेति**। **मूर्तीनां** जरायुजादि[3]चतुर्विधशरीराणाम्। **उपचयः** वृद्धिः, **अपचयः** ह्रासः। **लक्ष्यन्ते** दृश्यन्ते। तथा चानुभूयमानमूर्त्युपचयापचयहेतुः काल इति सिद्धम्। ननु भवतु स कालः, अहरादयस्तु शब्दास्तस्य वाचका न भवन्तीत्यत आह — **तस्यैवेति**। एतेन 'यद्येवं तस्यैकत्वात् कथमहरादिविभाग इत्यत आह — **तस्यैवेति**।' इति निरस्तम्। तादृशप्रश्नस्य 'सूर्यक्रियोपाधितः' इत्येवोत्तरस्य युक्तत्वात्। अत एव 'परोपाधिक एव सर्वस्य भेदः' इत्यपि निरस्तम्। असंबद्धप्रलापत्वात्। **युक्तस्य** परिच्छिन्नस्य। **अहरिति चेति**। वाचकमिति शेषः। भगवान् पृच्छति — **कयेति**। शङ्किताह — **आदित्यगत्येति**। उदयादस्तपर्यन्तं सूर्यस्य या क्रिया तत्परिच्छिन्नः कालः 'अहः' इत्युच्यते। अस्तादुदयपर्यन्तं [4]तस्य या सा तत्परिच्छिन्नः स[5] 'रात्रिः' इत्युच्यत इति फलितम्। तदेतावत् सम्यगेव ज्ञातं शङ्कित्रेति मनसि निधाय यदंशे तस्य विपरीतज्ञानं तन्निराकरोति भगवान् — **तयैवेति**। अहोरात्रपरिच्छेदिकया उदयादुदयपर्यन्तसूर्यक्रियेत्यर्थः। **असकृदावृत्तयेति**। त्रिंशत्कृत्व आवृत्तयेत्यर्थः। [**संवत्सर इति**। तत्]परिच्छिन्नषष्टित्रिशतीककालस्येति शेषः। तथा च यथाश्रुतमेव सूत्रमुपपन्नमित्युपसंहरति — **यद्येवमिति**। एवं सतीत्यर्थः। एतेन 'जातस्य [6]जननक्रियावधिर्मासेन परिच्छिद्यते, न मासातिरिक्तः कश्चित् [7]त्रिंशद्रात्रोऽस्ति, यस्य मासः परिमाणं स्यात्। न च कालसामान्यं परिच्छेद्यम्, काल एव हि [8]संसर्गिभेदावाप्तमासादिव्यवहारः क्रियायाः परिमाणं, न वस्त्वन्तरस्य' इति निरस्तम्। सकलानित्यवस्तुपरिच्छेदकस्य कालस्य क्रियामात्रपरिच्छेदकत्वकल्पनायां मानाभावात्। कालसामान्यस्य परिच्छेद्यतायाः स्वतः स्वभ्रान्तिपरिकल्पितत्वेन तन्निराकरणपरतयास्य ग्रन्थस्य व्याख्यानानौचित्याच्च। **एकवचनेति**। लुप्तषष्ठीबहुवचनान्तमिदम्। तथैव मत्वा व्याचष्टे — **एकवचनान्तानामिति**। **अनभिधानादिति**। [9]'अभिधानलक्षणाः कृत्तद्धितसमासाः' इत्युक्तेरभिधाने सत्येव समासः प्रवर्तत इति भावः। एतेन "समासे द्वित्वादेरनवगमात्। एकत्वं त्वत्र प्रातिपदिकार्थस्य तथाभूतत्वात् प्रतीयते, वस्त्वन्तरानपेक्षत्वाच्च। द्वित्वादिका तु संख्या वस्त्वन्तरापेक्षत्वाद्बहिरङ्गा। तदुक्तं हरिणा — [10]'शौर्पिके मासजाते च परिमाणं स्वभावतः। उपाधिभूतमाश्रित्य संख्या भेदेन वर्तते' इति" इति निरस्तम्। सामान्यतः समासे द्वित्वाद्यनवगमोक्तेः 'बाहुबलं, नेत्रपाटवम्,

---

[1] कालविशेषमात्राश्रयेण — प.

[2] भाष्ये 'कं पुनः कालं मत्वा भवानाह' इत्यत्र 'कं पुनर्भवान् कालं मत्वाह' इति निर्णयसागरमुद्रिते पाठः।

[3] आदिशब्देनाण्डजस्वेदजोद्भिज्जानि गृह्यन्ते।

[4] सूर्यस्य या क्रियेत्यर्थः।

[5] काल इत्यर्थः।

[6] 'जननक्रियावधिः' इत्यस्यानन्तरं 'क्रिया' इत्यधिकम् — प, ब.

[7] अत्र बहुव्रीहिर्बोध्यः; पद्मनाभवदकारान्तेति नागेशः।

[8] संसर्गभेदावाप्त — प, ब.

[9] महाभाष्यम् ३. ३. १९.

[10] वाक्यपदीयम् ३. १४. १२७. 'उपाधिभूतामाश्रित्य संख्यां भेदेन वर्तते' इति तत्र दृश्यते पूनामुद्रिते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इन्द्रियपाटवम्' इत्यादौ द्वित्वाद्यनुभवेन बाधितत्वात्। अत एवानुभवात् तदुक्तान्तरङ्गबहिरङ्ग-भावस्याप्रयोजकत्वात्। हरिग्रन्थस्योदासीनत्वाच्च। **उत्तरपदेनेति**। [1]'तद्धितार्थोत्तरपद' इति सूत्रे व्याख्यातमिदम्॥

नञ् २. २. ६.

[२, ६६६–६७७]

(उद्द्योतनम्) लोकव्यवहारगम्येऽर्थे प्रश्नो न युक्तः, अत आह — **इहेति**। यः कश्चि-दर्थोऽस्तु, अब्राह्मण इति रूपे न कश्चिद्विशेषः, अत आह — **तत्रेति**। **प्रक्रियेति**। प्रक्रियापक्ष-माश्रित्यायं विचार इत्यर्थः। भाष्योपक्षिप्तपक्षान् सुखग्रहणायाह — **त्रय इति**। [2]अन्यपूर्वोत्तरैः पदार्थशब्दस्य प्रत्येकं संबन्धः। पक्षत्रयोद्भूतिं दर्शयति — **यदेति**। **असदिति**। असत्सामान्य-मसत्त्व[3]विशिष्टवस्तु, अभावविशिष्टवस्तुप्रतिपादक इति यावत्। [4]तत्र ब्राह्मणशब्देन भावप्रधानेन प्रतियोगिब्राह्मणत्वमुच्यते। तथा च ब्राह्मणत्वाभावविशिष्टोऽब्राह्मण इति पूर्वपदार्थप्राधान्यं लभ्यत इत्यर्थः। अज्ञं प्रति क्षत्रिये 'अयं ब्राह्मणः' [5]इतिप्रकारकोपदेशो दुरुपदेशः प्रयुज्यतेऽज्ञेन। तं प्रति विशेषज्ञेन 'अयमब्राह्मणः' इति यदोच्यते तदा ब्राह्मणत्वविशिष्टत्वेन ब्राह्मणशब्दात् प्रतीतस्यैव क्षत्रियस्य ब्राह्मणत्वाभावविशिष्टत्वेन समासात् [6]प्रत्ययादुत्तरपदार्थप्राधान्यमित्यर्थः। [7]'इन्द्रिय-मिन्द्रलिङ्गम्' इतिवदनुशासनाभावात् कथमर्थत्रयलाभः, अत आह — **यद्यपीति**। उभयपदार्थ-प्राधान्यं कुतो नाशङ्कितम्, अत आह — **द्वन्द्ववदिति**। पक्षत्रयेऽपि वक्ष्यमाणदोषात् [8]कः पक्षः सिद्धान्तः, अत आह — **एवमिति**। अल्पप्रतिविधेयत्वं वक्ष्यमाणरीत्या ज्ञेयम्। **आश्रयितुमिति**। प्रथमतस्तद्ग्रहणेन तदभ्युपगमः सूच्यत इत्यर्थः। नञ्विशिष्टप्रयोगे कथं ब्राह्मणमात्रानयनम्, अत आह — **इहेति**। नन्वनर्थकनञ्समासस्य कथं साधुत्वम्, अत आह — **अन्वाख्यानादिति**। ननु तत्पुरुषस्य परवल्लिङ्गत्वात् कथं पुंल्लिङ्गतापत्तिः, अत आह — **न चेति**। **न्यासभेदेनेति**। [9]'पर-वल्लिङ्गं द्वन्द्वैकदेशिनोः' इति प्राप्तजीविकादौ [10]परवल्लिङ्गत्वनिरासाय वार्तिककृता वक्ष्यमाणेन न्यासान्तरेणेत्यर्थः। **सा** परवल्लिङ्गता। **वचनेति**। तत्रानुशासनाभावादित्यर्थः। [11]**यथान्यासे** परवल्लिङ्गसूत्रन्यासे। स्वयं दोषान्तरमाह — **किं चेति**। **अब्राह्मणक इति**। कप्प्रत्यया-भावादित्यर्थः। नन्वव्ययसंज्ञासूत्रपञ्चकेऽस्यानुपादानात् कथमव्ययसंज्ञा, अत आह — **अलिङ्ग-मिति**। अन्वर्थसंज्ञाङ्गीकारादित्यर्थः। पाठाभावात् 'पाठेन' इति कथम्, अत आह — **पक्षान्त-रेति**। अव्ययत्वेनाभिमतानि सर्वाणि पठित्वा 'स्वरादीन्यव्ययानि' इति रूढसंज्ञा कर्तव्ये-त्यर्थः। 'पाठेनापि' इत्यनेनोक्तदोषं विशदयति — **पाठाभावादिति**। वाचनिकमिति [12]'प्रयोजनम्'

---

[1] पा. सू. २. १. ५१.

[2] एतेन प्रदीपे 'अन्यपूर्वोत्तरपदार्थ' इत्यन्नंभट्ट-पाठ इति सूच्यते। दृश्यमानेषु प्रदीप-कोशेषु 'अन्यपदपूर्वपदोत्तरपदार्थ' इत्युपलभ्यते।

[3] असद्विशिष्टवस्तुप्रतिपादक इति — अ.

[4] तत्राब्राह्मण — ऋ.

[5] 'इत्याकारकोपदेशः' इत्युचितं भाति।

[6] 'प्रत्ययात्' इति नास्ति — अ.

[7] पा. सू. ५. २. ९३.

[8] सपक्षः — अ.

[9] का. वा. २. ४. २६–७.

[10] परवल्लिङ्गत्वानिरासाय — ऋ.

[11] 'यथान्यासे' इत्यादि 'कप्प्रत्ययाभावादित्यर्थः' इत्यन्तं नास्ति — अ.

[12] पा. सू. ५. १. १०९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति विहितठञन्तमित्याह — **वचनमिति**। **प्रयोजनं** प्रयोजकम्। नञर्थस्य लिङ्गसंख्यायोगो नास्तीत्यस्य किमुत्तरम्, अत आह — [1]**एतदुक्तमिति**। 'नञ् आह' इति छेदः। दृष्टकारणपौष्कल्ये कथमिदं वैचित्र्यम्, अत आह — **धर्मेति**। नन्वभावः शुक्लादिवन्न गुणः, अत आह — **ब्राह्मणेति**। भावप्रधानम्, जातिद्रव्यव्यतिरिक्तपरतन्त्रमात्रमत्र गुणशब्देन विवक्षितमिति भावः। समाधानद्वयस्य भेदमाह — **पूर्वत्रेति**। समासस्य शब्दात्मकस्य लिङ्गाभावादाह — **समास..** इति। अत्रापरितोषात् 'अथवा' इति भाष्यमिति वक्तुमस्मिन् पक्षे दोषमाह — **अत्रापी...**। **अमक्षिकमिति**। अर्थाभावेऽव्ययीभावः। तदभावे 'अमक्षिका' इति स्यात्। अर्थाभावेऽव्ययीभावस्यानवकाशत्वादवाध्यत्वं[2] स्यात्, अत आह — **तस्येति**। दोषान्तरमाह — [3]**असर्वस्मायस इति**। 'असर्वस्मै, असः' इत्यत्रायादेशे [4]यकारलोपाभावपक्षे रूपम्। **पूर्ववदिति**। यथान्यपदार्थप्राधान्यपक्षे [5]सर्वनामार्थस्योपसर्जनत्वं तथा पूर्वपदार्थप्राधान्येऽपीत्यर्थः। सूत्रकृतोऽप्युत्तरपदार्थप्राधान्यमेवाभिमतमित्याह — **एतत्तदोरिति**। **अर्थद्वारेणेति**। पञ्चमीनिर्देशे कार्ये षष्ठीनिर्देशोऽर्थद्वारेण संबन्धलाभार्थ इत्यर्थः। नञ् शब्दः, कथं तद्विशिष्टस्यानयनम्, अत आह — **आरोपितेति**। यत्र ब्राह्मण्यारोपः संभवति, तस्य तदभावविशिष्टस्येत्यर्थः। मुख्यब्राह्मण्यं गृहीत्वा चोद्यमित्यभिप्रेत्याह — **भावाभावयोरिति**। 'निवृत्त' इत्यनेन ब्राह्मण्याभावविशिष्ट उच्यत इत्याह — **निवृत्त इति**। [6]एतेन ब्राह्मणशब्दार्थनिवृत्तौ तत्प्रयोगवैयर्थ्यशङ्का निरस्ता। [7]नञ उपयोग आरोपज्ञापन इत्याह — **सादृश्यादिनेति**। 'यदा' इति विचारस्य प्रसङ्गसंगतिमाह — [8]**इदानीमिति**। द्योतकत्वेन नञ उपयोगमाशङ्क्याह — **ब्राह्मणशब्द एवेति**। [9]**अदृष्टत्वादिति**। अर्थप्रत्यायने शब्दस्य सामर्थ्यं मानसिद्धम्, न तु तन्निवृत्तावित्यर्थः। **सोत्प्रासं** सोल्लुण्ठनम्, वचनस्य [10]बाधितार्थत्वसूचनाभिनयपूर्वकमिति यावत्। 'नञ् प्रयुज्यमानः पदार्थं निवर्तयति' इति भाष्यं प्रतीकेनादायाक्षिपति — **नञ् प्रयुज्यमान इति**। पदार्थशब्देन लक्षणया तत्प्रत्ययो [11]विवक्षित इति समाधत्ते — **एवं तर्हीति**। औपचारिकप्रयोगे दृष्टान्तः — **यथेति**। ननु ब्राह्मणशब्दः एवाराच्छब्दवदुभयार्थ इत्युक्तम्, अवाचकस्य नञः कथं वा तत्प्रत्यायकत्वम्, अत आह — [12]**अयमर्थ इति**। दृष्टान्तं विवृणोति — **यद्यपीति**। उपपादितं व्याख्यानमुपसंहरति — [13]**तस्मादिति**। [14]**स्वहेतोः** ब्राह्मणशब्दात्। **तथेति**। लोके तथैव व्युत्पत्तेरित्यर्थः। [15]'प्रक्षालनात्' इति न्यायेनाक्षेप इत्याह — **अर्थप्रत्यायनायेति**। **प्रतिषेधविषयः** प्रतिषेधप्रतियोगी, तज्ज्ञानायेति[16] विग्रहः। **प्रदर्शनाय** ब्राह्मण-

---

[1] तदुक्तमिति — अ.

[2] अनवकाशत्वाद्वाध्यत्वं — ऋ.

[3] हरयाणामुद्रितेऽत्र 'असर्वस्मै, असः' इति विभज्यैव मुद्रितं दृश्यते। निर्णयसागरमुद्रिते 'असर्वस्मायसः' इति दृश्यते।

[4] लोपः शाकल्यस्येतीत्यादिः।

[5] सर्वनामपदार्थस्योप — अ.

[6] तेन — ऋ.

[7] 'नञः' इति नास्ति। उपयोगवदारोपज्ञापक इत्याह — अ.

[8] 'इदानीमिति' इत्यादि 'आशङ्क्याह' इत्यन्तं नास्ति — अ.

[9] प्रदीपे 'सामर्थ्यस्याप्रसिद्धत्वात्' इत्यत्र 'सामर्थ्यस्यादृष्टत्वात्' इत्यन्नंभट्टपाठ इति भाति।

[10] चोदितार्थत्व — अ; बाधितार्थसूचनाय—ऋ.

[11] विवक्ष्यत इति — ऋ.

[12] प्रदीपे 'अयमत्रार्थः' इत्यत्र 'अयमर्थः' इत्यन्नंभट्टपाठ इति ज्ञायते।

[13] प्रदीपे 'पदार्थशब्देन' इत्यत्र 'तस्मात् पदार्थशब्देन' इत्यन्नंभट्टपाठ इति प्रतीयते।

[14] 'स्वहेतोः' इत्यादि 'विषयः, प्रतिषेध' इत्यन्तं नास्ति — अ.

[15] लौ. न्या. साहस्री. पृष्ठम् १२२.

[16] प्रदर्शनायेत्यस्यार्थानुवादः — ज्ञानायेति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शब्दप्रयोग इति शेषः। एतदेव विवृणोति — **बुद्ध्येति**। सर्वशब्दानां गुणसमुदायवृत्तिप्रतिपादतस्य प्रकृतोपयोगमाह — **तत्रेति**। तथा च ब्राह्मणशब्दार्थस्य सर्वस्य न निवृत्तिरित्यवशिष्टगुणप्रतिपत्त्यर्थं ब्राह्मणशब्द आवश्यक इति न तद्वैयर्थ्यशङ्केति भावः। तपआदीनां गुणत्वाभावादाह — **गुणशब्देनेति**। याजनादीनां ब्राह्मणगुणानां कथमनिर्देशः, अत आह — **निदर्शनायेति**। [1]'कर्तरि च' [2]इति षष्ठीसमासनिषेधादाह — **शेषेति**। उत्पन्नस्य ब्राह्मणस्य तपआदि न कारकम्, अत आह — **ब्राह्मणव्यपदेशस्येति**। **दर्शनात्** ब्राह्मणशब्दप्रयोगस्येत्यादिः। **तथा दृष्टान्** तपआदिवद् ब्राह्मणे दृष्टान्। समुदायं त्यक्त्वावयवमात्रवृत्तित्वं न संभवति। किं त्ववयवे समुदायत्वारोपेण समुदायं प्रतिपादयन्नेवावयववृत्तिरित्याह — **अवयव इति**। ननु तैलादिशब्दस्य जातिवाचित्वात् कथं समुदायशब्दत्वम्, अत आह — **यदेति**। शुक्लेऽवयवे शुक्लशब्दो मुख्य एव, अशुक्ले तु समुदायरूपारोपेणेत्याह — [3]**यदा स्वयमिति**। शुक्लावयवान्तरेणासादितं शौक्ल्यं यस्य समुदायस्य तद्रूपारोपेणेति विग्रहः। **निन्दयेति**। निन्दानिमित्तमनुपदं [4]वक्ष्यते। तत्र पदद्वयप्रतिपाद्यमाह — **तत्रेति**। जातिमात्रप्रयुक्तब्राह्मणशब्द इत्यर्थः। जातितपःप्रभृतिगुणसमुदाये जातिरवयवः। **द्योत्यत इति**। अत एव निन्देत्यर्थः। [5]तदैवमुत्तरपदार्थनिवृत्तिद्योतकत्वं नञो न स्यात्, अत आह — **न चेति**। **द्वयोरिति**। ब्राह्मणशब्दः समुदायारोपेणावयवे वर्तते। नञापि समुदायनिवृत्त्यारोपेणावयवनिवृत्तावित्युभयोः समानविषयत्वमित्यर्थः। [6]एतदेवाह — **तदेकदेशेति**। उक्तरीत्या नञा तस्य समुदायस्यैकदेशनिवृत्तिः प्रतिपाद्यते। ब्राह्मणशब्देनैकदेशसद्भावः। [7]तदेकदेशस्य निवृत्तिसद्भावयोः प्रतिपादनेति विग्रहः। जातिहीने ब्राह्मणशब्दप्रयोगस्य प्रयोजनमाह — **तत्र स्तुत्येति**। गुणहीने ब्राह्मणत्ववति निन्दया, [8]तद्रहिते गुणवति स्तुत्येत्यर्थः। ननु 'संदेहादध्यवस्यति' इति विरुद्धम्, अत आह — **संदेहनिमित्तमिति**। पदार्थमुक्त्वा वाक्यार्थमाह — **गुणेति**। प्रतियोगिनोऽप्यभावद्वारा हेतुत्वे दृष्टान्तः — **यथेति**। जातिव्यतिरिक्तनिवृत्तेरभावादाह — **समुदायस्येति**। ननु जात्यभावे कथं समुदायस्याभावः, अत आह — [9]**अयमर्थ इति**। ननु 'कालम्' इत्येवालम्, 'माष' इति व्यर्थम्, अत आह — **कालत्वेति**। [10]अना-

---

[1] पा. सू. २. २. १६.

[2] यद्यप्यत्र कौमुद्यां 'कर्तरि च' इति सूत्रस्य 'कर्तरि षष्ठ्या अकेन न समासः' इति व्याख्याय 'भवतः शायिका' इत्युदाहरणं दत्त्वा 'नेह तृजनुवर्तते, तद्योगे कर्तुरभिहितत्वेन कर्तृषष्ठ्या अभावात्' इत्युक्तम्। तेन प्रकृते कर्तृषष्ठ्या अभावान्न तेन निषेधः, किं तु 'तृजकाभ्यां कर्तरि' इत्यस्य कर्त्रर्थतृजकाभ्यां षष्ठ्या न समासः' इति व्याख्यातत्वात् तेनैवात्र निषेध इति वक्तुमुचितम्, तथापि काशिकायां वैपरीत्येनानयोः सूत्रयोर्व्याख्यानोदाहरणदर्शनात् तदनुरोधेनात्र 'कर्तरि च' इत्युक्तम्।

[3] प्रदीपे 'स्वयमशुक्लोऽप्यवयवः' इत्यत्र 'यदा स्वयमशुक्लोऽप्यवयवः' इत्यन्नंभट्टपाठ इति भाति।

[4] 'निन्दया' इत्यतः पूर्वं प्रदीपे 'तपःश्रुतयोरभावात्' इति दृश्यते। अन्नंभट्टपाठे तन्न स्यादिति सूच्यतेऽनेन।

[5] तत्रैवम् — ऋ.

[6] तदेवाह — अ.

[7] तदेकदेशनिवृत्ति — अ.

[8] ब्राह्मणत्वरहित इत्यर्थः।

[9] प्रदीपे 'अयमत्रार्थः' इत्यत्र 'अयमर्थः' इत्यन्नंभट्ट पाठ इति भाति॥ एकदेशेति — अ.

[10] आपणस्थस्यापि — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पणस्थस्यापि गुणहानिदर्शनादाह — **[1]आपण इति**। 'ब्राह्मणोऽयमिति नाध्यवस्यति' इत्युक्त्वा 'निर्ज्ञातम्' इत्यनेन किमुच्यते, अत आह — **भ्रान्तिबीजेति**। आचारगौरत्वादिकं भ्रान्तिबीजम्। ननूत्तर[2]पदार्थस्य प्राधान्ये दोषः परिहृतः, न तु तदङ्गीकारस्तस्य किंचित् प्रयोजनं [3]वोक्तम्, तेन 'इदं खल्वपि' इत्ययुक्तम्, अत आह — **तदेवमिति**। दोषपरिहारात् स एव [4]सिद्धान्तः। न केवलं तत्र दोषाभावः, तस्य [5]प्रयोजनमप्यस्तीत्युच्यत इत्यर्थः। **तत्रैव** उत्तरपदार्थप्राधान्य एव। **उपचयं** फलविशेषम्। उत्तरपदार्थप्राधान्येनैकवचनसमर्थनेऽप्यनेकशब्दस्य नञ्समासप[illegible] विशेषप्रतीतिर्न स्यादिति शङ्कार्थं 'कथं पुनः' इति भाष्यम्। तत् प्रकृत[6]संगत्यर्थं सोपस्कारं व्याचष्टे — **अनेकशब्द इति**। भाष्यं व्याचष्टे — **अर्थैकत्वेति**। **न प्राप्नोति** उत्तरपदार्थप्राधान्येऽपीत्यर्थः। 'आसय' इत्याद्यनुरोधादाह — **विधार्येति**। तत्र बहुत्वप्रतीतिमुपपादयति — **निराश्रययोरिति**। **तयोः** क्रियागुणयोः। प्रसज्यप्रतिषेध इति सप्तम्यन्तम्। [7]तदेवोपपादयति — **यस्मादिति**। **तत्र कथमिति**। विधिपूर्वकप्रतिषेधाभावादित्यर्थः। आख्यातेन कारकाक्षेपस्तत्रापि तुल्य इत्युत्तराभिप्रायमाह — **अयमर्थ इति**। **तत्र** [8]'अनेकस्तिष्ठतीत्यत्र। द्वौ नञौ प्रकृतमर्थं गमयत इति मुख्यैकत्वस्यैव प्रत्ययः स्यात्, न द्व्यादीनाम्, अत आह — **आबाध इति**। कस्याबाधः, अत आह — **शत्रोरिति**। **षष्ठीति**। 'नः' इत्येकं षष्ठ्यन्तम्, **नः** अस्माकं, नैकं प्रियं नैकं सुखमित्यर्थः। अत्राख्याताभावेनाक्षेपाभावात् कथं संख्यान्तरप्रतीतिः, अत आह — **अत्रेति**। **अन्यथा** संख्यान्तरयुक्तप्रियप्रतीत्यनङ्गीकारे। प्रियसामान्यनिषेधे 'एकम्' इति व्यर्थं स्यादित्यर्थः। नन्वनेकमिति समासस्य वाक्योदाहरणं व्यधिकरणम्, अत आह — **तस्मादिति**। [9]पूर्वविप्रतिषेधानाश्रयणेऽपीष्टसिद्धिमाह — **तत्र भावप्रत्यय इति**। इत्थं च 'लघ्वसंदेहाः प्रयोजनम्' इति भाष्येऽसंदेहशब्दस्तद्विरुद्धनिश्चयपरः। नञ्समासस्योत्तरपदार्थप्राधान्यात् [10]पुँल्लिङ्गत्वाविरोधः॥

[२, ६६६–६७७]

(रत्नप्रकाशः) पूर्वसूत्रे निरूपितमुत्तरपदार्थप्राधान्यं स्मारयित्वा दूषणमत्र वक्ष्यामीत्याशयेन पृच्छति — **किंप्रधानोऽयमिति**। नैतस्य [11]दूषणभियोत्तरपदार्थप्राधान्यघटितं तत्पुरुषलक्षणं त्याज्यमित्याशयेन समाधत्ते — **उत्तरपदार्थेति**। इतरो दूषणमाह — **यदीति**। **ब्राह्मणमात्रस्येति**। 'सुब्राह्मणमानय [12]दुर्ब्राह्मणमानय' इत्यादाविवेति मन्यते। शङ्कितृबुद्धिपरीक्षार्थं पक्षान्तरं परिगृह्णाति **अन्यपदार्थप्रधान इति**। तत्संभवस्तु न विद्यते **ब्राह्मणः** ब्राह्मणत्वं यस्मिन् सोऽब्राह्मण इति ज्ञेयः। **हेमन्तस्य यल्लिङ्गमिति**। यथा [13]'सुगङ्गो देशः' इत्यादाविति भावः। ननु [14]'परवल्लिङ्गं द्वन्द्व-

---

[1] 'आपण आसीनमिति' इति प्रदीपे प्रतीकतया दृश्यते। "'आपण आसीनम्' इत्याचाराभावकथनम्" इति विशिष्टः कैयटग्रन्थत्वेनाभिमतः।

[2] पदार्थप्रावान्ये — अ.

[3] चोक्तम् — ऋ.

[4] सिद्धान्तप्रयोजनम्। न केवलं — अ.

[5] प्रयोजनमस्तीत्युच्यते — अ.

[6] संगत्यर्थोपस्करं — अ; संगत्यर्थं सोपस्करं — ऋ.

[7] पर्युदासे द्व्यादिसंख्यायुक्तार्थकत्वमेवेत्यर्थः।

[8] भाष्ये 'अनेकं तिष्ठति' इत्यत्र 'अनेकस्तिष्ठति' इति पूनामुद्रिते पाठः।

[9] पूर्वविप्रतिषेधाश्रयणेऽपीष्टमाह — अ.

[10] परवल्लिङ्गत्वाविरोधः — अ.

[11] दूषणाभिप्रायोत्तर — प.

[12] 'दुर्ब्राह्मणमानय' इति नास्ति — ब.

[13] सगङ्गो देशः — प.

[14] पा. सू. २. ४. २६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत्पुरुषयोः' इति वचनात् तत्र स्त्रीलिङ्गता भविष्यतीति चेदस्तु, एकवचनं तु न परिहार्यमित्याशयेनाह — **वचनमिति**। एतेन 'न चात्र परवल्लिङ्गतास्ति। यस्मान्न्यासभेदेन द्वन्द्वैकदेशिसमासयोरेव सोक्ता' इति निरस्तम्। अस्य नञ्समासस्यान्यपदार्थप्राधान्ये एतदर्थताया यथाश्रुतसूत्रस्यैवाश्रयितुं युक्तत्वात्। यदप्युक्तम् "नञ्समासस्यान्यपदार्थ[1]प्रधानत्व आश्रीयमाणेऽपवादत्वादनेन बहुव्रीहेर्बाधनात् 'अब्राह्मणको देशः' इत्यादि न सिध्यति" इति। तदपि न, उत्तरपदस्य भावप्राधान्य एव नञ्तत्पुरुषस्याश्रितत्वेन तत्र बहुव्रीह्यभावेऽपि 'अब्राह्मणको देशः' इत्यादौ बहुव्रीहेर्निरातङ्कत्वात्। 'असः, असर्वस्मै' इत्यादावुपसर्जनत्वात् सर्वादित्वाभावे त्यदाद्यत्वस्मायादिकं न स्यादिति तु दूषणान्तरमस्मिन् पक्षे भवत्येव। तदेवमस्मिन् पक्षे दूषिते पक्षान्तरं परिगृह्णाति — **पूर्वपदार्थप्रधानस्तर्हीति**। **अव्ययसंज्ञेति**। [2]'अलिङ्गमसंख्यमव्ययम्' इति पाठनिरपेक्षाव्ययलक्षणाश्रयेणेदम्। तस्योपपत्तिमाह — **अव्ययं हीति**। **पाठेनेति**। [3]'तद्धितश्चासर्वविभक्तिः' इति सूत्रे तथैव व्यवस्थापितत्वादिति भावः। मास्त्वव्ययसंज्ञा, अलिङ्गसंख्यत्वं तु स्यादेवेत्याशयेनाह — **यद्यपीति**। स एव स्वाभिप्रायं प्रकटयति — **पाठेनापीति**। **सत्यामिति**। नञ्समासस्याव्ययसंज्ञाभावेऽपीति शेषः। **अभिधीयत इति**। नञेति शेषः। परिहरति — **नेदमिति**। **वाचनिकमिति**। वचनमर्हतीत्यार्हीयष्ठक्। एतेन 'वचनं प्रयोजनमस्येति वाचनिकम्' इति निरस्तम्। अर्थापेक्षया वचनस्य प्रयोजनत्वप्रयोजकत्वयोरुभयोरप्यसंभवात्। **नञः** नञर्थस्य। स्वतो नञर्थस्य लिङ्गसंख्याभ्यां योगाभावेऽपि न दोषः, आश्रयगतयोरेव तयोस्तत्र [4]भानेनेष्टसिद्धेरित्याशयेनाह — **अथवेति**। **समासः** समासार्थः प्रधानभूतः। नन्वेवमपि 'असः, असर्वस्मै' इत्यादौ सर्वादित्वाभावप्रयुक्तदोषस्तदवस्थ एवेत्यस्वरसादाह — **अथवेति**। **पुरुषमात्रस्येति**। यद्यपि पुरुष एवानीयते, न तु राजा, तथापि यं कंचित् पुरुषमानयेदित्यत्र तात्पर्यान्न दोषः। **राजा** राजशब्दः। [5]**तेनैवेति**। एवकारो भिन्नक्रमः। तेन विशिष्टस्यैवानयनं भवति, न तु यस्य कस्यचिदित्यर्थः। **नञ्विशिष्टस्य** नञर्थविशिष्टस्य। **कः पुनरसाविति**। असौ नञर्थविशिष्टः क इत्यर्थः। **निवृत्तपदार्थक इति**। निवृत्तः पदार्थो ब्राह्मणत्वं यस्मिन् स क्षत्रियादिरित्यर्थः। **यदा** [6]**पुनरस्य पदार्थो निवर्तत इति**। तदेति शेषः। **स्वाभाविकीति**। स्वभावः प्रयोजनमस्याः स्वाभाविकी, प्राग्वतीयष्ठञ्। **किं नञ् प्रयुज्यमानः करोतीति**। न किंचित् करोतीति तत्प्रयोगो व्यर्थः स्यादिति भावः। **नञ् प्रयुज्यमान इति**। वचनबलान्निवृत्तपदार्थकस्य क्षत्रियादेर्भानं भविष्यतीति भावः। **पदार्थं निवर्तयतीति**। वचनमन्तरेण स्वभावेनैव नञ् निवर्तयतीति भावः। तत्र दृष्टान्तो मन्त्रपठनेन विषनिवृत्तिः। सहस्रकृत्वोऽपि नञि पठचमाने ब्राह्मणत्वादेर्निवृत्त्यदर्शनादयुक्तं नञः पदार्थनिवर्तकत्वमित्याशयेन पृच्छति — **कथमिति**। उत्तरमाह — **कीलप्रतिकीलवदिति**। दृष्टान्तदार्ष्टान्तिकयोरत्यन्तवैषम्यादसदुत्तरं तदिति मत्वोपहसति — **यद्येतन्नञो माहात्म्यमिति**। इदानीं सदुत्तरमाह — **एवं तर्हीति**। **स्वाभाविकी निवृत्तिरिति**। क्षत्रियादौ स्वभावादेव ब्राह्मण्यं निवर्तत इति भावः। **नञ्निमित्ता तूपलब्धिरिति**। स्वभावतो निवृत्तपदार्थकस्य क्षत्रियादेरुपलब्धिर्नञ्निमित्तिकेत्यर्थः। तत्र दृष्टान्तमाह — **तद्यथेति**। ब्राह्मणशब्द-

---

[1] प्राधान्ये — प.
[2] का. वा. १. १. ३८–५.
[3] पा. सू. १. १. ३८.
[4] भावेनेष्ट — प,
[5] भाष्ये 'तेन विशिष्टस्य' इत्यत्र 'तेनैवं विशिष्टस्य' इति निर्णयसागरमुद्रिते पाठ उपलभ्यते। 'तेनैव विशिष्टस्य' इति रत्नप्रकाशकृत्पाठ इति भाति।
[6] पुनरस्यार्थो निवर्तत इति — प, व.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निरपेक्ष एव नञ् निवृत्तपदार्थं क्षत्रियादिकं कथयतीति मन्यमान आह — **यदि पुनरिति**। उत्तरमाह — **एवं यथा विज्ञायेतेति**। अयं भावः — ब्राह्मणशब्दो ब्राह्मणत्वशून्यब्राह्मणसदृशक्षत्रियादिलक्षकः। नञ् तु तस्य द्योतक इत्युभयोः प्रयोग आवश्यक इति। [1]**एवं चैतदिति**। उपपन्नमिति शेषः। ब्राह्मणशब्दस्य तत्र शक्तिरेव संभवतीत्यभ्युच्चयवादेनाह — **अथवेति**। केषां गुणानां समुदाये ब्राह्मणशब्दो वर्तत इत्यपेक्षायां तद्गुणनिदर्शकं [2]मनुवचनं पठति — तप इति। तत्र कृच्छ्रचान्द्रायणादिकं **तपः**। **श्रुतं** वेदतदङ्गाद्यध्ययनम्। **योनिः** ब्राह्मणाद् ब्राह्मण्यां जन्म। **ब्राह्मणकारकमिति**। तत्र ब्राह्मणशब्दो ब्राह्मण इति व्यवहारलक्षकः, कारकशब्दो निमित्तपरः, तयोः षष्ठीतत्पुरुषः। तथा च तद्गुणत्रययुक्तो ब्राह्मणशब्दवाच्य इत्युक्तप्रायम्। **जातिब्राह्मण इति**। जातिमात्रविशिष्टो ब्राह्मणः, न मुख्य इति भावः। ब्राह्मणशब्दार्थान्तिर्गतानन्यान् कांश्चिद् गुणानाह — **तथेति**। **शुच्याचारः** पवित्राचारः। [3]**पिङ्गलकपिलकेश इति**। पिङ्गलाः कपिलाः केशा यस्य स इत्यर्थः। **ब्राह्मण्ये** ब्राह्मणशब्दप्रवृत्तिनिमित्तगुणसमुदाय इत्यर्थः। **कुर्वन्तीति**। केचिदृषय इति शेषः। **जातिहीने गुणहीने चेति**। सामान्येनैकवचनम्, तेन जातिहीनेषु गुणहीनेषु चेति 'अवयवेषु' इति प्रागुक्तेन सामानाधिकरण्यमुपपन्नम्। **गुणहीने तावदिति**। प्रवर्तत इत्यनुषज्यते। **यस्तिष्ठन् मूत्रयतीति**। शुच्याचाररूपगुणाभावात् तत्र ब्राह्मणशब्दोऽवयवेषु वर्तते। तदेव द्योतयति नञिति भावः। **संदेहाद् दुरुपदेशाच्चेति**। गुणहीने ब्राह्मणगुणहीनत्वं जानतापि ब्राह्मणशब्दप्रयोगो निश्शङ्कं कर्तुं शक्यते, जातेरेव मुख्यप्रवृत्तिनिमित्तत्वात्। अब्राह्मणशब्दस्तु निन्दापरतया सशङ्कम्। जातिहीने त्वब्राह्मणशब्दो निश्शङ्कं प्रयुज्यते। ब्राह्मणशब्दस्तु संदेहाद्वा दुरुपदेशाद्वा प्रयुज्यते नान्यथेति लोकव्यवहारोऽनेन सूचितः। अनेनेदमपि सूचितम् — गुणहीनस्यापि ब्राह्मणस्य वधे ब्रह्महत्या भवति न तु जातिहीनस्येति। **संदेहात्तावदिति**। ब्राह्मणशब्दो वर्तत इत्यनुषज्यते। तदुपसंहरति — **तत्र संदेहाच्चेति**। चकारान्निश्शङ्कमब्राह्मणशब्दो वर्तत इत्यर्थावगतिः। **जातिकृता चार्थस्य निवृत्तिरिति**। जातेः प्राधान्यात् तन्निवृत्त्या तद्घटितसमुदाय एव निवर्तत इति निश्शङ्कं ब्राह्मणशब्दः प्रयोक्तुं न शक्यत इति भावः। [4]**दुरुपदेशाच्चेति**। ब्राह्मणशब्दो वर्तत इत्यनुषज्यते। **स तत्र गत्वा यं पश्यतीति**। तत्र स्थितमिति शेषः। ननु जातिहीने 'संदेहाद् दुरुपदेशाद्वा' इत्येव ब्राह्मणशब्दः प्रवर्तत इति स नियमः [5]कुत इति चेन्न, यत्र 'ब्राह्मणोऽयम्' इति ज्ञानं भवति तत्रैव 'ब्राह्मणोऽयम्' इति प्रयोगस्योचितत्वादित्याशयेनाह — **आतश्चेति**। चोऽवधारणार्थो भिन्नक्रमो दुरुपदेशाद्वेत्यस्यानन्तरं ज्ञेयः। **न ह्ययमिति**। हि यस्मात् कारणात् **अयं** लोकव्यवहारे निपुणो द्रष्टा, माषराशिवर्णमापण आसीनं दृष्ट्वा ब्राह्मणोऽयमिति नाध्यवस्यति, आत इति पूर्वेणैकवाक्यता। **निर्ज्ञातं तस्य भवतीति**। अब्राह्मणोऽयमितीति शेषः। घटादौ त्वत्यन्तविसदृशेऽब्राह्मणशब्दोऽपि न वर्तते। तदेवमुत्तरपदार्थप्राधान्ये प्रसक्तं दोषं परिहृत्य गुणमाह — **इदमिति**। **किमिति**। संगृहीतमित्यनुषज्यते। **अनेकमिति**। शब्दस्वरूपमिति शेषः। नञ्नुडेकशब्दानामुत्तरपदार्थप्राधान्याभावेऽपि सिद्धत्वात् तत्र किं तेन संगृहीतमिति पृच्छति — **किमत्रेति**। **एकवचनमिति**।

---

[1] भाष्ये 'एवं वैतत्' इत्यत्र 'एवं चैतत्' इति निर्णयसागरमुद्रिते पाठः।

[2] उपलभ्यमानायां मनुस्मृतौ तद्वचनं न दृश्यते।

[3] भाष्ये 'पिङ्गलः कपिलकेशः' इत्यत्र 'पिङ्गलकपिलकेशः' इति समस्ततया पाठो रत्नप्रकाशकृदभिमतः। अयं च पाठ उद्योते स्पष्टः।

[4] भाष्ये 'दुरुपदेशात्-दुरुपदिष्टम्' इत्यत्र 'दुरुपदेशाच्च दुरुपदिष्टम्' इति निर्णयसागरमुद्रिते पाठः।

[5] कृत इति — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उत्तरपदार्थस्यैकत्वादेकवचनमुचितम्, अन्यथा बहुवचनं स्यादिति भावः। एकवचनान्तेन [1]तेन द्वयोर्बहूनां वा कथं प्रतीतिर्भवतीति पृच्छति — **कथं पुनरिति**। **द्विबहूनामिति**। द्वौ वा बहवो वा द्विबहवः, तेषामित्यर्थः। [2]'संख्ययाव्यय' इत्यादिना [3]वार्थे बहुव्रीहिः। उत्तरमाह — **प्रसज्यायमिति**। **क्रियागुणाविति**। तत्र गुणोदाहरणम् — रूपं रसः स्पर्शश्चास्त्यनेकेष्विति। तत्र सामान्यतो नियतसंख्याके द्रव्ये क्रियागुणाश्रयत्वेन ज्ञाते तत्रैकप्रतिषेधे द्विबहुष्वेव सा बुद्धिर्विश्राम्यतीति भावः। एतेन 'एतच्च प्रसज्यप्रतिषेध उच्यते। पर्युदासे तु द्व्यादिसंख्यायुक्त एवानेकशब्दस्यार्थः' इति निरस्तम्। असमर्थसमासे कस्यापि तत्र प्राधान्याभावेन विचारस्यास्य समर्थसमासविषयत्वात्। समर्थस्य नञ्समासस्य पर्युदासत्वानतिरेकाच्च। ननूत्तरपदार्थप्राधान्ये 'अनुपलब्धिः, अनचि' इत्यादावुपलब्ध्यजाद्यभावप्रतीतिः कथमिति चेत्, उपलब्ध्यजादिशब्दानां तदभावलक्षणायां नञस्तद्द्योतकत्वादिति गृहाण। एवं चार्थाभावेऽव्ययीभावः पूर्वपदार्थप्राधान्ये निर्बाध एव। भवतु यत्रानेकस्य कर्मत्वादिविवक्षा तत्र गुणक्रियाप्रसञ्जनद्वारा द्विबहूनां बोधनमनेकशब्देन, यत्र तु कर्तृत्वेनानेकस्य विवक्षा तत्र कथं बोध इति पृच्छति — **यत्र खल्विति**। उत्तरमाह — **भवति चेति**। अयं भावः — यथा 'अब्राह्मणः' इत्युक्ते ब्राह्मणभिन्नो ब्राह्मणसदृशः क्षत्रियादिर्बुध्यते तथा [4]'अनेकः' इत्युक्ते एकत्वविशिष्टाद् भिन्नस्य द्वित्वादिविशिष्टस्य भानं भविष्यतीति। तथा च क्रियागुणप्रसञ्जनपूर्वकत्वाद्याश्रयणक्लेशो न कोऽपीति सिद्धम्। एतेन 'यत्र पूर्वमेव प्रतिषेधः पश्चात् क्रियागुणविधानं तत्र कथं [5]द्विबहूनां संप्रत्यय इति प्रश्नः' इति निरस्तम्। 'भवत्यनेकः' इत्युक्तेऽपि क्रियाश्रयत्वेनानेकस्याप्रतीतेः। व्यस्तपदप्रयोगे पौर्वापर्यनियमाभावेन तदनुसारेण समाधानानौचित्याच्च। **न नेति**। [6]'आबाधे च' इति द्विर्वचनम्। [7]**अब्राह्मणत्वमित्येवं स्वर इति**। [8]'तत्पुरुषे तुल्यार्थ' इत्यादिना पूर्वपदप्रकृतिस्वर इति भावः। **अब्राह्मणत्वमिति चेष्यत इति**। प्रत्ययस्वरेणान्तोदात्तत्वमिति भावः। **उक्तमिति**। [9]'तस्य भावस्त्वतलौ' इति सूत्रे। त्रिकालज्ञत्वाद् भगवतो वक्ष्यमाणस्यापि वार्तिकस्य भूतत्वेन निर्देश उपपन्नः। यत्तु 'तत्र भावप्रत्ययस्तावत् प्रकृत्यर्थस्य सापेक्षत्वादसामर्थ्यान्न भवति। नञ्समासस्तु प्रधानस्य सापेक्षत्वाद् भवतीत्याहुः' इति। तन्न, तदर्थस्य भाष्यारूढत्वेन 'आहुः' इत्युक्तेरसंगतत्वात्। [10]'वर्णो वर्णेन' इति सूत्रस्थवार्तिकवदस्यापि वार्तिकस्येष्टिपरताया एवौचित्यात्, तथैव व्यवस्थापयिष्यमाणत्वात्। अन्यथा ब्राह्मणस्य भावो ब्राह्मणत्वम्, न ब्राह्मणत्वमब्राह्मणत्वमित्यर्थविवक्षायां पूर्वं त्वतलोः प्रसङ्गाच्च। न चेष्टापत्तिः, न ब्राह्मणोऽब्राह्मणः, अब्राह्मणस्य भावोऽब्राह्मणत्वमिति विवक्षायामन्तोदात्तत्वस्यापि सिद्धत्वेन वार्तिकाभ्युपगमानौचित्यात्। अभ्युपगतं तु तद् भगवता॥

---

[1] 'तेन' इति नास्ति — प.
[2] पा. सू. २. २. २५.
[3] 'अनिर्ज्ञातेऽर्थे' इत्यादिना भाष्ये स्पष्टमिदम्।
[4] भाष्ये 'अनेकं तिष्ठति' इत्यत्र 'अनेकस्तिष्ठति' इति पूनामुद्रिते पाठः।
[5] प्रदीपे 'बहूनाम्' इत्यस्य स्थाने 'द्विबहूनाम्' इति पाठ आश्रितः।
[6] पा. सू. ५. १. १०.
[7] अब्राह्मणत्वमित्येव स्वर इति — प, ब.
[8] पा. सू. ६. २. २.
[9] पा. सू. ५. १. ११९.
[10] पा. सू. २. १. ६९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ईषदकृता २. २. ७.

[२, ६७७]

(उद्द्योतनम्) द्रव्यस्य जातेर्वैषदर्थेन योगाभावात् सामर्थ्याभावेनैवात्र न[1] समासः, अत आह — **यथेति**। कडारशब्दः कथं कृदन्तः, अत आह — **गडेरिति**। **क्रियाकारकेति**। गुणजाति-विशेषप्रतीतेरिति भावः। 'सर्वे शब्दा धातुजाः' इति पक्षे गवादिशब्दवज्जातिशब्दानामपि कृदन्तत्वाविरोध इत्याह — **तदयुक्तमिति**। अव्युत्पत्तिपक्षे [2]स्वयमुदाहरणमाह — **अथापीति**॥

] २, ६७७]

(रत्नप्रकाशः) **ईषद् गार्ग्य इति**। न चात्रेषदर्थान्वयासंभवादेव समासाभावः सिद्ध इति वाच्यम्, गुणक्रियाकृतोत्कर्षापकर्षापेक्षया 'गार्ग्यतरः, गार्ग्यकल्पः, गार्ग्यपाशः' इति तद्धितवत् समासस्यापि संभवात्। **ईषत्कडार इति**। [3]'गडेः कड च' इत्यौणादिक आरन्। यद्युच्येत— उणादीनामव्युत्पन्नत्वाश्रयणादिदं सिद्धमिति, तर्हि 'ईषद्रक्तम्' 'ईषदुन्नतम्' इति न सिध्यतीति ज्ञेयम्॥

षष्ठी २. २. ८.

[२, ६७८–६८०]

(उद्द्योतनम्) उत्तरत्र पठितस्य पूर्वत्र पाठरूपापकर्षोऽत्र नास्ति, अत आह — [4]**अपवाद इति**। **प्रतिषेधविषये** 'सर्पिषो ज्ञानम्' इत्यादौ। [5]**कृद्योगायामपि** 'इध्मप्रव्रश्चनः' इत्यादौ। **विषयेति**। 'कृद्योगा समस्यते, प्रतिपदविधाना न समस्यते' इत्यनयोरित्यर्थः। तत्र प्रतिपद-[6]विधानाशब्दप्रवृत्तिनिमित्तमाह — **साक्षादिति**। शेषग्रहणेनापि शेषत्वेन कारकमुपात्तमेवेति तन्नि-वृत्तये 'साक्षात्' इत्युक्तम्। **सैवेति**। [7]गोबलीवर्दन्यायेन तद्व्यतिरिक्तैव प्रतिपदविधानेत्युच्यत इत्यर्थः। वार्तिकद्वयं प्रत्याचष्टे — **तत्र शेषेति**। षष्ठीविधानेन समासनिवृत्तिः कथं लभ्या, अत आह — **षष्ठी भवत्येवेति**। पुनर्विधानं नियमार्थम्, निवर्त्यान्तराभावात् समास एव नि-वर्त्यत इति भावः। ननु [8]'कर्तृकर्मणोः' इत्यस्यापि समासनिवर्तकत्वात् समासो वक्तव्यः, अत आह — **अशेषेति**। कर्तृत्वकर्मत्वविवक्षायां शेषत्वाभावादप्राप्ता षष्ठ्यचनेन विधीयत इत्यर्थः। अत्र वदन्ति — एवं सति[9] करणाधिकरणषष्ठ्या अप्यशेषविषयत्वेन समासनिवर्तकत्वाभावात् 'सर्पिषो ज्ञानम्' इत्यादौ समासनिषेधाय 'प्रतिपद' इति वक्तव्यम्। तस्मिन्नुक्ते 'कृद्योगा' इति च

---

[1] 'न' इति नास्ति — अ.

[2] स्वयमुदाहरति — ऋ.

[3] उणादिसूत्रम् ४२२.

[4] अपवादविषय इति — अ.

[5] प्रदीपे 'कृद्योगाया अपि' इत्यत्र 'कृद्योगाया-मपि' इति निर्णयसागरमुद्रिते पाठः, सोऽत्रा-नुसृतः। एवं पूर्ववाक्येऽपि 'प्रतिपदविधा-नाया अपि' इत्यत्र 'प्रतिपदविधानायामपि' इति निर्णयसागरमुद्रिते पाठः।

[6] विधानशब्द — अ.

[7] लौ. न्या. प्रथमभागे पृष्ठम् २५.

[8] पा. सू. २. ३. ६५.

[9] 'सति' इति नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वक्तव्यमिति [1]तत्र प्रत्याख्यानपक्षे [2]समासोऽङ्गीकार्यः, अनभिधानं वाश्रयणीयमिति। 'तत्स्थैः' इत्यस्य संगतिमाह — **प्रतिप्रसवेति** । **स्वात्मनि** स्वस्मिन्। मुख्यस्य स्वस्मिन्नवस्थानस्यासंभवाद् गौणस्येह ग्रहणमित्याह — **न चेति**। **तस्मादभिधानेति** । स्वमात्रनिष्ठाभिधानकत्वं स्वनिष्ठत्वमित्यर्थः। व्याख्यातस्य 'तत्स्थैः' इत्यस्य प्रयोजनमाह — **इह केचिदित्यादिना**। यद्यपि महदादिशब्दैर्द्रव्यैणैकत्वमापन्नगुणा उच्यन्त इति 'त्रिविध' इति वक्तव्यम्, प्रकृतोपयोगात्तु 'द्विविध' इत्युक्तम्। **रूपादीति**। तेषां परिग्रहार्थं शुक्लादिनिरासार्थं चेत्यर्थः। [3]यद्वा [4]'पूरण'सूत्रे गुणग्रहणेन [5]तेषामपि निषेधे प्राप्ते तेषां समासार्थमित्यर्थः । तत्स्थत्वे हेतुः — **सर्वदेति**। [6]गुणाभिधाने हेतुः — **शुक्लशब्दस्येति**। गुणमुक्त्वा गुणिनि यो वर्तते स गुणवचनः, तस्य गुण एव प्रवृत्तिनिमित्तमिति भावप्रत्ययेन शुक्लगुण एवाभिधीयत इत्यर्थः। **असौ शुक्लः। तत्स्थः** स्वमात्रनिष्ठः। [7]**अनुरञ्जकत्व** विशेषणत्व। ननु शौक्ल्यशब्देन स्वात्मनिष्ठ एव प्रतिपाद्यते, अत आह — [8]**वार्तिक इति**। पटस्य शुक्लः शौक्ल्यमित्येकार्थत्वात् शुक्लशब्दप्रयोगे तन्मात्रनिष्ठत्वाभावात् शौक्ल्यशब्दाभिधेयस्यापि न[9] तन्मात्रनिष्ठत्वमित्यर्थः। ननु 'रूपवान्' इति रूपस्यापि द्रव्योपरञ्जकत्वदर्शनात् [10]तत्स्थत्वं न स्यात्, अत आह — **रूपवानिति**। **नन्विति** । सामर्थ्याभावे नैवात्र न[11] समास इति निषेधवैयर्थ्यमित्यर्थः। **विशिष्टेति**। गन्धविशेषवृत्तिरित्यर्थः। **तदर्थः** तीव्रशब्दार्थः। तीव्रशब्दस्य तत्स्थगुणाभिधायित्वाभावादेव [12]समासाप्रसङ्गः, अत आह — **यश्चेति**। **नन्विति**। तीव्रमृदुशब्दयोर्गन्धस्पर्शवृत्त्योरेवेदं सामानाधिकरण्यं [13]बोध्यम्। अर्थान्तरवृत्त्योः सामानाधिकरण्येऽपि गुणवृत्त्योः सामानाधिकरण्याभावेन समासप्रसङ्गस्य दुरपह्नवत्वात्। **प्रतिषेधस्य** गुणेन नेति प्रतिषेधस्य। 'गुणवचनेन न' इत्युक्ते 'तत्स्थैः' इति न वक्तव्यमिति लाघवमुपपादयति — **तत्रेति**। **संबन्धाभावादिति**। तथा चासामर्थ्यादेव समासाभाव इत्यर्थः।।

[२, ६७८–६८०]

(रत्नप्रकाशः) किमर्थमिति। सूत्रेणैव सिद्धत्वादिति भावः। **वक्ष्यतीति**। [14]'न निर्धारणे' इति सूत्र इति शेषः। **अपकर्ष इति**। अपवाद इत्यर्थः। यत्तु "तत्र शेषविवक्षायां [15]'षष्ठी शेषे' इति सिद्धायां षष्ठ्यां [16]'ज्ञोऽविदर्थस्य करणे' इत्यादिप्रकरणं समासनिवृत्त्यर्थमेवारब्धम्। षष्ठी भवत्येव, श्रूयत एव, न तु तस्याः समासो भवतीत्यर्थः। समासे सति हि तस्या अभावः स्यात्। तस्मात् [17]'प्रतिपदविधाना च' इति न वक्तव्यम्। तस्मिन्ननुच्यमाने 'कृद्योगा च' इत्यपि न वक्त-

---

[1] अशेषविषये सर्पिषो ज्ञानमित्यादावित्यर्थः।

[2] समासोऽनङ्गीकार्यः — अ.

[3] 'यद्वा' इत्यादि 'समासार्थमित्यर्थः' इत्यन्तं नास्ति — अ.

[4] पा. सू. २. २. ११.

[5] रूपादीनामपीत्यर्थः।

[6] गुणाभिधानहेतुः — अ.

[7] अनुरञ्जकत्वं विशेषणत्वम् — अ.

[8] प्रदीपे 'अर्थस्य च तत्स्थत्वम्' इत्यतः प्राक् 'वार्तिके' इत्यन्नंभट्टपाठ इति प्रतीयते।

[9] 'न' इति नास्ति — अ.

[10] तत्सत्त्वं — ऋ.

[11] 'न' इति नास्ति — अ.

[12] समासाप्रसङ्गादत आह — ऋ.

[13] बोध्यते — ऋ.

[14] पा. सू. २. २. १०.

[15] पा. सू. २. ३. ५०.

[16] पा. सू. २. ३. ५१.

[17] का. वा. २. २. १० — १.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

व्यम्। अशेषविषये विधानार्थत्वात् [1]'कर्तृकर्मणोः कृति' इत्यस्य समासनिवृत्तौ सामर्थ्याभावात् सूत्रेणैव समासस्य सिद्धत्वात्" इति। तत्र विधिनियमसंभवे विधेरेव ज्यायस्त्वेन [2]'ज्ञोऽविदर्थस्य करणे' इत्यनेन करणे षष्ठ्या अप्राप्ताया विधेयत्वेन [3]'अधीगर्थदयेशाम्' इत्यादिभिः सूत्रैः [4]'न लोकाव्ययनिष्ठा' इति निषेधबाधकत्वेन पुनः कर्मणि षष्ठ्या विधेयत्वेन च [5]'प्रतिपदविधाना च षष्ठी न समस्यते' 'कृद्योगलक्षणा षष्ठी समस्यते' इति वार्तिकतद्भाष्यस्वरसेन [6]'कर्मादिष्वकर्मकवद्वचनम्' इत्यधीगर्थसूत्रगतवार्तिकतद्भाष्यस्वरसेन च भावे लविधिमात्रसंपादनोपायान्तर[7]संभवसूचकस्य "शेष इति वर्तते' इत्यधीगर्थसूत्रगतस्य भाष्यस्यापि तदनुसारेण व्याख्यातुं युक्तत्वेन तद्भाष्यमनुसृत्य बहुसूत्रवार्तिकतद्भाष्य[8]न्यायानामुपेक्षणानौचित्यात्। ननु [10]'ज्ञोऽविदर्थस्य' इत्यादिविषये परत्वात् [11]'कर्तृकर्मणोः कृति' इति षष्ठ्यां सत्यां 'कृद्योगा च' इति समासः स्यादिति चेन्न, परशब्दस्येष्टवाचकत्वेन पाठतः परां कृद्योगलक्षणषष्ठीं बाधित्वा शेषषष्ठ्या एव प्रवृत्तिसंभवात्। एतेन [12]'ज्ञोऽविदर्थस्य' इत्याद्यष्टसूत्र्यन्तोदात्तनिषेधफलिका, 'मातुः स्मृतम्' इत्यादौ कारकषष्ठ्यभावात् समासाभावार्था चेति [13]'न निर्धारण' सूत्रगत[14]कौस्तुभो निरस्तः। शेषलक्षणषष्ठ्या तत्र समासमन्तोदात्तविषयमभ्युपगम्य कृदुत्तरपदप्रकृतिस्वरविषयकारकषष्ठीसमासस्यैव निषेधः[15] स इति सूत्रवार्तिकभाष्यन्यायानुसारेण व्यवस्थापनात्। ननु [16]'साधनैर्व्यपदिष्टे च श्रूयमाणक्रिये पुनः। प्रोक्ता प्रतिपदं षष्ठी समासस्य निवृत्तये॥ निष्ठायां कर्मविषया षष्ठी च प्रतिषिध्यते। शेषलक्षणया षष्ठ्या समासस्तत्र नेष्यते॥' इति वदता भर्तृहरिणापि स एव पक्षोऽनुसृत इति चेन्न, 'बाधेऽदृढेऽन्यसाम्यात् किं, दृढेऽन्यदपि बाध्यताम्' इत्युक्तेः। उक्तं च योगवासिष्ठेऽपि— [17]'युक्तियुक्तमुपादेयं वचनं बालकादपि। अन्यत्तृणमिव त्याज्यमप्युक्तं पद्मयोनिना' इति॥

प्रकृतमनुसरामः। **तत्स्थैश्च गुणैरिति**। तस्मिन् द्रव्ये तिष्ठन्तीति तत्स्था ये गुणास्तद्वाचकैरित्यर्थः। तेन 'नीलो घटः, शुक्लो घटः' इत्यादौ द्रव्याभिन्ने विशेषणे वर्तमाननीलरूपादिवाचकनैल्यादिशब्दानां निरासः। रूपवर्णगन्धघोषादयस्तु शब्दाः कदापि गुणविशिष्टद्रव्यवाचका न भवन्तीति तत्स्था एव ये गुणास्तद्वाचका भवन्तीति तैः समासो भवति। एतेन "तच्छब्देन संनिधानाद् गुणा[18] एव परामृश्यन्ते। तेनायमर्थः — स्वात्मनि ये गुणा अवस्थितास्तैः सह समासः। न च स्वात्मन्यवस्थानं गुणानां संभवति, भेदनिबन्धनत्वान्मुख्याधाराधेयभावस्य। सर्वस्य च गुणस्य द्रव्याश्रयत्वात्। तस्मादभिधानव्यापारापेक्षया तत्स्थत्वमुच्यते। इह केचिद् गुणाः शब्देन द्रव्यान्निष्कृष्टा एव प्रत्याय्यन्ते, न तु द्रव्यस्योपरञ्जकत्वेन। यथा चन्दनस्य गन्ध इति सदा वैयधि-

---

[1] पा. सू. २. ३. ६५.
[2] पा. सू. २. ३. ५१.
[3] पा. सू. २. ३. ५२.
[4] पा. सू. २. ३. ६९.
[5] का. वा २. २-१०-१.
[6] का. वा. २. ३. ५२-१.
[7] 'उपायान्तर' इत्यस्यानन्तरं 'पर' इत्यधिकम् — प, ब.
[8] महाभाष्यम् २. ३. ५२.
[9] न्यायानामुपक्षेपणानौचित्यात् — ब.
[10] पा. सू. २. ३. ५१.
[11] पा. सू. २. ३. ६५.
[12] पा. सू. २. ३. ५१.
[13] पा. सू. २. २. १०.
[14] श. कौ. भाग २, २००. पृष्ठे.
[15] प्रतिपदविधानेति निषेध इत्यर्थः।
[16] वाक्यपदीयम् ३. ७. १५९-१६०.
[17] योगवासिष्ठे मुमुक्षुव्यवहारप्रकरणे सर्ग. १८. श्लो. ३.
[18] प्रदीपे 'गुण एव परामृश्यते' इत्यत्र 'गुणा एव परामृश्यन्ते' इति पाठो निर्णयसागरमुद्रितेऽधो निर्दिष्टः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

करण्यमेव गुणगुणिनोः, न तु कदाचित् चन्दनं गन्ध इति सामानाधिकरण्यं भवति। शुक्लादयस्तु गुणाः कदाचिन्निष्कृष्टरूपाः शब्दैरुच्यन्ते — पटस्य शुक्ल इति। कदाचिद् द्रव्येणैकत्वमापन्नाः — शुक्लः पट इति। तस्माद् द्विविधगुणसद्भावात् 'तत्स्थैः' इति विशेषणं रूपादिगुणपरिग्रहार्थमुपात्तमिति ब्राह्मणवर्णादय उदाहरणम्" इति निरस्तम्। ऋजुमार्गेण सिध्यतोऽर्थस्यातिकुत्सितवक्रेण साधनायोगात्। एतेन 'अथ बलाकायाः शौक्ल्यमिति समासः कस्मान्न भवति। तत्स्थं हि शौक्ल्यम्, सर्वदा वैयधिकरण्येन संबन्धात्। नैष दोषः, शौक्ल्यशब्देन शुक्लगुणोऽभिधीयते, शुक्लशब्दस्य द्रव्ये वर्तमानस्य तस्मिन्नेव प्रवृत्तिनिमित्ते भावप्रत्ययविधानात्। न चासौ तत्स्थः, अभेदाध्यवसायेन द्रव्यं प्रत्यनुरञ्जकत्वदर्शनात् शुक्लः पट इति। अर्थस्य च तत्स्थत्वमाश्रीयत इति शब्दभेदेऽप्यर्थस्याभेदान्नास्ति शुक्लस्य गुणस्य तत्स्थत्वम्' इत्यप्यज्ञानविजृम्भितमिति स्फुटमेव सुधियाम्। इदानीं 'तत्स्थैश्च गुणैः' इत्यस्यातिप्रसङ्गशङ्का कस्यचिन्मन्दबुद्धेः स्यादिति [1]संभावनयाह — **न तु[2] तद्विशेषणैरिति**। तच्छब्देन तत्स्थगुणाः परामृश्यन्ते। वस्तुतस्तु ब्राह्मणस्य शुक्ला इत्यादौ यथा ब्राह्मणसंबन्धिदन्तविशेषणे शुक्लादिना ब्राह्मणादेरसामर्थ्यात् समासो न भवति, तथा घृतादिसंबन्धिगन्धादिविशेषणेन तीव्रादिना घृतादेः समासो न भविष्यतीति व्यर्थमेव प्रतिषेधवचनम्। किं च 'तीव्रोऽश्वः', मृदुर्ब्राह्मणः' इत्यादौ [3]द्रव्यविशेषणनिष्ठत्वं तीव्रगुणादेर्दृष्टमिति प्रसक्तिरेव नास्ति समासस्येत्यपि सुवचम्। एतेन "एवं तर्हि यदा प्रकरणादिवशात् तीव्रशब्द एव विशिष्टगन्धवृत्तिस्तदा तदर्थोपजनित एव व्यतिरेके घृतस्येति षष्ठी तदा 'षष्ठी' इति समासप्रसङ्गः" इति निरस्तम्। तीव्रादिशब्दानामेव गन्धादिवृत्तित्वेऽभ्युपगम्यमाने '[न तु] तद्विशेषणैः' इति निषेधासंगतेः। यद्युच्येत — प्रकरणादिना विशेष्यं गन्धादिकमुपस्थितमिति न तीव्रादेस्तत्सापेक्षतेति, तदपि न, प्रकरणाद्युपस्थितगन्धादिनैवोभयोर्घृततीव्रयोरन्वयस्यौचित्येन परस्परान्वयासंभवात्। एतेन "ननु तीव्रं घृतं मृदु चन्दनमिति सामानाधिकरण्यदर्शनात् तत्स्थत्वाभावात् [4]समासाप्रसङ्गात् प्रतिषेधोऽनर्थकः। एवं तर्हि सौत्रस्य प्रतिषेधस्य विषयकथनमिदम् — 'न तु तद्विशेषणैः' इति। तत्स्थत्वाभावात् तैः समासः प्रतिषिध्यत एवेत्यर्थः" इति निरस्तम्। सौत्रस्यापि निषेधस्य ब्राह्मणस्य शुक्ला इत्यादिकमुदाहरणं नेत्यनुपदमेव भगवता वक्ष्यमाणत्वात्, स्वेनापि तस्य तथा व्याख्यास्यमानत्वाच्च। **किमर्थमिदमिति**। 'न तु तद्विशेषणैः' इति वचनस्याप्रयोजकत्वात् तेन व्यवहितमपि 'तत्स्थैश्च गुणैः' इति वचनमेवेदंशब्देन परामृश्यते। तदेतदभिप्रेत्योत्तरमाह — **गुणेनेति**। 'ब्राह्मणस्य शुक्लाः' इत्यादिकमेव गुणेन निषेधस्योदाहरणम्। तथा च तत्र गुणशब्दस्थाने गुणवचनशब्द एव पठितुं युक्तः। एवं च 'तत्स्थैश्च गुणैः' इति न कर्तव्यमिति मन्यमानः शङ्कते — [5]**किमर्थमिति**। परिहरति — **नैवं शक्यमिति। एतदेव खल्वपीति**। एतज्जातीयमेव खल्वपीत्यर्थः। तेन 'काकस्य नैल्यम्' पत्राणां हारित्यम्, फलस्य [6]'लौहित्यम्' इत्याद्यप्युदाहरणं भवति। एवकारव्यावर्त्यं दर्शयति — [7]**यद्धीदमिति। द्रव्यमत्रापेक्ष्यते दन्ता इति**। यत्तु वक्ष्यते "पूरणगुण' इति सूत्रे [8]"नैष दोषः, भवति वै

---

[1] समावश्चाह — ब.
[2] तुशब्दो नास्ति — य.
[3] द्रव्याभिन्नविशेषणे वर्तमानत्वमित्यर्थः।
[4] समासप्रसङ्गात् — य.
[5] भाष्ये 'किं पुनः कारणं गुणेन' इत्यत्र 'किमर्थं पुनर्गुणेन' इति चौखाम्बामुद्रिते पाठः।
[6] रौहित्यम् — य.
[7] यदीदमिति — य.
[8] पा. सू. २. २. ११.
[9] महाभाष्यम् २. २. ११.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कस्यचिदर्थात् प्रकरणाद्वापेक्ष्यं निर्ज्ञातं तदा वृत्तिः प्राप्नोति' इति, तत् प्रौढिपरम्, प्रकृतभाष्येण युक्तिसहेन विरोधात्। अत एव 'न तु तद्विशेषणैरिति वक्तव्यम्' इति वचनं व्यर्थमित्युक्तम्॥

न निर्धारणे २. २. १०.

[२, ६८१]

(रत्नप्रकाशः) प्रतिपदविधानेति। [1]'ज्ञोऽविदर्थस्य करणे' इत्यादिनवसूत्र्या [2]'कृत्वोऽर्थप्रयोगे कालेऽधिकरणे' इति सूत्रेण च विहितेत्यर्थः। [3]'प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने' इत्यादित्रिसूत्रीविहितायास्तु छन्दोविषयत्वात् तदुदाहरणेषु समासप्रसङ्गो न भवति। क्वचिद्वेदे तदनुगुणोदाहरणदर्शने तु भवतु तत्रापि निषेधः॥

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन २. २. ११.

[२, ६८१–६८४]

(उद्द्योतनम्) नाप्यदेङामिति। लौकिकप्रयोगे तैः सह समासाप्रसङ्गादित्यर्थः। यद्यपि [4]'अशब्दसंज्ञा' इत्येव तत्रार्थग्रहणसिद्धेः पुनरर्थग्रहणं तद्व्यतिरिक्तार्थग्रहणार्थमित्यर्थः। [5]तथापि न शुक्लादिमात्रग्रहणमित्याह — **सत्त्व इति।** [6]'वोतो गुणवचनात्' इति सूत्रस्थमिदं लक्षणम्। **संसर्गीति।** [7]'संसर्गिभेदकं यद्यत् सव्यापारं प्रतीयते। गुणत्वं परतन्त्रत्वात् तस्य शास्त्र उदाहृतम्'। समर्थसूत्र इदं व्याख्यातम्। संख्याया अपि गुणत्वात् समासनिषेधः स्यात्, अत आह — **गोविंशतिरिति। शतेति।** एतदन्तान्निष्कान्मत्वर्थे ठञ्। निष्कशतमस्यास्तीति नैष्कशतिकः। अत्र निष्कशतशब्दस्य षष्ठीसमासाधीनत्वाज्ज्ञापकत्वमित्यर्थः। **क्रोशेति।** [8]'योजनं गच्छति' इति सूत्रे वार्तिकम्। क्रोशशतं गच्छति **क्रौशशतिकः**, यौजनशतिकः, ठञ्। गुणप्रतिषेधस्यानित्यत्वज्ञापनाद् यत्नगौरवमित्यादिसिद्धिरित्याह — **उत्तरेति।** [9]**वक्ष्यमाण इति।** 'असामर्थ्यात्' इति भाष्य इत्यर्थः। **व्यतिरेकः** संबन्धः। **नन्विति।** गुणेन समासनिषेधोऽर्थाद् गुणिन एव, तस्यैव तत्संबन्धित्वात्, न तु गुणवद्द्रव्यसंबन्धिनो गुणवत्ता। गुणवतो गुणत्वाभावेन निषेधाप्रवृत्तेः 'ब्राह्मणस्य शुक्लाः' इत्यत्र निषेधाप्रसङ्ग इत्यर्थः। ननु [10]'न लोक' इत्यादिना [11]'कर्तृकर्मणोः' इत्यादिना विहिता षष्ठी निषिध्यते। ब्राह्मणस्य पचिकर्मत्वाभावात् कथं तेन षष्ठीनिषेधः, अत आह — **आवर्जनेति।** पचेरावर्जनवाचित्वे प्रयोगमाह — **यथेति।** नन्वानन्त-

---

[1] पा. सू. २. ३. ५१.
[2] पा. सू. २. ३. ६४.
[3] पा. सू. २. ३. ६१.
[4] पा. सू. १. १. ६८. शब्दसंज्ञेत्येव — अ, ऋ.
[5] तत्रापि — ऋ.
[6] पा. सू. ४. १. ४४.
[7] वाक्यपदीयम् ३. ५. १.
[8] पा. सू. ५. १. ७४.
[9] प्रदीपे 'यत्नगौरवादिशब्दसिद्धिः' इत्यस्यानन्तरं 'गुणे किमिति। वक्ष्यमाणोऽभिप्रायः।' इति पाठो निर्णयसागरीये वर्तते। तदनुसारोऽत्र।
[10] पा. सू. २. ३. ६९.
[11] पा. सू. २. ३. ६५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

र्यात् [1]'लटः शतृशानचौ' इति विहितयोरेव सत्संज्ञा, न तु [2]'द्विषोऽमित्रे' इति विहितस्य शतुः। तथा च सदिति कथं तस्य समासनिषेधः, अत आह — **तौ सदिति**। लादेशत्वादिरुपाधिः, [3]तद-संग्रहार्थः। अनुवृत्त्यैव तयोर्लाभे उपाधिनिरासो सर्वसंग्रहार्थं 'तौ'ग्रहणमिति भावः। नन्वत्र शतुर्लादेशत्वाभावात् कथं [4]'न लोक' इत्यादिना षष्ठीनिषेधः, अत आह — **तृन्निति**। शतृतृकारस्य तृनो नकारेण प्रत्याहारो गृह्यते, न तृन्प्रत्ययमात्रमित्यर्थः। विशेषणसमासोऽत्र [5]भवत्येवेत्याह — **विशेषणसमास इति**। तर्हि [6]षष्ठीसमासनिषेधस्य किं प्रयोजनम्, तत्रापि सामानाधिकरण्य-सत्त्वात्, अत आह — **षष्ठीसमास इति**। उभयोरपि षष्ठ्यन्तत्वेन प्रथमानिर्दिष्टत्वाद्विनिगमकाभाव इत्यर्थः। ननु 'समानाधिकरणमसमर्थवत्' इत्यसामर्थ्याद्विशेषणसमासोऽपि कथं स्यात्, अत आह — **विशेषणेति**। तथा सति विशेषणसमासशास्त्रमनर्थकं स्यादित्यर्थः। भाष्ये **माराविकस्येति**। [7]मा रावीत्याह — **माराविकः**। [8]'तदाहेति माशब्दादिभ्यः' इति ठक्। [9]शब्देन क्रिया[10]निषेधक-इत्यर्थः। [11]माराविदस्येति पाठेऽपि स एवार्थः। माराविशब्दं [12]ददातीति **माराविदः**। संज्ञेति केचित्। स्वयमुदाहरणान्तरमाह — **एवमिति**॥

[२, ६८१–६८४]

(रत्नप्रकाशः) [**गुण इति**] [13]'सत्त्वे निविशतेऽपैति' इत्यादिलक्षणलक्षितो गुणः। [14]'संसर्गि-भेदकम्' इत्यादिलक्षणलक्षितस्तु न गृह्यते, सामान्यादेरपि ग्रहणप्रसङ्गात्। नापि शुक्लादेरेव ग्रहणम्, 'कण्टकस्य तैक्ष्ण्यम्' इत्यादेरप्युदाहरणत्वात्। गोविंशतिरित्यादौ संख्यया समासो भवत्येव, [15]'शतसहस्रान्ताच्च निष्कात्' [16]'क्रोशशतयोजनशतयोरुपसंख्यानम्' [17]'खारीशतमपि न समर्थम्' इति मुनित्रयवचनाज्ज्ञापकात्। [18]'उत्तरपदार्थप्राधान्यम्' इत्यादिमुनिप्रयोगाज्ज्ञापकादस्य गुणेन निषेधस्यानित्यत्वमपि ज्ञेयम्। तेन 'चन्दनगन्धः, बुद्धिमान्द्यम्, अर्थगौरवम्' इत्यादि सिध्यति। एवं च [19]'तत्स्थैश्च गुणैः' इति नापूर्ववचनमिति स्फुटमेव। **इदं चाप्युदाहरणमिति**। मन्दबुद्धेः प्राचीनस्य कस्यचिदाशयमात्रमनेन वर्ण्यते। वस्तुतस्तु युक्त्यसहत्वाद् भगवता [20]'षष्ठी' इति सूत्रे प्रागेवेदं दूषितम्। 'ब्राह्मणस्य पक्ष्यन्' इत्यादि[21]सदुदाहरणादिदूषणव्याजेन दूषयिष्यते चानुपदम्। एतेन 'यदा प्रकरणादिवशाद्दन्ताद्यर्थ एवावसितवृत्तिः शुक्लादिशब्दस्तदा तदर्थोपजनित एव ब्राह्म-णादौ व्यतिरेक इति सामर्थ्यसद्भावात् समासप्रसङ्ग इत्यर्थः। ननु गुणस्य गुण्यपेक्षत्वाद् गुणिन

---

[1] पा. सू. ३. २. १२४.
[2] पा. सू. ३. २. १३१.
[3] 'तदसंसर्गार्थः' इत्युचितं भाति।
[4] पा. सू. २. ३. ६९.
[5] भविष्यत्येवेत्याह — ऋ.
[6] षष्ठीसमासस्य निषेधस्य — ऋ.
[7] मारावीरित्याह — ऋ.
[8] का. वा. ४. ४. १–१.
[9] 'शब्दनक्रिया' इति युक्तम्॥ पदमञ्जर्यामपि 'शब्देन क्रियाया निषेधकः' इत्येव मुद्रितं दृश्यते।
[10] निषेध इत्यर्थः — अ.
[11] माराविघस्येति — ऋ.
[12] दघातीति माराविघः — ऋ.
[13] महाभाष्यम् ४. १. ४४.
[14] वाक्यपदीयम् ३. ५. १.
[15] पा. सू. ५. २. ११९.
[16] का. वा. ५. १. ७४–१.
[17] महाभाष्यम् — हयवरट्सूत्रे।
[18] महाभाष्यम् २. २. ६.
[19] का. वा. २. २. ८—२.
[20] पा. सू. २. २. ८.
[21] सता षष्ठीसमासनिषेधोदाहरणेत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एव समासनिषेधेन भाव्यम्। न च ब्राह्मणस्तत्र शुक्लगुणाधारत्वेन विवक्षितः। नैष दोषः, गुणशब्देन केवलगुणवाचिनो गुणोपसर्जनद्रव्यवाचिनश्च व्याप्तिन्यायाश्रयेण गृह्यन्त इति गुणिनो गुणाधारसंबन्धिनश्चोपपन्नः समासप्रतिषेधः' इति निरस्तम्। प्रकरणादिवशेन शुक्लादिशब्दानां दन्तादिपर्यवसानेऽपि दन्तत्वरूपेण दन्तबोधकत्वस्याभावेन ब्राह्मणशुक्लशब्दयोः प्रकरणोपस्थितदन्तान्वयस्यैवोचितत्वात्। तदनुरोधेन प्रवृत्ताशङ्काया दृढत्वेन तत्समाधानस्य तुच्छत्वाच्च। **प्रतिषिध्यतेऽत्र षष्ठीति**। तेन 'ओदनस्य पक्ष्यन्' इत्यपि नोदाहरणमिति भावः। एतेन 'आवर्जनवाचिपच्याश्रयेण ब्राह्मणं पचेः कर्म मन्यते। यथास्य लोकपक्तिः, लोकावर्जनमित्यर्थः। ततश्च ब्राह्मणस्येति षष्ठी पाकापेक्षया कर्मणि न भवतीत्यर्थः' इति निरस्तम्। अत्यन्तासंबद्धप्रलापत्वात्। पूर्वपरवाक्ययोः परस्परव्याहतत्वाच्च। **चोरस्य द्विषन्निति**। [1]'तौ सत्' इत्यत्र तौग्रहणस्योपाधिविनिर्मुक्तशतृशानच्स्वरूपपरिग्रहार्थत्वात् [2]'द्विषोऽमित्रे' इति विहितस्यापि शतुः सत्संज्ञा भवति। **ननु चात्रापीति**। 'तृन्' इति प्रत्याहाराश्रयणात् तत्र शतुरन्तर्भावादिति भावः। [3]**प्रतिषिध्यतेऽत्र षष्ठीति**। तथा च 'कटस्य कृत्वा' इत्युदाहरणं नेति भावः। **सूर्यस्योदेतोरिति**। सूर्यस्योदयादित्यर्थः। यत्तु "'वृक्षस्योपरि' इत्यादीन्यप्युदाहरणानि[4]" इति। तन्न, पूर्वोत्तराभ्यां सत्तव्याभ्यां साहचर्येण कृदन्ताव्ययेनैव निषेधस्योचितत्वात्। 'ब्राह्मणस्योच्चैः' इत्याद्युदाहरणयोः प्रकारान्तरेणापि दूषणसंभवेनासाहचर्यस्यानुद्भावनसंभवाच्च। अत एव [5]"यत्कृतेऽरीन् व्यगृह्णीम' [6]"आदेयाः किंकृते भोगाः कुम्भकर्ण त्वया विना।' [7]"भवत्कृते खञ्जनमञ्जुलाक्षि' [8]"तत्पाणिमात्मोपरिपातुकं तु' [9]"किमु तदन्तरुभौ भिषजौ दिवः' इत्यादयो भट्टिश्रीहर्षप्रभृतिमहाकविप्रयोगा उपपन्ना भवन्ति। अत एव [10]"अनेकमन्यपदार्थे' इति सूत्रगत'सर्वपश्चात्'इति भाष्यप्रयोगोऽप्युपपन्नः। न च [11]"ततः पश्चात् स्रंस्यते ध्वंस्यते च' इति भाष्यप्रयोगात् पश्चाद्योगे पञ्चम्या अपि संभवेन तत्र पञ्चमीसमासमादाय भाष्यमुपपन्नमिति वाच्यम्, आद्यादित्वात् तत्र तसेः संभवेन [12]"षष्ठ्यतसर्थप्रत्ययेन' इति सूत्रविरोधेन तत्र पञ्चमीकल्पने मानाभावात्। कथंचित् पञ्चमी चेदपि तदन्तस्य तेन [13]"समासाप्रसक्त्या तस्यापि कल्पनीयत्वाच्च। **राज्ञः पाटलिपुत्रकस्येति**। विशेषणसमासस्तु स्यादेव। षष्ठीसमासे तु पूर्वनिपातानियमः स्यादिति स निषिध्यते। **सर्पिषः पीयमानस्येति**। उभयत्र शेषे षष्ठी॥

---

[1] पा. सू. ३. २. १२७.

[2] पा. सू. ३. २. १३१.

[3] 'भाष्ये प्रतिषिध्यते तत्र षष्ठी' इत्यत्र 'प्रतिषिध्यतेऽत्र षष्ठी' इति पाठ आश्रितः।

[4] उदाहरणमिति — व.

[5] भट्टिकाव्यम्. सर्ग. १७. श्लो. २३.

[6] भट्टिकाव्यम्. सर्ग. १६. २४.

[7] सुभाषितरत्नभाण्डागारे उदाहृतोऽयं श्लोकः। पृष्ठम् ३१२. श्लो. ३५. भवत्कृते खञ्जनमञ्जुलाक्षि शिरो मदीयं यदि याति यातु। नीतानि नाशं जनकात्मजार्थं दशाननेनापि दशाननानि॥ इति संपूर्णश्लोकः।

[8] नैषधीयचरितम् सर्ग. ३. ५.

[9] नैषधीयचरितम् सर्ग. ४. ५.

[10] पा. सू. २. २. २४.

[11] महाभाष्यम् १. १. ५७.

[12] पा. सू. २. ३. ३०.

[13] पञ्चम्यन्तस्य भयादिभिरेव समासविधानादिति भावः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कर्मणि च २. २. १४.

[२, ६८४–६८६]

(उद्द्योतनम्) कर्तृभिन्नकारके विहितकृदन्तेन कर्मणि षष्ठ्या: समासो वक्तव्य: । तत्र 'अकर्तरि' इत्यस्य प्रयोजनमाह — **यः कर्तरीति**। 'अपां स्रष्टा' इत्यादौ [1]'तृजकाभ्याम्' इति, 'भवतः शायिका' इत्यादौ [2]'कर्तरि च' इति निषेध इति विवेकः। तत्र वचनेन समाससिद्धिमाह — **करण इति**। आनर्थक्यं स्फोरयति — **कर्तरि याविति**। **सामर्थ्यादिति**। कर्तुस्तृजकाभ्यामभिहितत्वेन [3]तत्र षष्ठ्ययोगादिति भावः। भुक्तापेक्षयैव ब्राह्मणस्येति षष्ठी किं न स्यात्, अत आह — **ब्राह्मणस्येति**। **न्यायादिति**। 'भवति वै कस्यचिदर्थात् प्रकरणाद्वा विशेष्यं निर्ज्ञातं तदा वृत्तिः प्राप्नोति' इति [4]पूरणसूत्रभाष्योक्तन्यायादित्यर्थः। **अतिप्रसङ्ग इति**। 'ब्राह्मणस्य गतः' इत्यत्र [5]कर्तृषष्ठ्या अपि समासप्रतिषेधोऽबुद्धबोधनाय वक्तव्यः स्यादित्यर्थः। उदाहरणमाह — **ततश्चेति**॥

[२, ६८४–६८६]

(रत्नप्रकाशः) **अकर्तरि कृतेति**। कर्त्रर्थतृजकाभ्यां समासस्यानिष्टत्वादेवमुक्तम्। अत एवाह — **तृजकाभ्यां [6]चानर्थक इति**। तद्योगे कर्मण्येव षष्ठीसंभवादिति भावः। एतेन "यः कर्तरि विधीयते यथा कुम्भकार इति, तत्र परत्वादुपपदसमासेन भाव्यम्। क्वचित्तु [7]'तृजकाभ्यां कर्तरि' [8]'कर्तरि च' इति प्रतिषेधेनेत्यभिप्रायेण कर्तरीत्युक्तम्" इति निरस्तम्। कुम्भकार इत्यत्र द्वितीयान्त उपपदेऽण्प्रत्ययस्य विहितत्वेन षष्ठीसमासाप्रसङ्गात्। [9]'तृजकाभ्यां कर्तरि' इति सूत्रस्यात्रैवानर्थक्यापादनात्। [10]'कर्तरि च' इति सूत्रस्य भिन्नविषयत्वेन तदुपन्यासानर्थक्याच्च। **ब्राह्मणस्य गत इति**। ब्राह्मणस्य पुत्रो गत इत्यर्थः। एतेन 'ब्राह्मणस्य शुक्लाः' इत्यादेर्गुणनिषेधोदाहरणत्वमभ्युपगच्छन्तो भ्रान्ता इति स्पष्टमेव सुधियाम्। **पूजायां च प्रतिषेधानर्थक्यमिति**। [11]'क्तेन च पूजायाम्' इति सूत्रं व्यर्थं स्यात्। तत्र [12]कर्मक्तान्तेनेत्येव निषेधसंभवादिति भावः। **इत्यर्थेऽयं च इति**। अव्ययानामनेकार्थत्वसंभवादिति भावः॥

---

[1] पा. सू. २. २. १५.
[2] पा. सू. २. २. १६.
[3] कर्तरीत्यर्थः।
[4] पा. सू. २. २. ११.
[5] 'कर्तृक्तान्तेनापि षष्ठ्याः समासप्रतिषेधः' इति युक्तं भाति, भाष्यप्रदीपोद्द्योतानां परामर्शात्।
[6] वानर्थक इति — ब.
[7] पा. सू. २. २. १५.
[8] पा. सू. २. २. १६.
[9] पा. सू. २. २. १५.
[10] पा. सू. २. २. १६.
[11] पा. सू. २. २. १२.
[12] कर्मक्तान्तेनैव निषेध — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नित्यं क्रीडाजीविकयोः २. २. १७.

[२, ६८६]

(उद्द्योतनम्) नन्वनन्तरस्य[1] प्रतिषेधस्यैव संवन्धो युक्त इति संशयायोगः, अत आह — **प्रतिषेध इति।** 'विधिर्हि' इत्ययुक्तम्, तत्र वाकाराश्रवणात्, अत आह — **महेति।** प्रतिषेधस्य नित्यग्रहणाभावेऽपि नित्यत्वमाह — **विकल्पेनैवेति** ॥

[२, ६८६]

(रत्नप्रकाशः) महाविभाषया विधिवन्निषेधोऽपि संबद्ध इति मन्यमानः पृच्छति — **किमिहेति।** एतेन 'प्रतिषेधे सिद्धेऽस्यारम्भाद्विधिरपि संभवति, अनन्तरत्वाच्च प्रतिषेधोऽपीति प्रश्नः' इति निरस्तम्। पूर्वोत्तरवाक्ययोः परस्परव्याहतत्वात्। निषेधो महाविभाषया न संबद्ध एवेत्याशयेनोत्तरमाह — **विधिरित्याहेति।** **नित्यः प्रतिषेध इति।** अन्यथा निषेधोऽनर्थकः स्यात्, विधिविकल्पेनैव पाक्षिकसमासाभावस्य सिद्धत्वादिति भावः ॥

कुगतिप्रादयः २. २. १८.

[२, ६८६–६९०]

(उद्द्योतनम्) ननु गतिग्रहणस्य प्रादिविशेषणत्वे कर्मप्रवचनीयानां समासाप्रसङ्गात् प्रतिषेधो व्यर्थः, अत आह — **प्रादिग्रहणस्येति।** प्रत्यादयः [2]'लक्षणेत्थंभूताख्यान'सूत्रोक्ताः। **स्वत्योरिति।** [3]'सुः पूजायाम्' [4]'अतिरतिक्रमणे च' इति पूजायां कर्मप्रवचनीययोरेव 'सुराजा, अतिराजा' इति समासदर्शनात्। अन्यथा [5]'न पूजनात्' इति समासान्तनिषेधानर्थक्यं स्यादित्यर्थः। असामर्थ्यादसमासशङ्कां निराह — **वृक्षेति।** **अवच्छेदकः** द्योतकः। **द्वितीया[पि] न स्यादिति।** [6]'कर्मप्रवचनीययुक्ते द्वितीया' इत्यत्र युक्तग्रहणादिति भावः। [7]**व्यवेतानां** क्रियातो दूरेऽवस्थितानां, प्रादीनां संनिहितपदान्तरेण समासो न भवतीत्यन्वयः। असामर्थ्यं निराह — **याहीत्यस्यामिति।** **दधीति।** [8]सेकद्वारकस्तयोः संवन्धः। समासेऽनिष्टमाह — **तथा चेति।** 'आ मन्द्रैः' इत्यस्यैकपद्येऽव्ययपूर्वपदप्रकृतिस्वर एक एव स्यात्। मन्द्रैरित्यस्य पृथक्पदत्वे प्रातिपदिकस्वरेणान्तोदात्तत्वम्, तदेवेष्यत इत्यर्थः। 'आ मन्द्रैः' इत्यत्र वार्तिकेन समासः प्राप्नोति, अत आह — **आ मन्द्रैरिति।** **सामर्थ्यमिति।** साक्षात् संवन्धाभावादित्यर्थः। **अगत्यर्थमिति।** गतिग्रहणेनैव गतिसंज्ञकानां समासस्य सिद्धत्वादित्यर्थः। प्रादीनां कथं क्तान्तार्थवृत्तित्वम्, अत आह — वृत्ति-

---

[1] 'अनन्तरस्य' इत्यादि 'विकल्पेनैवेति' इत्यन्तो ग्रन्थो नास्ति — अ.

[2] पा. सू. १. ४. ९०.

[3] पा. सू. १. ४. ९४.

[4] पा. सू. १. ४. ९५.

[5] पा. सू. ५. ४. ६९.

[6] पा. सू. २. ३. ८.

[7] व्यपेतानां — अ, ऋ.

[8] सेकद्वारा तयोः — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विषय इति। **उपाधीनां** 'पूजायाम्' इत्यादीनाम् । **प्रयोगेति।** यस्मिन्नर्थे समासो दृश्यते तदुपलक्षणार्थत्वादित्यर्थः । **अतिसिक्तमिति** । अपेक्षितसेकातिक्रमणमतिसिक्तमुच्यते । कर्मप्रवचनीयत्वात् षत्वाभावः। ननु सुकर इत्यादौ पूजाभावेऽपि प्रादिसमासो दृश्यत इत्युपाधेरुपलक्षणत्वं कुतो नोक्तम्, अत आह — **सुकर इति।** [1]"ईषद्दुःसुषु' इति खल्विधौ सप्तमीनिर्देशात् तत्र समासोऽन्यथापि सिध्यतीत्यर्थः। अनिन्दायामपि 'दुष्कृतम्' इत्यादौ समासो दृश्यते, स कथम्, अत आह — **प्रादिग्रहणेनेति** । अगत्यर्थं प्रादिग्रहणम्। आसमन्ताद्वद्धमावद्धमित्यादावीषदर्थाभावात् कथं समासः, अत आह — **क्रियायोग इति।** प्रादिसमासस्यायं विषयनिर्देश इत्युक्तत्वादित्यर्थः। **आ मन्द्रैरित्यत्रेति।** गतित्वाभावान्न गतिसमासः, ईषदर्थाभावाच्च न प्रादिसमास इत्यर्थः। ननु 'दुर्निन्दायां कुश्च' इत्येव कुतो न कृतम्, अत आह — **प्रशस्तेऽपीति।** 'कालवणम्' इतीषदर्थे कथं तर्हि कोः समासः, अत आह — **पूर्ववदिति** । पृथिवीवाचिकुशब्दनिवृत्तये 'पापार्थे' इति विवक्षितं चेत् कथमीषदर्थे 'कालवणम्' इति समासः, अत आह — **ईषदर्थ इति।** उत्तरपदस्य समासावयवे रूढत्वादिति भावः। पौनरुक्त्यं निराह — **सह सुपेत्यत्रेति।** पौनरुक्त्यमेव नास्तीत्याह — **अथवेति** । 'उदात्तवता' इत्येव सिद्धे 'गतिमता' इति किमर्थम्, अत आह — [2]**अत्रेति।** तिङसमासस्य प्रयोजनमाह — **तत्रेति।** नन्वत्राव्ययपूर्वपदप्रकृतिस्वरेण भाव्यम्, अत आह — **तत्पुरुष इति।** नन्वनोरनुदात्त एव प्रकृतिस्वरोऽस्तु, अत आह — **तत्र चेति।** [3]"कर्षात्वतः' इत्यत उदात्त इति [4]"तित् स्वरितम्' इत्यतः स्वरितमिति च [5]"बहुव्रीहौ' इत्यादावनुवर्तत इत्यर्थः। [6]तर्हि [7]वेरुदात्तत्वात् तस्य प्रकृतिस्वरः स्यात्, अत आह — **विशब्दस्येति। प्रत्ययस्वरेणेति।** 'इ अन्ति' इति स्थिते "इणो यण्' इति यणा धात्विकारनिवृत्तौ प्रत्ययाद्युदात्तत्वमेव निघातनिषेधे संभवतीत्यर्थः ॥

[२, ६८६–६९०]

(रत्नप्रकाशः) प्रादिग्रहणस्यागत्यर्थत्वात् कर्मप्रवचनीयानामपि समासप्रसङ्गादाह — **कर्मप्रवचनीयप्रतिषेध इति।** **वृक्षं प्रति विद्योतत इति।** [8]"लक्षणेत्थंभूत' इत्यादिना प्रतेः कर्मप्रवचनीयता। **साधुर्देवदत्तो मातरं प्रतीति।** 'अप्रतेः' इत्युक्तेः [9][10]"साधुनिपुणाभ्याम्' इति सप्तमी न भवति। [11]**व्यवेतानां प्रतिषेध इति।** 'सह' इति योगविभागेन तिङन्तेन समासो दर्शितः, तस्यायं प्रतिषेधः। [12]"व्यवहिताश्च' इति वचनसामर्थ्याद् व्यवहितप्रयोगेऽप्याङो याहीत्यनेन समासे [13]"तन्मध्यपतितस्तद्ग्रहणेन गृह्यते' इति न्यायेन मध्यगानामपि समासग्रहणेन ग्रहणात् प्रातिपदिकत्वे

---

[1] पा. सू. ३. ३. १२६.
[2] तत्रेति — अ.
[3] पा. सू. ६. १. १५९.
[4] पा. सू. ६. १. १८५.
[5] पा. सू. ६. २. १.
[6] 'तर्हि' इत्यादि 'संभवतीत्यर्थः' इत्यन्तं नास्ति — अ.
[7] वेरनुदात्तत्वात् — ऋ.
[8] पा. सू. १. ४. ९०.
[9] पा. सू. ६. ४. ८१.
[10] पा. सू. २. ३. ४३.
[11] 'व्यवेतानां च प्रतिषेधः' इति भाष्ये चकाररहितः पाठो निर्णयसागरमुद्रिते दृश्यते। सोऽत्रानुसृतः ॥ व्यवहितानां प्रतिषेध इति — प, ब.
[12] पा. सू. १. ४. ८२.
[13] परिभाषा ९०.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुपो लुगैकस्वर्यं च स्यादिति भावः। एतेन "याहीत्यस्यां क्रियायाम् [१]'आ मन्द्रैः' इत्युभयोरुपनिपातात् तद्द्वारको दध्योदनादाविव परस्परसंवन्धोऽस्तीति समासप्रसङ्गः। तथा चैकस्वर्यं स्यादिति [तत]प्रतिषेध उच्यते' इति निरस्तम्। औङो मन्द्रशब्दस्य च याहीत्यनेनान्वितयोः परस्परान्वयस्यैवाभावेन समासस्यैवाप्रसक्तत्वेन तत्र निषेधानर्थक्यात्। दध्योदनादौ वचनवलेनान्तर्नीतोपसेकक्रियाद्वारकसंबन्धाश्रयणेऽप्यत्र विशेषवचनाभावेन साक्षाच्छब्दान्तरोपात्तक्रियान्वयिनोरन्तर्भावितक्रियाद्वारकान्वयकल्पनासंभवेन च दृष्टान्तदार्ष्टान्तिकयोरत्यन्तवैषम्याच्च। तदेवं सूत्रकारमते दुष्टे सति स्वमतमाह वार्तिककृत्—**सिद्धं त्विति**। वार्तिककारमते [२]'सह सुपा' इत्यधिकारसूत्रमेव। 'उदात्तवता गतिमता च' इति वक्ष्यमाणवार्तिकस्य तु [३]'आ मन्द्रैरिन्द्र हरिभिर्याहि' इत्यत्र प्रसक्तिरेव नास्ति, याहीत्यस्य [४]'तिङ्ङतिङः' इति निघाते सत्युदात्तवत्त्वाभावात्। **प्रादयः क्तार्थ इति**। क्तार्थे वर्तमानाः प्रादयः समस्यन्त इत्यर्थः। अगत्यर्थमिदम्। 'वृक्षं प्रति' इत्यादौ प्रत्यादेः क्तार्थवृत्तित्वाभावादप्रसङ्गः। **एतदेवेति**। कात्ययनाभिमतमेवेत्यर्थः। **विस्तरतरकेणेति**। तरवन्तादत्यन्तस्वार्थे कन्। **सुराजेति**। [५]'न पूजनात्' इति समासान्तनिषेधः। 'सुकरः' इत्यादौ तूपपदसमासः। **दुर्निन्दायामिति**। कर्मणोऽपि निन्द्यत्वाद् दुष्कृतमिति भवति। **आङीषदर्थ इति**। क्रियायोगे तु गतित्वात् समासः। **कुः पापार्थ इति**। प्रशस्तेऽपि वस्तुनि द्वेषान्निन्दा भवति। पापं तु वस्तुस्थित्या गर्हितमिति तयोर्भेदः। अर्थनिर्देशस्योदाहरणदिक्प्रदर्शनमात्रत्वादीषदर्थेऽपि कुः समस्यते। तेन [६]'ईषदर्थे' इति कादेशो काजलमित्यादि सिद्धम्। **अव्ययं प्रवृद्धादिभिरिति**। आदिशब्दः प्रकारे। शिष्टप्रयोगविषयत्वं प्रकारः। यत्तु "[७]'सह सुपा' इत्यत्र योगविभागेन साधितोऽयमर्थः स्मरणायात्रोक्तः। अथवात्र वार्तिककृता दर्शित एवार्थस्तत्र सूत्रेण साधितः" इति। तत्तुच्छम्। योगविभागसाधितस्य तत्पुरुषसंज्ञाशून्यत्वेनात्र वार्तिकसाधितस्य तत्संज्ञकत्वेनोभयोरेकविषयत्वासंभवात्। "प्राक्कडारात् समासः' इति सूत्र एव तत्र योगविभागसाध्यार्थस्य दूषितत्वाच्च। **इवेन विभक्त्यलोप इति**। एतेनेवशब्दस्य काव्येषु दृश्यमानो व्यस्तप्रयोगोऽसाधुरिति स्पष्टमेव सुधियाम्। अस्य वाक्यस्य नित्याधिकारस्थत्वात्। **उदात्तवतेति**। [८]'तिङ्ङतिङः' इत्यस्य यत्र निषेवस्तत्रानेन समासो ज्ञेयः। एवं च 'प्रभवति' इत्यादावनेन समासो न भवतीति भिन्नमेव पदं छेत्तव्यम्। **गतिमतेति**। गतिर्गती गतयो वा यस्य स गतिमान् तेनेत्यर्थः। तथा च बहुपदोऽयं तत्पुरुषः। अस्य [१०]'तिङ्ङतिङः' इति यत्र [११]निघातः स विषयः। तथैव चोदाहरति —**अनुव्यचलदिति**। त्रिपदोऽयं तत्पुरुषः। स्वरादेश्चादेश्चाकृतिगणत्वादस्य तिङन्तसमासस्याव्ययत्वात् सोर्लुक्। न च हल्ङ्यादिलोपेन सिद्धेरव्ययत्वं न कल्प्यमिति वाच्यम्, 'यत् परियन्ति' इत्यादौ तदसंभवात्। न च [१२]'स्वमोर्नपुंसकात्' इति लुक् तत्र भविष्यतीति वाच्यम्, तस्य नपुंसकत्वे मानाभावात्। कथंचित् तिङन्तसमासस्यास्य नपुंसकत्वे कल्प्यमाने 'यत् प्रकुरुते' इत्यादौ [१३]'ह्रस्वो नपुंसके' इति ह्रस्वापत्तेश्च। [१४]**अनुव्याकरोदिति**। चतुष्पदोऽयम्। **यत् परि-**

---

[१] ऋ. सं. ३. ४५. १.
[२] पा. सू. २. १. ४.
[३] ऋ. सं. ३. ४५. १.
[४] पा. सू. ८. १. २८.
[५] पा. सू. ५. ४. ६९.
[६] पा. सू. ६. ३. १०५.
[७] पा. सू. २. १. ४.
[८] पा. सू. २. १. ३.
[९] पा. सू. ८. १. २८.
[१०] पा. सू. ८. १. २८.
[११] निषेधः स विषयः — प, ब.
[१२] पा. सू. ७. १. २३.
[१३] पा. सू. १. २. ४७.
[१४] भाष्ये 'अनुव्याकरोति' इत्यत्र 'अनुव्याकरोत्' इति चौखाम्बामुद्रिते पाठः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यन्तीति । इदमुदात्तवतेत्यस्योदाहरणम् । यच्छब्दः [1]समासानन्तर्गतः । ननु परियन्तीति तिङन्तेनोदात्तवता यच्छब्दस्यापि समासः स्यादिति चेन्न, यच्छब्दस्य तेन सहैकार्थीभावाभावात्, तदादिनियमेन तस्य तिङन्तत्वाभावाच्च । एतेनानुव्यचलदित्यादौ 'अचलत्' इत्यादिना व्यादेः समासे सति 'व्यचलत्' इत्यादिनान्वादेः पुनः समास इति वदन्तो निरस्ताः । उक्तयुक्तेः ॥

उपपदमतिङ् २. २. १९.

[२, ६९०–६९६]

(उद्द्योतनम्) तिङन्त एव भवतीति । कालसाधनादिविशिष्टस्तिङर्थो[2]ऽनन्वाख्येय इत्यर्थः । 'तदर्थ' इत्यस्य तिङर्थार्थेत्यर्थमाह — **तच्छब्देनेति** । **अर्थशब्देति** । अन्यथा तत् तिङन्तमर्थो यस्येति स्यात् । तच्चायुक्तम्, तिङन्तशब्दार्थकस्य [3]तिङन्तशब्दस्योपपदत्वाभावेन समासाप्रसङ्गेन निषेधानुपयोगात्, तिङन्तशब्दः [4]कार इति समासाभावप्रसङ्गाच्चेति भावः । **पुरुषः** प्रत्ययवत्वादिः, **उपग्रहः** कर्त्रभिप्रायादिरिति भेदः । क्रियामात्रविवक्षायां हेतुमाह — **अनेकार्थेति** । लक्षणायां हेतुः — **वचनसामर्थ्यादिति** । संपूर्णतिङर्थविवक्षायां तिङ एव तादृशत्वात् तस्य च 'सुप् सुपा' इत्येव [5]व्यावृत्तेस्तदर्थप्रतिषेधवैयर्थ्यं स्यादित्यर्थः । [6]तत्र समासप्रसङ्गमाह — **गतशब्द इति** । **तत्र** गतशब्द उपपदे । **तुमुनिति** । [7]'तुमुन् ण्वुलौ क्रियायां क्रियार्थायाम्' इति सप्तमीनिर्देशादुपपदत्वमित्यर्थः । गतशब्दस्य क्रियावाचित्वाभावात् कथं ण्वुल्, कथं वा निषेधः, अत आह — [8]**'तत्र प्रकृतीति'** । प्रकृतिवाच्य[9]क्रियाश्रयः प्रतिषेध इति यदुक्तं तत्राह — **सुबन्तेति** । तर्हि क्रियाविशिष्टद्रव्यवाचीति वक्तव्यम्, न तु द्रव्यवाचीति, अत आह — **प्रधानेनेति** । क्रियावाचित्वाभावेन 'अतिङ' इति निषेधाप्रवृत्तेरुपपदत्वाश्रयः समासः किं न स्यात्, अत आह — **अत एवेति** । द्रव्यवाचित्वादेव । **तस्येति** । [10]'क्रियायाम्' इति क्रियावाचिन एवोपपदत्वात् । ननु गतशब्दस्यानुपपदत्वे 'कारको गतः' इति [11]'क्रियार्थायां क्रियायाम्' इति ण्वुल् कथं स्यात्, अत आह — **धातोश्चेति** । तर्हि धातुनैव समासनिषेधायातिङ्ग्रहणमस्तु, अत आह — **धात्वर्थस्येति** । गतशब्दापेक्षयास्य वैलक्षण्यमाह — **गमनेमिति** । तिङन्तधातुना यथा क्रिया प्रतिपाद्यते तथा क्रियाप्रतिपादकत्वं भावप्रत्ययान्तस्य नास्तीति गतिशब्दस्यापि गतशब्दवदेव [12]समासाप्रसङ्ग इत्याह — **धातुरत्रेति** । वत्यर्थमाह — **यथेति** । **साधनसंबन्धः** शक्तिरूपकारकसंबन्धः । **योगेति** । 'उपपदम्' इत्येको योगः, 'अतिङ' इत्यपर उभयोः शेषः । ननूपपदविशेषणेन 'अतिङ' इत्यनेन कथं सुपेत्यस्य निवृत्तिः । [13]तदनुवृत्तौ वा सुबुत्पत्तेः प्राक् कथं समाससिद्धिः, अत आह — **अतिङ्ग्रहणेन चेति** । प्रथमान्तं त्वनुवर्तनीयमेवेत्याह — **सुब्ग्रहणं त्विति** । **पदकार्येति** । चर्मकार

---

[1] समासान्तर्गतः — प.

[2] तिङर्थो नान्वाख्येय इत्यर्थः — ऋ.

[3] तिङन्तस्योपपदत्वाभावेन — अ.

[4] कारक इति — अ.

[5] व्यावृत्तेस्तदर्थं प्रतिषेध — ऋ.

[6] अत्र — ऋ.

[7] पा. सू. ३. ३. १०.

[8] प्रदीपे 'अत्र च प्रकृतिवाच्य' इत्यत्र 'तत्र प्रकृतिवाच्य' इत्यन्नंभट्टपाठ इति भाति ।

[9] क्रियाश्रयप्रतिषेध इति — अ.

[10] पा. सू. ३. ३. १०.

[11] पा. सू. ३. ३. १०.

[12] समासप्रसङ्ग इत्याह — अ.

[13] 'तन्निवृत्तौ वा' इत्युचितं भाति ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादौ नलोपाद्यर्थमित्यर्थः। एकनिवृत्तौ भाष्यविरोधं निराह — **भाष्य इति**। नन्वनयोः सूत्रयोर्गत्युपपदसमास एवोक्तो न कारकसमास इति सुबुत्पत्तेः प्राक् कथं तत्समाससिद्धिः, अत आह **कारकाणां त्विति**। 'कृद्ग्रहणात् प्राक् सुबुत्पत्तेः'[1] इत्येतदेवोपपादयति — **तिङन्तेनेति**। **कृदन्तेनेति**। कर्तृकरणयोः क्रियायामेव संभवाद् द्रव्यवाचिना सह समासाप्रसङ्गादिति भावः। परिभाषावश्यकीत्याह — **अस्याश्चेति**। 'अभ्रविलिप्ता' इत्यादौ सुबन्तस्य 'विना समासे प्रातिपदिकं पूर्वं लिङ्गमभिदधाति, पश्चात् संख्यामिति संख्याभिधायिसुबपेक्षया स्त्रीप्रत्ययस्यान्तरङ्गत्वात् पूर्वं टाप्, पश्चात् सुप्युत्पन्ने विलिप्ताशब्दः संपद्यते। तत्र [2]'क्तादल्पाख्यायाम्' अकारान्तादिति ङीष् न प्राप्नोति। [3]पूर्वं [4]समासे त्वकारान्तत्वात् ङीष् सिध्यतीत्यादिप्रयोजनानि वक्ष्यन्ते, तान्यतिङ्ग्रहणेनैव सिध्यन्तीति भावः। असुबन्तेन समासेऽनिष्टं शङ्कते — **यदीति**। **उत्तरपदव्यपदेशश्च न** प्राप्नोतीत्यनुषङ्गः। किं ततः, अत आह — **ततश्चेति**। **तन्निबन्धनः**, उत्तरपदत्वनिबन्धनः [5]'गतिकारकोपपदात् कृत्' इति विहितः। 'धनक्रीता' इत्यादिसिद्धयर्थमाह — **यद्वेति**। **धनक्रीतेति**। अत्र सुबन्तस्य समासेऽन्तरङ्गत्वात् पूर्वं टाप्, पश्चात् सुपि [6]'क्रीतात् करणपूर्वात्' अकारान्तादिति विहितङीषभावाट्टाबन्तत्वसिद्धेः। यदा सुबुत्पत्तेः प्राक् समासस्तदा 'वस्त्रक्रीती' इत्यादि भवति। ननु सुबुत्पत्तेः प्राक् समासस्थले उत्तरपदनिबन्धनः स्वरो न स्यात्, अत आह — **उत्तरपदेति**। समासोत्तरावयवः सुबन्तो वोत्तरपदशब्दवाच्य इत्यर्थः। **तत्रापि** [7]स्वरेऽपि, प्राक्समासपक्षेऽपि [8]वा। [9]परिभाषोपस्थानमाह — **सुबित्यस्येति**। भाष्ये **यद्येवम्** असुबन्तेनापि समर्थेन समासे। समासेऽनिष्टमाह — **ततश्चेति**। अव्ययपूर्वपदप्रकृतिस्वरत्वमित्यर्थः। **शाकलेति**। 'परि अभवत्' इत्यत्र [10]'सिन्नित्यसमासयोः' इत्यनेन प्रतिषेधप्रसङ्ग इत्यर्थः। 'पूर्वम्' इत्यस्य सामर्थ्योपपादकत्वमाह — **तत इति**। **तयोः** धातूपसर्गयोः। तर्हि प्रत्ययान्तस्य धातोरुपसर्गेण समासोऽस्तु, अत आह — **तत्रेति**। सर्वतिङन्तसमासप्रतिषेधप्रसक्तावाह — **यत्र त्विति**। तत्र वचनात् तिङन्तसमास इत्यर्थः। **अनिष्पन्नस्येति**। अनिष्पन्नस्य साधनाकाङ्क्षा, निष्पन्नस्य तु विशेषाकाङ्क्षेत्यर्थः। ननु पूर्वमुपसर्गसंबन्धानङ्गीकारेऽनुपसर्गस्याकर्मकस्योपसर्गान्वयेन सकर्मकत्वं न स्यात्, अत आह — **अनुभूयत इत्यादिना**। रूपस्वरयोर्भेदाभावात् कथं विरोधरूपो विप्रतिषेधः, अत आह — **नित्यत्वेति**। ननु कर्मण्युपपदेऽण् विधीयते, कर्म च द्वितीयान्तमिति पूर्वं द्वितीययोत्पत्तव्यम्, तदनन्तरमण्युत्पन्ने [11]'कर्तृकर्मणोः' इति षष्ठी न प्रवर्तते, द्वितीययावरोधात्। तथा च कथं विप्रतिषेधः, अत आह — **पञ्चक इति**। **तत्रैव** कर्मवाचिनि प्रातिपदिक एव। ननु 'तत्रैव' इति कथम्, द्वितीयोत्पत्त्यनन्तरमप्यणुत्पत्तिसंभवात्, अत आह — **अपवादेति**। अपवादविषयत्वमेव [12]कथम्, अत आह — **कृते चेति**। **ततश्चेति**। षष्ठीसमास उत्तरपदे [13]विभक्त्युत्पत्त्यपेक्षो बहिरङ्गः, तदनपेक्ष उपपदसमासोऽन्तरङ्ग इत्यर्थः। दोषमेवाह — **अन्तोदात्तादिति**। अनित्यसमासे यदुत्तरपदमन्तोदात्तं तस्मात् तृतीयादिविभक्तिरन्यतरस्यामुदात्ता। परमवाचा। षष्ठी-

---

[1] विशब्देन समास इत्यर्थः।
[2] पा. सू. ४. १. ५१.
[3] सुबुत्पत्तेष्टाबुत्पत्तेश्च पूर्वमित्यर्थः।
[4] समासेऽप्यकारान्तत्वात् — ऋ.
[5] पा. सू. ६. २. १३९.
[6] पा. सू. ४. १. ५०.
[7] 'स्वरेऽपि' इति नास्ति — अ.
[8] 'वा' इति नास्ति — अ.
[9] परिभाषोपस्थापनमाह — अ.
[10] का. वा. ६. १. १२७–१.
[11] पा. सू. २. ३. ६५.
[12] कथमित्याह — अ.
[13] विभक्त्युत्पत्त्यपेक्षया बहिरङ्गः — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]समासस्यानित्यत्वात् तेन ग्रहणप्रसङ्गः। यद्यपि [2]'सावेकाचः' इत्यत एकाच इत्यनुवर्तनात् [3]कारशब्दस्यानेकाच्त्वादनित्यसमासेऽपि [4]स स्वरो न भवति, तथापि 'वृत्रहा, कर्मकृत्' इत्यादौ दोष एवेति भावः। षष्ठीसमासेऽपि[5] विग्रहाभावमाह — **अस्यापीति**। नन्वनित्यसमास इत्यत्र कथं नित्याधिकारलाभः, अत आह — **नित्यशब्दस्येति**। **दोषवत्त्वात्** [6]अव्ययीभावस्याप्यनित्यसमासत्वप्रसङ्गरूपो दोषः। एतावता निष्पन्नमर्थमाह — **तदेवमिति**॥

[२, ६९०–६९६]

(रत्नप्रकाशः) पदप्रयोजनकथनवार्तिकमवतारयति — **अतिङिति किमर्थमित्यादिना**। वार्तिकं पठति — **उपपदमिति**। **तदर्थप्रतिषेध इति**। तच्छब्दस्तिङन्तपरः। तस्यार्थः कर्ता कर्म भावश्च। तदर्थशब्दस्य मत्वर्थलक्षणया तद्वाचकगतादिशब्दलाभः। तच्छब्देन प्रकृतस्तिङ परामृष्ट इत्यविद्वान् पृच्छति — **कस्येति**। उत्तरमाह — **तिङर्थस्येति**। तिङन्तार्थाः क्रियाकर्तृकर्मकालसंख्याभेदेन बहव इति को वा तत्र विवक्षित इति संदेहात् पृच्छति — **कः पुनस्तिङर्थ इति**। उत्तरमाह — **क्रियेति**। [7]'लः कर्मणि च भावे चाकर्मकेभ्यः' इति सूत्रे निर्दशिताः कर्मकर्तृभावा भाववाचकक्रियाशब्देन लक्ष्यन्ते। एतदभिप्रायेणैव भूवादिसूत्रे [8]'पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति' इत्यत्र 'क्रियाः' इति प्रयुक्तम्। प्रतिपादितं चास्माभिस्तत् तत्रैव। एतेन 'अनेकार्थसंभवेऽपि साध्यत्वात् क्रिया प्रधानम्। प्रधानं चार्थस्तिङग्रहणेन वचनसामर्थ्याल्लक्ष्यते इति भावः' इति निरस्तम्। क्रियायाः प्राधान्ये मानाभावात्। साध्यत्वेन हेतुनाप्राधान्यस्यैव[9] साधयितुं युक्तत्वात्, 'कारको गतः, कारकस्य गतिः' इति [10]वक्ष्यमाणोदाहरणविरोधाच्च। प्रतिपत्तिगौरवापेक्षया शब्दगौरवं समीचीनमिति मत्वाह वार्तिककारः — **क्रियाप्रतिषेधो वेति**। तिङन्तमेव तिङन्तार्थार्थकं न त्वन्यत्किंचित्, सुप् सुपेत्यनुवर्तनाच्च तिङन्तस्य तिङन्तेन वा समासाप्रसङ्गात् प्रत्युदाहरणाभावं मत्वा कश्चित् पृच्छति — **अथेति**। **अक्रियेतीति**। अतिङित्यस्य तत्समानार्थकस्याक्रियेत्यस्य वेत्यर्थः। **कारको गत इति**। [11]'भविष्यति गम्यादयः' इत्यतो भविष्यतीति वर्तमाने [12]'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति ण्वुल्। तत्र गतशब्दः क्रियाविशिष्टद्रव्यवाचित्वात् क्रियावाचकमुपपदमिति तस्य कारकशब्देन समासः प्राप्त इति भावः। [13]**नैतत्क्रियावाचीति**। तिङन्तमेव विशेष्याकाङ्क्षाविरहार्थप्रतिपादकत्वेन क्रियावाचि। क्रिया चासत्त्वभूता विशेष्याकाङ्क्षाशून्यमेव वस्तूच्यत इति भावः। **द्रव्यवाचीति**। सत्त्ववाचीत्यर्थः। अस्ति ह्यस्य गतशब्दस्यास्तीति क्रियाकाङ्क्षा। **एवं तर्हि सिद्धे सतीति**। व्यावर्त्याभावे सतीत्यर्थः। नन्वतिङशब्दस्याक्रियाशब्दस्य च कथंचिद् [14]गतयातगतिव्रज्यादिशब्दपरत्वस्य तैश्च कारकादिशब्दानां

---

[1] समासस्यानित्यत्वेन ग्रहण — अ.

[2] पा. सू. ६. १. १६८.

[3] कारकशब्दस्यानेकाच्त्वात् — अ.

[4] 'सः' इति नास्ति — अ.

[5] अपिशब्दो नास्ति — ऋ.

[6] अव्ययीभावस्यापि नित्य — ऋ.

[7] पा. सू. ३. ४. ६९.

[8] महाभाष्यम् १. ३. १.

[9] अप्राधान्यस्यैवेति छेदः।

[10] वक्ष्यमाणोदाहरणाविरोधाच्च — ब.

[11] पा. सू. ३. ३. ३.

[12] पा. सू. ३. ३. १०.

[13] नैतत् तत्क्रियावाचीति — ब.

[14] भाष्ये 'कारको गतः, हारको गतः' इत्यत्र 'कारको गतः, कारको यातः' इति निर्णयसागरमुद्रिते पाठो दृश्यते। सोऽभिसंहितोऽत्र।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समासप्रसङ्गस्य च संभवेन कथं व्यावर्त्याभाव इति चेत्, शृणु, 'कारको गतः' इत्यत्र [1]"समानाधिकरणमसमर्थम्' इत्यसामर्थ्यात् समासाभावः। विशेषणसमासस्तु बाहुलकान्न भवति। वस्तुतस्तु [2]"तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इत्यत्र क्रियर्थामित्यनेनासत्त्ववाचिपरेण तिङन्तमेव परामृश्यत इति 'कारको गतः' इत्यत्र [3]"ण्वुल्तृचौ' इति ण्वुल्, न तु [4]"तुमुन्ण्वुलौ' इत्यादिनेति गतादिशब्दानामुपपदत्वाभावादेव समासाप्रसङ्गः। एतत्सूत्रगतज्ञापकोपपादनपरभाष्यस्वरसादेव तत्र क्रियाशब्दस्यासत्त्ववाचितिङन्तपरत्वकल्पनेति। एतेन 'सुवन्तविशेषणमतिङ्ग्रहणम्। न चात्र सुवन्तं क्रियावाचि। प्रकृत्यर्थस्य ह्यत्र [5]गुणभावः। प्रत्ययार्थस्य कर्तुः प्राधान्यम्। तस्य च द्रव्यरूपेण कृताभिधानम्। प्रधानेन च व्यपदेशो भवतीति द्रव्यवाचीत्युक्तम्। अत एव गतशब्दस्य समासो न प्राप्नोति, तस्यानुपपदत्वात्। धातोश्च क्रियावाचित्वात् तदाश्रया प्रत्ययोत्पत्तिरविरुद्धा। धात्वर्थस्य प्रत्ययार्थेन [6]संसृष्टत्वात् पदान्तरेणैकार्थीभावासंभवात् समासस्य त्वप्रसङ्गः, धातोः सुबन्तत्वाभावाच्च' इति निरस्तम्। 'तुमुन्ण्वुलौ क्रियार्थे धातौ' इत्येव सिद्धे तत्र क्रियार्थायां क्रियायामिति गुरुनिर्देशेन 'उपपदम्' इत्यन्वर्थसंज्ञाया महत्याः करणेन प्रकृतसूत्रे गतयातगतिव्रज्याशब्दप्रकृतिकसुवन्तस्य क्रियाशब्दत्वनिराकरणेनातिङ्ग्रहणस्यात्रत्यस्य सुप्सुपेत्येतदननुवृत्तिज्ञापकताया भगवतोक्तत्वेन च [7]"तुमुन्ण्वुलौ' इति सूत्रे तिङन्तस्यैवोपपदत्वमाश्रित्य तुमुन्ण्वुलौ विधीयेते इति कल्पनाया एव युक्तत्वात्। 'उपपदमतिङिति तदर्थप्रतिषेधः, क्रियाप्रतिषेधो वा' इति प्रकृतवार्तिकद्वयस्य विशेषणतया विशेष्यतया वा यथाकथंचित् क्रियाया वाचके उपपदे तुमुन्ण्वुलावित्याशयेन प्रवृत्तिसंभवाच्च। **अनयोर्योगयोरिति**। नन्वस्मिन् सूत्रेऽतिङ्ग्रहणादत्र मानुवर्तताां सुप्सुपेति। पूर्वसूत्रे कुतो नानुवर्तत इति चेत्, तत्रात्रत्यमतिङ्ग्रहणमपकृष्य पाणिनिना शिष्यान् प्रति सूत्रार्थो निर्दिशित इति कृत्वेति गृहाण। **निवृत्तं सुप्सुपेतीति**। सुबन्तमाङप्रभृतेरुपपदस्य 'मा भूत्' इत्यादौ तिङन्तेन, 'पाचको व्रजति' इत्यादौ च तिङन्तस्योपपदस्य पाचक इत्यादिना सुवन्तेन समाससंभवेनोभयत्र समासस्यानिष्टत्वेन 'अतिङ' इति लुप्तविभक्तिकस्य तन्त्रेणावृत्त्या वा 'अतिङ, अतिङा' इति प्रथमातृतीयान्ततासंभवेन च सुप्सुपेत्युभयनिवृत्तिसूचकता युज्यत इति भावः। वस्तुतस्तु 'अतिङ' इति लुप्ततृतीयाकमेकमेव पदं निर्दिष्टम्। तेन च सुपेति तृतीयान्तस्यैव निवृत्तिर्ज्ञापनीया, तावतैव 'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति वचनार्थसंग्रहात्। गतिकारकोपपदानां सुवन्तानामेव समर्थेन समासस्येष्टत्वेन सुबन्तनिवृत्तिज्ञापनप्रयोजनाभावात् 'अतिङ' इत्यस्यावृत्तौ मानाभावाच्च सुवित्यस्य निवृत्तिर्न ज्ञाप्यते। तेन 'कर्मकरः, कर्मकृत्, श्वपाकः, अयस्कारः' इत्यादौ पूर्वपदे नलोपविसर्गादिपदकार्यसिद्धिर्भवति। **गतिकारकोपपदानामिति**। प्रकृतसूत्रद्वये सुपेत्यस्य निवृत्त्या गत्युपपदयोः, [8]"कर्तृकरणे कृता बहुलम्' इत्यत्र कृताग्रहणेन कारकस्य च कृदन्तेन सुबुत्पत्तेः पूर्वमेव समासः सिद्ध इति भावः। अस्याश्च परिभाषायाः [9]"पुंयोगादाख्यायाम्' इति सूत्रे प्रयोजनानि वक्ष्यन्ते। दधिसेचावित्यादौ सिञ्चत इति सेचौ, दध्नः सेचौ दधिसेचावित्याश्रयणात् [10]"सात्पदाद्योः' इति षत्वनिषेधसिद्धिः। दधि सिञ्चतीति कर्मण्युपपदे [11]"विचि तु

---

[1] महाभाष्यम् २. १. १.

[2] पा. सू. ३. ३. १०.

[3] पा. सू. ३. १. १३३.

[4] पा. सू. ३. ३. १०.

[5] प्रदीपे 'गुणीभावः' इत्यत्र 'गुणभावः' इति पाठोऽभिमतः।

[6] संस्पृष्टत्वात् — य.

[7] पा. सू. ३. ३. १०.

[8] पा. सू. २. १. ३२.

[9] पा. सू. ४. १. ४८.

[10] पा. सू. ८. ३. १११.

[11] क्विपि तु — ब, प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

षत्वं भवत्येव। यदि तत्रापि षत्वं न भवत्येवेत्याग्रहः, तर्हि [१]'कृता बहुलम्' इति बहुलग्रहणात् क्वचित् सुबन्तेन समासाश्रयणात् तत्र षत्वाभावो ज्ञेयः। एवमेव हि [२]'सा हि तस्य धनक्रीता' इति सिध्यति। उत्तरं पदमुत्तरपदमित्यन्वर्थतां विनैव वृत्तिचरमावयवे रूढेराश्रयणात्, पद्यतेऽर्थोऽनेनेति पदं धातुप्रातिपदिकप्रत्ययसुप्तिङन्तानामन्यतमम्, उत्तरं पदमुत्तरपदमित्यन्वर्थताश्रयणाद्वा कृदन्तस्य सुबन्तत्वाभावेऽप्युत्तरपदत्वसिद्धिः। **केनेति**। सहेति शेषः। **समर्थेनेति**। सुबित्यस्यानुवर्तनात् पदविधित्वात् समर्थपरिभाषाविषयत्वमिति भावः। सुपेत्यस्याननुवृत्तावतिप्रसङ्गमाह — **यद्येवमिति**। ननु तत्र धातोः पदैकदेशत्वात् तेन कथमुपसर्गस्य समासः स्यादित्यत आह — **पूर्वं धातुरिति**। **साधनेन** साधनप्रयुक्तप्रत्ययेनेत्यर्थः। धातोः साधनेन स्वरूपसंपादकेन योगोऽन्तरङ्गः, स्वरूपविशेषद्योतकेनोपसर्गेण तु बहिरङ्गः। स तु लक्ष्यानुरोधात् किंचित् कार्यं प्रत्याश्रीयते, न सर्वत्र। अतस्तत्पक्षमादायातिप्रसङ्गो न शङ्कनीय इत्याशयेनाह — **पूर्वं धातुः साधनेनेति**। **षष्ठीसमासादिति**। पञ्चकं प्रातिपदिकार्थ इति पक्षे प्रातिपदिकस्यैव कर्मवाचकत्वादपवादविषये द्वितीयाया अप्रवृत्तेश्च प्रातिपदिक उपपदेऽणि [३]ततः परत्वात् कृद्योगलक्षणषष्ठ्यां सत्यां षष्ठ्युपपदसमासयोर्युगपत्प्रसङ्ग इति मन्यते। परिहरति — [४]**न वा षष्ठीसमासाभावादिति**। उपपदसमाससमये षष्ठीसमासस्याप्रसङ्गादित्यर्थः। कथं तदा तस्याप्रसङ्ग इत्यत आह — **गतिकारकोपपदानामिति**। उपलक्षणमिदं षष्ठ्यभावादित्यस्य। उपपदमित्यन्वर्थसंज्ञाबलेन सुबन्त एव कर्मवाचक उपपदेऽणा भाव्यम्। अणुत्पत्तेः पूर्वं कृद्योगलक्षणा षष्ठी न प्राप्नोति। द्वितीयान्तमेव तत्रोपपदमिति तस्याप्रसङ्गः। न च [५]प्रकल्प्यापवादन्यायेनापवादविषये तत्र द्वितीया न प्रवर्तत इति वाच्यम्, द्वितीयां विना तस्योपपदत्वाभावेनाणोऽप्रवृत्तौ षष्ठ्याः प्रसक्त्यभावेनापवादविषयत्वासंभवात्। [६]'तुष्यतु दुर्जनः' इति न्यायेन तत्र षष्ठीसमाससंभवमभ्युपगम्याप्याह — **अथवेति**। **षष्ठीसमासः पुनर्विभाषेति**। तथा च [७]'अन्तोदात्तादुत्तरपदादन्यतरस्यामनित्यसमासे' इत्यनेन 'समिच्छिदा, काष्ठभिदा' इत्यादौ विभक्त्युदात्तत्वं स्यादिति मन्यते। तादृशस्थले षष्ठीसमासोऽपि नित्य एव, नित्योपपदसमासप्रवृत्त्या [८]तदभावपक्षे विग्रहाभावात्, विग्रहवत एवानित्यसमासत्वात्, नित्यभिन्नस्यैवानित्यत्वात्। यत्तु "[९]'सिन्नित्यसमासयोः' इत्यत्रास्य ग्रहणं यथा स्यात्" इति, तन्न, तत्र नित्यग्रहणस्य भगवता प्रत्याख्यास्यमानत्वादित्याशयेन परिहरति — **नन्विति**। आक्षेप्ताह — **नेत्याहेति**। समाधाताह – **नैवं शक्यमिति**॥

अमैवाव्ययेन २. २. २०.

[२, ६९७]

(उद्द्योतनम्) अर्थशब्दो निवृत्तिवाची, विधिशब्दश्च नियमपर इत्याह — **यन्निवृत्त्यर्थ इति**।

---

[१] पा. सू. २. १. ३२.

[२] काशिकायां 'सा हि तस्य धनक्रीता प्राणेभ्योऽपि गरीयसी' इति प्रयोग उद्धृतः।

[३] 'ततः परत्वात्' इत्यनावश्यकं भाति।

[४] भाष्ये 'न वा षष्ठीसमासस्याभावात्' इत्यत्र 'न वा षष्ठीसमासाभावात्' इति निर्णयसागरमुद्रिते पाठः।

[५] परिभाषा ६४.

[६] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

[७] पा. सू. ६. १. १६९.

[८] 'तदभावपक्षे' इति नास्ति — ब.

[९] का. वा. ६. १. १२७ — १.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अन्तरङ्गत्वमाह — **अनुत्पन्न इति**। सुपेत्यस्याननुवृत्तेरित्यर्थः। ननु [1]'भाव्यमो निषेधो वचनबलादस्तु, अत आह — **नियमान्तर इति**। अमैवेत्येवंरूप इत्यर्थः। नन्वमैव सहविधानमुपपदमव्ययेन समस्यत इत्युक्तेऽग्रेप्रभृतीनां समासनिवारणेऽपि 'स्वादुं कृत्वा' इत्यादौ समासप्रसङ्गः, अव्ययेनेत्यस्यामा विशेषणाभावात्, अत आह — **एवकारेति**। एकमुपपदविशेषणमेकमव्ययविशेषणमिति 'स्वादुं कृत्वा' इत्यादौ समासाभावः। उपपदविशेषणत्वमुपपादयति — **तत इति**। उपपदस्य मुख्यविधेयत्वासंभवादाह — **तत्रेति**। अम्विधायकसूत्र इत्यर्थः। सप्तमीनिर्दिष्टस्योपपदस्यापि विधिसंस्पर्शाद् भाष्ये 'तुल्यविधानमुपपदम्' इत्युक्तमित्यर्थः। **तत्** उपपदम्। **अमा** अमन्तेनाव्ययेन। 'अमेव केवलः' इत्यनेन व्यावृत्तिरित्याह — **विभाषेति**। [2]अप्राप्तविशेषणस्योपयोगमाह — **यत इति**। **निमित्तत्वादिति**। ततश्च प्रत्ययविधौ सप्तमीनिर्देशादुपपदत्वेन समासप्रसङ्ग इत्यर्थः। **प्राप्तेति**। [3]'आभीक्ष्ण्ये' इत्यस्यानुवृत्तौ प्राप्तविभाषेति ज्ञेयम्। **तन्निवृत्तौ** पक्षे प्रत्ययनिवृत्तावेव। अप्राप्तविभाषैवेति सिद्धान्तः॥

[२, ६९७]

(रत्नप्रकाशः) **यदर्थ इति**। यन्निवृत्त्यर्थ इत्यर्थः। **विधिः स्यादिति**। नियमः स्यादित्यर्थः। **खशयमिति**। [4]'अधिकरणे शेतेः' इत्यच्, [5]'अतोऽम्' इति सोरम्भावः। तेनामन्तेनानव्ययेन समासो मा भूदित्येवमर्थो नियमः स्यादिति भावः। **अन्तरङ्गत्वादिति**। [6]'गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इति सुबुत्पत्तेः पूर्वमेवोपपदसमासस्य विधानात् सुबुत्पत्त्यपेक्षया चान्तरङ्गत्वोपचारः[7]। **अमैव [यत्] तुल्यविधानमिति**। अम एव विधायके सूत्रे यदुपपदं निर्दिष्टं तदेवाव्ययेन समस्यत इत्येतदर्थलाभायैवकार इति भावः। एतेन 'एवकारसामर्थ्यादिमेत्यस्यावृत्तिराश्रीयते। ततो येन वाक्येनामेव केवलो विधीयते, न प्रत्ययान्तरसहितस्तेन वाक्येन यद्विधीयत उपपदं तत्र सप्तमीनिर्देशात्, तदमा समस्यते नान्यदित्यर्थः' इति निरस्तम्। अमेत्यस्यावृत्तिं विनैवैवकारस्योपपन्नत्वेनामेत्यस्यावृत्तिकल्पनाया व्यर्थत्वात्। न ह्यमा तुल्यविधानस्योपपदस्यामन्तादन्येनाव्ययेन समासः प्रसज्यते, येनामेत्यस्यावृत्तिः सार्थिका स्यात्। **अग्रे भोजमिति**। [8]'विभाषाग्रे प्रथमपूर्वेषु' इति क्त्वाणमुलोर्विधानादग्रादीनाममैव तुल्यविधानाभावेन समासाभाव इति भावः। एवं सति [9]'विभाषाग्रेप्रथमपूर्वेषु' इति सूत्रे यद् दूषणं वक्ष्यति वार्तिककारः स निराकृत इत्याशयेनाह — **अग्रादिष्वप्राप्तविधेरिति**। आश्रयण इति शेषः। **समासप्रतिषेधं चोदयिष्यतीति**। अप्राप्तविधिपक्षेऽग्रादीनामुपपदत्वात् समासप्रसङ्गः। प्राप्तविभाषापक्षे [10]'आभीक्ष्ण्ये णमुल् च' इति विहितयोरग्रादिषु निवृत्तिरेव क्रियत इति प्रत्ययौ प्रति तेषामुपपदत्वाभावात् समासाप्रसङ्गः। [11]तद्वार्तिककृत आशयः॥

---

[1] भाविनोऽमो निषेध इत्यर्थः॥ भाव्याम्निषेधः — अ; भाव्यामो निषेधः — ऋ.
[2] अप्राप्तेति विशेषणस्येत्यर्थः।
[3] आभीक्ष्ण्ये णमुल् चेत्यत इत्यादिः।
[4] पा. सू. ३. २. १५.
[5] पा. सू. ७. १. २४.
[6] परिभाषा ७६.
[7] अन्तरङ्गत्वव्यवहार इत्यर्थः।
[8] पा. सू. ३. ४. २४.
[9] पा. सू. ३. ४. २४.
[10] पा. सू. ३. ४. २२.
[11] समासप्रतिषेधकथनमित्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शेषो बहुव्रीहिः २. २. २३.

[२, ६९८]

(उद्द्योतनम्) [1]किंसर्वनामादिभिन्नत्वात् कथं [2]तसिः, अत आह — **आद्यादित्वादिति**। तस्याकृतिगणत्वात्। **सामान्येति**। [3]'सुप्, [4]सुपा' इत्यनेन सामान्यरूपेण, [5]'अव्ययम्' [6]'द्वितीया' इत्यादिना विशेषरूपेण। अर्धपिप्पलीत्यादौ पूर्वपदार्थे तत्पुरुषः, उपकुम्भमित्यादावव्ययीभावः[7], नीलोत्पलादावुत्तरपदार्थे तत्पुरुषः, उन्मत्तगङ्गमित्यादावन्यपदार्थेऽव्ययीभावः। भाष्ये वचनत्रयात्मिका विभक्तिस्त्रिकशब्देनोक्ता। ननु [8]'सामान्येन प्रथमाया अपि समासो विहितः, अत आह — **द्वितीयादीनामिति**। विशेषापेक्षया शेषत्वमित्यर्थः। प्रथमाग्रहणस्य प्रयोजनमाह — **ततश्चेति**। क्वचिद्व्यधिकरणानामपि ज्ञापकाद् भवतीत्याह — **कण्ठेकाल इति**॥

इति व्याकरणमहाभाष्यप्रदीपोद्द्योतने द्वितीयाध्यायस्य द्वितीयपादे प्रथममाह्निकम्॥

[२, ६९८]

(रत्नप्रकाशः) पदत इति। आद्यादित्वात् पञ्चम्यन्तात् तसिः, पदेभ्य इत्यर्थः। एतेन 'पदेन पदत इति तृतीयान्तात् तसिः' इति निरस्तम्। शेषशब्दस्य पञ्चम्यन्तान्वयस्योचितत्वात्। एतादृशस्थले हि शेषशब्दोऽन्यार्थकः। तत्र [9]'अन्यारादितरर्ते' इति पञ्चमी भवति। **न हि सन्तीति**। सुबित्यनुवर्तते। तेन सुबन्तानां सर्वेषामव्ययीभावतत्पुरुषान्यतरसंज्ञाविषयत्वमेव जातमिति भावः। [10]**'न हि सन्त्यर्था इति**। पूर्वोत्तरान्यपदार्थप्राधान्येनाव्ययीभावतत्पुरुषसंज्ञयोर्विधानात् चार्थे द्वन्द्वस्य वक्ष्यमाणत्वाच्चेति भावः। **प्रथमाया इति**। [11]'द्वितीया श्रितातीत' [12]'तृतीया तत्कृतार्थेन' [13]'चतुर्थी तदर्थ' [14]'पञ्चमी भयेन' [15]'सप्तमी शौण्डैः' [16]'षष्ठी' इत्येवं द्वितीयादिशब्दैर्द्वितीयादिविभक्तीनामिव प्रथमाशब्देन प्रथमायाः कुत्राप्यनिर्दिष्टत्वादिति भावः। कण्ठेकाल इत्यादौ तु [17]'सप्तमी विशेषणे बहुव्रीहौ' इति सप्तम्यन्तस्य पूर्वनिपातविधानात् समासः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे द्वितीयस्याध्यायस्य द्वितीयपादे प्रथममाह्निकम्॥

---

[1] किंसर्वनामबहुभ्योऽद्व्यादिभ्य इत्यधिकृत्य 'पञ्चम्यास्तसिल्' इति सूत्रेण तसिलो विधानादिति भावः।
[2] तसिल् विवक्षितः।
[3] पा. सू. २. १. २.
[4] पा. सू. २. १. ४.
[5] पा. सू. २. १. ६.
[6] पा. सू. २. १. २४.
[7] पूर्वपदार्थे इत्यनुषङ्गः।
[8] सुप् सुपेत्यनेनेति भावः।
[9] पा. सू. २. ३. २९.
[10] भाष्ये 'न हि सन्ति तेऽर्थाः' इत्यत्र 'न हि सन्त्यर्थाः' इति निर्णयसागरमुद्रिते पाठः।
[11] पा. सू. २. १. २४.
[12] पा. सू. २. १. ३०.
[13] पा. सू. २. १. ३६.
[14] पा. सू. २. १. ३७.
[15] पा. सू. २. १. ४०.
[16] पा. सू. २. २. ८.
[17] पा. सू. २. २. ३५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य द्वितीयपादे द्वितीयमाह्निकम्

अनेकमन्यपदार्थे २. २. २४.

[२, ६९९–७१०]

(उद्द्योतनम्) ननु प्रथमस्यानेकग्रहणस्य प्रयोजनमनभिधाय पदग्रहणस्य कथमादौ तदभिधानम्, अत आह — **अनेकेति**। तथाप्यन्यग्रहणविचारस्य कथं न प्राथम्यम्, अत आह — **बहुव्रीहि**। प्रश्नाभिप्रायमाह — **अन्यार्थ इति**। पदानां समास इति [1]'तदर्थातिरिक्तः पदार्थ एव' लभ्यत इत्यर्थः। वाक्यार्थनिवृत्त्यर्थत्वं निराह — **वर्तीति**। सर्वत्र प्रायेण क्रियैव वाक्यार्थः। तत्र समस्तपदस्य पदान्तरसहितस्य वृत्तिः, न तु वर्तिपदानामित्यर्थः। अस्मिन् व्याख्याने 'सुस्नातम्' इत्यस्यानुपयोगमाशङ्क्याह — **अथवेति**। आदिना पितेत्यन्तग्रहः। 'स्नाहि' इति येनोक्तं तस्य वाक्यं 'सुस्नातम्' इति। ननु 'सुस्नातम्' इति वाक्येनैव सोऽर्थः प्रतिपाद्यते, न तु 'यथा' इत्यादिना, अत आह — **अश्रुतेति**। अपेः प्रयोजनमाह — **अपिशब्दादिति**। पदार्थग्रहणसामर्थ्यमस्य कथयति — **पदार्थेति**। **अवकाश इति**। ततश्च पूर्वोऽपि तत्पुरुषोऽनवकाशः परमपि बहुव्रीहिं बाधत इत्यर्थः। संज्ञाद्वयसमावेशे दोषमाह — **ततश्चेति**। बहुव्रीहौ पूर्वपदप्रकृतिस्वरः पाक्षिकः कप्प्रत्ययः। तत्पुरुषेऽन्तोदात्तत्वं [4]काभावश्च। **समासविधाविति**। [5]'संख्यापूर्वः' [6]'विशेषणं विशेष्येण' [7]'नञ्' इति समासविधावित्यर्थः। **'सिद्धं परंकार्यत्वे**। 'एवमन्यपदार्थेऽपि' इत्ययुक्तम्, तत्र तत्पुरुषप्रसङ्गाभावात्, अत आह — **नीलोत्पलमिति**। **विशेषेति**। स्वपदार्थरूपेत्यादि। बहुव्रीहेरनवकाशत्वं निराह — **कण्ठ इति**। ननु सुपेत्यस्य निवर्तनात् सुवित्येवानुवर्तते। तत्र एकस्य समासनिवृत्तयेऽनेकग्रहणं स्यात्, अत आह — **एकेति**। **अनेकेति**। द्व्यर्थगर्भत्वात् सामर्थ्यस्येत्यर्थः। **ज्ञापकादिति**। उत्तरपदशब्दस्य समासावयवे रूढत्वादिति भावः। अत्र कस्यैकपदस्य बहुव्रीहिसंज्ञापाद्यते, अत आह — **अपिशब्द इति**। एकस्य सामर्थ्याभावान्न समास इत्युक्तम्, अत आह — **पदान्तरेणेति**। सामर्थ्ये सति संज्ञा प्रवर्तते, न तु यावतां सामर्थ्यं तावतामेव नैकस्येति [9]'नियम इति भावः। **अस्य** अपिशब्दस्य। **अप्यर्थतेति**। 'सर्पिषोऽपि स्यात्' इत्यत्र अपियोगे द्वितीयानिरासार्थं [10]'नेमेऽप्यर्थाः' इति भाष्येण निराकृतेत्यर्थः। **तस्मादिति**। सादिति पदं कर्तृसामान्यवाच्यपि कदाचित् प्रकरणादिवशात् कर्तृविशेषे विन्दौ वर्तत इति तत्रैवोक्तम्। सुप्

---

[1] तदर्थातिरिक्तपदार्थ एव — अ.

[2] इदं कैयटविरुद्धं प्रतीयते। तस्माद्योजनान्तरतयोक्तमिति बोध्यम्।

[3] 'अस्य' इत्यनावश्यकं भाति।

[4] कप्प्रत्ययाभावश्चेत्यर्थः।

[5] पा. सू. २. १. ५२.

[6] पा. सू. २. १. ५७.

[7] पा. सू. २. २. ६.

[8] प्रदीपे 'अन्यग्रहणं कर्तव्यमिति स्थितम्' इत्यत्र 'अन्यग्रहणं कर्तव्यमिति सिद्धम्' इति पाठोऽन्नंभट्टस्येति भाति।

[9] नियमभावः — ऋ.

[10] महाभाष्यम् १. ४. ९६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सुपेति । यद्यपि तृतीयान्तस्यैव निवृत्तिरुक्ता, तथाप्युभयनिवृत्तिमाश्रित्येदमुक्तमित्याशयः [1]'कुगति' [2]'उपपदम्' इति योगद्वये। **अन्यथा** अनेकमित्यनुक्तौ। उत्तरपदे समासविधानस्य ज्ञापकत्वमुपपादयति — **द्विगुग्रहणमिति** । [3]समानाधिकरणेन समासविधानमित्यन्वयः । द्विगुग्रहणं किमर्थमुपलक्षणार्थं व्याख्यायते, अत आह — **द्विगुस्त्विति**। तत्र [4]'उत्तरपदेन परिमाणिना' इति प्रतिपदविहितसमासोऽस्तीति भावः। **विषयविभागेति**। बहूनां बहुव्रीहिरेव, न तत्पुरुष इत्येवंरूपेत्यर्थः। अनिष्टमेवाह — **महदिति** । सर्वोऽपि समासः किञ्चिद्गृहीत्वैवोच्यते, अत आह — **विशिष्टेति**। तेन महत् कष्टमित्यस्य कथं वारणम्, अत आह — **तत्रेति**। **द्वितीयान्तस्येति**। [5]एकत्वस्य विवक्षितत्वादिति भावः। **अत्र** महत् कष्टमित्यादौ। **इहापि** अनेकमित्यत्रापि। **नैष इति**। तत्पुरुषे शास्त्रद्वये संख्या [6]बाध्या, द्वन्द्वबहुव्रीह्योस्त्वेकस्मिन्। तत्र लाघवादेकत्रैव संख्या [7]बाध्यते, नोभयत्रेति नाप्रसङ्गातिप्रसङ्गावित्यर्थः। नन्वनेकग्रहणेऽपि प्रथमान्तेन सुवित्यनेन संबध्यते न तु तृतीयान्तेन सुपेत्यनेन। तथा च गोशब्दस्य तृतीयान्तनिर्दिष्टस्य 'अनेकम्' इति प्रथमान्तनिर्दिष्टत्वाभावेनानुपसर्जनत्वात् ह्रस्वो न स्यात्, अत आह — **सत्यनेकेति** । **तेन** सुविति प्रथमान्तेन। ननु चित्रगुं पश्येत्यादिना भाष्येऽनेकविभक्तियोग एव प्रदर्शित इति कथमेकविभक्तित्वेनोपसर्जनत्वम्, अत आह — [8]**अन्यपदार्थेति** । **वर्तिपदानामिति** । चित्रा गावोऽस्येत्येकविभक्त्यैव सर्वत्र विग्रह इत्यर्थः। 'कुतश्चिदेव किंचित् पदम्' इति भाष्यतात्पर्यमाह — **अयं भाव इति**। **अन्यस्य** चित्रगुं चित्रगुनेत्यादेः । ननु राज्ञः कुमारीं राजकुमारीमिति द्वितीयाद्यन्तेन [9]समासासंभवात् 'न चैतन्नित्यम्' इत्ययुक्तम्, अत आह — **अयं भाव इति**। ननु राज्ञः कुमारी, कुमारीं, कुमार्येत्यादावपि युगपदनेकविभक्तियोगाभावादेकविभक्तिकमेवेति कथं तेन तन्निवृत्तिः, अत आह — **एकैकस्मिन्निति**। **एतदपीति**। [10]राजकुमार्यादेरप्युपसर्जनत्वे शब्दानुशासनप्रस्तावाच्छब्दमात्रस्यैव संज्ञित्वसंभवादित्यर्थः। **संज्ञीति**। संज्ञिविशेषपुरस्कारेणैव सर्वत्र संज्ञाविधानादिति भावः। विशेषाभिधानायानुप्रयोगशङ्कां वारयति — **देवदत्तेति** । यस्यार्थे यः समासो विधीयते [11]तत्प्रयोगे तदप्रयोगे दृष्टान्तः — **यथेति** । **विशिष्ट इति**। चित्रा गावोऽस्य देवदत्तस्येत्येवमित्यर्थः। समासव्युत्पादनसमये युगपदुभयं दृश्यत इत्याशङ्क्याह — **लौकिक इति**। तत्र हेतुः — **एकेनैवेति** । ननु समासो विशेषमेवाभिधत्ताम्, तदनुरोधेन विग्रहोऽपि विशेषनिष्ठ एव कार्योऽत आह — **शब्दशक्तीति**। सामान्यस्यापि विशेषत्वमुपपादयति — **यथेति**। **विशेष एवेति** व्यावर्तकत्वमेव विशेषत्वमित्यर्थः। यद्यपि [12]नपुंसकं न सामान्यम्, तथापि तदपि लिङ्गत्रयसाधारणमित्याह — [13]**चित्रग्विति**। 'सर्वं वा विश्वं वा' इत्यत्र पौनरुक्त्यनिरासायाह — **अविश्वमिति**।

---

[1] पा. सू. २. २. १८.

[2] पा. सू. २. २. १९.

[3] 'समानाधिकरणेन' इत्यस्यानन्तरं 'न' इत्यधिकम् — अ.

[4] का. वा. २. १. ५१–९.

[5] एकस्या एव तत्त्वादिति — अ; एकत्वस्याविवक्षितत्वादिति — ऋ.

[6] बोध्या — अ.

[7] बोध्यते — अ.

[8] प्रदीपे 'अन्यपदार्थस्य प्राधान्यात् इत्यत्र 'अन्यपदार्थप्राधान्यात्' इति समस्ततया पाठोऽन्नंभट्टस्येति भाति।

[9] समाससंभवात् — अ.

[10] राजकुमारीत्यादेरुपसर्जनत्वेन शब्दानुशासन—अ.

[11] तस्य समासस्य प्रयोगे, तदप्रयोगे — यस्यार्थे विधीयते तस्य शब्दस्याप्रयोग इत्यत्रेत्यर्थः।

[12] नपुंसकमपि सामान्यम् — अ, ऋ.

[13] प्रदीपे 'चित्रग्विति लिङ्गसर्वनाम्ना' इति विशिष्टः कैयटग्रन्थत्वेनाभिमतः, न तु 'चित्रग्विति' इति प्रतीकत्वेन। निर्णयसागरमुद्रिते तथैव दृश्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्वत्वस्य [1]विशेषत्वरूपणम् — **चित्रगविति**। ननु पदार्थाभिधानेऽनुप्रयोगानुपपत्तिरिति चोद्यम्, 'अथवा' इति न[2] समाधानान्तरम्, अत आह — **कृत्स्नेति**। **इत्याह** इत्यत आह। प्रकृत्यर्थं उपसर्जनं यस्य प्रत्ययार्थस्येति विग्रहः। ननु [3]'पूरणगुण' इत्यादिनाव्ययेन षष्ठीसमासनिषेधात् कथं 'सर्वपश्चात्' इत्युक्तम्, अत आह — **भाष्येति**। अद्रव्यस्यापि गुणादेर्लिङ्गसंख्यायोगोऽस्ति[4], अत आह — **असत्त्वेति**। पूर्वस्माद्विशेषमाह — **अकारेति**। ननु पदसंस्कारपक्षे पदान्तरसामानाधिकरण्यं नापेक्ष्यते इति कथम् 'आश्रयतः' इत्युक्तम्, अत आह — **यदेति**। **पदावधिकमिति**। पदमेवावधिरवसानमन्वाख्यानस्य। पदस्यैवान्वाख्यानमिति यावत्। **विशेषणानामिति**। तथा च तस्मिन् पक्षे वचनबलादाश्रयतो गुणवचनानीत्यर्थः। न्यायमेवाह — **आश्रयेति**। संबन्धिसंबन्ध्यभिधाने चित्रगुर्देवदत्त इति सामानाधिकरण्यं कथम्, अत आह — **तत्र यद्यपीति**। संबन्धित्वाविशेषाद् गोगतलिङ्गसंख्ये अपि किं न स्याताम्, अत आह — **तत्रेति**। अभेदोपचारस्योक्तत्वात् 'यदि तर्हि' इत्ययुक्तम्, अत आह — **यथेति**। 'सद्रव्यः' इत्यस्योपयोगमाह — **कृत्स्न इति**। गुणादिसंग्रहायाह — **द्रव्यशब्देनेति**। भाष्योक्तं सामर्थ्यमाह — **यदीति**। उक्तार्थानामप्रयोगं सदृष्टान्तमाह — **यथेति**। प्रथमातिरिक्तविभक्त्यर्थे बहुव्रीह्यङ्गीकारात् 'षष्ठ्यादयः' इत्युक्तम्। 'सिद्धं तु' इत्यस्य प्रकृतोपयोगमाह — **ततश्चेति**। 'कर्मादीनामनुक्ता एकत्वादयः' इत्येतदुपपादयति — **समासेनेति**। मात्रस्येत्यस्य विवरणम् — **कर्मादीति**। **समासेनेति**। प्रथमायाः कारकविभक्तित्वाभावादिति भावः। 'नियोगतः' इत्याद्यादित्वात्तसिरित्याशयेन पदार्थमाह — **नियमेनेति**। पदार्थमुक्त्वा वाक्यार्थमाह — **प्रतिनियतेति**। [5]अर्थनियमपक्षे कर्माद्यभावेऽपि द्वितीयादिः स्यात्, अत आह — **कर्मण्येवेति**। प्रत्ययनियमाश्रयेणेदमुक्तमित्यर्थः। **स चेति**। तावन्मात्रमेव [6]शेषशब्दार्थं मन्यत इत्यर्थः। प्रातिपदिकार्थमात्रस्य कारकाकारकसाधारणस्य। **समयादिति**। अर्थमनमेक्ष्येत्यादिः। ननु समयात् प्रथमायां नार्थो नियामकः, अत आह — **यथेति**। दृष्टानुसारित्वात् कल्पनाया इत्यर्थः। पूर्वं समयात् प्रथमा, अर्थतो वचनासंकर उक्तः, इदानीं द्वयमपि [7]प्रकारान्तरेण साध्यत इत्याह — **असंकरमिति**। प्रकारान्तरमेवाह — **यदेति**। परशब्दस्य परप्रत्ययपरत्वभ्रान्तिं निराह — **संख्येयेति**। **षष्ठ्यर्थस्य** चित्रा गावोऽस्येति षष्ठ्यर्थस्य। **लिङ्गान्तरेति**। चित्रा गावो यस्य यस्या इति लिङ्गान्तरम्, ययोर्येषामिति संख्यान्तरम्। **षष्ठ्यर्थतेति**। शेषत्वाभावादित्यर्थः। **सर्व एव** वाह्यार्थापेक्षोऽपि॥

[२, ६९९–७१०]

(रत्नप्रकाशः) वार्तिककारैरुपेक्षितम् 'अन्यपदार्थे' इत्येतत्पदकृत्यमवयवद्वारा पृच्छति — **पदग्रहणमिति**। उत्तरमाह — [8]**इहेति**। **यथा मे मातेति**। कश्चित् केनचित् स्नातं किं त्वयेति पृष्टः सन्नेवमुक्तवान्। यथा मे माता विशुद्धकुलोत्पन्ना तथा मे पिता। अतः सुस्नातं भो मयेति [9]तद्वाक्यस्य भावार्थः। तत्र मातृपितृशब्दयोः प्रथमान्तयोः समासो मा भूदिति पदग्रहणमिति भावः।

---

[1] विशेषत्वरूपम् — अ; विशेष्यस्वरूपम् — ऋ.
[2] 'न' इति नास्ति — ऋ.
[3] पा. सू. २. २. ११.
[4] योगोऽस्तु — अ.
[5] अर्थान्नियमपक्षे — अ.
[6] विशेषशब्दार्थं — अ.
[7] वचनान्तरेण — अ.
[8] भाष्ये 'अनेकमन्यपदार्थे इतीयत्युच्यमाने' इत्यत्र 'इहानेकमन्यपदार्थे इतीयत्युच्यमाने' इति निर्णयसागरमुद्रिते पाठः।
[9] तद्वाक्यभावार्थः — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अन्यग्रहणं किमर्थमिति। उत्तरपदार्थप्रधानस्तत्पुरुष इति पदार्थविशेषविषयस्तत्पुरुषः पदार्थसामान्यविषयं बहुव्रीहिं वाधिष्यत इति भावः। एतेन 'अन्तरङ्गत्वात् स्वपदार्थे सिद्धे समासे पदार्थग्रहणसामर्थ्यादन्यपदार्थो लप्स्यत इति प्रश्न' इति निरस्तम्। पदग्रहणस्य वाक्यार्थव्यावर्तकतां वदता भगवता वाक्यार्थापेक्षया पदार्थस्यान्तरङ्गत्वे सत्यप्यनाश्रितत्वादन्तरङ्गवहिरङ्गरूपस्य तत्रान्तरङ्गपरिभाषया निर्वाहो नेति सूचितत्वेन तज्जातीयेऽत्र तया निर्वाहकथनस्यायुक्तत्वात्। **स्वपदार्थेऽपीति**। अपिशब्दादन्यपदार्थेऽपीत्यर्थः। 'अक्रियमाणे ह्यन्यग्रहणे' इत्यादिना वक्ष्यमाणो भावः। **तत्पुरुषः स्वपदार्थे बाधक इति**। उक्तोऽभिप्रायः। [1]'तुष्यतु दुर्जनः' इत्याशयेन तावदाह — **भवेदिति**। **एकसंज्ञाधिकार इति**। [2]'आकडारादेका संज्ञा' सूत्रन्यास इत्यर्थः। **परंकार्यत्वे त्विति**। 'प्राक्कडारात् परं कार्यम्' इति [3]न्यास इत्यर्थः। **प्राप्नोतीति**। तथा च स्वरसमासान्तयोर्दोष इति भावः। **शेष इति वर्तत इति**। पूर्वोत्तरपदार्थप्राधान्य एवाव्ययीभावतत्पुरुषयोर्विधानादुभयपदार्थप्राधान्ये द्वन्द्वस्य वक्ष्यमाणत्वाच्चान्यपदार्थप्राधान्य एव बहुव्रीहिर्भविष्यतीति मन्यते। शेषग्रहणस्य दुष्टत्वोक्तिस्मारणमात्रेण भीतो मन्दबुद्धिरन्यग्रहणं सार्थकं मंस्यत इत्याशयेनाह — [4]**शेषग्रहण उक्तमिति**। [5]'आकडरात्' सूत्र इति शेषः। एतेन 'शेषग्रहणप्रत्याख्यानं स्मारयति' इति निरस्तम्। तेन वचनेन तत्र शेषग्रहणस्याप्रत्याख्यातत्वात्। तत्र स्वकृतप्रत्याख्यानस्याकिंचित्करत्वात्। पञ्चभिर्भुक्तमस्येत्यादिवारणस्य शेषग्रहणप्रयोजनस्य सत्त्वाच्च। [6]पदतः शेषपक्षे स दोषः, न त्वर्थतः शेषपक्ष इति वक्तुमसमर्थः प्रष्टा परंकार्यत्वे[7]ऽन्यग्रहणस्य सार्थक्यमभ्युपगम्य पक्षान्तरे समाधात्राभ्युपगतं [8]तदानर्थक्यं दृढीकर्तुमिच्छुः पृच्छति — **अथेति**। तत्रापि तत् सार्थकमित्याह — **एकसंज्ञाधिकारे चेति**। **एवमन्यपदार्थेऽपीति**। विशेषणविशेष्यभावस्य तत्रापि सत्त्वादिति भावः। ननूत्तरपदार्थप्रधानस्तत्पुरुष इति प्राचीनलक्षणानुसारेणान्यपदार्थप्राधान्ये तत्पुरुषो न[9] भविष्यतीति चेन्न, अत्रत्यान्यपदार्थशब्दमुत्तरत्र [10]'चार्थे' इति पदं च पर्यालोच्याव्ययीभावतत्पुरुषयोः पूर्वोत्तरपदार्थप्राधान्यस्य प्राचीनैर्वैयाकरणैर्व्यवस्थापितत्वेन [11]तदवलम्बनेनात्रान्यशब्दानर्थक्यापादनानौचित्यात्। ननु निरवकाशो बहुव्रीहिरिति चेन्न, तत्पुरुषस्यापि तथात्वेन [12]ग्रहणाग्रहणवद्विकल्पस्य दुर्वारत्वात्। न चानेकमित्येव सिद्धे पदार्थग्रहणसामर्थ्यादन्यपदार्थ एव बहुव्रीहिर्भविष्यतीति वाच्यम्, वैपरीत्यस्यापि वक्तुं शक्यत्वात्। एतेन 'व्यधिकरणपदो बहुव्रीहेरवकाशः स्यात्' इति निरस्तम्। [13]'सप्तमीविशेषणे बहुव्रीहौ' इति सप्तम्यन्तपूर्वनिपातान्यथानुपपत्त्या कल्प्यमानस्य व्यधिकरणपदस्य बहुव्रीहेः सूत्रावकाशत्वासंभवात्। यदप्युक्तम् 'अन्यग्रहणे तु सति स्वपदार्थे सावकाशं तत्पुरुषं परत्वाद्बहुव्रीहिर्वाधत इति न कश्चिद्दोषः' इति। तदपि न, बहुव्रीहेर्निरवकाशत्वेन विप्रतिषेधसूत्रविषयत्वासंभवात्। इदानीमनेक[14]पदप्रयोजनकथनपरं वार्तिकमवतारयति — **अथेत्यादिना**। **सर्पिषोऽपि स्यादिति**। अपिशब्दो बिन्द्वर्थे वर्तत इति तस्यापि

---

[1] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[2] पा. सू. १. ४. १.
[3] अयं न्यासो महाभाष्ये १. ४. १. सूत्र उक्तः।
[4] वार्तिके 'शेषवचन उक्तम्' इत्यत्र 'शेषग्रहण उक्तम्' इति पाठः स्वीकृतः।
[5] पा. सू. १. ४. १.
[6] परतः — य.
[7] अन्त्यग्रहणस्य — व.
[8] तदानन्तर्यं — प, व.
[9] न भवतीति — व.
[10] पा. सू. २. २. २९.
[11] तदवलम्बनेन तत्रान्य — य.
[12] षोडशिग्रहणाग्रहणवदित्याशयः स्यादिति भाति।
[13] पा. सू. २. २. ३५.
[14] अनेकमिति पदेत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

बहुव्रीहित्वे समासान्तस्य कपः प्रसङ्ग इति भावः। **सुप् सुपेति वर्तत इति**। तथा चान्यपदार्थे वर्तमानं सुबन्तं सुबन्तेन सह बहुव्रीहिसंज्ञकमित्यर्थः सूत्रस्य संपद्यत 'इत्येकस्य[1] सा संज्ञा न भविष्यतीति भावः। एतेन "एकस्य[2] निवृत्त्यर्थं तावदनेकग्रहणं नोपपद्यते, पदविधित्वात् सामर्थ्ये सति बहुव्रीहिसंज्ञाविधानादनेकाधिष्ठानत्वात् सामर्थ्यस्य' इति निरस्तम्। सामर्थ्यस्यानेकाधिष्ठानत्वेऽप्येकाधिष्ठानत्वाविरोधात्। अन्यथोपपदसंज्ञाया अपि पदविधित्वेनानेकपदसमूहविषयत्वापत्तेश्च। **उत्तरपदे द्विगुं शास्तीति**। "तद्धितार्थ'[3] इत्यादिनेति शेषः। तत्र द्विगुग्रहणं तत्पुरुषोपलक्षणम्। न हि तेन सूत्रेण द्विगुसंज्ञा विधीयते, न वा तेन विहितदिक्पूर्वपदस्य द्विगुसंज्ञा सूत्रान्तरेणापि संभवति। **तत्पुरुषोऽपीति**। नियामकाभावादिति भावः। **ग्रहणेनेति**। विशेषग्रहणेनेत्यर्थः। न हि क्वचित् सुबन्तं सुबन्तेन सह तत्पुरुषसंज्ञक इति सामान्येन तत्पुरुषः क्वचिद्विहितोऽस्ति, येन स बहुव्रीहिवद्बहुपदविषयः कल्प्येतेति भावः। नन्वत्राप्यन्यपदार्थे वर्तमानं सुबन्तमिति विशेष आश्रित इति चेत्, सुबित्यंशे विशेषे आश्रितेऽपि सुपेत्यंशे तदनाश्रयणात्। ननु तावता बहुव्रीहेरेव बहुपदविषयत्वसिद्धिर्ज्ञापकादिति कथमिति चेत्, सुपेति तृतीयान्तपदोपस्थापितैकत्वसंख्या न विवक्षितेति तेन ज्ञापनात् तत्सिद्धिरिति गृहाण। "विशेषणं[4] विशेष्येण' इत्यत्र त्वनेकसुबन्तस्य विशेष्यसमर्पकताया विशेषणसमर्पकताया "वासंभवेनैकत्र[5] संख्याया अविवक्षां ज्ञापयित्वा चरितार्थस्य तस्यानेकस्थले संख्याया अविवक्षाज्ञापकत्वकल्पनाया असंभवेन च तत्पुरुषस्यानेकपदविषयत्वं न भवति। ननु द्वन्द्वे उत्तरपदे परतः पूर्वयोः सामानाधिकरण्यासंभवेन तस्यानेकपदविषयत्वं कथमिति चेत्, शृणु, पूर्वत्राविवक्षितसंख्याकविशेषनिरपेक्षं तृतीयान्तं सुपेतिपदं तत्रानुवर्तत इति तेन तस्यानेकपदविषयत्वमिति। एतेन 'द्वन्द्वबहुव्रीह्योस्तु सुप् सुपेत्यत्रैव संख्याप्रतीतिः। तत्र ज्ञापकेनैकैव संख्याप्रतीतिर्बाध्यते। तावता चरितार्थत्वाद् द्वितीयादिषु संख्याया अबाधः' इति निरस्तम्। ज्ञापकेन द्वन्द्वबहुव्रीह्योः सुप् सुपेति पदद्वये संख्या न विवक्षितेत्यसिद्धेः। विशेष[6]निरपेक्षं सुपेत्येकत्रैव बहुव्रीहौ संख्याया अविवक्षायास्तेन ज्ञापयितुमुचितत्वेन तावतैवेष्टसिद्धेश्च। **उपसर्जनार्थमिति**। सत्यनेकग्रहणे सुबित्येकमेव पदमनुवर्तनीयम्, न तु सुपेत्यपि, प्रयोजनाभावात्। तथा च सर्वेषां बहुव्रीहिघटकपदानामुपसर्जनत्वे सति चित्रगुरित्यादौ "गोस्त्रियोरुपसर्जनस्य'[7] इति ह्रस्वः सिध्यति। एवं च बहुव्रीहेर्ज्ञापकं विनैव बहुपदविषयत्वमपि सिध्यति, तथैव द्वन्द्वस्येति भावः। तदपि प्रयोजनं निरस्यति—**न वैतदपीति**। **चित्रगो इतीति**। अनेन भाष्येण प्राचीनैर्वैयाकरणैः प्रथमादिकाः सप्त विभक्तीर्निदर्श्यान्ते संबोधनप्रथमा निदर्शितेति गम्यते। तदेवानुसृतमनुभूतिना 'सारस्वते[8]। सर्वसमासविग्रहे पदानि नियतविभक्तिकान्येव, समासस्तु नानाविभक्तिपर इति मन्यमानः शङ्कते —**यदि तर्हीति**। एतेन 'अयं भावः— चित्रा गावो यस्येत्यस्मिन् विग्रहे न कस्यचिदनेकविभक्तित्वम्, यदपेक्षया वर्तिपदानामेकविभक्तित्वं स्यात्। अथ यथाकथंचिदन्यस्यानेकविभक्तित्वमाश्रित्य वर्तिपदस्यैकविभक्तित्वं व्यवस्थाप्यते, तदातिप्रसङ्गः। राज्ञो या कुमारी तां पश्य, तया कृतं,

---

[1] इत्येकसंज्ञा न — य.

[2] प्रदीपे 'एकनिवृत्त्यर्थम्' इत्यस्य व्यस्ततयानुवादोऽत्र।

[3] पा. सू. २. १. ५१.

[4] पा. सू. २. १. ५७.

[5] वा, असंभवेनेति छेदः।

[6] निरपेक्षे — प.

[7] पा. सू. १. २. ४८.

[8] सारस्वतव्याकरणेऽनुभूतिस्वरूपाचार्येण सप्तविभक्तिकथनानन्तरमेव 'आमन्त्रणे सिर्धिः' इत्यनेन सूत्रेण संबोधने विहितस्य सिप्रत्ययस्य 'समानाद्धेर्लोपोऽधातोः' इति सूत्रेण ह्रस्वसमानाक्षरादुत्तरस्य तस्य धिसंज्ञकस्य लोपं विधाय 'हे देव' इत्युदाहरणादिति भावः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्यै देहीत्याद्याश्रयेण कुमारीशब्दस्यैकविभक्तित्वादुपसर्जनह्रस्वत्वं स्यात्' इति निरस्तम्। मूले दृष्टान्तदार्ष्टान्तिकयोर्विग्रहे एकविभक्तित्वस्य समासेऽनेकविभक्तित्वस्य च दर्शितत्वेन तस्य व्याख्याननिरपेक्षत्वेनासंबद्धबहुप्रलापानर्थक्यात्। सर्वत्र विग्रहवाक्ये सर्वेषां पदानां न नियतविभक्तित्वम्, किंतु यस्मिन् सूत्रे विभक्तिविशेष उपात्तस्तत्सूत्रविहितसमासविग्रहे तद्विभक्तिविशेषान्तं पदं नियतविभक्तिकं भवति। बहुव्रीहौ तु प्रथमाविभक्तिर्विशिष्य गृहीतेति तद्विग्रहे प्रथमान्तान्येव पदानीति तत्र सर्वेषाम् [1]"एकविभक्ति च" इति सिध्यत्युपसर्जनत्वम्। षष्ठीतत्पुरुषे तु पूर्वपदस्य षष्ठीनिर्दिष्टत्वेन नियतविभक्तित्वेऽप्युत्तरपदस्य 'सुपा' इति सामान्यनिर्दिष्टस्य न नियतविभक्तित्वम्। अत एव समानाधिकरणेन [2]षष्ठीतत्पुरुषनिषेध उपपद्यत इत्याशयेन परिहरति — **एकविभक्तियुक्तमेवेति**। एतेन 'अयं भावः — नायं नियमः प्रथमान्तस्यैव कुमारीशब्दस्य षष्ठीसमासेन भाव्यमिति। किं तर्हि, द्वितीयाद्यन्तस्यापि। ततश्च समासे विधीयमाने एकविभक्तित्वाभावात् कुमारीशब्दस्योपसर्जनत्वाभावः' इति निरस्तम्। प्रतिज्ञामात्रेणाभिमतासिद्धेः। [3]**विभक्तियुक्तमपूर्वेति**। 'सविभक्त्यपूर्वनिपाते' इत्येव 'अन्यदपूर्वनिपाते' इत्येव वा ब्रूयादिति भावः। इदानीमन्यपदार्थे देवदत्तत्वादिविशेषरूपेणैव बहुव्रीहिर्वर्तत इति मन्यमानो मन्दबुद्धिः शङ्कते — **पदार्थाभिधान इति**। परिहरति — **न वानभिहितत्वादिति**। विशेषरूपस्येति शेषः। शेषार्थमविद्वान् मध्यस्थः कश्चित् पृच्छति — **कथमनभिहित इति**। **इदानीमेवोक्तमिति**। शङ्कित्रेति शेषः। उत्तरमाह — **सामान्येति**। चित्रगुशब्दादिना चित्रगव्यादिसंबन्धिसामान्यमेवाभिहितम्, न तु देवदत्तादिर्विशेष इति भावः। इदानीं विग्रहे यत्तच्छब्दप्रयोगाद्बहुव्रीहेः सामान्यपरत्वं, तत्र यत्तच्छब्दौ विहाय देवदत्तादिविशेषवाचकपदप्रक्षेपे तु तस्य विशेषपरत्वं भविष्यतीति मन्यमानः शङ्कते — **भवेत्सिद्धमिति**। [4]"तुष्यतु दुर्जनः' इति न्यायेन तदीयं देवदत्तादिपदघटितं विग्रहमभ्युपेत्य समाधत्ते — **तदापीति**। **नेदमुभयं युगपदिति**। पर्यायशब्दानां सहप्रयोगानौचित्यादिति भावः। [5]**सामान्ये तदा वृत्तिरिति**। विशेषोपस्थापकस्य देवदत्तादिपदस्य तत्राभावादिति भावः। एवं च यत्तच्छब्दघटित एव विग्रह उचित इति सूचितं भवति। पलायमानः पुनः शङ्कते — **सामान्यस्यैव तर्हीति**। समाधत्ते — **सामान्यमपीति**। तत्किंचित्सर्वादिशब्दैर्निर्दिष्टमिति शेषः। **यथा विशेषस्तद्वदिति**। संदेहनिवर्तकमिति शेषः। तत्सामान्यनिवर्त्यः संदेहः कीदृश इत्यत आह — **तत्रेति**। **चित्रग्विति**। सामान्ये नपुंसकम्। **अविश्वं वेति**। तद्वा किंचिद्वेत्यर्थः। **तत्रावश्यमिति**। उक्तसंदेहवारणायेति शेषः। **चित्रगु तदितीति**। किंचिदिति वा सर्वमिति वेति शेषः। तदेवं सर्वानुभवानुसारि क्षोदक्षमं चित्रा गावो यस्य स इत्यादियत्तच्छब्दघटितविग्रहेण प्रतीयमानमन्यपदार्थमाश्रित्यानुप्रयोगं समर्थ्य तर्कवासनामलिनान्तःकरणाभिमतान्यपदार्थमाश्रित्यापि तत् समर्थयितुमाह — **अथवेति**। **विभक्त्यर्थ इति**। कर्मत्वकरणत्वसंप्रदानत्वापादानत्वसंबन्ध[6]सामान्याधारत्वानामन्यतम इत्यर्थः। **अभिधीयत इति**। बहुव्रीहिणेति शेषः। तत्र तार्किकाणां युक्तिमाह — **एतच्चेति**। चोऽवधारणार्थः। एतदेवेत्यर्थः। तदेव युक्तमित्यत्र हेतुमाह — **तत्र हीति**। हि यस्मात् कारणात् **तत्र** विग्रहवाक्ये **सर्वपश्चात्** सर्वान्त्यम्, अस्येति षष्ठ्यर्थ-

---

[1] पा. सू. १. २. ४४.

[2] तत्पुरुषे निषेधः — ब.

[3] भाष्ये 'विभक्तियुक्तं चापूर्वं' इत्यत्र 'विभक्तियुक्तमपूर्वं' इति निर्णयसागरमुद्रिते पाठः।

[4] लौ. न्या. द्वितीयभागे पष्ठम् ३५.

[5] भाष्ये 'तदा सामान्ये वृत्तिः' इत्यत्र निर्णयसागरमुद्रिते 'सामान्येन तदा वृत्तिः' इति दृश्यते। 'सामान्ये तदा वृत्तिः' इति रत्नप्रकाशकृत्पाठ इति भाति।

[6] सामान्याधेयत्वानाम् — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रधानं पदं वर्ततेऽत इत्यर्थः। वस्तुतस्त्विदमयुक्तम्, चित्रा गावोऽस्येत्येतावन्मात्रस्य बहुव्रीहि-विग्रहत्वाभावात्। तेन ह्यस्य चित्रा गावः सन्तीत्यर्थः प्रतीयते। बहुव्रीहिणा तु चित्रगो-संबन्धीति। वृत्तिवाक्ययोश्च समानार्थकत्वेन भवितव्यम्। किं च तत्र षष्ठ्यर्थस्य [1]'स्वप्रकृत्यर्था-पेक्षया प्राधान्येऽपि चित्रगव्यपेक्षयाप्राधान्यमेवेति'[2] तस्य प्राधान्योक्तिरप्ययुक्ता। तन्मतस्य संभव-मभ्युपगम्य दूषणान्तरमाह — **विभक्त्यर्थाभिधान इति। अद्रव्यस्येति।** असत्त्वरूपस्य तस्य बहुव्रीह्यर्थस्येत्यर्थः। [3]**उपचारः** संबन्धः। प्रकारान्तरेण [4]तद्वचनं व्याचष्टे — **अपर आहेति।** समाधत्ते — **सिद्धं त्विति। गुणवचनेषूक्तमिति।** [5]'विशेषणानां चाजातेः' इत्यत्रेति शेषः। **तत् समासस्यापि भविष्यतीति।** ननु विभक्त्यर्थस्य संबन्धस्य द्विनिष्ठत्वात् किं द्रव्यगतलिङ्गसंख्याभ्यां योगस्तस्य भवतीति चेत् कर्मत्वादेरिवाविशेषणीभूताश्रयगतलिङ्गसंख्याभ्यामिति गृहाण। तत्र शब्दशक्तिस्वाभाव्याद्गवादेर्विशेषणतया भानं स्वामिप्रभृतेऽस्तु विशेष्यतया। ननु बहुव्रीहेर्विभक्त्यर्थ-परत्वे 'नीलो घटः' इत्यादाविव चित्रगुर्देवदत्त इत्यादौ भवत्वाश्रयतो लिङ्गवचनयोगः। कदाचित्तु घटस्य नील इतिवद् देवदत्तस्य चित्रगुरित्यपि प्रयोगः स्यात्। किंच सुगन्ध इत्युक्ते कस्येतिवत् चित्रगुरित्युक्ते कस्येत्येवाकाङ्क्षा स्यात्, क इत्याकाङ्क्षा न स्यात्। तस्माद्विग्रहे यत्तच्छब्दाभ्यां निर्दिशित एवार्थे बहुव्रीहिः। प्राधान्येन वर्तत इति वक्तुमुचितमित्याशयेनाह — **यदि तर्हीति। कृत्स्न इति।** अस्येति प्रकृतिप्रत्ययसमुदायार्थरूप इत्यर्थः। **कथमभिहितो भवतीति।** यद्युच्येत माभिहितो भूदिति, तर्हि केवलसंबन्धपरतयापि मदुक्तरीत्या प्रयोगः स्यात्, तादृशाकाङ्क्षा [6]चेति शेषः। तद्विदित्वा स तार्किकः प्रागुक्तमतमेव प्रविश्योत्तरमाह — **अर्थग्रहणसामर्थ्यादिति।** तत्सामर्थ्यमुपपादयति — **इहेत्यादि 'विज्ञास्यत' इत्यन्तेन।** सामर्थ्यमुपपाद्य तत्सिद्धमर्थमुपसंहरति — **सोऽयमित्यादिना ससंख्यश्चेत्यन्तेन।** तदेवं विग्रहे यत्तच्छब्दनिर्दिष्टेऽर्थे बहुव्रीहिः प्राधान्येन वर्तने सिद्धे सति तत्र कश्चिच्छङ्कते — **यदि तर्हीति। लैङ्गा इति।** टावादयः। **संख्याः** एक-वचनद्विवचनबहुवचनानि। **न सिद्ध्यन्तीति।** बहुव्रीहेर्न प्राप्नुवन्तीत्यर्थः। **उक्तं वेति।** वक्ष्यति चतुर्थे [7]'स्त्रियाम्' इत्यधिकारसूत्रे। **प्रातिपदिकविशेषणत्वादिति।** तथा च स्त्रियां वर्तमानात् प्रातिपदिकात् स्वार्थे टावादय इत्यभिहितेऽपि स्त्रीत्वे लैङ्गाः सिध्यन्तीति भावः। **सांख्येष्वप्युक्त-मिति।** तत्राप्युच्यत इत्यर्थः। **कर्मादीनामनुक्ता इति।** [8]'समासार्थानन्तर्गतक्रियादिनिरूपित-कर्मत्वाश्रयादिगतानामेकत्वादीनामनुक्तत्वादेकवचनादीनि भविष्यन्तीति भावः। **प्रथमा तर्हि न प्राप्नोतीति।** तस्याः प्रातिपदिकार्थमात्रे विधानात्। प्रातिपदिकार्थगतसंख्याया बहुव्रीहिणैवोक्त-त्वादिति भावः। **समयादिति।** [9]'न केवला प्रकृतिः प्रयोक्तव्या न केवलः प्रत्ययः' इत्येवंरूपा-च्छिष्टसंकेतादित्यर्थः। समयस्य विभक्तिसामान्यविषयत्वात् पर्यायेण प्रथमादयः सर्वा विभक्तयः स्युः, न प्रथमैवेत्याशयेनाह — **यदि सामयिकीति।** विभक्तिः स्यात् तर्हीति शेषः। **न नियोगत इति** प्रथमा स्यादिति शेषः। किं तर्हीत्यत आह — **अन्याः कस्मान्न भवन्तीति।** अन्या अपि स्युरेवेत्यर्थः। प्रातिपदिकेनाभिहित एवार्थे प्रथमा वचनाद् भविष्यति कर्माद्यविवक्षायाम्। तद्वि-वक्षायां तु ता अपि यथायथं [10]भवन्त्येव। सामयिकी तु विभक्तिः 'भीष्ममुदारं कटं करोति'

---

[1] 'स्व' इति नास्ति — ब.
[2] अप्राधान्यमेवेति छेदः।
[3] संचारः — ब, य.
[4] 'तद्वचनम्' इत्यस्यानन्तरं चकारोऽधिकः — य.
[5] पा. सू. १. २. ५२.
[6] वेति शेषः — ब; त्विति शेषः — य.
[7] पा. सू. ४. १. ३.
[8] समासार्थान्तर्गत — प.
[9] महाभाष्यम् १. २. ६४.
[10] 'भवन्त्येव' इत्यस्यानन्तरं 'वा' इत्यधिकम् — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादौ भीष्मादिविशेषणवाचकाद् द्वितीयादिरेव। स च समयोऽनन्वितार्थकविभक्त्यपेक्षयानुवादकविभक्तिरुचितेति न्यायसहितो विशेष एव पर्यवस्यतीत्येतत् सकलमभिप्रेत्याह — **कर्मादीनामभावादिति**। अन्या न भवन्तीत्यनुषज्यते। एतेन 'कर्मण्येव द्वितीयेत्येवं कर्मादिषु द्वितीयादीनां नियतत्वात् तदभावे तासामभावः' इति निरस्तम्। अस्य भाष्यस्यार्थनियमपक्षेऽपि युक्तत्वेन प्रत्ययनियमपक्षमात्रपरतया व्याख्याने मानप्रयोजनयोरभावात्। न ह्यर्थनियमपक्षे प्रातिपदिकार्थमात्रे द्वितीयादयः प्राप्नुवन्ति, येन [1]पक्षान्तरपरतया व्याख्यानं युज्येत। कर्मत्वाद्यभाव एव शेषः। स च प्रातिपदिकार्थमात्रे विवक्षितेऽप्यस्तीति मन्यमान आह — **षष्ठी तर्हीति**। कारकप्रातिपदिकार्थान्यः शेषः। तद्विषया षष्ठी प्रातिपदिकार्थे न भविष्यतीत्याशयेनाह — **शेषलक्षणेति। अशेषत्वादिति**। प्रातिपदिकार्थस्य तत्रेति शेषः। शङ्कते — **एवमपीति**। प्रातिपदिकार्थे प्रथमैव चेदपीत्यर्थः। एतेन 'समयात् प्रथमायामिष्यमाणायामित्यर्थः' इति निरस्तम्। [2]'प्रातिपदिकार्थ' इति सूत्रेणैव तत्र प्रथमायाः संभवात्। **व्यतिकरः** संकरः। तमेव दर्शयति — [**एकस्मिन्नपीति**]। परिहरति — **अर्थतो व्यवस्थेति**। समासेन तत्तत्संख्याविशेषस्यानवगमाद् देवदत्ताद्यनुप्रयोगव्यवस्थावद्वचनव्यवस्था भविष्यतीति भावः। ननु देवदत्तादयो बहुव्रीह्यर्थस्य विशेष्यसमर्पका इत्यस्तु तेषामनुप्रयोगव्यवस्था, प्रथमैकवचनादिकं तु विशेषणसमर्पकमिति कथं तस्यानुप्रयोग इति चेन्न, 'घटः, घटौ, घटाः' इत्यादाविव विशेषणीभूतसंख्यावोधनार्थं वचनविशेषानुप्रयोगस्यावश्यकत्वादित्याशयेनाह — **अथवेति**। **परप्रधानेति**। संख्येयप्रधानेत्यर्थः। तदेव स्पष्टयति — **संख्येयमनया विशेष्यमिति**। विशेष्यतां नाम, प्रकृते किमायातमित्यत आह — [3]**यदि चात्रेति**। **प्रथमेति**। प्रथमैकवचनादिकमित्यर्थः। **संख्येयमिति**। प्रातिपदिकार्थरूपमिति शेषः। **अविशेषितमिति**। एकत्वादिनेति शेषः। उक्तसमाधानेऽस्वरसाभावेऽपि बहुव्रीहिणैकद्व्यादिशब्दैरिव संख्याविशेषप्रतीतिमभ्युपगम्योत्तरमाह — **अथवेति**। **वक्ष्यतीति**। [4]प्रातिपदिकार्थलिङ्गादिसूत्र इति शेषः। घटादिप्रातिपदिकात् तेनाभिहिते प्रातिपदिकार्थे प्रथमेव [5]षष्ठ्यर्थे बहुव्रीहिणाभिहितेऽपि ततः षष्ठी स्यादिति मन्यमानः शङ्कते — **एवमपीति**। **षष्ठीति**। षष्ठ्येवेत्यर्थः। **किं कारणमिति**। षष्ठ्येवेत्यवधारण इति शेषः। लिङ्गसंख्ययोर्यथा व्यभिचारस्तथा षष्ठ्यर्थे बहुव्रीहिविशेषस्य व्यभिचाराभावात् तद्वोधनायावश्यं षष्ठ्येव ततः कर्तव्येत्याशयेनोत्तरमाह — **व्यभिचरत्येवायमिति**। [6]**न व्यभिचरतीति**। यतस्तत इति शेषः। वचनादभिहितेऽपि प्रातिपदिकेन प्रातिपदिकार्थे स्त्रीत्वे च प्रथमा टावादयश्च भवन्ति। अभिहिते षष्ठ्यर्थे तत्र षष्ठी भवतीत्यत्र न किंचिद्वचनमस्तीत्याशयेन समाधत्ते — **अभिहित इति**। व्याख्यातमिदं समर्थसूत्रे। एवं तर्हि बहुव्रीहेः कदापि षष्ठी न स्यादिति मन्यमानः पृच्छति — **न तर्हीदानीमिति**। उत्तरमाह — **भवतीति**। **बाह्यमर्थमपेक्ष्येति**। चित्रगवीतत्स्वामिरूपसमासार्थाद्बहिर्भूतो यो वस्त्रादिरूपोऽर्थस्तमपेक्ष्येत्यर्थः। तथा च 'चित्रगोर्देवदत्तस्य वस्त्रम्' इत्यादिप्रयोगो भवतीति भावः॥

[२, ७१०–७१९]

(उद्द्योतनम्) ननु त्रिकतः शेषग्रहणस्येदं प्रयोजनमुक्तम्, [7]न वचनापेक्षा, अत आह — **भाष्य-**

---

[1] पक्षान्तरतया — ब, य.

[2] पा. सू. २. ३. ४६.

[3] यदि वात्रेति — य.

[4] पा. सू. २. ३. ४६.

[5] षष्ठ्यर्थे घटाभिहितेऽतः षष्ठी स्यादिति — ब.

[6] 'न व्यभिचरतीति' इति नास्ति — प.

[7] अस्य 'अतः' इत्यादिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कारेणेति। वचनापेक्षामाह — **उच्चैःशब्दस्येति**। अत्र 'अनेकमन्यपदार्थे' इत्येव [1]'सिद्धेर्वचनं व्यर्थम्, अत आह — **समास इति**। ननूष्ट्रमुखशब्दस्योपमानपूर्वपदत्वं नास्ति, उष्ट्रमुखस्योपमानत्वेनोष्ट्रस्योपमानत्वाभावात्, अत आह — **अवयवधर्मेणेति**। भाष्ये उष्ट्रमुखमिवेत्यत्रोष्ट्रमुखशब्देनोष्ट्र एवोपमानत्वेन विवक्षित इत्युपमानपूर्वत्वोपपत्तिः। वृत्तावुष्ट्रशब्द एव मुखे वर्तते — उष्ट्रो मुखमस्येत्येव विग्रहः कार्य इत्यसकृदुक्तत्वादिति भावः। अत्र समासार्थमपि वचनमित्याह — **उपमानेति**। षष्ठयन्तस्यैव समास उक्ते उत्तरपदस्य तल्लोपस्य चाप्रसङ्गः, अत आह — **समुदायेति**। 'वर्तिपरिगणनम्' इत्यनेनार्थपरिगणनं कथं लभ्यते, अत आह — **वर्तनमिति**। भाष्ये **यद्वृत्तिसूत्र इति**। [2]'संख्यया' इति समाससूत्रे यत् समासवचनं [3]तस्य सार्थक्यमित्यर्थः। तदुपपादयति — [4]**संख्येयार्थस्येति**। व्याख्यानान्तरे 'यद्वार्तिके' इति भाष्ये इदं वार्तिकं विवक्षितमित्यभिप्रेत्य तदुपपादयति — **इदं चेति**। **अवक्तव्यमिति**। [5]'अन्यपदार्थे' इत्येव सिद्धत्वादित्यर्थः। द्वितीयव्याख्यानं दूषयति — **आद्यमेवेति**। 'ऊढरथः' इत्यत्र कर्मवचनमाह — **रथशब्द इति**। तत्र हेतुः — **ऊढशब्देनेति**। अप्रथमान्तरङ्गा गृह्यते, न बहिरङ्गेति 'वृष्टे देवे गतम्' इत्यत्र न समास इत्येतदुपपादयति — **वर्तीति**। पश्येत्येतदपेक्षा 'गतम्' इति द्वितीया बहिरङ्गेत्यर्थः। **असिद्धत्वादिति**। प्राप्तमुदकं ग्राममित्यादावन्तरङ्गायाः संभवाद् [6]'बहिरङ्गाग्रहणमित्यर्थः। नन्वस्तेः स्वरादिपाठादेवाव्ययत्वम्, अत आह — **स्वरादिष्विति**। कठ इत्यस्यानुत्तरत्वमाह — **वर्तिपदार्था इति**। बहुव्रीहिमुपक्रम्य 'केषाम्' इति तत्पुरुषविग्रहो न शङ्कार्हः, अत आह — **इष्टेति**। **दिगन्तराणि** मार्गान्तराणि, समासान्तराणीति यावत्। अन्तोदात्तत्वं समासस्वरेण, आद्युदात्तत्वं बहुव्रीहिस्वरेण। अत्र सुप् सुपेति समासो न[7] विशेषणसमास इत्याह — **सुप् सुपेति**। **प्रतिवचनमिति**। बहुव्रीहित्वात् स्वरोऽप्युपपन्न इत्यर्थः। अस्मिन् पक्षेऽरुच्या पक्षान्तरमित्याह — **अत्रापीति**। 'कठः' इत्युत्तरस्य प्रश्नवैयधिकरण्यं प्राप्नोतीत्यर्थः। तदेवाह — **अहमिति**। **विशेषाभावं** दोषवत्तया [8]'पूर्वप्रतिकारसाम्यं, मत्वा। ननु न्यायशब्देन समासेऽग्नाविति सप्तम्या लुका भाव्यम्। करवाणीति तिङन्तेन समासोऽप्ययुक्तः, [9]उदात्तगतिमत्त्वाभावात्, अत आह — **अग्नाविति**। अनुपस्थितस्य कर्मणः कथमभ्यनुज्ञा, अत आह — **सकर्मकत्वादिति**। कठाकठयोः सहाध्यायित्वमस्तु, अत आह — **तथा हीति**। **समान इति**। [10]'समानपूर्वे ब्रह्मण्युपपदे व्रते कर्मणि चरेर्णिनिर्व्रतलोपश्च' इति [11]'चरणे ब्रह्मचारिणि' इति सूत्रस्थवार्तिकादित्यर्थः। **ब्रह्म** वेदः। समासेन प्रश्ने बहुवचनान्तेनोत्तरस्यासंभवकथनाय 'न खलु' इति भाष्यं व्याचष्टे — **वर्तीति**। **कठा इत्येवेति**। वाक्येन प्रश्ने बहुवचनान्तमेवोत्तरम्, समासेन तु प्रश्ने एकवचनान्तमेवेति व्यवस्थेत्यर्थः। द्वयोरन्यपदार्थत्वमस्तु, अत आह — **इहेति**। अनयोरिति षष्ठ्यर्थोऽवयवावयविभावो वा स्वस्वामिभावो वा। नाद्य इत्याह — [12]**तृतीयस्येति**। न द्वितीय इत्याह — **स्वस्वामीति**। अस्मिन्

---

[1] सिद्धे वचनं — अ.
[2] पा. सू. २. २. २५.
[3] तस्यानर्थक्यमित्यर्थः — आ.
[4] प्रदीपे 'संख्येयस्य वार्थस्य चान्यपदार्थत्वात्' इति दृश्यते। 'संख्येयार्थस्य चान्यपदार्थत्वात्' इत्यत्रंमट्टपाठः स्यादिति भाति।
[5] अन्यथा पदार्थ इत्येव — अ.
[6] बहिरङ्गाया अप्रथमाया अग्रहणमित्यर्थः।
[7] न विशेषसमासः — अ.
[8] पूर्वप्रकारसाम्यं — अ.
[9] उदात्तवत्त्वाभावः सर्वस्य तिङन्तस्य तिङङतिङ इति निघातात्।
[10] का. वा. ६. ३. ८६–१.
[11] पा. सू. ६. ३. ८६.
[12] 'तृतीयस्येति' इत्यादि 'न द्वितीय इत्याह' इत्यन्तं नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पक्षे बहुवचनानुपपत्तिः कथं नोक्ता, अत आह — **समासस्येति**। समासो वचनस्य मूलम्, तदभावादित्यर्थः। ननु समुदायस्य समासार्थत्वे तस्यैकत्वाद् बहुवचनं न स्यात्, अत आह — **समुदायेति**। अभेदविवक्षया बहुवचनमित्यर्थः। ननु संयोगेनापि [1]'मत्वन्यपदार्थे बहुव्रीहिरित्येकवचनं सिद्धम्, अत आह — **द्वयोरिति**। द्वितीयशब्दस्यावयववचनत्वेनावयविनि द्व्यात्मकसमुदाये बहुव्रीहिर्वाच्यः, अन्यथा द्वितीयशब्दस्य सापेक्षतया समासाभावप्रसङ्गात्। अतस्तस्मिन्नुद्भूतावयवभेदे द्विवचनं प्राप्नोतीत्यर्थः। असारत्वमेवाह — **मातेति**। ननु [2]'द्वेस्तीयः' इति व्युत्पादितस्य कथं सहायवाचित्वम्, अत आह — [3]**अव्युत्पन्न इति**। कुत्र तद्गुणसंविज्ञानं कुत्र नेत्यत्र [किं] नियामकम्, अत आह — **संयोगेति**। **संबन्ध इति**। मत्वर्थे बहुव्रीहिरित्युक्तेः। अस्मिन् पक्षेऽरुच्या पक्षान्तरमित्याह — **द्विवचनेति**। अन्यपदार्थवर्त्येकत्वसंख्यैकवचनेनापि प्रतीयत इति 'यदि चात्रैकवचनम्' इत्ययुक्तम्, अत आह — **अयमर्थ इति**। **तथाभूतस्यैव** [4]बहुत्वविशिष्टस्यैव। समुदायपरस्यापि बहुवचनान्तत्वे दृष्टान्तः — **यथेति**। एकशेषस्य द्वन्द्वापवादत्वेन तत्समानार्थत्वादुदाहृतम्[5]। उभयत्रेतरेतरयोगस्य समुदायरूपत्वात् समुदायपरत्वं ज्ञेयम्। तथा समुदायवाचित्वेऽपि बहुवचनान्तः, उद्भूतावयवभेदसमुदायस्य वाच्यत्वादिति भावः। शङ्काशयमाह — **अर्धस्येति**। नन्ववयवोऽवयविनं विनापि वर्तत इति कथम् 'अर्धद्रोणो द्रोणं न व्यभिचरति' इति, अत आह — **द्रोणेनेति**। अर्धद्रोण इति व्यपदेशो द्रोणेन विना न भवतीत्यर्थः। अर्धाढकस्य व्यभिचारमाह — [6]**चतुराढकीति**॥

[२, ७१०–७१९]

(**रत्नप्रकाशः**) इदानीं शेषग्रहणमुक्तार्थान्यपरमिति मन्यमानोऽत्रापूर्वमपि बहु वक्तव्यं भवतीत्याह — **परिगणनमिति**। **उच्चैर्मुखमिति**। उच्चैःशब्दस्याधिकरणशक्तिप्रधानत्वात् प्रथमान्तत्वं न संभवतीति मन्यते। **बहुव्रीहिर्वक्तव्य इति**। सूत्रसिद्धस्यानुवादमात्रमिदम्। वक्तव्यस्तूत्तरपदलोप एव। **कण्ठेस्थ इति**। [7]'सुपि स्थः' इति कः। [8]'अमूर्धमस्तकात् स्वाङ्गादकामे' इति सप्तम्या अलुक्। **उष्ट्रमुखमिवेति**। उष्ट्रस्य मुखमिति षष्ठीतत्पुरुषः। स तत्सदृशे लक्षणया वर्तत इति सूत्रेणैव समासे सिद्धे उत्तरपदलोप एवात्रापि विधेयः। एतेन 'पदयोरुपमानोपमेयवृत्तित्वेन सामानाधिकरण्याभावात् समासोऽपि विधेयः' इति निरस्तम्। चन्द्रमुखीमीनाक्षीत्यादाविव पूर्वपदस्य तत्सदृशलक्षणाश्रयणेनैव समासस्य सिद्धत्वात्। **समुदायविकारषष्ठ्याश्चेति**। समुदायावयवभावे प्रकृतिविकारभावे च या षष्ठी तदन्तात् परं यत् तदन्तस्यान्येन यो बहुव्रीहिस्तत्र पूर्वपदावयवोत्तरपदस्य लोपो वक्तव्य इति भावः। शेषग्रहणस्य प्रथमापरत्वात् समानाधिकरणानामेव समासो भविष्यतीति वक्तव्येऽपि [9]यक्षानुरूपबलिन्यायेन तावदाद्यं समाधत्ते — **न वानभिधानादिति**। **सत्यनभिधान इति**। अनिष्टसमासनिवर्तक[10] इति शेषः। **वृत्तिपरिगणन-**

---

[1] मत्वर्थरूपेऽन्यपदार्थ इत्यर्थः।
[2] पा. सू. ५. २. ५४.
[3] 'अव्युत्पन्न इति' इत्यादि 'एकवचनमित्ययुक्तमत आह' इत्यन्तं नास्ति — अ.
[4] बहुव्रीहित्वविशिष्टस्यैव — अ, ऋ.
[5] भावे क्तान्तो बोध्यः, उदाहरणमित्यर्थः॥ तत्समानार्थमुदाहृतम् — ऋ.
[6] प्रदीपे 'चतुराढको द्रोणः' इत्यत्र 'चतुराढकी द्रोणः' इति चौखाम्बामुद्रिते पाठः।
[7] पा. सू. ३. २. ४.
[8] पा. सू. ६. ३. १२.
[9] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[10] इदं सप्तम्यन्तम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मिति। वृत्तिघटकपदपरिगणनमित्यर्थः। **वर्तिपरिगणनमिति**। बहुव्रीह्यर्थपरिगणनमित्यर्थः। **मत्वर्थ इति**। अधिकरणे संवन्धिसामान्ये चेत्यर्थः। **इह मा भूत् कष्टं श्रितमनेनेति**। यद्यप्यत्र बहुव्रीह्यभावः पूर्वं वार्तिककारेणैव [1]'द्वितीयाश्रितादि'सूत्रे साधितः, तथाप्यन्यार्थमत्रावश्यं 'मत्वर्थे' इति वक्तव्यमित्यनेनैव तदपि सिद्धमिति तत्रत्यज्ञापनानुसरणक्लेशो न भवतीति भावः। वस्तुतस्तु [2]'द्वितीयाश्रितादिसूत्रे तद्वार्तिककारमतस्य भगवता दूषितत्वात् तद्भाष्यरीत्या 'श्रितकष्टो गतग्रामः पतितग्रामः' इति बहुव्रीहिर्भवत्येव। अर्थविशेषप्रतिपत्तिस्तु प्रकरणादिना। 'मत्वर्थे' इत्युक्ते तवाभिमतः कष्टं श्रितमनेनेत्यत्र बहुव्रीह्यभाव एव सिद्ध इति न मन्तव्यम्, किं त्वन्यदपि किंचित् तवानुकूलं सिध्यतीत्याह भगवान् — **तथा चोत्तरस्य वचनार्थ इति**। स्ववचनं व्याचष्टे — **एवं च कृत्वेति**। 'अर्थनियमे मत्वर्थग्रहणम्' इत्युक्तमिति कृत्वेत्यर्थः। **वचनार्थ इति**। उक्तिर्वचनम्, भावे ल्युट्, वचनस्यार्थः प्रयोजनम्। क्रियावाचकस्य वचनशब्दस्य नित्यं कारकापेक्षास्तीति संबन्धिशब्दत्वात् 'उत्तरस्य' इति वाक्यपरकर्मषष्ठ्यन्तसापेक्षत्वेऽपि समासः। 'उत्तरस्य वचनार्थः' इत्यत्रोत्तरशब्दः [3]'संख्यया' इत्यादिसूत्रपर इति केचिद्वुद्धवन्तः। केचित्तु 'कर्मवचनेनाप्रथमायाः' इति वार्तिकपर इ[त्याहुरि]त्याह — **केचित्तावदिति**। **यद्वृत्तिसूत्र इति**। वृत्तेर्बहुव्रीहिरूपाया बोधकं सूत्रं **वृत्तिसूत्रम्**। तद्विषयकं यद्वचनमित्यर्थः। तस्य प्रयोजनमुपपन्नमिति शेषः। किं तत्सूत्रमित्यत आह — **संख्ययाव्ययासन्नेति**। ननु कबभावार्थत्वेनोक्तं सूत्रं भगवान् व्यवस्थापयिष्यतीत्यत आह — **अपर आहेति**। एतेन 'आद्यमेव मतं युक्तम्। न हि वार्तिककारः स्ववचनमेव ज्ञापकत्वेनोपन्यस्यति' इति निरस्तम्। वार्तिककारीयपरिगणनखण्डनव्याजेन वार्तिककारं प्रति भगवता वचनान्तरस्य कर्तव्यतया बोधितत्वेन तत्र वार्तिकस्यैवोपष्टम्भकत्वकथनौचित्यात्[4]। 'यद्वार्तिके' इत्यस्यानन्तरं किं तद्वार्तिकमित्याकाङ्क्षा वार्तिकव्याख्यानेनैवोपशाम्यतीति मनसि निधाय स्वरूपोपस्थापकेतिशब्दमन्तरेण वार्तिकं पठति — **कर्मवचनेनाप्रथमाया इति**। अप्रथमाया अर्थे वर्तमानं सुबन्तं कर्मवाचकेन समानाधिकरणेन समस्यत इति वाच्यमित्यर्थः। **ऊढरथ इति**। रथरूपे कर्मणि क्तस्य विधानादूढशब्दः कर्मवचनः। 'कर्तृवचनेनापि' इति वार्तिकान्तरमवतारयति — **यदीति**। **कर्तृवचनेनापीति**। अप्रथमाया इत्यनुषज्यते। तस्य प्रयोजनं पृच्छति — **अप्रथमाया इति किमर्थमिति**। **वृष्टे देवे गत इति**। वार्तिककारमतेऽन्यपदार्थे वर्तमानं सुबन्तमात्रं समानाधिकरणेन कर्तृवाचकेन समस्यत इत्यत्रातिप्रसङ्गः प्राप्नोति। सूत्रकारमते प्रथमान्तानामेव समानाधिकरणानां समास इति नोक्तस्थलेऽतिप्रसङ्गः। **बहिरङ्गात्राप्रथमेति**। 'प्राप्तोदको ग्रामः' इत्यादौ वर्तिपदार्थप्राप्त्यादिक्रियापेक्षाप्रथमार्थेऽन्तरङ्गे प्रत्यासन्ने चरितार्थं वचनं बाह्यदृशि[5]क्रियाद्यपेक्षतया बहिरङ्गे विप्रकृष्टेऽप्रथमार्थे न भवतीति भावः। अस्तीति तिङन्तमेव भवतीति मत्वाह — **सुबधिकार इति**। **उपसर्गविभक्तीति**। [6]'निपाता आद्युदात्ताः' इत्याद्युदात्तत्वे प्राप्तेऽस्तिशब्दः स्वरादावन्तोदात्तार्थं पठित इति भावः। एतेन 'स्वरादिपाठमनपेक्ष्यैतदुक्तम्' इति निरस्तम्। अस्तिक्षीरादौ लौकिकोदाहरणे स्वरस्यानावश्यकत्वेनौत्सर्गिकविभक्तिप्रतिरूपकत्वप्रयुक्तनिपातत्वेनापीष्टसिद्धिरित्यत्र भगवतस्तात्पर्यसंभवेन स्वरादिपाठाज्ञानकल्पनाया असंभवात्। स्वरादावेवाधुनिकेन केनचिदस्तिशब्दः पठित इति कल्पनासंभवाच्च। **के सब्रह्मचारिणोऽस्येति**। अयमिति शेषः। एतेन 'समासे उपसर्जने एकत्वमेव प्रतीयते' इति वदन्तः परास्ताः, [7]'प्रकृतभाष्य-

---

[1] पा. सू. २. १. २४.
[2] पा. सू. २. १. २४.
[3] पा. सू. २. २. २५.
[4] उपष्टम्भकथनौचित्यात् — ब.
[5] क्रियाद्यपेक्ष्यतया — ब.
[6] फिट्सूत्रम् ८०. निपाताद्युदात्तत्वे — ब.
[7] प्रागुक्तभाष्यविरोधात् — य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विरोधात्। **प्रतिवचनं नोपपद्यत इति**। 'के' इति बहुषु पृष्टेषु कठ इत्येकवचनान्तेनोत्तरमयुक्तमिति मन्यते। तदपि प्रतिवचनमुपपन्नमेवेति मनसि निधाय प्रष्टृबुद्धिपरीक्षार्थमाह — **एवं तर्हीति**। प्रष्टाह — **प्रतिवचनं चेति**। कठ इति कठा इति वा शेषः। षष्ठीतत्पुरुषे हि 'कठानाम्' इत्येव प्रतिवचनं न्याय्यम्। **स्वरे च दोष इति**। पूर्वपदप्रकृतिस्वरेणाद्युदात्त इष्यते। षष्ठीतत्पुरुषे त्वन्तोदात्तता स्यादिति भावः। कर्मधारयमभ्युपेत्याह — **एवं विग्रह इति**। **कः सब्रह्मचारीति**। एतद्भाष्यस्वरसेन चकाराघटित एव कर्मधारयविग्रहो युज्यते। तथा च 'नीलश्चासौ घटश्च' इत्यादिविग्रहस्त्वयुक्त एव। तत्र व्यर्थचकारप्रयोगाश्रयणानौचित्यात्। क्वचिद्भाष्ये चकारघटितविग्रहो दृष्टश्चेदपि तत्रान्धपरम्पराप्रसक्तलोकव्यवहारानुसारिणा केनचित् तत्र चकारः प्रक्षिप्त इति कल्पनीयम्। एवमेव हि [1]'अङ्गवृत्ते पुनर्वृत्तावविधिः' इति परिभाषायां निष्ठितग्रहणं प्रक्षिप्तम्। तच्च [2]'ज्ञाजनोर्जा' इति [3]'ज्यादादीयसः' इति च सूत्रे भाष्ये दृष्टे ज्ञातुं शक्यम्। इदानीं शङ्काकलङ्कानास्कन्दितं पक्षमाह — **कः सब्रह्मचारी तवेति**। लाघवार्थमत्र तवशब्दः प्रयुक्तः, विग्रहस्तु 'यस्य सः' इति यत्तच्छब्दघटित एव ज्ञेयः। अन्यथा वृत्तिवाक्ययोर्भिन्नार्थकत्वाभ्युपगमापत्तेः। तदेवं निर्दुष्टं पक्षमेकं व्यवस्थाप्याद्यपक्षं व्यवस्थापयितुमाह — **अथवेति**। एतेन 'अत्रापि पक्षे कठ इति प्रतिवचनं व्यधिकरणं प्राप्नोति। अहं कठ इति सामानाधिकरण्यं दृश्यत इति विशेषाभावं मत्वाह — **अथवेति**।' इति निरस्तम्। तस्मिन् पक्षे प्रश्नोत्तरयोः सामानाधिकरण्यसंभवेनौचित्येन च प्रबलत्वेन, संभवमात्रेणोत्तरस्य विशेषविषयत्वमापाद्य तत्रास्वरसकल्पनानौचित्यात्। विशेष्यसामानाधिकरण्याभ्युपगमेऽप्युत्तरपक्षेऽपि तदेवाश्रयणीयमिति [4]तदपेक्षया तस्यापकर्षयोगाच्च। **अग्नौकरवाणिन्यायेनेति**। वक्ष्यमाणप्रश्नप्रतिवचनद्वयसमुदायैकदेशानुकरणद्वारा तत्समुदायपरस्याग्नौकरवाणिशब्दस्य न्यायशब्देन दृष्टान्तपरेण कर्मधारयः। तं दृष्टान्तं विशदयति — **तद्यथेति**। **कर्तर्यनुज्ञात इति**। 'कुरु' इत्यत्र कर्तरि लोटः प्रवृत्तत्वेन प्रधानस्य कर्तुरेवानुज्ञा भवति प्राधान्येन, तद्विशेषणतया भासमानक्रियायास्त्वप्राधान्येनेति भावः। एतद्भाष्यस्वरसेनाप्याख्यातार्थविशेष्यक एव शाब्दबोधो न तु धात्वर्थविशेष्यक इति। **कर्मण्यनुज्ञात इति**। भावे प्रवृत्तेन लोटा प्राधान्येन क्रियैवानुज्ञायते। तत्र कर्तृत्वेन गम्यमानो युष्मदर्थोऽप्राधान्येनानुज्ञायत इति भावः। अग्नौकरवाणिन्यायं व्युत्पाद्येदानीं प्रष्टृसंमतप्रश्नप्रतिवचने अपि दृष्टान्तत्वेन स्वीकरोति — **यथैव खल्वपीति**। **के सब्रह्मचारिणोऽस्येतीति**। अस्य 'अयम्' इति शेषसहितस्यार्थे वर्तमानेन 'किंसब्रह्मचारी' इति शब्देन प्रश्ने कृते तत्र 'कठाः' इति बहुवचनान्तेन किंशब्दसामानाधिकरण्यार्हेणोचित उत्तरे दत्तेऽर्थाद्बहुव्रीहौ प्राधान्येन भासमानोऽपि कठ इति गम्यत इति दृष्टान्तार्थः। [5]दार्ष्टिन्तिके तद् दर्शयति — **एवमिति**। 'कठः' इत्येकवचनान्तेन बहुव्रीहिसामानाधिकरण्यार्हेण किंशब्दसामानाधिकरण्यानर्हेणोत्तरे दत्तेऽप्यर्थात् किंशब्दनिर्दिष्टा अपि कठा इति गम्यत इति भावः। ननु 'के सब्रह्मचारिणो यस्य सः' इत्यर्थकेन 'किंसब्रह्मचारी' इति शब्देन कृतस्य प्रश्नस्य 'कठः' इति, 'कठाः' इति, 'कठसब्रह्मचारी' इति च त्रेधा प्रतिवचनं दृश्यते, तद्वत् 'कठसब्रह्मचारिणः' इत्यपि प्रतिवचनं कुतो नेत्यत आह — **न खल्वपि त इति**। कुतो न शक्यास्ते समासेन प्रतिनिर्देष्टुमित्यत आह — **उपसर्जनं हि ते भवन्तीति**। हि यस्मात्, प्रधानार्थाभि-

---

[1] महाभाष्यम् ७. १. ३०.
[2] पा. सू. ७. ३. ७९.
[3] पा. सू. ६. ४. १६०.
[4] विशेष्यसामानाधिकरण्यापेक्षया, तस्योत्तरपक्षस्येत्यर्थः।
[5] दार्ष्टान्तिकं दर्शयति — य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रायेण शब्दः प्रवर्तते, कठास्तु तत्र समासे उपसर्जनं भवन्ति तस्मादिति भावः। एतेन "वर्तिपदार्थानामुपसर्जनत्वात् तदुपलक्षितस्यान्यपदार्थस्य प्राधान्यात् किंसब्रह्मचारिशब्देन समासेन तेषामभिधानाभावात् 'कठाः' इति बहुवचनान्तं प्रतिवचनं न कदाचिद् भवतीत्यर्थः" इति निरस्तम्। 'अग्नौ करवाणि' इति प्रश्नो यथा 'प्रधानकर्तृविशेषणीभूतक्रियाविषयस्तथा[1] 'किंसब्रह्मचारी' इति प्रश्नोऽप्यन्यपदार्थविशेषणीभूतसब्रह्मचारिविषयक इत्युपक्रमोपसंहाराभ्यां निर्णीतत्वेन तेषां समासेनाभिधानाभावे मानाभावात्। [2]"क्रियताम्' इति विशेषणीभूतक्रियानुज्ञावत् 'कठाः' इति विशेषणीभूतसब्रह्मचारिविषयकप्रतिवचनस्योपपन्नत्वात्। प्रतिवक्तुमित्येतत्पर्यायप्रतिनिर्देष्टुंशब्दघटितव्याख्येयभाष्यस्य समासेन प्रतिवचनासंभवपरतया सम्यगुपपन्नस्य कुकविकृतेरिवान्यथाव्याख्यानानौचित्याच्च। यदप्युक्तम् 'यदा तु के सब्रह्मचारिणोऽस्येति वाक्येन प्रश्नः क्रियते, न तु समासेन, तदा कठा इत्येव प्रतिवचनम्' इति। तदपि न, तन्मात्रस्य बहुव्रीहिविग्रहवाक्यत्वाभावात्। 'के सब्रह्मचारिणोऽस्यायम्' इति वा 'के सब्रह्मचारिणो यस्य सः' इति वा तद्विग्रहवाक्येन प्रश्नानुपपत्तेः। यत्किंचिद्वाक्येन प्रश्नस्य तदुत्तरावधारणस्य चासंगतत्वाच्च। तद्गुणसंविज्ञानोऽपि बहुव्रीहिर्भवतीत्यविद्वान् मन्दबुद्धिः पृच्छति — **अथेति**। **कः समासार्थ इति**। न कोऽपीति वा कुत्सितो वा समासार्थ इत्यर्थः। तदेव विवृणोति — **समासार्थो नोपपद्यत इति**। [3]'तुष्यतु दुर्जनः' इति न्यायेन विग्रहान्तरं परिगृह्णाति — **एवं तर्हीति**। **षष्ठ्यर्थो नोपपद्यत इति**। अर्धस्य द्वयोश्च परस्परं कोऽपि संबन्धो नास्तीति भावः। संबन्धाभावमेवानुभवारूढं करोति — **किं हीति**। न किंचिदिति भावः। यदि कश्चित् संबन्धस्तत्र स्यात् तर्हि 'एतयोः कार्षापणयोरिदमर्धम्, एतयोर्माषयोरिदमर्धम्' इति प्रतीयेत, तथा तु न प्रतीयत इति तदभावनिर्णयः। युक्तिसहं प्राचीनमेव विग्रहं परिगृह्णाति — **अस्तु तर्हीति**। **अवयवेन विग्रह इति**। अवयवोऽर्धरूपो वर्तिदार्थः, अर्धस्य द्वयोश्च समुदायोऽन्यपदार्थः, तयोश्चावयवावयविभावः संबन्ध इत्यन्यपदार्थतोपपन्ना तत्रेति भावः। द्वितीयशब्दमसहायार्थकमविद्वान् शङ्कते — **यद्यवयवेनेति**। **असिद्वितीय इति**। असिर्द्वितीयो ययोरिति विग्रहं मन्यते। पुनः [4]"तुष्यतु'न्यायेन द्वितीयं विग्रहं परिगृह्णाति — **अस्तु तर्हीति**। तत्रापि सहावस्थानलक्षणः संबन्धः संभवतीत्याशयेनाह — **नैष दोष इति**। एकप्रतिश्रयवाससदृशैनैकोदराविर्भविण भ्रात्रोरिवार्धतृतीयेन द्वयोः सहावस्थानलक्षणं संबन्धमुपपादयति — **इदं तावदित्यादिना युक्तो दृश्यतामित्यन्तेन**। **एतच्च वार्तमिति**। एतदप्यसारमित्यर्थः। तस्यासारत्वं दृष्टान्तेन द्रढयति — **तद्यथेति**। **अत्र चेदिति**। सहोषितसदृशेषु भ्रातृषु चेदित्यर्थः। अर्धतृतीयशब्दाद्बहुवचनासंभवं मनसि निधाय कार्याभावद्वारा तं दर्शयति — **इह तर्हीति**। **अर्धतृतीया इति**। वस्तुगत्यायं प्रयोगस्तिष्ठतीति कृत्वा बहुवचनान्तो निर्दिष्टः। तस्मिन् पक्षे इदं बहुवचनमनुपपन्नं स्यादिति तु भावः। मास्तु बहुवचनम्, किं ततः स्यादित्यत आह — **अर्धस्येति**। **अस्ति सहायवाचीति**। अन्यतरान्यतमशब्दवदव्युत्पन्न इति शेषः। **एवमपीति**। 'असिद्वितीयः' इत्यादौ द्विवचने वारितेऽपीत्यर्थः। [5]**भवति हीति**। तथा चोपलक्षणार्धेन[6] सह द्वयोरानयनं भविष्यतीति भावः। ननु भवतु [7]कथंचिदर्धस्यानयनम्, 'अर्धतृतीयाः' इति बहुवचनं तु नोपपद्यत इत्यस्वरसात् प्रौढिपरिगृहीतपक्षमुपेक्ष्य युक्तिसहमाद्यमेव पक्षं परिगृह्णाति — **अथवेति**। **संख्या**

---

[1] प्रधानकर्तुर्विशेषणीभूत — ब.

[2] 'कुरु' इत्यत्रेति भावः।

[3] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

[4] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

[5] भाष्ये 'भवति बहुव्रीहौ' इत्यत्र 'भवति हि बहुव्रीहौ' इति रत्नप्रकाशकृत्पाठ इति प्रतीयते।

[6] उपलक्षणभूतेनार्धेनेत्यर्थः।

[7] कथंचिदर्थस्यानयनम् — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नामेयमिति । त्रयाणां पूरणं 'तृतीयम्' इति तृतीयशब्दस्य व्युत्पादनात् त्रित्वसंख्यापरिच्छिन्न एवान्यपदार्थो न्याय्य इति बहुवचनमेव तत्र युक्तम्। [1]'शतं, यूथं, वनम्' इत्यादाववयवार्थानां पृथग्भानाभावेन समुदायस्यैकत्वेन भानादेकवचनं न्याय्यम्। यदा तु तत्रावयवप्राधान्यं विवक्षितं तदा 'गावः, वृक्षाः' इति बहुवचनं भवत्येव। शतशब्दस्तु स्वभावादवयवप्राधान्यविवक्षाया-मप्येकवचनान्त एव भवति 'शतं ब्राह्मणाः' इ[ती]ति भावः। इदानीं समुदायवाचकशब्दस्य समुदायावयवसाधारण्येनानुप्रयोगो न युज्यत इति शङ्कते — **इहेति** । कुत्रेत्यपेक्षायामाह — **अर्धतृतीया द्रोणा इतीति**। अत्रेति शेषः। **समुदाय इति**। द्रोणसंज्ञकपरिमाणविशेषपरिच्छिन्ने व्रीह्यादाविति शेषः। **अवयव इति**। अर्धरूप इति शेषः। **अवयवेष्वपीति**। समुदायधर्मा-रोपेणेति शेषः। एवमप्यतिप्रसङ्गो भवतीति शङ्कते — **कामं तर्हीति** । **अर्धाढकं चेति** । [2]विवक्षितं तदेति शेषः। **कर्तव्यमिति**। प्रयोक्तव्यमित्यर्थः। उत्तरमाह — **न कर्तव्यमिति**। न प्रयोक्तव्यमित्यर्थः। कुत इत्यत आह — **समुदायेष्विति** । **अर्धद्रोणो द्रोणमिति**। यदर्धं येनावयविना विशेषयितुं शक्यते, तदर्धं तदवयविरूपसमुदायं न व्यभिचरति। तथा चाढकस्यार्धं द्रोणेन विशेषयितुं न शक्यत इत्याढकार्धं द्रोणं व्यभिचरतीति तद्वाचिनोऽर्धशब्दस्य तृतीयशब्देन द्रोणेष्वन्यपदार्थेषु समासो न भवतीति भावः। एतेन 'द्रोणेन विनास्याभावादित्यर्थः' इति निरस्तम्। द्रोणेन विनाप्यर्धद्रोणस्य भावात्। न ह्यर्धद्रोणे व्रीहौ सति द्रोणो व्रीहिरस्ति॥

संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये २. २. २५.

[२, ७१९–७२४]

(उद्द्योतनम्) डजन्तत्वेन बहुव्रीहिनिश्चयात् 'कः समासः' इत्ययुक्तम्, अत आह — [3]**द्वित्रा इति**। **आत्वेति**। [4]"द्व्यष्टनः संख्यायामबहुव्रीह्यशीत्योः' इति बहुव्रीहित्वाभावे 'द्वात्राः' इति स्या-दित्यर्थः। **स्वाभिप्रायं** [5]'विग्रहासंभवरूपम्। तमेवाह — **यदीति**। डजसिद्धौ हेतुः — **असं-ख्येयेति**। द्विवचनप्रसङ्गमुपपादयति — **विकल्प इति**। प्रकृते कथं न्यायसिद्धत्वम्, अत आह — **अयमर्थ इति**। अत्र 'अनिर्ज्ञातेऽर्थे' इत्यत्र। **अन्तर्भावितेति**। एको द्वौ त्रयश्चत्वारो वेति विमर्शविषयसंख्यायाः प्रश्नविषयत्वाद् बहुवचनमित्यर्थः। 'पञ्चाधिष्ठाना वाक्' इत्येतदुप-पादयति — **विरुद्धेति** । **विमर्शस्य** विचारस्य। उक्तं पक्षद्वयस्यार्थभेदं श्लोकेन संगृह्णाति — [6]**संशये चेति**। संशये वाशब्द इति पूर्वपरिहारः, तत्पूर्वके विचारे वाशब्द इति द्वितीयः परिहार इति भावः। स्वपदविग्रहं विहायास्वपदविग्रहे हेतुमाह — **अयं भाव इति** । विरोधमेवाह — **तथा हीति**। सुजन्तस्य संख्यावाचित्वाभावे हेतुमाह — **सुजन्तस्येति**। **वर्गाविति**। [7]"पञ्चद्दशतौ वर्गे वा' इति निपातनादित्यर्थः। ननु 'वाक्ये श्रुतस्य सुचः कथं समासे लोपवचनं विनाश्रवणम्,[9]

---

[1] तत्र यूथं — ब.

[2] विवक्षिततयेति शेषः — प.

[3] 'द्वित्रा इति बहुव्रीहिनिमित्तस्य' इति विशिष्टः कैयटग्रन्थत्वेनाभिमतः, न 'द्वित्रा इति' इति प्रतीकत्वेन।

[4] पा. सू. ६. ३. ४७.

[5] विग्रहसंभवरूपम् — अ.

[6] एतत्प्रतीकविषयः श्लोकः उपलभ्यमानेषु प्रदीपकोशेषु न दृश्यते।

[7] पा. सू. ५. १. ६०.

[8] वाक्यश्रुतस्य — अ.

[9] अश्रवणमिति छेदः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अत आह — **न हि वाक्योपमर्दनेनेति**। अत्रेत्यस्य वाक्यपरत्वे विरोधादाह — **वृत्तावित्यर्थ इति**। नित्यशब्दपक्षमाश्रित्याह — **शब्दशक्तीति**। यदर्थे यद्विधीयते तत्र तस्याप्रयोगं दृष्टान्तेनाह — **यथेति**। समाधानाशयमाह — **न हीति**। द्वन्द्वेऽपि चार्थाभिधानं स्वाभाविकम्, न वाचनिकमिति भावः। 'स चोक्तः' इत्ययुक्तम्, तस्य संख्येयत्वाभावात्, अत आह — **क्रियाभ्यावृत्तीति**। **एतच्चेति**। द्वौ दशेति विग्रहो विरोधान्न क्रियत इत्यादिनेत्यर्थः। द्वौ दशताविति विग्रहोऽपि युक्त इत्याह — **अनेनैवेति**। भाष्यकारानुक्तौ स्पष्टत्वं हेतुमाह — **न्यायेति**। वृत्तिवाक्ययोः शब्दभेदेऽर्थभेदे च संमतिमाह — **तदुक्तमिति**। वाक्येषु विशेषाः सुजादयः श्रुता यद्यपि, तथापि शब्दान्तरत्वाद्युज्यते। अर्थान्तरनिबन्धनो वृत्तिशब्दोऽन्य एवेति तत्र तदश्रवणमपि युज्यत इति श्लोकार्थः। विंशतिशब्दस्य संख्यावृत्तित्वात् संख्येयस्यान्यपदार्थत्वमित्याह — **अधिकेति**। भाष्ये **दशदर्थ इति**। [1]'पङ्क्तिविंशति' इत्यादिना त्रिंशदादयो निपात्यन्ते। तत्र यद्यपि [2]'तदस्य परिमाणम्' इत्यधिकारात् त्रयो दशतः परिमाणमस्येति परिमाणिनि शत्प्रत्ययस्त्रिदशच्छब्दस्य त्रिन्भावश्च निपात्यते, तथापि तेषां रूढत्वेन कथंचिद्व्युत्पाद्यत्वात्, लोके च संख्यायां संख्येये च प्रयोगदर्शनात् संख्यामात्रेऽपि शत्प्रत्ययो वाच्य इत्यभिप्रायेण संख्याविवक्षया 'दशदर्थे' इत्युक्तम्। तद्व्याचष्टे — **संख्यान इति**। 'इदं तु' इत्यस्य तात्पर्यमाह — **दशशब्देनेति**। एकादिदशपर्यन्तशब्दानां संख्येयवृत्तित्वमेव, न संख्यावृत्तित्वमिति भावः। अव्ययविचारस्य प्रयोजनमाह — **बहुव्रीहीति**। अनेन विभागो न प्रतीयते, अत आह — **समीपिप्राधान्य इति**। समीपशब्देन समीपी विवक्षित इत्यर्थः। समीपशब्दस्य समीपिपरत्वे [3]'कस्य समीपम्' इति वक्तव्यम्, न तु 'सामीप्यम्' इति, अत आह — **धर्मेणेति**। पदार्थमुक्त्वा प्रश्नतात्पर्यमाह — **उपशब्दो हीति**। **तदेति**। तथा च पूर्वेणैव सिद्धेरव्ययग्रहणं न कर्तव्यमित्यर्थः। **स एव उपस्यार्थ इति** येनोक्तं स समाधातैव। तत्र 'यदि' इत्ययुक्तम्, अत आह — **यदेति**। उक्तानुवादपूर्वकं 'तत्र' इत्यस्याभिप्रायमाह — **एवमिति**। ननु बहुव्रीहित्वे वैभाषिककप आवश्यकत्वात् कथं 'कबभावार्थम्' इत्युक्तम्, अत आह — **शेषादिति**। तत्र शेषग्रहणं स्वर्यते। ततश्च शेषाधिकारविहितबहुव्रीहेरेवात्र [4]ग्रहणमित्यर्थः। किं ततः, तत्राह — **अनेकमिति**॥

[२, ७१९–७२४]

(**रत्नप्रकाशः**) 'द्वित्राः' इत्यत्र बहुवचनोपपत्तिजिज्ञासया पृच्छति — **द्वित्रा इति**। एतेन 'बहुव्रीहिनिमित्तस्य डचो दर्शनादात्वाभावाच्च निश्चिते बहुव्रीहित्वे विग्रहनिश्चयाय प्रश्नः' इति निरस्तम्। आत्वाभावडज्भ्यां बहुव्रीहित्वनिर्णयापेक्षया 'द्वौ वा त्रयो वा द्वित्राः' इति विग्रहनिश्चयस्य सुलभत्वेन प्रश्नस्य विग्रहविषयत्वकल्पनानौचित्यात्। 'भवेत्' इत्यादिना प्रष्ट्रा स्वाशयस्यान्यथैव दर्शितत्वात्। 'स्वाभिप्रायं [5]दर्शयितुमाह — **कोऽस्य विग्रह इति**' [इति] स्वोत्तरग्रन्थविरोधात्। बहुवचनानुपपत्तेरर्थप्रयुक्तत्वेन तत्र विग्रहान्तराभावेन विग्रहविषयकसंदेहासंभवाच्च। न ह्यात्वाभावडज्भ्यां बहुव्रीहित्वनिश्चयवतो द्वौ त्रयो येषामुन्मुग्धानामिति विग्रहसंभावना भवति, येन विग्रहविषयकः संदेहः स्यात्। तस्य तत्संभावनाभावस्तु तद्विग्रहेण समासेऽन्यपदार्थस्य

---

[1] पा. सू. ५. १. ५९.
[2] पा. सू. ५. १. ५७.
[3] तस्य — अ.
[4] 'तत्र' इति युक्तं भाति।
[5] प्रदीपस्थस्य प्रकाशयितुमित्यस्यार्थानुवादः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संख्येयत्वाभावेन "बहुव्रीहौ संख्येये डजबहुगणात्'[1] इति डजभावे सति द्वित्रा इति रूपासिद्धचा ज्ञेयः। तस्माद्यत्किंचिदेतत्। 'केचित्तावदाहुः' इत्यस्य कर्म दर्शयति — **अनिर्ज्ञातेऽर्थे बहुवचनं प्रयोक्तव्यमितीति**। तथा च जात्याख्यायामेकस्मिन्निव तत्र द्वयोर्बहुवचनं वचनबलाद् भवतीति भावः। एतेन 'केचिद् वचनमेतदित्याहुः। अन्ये तु न्यायसिद्धं मन्यन्ते। अयमर्थः — संशयोऽत्र वार्थो न विकल्पः। स चानियतसंख्याविमर्शीति विमर्शविषयबहुत्वसद्भावाद्बहुवचनम्। अर्थशब्देनात्र संख्यैवोच्यते। संख्यायामज्ञातायामित्यर्थः' इति निरस्तम्। संदिग्धे विषये 'कियान् भवतः पुत्रः, कियन्तौ भवतः पुत्रौ, कियन्तो भवतः पुत्राः' इति त्रेधा प्रश्ने प्रसक्ते किंवृत्तप्रकृतिकबहुवचनान्तेनैव प्रश्नः कर्तव्यो न तु [2]तत्प्रकृतिकेनैकवचनान्तेन द्विवचनान्तेन [3]वेति नियमार्थं तद्वचनमिति स्पष्टं प्रतीयमानत्वेन तस्य न्यायमूलकत्वकल्पनानौचित्यात्। द्वित्रा इत्यादेर्विग्रहवाक्ये प्रविष्टस्य वाशब्दस्य विकल्पपरताया एवौचित्येन तदादायैव न्यायस्य 'अपर आह' इत्यादिना भगवतैव वक्ष्यमाणत्वेन च वाशब्दस्य संशयपरत्वाश्रयेण न्यायव्युत्पादनानौचित्याच्च। **कति भवत इति**। एवं 'कियन्तो भवतः' इत्यपि प्रश्नो ज्ञेयः। एतेन 'अन्तर्भावितपूर्वसंख्या बहुत्वसंख्या पृच्छ्यत इति बहुवचनम्' इति निरस्तम्। 'अनिर्ज्ञातसंख्याकेऽर्थे बहुवचनं प्रयोक्तव्यम्' इति प्रकृतवचनविरोधेन प्रश्नस्य बहुत्वविषयत्वकल्पनानौचित्यात्। अन्यथा 'एकः' इति वा 'द्वौ' इति वा [4]प्रतिवचनस्यासंगतत्वापत्तेश्च। नन्वनिर्ज्ञातेऽर्थे भवतु बहुवचनं वचनबलात्, प्रकृते तु संख्या निर्ज्ञातैवेति पक्षे द्विवचनं स्यात्। उक्तवचनं तु संशयाद्यत्र प्रश्नस्तद्विषयकत्वेन चरितार्थं भविष्यतीत्यत आह — **अपर आहेति। द्वौ वेत्युक्ते त्रयो वेति गम्यत इति**। विकल्पपरस्य वाशब्दस्य पक्षान्तरे संख्यान्तरविशिष्टानुमतिमन्तरेणानुपपन्नत्वाद् द्वित्वसंख्यातिरिक्तसंख्याकोऽनुमत इति प्रकृते त्रिशब्दस्योपादानात् त्रयो वेति गम्यत इति विशेषमुखेनोक्तम्। एवमुत्तरवाक्येऽपि ज्ञेयम्। **पञ्चाधिष्ठाना वागिति**। द्वित्रिशब्दाभ्यां द्वित्वत्रित्वविशिष्टवाचकाभ्यां घटितत्वादिति भावः। **तत्र युक्तं बहुवचनमिति**। तत्र पञ्चस्वभिधेयेषु [5]"बहुषु बहुवचनम्' इत्युक्तेर्बहुवचनमुपपन्नमिति भावः। 'कति भवतः पुत्राः' इत्यत्र तु कतिशब्दस्य नित्यं बहुवचनान्तत्वेन वचनमन्तरेण बहुवचने सिद्धेऽपि कतिशब्देनैव प्रश्नः कर्तव्य इत्यत्र मानाभावेन कियच्छब्देन यदा प्रश्नः प्राप्तस्तदैकवचनद्विवचनान्तेन प्रश्नव्यावृत्त्यर्थं प्रागुक्तं वचनमावश्यकम्। न हि कियच्छब्दो [6]द्वित्रशब्दवन्नियमेन बह्वधिष्ठानो भवति, येन वचनमन्तरेण ततो नियमेन बहुवचनं स्यात्। यद्युच्येत — 'कियन्तो भवतः पुत्राः' इत्यत्राप्येको वा द्वौ वा बहवो वेत्यर्थस्य गम्यमानत्वेन कियच्छब्दोऽपि द्वित्रशब्दवद्बह्वधिष्ठान इति, तर्ह्यस्तु तत्रापि वचनमन्तरेणैव बहुवचनम्। एवं च प्राग्दूषितकैयटोऽपि नातीव दुष्यति। 'द्विर्दश' इति विग्रहानुसारेण सुजन्तस्य द्विरित्यस्य दशशब्देन समासो विधीयत इति मन्यमान आह — **संख्यासमास इति**। 'द्विदशाः' इत्यादौ संख्योत्तरपदे समासे पूर्वपदस्य सुजन्तत्वेन संख्यावाचित्वाभावात् संख्या संख्यया बहुव्रीहिरिति प्रकृतसूत्रेण संज्ञाविधानं न घटत इति भावः। [7]"तुष्यतु दुर्जनः' इति न्यायेन विग्रहान्तरं परिगृह्णाति — **एवं तर्हीति। द्वौ दशताविति**। "[8]पञ्चद्दशतौ वर्गे वा' इत्यतिप्रत्ययान्तो[9] दशच्छब्दो वर्गे निपातितः। दशानां

---

[1] पा. सू. ५. ४. ७३.
[2] तत्प्रकृतिकैकवचनान्तेन — ब.
[3] चेति — प, ब, य.
[4] प्रतिवचनस्य संगतत्वापत्तेश्च — य.
[5] पा. सू. १. ४. २१.
[6] द्वित्रिशब्दवत् — य.
[7] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[8] पा. सू. ५. १. ६०.
[9] डतिप्रत्ययान्त इत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वर्गो दशत्, तौ द्वावित्यर्थः। दशच्छब्दस्य संख्यावाचित्वाभावात् स दोषस्तदवस्थ इत्याह — **एवमपीति। न वा सुजन्तत्वादिति।** वृत्तिविषये द्विशब्दस्य सुजर्थलक्षकत्वाश्रयणात् सुजभावस्तत्रेति भावः। तमाशयमविद्वान् पृच्छति — **किं पुनरिति।** इतरः स्वाभिप्रायमाह — **सुजभाव इति। अभिहित इति।** पूर्वपदस्य सुजर्थलक्षकत्वेन तद्विशिष्टार्थस्य समासेनाभिधानसंभवात् तत्र सुज् न कृत इति भावः। एतेन 'शब्दशक्तिस्वाभाव्यात् समासः सुजर्थं प्रत्याययतीत्यर्थः'[1] इति निरस्तम्। पूर्वपदस्य तत्र सुजर्थलक्षकत्वेनोपपत्तावगतिकगतिभूतस्वभावकल्पनानौचित्यात्। पूर्वपदे लक्षणेति तदभिमतमविद्वान् समासेनाभिहित इति यथाश्रुतग्राही सुजर्थे समासस्याविधानात् तदयुक्तमिति मन्यमान आह — **किं च भो इति।** 'यक्षानुरूपबलिन्यायेन पूर्वपदे लक्षणां विनापि समासेनैव सुजर्थोऽभिधीयत इत्यभ्युपगम्याह — **न खल्विति। स चेति।** समास इत्यर्थः। **क्रियाभ्यावृत्त्यर्थ इति।** स्वभावादिति शेषः। तदुक्तं हरिणा —

[2]"शब्दान्तरत्वाद्वाक्येषु विशेषा यद्यपि श्रुताः।
वृत्तिशब्दोऽन्य एवायमर्थान्तरनिबन्धनः॥' इति।

एतेन 'द्वौ दशतावित्यपि विग्रहवाक्यं [3]सम्यगेव' इति निरस्तम्। समासेन वर्गद्वयप्रतीत्यभावे तद्विग्रहाश्रयणानौचित्यात्। इदानीमिदं सूत्रमेवानर्थकं पूर्वेण सिद्धत्वादिति शङ्कते — **अशिष्य इति।** अनेन सूत्रेणेति शेषः। तथा च प्रकृतं सूत्रं व्यर्थमिति मन्यते। [4]**संख्येयवार्थाभिधायित्वादिति।** तस्य संख्योत्तरपदबहुव्रीहेरिति शेषः। स तु पूर्वसूत्रसिद्धत्वे हेतुः, पूर्वसूत्रसिद्धत्वं तु प्रकृतसूत्रानर्थक्य इति विवेकः। 'द्वौ वा त्रयो वा द्वित्राः' इत्यादौ वार्थस्यान्यपदार्थत्वाश्रयणात् पूर्वेण सिद्धिः। 'द्विदशाः' इत्यादौ तूत्तरपदस्य दशत्वादिसंख्यापरत्वं संख्येयस्यान्यपदार्थत्वं चाश्रित्य द्वे दशत्वे येषां ते द्विदशा इत्यर्थाश्रयणात् [5]तथा। अव्ययासन्नादूराधिकशब्दानामपि संख्यापरदशादिशब्दसामानाधिकरण्यसंभवेन उप दश येषां ते उपदशाः, आसन्ना दश येषाम्, अदूरा दश येषाम्, अधिका दश येषां त इति पूर्वेण सिद्धिः। विंशत्यादिशब्दानां संख्यापरत्वं संख्येयपरत्वं च संभवतीत्युपविंशादयः पूर्वेण सिद्धा भवन्तु नाम, आदशतः संख्यास्तु संख्येयपरा एवेति 'उपदशाः' इत्यादयः पूर्वेण न सिध्यन्तीत्याशयेनाह — **भवेत्सिद्धमिति।** [6]**दशदर्थ इति।** संख्यायामित्यर्थः। **परिमाणिनीति।** संख्येय इत्यर्थः। **यत्र** 'अधिकदशाः' इत्यादौ। इदानीमव्ययासन्नादिपूर्वपदबहुव्रीहौ पूर्वपदार्थप्राधान्यमेव भासते, न त्वन्यपदार्थप्राधान्यम्, अतः पूर्वेण तस्य न गतार्थतेत्याशयेनाह — **अथोपदशा इति।** शङ्किताह — **बहुव्रीहिरिति।** इतरः पृच्छति — **कोऽस्येति।** शङ्किताह — **दशानामिति। समीप इति।** समीपस्था इत्यर्थः। तथा चाव्ययीभावः समीपमात्रपरोपशब्दस्य, बहुव्रीहिस्तु समीपिपरस्येति व्यवस्था सिद्धा। समाधाता पृच्छति — **कस्य पुनरिति।** शङ्किताह — [7]**उपशब्दस्येति।** समाधाताह — **यद्येवमिति। नान्यपदार्थो भवतीति।** उपशब्दार्थ इति शेषः। तथा च पूर्वेण न गतार्थतेति भावः। ननु तर्हि 'संख्ययाव्ययासन्नादूराधिकाः संख्येये' इत्येतावदेव सूत्रमस्तु। दशादिशब्दानां संख्येयमात्रवृत्तित्वेऽपि सूजर्थवार्थरूपा-

---

[1] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.

[2] वाक्यपदीयम् ३. १४. २१५. अत्र उत्तरार्धे 'वृत्तिशब्दोऽन्य एवायं सामान्यस्याभिधायकः' इति दृश्यते।

[3] कैयटार्थानुवादोऽयम्।

[4] वार्तिके 'संख्येयवाभिधायित्वात्' इत्यत्र 'संख्येयवार्थाभिधायित्वात्' इति चौखाम्बामुद्रिते पाठः।

[5] पूर्वेण सिद्धिरित्यर्थः।

[6] दशदाद्यर्थ इति — व, य.

[7] भाष्ये 'उपस्य' इत्यस्य स्थाने 'उपशब्दस्य' इति पाठ आश्रितः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न्यपदार्थे 'द्विदशाः, द्वित्राः' इत्यादिवहुव्रीहेः सिद्धत्वेन द्वितीयसंख्याग्रहणस्यानर्थक्यादित्याशयेनाह — **तत्रेति । प्रथमानिर्दिष्टमिति।** प्रथमान्तपदावयवतया वर्तमानमित्यर्थः। परिहरति — **मत्वर्थे वेति।** तथा च सुजर्थो वार्थश्च मत्वर्थो [1]नेति न पूर्वेण गतार्थतेति भावः। ननु 'मत्वर्थे वहुव्रीहिरिति वक्तव्यम्' इति भगवता वार्तिककारं प्रति प्रसङ्गादापादितं तत्, न हि तावता पूर्वसूत्रं मत्वर्थविषयकमिति सूत्रकृतो वार्तिककृतो वा संमतमिति कल्पयितुं शक्यत इत्यत आह — **कबभावार्थं वेति।** डच्प्रत्ययस्योपदशा इत्यादौ प्रतिपदोक्ते चरितार्थत्वेन 'द्विदशाः, द्वित्राः' इत्यादौ पूर्वसूत्रसिद्धे [2]'शेषाद्विभाषा' इति कप् स्यादिति भावः। नन्वन्यपदार्थप्रधानो वहुव्रीहिरिति लक्षणानुसारेण 'उप समीपस्था दश येषां ते उपदशाः', नवैकादश वेत्यर्थः। एवम् 'आसन्नदशाः, अदूरदशाः' इत्यनयोरर्थः। अधिके आधिक्ये अवधयो दश येषां ते अधिकदशाः, एकादशप्रभृतयः। एवं च व्यर्थमेवेदं सूत्रमिति चेच्छृणु, 'संख्येयपरया संख्ययाव्ययादयः समस्यन्ते संख्येयेऽन्यपदार्थे' इति संख्येयशब्दावृत्त्या प्रकृतसूत्रं व्याख्येयम्। तेन शोभना **विंशतिः** विंशतित्वं येषां ते सुविंशतिका इत्यादौ [3]'अनेकमन्यपदार्थे' इति सूत्रेण कृते समासे कब् भवति। कबभावे सति तु 'सुविंशतयः' इति भवति। [4]'विंशत्याद्याः सदैकत्वे' इति त्वत्र न भवति, सुविंशतिशब्दप्रभृतेरसंख्यात्वात्। न हि सुविंशतित्वं नाम काचित् संख्यास्ति, येन ते संख्याशब्दाः। प्रकृतसूत्रविहितसमासात्तु[5] प्रतिपदोक्तात् डचि 'द्वित्राः, द्विदशाः' इत्येव भवतीति तथा व्यवस्था सिध्यति। प्रकृतसूत्राभावे तु विशेषाभावात् सर्वत्र डच् स्यादिति ॥

दिङ्नामान्यन्तराले २. २. २६.

तेन सहेति तुल्ययोगे २. २. २८.

[२, ७२५–७२७]

(उद्द्योतनम्) तुल्येति। [6]उभयत्राप्यन्यपदार्थवृत्तित्वसाम्यादित्यर्थः। 'अशिष्यः' इति नाध्याहारः, किं तु वार्तिकस्थचकारेण पूर्ववार्तिकस्थस्यानुषङ्ग इत्याह — **अशिष्य इति।** विभज्य हेतुद्वयं[7] सूत्रद्वयप्रत्याख्याने योजयति — **दक्षिणस्या इति।** 'अद्य' इत्यनेन सूत्रारम्भ उच्यत इत्याह — **सूत्रेति।** ननु [8]दिग्द्वयस्य कथं सामानाधिकरण्यम्, अत आह — [9]**तत्रायमर्थ इति।** ननु [10]सूत्रानारम्भपक्षेऽप्येवमेवास्तु, अत आह — **सूत्रे त्विति।** अन्यपदार्थवृत्तित्वाभावे पूर्वसूत्रेणान्यथासिद्धिर्न स्यादित्यर्थः। **नन्विति।** उक्तविधया सामानाधिकरण्ये कर्मधारय एवास्तु, किं बहुव्रीहिणेत्यर्थः। **विभाषेति।** 'दक्षिणपूर्वोत्तराणाम्' इत्यत्र [11]विकल्पनिरासाय तत्र बहुव्रीहावित्यावश्यकमिति भावः। **प्रतिबद्धः** नियतः, तन्निमित्त इति यावत्। दक्षिणादीनामपि प्रवृत्तिनिमित्त-

---

[1] नेति पूर्वसूत्रं मत्वर्थविषयकमिति भावः —य.
[2] पा. सू. ५. ४. १५४.
[3] पा. सू. २. २. २४.
[4] अमरकोशे द्वितीयकाण्डे वैश्यवर्गे श्लो. ८३.
[5] तुशब्दो नास्ति — ब.
[6] उभयत्रान्यपदार्थ — अ.
[7] द्वयं प्रत्याख्यानाय योजयति — अ.
[8] दिग्द्वयवाचकस्येत्यर्थः।
[9] प्रदीपे 'तत्रारब्धेऽयमर्थः' इत्यत्र 'तत्रायमर्थः' इत्यन्नंभट्टपाठ इति भाति।
[10] सूत्रारम्भपक्षे — अ.
[11] सर्वनामत्वेत्यादिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भेदेन भाषितपुंस्कत्वमस्तीति तन्निरासाय 'समानायाम्' इति भाष्यं व्याचष्टे — **समानायां चेति**। 'भाषितपुंस्कात्' इत्यनेन कथं समानायामिति लभ्यते, अत आह — **भाषितेति**। भाषितः पुमान् येन शब्देनेति न विग्रहः, किं तु भाषितः पुमान् यस्मिन् प्रवृत्तिनिमित्त इति स्त्रीपुंससाधारण-प्रवृत्तिनिमित्तं भाषितपुंस्कशब्देनोच्यते, तद्वाचिशब्दो [1]भाषितपुंस्कशब्देनोच्यत इत्यर्थः। 'दिक्-शब्दौ' इत्यनेन प्रवृत्तिनिमित्तराहित्यमुक्तमित्याह — **विनेति**। 'यदि' इति शङ्काशयमाह — **ततश्चेति**। 'कथम्' इत्यस्याशयमाह — **यदीति**। 'दिङ्नामानि' इत्यादौ [2]रूढिरेव गृह्यत इति भावः। **विषयेति**। व्यवस्थाश्रयदिक्कृतत्ववशादित्यर्थः। रूढिग्रहणस्य प्रयोजनमाह — **अत एवेति**। 'मत्वर्थे' इत्यादिकं पूर्वसूत्रे व्याख्यातत्वादिह [3]त्यक्तम्। कबभावार्थमिदमपि सूत्रद्वयं कर्तव्यमिति तदाशयः॥

[२, ७२५–७२७]

(**रत्नप्रकाशः**) एतद्भाष्यवार्तिकस्वरसेनानयोरव्यवधानं गम्यते। वृत्त्यादौ तूत्तरसूत्रानन्तरं 'तेन सह' इति सूत्रं पठितम्। **दिक्समाससहयोगयोरिति**। सहेन योगो यस्य स सहयोगः 'सपुत्रः' इत्यादिः समासः। **अन्यपदार्थ इत्येव सिद्धमिति**। सप्तम्यन्तस्य पूर्वनिपातेन व्यधिकरणानाम-प्रथमान्तानां च समासो भवतीति ज्ञापनादिति भावः। **यद्येवमिति**। दक्षिणस्याः पूर्वस्याश्चान्त-राले[4]त्यर्थे 'दक्षिणपूर्वा' इति पूर्वसूत्रेण समासो यद्युच्येतेत्यर्थः। नन्वारब्धेऽपि दिङ्नामानीति सूत्रे सदोषस्तदवस्थ एवेत्यत आह — **अद्येति**। प्रकृतसूत्रविशिष्टकाल इत्यर्थः। **इयमिति**। अन्त-रालेत्यर्थः। येति शेषः। **सैवेति**। अन्तरालैवेत्यर्थः। तदुपपत्तिस्तु [5]दक्षिणापूर्वाशब्दयोरन्त-राललक्षकयोः समानाधिकरणयोः प्रकृतसूत्रेण समासाद् भवति। न चैवमपि कर्मधारयेण गतार्थता शङ्क्या, पूर्वपदप्रकृतिस्वरस्य तेनासिद्धेः। **एताविति**। [6]दक्षिणपूर्वशब्दावित्यर्थः। **पुंसि भाष्येते इति**। दक्षिणो ग्रामः, पूर्वो ग्राम इति दर्शनादिति भावः। **आकृतौ** प्रवृत्तिनिमित्ते। **दिक्-शब्दाविति**। तथा च दिक्त्वव्याप्यधर्मौ तयोः प्रवृत्तिनिमित्ते इति भावः। **व्यवस्थाशब्दाविति**। नियतावध्यपेक्षावित्यर्थः। तथा च तत्रान्ये एव प्रवृत्तिनिमित्ते इति भावः। दिग्वृत्तीनामप्यवश्यं पूर्वादीनां व्यवस्थाशब्दत्वमेष्टव्यम्, अन्यथा सर्वनामसंज्ञा तेषां न स्यादित्याशयेनाह — **यदि पुन-रिति**। **व्यवस्थाशब्दा इति**। तथा च समानायामाकृतौ भाषितपुंस्कत्वात् पुंवद्भावः सिध्यतीति भावः। नन्वेवं सति पूर्वादीनां दिक्शब्दत्वाभावात् 'दिङ्नामानि' इति समासादीनि कार्याणि तेषां न स्युरित्याशयेनाह — **कथं यानीति**। उत्तरमाह — **यदेति**। **वक्ष्यन्तीति**। पूर्वादयस्तदा तेषां तत्कार्यमाक्त्वं भविष्यतीति शेषः। ननु दिगदिक्साधारणाः शब्दा यदि दिक्शब्दा इत्याश्रीयते तर्हि रमणीयादीनामपि दिक्छब्दत्वं स्यात्। अथोच्येत नित्यस्त्रीलिङ्गाः पूर्वादयो दिक्छब्दा भिन्ना एवेति तर्हि प्रवृत्तिनिमित्तभेदात् पुंवद्भावो न स्यादित्याशयेनाह — [7]**यदि हीति**। यद्यपि सर्व-

---

[1] अर्शआद्यजन्तत्वेनेति भावः।

[2] रूढा एव गृह्यन्त इति — ऋ.

[3] प्रदीप इति शेषः।

[4] अन्तरालशब्दोऽमरकोशादिषु नपुंसकतयैव बोध्यते। स्त्रीलिङ्गतया प्रयोगोऽत्रैवोपलभ्यते। शब्दसागराख्यकोशे पुंल्लिङ्गत्वमपि निर्दिष्टम्। विशेष्यनिघ्नत्वं मत्वा स्त्रीलिङ्गत्वेन प्रयोगः कृत इव।

[5] दक्षिणपूर्वशब्दयोः — ब. दक्षिणापूर्वशब्दयोः — य.

[6] दक्षिणापूर्वशब्दावित्यर्थः — य.

[7] भाष्ये 'यदि तर्हि यो यो दिशि वर्तते' इत्यत्र 'यदि हि यो यो दिशि वर्तते' इति निर्णयसागरमुद्रिते पाठः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नामसंज्ञानुसारेण पूर्वादीनां दिगदिग्वृत्तीनामेकं प्रवृत्तिनिमित्तमित्यभ्युपेयम्, तावता न दिशि रूढत्वहानिः, रमणीयादयस्तु [1]'गुणशब्दाः सर्वसाधारणा इति न तेषां दिक्छब्दत्वप्रसङ्ग इति समाधानमस्ति, तथापि शङ्कित्रनुकूलवचनेनैवात्र पुंवद्भावः सिध्यतीति किमर्थं तावत्पर्यन्तानुधावनं कर्तव्यमित्याशयेनाह — **एवं तर्हीति**। **एवमर्थमिति**। अत्र केनापि सूत्रेण पुंवद्भावाप्रसक्तेरवश्यं तद्वचनमङ्गीकर्तव्यमिति भावः। तदेव वचनमवलम्ब्य सूत्राक्षेप्ता पुंवद्भावं परिहरिष्यन्नाह — **एवं च कृत्वेति**। पुंवद्भावविधायकमुक्तवचनमस्तीति कृत्वेत्यर्थः। तमर्थं तद्वचनात् स्पष्टमवगन्तुमाह — **ननु चेति**। [2]**कबभावार्थ इति**। [3]''अनेकमन्यपदार्थे'' इति सूत्रेण विहितसमासादेवानुक्तसमासान्तात् कपो विधानात् तदभावार्थमाभ्यां सूत्राभ्यां पृथग्विधानमिति भावः॥

तत्र तेनेदमिति सरूपे २. २. २७.

[२, ७२७–७२८]

(उद्द्योतनम्) सूत्रे क्रियाभिधानबोधकं पदं नास्ति, अत आह — **इतिकरणादिति**। प्रयोगानुसारेण विवक्षा, प्रयोगश्च क्रियायामेव दृश्यत इति भावः। नन्वारब्धेऽपि सूत्रे नैकशेषस्य बाधः संभवति, एकशेषेऽप्यवशिष्टस्यैव बहुव्रीहिसंज्ञासंभवादिति शङ्कामेकशेषप्राप्तिकथनपूर्वकं निराह — **केशेष्विति**। सामर्थ्यमेवाह — **समूहेति**। समाससंज्ञाया अन्वर्थत्वादनेकमित्यनेकत्वस्य विवक्षितत्वाच्च बहुव्रीहिसंज्ञा समूहविषया। ननु [4]''अनेकमन्यपदार्थे'' इति बहुव्रीहिरपि परत्वादेकशेषं बाधताम्, किमनेन, अत आह — **पूर्वेति**। अन्तरङ्गमप्येकशेषं बाधितुमिदं वचनम्। अत एवोक्तम् 'अनवकाशया' इति। अत्र पूर्वदीर्घो न श्रूयते, अत आह — **तत्रेति**। [5]'पूर्वपदस्य व्यावर्त्यमाह **उत्तरेति**। सामान्यविहितमप्यात्वं सामर्थ्यात् पूर्वपदस्यैव भवतीत्यर्थः। आकारप्रश्लेषो न कर्तव्य इत्याह — **एवं चेति**। **स्यादिति**। तच्चानिष्टमिति भावः। अनवकाश इच् कपं बाधेत, अत आह — **इजिति**। कपो वैकल्पिकत्वादिति भावः। [6]'शेषाद्विभाषा' इत्यत्र समासान्तापेक्षया शेषग्रहणादिज्विषये कपः प्रसङ्ग एव नास्ति, अत आह — **शेषग्रहणेन चेति**। [7]'अनेकम्' इति सूत्र एव शेषग्रहणमनुवर्तते, नोत्तरेषु। अत इज्विषयेऽपि वैभाषिककबभावार्थमेतत्सूत्रमावश्यकमित्यर्थः॥

[२, ७२७–७२८]

(रत्नप्रकाशः) क्रियाभिधानादिति। युद्धरूपक्रियैव तत्सूत्रविहितसमासेनाभिधीयते प्रधानतयेति पूर्वसूत्रेण गतार्थतेति भावः। **एकशेषप्रतिषेधार्थमिति**। सरूपत्वादन्तरङ्ग एकशेषे सत्यनेकसुबन्ताभावाद् द्वन्द्ववद्बहुव्रीहिरपि न स्यात्। आरब्धे त्वस्मिन् सूत्रे एकशेषं बाधित्वा समासो भवतीति भावः। **पूर्वदीर्घार्थं चेति**। 'तत्र तेन आ इदम्' इति छित्त्वा पूर्वपदस्यात्वरूपं दीर्घं विधातुं

---

[1] गुणाः — ब.

[2] वार्तिके 'कबभावार्थं वा' इत्यत्र 'कबभावार्थो वा' इति निर्णयसागरमुद्रिते पाठः।

[3] पा. सू. २. २. २४.

[4] पा. सू. २. २. २४.

[5] पूर्वपदशब्दस्येत्यर्थः।

[6] पा. सू. ५. ४. १५४.

[7] पा. सू. २. २. २४.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चेदं सूत्रमिति भावः। तत्रोत्तरपदस्यात्वं न भवति, [1]'यस्य' इति लोपबाधकत्वकल्पनापेक्षया पूर्वपदस्यैव तद्विधानौचित्यादिति मन्यते। अनेनात्वविधानं व्यर्थम्, 'बाहूबाहवि' इत्यादौ [2]'अन्येषामपि दृश्यते' इत्यनेन पूर्वपदस्य दीर्घोऽवश्यं विधेय इति 'दण्डादण्डि' इत्यादावपि तेनैव दीर्घसिद्धेरित्याशयेनाह — **स्यादेतत् प्रयोजनमिति**। **अनेनैव दीर्घत्वं स्यादिति**। अनेन विहितदीर्घत्वमेव सकललक्ष्यनिर्वाहकं चेत् स्यादिति भावः। [3]**अथेदानीमिति**। [4]**न प्रयोजनमिति**। प्रकृतसूत्रस्यात्वविधानमिति शेषः। **कबभावार्थमिति**। कबभावपक्षे चरितार्थ इच् कपं बाधितुं न क्षमत इति भावः॥

चार्थे द्वन्द्वः २. २. २९.

[२, ७२९–७३८]

(**उद्द्योतनम्**) सूत्रानुवादः पक्षान्तरे दोषाभावसूचनार्थ इत्याह — **यदीति**। चार्थस्य चशब्देन प्रतिपादने लिङ्गसंख्यायोगो नास्ति, समासेन तु प्रतिपादनेऽस्तीति स्वाभाविकमित्याह — **वाक्य इति**। शब्दरूपस्य समासस्य द्रव्याश्रितत्वं न संभवति, अत आह — **समासशब्देनेति**। द्वयोरपि समासान्तोदात्तत्वमेवेति स्वरे विशेषाभावाद्रूपे विशेषमाह — **ततश्चेति**। **काणेति**। द्वयोरपि विशेषणत्वाद्विशेष्यत्वाच्चानियम इत्यर्थः। **परमिति**। [5]तत्रारम्भसामर्थ्यात् तत्पुरुषः, परकार्यत्वाच्च द्वन्द्वसंज्ञेत्यर्थः। श्लोकं व्याचष्टे — **उपास्नातादय इति**। द्रोणान्ताः। 'अशकः' इत्यस्य व्याख्यानम् — **शक्तवानिति**। सुकृतस्य कथं तापहेतुत्वम्, अत आह — **कृतं क्षीणमिति**। [6]'एतन्न सिध्यति' इत्येतच्छब्देन श्लोकोक्तस्य सर्वस्य परामर्शशङ्कां वारयति — **कृताकृते इति**। ननु सामानाधिकरण्ये सति क्तेनेत्यनेन समासः, तदभावादत्र कथं तत्पुरुषः, अत आह — **कर्मसामान्यमिति**। कर्मसामान्यमेकमधिकरणमिति यदुक्तं तत्राह — **न ह्यत्रेति**। **अनुवादेनेति**। यश्चार्थे वर्तते स द्वन्द्व इत्येवं विधानादित्यर्थः। श्रुतिं व्याचष्टे — **दुःखेनेति**। **द्वन्द्वप्राप्तिरिति**। ततश्चैकस्वर्यप्रसङ्गः। इन्द्रादेश्चार्थवृत्तित्वमाह — **इन्द्रादीनामिति**। 'चार्थे' इत्यनेन कथं युगपदधिकरणवचनता लभ्यते, अत आह — **न्यासान्तरेणेति**। अतिप्रसङ्गनिरासाय वार्तिकार्थमाह — **युगपदिति**। अतिप्रसङ्गं निराह — **गामिति**। सामानाधिकरण्याभावात् पुंवद्भावो न भविष्यतीति शङ्कां वारयति — **एकैकेनेति**। [7]विप्रतिषिद्धानामेकैकेनानभिधानमुपपादयति — **येऽर्था इति**। **नैवेति**। [8]प्रयोगभेदेनार्थद्वयाभिधानम्, न युगपदित्यर्थः। सामानाधिकरण्याभावे पुंवद्भावाप्रसङ्गादाह — **वृत्ताविति**। ननु वृत्तौ पुंवद्भावो न तु वाक्ये, [9]सामानाधिकरण्यं च वृत्तेरेव विशेषणम्, न वाक्यस्येति 'अथ मतम्' इत्ययुक्तम्, अत आह — **वृत्ताविति**। व्यभिचारे सति विशेषणत्वम्, वृत्तौ सर्वत्र सामानाधिकरण्यमेवेति व्यभिचाराभावाद् वाक्ये तत्संभवाद् यदि

---

[1] पा. सू. ६. ४. १४८.

[2] पा. सू. ६. ३. १३७.

[3] अयं प्रतीकः परं दृश्यते। उपरि विवरणं तु न दृश्यते — प, ब, य.

[4] 'न प्रयोजनमिति' इति प्रतीको नास्ति — य.

[5] सूत्रारम्भसामर्थ्यात् — अ.

[6] 'एतन्न सिध्यति' इत्यादि 'गामिति' इत्यन्तं नास्ति — अ.

[7] 'विप्रतिषिद्धानाम्' इति नास्ति। एकैकेनाभिधानम् — अ.

[8] प्रयोगद्वयेनानर्थं — अ.

[9] सामानाधिकरण्यं न वृत्तेरेव — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तद्विशेषणत्वमुच्येतेत्यापाद्येदमुक्तमित्यर्थः। पट्व्यौ च मृद्व्यौ चेति विग्रहवाक्ये सामानाधिकरण्यं [1]वृत्तेरेव विशेषणं दृश्यते, अत आह — **लौकिकं चेति**। सर्वशब्दानामाकाशे विरोधाभावादाह — **विप्रतिषिद्धार्था इति**। तदेवाह — **परस्परेति**। तस्मात् तदप्रतीतिरेव तन्निवृत्तिरित्याशयेनाह — **एकस्मिन्निति**। [2]'सुखप्रतिघातेन' इत्येतन्निराह — **विरुद्धानामपीति**। **यदेति**। 'क्षणिकभावविकारः' इति 'घटः' इति संज्ञां कृत्वा वा[3] यदा व्यवह्रियते तदैकशब्दवाच्यत्वमस्तीत्यर्थः। 'एवमपि' इत्यादिसंदर्भस्य तात्पर्यमाह — **इदानीमिति**। **यथेति**। 'गुणवृद्धी' इत्युक्ते गुणः पूर्वमुपतिष्ठते, वृद्धिः पश्चात्। 'वृद्धिगुणौ' इत्युक्ते वृद्धिः पूर्वम्, गुणः पश्चात्। एकैकेनोभयामिमिधाने क्रमिकप्रत्येकोपस्थितिर्न स्यादित्यर्थः। 'शब्दपौर्वापर्य' इत्यादि 'प्राप्नोति' इत्यन्तं सवार्तिकं [4]भाष्यमेकैकस्य [5]द्व्यर्थत्वप्रतिपादनाय। तस्य मध्यप्रतीकं गृहीत्वा तात्पर्यमाह — **न्यग्रोधार्थेति**। **अनवगतिः स्यात्** न्यग्रोधशब्देनेत्यादिः। 'द्यावौ' इति द्विवचनान्तस्य 'द्यावा' इति रूपमित्याह — **द्योशब्द इति**। पृथिवीशब्दस्य द्विवचनान्तत्वे हेतुमाह — [6]**नमेते इति**। ननु द्योशब्दपृथिवीशब्दाभिहितार्थद्वयापेक्षया 'संनमेते' इति द्विवचनोपपत्तिः स्यात्, अत आह — **पृथिवी इतीति**। **यथोक्तम्** आगमेनापि युगपद्वचनतासाधनम्। आगमस्य कथमनुमानत्वम्, अत आह — **आगमस्येति**। [7]विग्रहे [8]'युगपद्द्विवचनान्ततादर्शनस्य तदनुमापकत्वादिति भावः। विग्रहेऽपि कथमन्यवाचकेनान्यस्याभिधानमिति शङ्कां निराकुर्वन् कैमुतिकन्यायं भाष्योक्तमुपपादयति — **साहचर्यादीति**। **समुदायरूप इति**। उद्भूतावयवभेद इति वक्ष्यमाणोऽभिप्रायः। 'नैकार्थत्वात्' इति वार्तिकं तिरोहितावयवभेदाभिप्रायम्। 'नैकार्थ्यम्' [9]इत्याशयोद्घाटनमित्याह — **उद्भूतेति**। भाष्ये 'प्लक्षोऽपि द्व्यर्थः' इत्यस्यायमर्थः — उद्भूतावयवभेदः समुदायः प्लक्षशब्दवतः समुदायस्याभिधेय इति। एवं न्यग्रोधोऽपीत्यस्यापि। एतदवुद्ध्वैकैकस्यार्थ उक्त इति मत्वा चोदयति — भाष्ये [10]**यद्येवमिति**। तद्व्याचष्टे — **एकैकेनेति**। ननु वृत्तावन्य[11]वाचकेनान्यस्याभिधानमस्तु, अत आह — **लौकिकादिति**। प्लक्षन्यग्रोधयोः परस्परात्मकत्वं विरुद्धम्, अत आह — **प्लक्षशब्दस्येति**। **लोकप्रसिद्धचेति**। वाक्यविषय इत्यादिः। कारणशब्दस्य प्रवृत्तिनिमित्तपरत्वशङ्कां वारयति — **शब्दार्थावसायेति**। उक्तेऽर्थे 'तुल्यकारणत्वात्' इति शङ्कानुत्थानम्, अत आह — **इतर इति**। प्रक्षरणन्यग्रोहणयोः प्रकृतोपयुक्तमर्थभेदमाह — **प्रक्षरणमिति**। **इतरः** युगपदधिकरणवचनत्वाक्षेपकः। 'प्लक्षश्च न्यग्रोधश्च दृश्येताम्' इतिवदुभयार्थत्वाभावेऽपि क्रियान्वयोपपत्तेराह — **द्विवचनेति**। न्यग्रोधशब्दाद् द्विवचनं तस्य द्व्यर्थत्वं विना न संभवतीत्यर्थः। काक्वा सूचितमर्थ-

---

[1] वृद्धेरेव — ऋ.

[2] गुणप्रतिघातेन — अ.

[3] 'वा' इति नास्ति — अ.

[4] भाष्यमेवैकस्य — अ.

[5] द्व्यर्थप्रतिपादनाय — ऋ.

[6] समेते इति — ऋ. भाष्ये 'द्यावा चिदस्मै पृथिवी नमेते' इति हरयाणापूनामुद्रितयोः पाठः। निर्णयसागरमुद्रितचौखाम्बामुद्रितयोः 'द्यावा चिदस्मै पृथिवी संनमेते' इति पाठ उपलभ्यते। प्रदीपे तु 'ह, चौ, नि' कोशेषु त्रिष्वपि 'संनमेते इति द्विवचनान्तेन' इति दृश्यते। उद्द्योतनेऽप्युत्तरत्र 'संनमेते' इत्यनूद्यते। ऋ. सं. २. १२. १३; अथर्वसंहिता २०. ३४. १४. उभयत्र 'द्यावा चिदस्मै पृथिवी नमेते' इत्येवोपलभ्यते।

[7] 'विग्रहे' इत्यादि 'भाष्ये यद्येवमिति' इत्यन्तं नास्ति — अ.

[8] युगपद्द्विवचनतादर्शनस्य — ऋ.

[9] समुदायात्सिद्धमित्यस्येत्यर्थः।

[10] भाष्ये 'यदि तर्हि प्लक्षोऽपि' इत्यत्र 'यद्येवं प्लक्षोऽपि' इत्यन्नंभट्टपाठ इति भाति।

[11] चकेवानान्यस्याभिधानमस्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

माह — [1]**अयुक्तमिति।** **भिन्नरूपत्वादिति।** वृत्तिवाक्ययोरित्यादिः। दृष्टान्तं प्रकृते संगमयति — **यथेति।** 'यदि तर्हि' इति भाष्यं प्लक्षश्च न्यग्रोधश्च दर्शनीयाविति वाक्येऽन्यतरवैयर्थ्यशङ्कापरमित्यभिप्रेत्य चोद्यपरिहारौ — **नन्वित्यादिना।** प्लक्षन्यग्रोधावित्यत्रैकेनोभयाभिधानाङ्गीकारात् 'अनुक्तत्वात्' इत्ययुक्तम्, अत आह — **न्यग्रोधशब्देति।** 'एवं मन्यते' इति यदुक्तं तन्निराह — [2]**उक्तं ह्येतदिति।** तत्र लौकिकदृष्टान्तमाह — **यथेति।** नियतलोकव्यवहारात् तथैव शब्दशक्त्यवधारणमित्यर्थः। सहभूतानां शक्तिविशेषाविर्भावे दृष्टान्तः — **भारेति।** प्राथमकल्पिकशब्दो मुख्यार्थपर इत्याह — **लोकेति।** [3]अनेन यौगिकत्वं नोक्तम्, किं तु गौणत्वमित्याह — **तत्सहचरितेति।** क्रियायोगाद्वृत्तिर्भाष्य एवोक्तेत्याह — **यथोक्तमिति।** गौणमुख्यन्यायानवतारदशायां संदेहः, न तु तदवतारेऽपीत्याह — **उपक्रम इति॥**

[२, ७२९–७३८]

(रत्नप्रकाशः) **चश्चाव्ययमित्यादि।** [4]'नञ्' इति सूत्रे व्याख्यातमिदम्। **याज्ञिकश्चायमिति।** देवदत्तादिना सह युगपदनेकेषां याज्ञिकादीनामभेदो बोधयितुमिष्ट इति सहविवक्षासद्भावादितरेतरयोगद्वन्द्वे 'याज्ञिकवैयाकरणकठबह्वृचौक्थिकमीमांसका अयं देवदत्तः' इति प्रयोगप्रसङ्ग इति भावः। एतेन 'एकस्मिन् धर्मिण्यनेकधर्मसमुच्चयाच्चार्थसद्भावाद् द्वन्द्वसंज्ञाप्रसङ्गः' इति निरस्तम्। समुच्चये सहविवक्षाभावेन [5]द्वन्द्वस्यैवाप्रसङ्गात्। यदप्युक्तम् 'ततश्चाभ्यर्हितत्वाद्वैयाकरणशब्दस्यैव पूर्वनिपातः स्यात्। तत्पुरुषे तु काणखञ्जवदनियमः' इति। तदपि न, याज्ञिकवैयाकरणादीनां यौगपद्येन [6]'अयम्' इति निर्दिष्टदेवदत्ताद्यभेदविवक्षायामपि [7]परस्परमभेदस्याविवक्षितत्वेन तेषां परस्परं कर्मधारयस्याप्रसक्त्या पूर्वनिपातनियमानियमकथनस्यासंबद्धप्रलापत्वात्। वैयाकरणस्याभ्यर्हितत्वे मानाभावाच्च। यदप्युक्तम् 'परंकार्यत्वे चायं दोषः। एकसंज्ञाधिकारे तु विशेषविहितत्वात् तत्पुरुषसंज्ञैव भवतीति दोषाभावः' इति। तदपि न, ययोर्यदा कर्मधारयस्तयोस्तदा द्वन्द्वप्रसक्तेरभावेनासंबद्धप्रलापत्वात्। **अशेषत्वादिति।** याज्ञिकादीनां देवदत्तादिभिः सामानाधिकरण्यविवक्षायां [8]'विशेषणं विशेष्येण' इत्यत्रोपयुक्तत्वादशेषत्वमिति भावः। **उपास्नातमिति।** उपास्नातादयः पञ्च तीर्थविशेषाः। तांश्चेत्त्वं गन्तुं शक्तवान् ततः **कृताकृते** सुकृतदुष्कृते त्वां **मा ताप्तां** न तापयेतामित्यर्थः। कृतं क्षीणं सत् संतापयति, अकृतं त्वनिष्टफलदानेनेति तदतापनं ब्रह्मज्ञानिनो भवतीति ब्रह्मज्ञानकारणत्वं तत्तीर्थयात्रायां सूचितं भवति। [9]'क्तेन नञ्विशिष्टेनानञ्' इत्यत्रोपयुक्तत्वात् 'कृताकृते' इति द्वन्द्वो न स्यादिति भावः। [10]**अन्यद्धीति।** अत्राभेदविवक्षाया अभावेन [11]शेषत्वाद् द्वन्द्वो भवतीति भावः। न च 'नीलौ घटपटौ' इत्यत्रापि

---

[1] प्रदीपे 'किं युक्तमेतदित्यर्थः' इत्यत्र 'अयुक्तमेतदित्यर्थः' इत्यन्नंभट्टपाठ इति भाति।

[2] उक्तं हि तदिति — अ.

[3] 'अनेन' इत्यादि 'तत्सहचरितेति' इत्यन्तं 'क्रियायोगात्' इत्यादि 'यथोक्तमिति' इत्यन्तादनन्तरं दृश्यते — अ, ऋ. औचित्यानुसारेण पूर्वं निवेशितम्।

[4] पा. सू. २. २. ६.

[5] द्वन्द्वस्यैव प्रसङ्गात् — ब.

[6] अस्येति निर्दिष्ट — ब, य.

[7] परमभेदस्याविवक्षितत्वेन — ब, य.

[8] पा. सू. २. १. ५७.

[9] पा. सू. २. १. ६०.

[10] अन्यद्वेति — य.

[11] दोषत्वात् — ब, य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वन्द्वो न स्यादिति वाच्यम्, तत्र द्वन्द्वैकशेषयोरभेदस्य विवक्षितत्वेन द्वन्द्वे बाधकाभावात्। ननु देवदत्ताद्यभेदविवक्षायां याज्ञिकादीनां द्वन्द्वे सति पश्चाद्देवदत्ताद्यन्वयोऽस्त्विति चेन्न, याज्ञिकादीनां प्रत्येकं देवदत्ताद्यन्वयार्हत्वेन भाव्यन्वयमादायापि शेषत्वविघटनात्। अन्वयव्यतिरेकाभ्यां शब्दार्थ-निर्णय इति तावन्निर्विवादम्, तथा च चे सति गम्यमानश्चाभावे सत्यगम्यमानो न कोऽप्यर्थः। चे सति गम्यमानत्वमात्रेण चार्थ आश्रीयमाणे केवलचकारस्य [1]प्रयोगाभावे तस्य पदान्तरसमभिव्याहारे सति यो योऽर्थः प्रतीयते स स चार्थ इत्यनिष्टेऽप्यर्थे [2]द्वन्द्वः स्यादित्याशयेनाह वार्तिककारः — **चार्थे द्वन्द्ववचन इति। असमासेऽपीति।** चार्थे समासविधानात् तत्र चकारमन्तरेण तदर्थप्रतीतिरुचितैव। यतोऽसमासेऽपि तदर्थस्तमन्तरेण गम्यते ततः सर्वे वा चार्थाः, न कोऽपि वा चार्थ इत्यवश्यमभ्युपेयम्। तथा चानिष्टप्रसङ्ग इति भावः। एतेन 'चार्थानुवादेन द्वन्द्वविधानात् तस्य [3]चानिष्टेऽपि विषये सद्भावादतिप्रसङ्गः' इति निरस्तम्। समासस्य वैकल्पिकत्वेन समासाभावपक्षे वाक्यप्रयोगस्य न्याय्यत्वेन तत्रातिप्रसङ्गापादनानौचित्यात्। यदप्युक्तम् 'तत्र नयनक्रियायां गवादीनां समुच्चयाच्चार्थसद्भावादस्ति द्वन्द्वप्राप्तिः। इन्द्रादीनां लोकपालत्वाद् गम्यमानपालनक्रियायां समुच्चयोऽस्ति' [इति]। तदपि न, समुच्चयान्वाचययोः सामर्थ्यविरहेणैव समासाभावसिद्धौ तत्र समासापादनस्यात्यन्तमौर्ख्यावहत्वात्। **अहरहरिति।** यमनिन्दापरेयमृक्, गवादीनहरहर्नयमानो यमस्तैर्न तृप्यतीति। अत्र दृष्टान्तमाह — **सुराया इवेति।** 'इवेन विभक्त्यलोपः' इति [4]'कुगति' इति सूत्रगतवार्तिकेन[5] समासविभक्त्यलोपपूर्वपदप्रकृतिस्वराः। **दुर्मदीति।** दुःखेन माद्यति हर्षति यः स इत्यर्थः। [6]'सुप्यजातौ णिनिस्ताच्छील्ये' इति णिनिः। [7]'सर्वे विधयश्छन्दसि विकल्प्यन्ते' इत्युपधावृद्ध्यभावः। अथवा दुष्टो मदो दुर्मदः, घञर्थे कः। स यस्यास्तीति मत्वर्थीय इनिः। तदेवं यथाश्रुतं सूत्रं दूषयित्वा स्वयमन्यल्लक्षणमाश्रयति — **सिद्धं त्विति। युगपदधिकरणवचन इति। अधिकरणम्** अभिधेयम्, यानि पदानि परस्परं स्वार्थेन सहेतरार्थान् युगपद्वदन्ति यदा तदा तानि द्वन्द्वसंज्ञकानि भवन्तीति वक्तव्यमिति भावः। तथा च 'प्लक्षन्यग्रोधौ पश्य' इत्यादौ भवति द्वन्द्वः। दधि [8]'चानेयं दुग्धं चेत्यादौ चार्थे न भवति। यथाश्रुतसूत्रेण तु तत्रापि स्यादिति मन्यते। एतेन 'गामश्वमित्यादौ परस्परनिरपेक्षाः स्वतन्त्रा गवादयो भिन्नैरेव शब्दैः पृथक् प्रत्याय्यन्त इति युगपद्वाचित्वाभावाद् द्वन्द्वाभावः' इति निरस्तम्। समासस्य वैकल्पिकत्वेन वाक्यप्रयोगस्योपपन्नत्वेनात्रातिप्रसङ्गवारणार्थं वचनान्तराश्रयणानौचित्यात्। वार्तिककाराभिमतं लक्षणं भगवान् दूषयति — **तत्रेति। पुंवद्भावप्रतिषेध इति।** द्वन्द्वघटकानां सर्वेषां पदानां सामानाधिकरण्यसद्भावात् तत्प्रसक्तिः। **पट्वीमृद्व्याविति।** अन्यथा पटुमृद्व्यावित्येव तत्र स्यादिति भावः। **विप्रतिषिद्धेषु चानुपपत्तिरिति।** अविप्रतिषिद्धेषु घटपटादिष्वेकत्रावस्थानसंभवेन घटादिशब्दैर्घटाघटादयः कथंचिद्युगपदभिधातुं शक्यन्ते। यथा छत्रिणो यान्तीत्यत्र छत्रिशब्देन छत्र्यच्छत्रिण इति भावः। इदानीमुक्तदूषणपरिहारायाह वार्तिककारः — **यत्तावदिति। दर्शनीयामातेति।** अजहत्स्वार्थावृत्तौ दर्शनीयाशब्दोऽपि मातरि वर्तत इति मन्यते। वैयाकरणमते तु समासे पृथक्छक्त्यभ्युपगमात् तत्र सामानाधिकरण्यप्रसक्तिरेव नास्ति। एतेन [9]'वृत्तावेकार्थी-

---

[1] प्रयोगाभावेनेत्यर्थः।

[2] 'द्वन्द्वः' इति नास्ति — ब, य.

[3] चानिष्टविषये — य.

[4] पा. सू. २. २. १८.

[5] 'इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं च' इत्यनेनेति भावः।

[6] पा. सू. ३. २. ७८.

[7] परिभाषा ३५.

[8] वानेयं दुग्धं वेत्यादौ वार्थे — ब, य.

[9] प्रदीपे 'वृत्तावेकार्थीभावेन' इत्यत्र 'वृत्तावेकार्थीभावात्' इति पाठो निर्णयसागरमुद्रितेऽधो निर्दिष्टः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भावान्मात्रर्थवृत्तित्वाद् दर्शनीयाशब्दस्य सामानाधिकरण्यम्' इति निरस्तम्। समासस्य [1]विशिष्टार्थबोधकत्वेऽप्यवयवानां विशिष्टार्थबोधकत्वकल्पने मानाभावात्। वार्तिककारः स्वयमेव [2]पराभिमततयोत्प्रेक्षते — **अथेति**। **प्राक् समासादिति**। वाक्ये प्रयोगार्हे वृत्तिसमानार्थक इति भावः। **सर्व इति**। अपर्यायशब्दा इति शेषः। [3]**विप्रतिषिद्धार्था इति**। निर्वर्तितास्त्यक्ता अर्था यैस्ते तथेत्यर्थः। **निवर्तयतीति**। त्यजतीत्यर्थः। **इहापि [युक्ता] दृश्यतामिति**। तथा च शब्देनानेकार्थाभिधाने एकत्रावस्थानमप्रयोजकम्, गोशब्देन भूस्वर्गयोर्बोधदर्शनादिति भावः। येन क्रमेण पदान्युच्चार्यन्ते तेन क्रमेण श्रोत्रेन्द्रियेण गृह्यन्ते, तेनैव क्रमेण तत्तत्पदार्थोपस्थितिर्जायत इति सर्वानुभवसिद्धत्वात् तद्विरुद्धं युगपदधिकरणवचनकल्पनमित्याशयेनाह — **एवमपीति**। शब्दपौर्वापर्यानुरोधेनार्थपौर्वापर्यमाश्रयितुं न शक्यते, विभक्त्यर्थान्वयासंभवादित्याशयेनाह — **शब्दपौर्वापर्यप्रयोगादिति**। **द्विवचनबहुवचनानुपपत्तिरिति**। विभक्तिसंनिहितपदेनैकस्यैवार्थस्योपस्थापितत्वेन तत्र द्विवचनबहुवचनोपस्थापितद्वित्वबहुत्वयोरन्वयो नोपपद्यते। अतो युगपदधिकरणवचनत्वमकामेनाप्यभ्युपगन्तव्यमिति मन्यते। वस्तुतस्तु क्रमोपस्थितेष्वेव प्रकृत्यर्थेषु द्वित्वबहुत्वयोरन्वयो भवतीति न काप्यनुपपत्तिः। युगपदधिकरणे युक्त्याभासमुक्त्वोपोद्बलकाभासमाह — **विग्रहे चेति**। वाक्ये चेत्यर्थः। **द्यावेति**। द्योशब्दो द्यावापृथिव्योर्वर्तत इति ततः परस्य प्रथमाद्विवचनस्य [4]'सुपां सुलुक्' इत्यादिसूत्रेणाकारे तस्य [5]'गोतो णित्' [6]इति णित्त्वाद्वृद्धावावादेशे रूपमिति मन्यते। तत्र कारणं तु 'संनमेते' इति द्विवचनं प्रत्येकमन्वेतीति भ्रमः। वस्तुतस्तु सोरेव तत्रात्वम्, न त्वौङ इति वक्ष्यति। तत्र 'संनमेते' इति तु 'घटश्च पटश्च तिष्ठतः' इतिवदुपपन्नम्। **पृथिवी इति**। पृथिवीशब्दो दिवस्पृथिव्योर्वर्तते, तत औङि [7]'वा छन्दसि' इति [8]पूर्वसवर्णदीर्घ इति मन्यते। वस्तुतस्त्वेकवचनान्तमेव तत्, हल्ङ्यादिलोपात्। **किमेतदिति**। न किंचिदेतत्, व्यर्थमेतदुपन्यस्तमिति भावः। किमर्थमिदमुपन्यस्तमिति पृष्टमिति मन्यमान आह — **युगपदिति**। **उपोद्बलकमिति**। सहकारितयोपन्यस्तमिति भावः। तस्य कथं सहकारितेत्यत आह — **विग्रहे किलेति**। तथा च [9]कैमुतिकन्यायेन समासे युगपदधिकरणवचनता सिध्यतीति भावः। अर्थपौर्वापर्ये विभक्त्यर्थानन्वयो यः स्वेनोक्तस्तत्र समाधानमुत्प्रेक्षते। **समुदायात्सिद्धमिति**। पदसमुदायरूपप्रकृत्युपस्थापितार्थसमुदायस्यानेकात्मकत्वात् तत्र द्वित्वबहुत्वान्वयः संभवतीति भावः। परिहरति — **नैकार्थत्वादिति**। नन्वयं दोषस्तवापि तुल्य इत्यत आह — **नैकार्थ्यमिति**। युगपधिकरणवचन इति शेषः। **नायमेकार्थ इति**। द्वन्द्वो वा तद्घटकप्लक्षादिशब्दो वैकार्थो न भवतीत्यर्थः। अयं परिहारो युगपदधिकरणवचनतानभ्युपगमेऽपि तुल्यः। **तयोरनेकार्थत्वादिति**। [10]प्रत्येकमिति शेषः। **बहुवचनं प्राप्नोतीति**। [11]तथा च कस्मादपि द्वन्द्वाद् द्विवचनं न स्यादिति भावः। **बहुत्वाभावादिति**। द्वन्द्वार्थ इति शेषः। **याभ्यामेवेति**। अर्थाभ्यामिति शेषः। **ताभ्यामेवेति**। तथा च बहुत्वाभावाद्बहुवचनाप्रसङ्ग इति भावः। प्लक्षादीनां न्यग्रोधवाचकत्वकल्पनमनुभवविरुद्धमित्याह — **अन्यवाचकेनेति**। परिहरति

---

[1] विशिष्टाबोधकत्वेऽपि — व, य.

[2] पराभिमततयोत्प्रेक्षयति — व, य.

[3] भाष्ये 'विप्रतिषिद्धाः' इत्यस्य स्थाने 'विप्रतिषिद्धार्थाः' इति रत्नप्रकाशकृत्पाठ इति भाति।

[4] पा. सू. ७. १. ३९.

[5] पा. सू. ७. १. ९०.

[6] तत्र गकारस्याविवक्षितत्वादिति भावः।

[7] पा. सू. ६. १. १०६.

[8] पूर्वरूपमिति — व, य.

[9] लौ. न्या. साहस्री पृष्ठम् ४९.

[10] 'प्रत्येकमिति' इत्यादि 'बहुत्वाभावादिति' इत्यन्तं नास्ति — य.

[11] तथा च ह्यस्मादपि — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

— **प्लक्षस्येति** । प्लक्षशब्दप्रवृत्तिनिमित्तस्य वृक्षत्वव्याप्यजातेर्न्यग्रोधे न्यग्रोधपदप्रवृत्तिनिमित्तस्य च प्लक्षेऽभावेन प्लक्षन्यग्रोधयोः परस्परतदात्मकता न युज्यत इत्याशयेनाह — **कथं पुनरिति**। **कारणादिति**। प्रवृत्तिनिमित्तरूपादिति शेषः। उभयोः प्लक्षन्यग्रोधशब्दयोरेकमेव प्रवृत्तिनिमित्तं कल्पयितुं शक्यत इत्याशयेनाह — **तुल्यकारणत्वात् सिद्धमिति** । **प्रक्षरतीति** । विस्तृणोतीत्यर्थः। **प्लक्ष इति**। पृषोदरादित्वाद्रस्य लः । **न्यग्रोहतीति** । शाखाभिर्जटाभिश्च भूमिं स्पृशतीत्यर्थः। इयमपि कल्पनानुभवविरुद्धैवेत्याह — **दर्शनं वै हेतुरिति**। **प्लक्षेऽपि न्यग्रोधशब्दो** [1]**दृश्यत इति**। 'तद्विषयं च' इति वक्ष्यमाणो भावः। तमेव भावं विज्ञातुमाह — **न वै लोक इति**। **अनुक्तः प्लक्षेणेति**। न्यग्रोधशब्दासहकृतेनेति शेषः। तमेव विज्ञातुं पृच्छति — **कथमनुक्त इति**। **सहभूताविति** । यथा पाषाणादिकमुभौ वहतस्तथेति भावः। प्रकारान्तरेणापि पौनरुक्त्यं परिहर्तुं शक्यत इत्याह — **अथवेति**। **प्राथमकल्पिकाविति**। सर्वानुभवानुसारेण प्रसिद्धौ, मुख्याविति यावत्। **कौचिदिति**। गौणावित्यर्थः। **संदेहः स्यादिति**। गौणमुख्योभयसंभवादिति भावः॥

[२, ७३९–७४३]

(उद्द्योतनम्) एवं युगपदधिकरणवचनतायां दोषेषु परिहृतेषु 'इयम्' इत्यादिना किमुच्यते, अत आह — **भाष्यकार इति**। 'दुःखा' इत्यनेन प्रतीत्यनारूढत्वमुच्यत इत्याह — **प्रतीताविति**। [2]प्रमाणाभावमेवाह — **वृद्धेति**। प्लक्षशब्दस्य न्यग्रोधो मुख्यार्थः, गौणो वा। नाद्य इत्याह — **न च तत्रेति**। लोकव्यवहार इत्यर्थः। न द्वितीय इत्याह — **न चेति**। स्वशब्देनैव तत्प्रतीत्युपपत्तौ तत्र शब्दान्तरानुपयोगादित्यर्थः। एकैकेन युगपदुभयप्रतीतिसत्त्वे काचिद्वृत्तिः कल्प्येत, सापि नास्तीत्याह — **न चेति**। [3]अर्थप्रतीतेरन्यथोपपत्तिमाह — **समासस्य चेति** । 'कृतः' इति कथं लभ्यते, अत आह — [4]**अर्थपदेति**। अर्थानुत्पादने भाष्यकारसंमतिमप्याह — **यथोक्तमिति**। **स एव** 'गामश्वम्' इत्यादावुक्त एव। समुच्चयस्वरूपं सोदाहरणमाह — **यदेति**। **समुच्चीयन्ते** संबध्यन्ते, परस्पर[5]निरपेक्षाणामेकक्रियासंबन्धः समुच्चय इति यावत्। तर्हि कथं तत्रातिप्रसङ्गनिरासः, अत आह — [6]**तत्र चेन कृत इति**। अत्र साक्षात् सामर्थ्याभावान्न समास इति चेनैवेत्यवधारणं व्यर्थम्, अत आह — [7]**सामर्थ्यं त्विति**। अन्वाचये चेनैव कृतत्वमस्तीति समासप्रसङ्गमाशङ्क्याह — **न्यग्रोधो दृश्यतामिति**। [8]कथंचिदेकक्रियासंबन्धेन सामर्थ्याङ्गीकारेऽप्याह — [9]**प्रधानाभिधायि चेति**। इतरेतरयोगे तु साक्षात् सामर्थ्यं चेनैव प्रकाशितत्वं चास्तीति समासः सिध्यतीत्याह — **इतरेतरेति**। समाहारेऽपि[10] सामर्थ्यसद्भावात् समास इत्याह — **तत्रापीति** ।

---

[1] भाष्ये 'दृश्यताम्' इत्यस्य स्थाने 'दृश्यते' इति निर्णयसागरमुद्रिते पाठः।

[2] प्रमाणमेवाह — ऋ.

[3] अर्थोपपत्तेः — अ; अर्थापत्तेः — ऋ.

[4] प्रदीपे 'अर्थशब्दस्य संनिधानात्' इत्यत्र 'अर्थपदसंनिधानात्' इत्यन्नंभट्टपाठ भाति।

[5] निरपेक्षाणामेव क्रियया संबन्धः — अ.

[6] तत्र चक्रतेति — अ, ऋ.

[7] प्रदीपे 'सामर्थ्यं ह्येकक्रियाद्वारकम्' इत्यत्र 'सामर्थ्यं त्वेकक्रियाद्वारकम्' इति चौखाम्वामुद्रिते पाठः। सोऽत्राभिमतः।

[8] कथंचिदेव क्रिया — ऋ.

[9] प्रदीपे 'प्रधानाभिधायि पदम्' इत्यत्र 'प्रधानाभिधायि च पदम्' इत्यन्नंभट्टपाठ इति भाति।

[10] अपिशब्दो नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधमिति चेनैव प्रकाशितत्वमस्तीति भावः। युगपदधिकरण[1]पक्षे तु स वक्तव्य इति गौरवमित्याह — **युगपदिति**। ननु प्राण्यङ्गादीनां समाहार एव द्वन्द्वः, दधिपयआदीनामितरेतरयोग एव, वृक्षमृगादीनामुभयथेत्येवमर्थं तवापि [2]चतुर्दशसूत्री कर्तव्या, अत आह — **न चेति**। दशादिभिरित्यत्रातद्गुणसंविज्ञानो बहुव्रीहिरित्याशयेनाह — **आदिशब्देनेति**। **दशशब्देनेति**। तस्य बहुवचनान्ततया वचनान्तराप्रसङ्गाद् विंशत्यादेरेकवचनान्तत्वाद्वचनान्तरप्रसङ्ग इत्यर्थः। एकवचनस्येष्टत्वादाह — **द्विवचनमिति**। एकत्वविंशतित्वपरनिर्देशे द्विवचनप्रसङ्गो बोध्यः, संख्येयपरत्वे बहुवचनस्यैव प्रसङ्गात्। नेदमपूर्ववचनमित्याह — **शाकेति**। भाष्ये **यद्धि तदिति**। **संख्या** संख्यावाचि पूर्वपदं द्वन्द्वे प्रकृतिस्वरम्। 'शतसहस्रम्' इत्यस्य द्वन्द्वत्वेन तेन [न] तद्व्यावृत्तिः, अत आह — **षष्ठीति**। **ज्ञापितमिति**। तिष्यः एकः, पुनर्वसू द्वौ, तेषां बहुत्वेन बहुवचनस्यैव द्विवचनसिद्धेर्बहुवचनस्येत्यनेन [3]'सर्वो द्वन्द्वो विभाषयैकवत्' इति ज्ञाप्यते। तेन 'तिष्यपुनर्वसु' इत्यत्रैकवचनस्य द्विवचनादेशो मा भूदिति बहुवचनस्येति सार्थकमिति तत्रोक्तमित्यर्थः। 'लिङ्गमशिष्यम्' इत्यनेन [4]'स नपुंसकम्' इति सूत्रस्यैव प्रत्याख्यानमित्याह — **स इति**॥

[२, ७३९–७४३]

(**रत्नप्रकाशः**) तदेवं यथाकथंचिदनेकक्लिष्टकल्पनया व्यवस्थापितं वार्तिककारमतं दुष्टमित्याह भगवान् — [5]**सेयमिति**। **दुःखेति**। अर्शआदित्वादच्, दुःखदा, अध्येतॄणाम्। **दुरुपपादेति**। अध्यापयितॄणामिति शेषः। या या कल्पनोक्ता वार्तिककृता सा सानुभवविरुद्धेति सर्वैरेव ज्ञातुं शक्यत इति तदुपेक्ष्य तं तदभिमतमुपोद्बलकं निराकरोति — **यच्चापीति**। **तदपि च्छान्दसमिति**। अपिर्ह्यर्थः। द्यावाक्षामाशब्दयोरेकवचनान्ततायाः संभवेऽपि वार्तिककाराभिमतद्विवचनान्ततामभ्युपगम्याह — **तत्र सुपां सुप इति**। [6]'सुप्तिङुपग्रहलिङ्गनराणाम्' इत्यादिना व्यत्ययेनैकवचनस्य द्विवचनमुपपन्नमिति न तस्य द्व्यर्थतेति भावः। सूत्रं दूरीकृत्य तत्र वार्तिकाभिषेचनमप्ययुक्तमित्याह — **सूत्रं च भिद्यते [इति]**। तदेवं वार्तिकं निराकृत्य यथाश्रुतमेव सूत्रं युक्तमित्याह — **यथान्यासमेवेति**। **चेन कृत इति**। चे सति प्रतीयमान इत्यर्थः। [7]अन्वयमात्रेणाप्यर्थनिर्णयो भवतीति 'प्रागुक्तदोषोऽकिंचित्कर इति भावः। एतेन [8]'अर्थशब्दसंनिधानादुत्तरपदलोपी समास आश्रीयत इत्यर्थः' इति निरस्तम्। चस्यार्थ इति षष्ठीतत्पुरुषेणैव तदर्थलाभे मध्यमपदलोपिसमासाश्रयणे मानप्रयोजनयोरभावात्। चार्थं पृच्छति — **कः पुनरिति**। उत्तरमाह — **समुच्चय इति**। परस्परनिरपेक्षस्यानेकस्य क्रमेणैकस्मिन्नन्वयः समुच्चयः। यथा ईश्वरं भज गुरुं चेति। अत्र हि भजनक्रियायां प्रथमत ईश्वरेऽन्विते पश्चाद् गुरुरन्वेति। अत एव तत्र वाक्यभेदः, क्रियापदावृत्तेः। अत एव तत्र समासो न भवति, सामर्थ्यविरहात्। समुच्चयविशेष

---

[1] पक्षे तेन वक्तव्य इति — ऋ.

[2] 'द्वन्द्वश्च प्राणितूर्य' इत्यतः 'अधिकरणैतावत्त्वे च' इत्यन्तेत्यर्थः।

[3] परिभाषा ३४.

[4] पा. सू. २. ४. १७.

[5] भाष्ये 'इयं युगपदधिकरणवचनता' इत्यत्र 'सेयं युगपदधिकरणवचनता' इति निर्णयसागरमुद्रिते पाठः।

[6] महाभाष्यम् ३. १. ८५.

[7] व्यतिरेकं विनापीत्यादिः।

[8] 'चार्थे द्वन्द्ववचने' इत्यादिवार्तिकोक्तदोष इत्यर्थः।

[9] प्रदीपे 'अर्थशब्दस्य संनिधानात्' इत्यत्र 'अर्थशब्दसंनिधानात्' इति रत्नप्रकाशकृत्पाठ इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एवान्वाचयः, समुच्चीयमानयोरेकस्याप्राधान्यनिबन्धनत्वात् तस्य। तद्यथा — वटो भिक्षामट, गां चानयेति। तत्र भिक्षाटनं प्रधानम्, गवानयनमप्रधानम्। यदि हि सा दृष्टा साध्वी च स्यात् तदानीयते, नो चेन्न। अतः समुच्चय इवान्वाचयेऽपि समासो न भवति, असामर्थ्यादिति स्पष्टमेव। परस्परसापेक्षस्यानेकस्य युगपदपरपदार्थसंबन्ध इतरेतरयोगः। इतरेतरयोग एव समाहार इत्युच्यते, यदेतरेतरयोगघटकस्यानेकस्य समाहृतत्वं विशेषणं भवति तदा। तत्रोभयत्र समासो भवति। तद्यथा — 'घटश्च पटश्च तिष्ठतः, घटपटौ तिष्ठतः। घटश्च पटश्च समाहृतौ तिष्ठतः, घटपटं तिष्ठति' इति। एतेन "'गामश्वं पुरुषम्' इत्यादौ वाक्ये परस्परानपेक्षा गवादयो नयनक्रियया संबध्यन्ते। तत्र चेन कृतोऽर्थ इत्यत्रावधारणमर्थग्रहणसामर्थ्यादाश्रीयते। चेनैव यः प्रकाशितोऽर्थस्तत्र द्वन्द्वः। 'गामश्वम्' इत्यत्र तु विनापि चेन समुच्चयावगमान्नासौ चेनैव प्रकाशित इत्युच्यते। सामर्थ्यं ह्येकक्रियाद्वारकं दध्योदनादिवत् स्यादिति नात्रासामर्थ्यात् समासपरिहारो वाच्यः" इति निरस्तम्। 'यदा परस्परनिरपेक्षाः पदार्थाः क्रियायां समुच्चीयन्ते तदा समुच्चयश्चार्थः' इति स्वयमेवोक्तत्वेन गवादिष्वपि समुच्चयस्यैव स्वीकृतत्वेन तेन सह 'सामर्थ्यं ह्येकक्रिया' इत्याद्युत्तरग्रन्थस्य विरोधात्। अद्यावधि केनापि धीमता वैयाकरणेन समुच्चयान्वाचययोः समासानिदर्शनात्। समाहारेतरेतरयोगयोर्द्वन्द्वो भवति नेतरयोरित्युत्तरभाष्येण गम्यमानत्वात्। समुच्चयाद्यर्थानां समुच्चयादिशब्दैरवश्यं प्रकाशनीयत्वेन चेनैव प्रकाशितोऽर्थ इति वदतो व्याघातात्। 'गामश्वम्' इत्यादिवाक्ये द्वन्द्वसंज्ञापादितेत्यत्र मानाभावेन तत्र तत्परिजिहीर्षया यत्किंचित्प्रलापस्यानर्थक्याच्च। **गम्यत एतन्न्यग्रोधश्चेतीति।** न्यग्रोधस्तिष्ठतीत्युक्त्वा तदनन्तरं प्लक्षश्चेत्युक्ते न्यग्रोधान्वितक्रियायां प्लक्षस्यान्वयो गम्यत इति भावः। तथा च प्रागुक्तं समुच्चयलक्षणं भगवतापि सूचितमेव। **गम्यत एतत् सापेक्षोऽयं प्रयुज्यत इति।** आदित एव 'प्लक्षश्च तिष्ठति' इत्युक्ते चकारबलेनान्योऽपि कश्चित् तिष्ठतीति गम्यत इति भावः। तत्र शब्दनिर्दिष्टस्य प्लक्षस्य प्राधान्यं गम्यमानस्य कस्यचिदप्राधान्यमिति प्रागुक्तान्वाचयलक्षणं सूचितम्। **प्लक्षश्च न्यग्रोधश्चेत्युक्त इति।** यद्यपि भाष्येणानेनेदं सूचितम् — इतरेतरयोगसमाहारोदाहरणवाक्ये प्रतिपदं चकार उच्चारणीयः, [1]अन्यत्र त्वेकत्रैवोच्चारणीय इति, तथापि नायं नियमः, सर्वत्रैकचकारेणापि निर्वाहात्। अयं तु नियमो वर्तते विग्रहवाक्ये 'घटश्च पटश्च तिष्ठत इत्येव वक्तव्यम्, न तु तिष्ठतीति, तिङन्तेनैकवचनान्तेनोभयोर्घटपटयोर्युगपदन्वयाभावात्। समुच्चयान्वाचययोस्तु घटः पटश्च तिष्ठति' इत्येव वक्तव्यम्, न तु 'तिष्ठतः' इति। द्विवचनान्तेनैकैकस्य घटादेरन्वयासंभवात्। **प्लक्षोऽपि न्यग्रोधसहाय इति।** तथा च परस्परसाहाय्यलक्षणसामर्थ्यसद्भावात् समाहारेतरेतरयोगयोर्द्वन्द्वो भवति, नेतरयोः, तत्र परस्परनैरपेक्ष्यस्यैव सत्त्वेन सामर्थ्यविरहादिति [सूचितम्]। **समाहारेऽपीति।** 'गम्यत एतत्' इत्यादि 'प्लक्षसहाय इति' इत्यन्तं शेषतयात्र संबध्नाति। एतावतैव ग्रन्थेनोभयत्र द्वन्द्वो भवतीति सूचितत्वेऽपि समाहारे द्वन्द्वो भवतीत्यस्यान्यदपि किंचित् प्रयोजनं वक्तुमाह — **क्रियत इति।** समाहार इत्यनुषज्यते। किं क्रियत इत्यपेक्षायामाह — **प्लक्षन्यग्रोधमितीति।** द्वन्द्व इति शेषः। तत् प्रयोजनान्तरमाह — **तत्रायमपीति। द्वन्द्वैकवद्भावो न पठितव्य इति।** [2]'द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम्' इत्याद्येकवद्भावप्रकरणमेकवद्भावविध्यर्थं नारम्भणीयम्, किं तु नियमार्थं तदारम्भणीयमिति भावः। ननु सर्वपदार्थप्रधानो द्वन्द्व इति पक्षे घटश्च पटश्च समाहृतौ घटपटमित्यादि-

---

[1]अन्यत्र त्वेकत्रैक उच्चारणीयः — ब, य. [2]पा. सू. २. ४. २.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सिद्धिः केनेति चेत् शृणु, [1]'द्विगुरेकवचनम्' [2]'द्वन्द्वश्च' इति विभज्य द्विगुद्वन्द्वयोरेकवद्भावविधानात् परस्परसाहचर्येण समाहारद्विगुद्वन्द्वयोरेकवद्भावो भवतीति। एतेन 'युगपदधिकरणवचनतायां द्वन्द्वे तु वक्तव्यः स्यात्, एकैकस्यानेकार्थत्वात्' इति निरस्तम्। युगपदधिकरणवचनतायामप्येकैकस्य समाहाररूपैकार्थपरत्वसंभवेनैकवद्भावविधानानर्थक्यात्। युगपदधिकरणवचनतानभ्युपगमेऽपि तद्विधानावश्यकताया उक्तत्वाच्च। संख्याविषयकविचारान्तरपरं वार्तिकमवतारयति — **एकादश द्वादशेति। एकादीनामिति।** आदिशब्देनैकादशैकविंशत्यादयोऽपि गृह्यन्ते, 'एकादशशतम्' इत्यादिदर्शनात्। **दशादिभिरिति।** आदिशब्देन विंशतित्रिंशदादयोऽसमासात्मका गृह्यन्ते। **विंशत्यादिष्विति।** विंशत्याद्यन्तेषु द्वन्द्वेष्वित्यर्थः। **वचनप्रसङ्ग इति।** यथायथं द्विवचनबहुवचनप्रसङ्ग इत्यर्थः। वस्तुतस्त्वेकस्मिन्नप्यर्थे यथा दारादयः शब्दा नित्यं बहुवचनान्ताः शब्दशक्तिस्वाभाव्यात्, तथा बहुष्वप्यर्थेषु विंशत्यादयः शब्दा एकवचनान्ता इति नैकविंशत्यादिभ्यो द्विवचनाद्यापत्तिः। उक्तं चामरेण [3]'विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः' इति। [4]तत्रादिशब्देनैकविंशत्यादयो गृह्यन्ते। [5]तुष्यतुन्यायेन तद्दोषमभ्युपगम्य तत्परिहारव्याजेनैकादशादिशब्दानां मध्यमपदलोपिसमासतापि संभवतीत्याशयेनाह — **सिद्धं त्विति। वक्तव्यमिति।** एकादशादीनां शाकपार्थिवादित्वमभ्युपगन्तव्यमिति भावः। तत्रापि दूषणमाह — **यदीति। स्वर इति।** पूर्वपदप्रकृतिस्वर इत्यर्थः। ननु [6]'संख्या' इति सूत्रेण समानाधिकरणसमासेऽपि पूर्वपदप्रकृतिस्वरो भविष्यतीत्यत आह — [7]**यदेतदिति। द्वन्द्व इत्येवं तदिति।** [8]'राजन्यबहुवचनद्वन्द्वेऽन्धकवृष्णिषु' इति पूर्वसूत्राद् द्वन्द्व इत्यस्यानुवर्तनादिति भावः। किमर्थं तत्र तदनुवर्त्यत इत्याशयेन पृच्छति — **किं पुनरिति। शतसहस्रमिति।** शतानां सहस्रमिति षष्ठीतत्पुरुषः, शताधिकं सहस्रमिति मध्यमपदलोपिसमासो वा। एवं समासभेदेन स्वरभेदस्येष्टत्वादेकादशादेर्द्वन्द्वत्वं तत्पुरुषत्वं चाश्रयणीयमित्या[9]...

उपसर्जनं पूर्वम् २. २. ३०.

[२, ७४३–७४४]

(उद्द्योतनम्) अप्रसक्त[10]परनिवृत्तिर्न वाच्या, अत आह — **वाक्यवदिति।** नित्यशब्दपक्षे शास्त्रवैयर्थ्यशङ्कां निराह — **प्रयोगसंकर इति।** [11]**सूत्रं** व्याकरणशास्त्रम्। ननु सूत्रप्रत्याख्यानात् 'अथ' इत्यस्यानुत्थानम्, अत आह — **इदानीमिति।** प्रश्नाशयमाह — **द्वयोरपीति।** वस्तुतो राज्ञः प्राधान्येऽपि शब्दतः पुरुषस्यैवेत्याह — **पुरुषश्चेति।** नन्वन्वर्थसंज्ञयानियम[12]परिहारेऽर्थभेदोऽप्रयोजकः, वृत्तौ [13]पदद्वयस्यापि विशिष्टैकार्थप्रतिपादकत्वेनाविनिगमकत्वादित्याशङ्क्य राजविशिष्ट-

---

[1] पा. सू. २. ४. १.
[2] पा. सू. २. ४. २.
[3] अमरकोशे वैश्यवर्गे श्लो. ८३.
[4] अमरकोश इत्यर्थः।
[5] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[6] पा. सू. ६. २. ३५.
[7] भाष्ये 'यद्वि तत्' इत्यत्र 'यदेतत्' इति रत्नप्रकाशकृत्पाठ इति भाति।
[8] पा. सू. ६. २. ३४.
[9] इतः परमेतत्पादसमाप्त्यन्तं नास्ति — 'प, ब, य' मातृकासु।
[10] स्वरनिवृत्तिः — ऋ.
[11] प्रदीपे 'इदं शास्त्रम्' इत्यस्य स्थाने 'इदं सूत्रम्' इत्यत्रंभट्टपाठ इति भाति।
[12] अनियमेति छेदः।
[13] पक्षद्वयस्यापि — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पुरुषस्यैकस्यैव प्राधान्येनाभिधानम् 'अर्थाभेदात्' इत्यनेन विवक्षितमित्यभिप्रेत्य हेत्वर्थमाह — **पुरुषार्थ इति।** 'न चेदम्' इत्यनेन सूत्राङ्गीकारः सूचितः, तस्याशयमाह — [1]**अबुधेति**॥

अल्पाच्तरम् २. २. ३४.

[२, ७४४–७४७]

(उद्द्योतनम्) तन्निर्देशे तदर्थविवक्षाया आवश्यकत्वात् [2]संशयोऽनुपपन्नः, अत आह — **किमिति।** स्वार्थे विधानाभावादाह — **अत एवेति।** भाष्ये **द्वयोरिति।** [3]'द्विवचन' इति द्विवचन उपपदे तरब्विधानात्। तदुपपादयति — **प्लक्षेति । अल्पेति।** देवदार्वाद्यपेक्षया। अनियममुपपादयति — **बहुष्विति।** [4]अनियमेऽनिष्टमाह — **ततश्चेति। कदाचिदिति।** 'अल्पाच्तरम्' इत्यस्य [5]तत्राप्रवृत्तेरित्यर्थः। ननु [6]'द्वन्द्वे घि' इति दुन्दुभेरेव पूर्वनिपातेन भाव्यमिति 'कदाचित्' [7]इत्ययुक्तमिति चेत्, अभ्यर्हितत्वेन कदाचिच्छङ्खस्यापि तत्संभवाददोषः। अतन्त्रे त्वल्पाच्त्वं नियामकमिति नोक्तदोष इत्याह — [8]**अतन्त्रे त्विति। अन्यतरस्येति।** शङ्खदुन्दुभिवीणाः, वीणाशङ्खदुन्दुभयः। अतन्त्रपक्षे दोषमाह — **शङ्खशब्दस्येति।** तन्त्रे तु नायं दोष इत्याह — **तन्त्रे त्विति।** [9]**पूर्वोक्तेति।** बहुषु द्विवचनोपपदत्वाभावादित्यादिनेत्यर्थः। ननु [10]शङ्खतूणवावित्यत्र [11]'जातिरप्राणिनाम्' इत्येकवद्भावः कस्मान्न भवति, अत आह — **नियतेति।** द्रव्यमात्रविवक्षायां नैकवद्भाव इत्यर्थः। तर्हि तूर्याङ्गत्वेन [12]स स्यात्, अत आह — **तूर्येति। मुख्यमिति।** क्रियायां [13]कर्तुर्गणत्वादिति भावः। ननु सकृत्प्रवृत्त्या शास्त्रस्य चरितार्थत्वात् कथं संशयः, अत आह — **यदीति।** अल्पाच्कशब्दत्वसामान्यमत्र जातिर्विवक्षिता। 'शिशिरवसन्तौ' इत्युदाहरणम्। 'उदगयनस्थौ' [14]इति तु प्रयोगो लोके तादृशोऽस्तीति प्रदर्शनार्थमित्याह — **प्रयोगेति।** 'लघ्वक्षरम्' इत्यस्मात् 'अभ्यर्हितम्' इत्यस्य पूर्वत्वात् [15]पूर्वविप्रतिषेधेन तद्बलवत्त्वमुच्यत इत्याह — **पूर्वविप्रतिषेधेनेति। दीक्षार्थमिति।** मन्त्राधिकार[16]सिद्धयर्थदीक्षायाश्चान्द्रायणादितपःसाध्यत्वादित्यर्थः। तपसोऽनङ्गत्वेऽप्याह — **स्वरूपेण वेति ।** ज्योतिष्टोमादेरङ्गभूतदीक्षायाः स्वत एवाभ्यर्हितत्वमित्यर्थः। वर्णानुपूर्व्ये प्रमाणमाह — **वेदेति ।** [17]'ब्राह्मणोऽस्य मुखमासीत्' [18]'ब्राह्मणो मनुष्याणाम्' [19]इत्यादावुत्पत्तिक्रमः श्रुतः। **अर्थस्येति।** संख्यारूपार्थस्येत्यर्थः। **वाचि-**

---

[1] अबुद्धेति — ऋ.

[2] संशयोऽनुत्पन्नः — अ.

[3] पा. सू. ५. ३. ५७.

[4] नियमे — ऋ.

[5] तत्रावृत्तेरित्यर्थः — अ.

[6] पा. सू. २. २. ३२.

[7] इत्ययुक्तमिति केचित् — अ.

[8] प्रदीपे 'अतन्त्रे तरपि' इत्यत्र 'अतन्त्रे तु तरपि' इत्यन्नंभट्टपाठ इति माति॥ अतन्त्रेष्विति — ऋ.

[9] प्रदीपे 'पूर्वोक्तेन न्यायेन' इत्यत्र 'पूर्वोक्तन्यायेन' इति समस्ततयान्नंभट्टपाठ इति भाति।

[10] शङ्खपणवावित्यत्र — ऋ.

[11] पा. सू. २. ४. ६.

[12] एकवद्भाव इत्यर्थः।

[13] कर्तुर्गौणत्वादिति भावः — अ.

[14] इति लोके तादृशप्रयोगो नास्तीति — अ.

[15] 'पूर्व' इति नास्ति — अ.

[16] सिद्धयर्थापेक्षायाः — ऋ.

[17] ऋ. सं. १०. ९०. १२.

[18] तै. सं. ७. १. १.

[19] इत्यादौ प्रवृत्तिक्रमः — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

काया इति। अल्पसंख्यावाचकशब्दस्येत्यर्थः। वाचिकाया [1]वाच इत्यर्थः। एकाधिका दश 'एकादश' इतिवत् 'दशैकः' इति न भवतीत्याशयेनाह — **एतच्चेति**। [2]'द्व्येकयोः' इत्यत्र व्यभिचारं निराह — **द्व्येकयोरिति**॥

सप्तमीविशेषणे बहुव्रीहौ २. २. ३५.

[२, ७४८]

(उद्द्योतनम्) यदेति। विशेषणत्वस्य विवक्षाधीनत्वाद् देवा विश्वे यस्येति देवानां विशेषणत्वसंभव इति भावः। **तस्माद् द्विशुक्ल इति**। 'द्विपुत्रः' इत्यत्र द्विशब्दस्य गुणवचनत्वेन पुत्रं प्रति विशेषणत्वं संभवति। अत्र तु द्वयोरपि गुणवाचित्वेन विशेषणविशेष्यत्वे विनिगमकाभाव इति भावः। सूत्रे पाठाभावाद्वार्तिकस्य चैकत्वात् परत्वं न संभवति, अत आह — **शब्दपरेति**। 'सर्वनामसंख्ययोः' इति वार्तिके संख्याशब्दस्य परत्वादित्यर्थः। [3]**एतदर्थमेव** शब्दपरविप्रतिषेधार्थमेव। अन्यथा [4]'अल्पाच्तरम्' इति 'संख्यासर्वनाम्नोः' इति [5]निर्दिष्टं स्यात्। विपरीतनिर्देशो विप्रतिषेधार्थ एवेत्यर्थः॥

निष्ठा २. २. ३६.

[२, ७४८–७४९]

(उद्द्योतनम्) [6]'जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः'। जातिवाचिनः [7]कालवाचिनः सुखादिभ्यश्च परं कृतादिवर्जं क्तान्तमन्तोदात्तं बहुव्रीहौ। पलाण्डुभक्षितः, मासजातः, सुखजातः। जात्यादिभ्यः किम्। पुत्रजातः। अनाच्छादनात् किम्। वस्त्रच्छन्नः। कृतादिवर्जं किम्। [8]कुण्डकृतः, [9]कुण्डमितः, कुण्डप्रतिपन्नः। 'प्रतिषेधे तु' इत्यस्य तात्पर्यमाह — **अकृतेति**। 'न वा' इत्यस्य तात्पर्यमाह — **उत्तरपदेति**। ततश्च ज्ञापकादेव सिद्धेः [10]'जातिकालसुखादिभ्यः' इति न वक्तव्यमिति भावः॥

---

[1] 'वाचिकायाः' इति स्त्रीलिङ्गोपपत्तय आह — **वाच** इति।

[2] पा. सू. १. ४. २२.

[3] प्रदीपे 'एवमर्थमेव' इत्यत्र 'एतदर्थमेव' इत्यन्नंभट्टपाठ. इति भाति॥ तदर्थमेव — ऋ.

[4] पा. सू. २. २. ३४.

[5] निर्देष्टव्यं स्यात् — ऋ.

[6] पा. सू. ६. २. १७०.

[7] 'कालवाचिनः' इत्यस्यानन्तरं चकारोऽधिकः—अ.

[8] 'कुण्डकृतः' इति नास्ति — अ.

[9] 'कुण्डमितः' इति नास्ति — ऋ.

[10] परनिपातविधायकवार्तिकमित्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कडाराः कर्मधारये २. २. ३८.

[२, ७५०]

(उद्द्योतनम्) वहुवचनेनादिशब्दार्थलाभप्रकारमाह — **कडारशब्दस्येति** । [१]अजहल्लक्षणया कडारादिलाभ इत्यर्थः। तादृशलक्षणायां दृष्टान्तः — **यथेति** ॥

इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ व्याकरणमहाभाष्यप्रदीपोद्द्योतने द्वितीयाध्यायस्य द्वितीयपादे द्वितीयमाह्निकम् ॥

पादश्चायं समाप्तः ॥

[१] अजहल्लक्षणायां दृष्टान्तः — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य तृतीयपादे प्रथममाह्निकम्

अनभिहिते २. ३. १.

[२, ७५१–७६२]

(उद्द्योतनम्) **स्ववाचेति**। [1]अभिहितशब्दस्यानेकार्थत्वात् तदभिमतार्थदूषणार्थमित्यर्थः। **आरम्भवादिनमिति**। जल्पतेः शब्दकर्मत्वात् [2]'गतिबुद्धि' इत्यादिनाणि कर्तुः कर्मत्वम्। दधातेर्हिनोतेर्वा 'हितम्' इति रूपम्। अभिपूर्वस्याद्यस्यार्थत्रयम्, द्वितीयस्य [3]द्वयमित्यनेकार्थत्वमाह — **अभिपूर्व इति**। **अश्वाभिधानीमिति**। अभिधीयते बध्यतेऽनया रशनयेति करणे ल्युट्, टित्त्वान्ङीप्। अश्वस्याभिधानीति षष्ठीसमासः। **तत्र** अर्थपञ्चकमध्ये। अस्तु तदाश्रयणम्, अत आह — **तत इति**। **पूर्वोक्तेन** बन्धनाद्यर्थचतुष्टयासंभवाभिप्रायेण। उक्तत्वं शब्दस्य, नार्थस्य, अत आह — **प्रतिपादितमिति**। वचेः प्रतिपादनार्थत्वे दृष्टान्तः — **यथेति**। [4]यावत्तावतोः परिमाणार्थः प्रकृतानुपयुक्तः, अत आह — **निपाताविति**। न वतुप्प्रत्ययान्तौ। [5]ततश्चानेकार्थत्वं युक्तमिति भावः। अभिहिते विहितस्याभावो न्यायसिद्ध इत्याह — **अर्थप्रत्यायनायेति**। शब्दावगतेऽर्थे शब्दाप्रयोगे [6]कैमुतिकन्यायमाह — **अक्षीति**। यथाश्रुतेऽनुपपत्तिमाह — [7]**यञ्ञोस्त्विति**। **लुप्तत्वादिति**। [8]'यञ्ञोश्च' इत्यनेन। पूर्वाचार्यैरुत्सर्गो न्याय्यशब्देनोच्यत इत्याह — **उत्सर्ग इति**। बहुवचनोदाहरणस्य कृत्यमाह — **बहुवचनेति**। **वीप्सायामिति**। [9]'नित्यवीप्सयोः' इत्यनेन। **सप्त सप्तेति**। पर्वणि पर्वणीत्यादिः। ननु चित्रा [10]गावोऽस्य सन्तीत्यस्तिसामानाधिकरण्यं गवामस्ति, अत आह — **वर्तीति**। अस्त्यर्थकर्तृप्रतिपादकस्यैव गोशब्दस्यान्यपदार्थे समासात् तस्यास्तिसामानाधिकरण्यं नास्तीत्यर्थः। **तत्रैव** वर्तिपदार्थ एव। **स्वार्थस्य** अस्त्यर्थस्य। भेदे सति सामानाधिकरण्यम्, नाभेद इत्यर्थः। एवमवयवार्थे मतुब् न भवतीत्युक्तम्। समासार्थे त्वस्तिसामानाधिकरण्यं [11]मतुपाङ्गीक्रियत एवेत्याह — **यदेति**। **तद्वत्तेति**। चित्रगुरस्मिन् ग्रामेऽस्तीत्येवंरूपेणेत्यर्थः। [12]'समर्थानां प्रथमात्' इति वर्तत इत्यत्र हेतुः — **अधिकारादिति**। [13]यञ्ञोरेवापत्यवाचित्वं न प्रकृतेः, अत आह — [14]**यञ्ञोस्तु लुकीति**। विकरणानां निरर्थकत्वात् 'श्नमोक्तत्वात्' इत्ययुक्तम्, अत आह — **भावेति**। एतावता [15]प्रबन्धेनोक्तमर्थं निगमयति —

---

[1] अनभिहित — अ.

[2] पा. सू. १. ४. ५२.

[3] द्वितीयमिति — अ.

[4] यावत्तावदिति परिमाणार्थः — अ.

[5] तथा चानेकार्थत्वयुक्तमिति — अ.

[6] कैमुत्यन्यायमाह — ऋ. अयं न्यायः लौ. न्या. साहस्री. पृष्ठम् ४९.

[7] यञ्ञोस्त्विति — अ, ऋ.

[8] पा. सू. २. ४. ६४. यञ्ञोश्च — अ, ऋ.

[9] पा. सू. ८. १. ४.

[10] गावो यस्य — अ.

[11] मतुप्यङ्गीक्रियत एवेत्याह — अ.

[12] पा. सू. ४. १. ८२.

[13] यञ्ञोरेवापत्य — अ, ऋ.

[14] यञ्ञोर्लुगिति — अ; यञ्ञोर्लुकीति ऋ.

[15] ग्रन्थेनोक्तमर्थं — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ततश्चेति। विरोधाभावेऽपि [1]'तक्रकौण्डिन्यन्यायेन विशेषविधिः सामान्यविधेर्बाधक इति भाष्यकारदर्शनम्। तत्र श्नमादीनां विरोधाभावेऽपि बाधकत्वं स्यादेव, अत आह — **वार्तिककारस्येति**। **तदेवमिति**। श्नमि शवभावस्तदर्थेनोक्तत्वादेव, विरोधाभावेनापवादत्वासंभवात्। तथा चानभिहिताधिकारो न कर्तव्य इति भावः। **पक्षान्तरं** 'अनभिहितस्तु विभक्त्यर्थः' इति पक्षान्तरम्। **पृच्छति** प्रत्याख्यानवादिनम्। 'अन्यत्र' इत्येतदुपपादयति — **अपूपाविति**। **लोक इति**। उक्तार्थानामप्रयोग एव न्याय्यः, लोके तु क्वचिद्विवरणादिना [2]प्रयोग उपपाद्य इति भावः। पक्षान्तरमिति यदुक्तं तदाह — **इदानीमिति**। ननु [3]'कर्मणि' इति सप्तम्या तस्यैवाभिधेयत्वप्रतीतेः कथमेकत्वादीनां विभक्त्यर्थत्वम्, अत आह — **कर्मणि द्वितीयेत्यादेरिति**। [4]**एकत्वस्येति**। [5]'द्व्येकयोः' इति निर्देशस्य [6]भावप्रधानत्वात् कर्मणा सामानाधिकरण्यासंभवाद्वैयधिकरण्येन विशेषणत्वमुपपादयितुमेकत्वस्याश्रयाश्रयिभावसंबन्धेन संबन्धि यत् कर्मेत्युक्तम्। तस्मिन् पक्षे सूत्रप्रत्याख्यानमित्याह — [7]**तद्यदेति**। तदेवाह — **कर्मण इति**। [8]प्रक्रमानुसारेण 'कर्मणः' इत्युक्तम्, 'कर्मणि यदेकत्वम्' इत्यपि वक्तुं शक्यम्। **कर्तव्य इति**। [9]'बहुषु बहुवचनम्' इत्यादावपि सप्तम्या बहुत्वादीनामभिधेयत्वप्रतीतेः [10]प्राथम्याच्च तेषामेव विभक्त्यर्थत्वमिति भावः। सप्तम्याभिधेयत्वं प्रतिपाद्यत इत्याशयेन शङ्केत्याह — [11]**कर्मणीति**। **न त्विति**। [12]'अन्यायश्चानेकार्थत्वम्' इति न्यायेन द्वयोरभिधेयत्वासंभवाद्विशेषणविशेष्यभावावश्यकतायामेकत्वे यत्कर्मेत्यसंभवात् कर्मणि यदेकत्वमित्येव वक्तव्यमिति भावः। एकत्वादीनामेवाभिधेयतया निमित्तत्वम्, न तु कर्मादीनाम्, अत आह — **कर्माद्याश्रितानामिति**। प्रत्याख्यानमते दोषाभिधानाय 'अभिहिते' इति वार्तिकम्। तत्र द्वितीयादिवत् प्रथमाया [13]अर्थविशेषेऽविधानात् कथं तदभावापादनम्, अत आह — **यदेति**। **तदेति**। तत्रापि सप्तमीसत्त्वादित्यर्थः। **एकत्वादीनां त्विति**। प्रातिपदिकेनानुक्तत्वादित्यर्थः। **तदर्थे** प्रातिपदिकार्थे। द्वितीयादेः प्रथमावैषम्यमाह — **द्वितीयादय इति**। 'अनभिहिताधिकारम्' इत्येतद्व्याचष्टे — **अनभिहितेति**। परिगणनमध्ये तिङ्ग्रहणाभावे तिङुक्तेऽपि स्यात्। तदप्यस्तीति वक्तुं 'परिगणनं च करोषि' इति। तद्व्याचष्टे — **तिङिति**। **अपेक्षितेति**। लौकिकवाक्येषु सर्वत्र क्रियैव वाक्यार्थ इति भावः। अनेन शब्दाध्याहारः सूचितः। [14]कटद्वितीयया भीष्मादिकर्मत्वाभिधानमुपपादयति — **भीष्मादीति**। विशिष्टं च नार्थान्तरमिति भावः। आरम्भवादिनो नायं दोष इत्याह — **आरम्भेति**। ननु विशिष्टनिष्ठकर्मत्वमेकमित्युक्तेः[15] कः कर्मणि विशेषः, अत आह — [16]**भीष्मत्वादीति**। विशेष्यनिष्ठत्वविशेषणावच्छिन्ननिष्ठत्वाभ्यां भेद इति

---

[1] महाभाष्ये मिदचोऽन्त्यात्सूत्र उक्तोऽयं न्यायः।

[2] प्रयोग एवापवाद्य इति — ऋ.

[3] पा. सू. २. ३. २.

[4] प्रदीपे 'एकस्य यत्कर्म' इति पाठो दृश्यते। अस्य 'एकत्वस्य' इत्यर्थो नागेशेन कृतः। अन्नंभट्टस्य तु 'एकत्वस्य यत्कर्म' इत्येव पाठ इति ज्ञायते।

[5] पा. सू. १. ४. २२.

[6] भावप्रधानपरत्वात् — अ.

[7] प्रदीपे 'तच्च यदा' इत्यत्र 'तद्यदा' इत्यन्नंभट्टपाठ इति प्रतीयते।

[8] एकत्वस्येति षष्ठ्यन्तप्रक्रमानुसारेणेत्यर्थः।

[9] पा. सू. १. ४. २१.

[10] प्राधान्याच्च — अ.

[11] 'कर्मणीति' इत्यस्मादनन्तरं 'प्रक्रमानुसारेण' इत्यधिकम् — अ.

[12] शाबरभाष्ये १. ३. ३०.

[13] अर्थविशेषेऽपि विधानात् — अ; अर्थविशेषेऽभिधानात् — ऋ.

[14] कटशब्दोत्तरद्वितीययेत्यर्थः।

[15] इत्युक्ते कः — ऋ.

[16] प्रदीपे 'भीष्मादियुक्त' इत्यत्र 'भीष्मत्वादियुक्त' इति पाठोऽन्नंभट्टस्येति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भावः। '[1]न त्वन्यथेति। अविभक्तिकस्य प्रयोगासंभवाद्विविभक्तित्वे सामानाधिकरण्यासंभवादिति भावः। प्रत्येककर्मत्वमुपपादयति — **यद्यदिति**। **पश्चादिति**। [2]अरुणाधिकरणन्यायेन पूर्वं क्रियान्वयः, पार्ष्ठिको विशेषणविशेष्यभाव इत्यर्थः। [3]अत्रारुच्या कल्पान्तरमित्याह — **यद्यपीति**। एतेनारुणान्यायः प्रत्युद्धतः, करणसंज्ञायामपि तमब्ग्रहणसत्त्वात्। यद्वा कारकान्तरापेक्षयातिशयस्तत्र विवक्षितः, न तु स्वकक्ष्यापेक्षया। अन्यथा 'अश्वेन पथा दीपिकया व्रजति' इत्यत्राश्वस्येतरापेक्षया साधकतमत्वात् 'दीपिकया' इति तृतीया न स्यात्। अत आरुण्यादीनामपि करणत्वसंभवान्न तन्न्यायस्य प्रत्युद्धार इति। अकर्मकत्वेऽपि सामानाधिकरण्याद् द्वितीयामुपपादयति — [4]**भीष्मादीनां हीति**। **तदेकेति**। तत्समानविभक्तित्वं तदेकयोगक्षेमत्वम्। तत्समानविभक्तित्वाभावेऽविभक्तित्वं वा स्यात्, विविभक्तित्वं वा। नाद्य इत्याह — **केवलानां चेति**। न द्वितीयः, तत्प्रापकशास्त्राभावात्, विशेषणत्वाभावप्रसङ्गाच्चेति भावः। उपसर्जनस्य प्रधानतुल्ययोगक्षेमत्वे दृष्टान्तः — **यथेति**। दृष्टान्तवैषम्यार्थम् [5]"अस्ति खलु' इति भाष्यमित्याह — **क्तप्रत्ययेनेति**। **प्रातिपदिकार्थगतताया एवेति**। प्रकृत्यर्थोपसर्जनं[6] प्रत्ययार्थं प्रकृतिप्रत्ययौ ब्रूतः। 'कृतः' इत्यत्र प्रकृतिः क्रियावाचिनीति न तद्गतं कर्मत्वम्। तया यद्यदाप्तुमिष्टतमं द्रव्यं गुणो वा, तत् सर्वं क्तस्याभिधेयम्। [7]द्वितीया तु प्रातिपदिकाद्विधीयमाना तदर्थावच्छिन्नकर्मत्वमेवाह, न प्रातिपदिकान्तरार्थावच्छिन्नमिति तदभिधानाय ततो द्वितीयोत्पत्तिरावश्यकीति भावः। परिगणनेन भीष्मादौ द्वितीयानुपपत्तिपरिहारादेतच्छब्देन तत्परामर्शो न संभवति, अत आह — **वक्ष्यमाण इति**। 'अवश्यमेकत्वादयः' इत्येतदुपपादयति — **यस्यापीति**। तर्हि मतद्वयस्य को भेदः, अत आह — **गुणेति**। अनारम्भवादे कर्मादेः प्राधान्यम्, आरम्भवादे एकत्वादेरित्यर्थः। **तत्र** अनारम्भपक्षे। **तस्य** "[8]कर्मणि द्वितीया' इत्यादेः। **नन्विति**। यथाश्रुते एकत्वादेः प्राधान्यं प्रतीयते, तदनारम्भमते विरुद्धमित्यर्थः। **नैष इति**। 'कर्मणः' इति वाच्यवाचक[9]भावसंबन्धे द्वितीयापेक्षया षष्ठी, नैकत्वसंबन्धे। 'एकत्वे' [10]इति सतिसप्तमीबलादेकत्वस्य कर्मविशेषणत्वं लभ्यते। एकत्वस्याश्रयापेक्षायां योग्यतया प्रातिपदिकार्थस्येति लभ्यत इति भावः। 'न चैकत्वादीनाम्' इति भाष्यं व्याचष्टे — **ततश्चेति**। एकत्वादेर्विशेषणत्वेनापेक्षणीयत्वादित्यर्थः। 'एकः' इत्यादौ प्रातिपदिकार्थव्यतिरिक्तं विभक्तिवाच्यमन्यदेकत्वादिकमस्तीत्यत्र हरिसंमतिमाह — **तदुक्तमिति**। एकशब्दस्य प्रवृत्तिनिमित्तभूतं यदेकत्वं तद्विभक्त्या नाभिधीयते, किं तु प्रातिपदिकेनैव। प्रातिपदिकार्थैकत्ववत एकत्वविशिष्टस्य यदेकत्वान्तरं तत्र विभक्तिर्वर्तत इत्यर्थः। प्रातिपदिकार्थसंख्याविशिष्टे संख्यान्तरसत्त्वे दृष्टान्तः — **यथेति**। एकशब्दस्य प्रवृत्तिनिमित्तं विभक्तिवाच्यं चैकत्वद्वयमित्यर्थः। **अभेदपक्षेऽपि** निमित्तविभक्तिवाच्ययोरित्यादिः। द्वावित्यादौ प्रवृत्तिनिमित्त[11]विशिष्टे द्वित्वाद्यसंभवात् पूर्वकल्पेऽपरितोषात् कल्पान्तरमिति केचित्। एकत्वविशिष्टे एकत्वान्तरवद् द्वित्वविशिष्टे द्वित्वान्तरे बाधकाभावाच्चिन्त्यमेतदित्यन्ये। एकत्वादेर्द्रव्योपसर्जनत्वेन प्रातिपदिके-

---

[1] प्रदीपे 'न ह्यन्यथा' इत्यत्र 'न त्वन्यथा' इत्यन्नंभट्टपाठ इति भाति।

[2] अयं न्यायः मीमांसासूत्रे ३. १. १२. सूत्रेण बोधितः।

[3] तत्रारुच्या — ऋ.

[4] प्रदीपे 'भीष्मादीनां स्वयमकर्मत्वेऽपि' इत्यत्र 'भीष्मादीनां हि स्वयमकर्मत्वेऽपि' इत्यन्नंभट्टपाठ इति भाति।

[5] अस्ति वेति भाष्यम् — अ.

[6] बहुव्रीहिः।

[7] द्वितीये तु — अ.

[8] पा. सू. २. ३. २.

[9] 'भाव' इति नास्ति — अ.

[10] इति सप्तमीबलात् — अ.

[11] विशिष्टद्वित्वाद्यसंभवात् — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नाभिधानं विभक्त्या तु प्राधान्येनेति [1]न विभक्तिवैयर्थ्यमित्युपपादयति — **गुणोपसर्जनमिति**। बहुव्रीहिः। प्रातिपदिकादुपसर्जनत्वेन भातस्य गुणस्य प्राधान्यविवक्षायां [2]प्रत्ययोत्पादोऽन्यत्रापि दृश्यत इत्याह — **यथेति**। उपसर्जनत्वेनोक्ता एव, अत आह — **प्राधान्येनेति**। प्रथमाया अभावे कथमविशेषितत्वम्, अत आह — **केवलस्येति**। [3]कर्मत्वाद्यविवक्षादशायाम् 'एकस्तिष्ठति' इत्यादौ विभक्त्यन्तराप्रसङ्गादिति भावः। भाष्ये **वक्ष्यति तत्र** प्रातिपदिकार्थसूत्रे। नन्वर्थनियमे द्वितीयादिकमपि स्यात्, अत आह — **कर्मण्येवेति**। विशेषविवक्षया शेषत्वं संपादयति — **कर्मादीति**। सामान्यविवक्षया परिहरति — **प्रातिपदिकार्थस्येति**। **अव्यतिरिक्तस्येति**। कारकप्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिभावादिः शेषः, व्यतिरिक्तशेषाभावान्न षष्ठीत्यर्थः। ननु समयाद्विभक्तौ नार्थतो व्यवस्था, अत आह — **सामर्थ्यादिति**। तदेवाह — **एक इति**। **अन्यत्र** द्वितीयादौ। **तदभिधाने** एकत्वाभिधाने। एकवचनत्वादिनैवैकत्वाद्यभिधायकत्वं लाघवात्, न तु द्वितीयाद्येकवचनत्वादिना, गौरवादिति भावः। प्रघट्टकार्थमुपसंहरति — **तदेवमिति**॥

[२, ७५१–७६२]

(**रत्नप्रकाशः**) **अनर्थान्तरमिति**। न विद्यतेऽर्थान्तरं यस्य तदित्यर्थः। तथा चोक्तनिर्दिष्टाभिहितशब्दा एकार्थका इत्युक्तं भवति। **यावदिति**। यावत्तावदित्यव्यये अत्र द्वितीयैकवचनान्ते यत्तदर्थे ज्ञेये। तदेवमधिकाररूपस्यानभिहितपदस्यार्थमुक्त्वा तत्प्रत्याख्यानवार्तिकं 'कर्मादयो विभक्त्यर्थाः' इति पक्षावलम्बेन प्रवृत्तमुपन्यस्यति — **अनभिहितेति**। **अभिहिते विहितं न भवतीति**। यस्मिन्नभिधेये यद्विहितं तत् तस्मिन्नन्येनाभिहिते न[4] भवतीत्यर्थः। तथा च 'स्वार्थद्रव्यलिङ्गानि प्रातिपदिकार्थः' इति पक्षे कर्मण्यभिधेये सति द्वितीया स्यादित्याद्यर्थकेन [5]'कर्मणि द्वितीया' इत्यादिसूत्रेण विधीयमाना द्वितीयादिर्विभक्तिः 'हरिं पश्यति' इत्यादौ लब्धावकाशा 'कृतः कटः' इत्यादौ न भवति। 'द्वावपूपावानय' इत्यादौ तु 'अपूपौ' इत्यादिपदेनाभिहितेऽर्थे 'द्वौ' इत्यादिपदस्य लोके प्रयोगेऽपि न दोषः, तत्र 'द्वौ' इत्यादेर्विध्यभावादिति[6] न काप्यनुपपत्तिः। **चित्रगुरिति**। चित्रा गौर्यस्यास्ति स चित्रगुरित्यस्तिसमानाधिकरणयोरेव चित्रगोशब्दयोर्बहुव्रीहेर्विहितत्वात् चित्रगुशब्दादस्तिसामानाधिकरण्ये प्रयुक्तो मतुब् न भवतीति भावः। **यञञ्भ्यामुक्तत्वादिति**। यद्यपि 'गर्गाः, बिदाः' इत्यादौ यञञोर्लुप्तत्वात् ताभ्याममभिधानमपत्यार्थस्य न युज्यते, प्रयोगसमवायिनामेव वाचकत्वमिति वैयाकरणसिद्धान्तात्, तथापि यः शिष्यते स लुप्यमानार्थाभिधायीति सकलवैयाकरणसंमतन्यायेन [7]"यञञ्भ्यामुक्तापत्यार्थस्य तत्प्रकृतिभ्यामुक्तत्वादित्यत्र[8] तात्पर्यान्न दोषः। ननु श्रूयमाणयञञन्तमेव सुखप्रतिपत्तये 'गार्ग्यः, बैदः' इत्यादिकं कुतो नोदाहृतमिति चेन्न, गर्गाद्यपत्यविवक्षायां गर्गादिशब्दादेवापत्यप्रत्ययस्य विधेयत्वेन [9]यञादिनावरुद्धाद् गर्गादेः प्रत्ययान्तरानुत्पत्तेस्तदवरोधप्रयुक्ताया अपि संभवेन 'अभिहिते विहिताभावात्' इत्यत्र तस्य दृष्टान्तत्वासंभवेन लुप्तयञाद्यन्तदृष्टान्तस्यैव सौष्ठवात्। **न्याय्योत्पत्तिरिति**। उत्सर्गविहितस्य न्याय्यत्वेन व्यव-

---

[1] 'न विभक्ति' इत्यादि 'प्राधान्येनेति' इत्यन्तं नास्ति — अ.
[2] प्रत्ययोत्पादादन्यत्रापि — ऋ.
[3] कर्मत्वाद्यविवक्षायां — अ.
[4] 'न' इति नास्ति — ब.
[5] पा. सू. २. ३. २.
[6] इतिशब्दो नास्ति — ब.
[7] यञञ्भ्यामुक्तोऽपत्यार्थस्तत्प्रकृतिभ्यां — प, ब, य.
[8] इत्येतत्तात्पर्यात् — य.
[9] यञादिनावरुद्धगर्गादेः — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हारोऽस्माद् भाष्याज्ज्ञेयः। **सप्तपर्णोऽष्टापद**[1] **इति**। सप्त सप्त पर्णान्यस्य सन्ति, अष्टावष्टौ पदान्यस्य सन्तीति वाक्ये प्रतीयमानवीप्सायाः समासेनोक्तत्वात् सप्ताष्टशब्दयोः [2]'नित्यवीप्सयोः' इति विहितं द्विर्वचनं न भवतीति भावः। तदेवं 'कर्मादयो विभक्त्यर्थाः' इति मतेऽनभिहिताधिकारखण्डनपरवार्तिकं भाष्यकृता सदृष्टान्तं सम्यगुपपादितं चेदपि पाणिनिपक्षपाती कश्चिन्मन्दबुद्धिर्भाष्यकृदुक्तदृष्टान्तान् यथामति विघटयति — **यत्तावदिति**। [3]**नात्रास्तिना सामानाधिकरण्यमिति**। समासस्यान्यपदार्थवृत्तित्वात् तद्विशेषणप्रतिपादकयोश्चित्रगोशब्दयोस्तदात्मकसमासस्य वास्तिसामानाधिकरण्यं नास्तीति मन्यते। वस्तुतस्तु चित्रगोशब्दयोस्तत्रास्तिसामानाधिकरण्यमस्त्येव। अन्यथा चित्रा गावो यस्य स चित्रगुरिति चित्रगुशब्दविवरणस्यायुक्तत्वापत्तेः। एतेन 'वर्तिपदयोरन्यपदार्थ उपसंक्रान्तत्वादस्त्यर्थस्य तत्रैवान्तर्भूतत्वात् स्वार्थस्य संसृष्टत्वादस्तिसामानाधिकरण्याभावः' इति निरस्तम्। उक्तयुक्तेः। **न चैतत् समर्थानां प्रथममिति**। 'अर्थभेदात् शब्दभेदः' इति मतावलम्बनेनापत्यार्थसंक्रान्तो गर्गादिशब्दोऽन्य एव केवलादिति मन्यते। वस्तुतस्त्वर्थभेदेऽपि शब्दस्याभेद इति मतमेव युक्तियुक्तं सकलशिष्टपरिगृहीतं चेति तदवलम्बनेन प्रवृत्तं भाष्यकृतो दृष्टान्तकथनमेव युक्तम्। **किं पुनस्तदिति**। वीप्सायुक्तपदविषयकप्रश्नो भाष्यकृतः। अपरो विग्रहप्रदर्शनव्याजेनोत्तरमाह — **पर्वणि पर्वणीति**। वस्तुतस्तु समासघटकमेव सप्तादिपदं वीप्सायुक्तमिति भाष्यकृदभिमतमेव युक्तम्। सप्त सप्त पर्णान्यस्य, अष्टावष्टौ पदान्यस्येत्यर्थे सप्तपर्णोऽष्टापद इति समासे कृते योग्यतावलेन पर्वसु [4]'पार्श्वयोरिति प्रतीतिसंभवात्। अन्यथा पीतमम्बरं यस्येत्यर्थे पीताम्बर इति समासे कृतेंऽसे कट्यां वेति योग्यताबललभ्यार्थोऽपि समासार्थः स्यात्। न चेष्टापत्तिः, सकलवैयाकरणानभिमतत्वात्। इदानीं [5]'तुष्यतु दुर्जनः' इति न्यायेनैकदेशिकृतं स्वोक्तदृष्टान्तविघटनमङ्गीकृत्य [6]'दृष्टान्तान्तराणि दर्शयति — **श्नम्बहुजकक्षु तर्हीति**। दृष्टान्तत्वं विज्ञेयमिति शेषः। एतानपि दृष्टान्तान् विघटयति — **ननु चेत्यादिना**। इदं [7]'येन नाप्राप्ते यो विधिरारभ्यते स तस्यापवादः' इत्यपवादलक्षणानुसारिणीं [8]'सत्यपि संभवे बाधनं भवति' इति परिभाषां [9]तक्रकौण्डिन्यन्यायमूलिकां वा [10]'द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम्' इत्यन्यतरस्यांग्रहणज्ञापितां वाश्रित्य। इदानीं 'येन यो व्यर्थीक्रियते स तस्यापवादः' इति निर्दुष्टलक्षणानुसारिणीम् [11]'असति संभवे बाधनं भवति, अस्ति च संभवो यदुभयं स्यात्' इति परिभाषामाश्रित्य श्नमादीनां दृष्टान्तत्वं व्यवस्थापयति — **श्नम्बहुजकक्ष्विति**। तेषु **उत्सर्गाप्रतिषेधः** उत्सर्गबाधकत्वं न घटते, नानादेशत्वादित्यर्थः। तदेवं पाणिनिपक्षपातिनि मन्दबुद्धौ निरस्तेऽन्यः कश्चित् पाणिनिपक्षपाती सुबुद्धिरेकत्वादयो विभक्त्यर्था इति पक्षमाश्रित्यानभिहिताधिकारं तिष्ठापयिषुर्वार्तिककारं पृच्छति — **किं पुनरिति**। **क्रियत इति**। इति वदसीति शेषः। **न क्रियत इति**। इतीति शेषः। यत्तु 'अपूपौ द्वावित्यभिहितेऽपि प्रत्ययेन द्वित्वे द्विशब्दस्य प्रयोगदर्शनात् श्नमादिभिरभिहिते शबादिनिवृत्त्यर्थं कर्तव्यः सन्न क्रियत इत्यर्थः' इति। तन्न, अन्यत्र श्नमादिषूत्सर्गनिषेधो न कृत इति तद्दृष्टान्तेनात्रानभिहितग्रहणं न कर्तव्यमित्युच्यते वा, अत्रानभिहितग्रहणं कृतमिति कृत्वैतद्दृष्टान्तेन

---

[1] भाष्ये 'अष्टापदम्' इत्यत्र 'अष्टापदः' इति निर्णयसागरमुद्रिते पाठः।
[2] पा. सू. ८. १. ४.
[3] भाष्ये 'न चात्रास्तिना' इत्यत्र 'नात्रास्तिना' इति रत्नप्रकाशकृत्पाठ इति भाति।
[4] पार्श्वयोरिव प्रतीति — व, य.
[5] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[6] दृष्टान्तान्तरं निदर्शयति — य.
[7] परिभाषा ५८.
[8] महाभाष्यम् १. १. ४७.
[9] अयं न्यायो महाभाष्ये १. १. ४७. सूत्रे।
[10] पा. सू. २. २. ३.
[11] महाभाष्यम् ६. १. २.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्नमादिषूत्सर्गो नेति निषेधः कर्तव्य इत्यापाद्यते वेत्याशयेनैकदेशिना पृष्टत्वेन 'द्वावपूपौ' इत्युदासीनप्रयोगदृष्टान्तेनान्यत्र कर्तव्यतापादनस्यानौचित्यात्। अत्र यत्किंचित्प्रलपनं कृत्वा पुनरुत्तरे 'अपूपौ द्वावित्यादौ तु गतार्थस्यापि द्विशब्दस्य लोके प्रयोगो दृश्यते। अन्यस्य तु गतार्थस्य प्रयोगाभावः प्रयोजनाभावादेव' इति प्रतिज्ञामात्रेण परिहारानौचित्यात्। द्विशब्दादन्यस्य 'बहूनि फलानि' इत्यादौ बहुशब्दप्रभृतेर्गतार्थस्य प्रयोगदर्शनाच्च। अस्मदुक्तविकल्पप्रकारस्य तूभयथापि 'अनभिहितस्तु' इति वक्ष्यमाणानभिहिताधिकारस्थापनवचनेनैव परिहारो भवतीति स्फुटमेव सुधियाम्। उत्तरमाह वार्तिककारः — **इहाकर्तव्यः क्रियत इति**। इति वदामीति शेषः। द्वितीया कोटिः किमर्थं त्यक्तेत्यत आह — **एष एव[हि] न्याय्य इति**। कुतोऽस्य न्याय्यत्वमित्यत आह — **यदभिहिते विहितं न स्यादिति। यत्** यस्मात् कारणात्, अभिहिते विहितं न स्यात् तस्मादित्यर्थः। इतर आह — **अनभिहितस्त्विति**। तुशब्द [1]'एवकारार्थे भिन्नक्रमो विभक्त्यर्थ इत्यस्यानन्तरं ज्ञेयः। तथा चायमर्थः फलितः। विभक्त्यर्थ एव वक्ष्यमाणः प्रातिपदिकेनानभिहितः। कर्मादयस्तु प्रातिपदिकेनाभिहिता एव, स्वार्थद्रव्यलिङ्गकारकाणां प्रातिपदिकार्थत्वाभ्युपगमात्। तथा च द्वितीयादिभिः सह प्रथमायाः पर्यायतावारणायानभिहिताधिकारः, भीष्मादिभ्यो विशेषणवाचकेभ्यो द्वितीयादिसिद्धये परिगणनं च कर्तव्यमिति। एतेन "[2]'कर्मणि द्वितीया' इत्यादेः [3]'बहुषु बहुवचनम्' इत्यादिनैकवाक्यता। तत्र यदैकत्वादीनि विशेषणानि कर्मादीनि विशेष्याणि — एकस्य यत् कर्म तत्र द्वितीयैकवचनमिति, तदा कर्म द्वितीयार्थः संपद्यते। तच्च यदा कृदादिभिरभिहितं भवति तदा गतार्थत्वाद् द्वितीयायाः प्राप्तिरेव नास्तीति नार्थोऽनभिहिताधिकारेण। यदा तु कर्मादीनां विशेषणत्वमेकत्वादीनां विशेष्यत्वं — कर्मणो यदेकत्वादि तत्र द्वितीयेति, तदैकत्वादयो विभक्त्यर्थाः संपद्यन्ते। ते चाभिहितेष्वपि कृदादिभिः कर्मादिष्वनभिहिता इति तदभिधानाय द्वितीयादीनां प्रसङ्गे तन्निवारणाय कर्तव्योऽनभिहिताधिकारः" इति निरस्तम्। [4]"कर्मणि द्वितीया' इत्यादिसूत्राणां [5]"द्व्येकयोः' इत्यादिसूत्रयोश्च पदैकवाक्यतायां मानप्रयोजनयोरभावात्। कर्मादीनां विशेष्यत्वे द्व्येकबहुशब्दानां भावप्राधान्ये मानप्रयोजनयोरभावेन 'एकस्मिन् कर्मणि द्वितीयैकवचनम्' इत्यादिरूपेण तन्निदर्शनस्योचितत्वेन 'एकस्य यत्कर्म तत्र द्वितीयैकवचनम्' इत्यादिरूपेण निदर्शनानौचित्यात्। [6]विशेष्यस्यैव शब्दार्थत्वं न विशेषणस्येत्यत्र मानाभावेन पक्षद्वये कर्मादीनां कृदादिभिरभिधानसंभवेन संख्याया विभक्त्यर्थत्वसंभवेन चानभिहिताधिकारस्यावश्यकत्वेनोक्तव्यवस्थासंभवाच्च। स्वार्थद्रव्यलिङ्गकारकसंख्यानां प्रातिपदिकार्थत्वसंभवादनभिहितो विभक्त्यर्थो दुर्लभ इत्याशयेन पृच्छति — **कः पुनररिति**। एतेन "[7]'कर्मणि द्वितीया' इत्यादौ कर्मादीनां श्रुतत्वात् तेषामेव विभक्त्यर्थत्वेन भाव्यमिति मत्वा पृच्छति" इति निरस्तम्। "द्व्येकयोः' इत्यादौ द्वित्वादेरपि श्रुतत्वेन श्रुतत्वहेतोरकिंचित्करत्वात्। **एकत्वादय इति**। संख्यातिरिक्तमुक्तचतुष्टयं प्रातिपदिकार्थ इति मतमाश्रितमिति भावः। एतेन "[8]'कर्मणि द्वितीया' इत्यादिसप्तमीनिर्देश एकत्वाद्यपेक्षः — कर्मणि यदेकत्वादि तत्र द्वितीयेति, न त्वभिधेयप्रतिपादनाय" इति निरस्तम्। [10]'कर्मणि' इत्यादेः [11]'द्व्येकयोः'

---

[1] एवकारार्थो भिन्न — प.
[2] पा. सू. २. ३. २.
[3] पा. सू. १. ४. २१.
[4] पा. सू. २. ३. २.
[5] पा. सू. १. ४. २२.
[6] विशेषस्यैव — य.
[7] पा. सू. २. ३. २.
[8] पा. सू. १. ४. २२.
[9] पा. सू. २. ३. २.
[10] पा. सू. २. ३. २.
[11] पा. सू. १. ४. २२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यादिना पदैकवाक्यतायां मानप्रयोजनयोरभावात्। तदेकवाक्यतया स तुष्यति चेदपि संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वेन कारकाणां परस्परं वैयधिकरण्येन संबन्धासंभवेन च 'कर्मणि यदेकत्वादि' इत्यादिवाक्यार्थनिदर्शनस्यानौचित्याच्च। **तेष्वनभिहितेष्विति।** तेष्वेव प्रातिपदिकेनानभिहितेषु सत्सु तिङ्कृत्तद्धितसमासाव्ययैरभिहिताः कर्मादयो विभक्तीनामुत्पत्तौ निमित्तानि मा भूवन्नित्यनभिहिताधिकारः सपरिगणनः कर्तव्य इति भावः। तेषां हि तत्र निमित्तत्वे निरवकाशा प्रथमा संपन्नेति द्वितीयादिभिः सह तस्याः पर्यायता प्रसज्यते। अस्मिन् मते [1]"कर्मणि द्वितीया' इत्यादिसूत्राणां तिङादिभिरनभिहिते कर्मणि वर्तमानात् प्रातिपदिकाद् द्वितीया स्यादित्यादिरर्थः। तथा च तिङादिभिरभिहिते कर्मादौ सावकाशा प्रथमा निरवकाशाभिर्द्वितीयादिभिर्बाध्यत इति न तासां तया सह पर्यायता भवति। एतेन 'कर्माद्याश्रितानामेकत्वादीनामपि विभक्त्यर्थत्वे पारम्पर्येण कर्मादीनां निमित्तभावोऽस्त्येवेत्यभिप्रायेणैतदुक्तम्' इति निरस्तम्। तदभिमतपदैकवाक्यताया निरस्तत्वेनैकत्वाद्यव्यवधानेन साक्षादेव कर्मादीनां विभक्त्युत्पत्तौ [2]निमित्ततौचित्यात्। तथैव निमित्ततया अस्माभिर्दर्शितत्वाच्च। 'चतुष्कं प्रातिपदिकार्थः' इति पक्ष एवाकामेनाप्याश्रयणीयः, न तु त्रिकं स[3] इति पक्ष इत्याशयेनाह — **अवश्यमिति। एकत्वादय इति।** एकत्वादय एवेत्यर्थः। त्रिकपक्षाश्रयणे को दोष इत्यत आह — **अभिहिते प्रथमाभाव इति।** तद्वयाचष्टे स्वयमेव — **यो हि मन्यत इति। तेषु** कर्मादिषु। **अभिहितेष्विति।** तिङादिभिरिति शेषः। **सामर्थ्यादिति।** अभिधायकनैराकाङ्क्ष्यलक्षणादिति शेषः। **तस्येति।** मत इति शेषः। तदेवमेकदेशिनानभिहिताधिकारस्यावश्यकत्वे कथिते तत्प्रत्याख्यानवाद्याह — [4]**नैष दोष इति। वचनाद् भविष्यतीति।** निरवकाशस्य वचनस्य [5]न्यायबाधकत्वसंभवादिति भावः। **तवैवेति।** अनभिहिताधिकारवादिन इति शेषः। **प्रथमा [ते] न प्राप्नोतीति।** अनभिहितेशब्दोऽनभिहितसंख्याके इत्यर्थे वर्तते। तथा चाभिहितसंख्याके प्रातिपदिकार्थे प्रथमा न स्यादिति मन्यते। वस्तुतस्त्वनभिहितशब्दस्यानभिहितसंख्याकपरत्वमाश्रयितुं न युज्यते, तिङा संख्याभिधानसंभवेऽपि कृत्तद्धितसमासाव्ययैस्तदसंभवात्। तथा चानभिहिताधिकारपक्षे पचत्योदनं देवदत्त इत्यादौ प्रथमोत्पत्तौ न काप्यनुपपत्तिः। ननु संख्या विभक्त्यर्थ इति वदतो मते द्वित्वैकत्वबहुत्वेष्वभिधेयेषु द्विवचनैकवचनबहुवचनानि विधेयानि। तथा च मुख्यविशेष्यसमर्पकेण तिङैकत्वादीनामुक्तत्वात् प्रातिपदिकात् प्रथमैकवचनादीनामव्यवस्था स्यादिति चेन्न, [6]"अणुरपि विशेषोऽध्यवसायकरः' इति न्यायेन द्वितीयाद्येकवचनादीनामेकत्वादिष्वभिधेयेषु व्यवस्थितत्वेन तद्वत् प्रथमैकवचनादीनामप्येकत्वादिष्वनुवाद्येषु व्यवस्थाया एवाभ्युपगन्तुमुचितत्वात्। [7]"तुष्यतु दुर्जनः' इति न्यायेन तदापादितदोषस्य संभवमभ्युपगम्य तद्दर्शितदिशैव समाधत्ते — [8]**नैष दोष इति। न क्वचिदिति।** वाक्यस्यैव विशिष्टार्थबोधकत्वम्, वाक्यं च तिङन्तघटितमेवेति भावः। **वृक्ष इति।** वाक्य[ञ्च तिङन्तघटित]मेवेत्यादिनियमं नैयायिकवन्न मन्यते। **अत्राप्यभिधानमिति।** नैयायिकाभिमतवाक्यस्य बोधकत्वं सकललोकव्यवहारविरुद्धमुपेक्षणीयमेवेति भावः। **भवन्तीपर इति।** लट्पर इत्यर्थः। औत्सर्गिकमिदम्। तेन प्रकरणादिवशाल्लुङाद्यन्तस्योपस्थितावपि न दोषः। **प्रथमपुरुष इति।**

---

[1] पा. सू. १.४.२२.

[2] निमित्तत्वौचित्यात् — य.

[3] प्रातिपदिकार्थ इत्यर्थः।

[4] भाष्ये 'न क्वचित् प्रातिपदिकेन' इत्यतः प्राक् 'नैष दोषः' इति रत्नप्रकाशकृत्पाठ इति भाति।

[5] न्यायवाचकत्वसंभवादिति — ब.

[6] लौ. न्या. साहस्री. पृष्ठम् १०२.

[7] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

[8] भाष्ये 'न क्वचित्तिङा' इत्यतः प्राक् 'नैष दोषः' इति रत्नप्रकाशकृत्पाठ इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इदमपि प्रायोऽभिप्रायेण, त्वमहमित्यादौ 'असि, अस्मि' इत्याद्यन्यपुरुषविशिष्टस्याप्युपस्थितिसंभवात्। स प्रत्याख्यानवादिमते दोषान्तरमाह — **तवैवेति।** **प्रथमाभाव इति।** प्रथमाया **भावः** प्रवृत्तिरित्यर्थः। **उत्पद्यमानया** उत्पन्नया, [1]"वर्तमानसामीप्ये वर्तमानवद्वा' इति लट्। **अभिहितं कर्मेति कृत्वेति।** भीष्मादिपदैरपि प्राधान्येन कटस्यैवाभिधानात् कटशब्दादुत्पन्नया द्वितीयया भीष्मादिवाच्यगतं कर्मत्वमुक्तमिति भावः। **न हि ममेति।** वस्तुस्थितिप्रदर्शनपरमिदम्, न तु तत्र कर्मत्वमभिहितमङ्गीकृत्यानभिहिताधिकारानङ्गीकारेण परिहारपरम्। [2]तस्य तथात्वे 'सामर्थ्यान्मे विभक्तीनामुत्पत्तिर्भविष्यति' इत्युत्तरग्रन्थेन विरोधात्। सामर्थ्यशब्देन हि तत्राभिधायकाकाङ्क्षाभिमता, सा त्वभिहिते न भवति। **कर्मविशेषो वक्तव्य इति।** कटशब्दादुत्पन्नया द्वितीयया कटत्वविशिष्टस्यैव कर्मत्वमुक्तम्, न तु भीष्मत्वादिविशिष्टस्येति तस्याभिधायकाकाङ्क्षासत्त्वेन भीष्मादिशब्दादपि द्वितीया भविष्यतीति भावः। ननु कटशब्दादुत्पन्नया द्वितीयया कटत्वविशिष्टस्यैव कर्मत्वमुच्यतां नाम, भीष्मत्वादिविशिष्टस्य स्वातन्त्र्येण क्रियान्वयाभावात् कर्मत्वमेव नास्ति। तथा च भीष्मादेर्द्वितीया न स्यादेवेत्यत आह — **अथवेति।** **कटोऽपि कर्म भीष्मादयोऽपीति।** तथा च तेषां सर्वेषां परस्परनैरपेक्ष्येण क्रियान्वये जाते पश्चात् तेषामैक्यं मनसा बुध्यत इति भावः। इदं मतं सर्वानुभवविरुद्धमित्यस्वरसादाह — **अथवेति।** **तत्सामानाधिकरण्यादिति।** [3]"गुणवचनानामाश्रयतो लिङ्गवचनानि भवन्ति' इति परिभाषा कारकविभक्तेरप्युपलक्षणमिति भावः। नन्वेवमेव 'कृतः कटो भीष्म उदारः' इत्यादौ क्तप्रत्ययेनाभिहितेऽपि कर्मणि भीष्मादिभ्यो द्वितीया स्यादित्यत आह — **अस्ति खल्वपि विशेष इति।** द्वितीयाभिहित[4]कर्मापेक्षया क्ताभिहितकर्मण इति शेषः। तयोर्विषयं तावदाह — **कटमिति।** [5]प्रतिज्ञातं विशेषं दर्शयति — **करोतेरिति।** **अनवयवेनेति।** कर्मत्वेन रूपेण कर्मोच्यते। तथा च कट इव भीष्मादयोऽपि कर्मत्वेनोक्ता एवेति भावः। **कटस्थं कर्मेति।** कटस्थं कर्मत्वमित्यर्थः। **कर्मविशेष इति।** [6]भीष्मत्वादिधर्मविशिष्टगतकर्मत्वमित्यर्थः। प्रत्याख्यानवाद्याह — **तवैवेति।** **प्रातिपदिकेनोक्ता इति।** तथा च प्रातिपदिकार्थस्या[न]भिहितसंख्याकत्वाभावात् तत्र प्रथमा न स्यादिति भावः। अधिकारवाद्याह — **कर्मादिष्वपि वा इति।** **एकत्वादयो निमित्तत्वेनोपादेया इति।** [7]"द्व्येकयोः' इत्यादिद्विसूत्र्यामिति शेषः। **कर्मण एकत्व इति।** [8]"कर्मणि द्वितीया' इत्यादिभिः कर्मादिष्वर्थेषु द्वितीयादिषु विभक्तिषु सतीषु [9]"द्व्येकयोः' इत्यादिद्विसूत्र्या द्वित्वैकत्वबहुत्वेष्वभिधेयेषु द्विवचनैकवचनबहुवचनानि विधेयानीति वाक्यैकवाक्यतया कर्मादिगतमेवैकत्वादिकमेकवचनादौ निमित्तत्वेनाश्रितमित्याशयेनैवमुक्तम्। एतेनैतद्भाष्यार्थाज्ञानमूलकं [10]"कर्मणि द्वितीया' इत्यादीनां [11]"द्व्येकयोः' इत्यादिना पदैकवाक्यत्वज्ञानमिति स्पष्टमेव सुधियाम्। **एकत्वादीनामिति।** एकादिशब्दार्थानामेकत्वादिविशिष्टानामित्यर्थः। **सन्तीति।** येष्वभिधेयेष्वेकवचनादिविधिस्तत्रोपपद्येतेति शेषः। अभ्युपेत्याह — **अथ सन्तीति।** ते मत इति शेषः। **ममापीति।** मत इति शेषः। **तेष्वनभिहितेष्विति।** तदपेक्षया प्रातिपदिकार्थस्यानभिहितसंख्याकत्वसत्त्वादिति शेषः। स एव

---

[1] पा. सू. ३. ३. १३१.
[2] कर्मत्वस्याभिहितत्व इत्यर्थः।
[3] महाभाष्ये १. २. ५२. सूत्रेऽयं न्यायः प्रतिपादितः।
[4] 'कर्मापेक्षया क्ताभिहित' इति नास्ति — ब, य.
[5] प्रतिज्ञातुं — ब.
[6] भीष्मादिधर्मं — ब, य.
[7] पा. सू. १. ४. २२.
[8] पा. सू. २. ३. २.
[9] पा. सू. १. ४. २२.
[10] पा. सू. २. ३. २.
[11] पा. सू. १. ४. २२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पक्षद्वयसाधारण्येन [1]'पक्षान्तरमुत्प्रेक्षते — **अथवेति**। **द्रव्यमिति**। एकत्वाद्याश्रयमित्यर्थः। **गुणमिति**। एकत्वादिकमित्यर्थः। तथा चैकादयः शब्दा भीष्मादिशब्दसदृशाः, एकत्वादयस्तु गुणा भीष्मत्वादिसदृशाः। तत्र यथा भीष्मत्वाद्याश्रये भीष्मत्वादिभिन्नैकत्वादिसंख्यास्तीत्येकवचनादिकं भवति तथैकत्वाद्याश्रये एकादिशब्दवाच्यैकत्वादिभिन्नमेकत्वादिकमस्तीत्येकादिशब्दादेकवचनादिकं प्रथमा च भवतीति भावः। तदेतन्मतद्वयं हरिणाप्युपनिबद्धम् — [2]'निमित्तमेक इत्यत्र विभक्त्या नाभिधीयते। तद्वतस्तु यदेकत्वं विभक्तिस्तत्र वर्तते॥' इति। अस्यायमर्थः — 'एकः' इत्यत्र या विभक्तिस्तया स्वप्रकृतिप्रवृत्तिनिमित्तमेकत्वं नाभिधीयते, किं तु **तद्वतः** तदेकत्वाश्रयस्य तदेकत्वविशिष्टस्य वा यदेकत्वं तत्राभिधेयतासंबन्धेन सा विभक्तिर्वर्तत इति। ननु [3]'न कुतार्किकतामेत्य नाशनीया प्रबुद्धधीः। अनुभूत्यपलापान्तैरपवित्रैर्विकल्पनैः' इति योगवासिष्ठ उक्तत्वात् 'भीष्मः' इत्युक्ते 'एको भीष्मः' इतिवत् 'एकः' इत्युक्ते 'एक एकः' इति प्रतीत्यभावादुक्तकल्पनाद्वयमनुभवविरुद्धमयुक्तमाश्रयितुमित्यत आह — **अथवेति**। **यदि चात्र प्रथमा न स्यादिति**। तदा [4]'न केवला प्रकृतिः प्रयोक्तव्या' इत्येकादिशब्दानामप्रयोगादिति शेषः। [5]**अविशेषितं भवतीति**। अतस्तद्विशेषणाय प्रथमा कर्तव्येति शेषः। नन्वेकादिशब्दाभिधेयया संख्यया संख्येयं मा विशेषि, न ह्येतावतैकादिभ्यः प्रथमा भविष्यति। अन्यथा दरिद्रा [6]'धनेनाविशेषिताः स्युरिति तेषां तेन विशेषणार्थं धनमपि स्यादित्यत आह — **अथवेति**। **तत्रेति**। [7]'प्रातिपदिकार्थ' इत्यादिसूत्र इत्यर्थः। **उक्तेष्वप्येकत्वादिष्विति**। तथा चाभिहितसंख्याकेऽपि प्रातिपदिकार्थे प्रथमा तत्र भविष्यतीति भावः। नन्वनभिहितशब्दस्यानभिहितसंख्याकपरत्वाश्रयणे मानं तावन्नास्ति। तथा च प्रातिपदिकार्थादिसूत्रे वचनग्रहणमपि व्यर्थमेवेत्याशयेनाह — **अथवेति**। **समयादिति**। [8]'न केवला प्रकृतिः प्रयोक्तव्या' इत्येवंरूपात्। **कर्मादीनामभावादिति**। कर्मत्वादीनामविवक्षणादित्यर्थः। **अर्थतो व्यवस्थेति**। यथेदं तथोक्तं[9] प्राक्॥

[२, ७६२–७६९]

(**उद्द्योतनम्**) तद्धिते षष्ठीप्रसङ्गमाह — **अपत्येति**। समासे तमाह — **समासेनेति**। परिगणनाभावेऽनिष्टाभिधानाय 'उत्सर्गे' इति वार्तिकम्। तत्रोत्सर्गशब्दार्थमाह — **अनभिहित इति**। **सामान्येन** परिगणनं विना। 'प्रातिपदिक' इत्यादिवार्तिकशेषं व्याचष्टे — **यत्रेति**। **दोषदर्शनात्** वक्ष्यमाणेत्यादिः। **प्रासाद इति**। प्रसीदन्त्यस्मिन्निति [10]'अकर्तरि च' इत्यधिकरणे घञ्। [11]'उप-

---

[1] पक्षान्तरमुत्प्रेक्षयति — प, ब, य.

[2] वाक्यपदीयम् ३. ११. २७.

[3] योगवासिष्ठे मुमुक्षुव्यवहारप्रकरणे सर्ग १८. श्लो. ६८. अत्र 'नाशनीया प्रबुद्धता' इति 'अपवित्रैर्विकल्पितैः' इति च द्वितीयचतुर्थपादयोः पाठो दृश्यते।

[4] महाभाष्यम् १. २. ६४.

[5] भाष्ये 'अविशेषितं स्यात्' इत्यत्र 'अविशेषितं भवति' इति रत्नप्रकाशकृत्पाठ इति भाति।

[6] धनेन विशेषिताः — प, ब, य.

[7] पा. सू. २. ३. ४६.

[8] महाभाष्यम् १. २. ६४.

[9] 'कर्मणि द्वितीया' इत्यादीनां द्व्येकयोरित्यादिद्विसूत्र्या सह वाक्यैकवाक्यतां स्वीकृत्य कर्मादिगतमेकत्वादिकमेकवचनादौ निमित्तत्वेनाश्रितमित्युक्तमिति भावः।

[10] पा. सू. २. ३. १९.

[11] पा. सू. ६. ३. १२२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्गस्य घञि' इति दीर्घः। उभाभ्यां युगपदुच्यताम्, विनिगमकाभावात्, अत आह — **तच्चेति**। घञं विना आसिक्रियां प्रति कारकत्वासंभवाद् घञः पूर्वभावित्वादित्यर्थः। प्रतिषेधपक्ष इव पर्युदासपक्षेऽप्ययं दोष इत्याह — **अभिहितादिति**। ननु शक्तिः कारकम्, क्रियाभेदे च शक्तिभेद इति [1]पक्षद्वयेऽपि न दोष इत्यत आह — **द्रव्यं चेति**। द्रव्यातिरिक्तशक्तिसद्भावे [2]प्रत्यक्षमनुमानमर्थापत्तिर्वा। नाद्य इत्याह — **न तावदिति**। द्रव्यातिरिक्तं यच्छक्तिस्वरूपं तत्परिच्छेदीति विग्रहः। शक्तेरतीन्द्रियत्वाभ्युपगमाच्चेति भावः। न द्वितीय इत्याह — **प्रत्यक्षेति**। वह्निः कार्यानुकूलाद्विष्ठातीन्द्रिय[3]धर्मसमवायी कारणत्वात् आत्मवत्, इत्यादिकं चाप्रयोजकमिति भावः। न तृतीय इत्याह — **कार्यं चेति**। **द्रव्येति**। द्रव्यगुणादिकारणस्वरूपाधीनमेव कार्यम्, नातिरिक्तमपेक्षत इत्यर्थः। **कार्यव्यतिरेकात्** कार्यभेदात्। अन्वयव्यतिरेकशालि[4]वह्न्यादिकारणभेदादेव कार्यविशेषोपपत्तौ न शक्तौ कार्यभेदोऽपि मानमित्यर्थः। समाधानतात्पर्यमाह — **पर्युदासमिति**। **शक्तीति**। शक्तिः कारकमिति पक्षमित्यर्थः। [5]तृणारणिमण्यादावनुगतवह्निकारणत्वनिर्वाहाय शक्तिरङ्गीकार्येत्याशयः। वस्तुतो द्वितीयादिविभक्तीनां पर्यायत्वपरिहाराय कर्मत्वादिकं द्रव्यातिरिक्तमङ्गीकार्यमिति तत्त्वम्। **प्रसज्येति**। यद्यपि शक्तिभेदे प्रसज्यप्रतिषेधेऽपि नानुपपत्तिः, तथाप्यधिकरणत्वेऽभिहिते सति सप्तमी न भवतीत्येवं सामान्येन प्रतिषेधमभिप्रेत्यैतदुक्तम्। **ल्युडभिहितमिति**। 'आसनम्' इत्यादौ [7]'करणाधिकरणयोश्च' इत्यधिकरणे ल्युडित्यर्थः। तर्हि 'अनभिहिते' इत्यनेन किं क्रियते, अत आह — **एकपदेति**। कृतः कट इत्यत्र क्तेन कर्मण उक्तत्वाद् द्वितीया न भवति। कृतं कटमानयेति क्रियान्तरापेक्षया भवति। एवमासनमित्यत्र प्रकृत्युपात्तक्रियापेक्षया सप्तमी न भवति, 'आस्ते' इति पदान्तरोपात्तक्रियापेक्षया भवत्येवेत्यर्थः। **या आसिक्रिया** प्रकृतिवाच्या। अभेदे कथं साध्यसाधनतेति पृच्छति — **कथमिति**। **संनिधीयते** उपस्थितो भवति। नन्वेतावता प्रकृत्युपात्तासिक्रियां प्रति 'आस्ते' इति पदान्तरप्रतिपादनयोग्यासिः कर्तेत्युक्तं भवति, तदनुपपन्नम्, साध्यसाधनभाववैपरीत्यादिति शङ्कते — **नन्विति**। **अन्यस्याः** आस्त इत्यस्याः। [**अस्याः**] आसनमिति प्रकृत्युपात्तायाः, **अन्या** आस्त इति क्रिया। 'आसनम्' इति प्रकृत्युपात्ता क्रिया द्रव्यद्वारान्यस्याः साधनमित्यर्थः। अर्थान्तरमेवाह — **तदयमिति**। तर्हि 'आसिः साधनम्' इत्यस्य का गतिः, अत आह — **ततश्चेति**। साधनान्तरनिरासे तस्य तात्पर्यम्, न त्वासेः साधनत्वप्रतिपादन इत्यर्थः। तर्हि 'आस्यतेऽस्मिन्नित्यासनम्' इति कथं व्युत्पत्तिरुच्यते, अत आह — **शब्दव्युत्पत्तय इति**। यथा गच्छतीति गौरिति व्युत्पत्तावपि गोशब्दो जातिविशेषे रूढः, एवमासनादिशब्दानामप्यनुद्भूताधिकरणादिशक्ति[8]वस्तुमात्रे रूढिः, व्युत्पत्त्यर्थं तु क्रियोपादानमिति भावः। ननु 'ल्युट् सर्वदा' इत्यनुक्तेः कथं सर्वकालः, अत आह — **कालविशेषेति**। 'किं पुनः' इति विचारस्य प्रकृतसंगतिमाह — **यदीति**। **पूर्वोक्तेति**। 'अनभिहिते हि विधानम्' इत्युक्तेत्यर्थः। भाष्ये गुण इत्युक्तेः 'अथ शक्तिः' इत्ययुक्तम्, अत आह — **आश्रित-**

---

[1] प्रसज्यप्रतिषेधपर्युदासरूपपक्षद्वयेऽपीत्यर्थः।

[2] अस्य प्रमाणमित्यादिः।

[3] धर्मसमुदायः — अ.

[4] हस्त्यादिकारण — अ.

[5] तृणत्वेनारणित्वेन मणित्वेन च कारणत्वोक्तौ परस्परं व्यभिचारात् कार्यतावच्छेदककोटौ तृणादिजन्यत्वनिवेशे च गौरवात् वह्निं प्रति वह्न्युत्पादकशक्तिमत्त्वेन कारणत्वस्य तेषां तृणादीनामङ्गीकारे पूर्वोक्तदोषाभावादिति भावः।

[6] प्रदीपे 'ल्युटाभिहितम्' इत्यत्र 'ल्युडभिहितम्' इति पाठोऽन्नंभट्टस्येति भाति।

[7] पा. सू. ३. ३. ११७.

[8] अनुद्भूताधिकरणादिशक्तीति बहुव्रीहिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वादिति। **स एव** 'किं पुनर्द्रव्यम्' इति येन पृष्टं स एव। 'द्रव्ये पुनः' इति भाष्यतात्पर्यं वदन् शक्तिसद्भावेऽपीदमेव प्रमाणमित्याह — **अयं भाव इति।** एकरूपत्वे हेतुः — **तन्निबन्धनेति। क्रियाकरण** क्रियोत्पादन। **व्यपदेशभेदः** 'ब्राह्मणेन कृतम्, ब्राह्मणं पश्य, ब्राह्मणाय देहि, ब्राह्मणाद् गृहाण, ब्राह्मणे विद्या' इत्यादावेकस्मिन्नेव कर्तृकर्मादिव्यपदेशभेदः शक्तिभेदनिबन्धन इत्यर्थः। 'अनभिहितवचनम्' इत्यादेस्तात्पर्यमाह — **सूत्रमिति।** ननु प्रथमाया अनवकाशत्वेन कथं सूत्रस्य प्रत्याख्यानम्, अत आह — **क्रियत इति।** 'अस्तिर्भवन्तीपरः' इत्येतदनाश्रित्येदमुक्तमित्याह — **क्रियापदमिति।** अनेकक्रियासंभवादस्तेरेव कथं गम्यमानत्वम्, अत आह — **ज्ञातमिति।** अर्थमबुद्ध्वा तत्प्रतिपादकशब्दप्रयोगासंभवादिति भावः। अतीतानागतव्यावृत्त्यर्थमाह — **उत्सर्गत इति।** ननु सावकाशनिरवकाशयोर्न विप्रतिषेधः, अत आह — **सावकाशत्वमिति।** भाष्ये **वृक्ष इति।** 'अस्तिर्भवन्तीपरः' इत्युक्तेः कथमयमवकाशः। उपलक्षणमिदम्, [1]"कस्यायं पुरुषः, राज्ञः पुरुषः' इत्यादौ सावकाशत्वम्। तत्र सत्ताया [2]अपृष्टत्वेनोत्तरे तदध्याहाराभावादित्याहुः। षष्ठ्यर्थसंबन्धाभावान्न षष्ठी, अत आह — **क्रियेति।** व्यतिरेकाभावात् प्रातिपदिकार्थव्यतिरिक्तः शेषः, क्रियाकारकसंबन्धश्च प्रातिपदिकार्थ एवेति ततो भेदाभावान्न षष्ठीत्यर्थः। 'स कथं कर्तव्यः' इति भाष्यमुपपादिततत्त्वम् ॥

[२, ७६२–७६९]

(रत्नप्रकाशः) तदेवमधिकारपक्षे प्रसक्ताव्याप्तिदोषे परिहृते गौरवमेव तर्हि दोष इत्याह— **परिगणनमिति। तिङ्कृत्तद्धितसमासैरिति।** उपलक्षणमिदमव्ययस्य। तेन [3]"विषवृक्षोऽपि संवर्ध्य स्वयं छेत्तुमसांप्रतम्' इत्यादौ युज्यत इत्याद्यर्थे वर्तमानसांप्रतमाद्यव्ययेनोक्तेऽपि कर्मादौ द्वितीयादिर्न भवति। **औपगव इति।** अपत्यापत्यवत्संबन्धस्य तद्धितेनाभिधानात् षष्ठी न भवति। [4]एवं चित्रगुरित्यत्रोह्यम्। वस्तुतस्तु तत्र संबन्धस्य प्रातिपदिकार्थान्तर्गतत्वेनाशेषत्वादेव षष्ठी न भवतीति 'शत्यः, शतिकः, प्राप्तोदकः' इत्यादिरुदाहर्तव्यः। **उत्सर्गे हीति।** परिगणनं विना सामान्यतोऽनभिहिताधिकार आश्रीयमाण इत्यर्थः। अस्मिन् पक्षे प्रकृत्यन्येनानभिहिते कर्मणि द्योत्ये द्वितीया स्यादित्यादिः [5]"कर्मणि द्वितीया' इत्यादिसूत्राणामर्थः। तथा च विशेष्यवाचकादुत्पन्नया द्वितीयादिविभक्त्या प्रातिपदिकान्ययोक्ते कर्मादौ वर्तमानेभ्यो भीष्मादिभ्यो द्वितीयादिर्न स्यादिति भावः। **का तर्हि स्यादिति।** अन्यस्या असंभवाद् द्वितीयैव भविष्यतीति भावः। **अशेषत्वादिति।** शेषत्वस्याविवक्षितत्वादित्यर्थः। **कर्मादीनामिति।** अनभिहितानामिति शेषः। तथा च तत्र कर्मत्वादिसत्त्वेऽपि न दोषः। ननु समयपरिपालनाय या काचित् तत्र विभक्तिः स्यात्, न तु द्वितीयैवेत्यत आह — **न चान्या इति। एतमिति।** कर्मत्वरूपमित्यर्थः। **उत्सहन्त इति।** शक्नुवन्तीत्यर्थः। **द्वितीया भविष्यतीति।** तत्संबन्धाभिधानसमर्थेति शेषः। तथा चानन्वितार्थकविभक्त्यपेक्षयानुवादकविभक्तिर्न्याय्येति भावः। **अथवा कटोऽपि कर्मेति।** व्याख्यातमिदं प्राक्। **अथवा कट एवेति।** इदं च व्याख्यातं प्राक्। **तस्मान्नार्थः परिगणनेनेति।** विनापि परिगणनं परिगणनफललाभादिति भावः। तदुपपत्तिस्तु 'अस्ति खल्वपि विशेषः' इत्यादिना प्रागेव दर्शिता। इदानीं परिगणने सत्यसति च दोषवाननभिहिताधिकार इत्याशयेनाह — **द्वयोः क्रिययोरिति।**

---

[1] तस्यायं — ऋ.
[2] अदृष्टत्वेन — अ.
[3] कुमारसंभवे २. ५५.
[4] 'एवम्' इत्यस्मादनन्तरं चकारोऽधिकः — व, य.
[5] पा. सू. २. ३. २.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अन्यतरेणेति। अन्यतरवाचकाद्धातोर्विहितेन प्रत्ययेनेत्यर्थः। **अभिहित इति**। तथा च प्रकृत्यन्येन घञाधिकरणेऽभिहिते प्रासादशब्दादासि[1]क्रियापेक्षाधिकरणसमर्पकात् सप्तमी न स्यादिति मन्यते। वस्तुतस्तु प्रासादशब्देनोच्यमानस्य [2]क्रियाविशेषविशिष्टस्याधिकरणस्य घञानमिहितत्वात् तस्मिन् द्योत्ये तत्र सप्तमी स्यादिति न काप्यनुपपत्तिः। इममर्थं मनसि निधायापि [3]यक्षानुरूपबलिन्यायेनाह — **न वान्यतरेणेति**। आसिप्रत्ययेनेत्यर्थः। यद्यप्यन्यतरेण सदिप्रत्ययेनोक्तेऽर्थेऽनभिहितत्वं नास्त्येव, सूत्रे चान्यतरविशेषो नोपात्तः, तथापि कर्मत्वादीनां क्रियाविशेषनिरूपितत्वस्य [3]तत्र तत्रावश्याश्रयणीयत्वेन यत्क्रियानिरूपिते कर्मादौ द्वितीयादिर्विविधित्सिता तद्धातुप्रकृतिकेन [4]तत्प्रतिनिधिना वानभिहितत्वस्य प्रत्यासत्तिलभ्यत्वेनासिक्रियानिरूपिताधिकरणत्वे तत्र सप्तम्या विधित्सितत्वेनासिप्रत्ययेनानभिहितेऽधिकरणे सप्तमीत्यर्थलाभान्न दोष इति भावः। एवं च प्रसज्यप्रतिषेध आश्रीयमाणेऽपि न दोषः, प्रत्यासत्तिलभ्येनाभिहिते नेति निषेधसंभवात्। तमेनमर्थमविद्वान् शङ्कते — **कुतो नु खल्वेतदिति**। [5]यक्षानुरूपबलिन्यायेनोत्तरमाह — **अनभिहिते[हि] विधानमिति**। अस्मदुक्तमधिकारवाद्याशयं बुद्ध्वा कश्चिच्छङ्कते — **यद्यपीति**। समाधत्ते — **अत्रापीति**। **एकस्येति**। आसनमित्यत्र य आसिस्तस्येत्यर्थः। **आसिः साधनमिति**। [6]अधिकरणसामान्यस्य क्रियात्मकत्वमारोप्यैवमुक्तम्। **सर्वकालश्च प्रत्यय इति**। ल्युटः कालविशेषनैरपेक्ष्येण विधानादिति भावः। **अपरस्येति**। आस्त इत्यत्र वर्तमानस्येत्यर्थः। **बाह्यं साधनमिति**। आसनादिशब्दवाच्यं कटादिकमित्यर्थः। **वर्तमानकाल इति**। लटो वर्तमाने विधानादिति भावः। समासतद्धिताव्ययानां धातुप्रकृतिकप्रतिनिधित्वेन[7] संग्रह इति सर्वमनवद्यम्। इदानीं द्रव्यस्यैव साधनत्वं युक्तम्, द्रव्यं च सदैकरूपमिति क्रियाभेदेऽपि साधनभेदाभावात् तत्र सप्तमी न स्यादेवेति मन्यमानः पृच्छति — **किं पुनरिति**। **गुण इत्याहेति**। गुणविशिष्टमित्यर्थः। इदानीं संख्यान्यचतुष्कं प्रातिपदिकार्थ इति पक्षेऽप्यनभिहिताधिकारमन्तरेणैव निरवकाशप्रथमाविषयपरिहारेण द्वितीयादयो भविष्यन्तीति मन्यमान आह — **अनभिहितवचनमिति**। **अकारकमिति**। क्रियापदप्रयोगे सत्येव वृक्षादीनां कारकत्वमिति मन्यते। **अप्रयुज्यमानोऽप्यस्तीति**। अनुच्चारितोऽपि बुद्धिस्थो भवतीति भावः। अस्तेर्भवन्तीपरस्यानुच्चारितस्योपस्थितिर्मा भून्नाम, तथापि न दोष [8]इत्यभ्युपगमवादेनाह — **विप्रतिषेधाद्वेति**। **तत्प्रतिषेधार्थमिति**। अभ्युपगमवादेन प्रवृत्तं विप्रतिषेधमभ्युपेत्यैवमुक्तम्। वस्तुतस्तु कर्मत्वादिविनिर्मुक्तः प्रातिपदिकार्थो नास्तीति कृत्वा यथा प्रथमा निरवकाशा तथा प्रातिपदिकार्थत्वशून्यं कर्मादिकं नास्तीति द्वितीयादिकापि निरवकाशा। तथा च द्वितीयादिभिर्विभक्तिभिः सह प्रथमायाः पर्यायता स्यात्। तद्व्यावृत्तय एवानभिहिताधिकार इति तत्त्वम्। सर्वथानभिहिताधिकारः कर्तव्यः, उत कस्मिंश्चित् पक्षे न कर्तव्य इत्याशयेन कश्चित् पृच्छति — **स कथं कर्तव्य इति**। कस्मिन् पक्षे कर्तव्य इत्यर्थः। उत्तरमाह — [9]**यदैकत्वादय इति**। एकत्वादय एवेत्यर्थः। तथा चैकं द्विकं त्रिकं चतुष्कं वा प्रातिपदिकार्थ इति पक्ष-

---

[1] क्रियापेक्ष्याधिकरण — य.

[2] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.

[3] तत्र तवाश्रयणीयत्वेन — ब; 'तत्र तत्र' इत्यादि 'तत्प्रतिनिधिना वानभिहितत्वस्य' इत्यन्तं नास्ति — य.

[4] एतदुपादानस्य फलमुत्तरत्र स्वयमेव वक्ष्यति।

[5] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.

[6] अधिकरणसामान्यक्रिया — ब, य.

[7] एतेन 'तत्प्रतिनिधिना वा' इति पूर्वोक्तस्य फलमुक्तम्।

[8] इत्यभ्युपगम्यवादेनाह — प.

[9] भाष्ये 'यद्येकत्वादयः' इत्यत्र 'यदैकत्वादयः' इति पाठोऽभिमत इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चतुष्टये [चतुष्कपक्षे]ऽनभिहिताधिकारः कर्तव्य इति फलितम्। पक्षान्तरे तु स न कर्तव्य इत्याह — **अथ हीति**। यदि त्वित्यर्थः। **कर्मादय इति**। कर्मादयोऽपीत्यर्थः। तथा चैकं द्विकं त्रिकं वा प्रातिपदिकार्थ इति पक्षत्रयेऽनभिहिताधिकारो न कर्तव्य इति भावः। एकं द्विकं वा प्रातिपदिकार्थ इति पक्षद्वयं [1]"सरूप"सूत्रे भाष्ये स्पष्टम्। त्रिकं प्रातिपदिकार्थ इति पक्षस्तु [2]"स्त्रियाम्" इत्यधिकारसूत्रेऽपि[3] स्पष्टम्॥

कर्मणि द्वितीया २. ३. २.

[२, ७६९–७७०]

(उद्द्योतनम्) द्वितीयाविधेः प्रयोजनमाह — **सामीप्य इति**। 'अभितः' इत्येतदुभयत इत्यर्थे 'परितः' इति सर्वत इत्यर्थ इति विभागः। **सोऽपीति**। 'अभितः' इति सामान्योक्तेरित्यर्थः। 'अध्यधि' इति द्विर्वचनम्, न निपातान्तरमित्याह — **उपरीति**। **उपर्यर्थ इति**। न त्वैश्वर्ये, तत्र सप्तम्यैव भाव्यमिति भावः। हा तातेत्यत्र [4]हायोगे द्वितीया [5]कुतो न, अत आह — **अन्तरङ्गत्वादिति**। क्रन्दनस्य तातनिमित्तकत्वात् संबोधनविभक्तिरन्तरङ्गा। हाशब्दसापेक्षा[6] द्वितीया बहिरङ्गा। **षष्ठीसमास इति**। तथा च 'तसन्ताभ्याम्' इति भाष्यं संगच्छत इति भावः। ननूभशब्दस्य 'उभयतो ग्रामम्' इत्युदाहरणमयुक्तम्, अत आह — [7]**उभयशब्देति**। उभशब्द एव तसन्तोऽस्तु, किमवयवानुकरणेन, अत आह — **द्विवचनेति**। ननु प्रतेर्लक्षणादौ कर्मप्रवचनीयत्वात् तद्योगे द्वितीया सिद्धेति विधानवैयर्थ्यम्, अत आह — **प्रतिशब्दश्चेति**। ननूदाहृतस्मृतिषु पौनरुक्त्यं दृश्यते। सर्वसंग्राहिका चैकैव स्मृतिरस्तु, अत आह — **केनचिदिति**॥

[२, ७६९–७७०]

(रत्नप्रकाशः) समया ग्राममिति। सामीप्यस्य संबन्धत्वात् षष्ठ्यां प्राप्तायां द्वितीयाविधिः। एवं 'निकषा ग्रामम्' इत्यादावूह्यम्। **हा देवदत्तमिति**। देवदत्तस्य शोच्यतेत्यर्थः। **अभितो ग्राममिति**। [8]"पर्यभिभ्यां च" इति विहिततसिलन्तावभितःपरितश्शब्दावुभयतः सर्वत इत्यनयोरर्थयोर्वर्तेते। तयोर्योगेऽपि षष्ठ्येव प्राप्नोति। **अध्यधि ग्राममिति**। ग्रामस्योपरि समीप इत्यर्थः। [9]"उपर्यध्यधसः सामीप्ये" इति द्विर्वचनम्। **धिग् जाल्ममिति**। जाल्मस्य निन्द्यतेत्यर्थः। हा तातेत्यादौ तु तातादेः क्रियायामेवान्वय इति हायोगाभावेन संबोधनप्रथमैव भवति। **उभसर्वतसोरिति**। उभसर्वयोस्तसौ यौ तयोः, तदन्तयोरित्यर्थः। यत्तु 'उभयशब्दावयवस्योभशब्दस्यानुकरणमत्रोभशब्दो गृह्यते, न तु स्वतन्त्रस्य, तस्य द्विवचनटाब्विषयत्वात्' इति। तन्न, उभशब्दात् तसौ कृते सति ततोऽयचि कृतेऽपि तस्य तसेरुभशब्दाद्विहितस्योभशब्दसंबन्धित्वे बाधकाभावात्।

---

[1] पा. सू. १. २. ६४.
[2] पा. सू. ४. १. ३.
[3] अपिशब्देनेदं सूत्रं समुच्चीयते।
[4] द्वितीया हायोगे — अ.
[5] कुतो वात आह — ऋ.
[6] सापेक्षा बहिरङ्गा द्वितीया — अ.
[7] **उभयशब्दस्येति**। उभयशब्द एव — अ, ऋ.
[8] पा. सू. ५. ३. ९.
[9] पा. सू. ८. १. ७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अयजभावस्यैव द्विवचनटाव्विषयत्वेऽनुदर्शितत्वाच्च। **उपर्युपरि ग्राममिति**। ग्रामस्योपरि समीप इत्यर्थः। **अधोऽधो ग्राममिति**। ग्रामस्याधः समीप इत्यर्थः। **न देवदत्तमिति**। देवदत्तस्य किमपि न प्रतिभाति, न स्फुरतीत्यर्थः। तत्र प्रतेः क्रियायोगादुपसर्गत्वमेव, न तु कर्मप्रवचनीयत्वमिति तल्लक्षण[1]द्वितीया न॥

तृतीया च होश्छन्दसि २. ३. ३.

[२, ७७१–७७२]

(उद्द्योतनम्) सिद्धे इति। वक्ष्यमाणरीत्येत्यर्थः। जुहोतेः प्रीणातिवाचित्वेऽग्निहोत्रशब्दस्याग्निवाचित्वे यवाग्वाग्निं प्रीणयतीति तृतीया सिद्धा। जुहोतेः प्रक्षेपवाचित्वेऽग्निहोत्रशब्दस्य हविर्वाचित्वे यवागूं हविः प्रक्षिपतीति द्वितीयासिद्धेः सूत्रवैयर्थ्यमिति वक्ष्यते। **देवतेति**। देवतोद्देशेन [2]त्यक्तस्य प्रक्षेप इत्यर्थः। [3]'तदुक्ते श्रवणाज्जुहोतिरासेचनाधिकः स्यात्' इति लक्षणात्। **तत्र** विशिष्टजुहोत्यर्थे। [4]प्रक्षेपरूपावयवापेक्षेत्यर्थः। नन्ववयवाश्रिता द्वितीयेत्युक्ते [5]'अथ' इति प्रश्नो न युक्तः, अत आह — **किमिति**। चकारविषयः प्रश्न इत्यर्थः। [6]'सुपां सुपो भवन्ति' इति वार्तिकस्येदानीं विद्यमानत्वात् 'असत्येतस्मिन्' इत्ययुक्तम्, अत आह — **न हीति**। ज्वलयतिकर्मत्वमग्नेरेव, न तु हविष इत्यग्निपरत्वनिश्चय इत्याह — [7]**अग्निमिति**। जुहोतेः प्रीणात्यर्थे प्रयोगमाह — **अग्निष्विति**॥

[२, ७७१–७७२]

(रत्नप्रकाशः) किमर्थमिति। विनाप्येतत् सूत्रं द्वितीयातृतीये सिद्धे इति व्यर्थमिदमिति भावः। **तृतीया यथा स्यादिति**। जुहोतेः कर्मणि वचनान्तरेण तृतीया न प्राप्नोतीति भावः। **असत्येतस्मिन्निति**। वार्तिकस्यार्वाचीनत्वात् सूत्रान्तरेण तत्र तृतीयाया अप्राप्तत्वात् सार्थकमेवेदं सूत्रमिति [भावः]। **यवाग्वा अग्निहोत्रं जुहोतीति**। यवागूरूपमग्निहोत्रं हविरग्नौ प्रक्षिपतीत्यर्थः। यस्याग्निहोत्रममेध्यमापद्येत्यादावग्निहोत्रशब्दो हविषि प्रसिद्धः। 'अस्ति हविषि

---

[1] द्वितीया च — प, व, य.

[2] त्यक्तव्यप्रक्षेप इत्यर्थः — अ.

[3] मीमांसासूत्रम् ४. २. २८. **तदुक्ते** प्रागुक्ते यजतिधातोः शक्यार्थे द्रव्यप्रतियोगिकाग्निसंयोगाधिके **श्रवणात्** व्यवहारात् शक्यतावच्छेदकमासेचनमधिकं यस्मिन्नित्थंभूतः स एव **जुहोतिः** जुहोतिधात्वर्थः स्यात्। द्रव्यदेवतासंबन्धविशिष्टद्रव्यप्रतियोगिकाग्निसंयोगात्मको व्यापारो जुहोत्यर्थ इति भावः।

[4] 'प्रक्षेप' इत्यतः प्राक् 'अवयव' इत्यधिकम् — अ, ऋ.

[5] कथमिति — ऋ.

[6] व्यत्ययेनेति भावः।

[7] प्रदीपे 'अग्निर्ज्वलित इत्यर्थः' इति पाठो दृश्यते। स भाष्ये 'अग्निहोत्रं प्रज्वलितम्' इति पाठाभिप्रायेण। निर्णयसागरमुद्रिते चायं पाठो भाष्ये। भाष्ये 'अग्निहोत्रं प्रज्वलयति' इति पाठो हरयाणामुद्रिते दृश्यते। तादृशपाठाश्रयेण 'अग्निं प्रज्वलयतीत्यर्थः' इत्यन्नंभट्टसंमतप्रदीपपाठः स्यादिति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वर्तते' इत्युत्तरभाष्ये च। **अग्निहोत्रं प्रज्वलितमिति**। [1]समानाधिकरणे पदे इत्यग्निहोत्रशब्दस्तेजोवाचक इति भावः। तत्र 'ज्वल दीप्तौ' इत्यस्मादकर्मकात् कर्तरि क्ते ज्वलितशब्दो दीप्तिकर्तरि वर्तते। दीप्तिकर्तृ च मुख्यं तेज एव। **प्रीणात्यर्थ इति**। तर्पणायामित्यर्थः। **प्रीणातीति**। तर्पयतीत्यर्थः॥

अन्तरान्तरेणयुक्ते २. ३. ४.

[२, ७७२–७७४]

(उद्द्योतनम्) 'अन्तरेण' इत्यस्य व्यावर्त्यत्वोपयोग्यर्थमाह — **अन्तरशब्द इति**। **विशेषेण** विशेषविषयकेण, **ज्ञातेन** ज्ञानेन। गतेनेत्यस्य ज्ञानार्थत्वमुक्तम्। वस्तुतो ज्ञातेनेति [2]तेनेत्यस्य विशेषणम्, विशेषेणेति तृतीया प्रकारे। तेषां विशेषाकारेण [3]ज्ञातेन स्वरूपेण किं प्रयोजनमित्यर्थः। व्यभिचारे हेतुः — **अनिपातस्येति**। अन्तराशब्देऽपि व्यभिचारं शङ्कते — **नन्विति**। लाक्षणिकत्वं [4]तृतीयार्थापेक्षत्वं च 'अन्तरेण' इत्यत्रापि सममिति नेदं विनिगमकम्, अत आह — **अथवेति**। **साहचर्यं** निपातमध्यपाठः। द्योतकत्वलक्षणं वा। इष्टसिद्धये प्रधानाप्रधाने दर्शयति — **युष्मदिति**। अन्तरान्तरेणशब्दार्थेन कमण्डलोर्योगाभावादेवात्र न द्वितीयेति प्रश्नार्थं विवृणोति — **अन्तरेति**। **आधेयप्रधानेति**। यद्यप्याधेयसामान्यस्य कमण्डलुना विशेषेणान्वयः संभवति, तथापि तन्निरपेक्षाधेयमात्र[5]प्रतिपादनमभ्युपेत्यैतदुक्तम्। अत एव समाधाने आधारप्रधानत्वमेव वक्ष्यति। नन्वन्तराशब्दस्याधारप्रधानत्वे 'यदन्तरा तत् स्थानम्' इति कथं भाष्यम्, अत आह — **अत्रेति**। तत्र हेतुः — **अन्यथेति**। आधारप्रधानत्वे सतीत्यर्थः। भाष्यकारेणैवमुक्तौ प्रयोजनमाह — **कमण्डलुयोगेति**। ननु भाष्यानुरोधादन्तराशब्दो मध्यमात्रवचन एवास्तु, अत आह — **लौकिके त्विति**। ननु प्रथमाया न[6] कारकविभक्तित्वम्, [7]क्रियापदाश्रवणाच्च कमण्डलोः कारकत्वमपि नास्ति, अत आह — **अस्तीति**। **अनुषङ्गः** उपस्थानम्, [8]"अस्तिर्भवन्तीपरः" इत्युक्तेः। **तच्चेति**। तस्मिन्नेवार्थे [9]'प्रातिपदिकार्थ' इति प्रथमाविधानात्। यद्यपि कर्तर्यभिहिते तृतीयाभावे प्रातिपदिकार्थमात्र एव प्रथमा, न कर्तरि। [10]'कर्तृकर्मणोः' इत्यादिना विधीयमाना षष्ठी तु कारकविभक्तिः, नैवं प्रथमाया विधानम्। तथापि कर्तृगतैकत्वादिकं प्रथमाभिधेयमिति साप्यत्र कारकविभक्तिरेवेति भावः। कारकविभक्तेः प्राबल्यमाह — **सेति**। **क्रियाद्वारकः** अश्रुतक्रियान्तरद्वारकः॥

[२, ७७२–७७४]

(रत्नप्रकाशः) **शालङ्कायनानामिति**। कर्मणि षष्ठी। **अन्तरेण गतेनेति**। अन्तरशब्दोऽत्र

---

[1] इमे इत्यादिः।

[2] अनेन भाष्ये प्रदीपे च 'ते' इत्यस्य स्थाने 'तेन' इत्यत्रंभट्टपाठ इति सूच्यते।

[3] ज्ञातेन तेन किं — ऋ. तेनेत्यस्य स्वरूपेणेत्यर्थकरणमिति भाति।

[4] तृतीयापेक्षत्वं — अ.

[5] प्रतिपादनमभ्युपेत्य तदुत्तरम् — अ.

[6] 'न' इति नास्ति — अ.

[7] क्रियापदाश्रयणाच्च कमण्डलोः कारकत्वमस्तु, अत आह — अ.

[8] का. वा. २. ३. १–११.

[9] पा. सू. २. ३. ४६.

[10] पा. सू. २. ३. ६५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विशेषवाची, **अन्तरेण** विशेषेण, विशेषरूपेण, **गतेन** ज्ञानेनेत्यर्थः। **लक्षणप्रतिपदोक्तयोरिति**। तृतीयान्तो लाक्षणिकः, तत्प्रतिरूपकं स्वरादौ पठितं तु प्रतिपदोक्तम्। **दृष्टापचार इति**। दृष्टव्यभिचार इत्यर्थः। अनिपातोऽपि हि [1]सोऽस्ति। **अदृष्टापचार इति**। यद्यप्यन्तराशब्द आवन्तोऽप्यस्ति, तथापि शङ्कित्रा स [2]न ज्ञात इति तदनुसारेणैवमुक्तम्। प्रतिपदोक्तत्वादव्ययस्य ग्रहणमिति तूभयत्र तुल्यम्। परस्परसाहचर्येणाप्यव्यययोर्ग्रहणमिति युक्तम्। न च परस्परसाहचर्यादनव्यययोरेव ग्रहणं कुतो नेति वाच्यम्, अव्यययोः स्वरादौ पठितत्वेन परस्परसाहचर्यसंभवात्। अन्ययोः क्वचिद् गणे पाठाभावेन तदसंभवाच्च। यत्तु 'स्त्रीत्वापेक्षटाबाश्रयत्वाद्बहिरङ्ग आवन्तः' इति तन्न, एतादृशस्थले बहिरङ्गपरिभाषाप्रवृत्तौ लक्षणप्रतिपदोक्तपरिभाषाया निरवकाशत्वापत्तेः। अतिप्रसङ्गवारणायाह — **अन्तरान्तरेणयुक्तानामिति**। 'अन्तरान्तरेणयुक्ते' इति सूत्र इत्यर्थः। **अप्रधान इति**। अन्तरान्तरेणशब्दार्थापेक्षया यदप्रधानं तद्वाचकाद् द्वितीया स्यादिति वाच्यमित्यर्थः। इदानीमन्तरान्तरेणशब्दाभ्यामाधारवचनाभ्यां क्रियापदान्वयिभ्यां कमण्डल्वादेः कर्तृवाचकस्य योगाभावादेव ततो द्वितीया न भविष्यतीत्याशयेन शङ्कते — **कः पुनरिति**। **कमण्डलोः स्थानमिति**। नैयायिकमते हि 'भूतले घटः' इत्यादौ भूतलाधिकरणको घट इत्यादिशाब्दबोधो भवति, तथा च कमण्डलोर्द्वितीयावारणायाप्रधानं[3] कर्तव्यमेवेति स्थितम्। वस्तुतस्तु वैयाकरणमते 'भूतले घटः' इत्यादावस्तीति क्रियापदस्याप्रयुक्तस्याप्युपस्थानाद् घटो भूतलाधिकरणकवर्तमानभवनाश्रय इति शाब्दबोधो जायत इति कृत्वा 'अन्तरा त्वां च मां च कमण्डलुः' इत्यादावप्यध्याहृतास्तिक्रियायामेवान्तरादेः कमण्डल्वादेश्च योगेनान्तरादिना कमण्डल्वादेर्योगाभावादेव द्वितीया न भविष्यतीति व्यर्थमेवाप्रधानवचनम्। साक्षात्संबन्धसूचके युक्तग्रहणे विद्यमानेऽपि तदुपेक्ष्य [4]'तुष्यतु दुर्जनः' इति न्यायेनान्तरार्थाधेयभवनाश्रयाभिन्नवाचकः कमण्डलुशब्द इत्यन्तरापरम्परासंबन्धं [5]तस्याभ्युपगम्यापि [6]द्वितीया परिहर्तुं शक्यत इत्याशयेनाह — **उपपदविभक्तेरिति**। **कारकविभक्तिरिति**। कारकस्य वाचिका विभक्तिरित्यर्थः। प्रातिपदिकार्थे विधीयमानापि प्रथमा कर्तृकारकस्य कमण्डलोर्वाचिकेति भवति कारकविभक्तिः। इयं परिभाषान्तरङ्गपरिभाषाविषयविशेषप्रदर्शनपरा, न त्वपूर्वा। प्रकृते हि प्रातिपदिकार्थमात्रापेक्षत्वात् प्रथमान्तरङ्गा। अनेकार्थद्वारकपदान्तरसंबन्धनिमित्ता तु द्वितीया बहिरङ्गा। एतेन 'प्रथमान्तरङ्गा, क्रियाकारकयोः संबन्धस्यान्तरङ्गत्वात्' इति निरस्तम्। प्रथमाविधौ क्रियाकारकसंबन्धस्यानिमित्तत्वेन तदन्तरङ्गत्वेन प्रथमान्तरङ्गत्वोपपादनानौचित्यात्॥

कालाध्वनोरत्यन्तसंयोगे २. ३. ५.

[२, ७७४–७७७]

(उद्द्योतनम्) वार्तिककृतो [7]न्यासान्तरकरणस्य प्रयोजनमाह — **पाणिनीय इति**। **मासमिति**। [8]अनेन द्वितीया। **भाव एवेति**। अकर्मकत्वात्। सकर्मकत्वाभावे कर्मणि प्रत्यया न स्युरित्याह

---

[1] अन्तरेणशब्द इत्यर्थः।
[2] न ज्ञायत इति — प.
[3] अप्रधानग्रहणमित्यर्थः।
[4] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[5] तयोरभ्युपगम्यापि — प, ब, य.
[6] कमण्डलुशब्दादित्यादिः।
[7] न्यासान्तरानुसरणस्य प्रयोजनमाह — अ.
[8] कालाध्वनोरिति सूत्रेणेत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

— **ततश्चेति**। **स्वास इति**। [1]'तयोरेव' इति कर्मणि खल्। अत्यन्तपदस्य कृत्यमाह — **अनत्यन्तेति**। **निष्ठादीनामिति**। निष्ठाकृत्यखलर्थानामित्यर्थः। उदाहरणापेक्षायामाह — **तथा चेति**। आस्यते मास इत्यादिना। वार्तिकेनान्यथासिद्धेः सूत्रं न कर्तव्यमित्याह — **कर्मेति**। वतिनिर्देशे स्वाश्रयानिवर्तनं दृष्टान्तेनाह — **यथेति**। **स्वाश्रयाणि** युद्धादीनि। **स्वाश्रयाणीति**। 'आस्यते मासम्' इत्यादावकर्मकाश्रयो भावे लकारो न निवर्त्यत इत्यर्थः। स्वाश्रयप्रवृत्तौ वतेरनुपयोगमाशङ्कते — **यदीति**। अतिदेशस्य स्वाश्रयाविरोधित्वे सतीत्येवंशब्दार्थः। **नैतदिति**। स्वाश्रयनिरासाय ङित्त्वकित्त्वाद्युपदेशवत् कर्मत्वोपदेशोऽपीति शङ्कानिरासाय वतिरित्यर्थः। नन्वास्त इत्यादौ कर्माप्रतीतेः कथं प्राकृतं कर्म, अत आह — **सकर्मकेति**। **धात्वर्थाङ्गे** [2]धात्वर्थाङ्गके। तेन निष्पन्नमर्थमाह — **ततश्चेति**। नन्वेवं सर्वत्रासिः सकर्मक एव स्यात्, अत आह — **नियतत्वाच्चेति**। कट इति सप्तम्यन्तम्। **क्रियान्तरे** व्यापनादिक्रियान्तरे। **इत्याह** इत्यत आह। क्रियाकृतविशेषमुदाहरति — **यथेति**। **कश्चिदिति**। यद्यपि 'ग्रामं गच्छति' इत्यत्र गमन[3]जन्यः संयोगविशेषोऽस्ति, तथापि संयोगात् पूर्वमपि 'ग्रामं गच्छति' इति प्रयोगादाप्तुमिष्टतमत्वमात्रेणैव तस्यापि कर्मत्वमिति भाष्यकाराशयः। **क्रियामात्रेति**। आसनादिभावप्रत्ययान्तशब्दैरित्यादिः। 'आस्ते' इत्यादौ कालः प्रतीयत एव। अथवा 'आस्ते' इत्यत्रापि क्रियामात्रमेव प्रतिपाद्यते, प्रत्ययार्थकालस्य कर्मत्वाभावात्। किं तु मासादेः। स च यदा नोपात्तस्तदाकर्मकत्वमित्यर्थः[4]। **तदभावः** कालाद्यभावः। **तथापीति**। न विद्यते कर्म येषां [5]धातूनामिति 'अकर्मकाणाम्' इत्यस्य विग्रहः, न तु येषां धात्वर्थानामिति विग्रह इत्यर्थः। **तेषां** धातूनाम्। **प्रयोगान्तरे** [6]'मासमास्ते' इत्यादौ। **सामर्थ्यात्** अकर्मकत्वविशेषणसामर्थ्यात्। 'क्वचित्' इत्यस्यार्थमाह — **द्रव्यकर्मणेति**। उक्तेऽर्थे भाष्यं योजयति — **द्रव्य इति**। पूर्वस्माद्विशेषमाह — **अन्तरङ्गत्वादिति**। साक्षादसाधारण्येन च क्रियानिर्वर्तकत्वमन्तरङ्गत्वम्। 'मास आस्यते' इत्यादिसिद्ध्यर्थमाह — **यत्र त्विति**। पूर्वस्माद् भेदमाह — **संभवेति**। धातूनामन्यपदार्थत्वात् कालस्य व्यभिचारो नास्तीति भावः। [7]अत्र प्राकृतं कर्म न भवतीत्याह — **गुणेनेति**। 'क्रोशमधीते' इत्यादौ तु [8]'प्राकृतमेव कर्म [9]गमनोपसर्जनकेऽध्ययने वर्तते, तत्राधीतेर्वर्तनादिति भावः॥

[२, ७७४–७७७]

(रत्नप्रकाशः) यथाश्रुतसूत्रेण द्वितीयामात्रमेव स्यात्, न तु लादय इति कालाध्वनोः कर्म-

---

[1] पा. सू. ३. ४. ७०.

[2] एवमर्थकरणेन व्यापनाङ्गकासने आस्धातोर्वृत्तिरमिप्रेतेति प्रतीयते। तथा सति 'मासमाप्नुवन्नास्ते' इत्यर्थः स्वीकृतः स्यात्। एवर्थाश्रयणेऽपि सकर्मकत्वोपपत्तावपि प्रदीपे 'मासमासनेन व्याप्नोति' इत्युपर्यर्थवर्णनं विरुद्ध्यते। तत्रासनपूर्वकं व्यापनं ह्यर्थः प्रतीयते। उद्द्योते तथैवार्थश्च वर्णितः। तस्माद्व्यापनादिधात्वर्थस्याङ्गभूते आसनादाविति तत्पुरुषसमासाश्रयणमेव प्रदीपानुगुणं भाति। अतः 'धात्वर्थस्याङ्गे' इति ग्रन्थ उचितो भाति।

[3] जन्यसंयोग — अ.

[4] तदाकर्मत्वमित्यर्थः — ऋ.

[5] धातूनामित्यत्र विग्रहः — अ.

[6] मासमास्यत इत्यादौ — ऋ.

[7] अत्र प्रकृतं — अ; अत्राप्राकृतं — ऋ.

[8] प्रकृतमेव — अ.

[9] गमनोपसर्जनेऽध्ययने — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

व्यपदेशातिदेश एव कर्तुमुचित इत्याह — **अत्यन्तसंयोग इति। कर्मवद् भवत इति।** कर्मशब्देन व्यपदिश्येते इत्यर्थः। **लाद्यर्थमिति।** आदिशब्देन कृत्यक्तखलर्थानां ग्रहणम्। **आस्यत मास इति।** एवम् 'आसितव्यो मासः, आसितो मासः, स्वासो मासः' इत्युदाहरणानि ज्ञेयानि। **स्वाश्रयमपीति।** वत्करणसामर्थ्येन कालाध्वनोर्यत् स्वाभाविकमकर्मत्वं तदाश्रयमपि कार्यं भवतीति भावः। एतेन 'यथा ब्राह्मणवदस्मिन् क्षत्रिये वर्तितव्यमिति ब्राह्मणकार्याणि क्षत्रिये क्रियन्ते, न तु स्वाश्रयाणि निवर्त्यन्ते तद्वदत्रापि कर्मकार्याण्यतिदिश्यन्ते, न तु स्वाश्रयाणि निवर्त्यन्ते' इति निरस्तम्। प्रकृतवार्तिकस्य कार्यातिदेशपरत्वे मानाभावात्। 'कालाध्वानौ कर्मवद् भवतः' इति भाष्येण व्यपदेशातिदेशपक्षपातिना विरोधाच्च। यदप्युक्तम् 'यद्येवमन्तरेणापि वतिं स्वाश्रयाणि भविष्यन्ति। नैतदस्ति, स्वाश्रयकार्यनिवृत्तये तद्रूपासङ्ग आशङ्क्येत' इति। तदपि न, वत्करणाभावे [1]'वृद्धिरादैच्'सूत्रोक्तन्यायेन कालाध्वानौ कर्मसंज्ञकावित्येव वाक्यार्थापत्त्या स्वाश्रयकार्यासंभवेन शङ्कायास्तुच्छत्वात्। तद्रूपासङ्गस्य तत्प्रयुक्तकार्यातिदेशकत्वे संभवति स्वाश्रयनिवर्तकत्वशङ्काया अनुदयेन समाधानस्यापि तुच्छत्वात्। **प्राकृतमेवेति।** [2]'कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम्' इत्यकथितसूत्रगतवार्तिकेनैवानयोः कर्मसंज्ञा सिद्धेति भावः। एतेन 'सकर्मकव्यापनादिधात्वर्थाङ्गे आसनादावास्यादीनां वर्तनात् स्वाभाविकमेतत् कर्मेत्यर्थः' इति निरस्तम्। [3]प्रसिद्धमेवास्याद्यर्थमादाय प्रकृतभाष्यस्योपपादनीयत्वेन तथैव तस्योपपन्नत्वेन चार्थान्तरपरत्वाश्रयेणोपपादनानौचित्यात्। आस्यादेः केवलासनादिवृत्तित्वे कालाध्वनोः कर्मसंज्ञाया अभिमताया असिद्धेः। 'यदि प्राकृतमेवैतत् कर्म' इत्यादिशङ्कासमाधानपरोत्तरभाष्यविरोधाच्च। यदप्युक्तम् 'नियतत्वाच्च प्रयोगस्य कटे आस्त इत्यादावासनमात्रेऽनङ्गीकृतक्रियान्तरे आसिर्वर्तत इत्यतिप्रसङ्गो नोद्भावनीयः' इति। तदपि न, 'मासं कटे आस्ते' इति प्रयोगस्येष्टत्वेन तत्र तदुक्तरीत्या मासादेः कर्मत्वाभावप्रसङ्गात्। प्रतिज्ञामात्रेण तत्र कटादेः कर्मत्ववारणानौचित्याच्च। **यथा कटं करोतीति।** नन्वेतद्दृष्टान्तेन कालाध्वनोरपि [4]'कर्तुरीप्सिततमं कर्म' इति सूत्रेणैव कर्मसंज्ञेति गम्यत इति चेन्न, अत्रत्यवार्तिकं विना कर्मसंज्ञा सिध्यतीत्यस्मिन्नर्थे तस्य दृष्टान्ततासंभवेन तदनुसारेणानयोस्तेन सूत्रेण[5] कर्मसंज्ञेत्येवंपरतया भाष्यव्याख्यानानौचित्यात्। इदानीमुक्तशङ्कानुसारिणं 'प्राकृतमेव' इत्यादिभाष्यस्यार्थं बुद्ध्वा कश्चिद्वार्तिककाराशयं वर्णयति — **एवं मन्यत इति। तन्याय्यं कर्मेति।** यथा 'काण्डानि लुनाति, तण्डुलान् पचति' इत्यादि। **इहेति।** कालाध्वनोरित्यर्थः। परिहरति — **नैवं शक्यमिति।** उक्तलक्षणं न्याय्यं कर्मेत्याश्रयितुं न शक्यमिति भावः। **आदित्यं पश्यतीति।** न हि दर्शनक्रिययादित्ये कश्चन विशेष आहित इति कल्पना युज्यत इति भावः। **तस्मादिति।** यस्मात् सूत्रविषयस्यापि कर्मण ऐकरूप्यं न युज्यतेऽतः [6]'कालभावाध्व' इत्यादिवार्तिकविषयस्य कर्मणः सूत्रविषयकर्मापेक्षया वैजात्येऽपि न दोष इति युज्यते प्राकृतकर्मत्वं कालाध्वनोरिति भावः। इदानीं भाष्यकारस्य मदुक्तमभिप्रायं बुद्ध्वा कश्चिच्छङ्कते — **यदि तर्हीति।** दुरुद्धरं दूषणं मया दत्तमिति मन्यमान आह — **तत्तर्हीति। तत्** 'कर्मवल्लाद्यर्थम्' इति वचनं, कर्तव्यमेवेति मन्यते। परिहरति — **न वक्तव्यमिति।** 'अकर्मकाणामित्युच्यते' इत्यादि 'क्वचिदपि न भवति' इत्यन्तं भाष्यं [7]गतिबुद्ध्यादिसूत्रे व्याख्यातम्। ननु तत्राकर्मकग्रहणेनाविद्यमानकर्मका गृह्यन्त इति कृत्वा कालादिभिन्नकर्मणाकर्मकत्वं साधितम्। [8]'लः कर्मणि च' इत्यत्र त्वविवक्षितकर्माणोऽप्यकर्मक-

---

[1] पा. सू. १. १. १.
[2] श्लोकवार्तिकम् १. ४. ५१ सूत्रे.
[3] प्रसिद्धमेव, आस्याद्यर्थमिति छेदः।
[4] पा. सू. १. ४. ४९.
[5] कर्तुरीप्सिततममित्यनेनेत्यर्थः।
[6] श्लोकवार्तिकम् १. ४. ५१ सूत्रे.
[7] पा. सू. १. ४. ५२.
[8] पा. सू. ३. ४. ६९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ग्रहणेन ग्राह्याः। एवं च सति कालादिकर्मणामप्यविवक्षासंभवेन तदा तत्र चरितार्थं [1]'लः कर्मणि च' इति सूत्रमिति कथमविद्यमानकर्मणां ग्रहणमिति चेन्न, अकर्मकशब्दस्यापुत्रादिशब्दवदविद्यमानकर्मके प्रवृत्तिमुख्यत्वेन कालादिभिन्नकर्मणैव सकर्मकाकर्मकव्यवहारस्योपपादनीयत्वेन भाष्यस्वरसेन च गत्यादिसूत्रवत् [2]'लः कर्मणि च' इत्यत्राप्यविद्यमानकर्मकग्रहणस्य न्याय्यत्वात्। अविवक्षितकर्मकस्यापि तत्र ग्रहणमित्यत्र तु [3]'क्तस्येन्विषयस्य कर्मण्युपसंख्यानम्' इति वार्तिकं तद्भाष्यं च ज्ञापकम्। [4]'लः कर्मणि' इत्यत्र निर्दिष्टमेव ह्यकर्मकग्रहणं [5]'तयोरेव' इत्यत्रानुवर्तते। सूत्रस्थानेऽभिषिक्तस्य वार्तिकस्य खण्डनेन सूत्रमपि खण्डितमिति मन्यमानः पृच्छति — **न तर्हीति**। **इदानीमिति**। वार्तिकप्रत्याख्यानकाल इत्यर्थः। **वक्तव्यं चेति**। चोऽवधारणार्थः। वक्तव्यमेवेत्यर्थः। **क्रोशं कुटिला नदीति**। अत्र कौटिल्यगुणेन साधनेन नद्याः क्रोशेन सहात्यन्तसंयोगः। तत्र संबन्धसामान्ये षष्ठ्यां प्राप्तायां तद्बाधनार्थं द्वितीयाविधानमिति फलितम्। उपलक्षणमिदं सकर्मक[6]धातुप्रयोगे 'मासमधीते वेदम्' इत्यादौ कर्मसंज्ञाभावेऽपि द्वितीयाविधानमित्यस्य। स्पष्टमिदमुत्तरसूत्रे॥

अपवर्गे तृतीया २. ३. ६.

[२, ७७७]

(उद्द्योतनम्) वार्तिकोत्थानबीजमाह — **अपवर्ग इति**। **निष्ठा** समाप्तिः। साधनापवर्गेऽपि क्रियापवर्गोऽस्तीत्यव्यावर्तकत्वं शङ्कते — **यद्यपीति**। **विशेषणोपादान** क्रियापवर्ग इति [7]क्रियाविशेषणोपादान। विशेषमेवाह — **क्रियाया एवेति**। फलनिष्पत्त्या क्रियाया एवापवर्गः [8]साधनसत्त्वेऽपि संभवतीत्यर्थः॥

[२, ७७७]

(रत्नप्रकाशः) **अपवर्गः** समाप्तिः, सा च क्रियायाः। तत्र च कारणं फलावाप्तिर्वा शक्त्यभावो वा। तत्र फलावाप्तिप्रयुक्तोऽपवर्गोऽत्र ग्राह्यः, न तु शक्त्यभावप्रयुक्त इत्याशयेनाह — **क्रियापवर्ग इति**। साधने सत्यपि प्रयोजनलाभेन क्रिया निवृत्तेति स '**क्रियापवर्गः**' इत्युच्यते। प्रयोजनालाभे तु तल्लाभाय क्रियाया आवृत्तेरावश्यकत्वेऽपि साधनाभावात् सा निवृत्तेति तत्र '**साधनापवर्गः**' इत्युच्यत इति तयोर्व्यवस्था॥

सप्तमीपञ्चम्यौ कारकमध्ये २. ३. ७.

[२, ७७७–७७८]

(उद्द्योतनम्) 'शक्तिः कारकम्' इति पक्षे वार्तिकानुपयोगमाशङ्क्याह — **द्रव्यमिति**। 'यं

---

[1] पा. सू. ३. ४. ६९.
[2] पा. सू. ३. ४. ६९.
[3] का. वा. २. ३. ३६–१.
[4] पा. सू. ३. ४. ६९.
[5] पा. सू. ३. ४. ७०.
[6] धातुयोगे — ब.
[7] क्रियारूपविशेषणेत्यर्थः।
[8] साधनत्वेऽपि भवतीत्यर्थः — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

च' इति भाष्योक्तं कारकभेदमुपपादयति — **यं चेति लक्ष्यमिति। प्रदेशादिति।** 'यतश्च' इत्यनेन यत्र स्थित्वा विध्यति तस्य [1]प्रदेशस्यापादानत्वमुच्यत इत्यर्थः। **मध्यव्यपदेशेति।** क्रोशस्येत्यादिः। ननु द्रव्यस्य कारकत्वे 'नान्तरेण' इत्ययुक्तम्, अत आह — **शक्तिरिति।** ननु भुजिक्रियैक्यात् कथं शक्तिभेदः, अत आह — **कालभेदेति ॥**

[२, ७७७–७७८]

(**रत्नप्रकाशः**) अव्याप्तिपरिहारायाह — **क्रियामध्य इति। अद्य देवदत्तो भुक्त्वेति।** द्व्यहरूपस्य कालस्यैकदेवदत्तापेक्षया मध्यत्वं न संभवतीति सूत्रेणात्रानिर्वाहः। भुजिक्रियाव्यक्तिद्वयापेक्षया तु तस्य तत् संभवतीतीष्टसिद्धिरिति भावः। **इहैवेति।** अध्ववाचकस्यैवात्र ग्रहणं स्यादिति भावः। [2]**यच्चेति।** लक्ष्यमित्यर्थः। **यतश्चेति।** व्यधनकरणशरनिस्सरणेऽपादानतार्हस्येष्वासस्य कर्तृत्वं विवक्षितं तत्रेति सूचनायैवमुक्तम्। वस्तुतस्तु 'यश्च विध्यति' इति कर्तृनिदर्शनतात्पर्यकमेव तत्। एतेन 'लक्ष्यप्रदेशयोः कर्मापादानयोर्भेदान्मध्यव्यपदेशोऽस्त्येवेत्यर्थः' इति निरस्तम्। तस्मिन् वाक्येऽपादानानुपादानेन तदपेक्षया मध्यत्वोपपादनानौचित्यात्। अन्यथा सूत्रेऽनुपात्तक्रियपेक्षया कालस्य मध्यत्वोपपत्तौ वार्तिकारम्भस्यैवायुक्तत्वापत्तेश्च। **नान्तरेण साधनमिति।** तथा च क्रियासाधनयोरभेदोपचारात् क्रियानिरूपितं मध्यत्वं कारकनिरूपितमेव भवतीति भावः। तत्र शब्दानुपूर्व्यां नियामकाभावात् 'अद्य भुक्त्वायं भोक्ता द्व्यहे, इहस्थ इष्वासो [3]लक्ष्यं विध्यति क्रोशे' इत्यपि प्रयोगो भवति ॥

कर्मप्रवचनीययुक्ते द्वितीया २. ३. ८.

[२, ७७८–७७९]

(**उद्द्योतनम्**) वार्तिककारस्य तात्पर्यमाह — **यदीति। सामान्येन** 'प्रत्यादिभिश्च' इति वार्तिकं विना यथाश्रुतसूत्रमेवाङ्गीक्रियते चेदित्यर्थः। नन्वप्रतेरित्युक्तेः कथं सप्तमी, अत आह — [4]**तत्रेति।** 'प्रत्यादिभिश्च' इति वचने तु न वक्तव्यमिति लाघवमित्यर्थः। **ततश्चेति।** पुनर्विधानं तद्बाधनार्थमेवेति भावः। **शिष्टं** 'तर्हि' इत्यादिभाष्यम्। सूत्रे [5]'अप्रतेः' इत्युक्तेः 'साधुर्मातरं प्रति' इति द्वितीयासिद्धिः। **इतरत्रापि** परिशब्देऽपि। **अवर्जने** लक्षणादौ। [6]'पञ्चम्यपाङ्परिभिः' इत्यत्र वर्जनार्थापशब्दसाहचर्यात् परिरपि वर्जनार्थ एव गृह्यते, न तु लक्षणाद्यर्थः। तेन 'वृक्षं परि विद्योतते' इत्यत्र लक्षणार्थे[7]परियोगे द्वितीया सिद्धा। 'मातरमनु' इत्यत्र तु नापवादः कश्चिदिति भाष्यार्थः स्पष्ट इत्यर्थः ॥

---

[1] तस्य प्रदेशस्याप्रधानत्वमुच्यत इत्यर्थः —अ.
[2] भाष्ये 'यं च विध्यति' इत्यत्र 'यच्च विध्यति' इति पाठोऽभिमत इति भाति।
[3] लक्षं — ब.
[4] अत्रेति — अ.
[5] पा. सू. २. ३. ४३.
[6] पा. सू. २. ३. १०.
[7] 'परियोगे' इत्यस्मादनन्तरं तुशब्दोऽधिकः —अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ७७८–७७९]

(**रत्नप्रकाशः**) **प्रतिषेधार्थमिति**। बाधनार्थमिति भावः। **वृक्षं परीति**। अत्र परत्वात् [१]'पञ्चम्यपाङ्परिभिः' इति पञ्चमी प्राप्नोति। 'साधुर्देवदत्तो मातरं प्रति' इत्यादौ तु [२]'साधुनिपुणाभ्याम्' इति सप्तमी। पुनर्द्वितीयाविधानं तु तयोरपवादः संपद्यत इति भावः। **अप्रतेरितीति**। तदुपलक्षणं पर्यन्वोरिति भावः। **इतरत्रापीति**। उक्तप्रायमेवेति शेषः। **अयमिति**। कर्मप्रवचनीयसंज्ञक इत्यर्थः। **वर्जनार्थ एवेति**। कर्मप्रवचनीय इति शेषः। तथा च [३]'अपपरी वर्जने' इति सूत्रेण निर्दिष्टेनैव परिणा योगे पञ्चमी भवति, न तु [४]लक्षणेत्थमादिसूत्रेणेति भावः॥

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी २. ३. ९.

[२, ७७९–७८२]

(**उद्द्योतनम्**) काकदन्तविचारतुल्यतां निराह — **इहेति**। भावप्रत्ययाभावात् 'यस्य चैश्वर्यम्' इत्ययुक्तम्, अत आह — **तत्रेति**। भावप्रधानो निर्देश इत्यर्थः। वचनशब्देन भावप्राधान्यमानयति — **अथवेति**। ऐश्वर्यस्येश्वरपदप्रवृत्तिनिमित्तत्वात् 'अनेन' इत्युपपन्नम्। वचनशब्दस्य भावे करणे वा व्युत्पत्तेरुक्तत्वादीश्वरशब्दस्य भावप्रधानत्वात् 'कर्तृनिर्देशश्चेत्' इत्ययुक्तम्, अत आह — **ईशितेति**। [५]'सप्तम्यधिकरणे च' इत्यनेनात्र सप्तम्यङ्गीकारात् 'अवचनात्' इत्ययुक्तम्, अत आह — **एतत्सूत्रेति**। आधारत्वं स्फोरयति — **स्वामिनीति**। नन्वधिशब्दस्य शौण्डादित्वेन समासे सति [६]'अषडक्ष' इत्यादिनाध्युत्तरपदान्नित्येन खेन भाव्यम्। ततश्च 'ब्रह्मदत्ताधीनाः' इत्येव भाव्यम्, 'अधि ब्रह्मदत्ते' इति कथं वाक्यम्, अत आह — **सप्तमीति**। **विभक्त्यर्थेति**। सप्तम्यर्थेत्यर्थः। **अधिब्रह्मदत्तमिति**। [७]'अव्ययं विभक्ति' इत्यादिनाव्ययीभावे सतीत्यर्थः। तथा च 'अधिब्रह्मदत्तं पञ्चालाः' इत्यपि भवति। [८]**सः** शङ्किता, **मन्यते** अनुजानाति। [९]तुशब्दं चशब्दार्थेऽङ्गीकृत्य व्याचष्टे — **सप्तमीविधानमिति**। ईश्वरवाचित्वेऽपि तत्राधेरपाठात् कथं सप्तमी, अत आह — **स्वामीति**। भाष्ये **अधिपतीति**। ईश्वरपर्यायाधिपतिशब्दग्रहणमीश्वरशब्दस्य स्वरूपपरत्वं ज्ञापयतीत्यर्थः। स्वस्वामिभावलक्षणसंबन्धसद्भावात् षष्ठीप्रसङ्ग इत्याह — **संबन्धेति**। **प्रातिपदिकेति**। 'पञ्चालाः' इत्यस्येत्यर्थः। अधेः कर्मप्रवचनीयत्वमाह — **अधिरिति**। [१०]'अतः सूत्रात्। पञ्चालनिष्ठसंबन्धाभिधानाय द्वितीयाप्रसङ्गं वारयति — [११]**उभयगतेति**। ननु [१२]'अधि-

---

[१] पा. सू. २. ३. १०.

[२] पा. सू. २. ३. ४३.

[३] पा. सू. १. ४. ८८.

[४] पा. सू. १. ४. ९०.

[५] पा. सू. २. ३. ३६.

[६] पा. सू. ५. ४. ७.

[७] पा. सू. २. १. ६.

[८] प्रदीपे 'अधिकरणत्वं संमन्यते' इत्यत्र 'अधिकरणत्वं स मन्यते' इत्यन्नंभट्टपाठ इति प्रतीयते।

[९] 'प्रथमानुपपत्तिः' इति वार्तिकस्थाने 'प्रथमानुपपत्तिस्तु' इति निर्णयसागरमुद्रिते पाठः। सोऽन्नंभट्टस्वीकृतः।

[१०] प्रदीपे 'इत्यधेः कर्मप्रवचनीयत्वात्' इत्यत्र 'इत्यतः कर्मप्रवचनीयत्वात्' इत्यन्नंभट्टपाठ इति भाति।

[११] प्रदीपे 'उभयगतस्य संबन्धस्य' इत्यत्र 'उभयगतसंबन्धस्य' इति समस्ततयान्नंभट्टपाठ इति ज्ञायते।

[१२] पा. सू. १. ४. ९७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रीश्वरे' इतीश्वरेऽर्थे कर्मप्रवचनीयसंज्ञाविधानात् तस्यैव कर्मप्रवचनीयेनाधिना योगः, न त्वीशितव्यस्य, तद्योगे कर्मप्रवचनीयत्वाभावात्, अतः कथं द्वितीयाप्रसङ्गः, अत आह — **अधिरिति**। **आक्षेपात्** ससंबन्धिकत्वादित्यर्थः। ननु स्वामिवाचक[1]सप्तम्योभयगतसंबन्धाभिधानात् कथं द्वितीया। अत्राहुः — स्वनिरूपितस्वामिनिष्ठसंबन्धस्य सप्तम्याभिधानेऽपि स्वामिनिरूपितस्वनिष्ठसंबन्धाभिधानाय द्वितीया स्यात्। यद्वा, उभयत्राधियोगाद् द्वितीया प्राप्ता। [2]सा स्वामिनि सप्तम्या बाधिता स्यात् कथं न स्यात्। 'यस्तु खलु' इति भाष्येणैतदेवोक्तम्[3]। स्वस्वामिभावे सप्तम्योक्तेऽप्युपरिभावप्रतिपादनाय स्याद् द्वितीयाप्रसङ्ग इति भाव इति केचित्। तच्चिन्त्यम्, उपरिभावेऽर्थे कर्मप्रवचनीयत्वाभावात्। [4]तस्मिन्नपि पक्षे दोषोद्भावनादाह — **इदानीमिति**। 'स्ववचनात्' इत्यस्य सूत्रार्थप्रतिपादनपरत्वमाह — **यस्येति**। 'एवं तर्हि' [5]इत्युक्तस्यैव व्याख्यानान्तरम्, न वार्तिकान्तरमित्याह — **स्ववचनात्त्विति**। प्रथमायाः कारकविभक्तित्वमुक्तं स्मारयति — **तिष्ठन्तीति**। नन्वधेः स्वं प्रति कर्मप्रवचनीयसंज्ञाविधानसामर्थ्यात् कारकविभक्तिमपि प्रथमां द्वितीया बाधेत, अत आह — **कर्मप्रवचनीयेति**। नन्वधिपञ्चालेषु ब्रह्मदत्त इत्यत्राप्यधिकरणसप्तम्येवेति भाष्ये उक्तम्। ततश्च तदर्थमपि कर्मप्रवचनीयसंज्ञा न वक्तव्या, अत आह — [6]**यथेति**। **यस्य चेति**। 'यस्मादधिकम्' [7]इति तु वक्तव्यमेवेति भावः। ननु गत्युपसर्गसंज्ञाबाधनार्थं कर्मप्रवचनीयसंज्ञा वक्तव्या, अत आह — **ऐश्वर्येति**॥

[२, ७७९–७८२]

(**रत्नप्रकाशः**) ईश्वरशब्दस्य धर्मिप्रधानस्य धर्मप्रधानस्य वा भावल्युडन्तेन वचनशब्देन षष्ठीतत्पुरुषसंभवात् को वा पक्षोऽभिमत इति पृच्छति — **कथमिदमिति**। **कर्तृनिर्देशश्चेदिति**। ईशिता ईश्वरः, ईशनकर्ता, तन्निर्देशश्चेदित्यर्थः। ईश्वरशब्दस्य धर्मपरत्व इति यावत्। **अवचनादिति**। 'यस्य चेश्वरवचनम्' इति प्रकृतसूत्रावयवाभावेऽपीत्यर्थः। एतेन 'एतत्सूत्रारम्भेण विनापीत्यर्थः' इति निरस्तम्। 'यस्मादधिकम्' इत्यंशस्यावश्यकत्वात्। **आधृता इति**। अवस्थिता इत्यर्थः। तथा च [8]'सप्तम्यधिकरणे च' इत्येव तत्र सप्तमी सिद्धेति भावः। आरम्भवाद्यर्धाङ्गीकारेणाह— **सत्यमेवमेतदिति**। **परिग्रहीत्रधीनमिति**। अधिशब्दस्य शौण्डादिगणे पाठात् तेन परिग्रहीतृशब्दस्य सप्तम्यन्तस्य समासे सति ततः [9]'अषडक्षाशितङ्गु' इत्यादिना खे रूपमिदम्। एवं च 'ब्रह्मदत्ताधीनाः पञ्चालाः' इत्यपि भवति। अधिशब्दस्य विभक्त्यर्थवृत्तित्वे त्वव्ययीभावे 'अधिब्रह्मदत्तं पञ्चालाः' इति भवति। अर्धाङ्गीकारबीजमाह — [10]**प्रथमानुपपत्तिस्त्विति**। [11]'कर्मप्रवचनीययुक्ते द्वितीया' इति विशेषविहितया द्वितीयया प्रथमाया बाधादिति भावः। वचनारम्भे तु द्वितीयापवादतया सप्तमी विहिता। सा च षष्ठीवद् विशेषणवाचकादेव भवति, न तु विशेष्यवाचकादिति तत्र युज्यते प्रथमा। एतेन 'सप्तमीविधानमनर्थकम्, प्रथमा च स्वान्न प्राप्नोतीति दोषद्वयोपन्यासः' इति

---

[1] स्वामिवाचकादुत्पन्नसप्तम्येत्यर्थः।

[2] 'सा' इति नास्ति — अ.

[3] अत्र 'इति' इति शेषो बोध्यः, आहुरित्यनेनास्यान्वयः। उपरि 'स्वस्वामिभावे' इति तु मतान्तरमिति भाति।

[4] 'यस्य स्वस्य चेश्वरः' इति पक्ष इत्यर्थः।

[5] इत्येतदित्यर्थः।

[6] यदेति — ऋ.

[7] इति त्ववक्तव्यमेवेति — अ, ऋ.

[8] पा. सू. २. ३. ३६.

[9] पा. सू. ५. ४. ७.

[10] 'प्रथमानुपपत्तिः' इति वार्तिके 'प्रथमानुपपत्तिस्तु' इति निर्णयसागरमुद्रिते पाठः।

[11] पा. सू. २. ३. ८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निरस्तम् । आरम्भवादिमते प्रथमाया उपपन्नत्वात् । 'सत्यमेवम्' इत्यादिभाष्यस्वरसभङ्गाच्च । **षष्ठीसप्तम्याविति** । इतरस्य बुद्धिपरीक्षणायैतदुक्तम् । **ईश्वरवाचीति** । ऐश्वर्यद्योतक इति भावः । **षष्ठी तर्हीति** । इदमपीतरबुद्धिपरीक्षणायैव । **अशेषत्वादिति** । आधाराधेयभावस्य तत्र विवक्षितत्वेन तस्य सप्तम्योक्तत्वेन च षष्ठ्या अप्रसक्तिरिति भावः । इदानीमभिमतमाह— **द्वितीया तर्हीति** । **कर्मप्रवचनीययुक्त इति** । [1]'अधिरीश्वरे' इत्यधेः कर्मप्रवचनीयत्वादिति भावः । **सप्तम्योक्तत्वात्** [2]**तस्यार्थस्येति** । यस्मिन्नर्थे त्वया द्वितीयापाद्यते तस्य सप्तम्योक्तत्वादित्यर्थः । **अधेर्ब्रह्मदत्तस्य चेति** । आधाराधेयभावलक्षण इति शेषः । **अधेः पञ्चालानां चेति** । अधिशब्दद्योत्येश्वरेण सह पञ्चालानां स्वस्वामिभावः, तस्मिन्नभिधेये तत्र विशेषणवाचकः सप्तम्यावरुद्ध इति विशेष्यवाचकादेव द्वितीया स्यादिति भावः । तदेवमारम्भवादिना दत्तं प्रथमानुपपत्तिरूपं दूषणमन्ते परिहरिष्यामीति मनसि निधाय कोटचन्तरेऽपि निरर्थकः सूत्रैकदेश इति वक्तुमनुवदति — **स्ववचनात् सिद्धमिति** । स्ववचनात् स सूत्रावयवः सार्थक इति यदि मन्यस इति भावः । 'एवम्' इत्यादिभाष्यं व्याख्यातप्रायमेव । तदेवं प्रकृतसूत्रगतः 'यस्य चेश्वरवचनम्' इत्यंशः प्रत्याख्यात एवेति निश्चित्य, एवम् [3]'अधिरीश्वरे' इति सूत्रमपि प्रत्याख्यातं वेदितव्यमिति तदारम्भवादिवचनेनैव स्फोरयिष्यामीत्याशयेनाह — **एवं तर्हीति** । [4]यदि 'स्ववचनात् सिद्धम्' इति [5]'अधिरीश्वरे' इति सूत्रार्थविवरणपरमङ्गीकृत्य ब्रह्मदत्तशब्दाद् द्वितीयाभावं संपादयामीति भावः । **स्वं प्रतीति** । ईश्वर इत्यस्याधेयपरत्वाश्रयणादस्यार्थस्य लाभ इति भावः । **तदा पञ्चालेभ्य इति** । अनेनैव प्रकारेणाधिः स्वामिनं प्रति कर्मप्रवचनीयसंज्ञ इति पक्षाश्रयणे यदा पञ्चालेभ्यः सप्तमी तदा ब्रह्मदत्ताद् द्वितीया स्यादित्यापादनीयम् । सर्वपक्षसाधारण्येन प्रथमोपपत्तिमाह— **उपपदविभक्तेरिति** । तदेवं प्रकृतसूत्रावयवः [6]'अधिरीश्वरे' इति सूत्रं च प्रत्याख्यातम् । देशतत्स्वामिनोराधाराधेयभावस्तु संबन्धोऽप्रसिद्धः । प्रसिद्धस्तु स्वस्वमिभाव एव । किं चाधिकरणसप्तम्यां 'ब्रह्मदत्तस्वामिकाः पञ्चालाः, पञ्चालानां स्वामी ब्रह्मदत्तः' इति वा बोधो न स्यात् । इष्यते तु सः । अतः प्रकृतसूत्रावयवः [7]'अधिरीश्वरे' इति सूत्रं च स्थापितमेवास्माभिः । विशेष्यवाचकात् सप्तम्यभावस्तु षष्ठ्यभाववदित्युक्तं प्रागेव । 'उपपदविभक्तेः कारकविभक्तिः' इति न्यायेनापि यथायथं सप्तम्यभावस्ततो ज्ञेयः ॥

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २. ३. १२.

[२, ७८२ – ७८४]

(उद्द्योतनम्) लोके शब्दप्रयोगस्यार्थपरत्वात् 'कर्तव्यम्' इत्ययुक्तम्, अत आह — **स्वं रूपमिति** । तस्य कृत्यमाह — **तेनेति** । द्वितीयाप्राप्त्यर्थमपि तद्वक्तव्यम्, न तु चतुर्थीप्रतिषेधार्थमेव, अत आह — **द्वितीयेति** । **तथापीति** । क्रिययाभिप्रेयमाणस्य संप्रदानत्वं नास्तीत्येवं न

---

[1] पा. सू. १. ४. ९७.

[2] भाष्ये 'तस्याभिसंबन्धस्य' इत्यस्य स्थाने 'तस्यार्थस्य' इति निर्णयसागरमुद्रिते पाठः ।

[3] पा. सू. १. ४. ९७.

[4] 'यदि' इत्येतदनावश्यकं भाति ।

[5] पा. सू. १. ४. ९७.

[6] पा. सू. १. ४. ९७.

[7] पा. सू. १. ४. ९७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रत्याख्यातम्, किं तु संदर्शनादिक्रियाभिराप्यमानत्वाद्[१] गमिक्रियापि कृत्रिमं कर्मेति 'क्रियाग्रहणं न कर्तव्यम्' इत्युक्तम्, वचनफलस्य न्यायादेव लाभात्। तत्र यदा मन्दबुद्धिबोधनाय वचनमङ्गी-क्रियते तदा वचनेन सूत्रप्रत्याख्यानं भाष्ये कृतमित्याह — **वचनमाश्रित्येति**। वार्तिकेन सूत्र-प्रत्याख्यानमयुक्तम्, अत आह — **अथवेति**। ननु सूत्रप्रत्याख्याने उक्तविधया चतुर्थ्येव स्यात्, न द्वितीया, अत आह — **तत्रेति**। सूत्रप्रत्याख्याने सतीत्यर्थः। नन्वेवं पचत्यादिकर्मण्यपि वि-वक्षाभेदेन द्वितीयाचतुर्थ्यौ स्याताम्, अत आह — **भेदाभेदेति**। स्वयं सूत्रं स्थापयति — **अत एवेति**। यतः फलभेदाभावात् प्रत्याख्यानम्, अत एव फलभेदे सति न प्रत्याख्यानमित्यर्थः। 'ग्रामं गन्ता' इत्यादौ [२]'कर्तृकर्मणोः' इति षष्ठीबाधनार्थं द्वितीयाग्रहणं कर्तव्यम्। तस्मिन् कृते षष्ठ्या इव न्यायप्राप्तचतुर्थ्या अपि बाधो मा भूदिति चतुर्थीग्रहणमपि कर्तव्यमिति भावः। अत एव प्रत्याख्यानेन भिन्नफलत्वात् 'चतुर्थी वा' इति वक्तव्ये द्वितीयाग्रहणमपवादविषये [३]द्वितीया-विधानार्थमप्रत्याख्यानीयमित्यन्वयः। **अजाया इति**। प्राप्तामेवाजां ग्रामं नयतीत्यजापि प्राप्त-कर्मेत्यर्थः। अजाकर्तृकगमने ग्रामः प्राप्तमेव कर्म, अत आह — **अथवेति**। 'प्रतीयते' इति शङ्का, 'न' इति समाधानम्। प्रापणान्यथानुपपत्त्या गतिप्रतीतिरिति भावः। अध्वन्यसंप्राप्ते चतुर्थीष्टैवेत्याह — **यदेति**॥

[२, ७८२–७८४]

(रत्नप्रकाशः) अध्वन्यर्थग्रहणमिति। 'कर्मणि' इत्यनेन सामानाधिकरण्यादध्वग्रहणमर्थपर-मिति भावः। एतेन "[४]'स्वं रूपम्' इति वचनात् स्वरूपस्यैव ग्रहणं प्राप्तमित्याह" इति निरस्तम्। स्वरूपपरत्वे 'अनध्वनः' इति पञ्चमीनिर्देशस्योचितत्वेन सप्तमीनिर्देशानुपपत्तेः। **पन्थानं गच्छ-तीति**। [५]'कर्मणि द्वितीया' इत्येवात्र द्वितीया। **वीवधं गच्छतीति**। एतद्भाष्याज्ज्ञायते वीवध-शब्दोऽध्ववाचक इति। **अस्थितप्रतिषेध इति**। प्राप्तप्रतिषेध इत्यर्थः। **पथे गच्छतीत्येवेति**। एवकारोऽप्यर्थः। **इदमिति**। सूत्रमिति शेषः। **क्रियाग्रहणमपि तत्रेति**। यथेदमुपपन्नं तथा तत्रैव व्याख्यातम्। अत्रत्यान्यथाव्याख्यानमपि तत्रैव निरस्तम्। [६]किंचित्तु 'द्वितीया श्रित' इत्यादिसूत्रे। इदानीं सूत्रेऽभ्युपगम्यमानेऽतिप्रसङ्गो भवतीत्याह — **चेष्टायामनध्वनीति**। न्या-सान्तराश्रयेणातिव्याप्तिं परिहरति — **सिद्धं त्विति**। **असंप्राप्तवचनादिति**। 'गत्यर्थकर्मण्यसंप्राप्ते द्वितीयाचतुर्थ्यौ चेष्टायाम्' इति वचनाश्रयणात् सिद्धमिति भावः। **अनपवाद इति**। अपर्युदास इत्यर्थः। **कर्मेति**। कर्मत्वमित्यर्थः। ननु सूत्रप्रत्याख्यानपक्षे 'पन्थानं गच्छति' इत्यादौ संप्र-दानसंज्ञापूर्वचतुर्थी स्यादिति चेन्न, अनाप्तस्यैव क्रिययाभिप्रेयत्वेन[७] संप्राप्तस्य संप्रदानसंज्ञाभावात्॥

---

[१] 'गमि' इति नास्ति — ऋ.

[२] पा. सू. २. ३. ६५.

[३] प्रदीपे 'भिन्नफलत्वादव्याख्यानीयम्' इत्यत्र 'भिन्नफलत्वादप्रत्याख्यानीयम्' इत्यन्नंभट्टाभिमतः पाठः। अयं च पाठ उद्द्योते पाठान्तरत्वेन प्रदर्शितः।

[४] पा. सू. १. १. ६८.

[५] पा. सू. २. ३. २.

[६] 'किंचित्तु' इत्यस्य 'निरस्तम्' इत्यनेनान्वयः स्यादिति भाति॥ केचित्तु — प.

[७] इण् गताविति धातोः 'एतिस्तु' इत्यादिना क्यब्विधानात् 'अभिप्रेत्यम्' इत्येव स्यात्। तस्मादत्र 'इटकिटकटी गतौ' इत्यत्र प्रश्लिष्टस्य इ, अथवा ई धातोः, ईङ् गताविति दिवादेर्वा 'अचो यत्' इति यति पररूपे 'उपेयम्' इतिवत् 'अभिप्रेयम्' इति रूपं बोध्यम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

चतुर्थी संप्रदाने २. ३. १३.

[२, ७८४–७८७]

(उद्द्योतनम्) तादर्थ्यशब्दस्य कार्यकारणसंबन्धाभिधायित्वमाह — **तच्छब्देनेति** । कार्यप्रयोजनमिति बहुव्रीहिः । संबन्धवचने हेतुः — **समासेति** । उभयत्र चतुर्थीप्रसङ्गं निराह — **तत्रेति** । संबन्धाभिधाने सतीत्यर्थः । **चतुर्थी** विशेषणादेव भवतीत्यनुषङ्गः । दारुशब्दात् [1]'हेतौ' इति तृतीयाप्रसङ्गं निराह — **हेताविति** । ननु वचनसामर्थ्यात् तृतीया स्यात्, अत आह — **प्रातिपदिकेति** । उक्तमर्थं श्लोकाभ्यां संगृह्णाति — **तस्मा इति** । 'तच्छब्देन' इत्यादिना 'वचनात्' इत्यन्तेनोक्तस्याद्येन संग्रहः । 'तत्र' इत्यादि 'चतुर्थी' इत्यन्तेनोक्तस्य द्वितीयेन । **गम्यमानेति** । गम्यमानः कार्यकारण[2]भावलक्षणसंबन्धो [3]विभक्त्यर्थो यया विभक्त्येति बहुव्रीहिः । कार्यवाचिनिष्ठयैव चतुर्थ्या कार्यकारणभावो गम्यते, न [4]गुणिनिष्ठयेति भावः। **कृतास्पदा** कृतकृत्या। **नावगाहते** न प्राप्नोति, कारणाच्चतुर्थी न भवतीति यावत् । इतरेतराश्रयमाह — **तस्मा इति**। भाष्ये **तत्तर्हीति** । इतरेतराश्रयपरिहारायार्थशब्दयोगे चतुर्थी भवतीति वक्तव्यमित्यर्थः । तादर्थ्ये चतुर्थ्यैव भाव्यम्, अत आह — **संबन्धसामान्येति** । [5]क्लृप्यर्थयोगे [6]संपत्तिकर्तरि चतुर्थीति वार्तिकार्थमभिसंधाय संपत्तिशब्दार्थमाह — **संपत्तिरिति** । ननु भक्तिर्ज्ञानं भवति, ज्ञानरूपेण परिणमत इत्यर्थे 'भक्तिर्ज्ञानाय कल्पते' इति प्रयोगः । तत्र प्रकृतिविकृत्योर्भेदात् कथं सामानाधिकरण्यम्, अत आह — **विकारस्य चेति** । अभेदविवक्षया सामानाधिकरण्यमित्यर्थः । अत्र प्रथमार्थ एव चतुर्थीविधानात् 'भक्तिर्ज्ञानाय कल्पते' इति सामानाधिकरण्योपपत्तिः । केचित्त्वभेदविवक्षायां 'भक्तिर्ज्ञानं कल्पते' इति प्रथमैव भवति । भेदविवक्षायां तु चतुर्थीत्याहुः । [7]तदेतत्प्रदीपविरुद्धम् । नन्वेवमभेद[8]विवक्षायां प्रकृतेरपि कदाचिच्चतुर्थी स्यात्, अत आह — **यच्चेति** । भक्तय इत्युक्ते ज्ञानगतोत्पत्तिर्न भासत इति न ततश्चतुर्थीत्यर्थः । ननु [9]'जनिकर्तुः प्रकृतिः' इत्यपादानत्वविवक्षायां यदा प्रकृतेः पञ्चमी तदा विकारात् का विभक्तिः, अत आह — **यदेति** । तथा च [10]'भक्तेर्ज्ञानं कल्पते' इति प्रथमैव भवतीत्यर्थः । **अन्ये त्विति** । 'भक्तिर्ज्ञानाय कल्पते' इत्यत्र चतुर्थ्याः प्रथमार्थ एव विधानेन ज्ञानस्य क्लृपिकर्तृत्वप्रतीतिविरोधाभावादित्यर्थः । [11]एतत्प्रदीपानुरोधाच्चतुर्थी प्रथमार्थ इति निश्चीयते । अन्यथा पञ्चमी[12]चतुर्थ्योरन्वयानुपपत्तेरिति ॥

[२, ७८४–७८७]

(रत्नप्रकाशः) तादर्थ्य इति । तच्छब्देनोपकार्यमुच्यते, अर्थशब्देनोपकारकम्, भावप्रत्ययेन तयोः संबन्ध उपकार्योपकारकभावः । तस्य द्विष्ठत्वेऽपि षष्ठीवोपकार्यरूपविशेषणवाचकादेव चतुर्थी

---

[1] पा. सू. २. ३. २३.
[2] भावसंबन्धः — अ.
[3] प्रदीपे श्लोके 'गम्यमानविभक्तित्वात्' इत्यत्र 'गम्यमानविभक्त्यर्थो' इत्यन्नंभट्टपाठ इति भाति।
[4] गुणनिष्ठयेति — अ, ऋ.
[5] क्लृप्त्यर्थप्रयोगे — अ; क्लृप्त्यर्थयोगे – ऋ.
[6] संपद्यकर्तरि — ऋ.
[7] तदेतत्प्रतिपदविरुद्धम् — अ.
[8] विवक्षया प्रकृतेऽपि — अ.
[9] पा. सू. १. ४. ३०.
[10] भक्तिर्ज्ञानं — अ, ऋ.
[11] एतत्प्रतिपादनानुरोधात् — अ.
[12] चतुर्थ्योरनन्वयापत्तेरिति — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भवति। एतेन "तच्छब्देन कार्यं निर्दिश्यते। तस्मा इदं तदर्थमिति समासेन विशिष्टकार्यप्रयोजनं कारणमभिधीयते। तदर्थस्य भावस्तादर्थ्यमिति कार्यकारणसंबन्ध उच्यते। [1]'कृत्तद्धितसमासेभ्यः संबन्धाभिधानं भावप्रत्ययेन' इत्युक्तेः" इति निरस्तम्। द्विजायायं सूप इत्यादौ[2] चतुर्थ्यभावप्रसङ्गात्। न हि द्विजयवाग्वोः[3] कार्यकारणभावोऽस्ति। यदप्युक्तम् "यूपाय दार्वित्यत्र हेतुहेतुमद्भावस्य चतुर्थ्यैव गमितत्वेन दारुशब्दात् [4]'हेतौ' इति तृतीया न भवति" इति। तदपि न, हेतुहेतुमद्भावविवक्षायां 'दारुणा यूपः' इति तृतीयाया इष्टत्वेन [5]'तत्र हेतुहेतुमद्भावाविवक्षाया एव तृतीयाभावे हेतुतौचित्यात्। यदप्युक्तम् 'प्रातिपदिकार्थव्यतिरेके च तृतीयाया विधानादिह च प्रातिपदिकार्थव्यतिरेकाभावात् तृतीया न' इति। तदपि निरस्तम्। तत्र तृतीयाविधानमित्यत्र मानाभावात्। [6]हेतुहेतुमद्भावाविवक्षयैव तत्र [7]तृतीयाया अप्रसक्तेश्च। यदप्युक्तम् —

'तस्मा इत्युपकार्यं हि कार्यं प्रत्यवमृश्यते।
तदर्थशब्दात् संबन्धे भावप्रत्यय इष्यते॥
गम्यमानविभक्तित्वात् चतुर्थी कार्यवाचिनि।
गुणे कृतास्पदा तस्मात् कारणं नावगाहते॥" इति

'स्वायत्ते शब्दप्रयोगे नावाचकं प्रयोक्तव्यम्' इति न्यायविरोधेन प्रथमतस्तच्छब्दं कार्यपरमुक्त्वा कार्यशब्दस्य पुनरुपकार्यपरतया व्याख्यानेन [8]स्वाज्ञानस्य स्वयमेव प्रकटनात्। 'प्रत्ययार्थः प्रकृत्यर्थात् संबन्धश्च विशेषणात्। प्रधानं स्यादतः षष्ठ्यादिर्विशेषणवाचिनः' इति संग्रहश्लोकस्य संबन्धबोधकसकलविभक्तिव्यवस्थापकस्योचितत्वे निर्युक्तिकदुरूहार्थकाल्पविषयकसंग्रहश्लोककरणानौचित्याच्च। कुतर्कवासनावासितान्तःकरणः साधनप्रक्रियापरिपाटीमविद्वान् कश्चिदन्योन्याश्रयग्रस्तमिदं वार्तिकमिति मन्यमानः पृच्छति — **किमिदमिति**। तादर्थ्यशब्दः कथं व्युत्पन्न इत्यर्थः। [9]**तदर्थं किं पुनररिति**। अस्यापि पूर्ववदर्थः। **सर्वनाम्न इति**। प्रकृतितद्वत्त्वसंबन्धे इयं षष्ठी, सर्वनामप्रकृतिकस्येत्यर्थः। **अनेनैवेति**। वार्तिकेनेति शेषः। **इतरेतराश्रयमिति**। वस्तुतस्त्वेतादृशेतरेतराश्रयो न दोषावहः, [10]"सिद्धे शब्दार्थसंबन्धे लोकतोऽर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमः' इत्युक्तत्वेन लोकप्रसिद्धशब्दैः शाब्दबोधे साध्वनुशासनस्य नियमरूपस्याकारणत्वात्। अन्यथा साधुभिः शब्दैः साध्वनुशासनमेव न स्यात्, अन्योन्याश्रयस्य दुर्वारत्वात्। **तर्हि वक्तव्यमिति**। तस्मादर्थशब्देन योगे चतुर्थी भवतीति वचनान्तरं कर्तव्यमिति मन्यते। [11]'तुष्यतु दुर्जनः' इति न्यायेन तदापादितमन्योन्याश्रयमभ्युपेत्य वचनान्तरमन्तरेणैव तत्र चतुर्थी साधयितुं शक्यत इत्याशयेनाह — **न वक्तव्यमिति**। तदर्थशब्दः षष्ठीतत्पुरुषोऽपि संभवतीति नोक्तान्योन्याश्रय इत्याह — **न खल्वपीति**। तदेवमन्योन्याश्रयं परिहृत्य तादर्थ्ये चतुर्थीवचनमाश्रयणीयम्, व्यापकत्वात्, न तु संप्रदानपदघटितमिति मन्यमान आह — **यदीति**। यथाश्रुतसूत्रमावश्यकमित्याह — **अवश्यमिति**। **यान्येनेति**। येषामन्येन संप्रदानसंज्ञा तद्वाचकेभ्यश्चतुर्थ्यर्थमिति भावः। **छात्राय रुचितमिति**। [12]'रुच्यर्थानां प्रीयमाणः' इति छात्रः संप्रदानम्। ननु तिष्ठतु सूत्रम्, 'तादर्थ्य उप-

---

[1] भर्तृहरिणा महाभाष्यटीकायामिदमुक्तमिति वैयाकरणभूषणसारे भावप्रत्ययार्थनिर्णयेउक्तम्।
[2] आदिना द्विजायेयं यवागूरित्यादेर्ग्रहणम्।
[3] द्विजसूपयोरित्यस्याप्युपलक्षणम्।
[4] पा. सू. २. ३. २३.
[5] 'यूपाय दारु' इत्यत्रेत्यर्थः।
[6] हेतुहेतुमद्भावविवक्षयैव — ब.
[7] तृतीयाप्रसक्तेश्च — ब.
[8] स्वज्ञानस्य — ब.
[9] भाष्ये 'तदर्थं पुनः किम्' इत्यत्र 'तदर्थं किं पुनः' इति रत्नप्रकाशकृत्पाठ इति भाति।
[10] का. वा. १.
[11] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[12] पा. सू. १. ४. ३३.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

संख्यानम्' इति वचनं तु कर्तव्यमेवेत्याशयेनाह — **तत्तर्हीति**। **चतुर्थ्यन्तस्येति**। उपकार्यवाचकस्येति शेषः। **तदर्थेन** उपकारकवाचिना। **क्लृपि संपद्यमान इति**। क्लृप्यर्थे शब्दे प्रयुज्यमाने संपद्यमानवाचकाच्चतुर्थी वाच्येत्यर्थः। **संपद्यमानः** विकाररूपः। **मूत्राय कल्पते यवागूरिति**। यद्यपि दारुयूपयोरिव यवागूमूत्रयोः प्रकृतिविकारभावोऽस्ति, तथापि यवाग्वा मूत्रार्थत्वाभावान्न तादर्थ्यचतुर्थ्यास्य गतार्थता। एवम् 'उत्पातेन ज्ञाप्यमाने' इति वचनस्य सार्थकत्वमूह्यम्। यत्तु [1]"प्रकृतेरपादानत्वविवक्षायां विकारवाचकाच्चतुर्थी स्यादेव, विरोधाभावात्' इति। तत्तुच्छम्, युगपद्विशेषणविशेष्यभाववैपरीत्यसंपादकसंबन्धद्वय[2]विवक्षासंभवेन 'दारुणो यूपो भवति, हिरण्यात् कुण्डले भवतः' इति विकारवाचकाच्चतुर्थ्यभावस्यैवौचित्यात्। न हि 'दारुणो यूपाय' इति प्रयोग इष्ट इत्यत्र किंचिन्मानमस्ति। अन्यथा 'दण्डेन घटस्य' इत्यादावपि तृतीयाषष्ठ्योः साधुतापत्तेः। **हितयोगे चेति**। इदं तु चतुर्थ्यन्तस्य हितशब्देन समासविधानात् सिद्धम्। [3]"चतुर्थी चाशिष्यायुष्य' इत्यादिविहितचतुर्थ्यन्तस्य हितशब्देन समासो न भवति, समासेनाशिषोऽनवगमात्। अत एवेदं वचनमपूर्वं ज्ञापकसिद्धानुवादकं वारब्धम्॥

नमः स्वस्तिस्वाहास्वधालंवषड्योगाच्च २. ३. १६.

[२, ७८७–७८८]

(**उद्द्योतनम्**) वचनप्रयोजनमाह — **पूर्वेति**। जाल्मायेत्यत्र नाशीरित्याह — **तत्त्वेति**। अत्र स्वस्ति नाशास्यते, किं तु विद्यमानमनूद्यत इत्यर्थः। अनाशासने हेतुः — **जाल्मत्वादिति**। वचनस्य व्यावर्त्यमाह — **भूषणेति**। अत्रारुच्या मतान्तरमवतारयति — **नन्विति**। 'अलं रोदनेन' इत्यत्रापि [4]वारणार्थयोगे [5]तृतीया भविष्यतीति भावः। 'पर्याप्त्यर्थ' इति द्वेधा व्याचष्टे — **सूत्र इति**। **स्वरूपस्येति**। [6]"स्वं रूपम्' इति वचनात्॥

[२, ७८७ –७८८]

(**रत्नप्रकाशः**) पूर्वविप्रतिषेधमाह — [7]**स्वस्तियोग इति**। अतिव्याप्त्यव्याप्तिपरिहाराय — **अलमितीति**। **अलंकुरुते कन्यामिति**। भूषणार्थोऽत्रालंशब्दः। उपलक्षणमिदं प्रतिषेधार्थकस्य 'अलं रोदनेन' [8]इति। नन्वत्र [9]"उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इत्येव [10]तत्र चतुर्थ्यभावः सेत्स्यतीत्यस्वरसादाह — **अपर इति**। **प्रभुर्मल्लायेति**। एवमव्याप्तिवारणाय वचने आवश्यके सत्यनेनैवातिव्याप्तिरपि वारिता भवतीति वचनस्योभयार्थता न विरुद्धा॥

---

[1] प्रक्रमेऽपादानत्व — प.

[2] विवक्षाया असंभवेनेत्यर्थः।

[3] पा. सू. २. ३. ७३.

[4] वारणार्थकालंशब्दयोगेऽपीत्यर्थः।

[5] रोदनेन साध्यं नास्तीत्यर्थात् प्रतीयमानसाधनक्रियां प्रति करणत्वाद्रोदनस्य ततीया सिद्धेत्याशयः।

[6] पा. सू. १. १. ६८.

[7] स्वस्तिप्रयोग इति — ब.

[8] इत्यस्येत्यर्थः।

[9] परिभाषा १०३.

[10] 'तत्र' इत्यधिकम्, 'अत्र' इति पूर्वं विद्यमानत्वात्। यद्वा, **अत्र** अलंकुरुते कन्यामित्यत्र, **तत्र** भूषणरूपेऽर्थे, इति व्याख्येयम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मन्यकर्मण्यनादरे विभाषाप्राणिषु २. ३. १७.

[२, ७८८–७८९]

(उद्द्योतनम्) योगद्वयस्य विषयविभागमाह — [1]**आद्येनेति**। भाष्ये यावच्छब्दद्वयं यस्मादर्थे। यस्मात् [2]प्रकारान्तरेण नाव्यं तीर्णं, तस्मात् त्वा नावं न मन्ये, नौकार्याकरणात्। यस्माच्छ्राद्धं भुक्तं, तस्मात् तद्व्यतिरिक्तमन्नमन्नकार्याकरणात् नान्नं मन्य इत्यर्थः। [3]**प्रकर्षयुक्तायामिति**। अत एव प्रकर्ष-द्योतनाय [4]'न त्वा' इति नकारप्रयोगः। क्वचित् 'प्रतिषेधयुक्तायाम्' इति पाठः। तत्र प्रकर्षद्योतक-नकारेण युक्तायामित्यर्थः। आपिशलिना [5]साम्यमात्रे चतुर्थी विहिता, तन्निरासायात्र प्रकर्षग्रहणमि-त्याह — **मन्येति**। अन्ये तु तदनुरोधेनात्रापि प्रकर्षो न विवक्षणीय इत्याशयेन तन्मतोपन्यास इत्याहुः ॥

इति महाभाष्यप्रदीपोद्द्योतने द्वितीयाध्यायस्य तृतीयपादे प्रथममाह्निकम् ॥

[२, ७८८–७८९]

(रत्नप्रकाशः) यथाश्रुतसूत्रस्यैकवाक्यतायामव्याप्तिरित्याह — **अप्राणिष्विति**। [6]अव्याप्ति-परिहाराय वाक्यभेदमाश्रयति — **एवं तर्हीति**। वाक्यभेदाश्रयणेऽतिप्रसङ्ग इत्याह — **इहापीति**। यद्यपि योगविभागस्येष्टसिद्ध्यर्थत्वेन [7]सामान्यवाक्यस्यासार्वत्रिकत्वादुक्तातिव्याप्तिदोषो न भवति, तथापि [8]विशेषवाक्यस्य सार्वत्रिकतैवेति [9]तत्प्रयुक्तातिव्याप्तिर्दुर्वारेति न्यासान्तरमाश्रयति — **यदेत-दिति**। **यावत्तीर्णं न नाव्यमिति**। यतो नाव्यं न तीर्णमतस्त्वां नावं न मन्य इति पूर्वेण सहि-तस्यार्थः। एवं 'यावद् भुक्तं न श्राद्धम्' इत्यस्योह्यम्। **प्रकृष्य कुत्सितग्रहणमिति**। निकृष्ट-वस्तुसाम्याभेदयोः कथनेन कुत्सितत्वं गम्यते। [10]तत्साम्याभेदनिषेधकथने त्वत्यन्तं कुत्सितत्वं गम्यते। तथा च नञ्पदघटितं वाक्यं तदुदाहरणं भवतीति फलितम् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे द्वितीयस्याध्यायस्य तृतीये पादे प्रथममाह्निकम् ॥

---

[1] प्रदीपे 'योगविभागेन प्राणिविषया' इत्यत्र 'योगविभागे आद्येन प्राणिविषया' इत्यन्नंभट्टपाठ इति भाति।

[2] भाष्ये 'न त्वा नावं मन्ये यावत्तीर्णं न नाव्यम्' इत्यस्यायमर्थः — यावत् यतः नाव्यं नावा स्वल्पनौकया तार्यमपि त्वया महत्यापि न तीर्णम्, अतस्त्वां नावमुडुपमपि न मन्य इत्यर्थः। नौशब्देनोडुपं स्वल्पनौकोच्यते। त्वाशब्दार्थस्तु महती नौः, इति। एवं 'न त्वान्नं मन्ये यावद्भुक्तं न श्राद्धम्' इत्यस्य चार्थः — यतः श्राद्धं श्राद्धीयैर्विप्रैर्न भुक्त-मतस्त्वामपूपमन्नमोदनमपि न मन्ये, इत्युद्योत उक्तः। अन्नंभट्टेन तु तात्पर्यार्थ उक्त इति भाति। प्रकारान्तरेणैव नाव्यं मया तीर्णम्, न तु त्वया नावेति। एवम् यस्माच्छ्राद्धीयैर्भुक्तमेव श्राद्धं भवति, तद्व्यतिरिक्तमभुक्तमन्नं त्वामित्यर्थ इति।

[3] प्रदीपे 'प्रतिषेधयुक्तायाम्' इत्यत्र 'प्रकर्ष-युक्तायाम्' इत्यन्नंभट्टपाठः।

[4] न त्विति नकार — अ, ऋ.

[5] सामान्यसूत्रे चतुर्थी — अ.

[6] अप्राप्तिपरिहाराय — ब, य.

[7] आद्यवाक्यस्येत्यर्थः।

[8] अप्राणिविषयकविभाषाविधायकस्य द्वितीयस्ये-त्यर्थः।

[9] न त्वा नावं मन्य इत्यादाविति भावः।

[10] तत्साम्यभेदनिषेध — प, ब, य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य तृतीयपादे द्वितीयमाह्निकम्

कर्तृकरणयोस्तृतीया २. ३. १८.

[२, ७८९–७९१]

(उद्द्योतनम्) सर्वत्र सूत्रेणाप्राप्ता विभक्त्यन्तरनिरासाय तृतीया विधीयत इत्याह — **क्रियापदेति** । **[1]प्रथमा वेति**। गोत्रशब्देनैकस्यापत्यस्याभिधाने प्रथमा, अपत्यसमुदायाभिधानेऽवयवावयविसंबन्धे षष्ठीत्यर्थः। **द्वितीयेति**। समशब्दस्य मार्गपरत्वेन द्वितीया प्राप्नोतीत्यर्थः। **अत्रापीति**। धान्यमित्यनेन सामानाधिकरण्यात्। **पञ्चक इति**। [2]'संख्याया अतिशदन्तायाः कन्'। द्वितीयाप्राप्तौ हेतुमाह — **पशूनित्यनेनेति** । संघसंघिनोर्भेदात् कथं सामानाधिकरण्यम्, अत आह — **संघेति** । **शतेति** । [3]'शतमानविंशतिकसहस्रवसनादण्' । एभ्य आर्हीयेष्वर्थेष्वण् । 'क्रियाश्रवणात्'[4] इत्युक्तं निराह — **गम्यमानापीति** । कारणान्तरेणाप्याभिरूप्यसंभवात् [5]'प्रकृति' इत्यस्य प्रयोजनमाह — **इह चेति**। भाष्ये [6]**एतेनाहमिति**। गोत्रस्य गार्ग्यत्वज्ञाने करणत्वमित्यर्थः। अप्रयोगे हेतुः — **प्रतीयमानत्वादिति**। 'तादर्थ्यात्' इति भाष्यतात्पर्यमाह — **द्विद्रोणेति**॥

[२, ७८९–७९१]

(रत्नप्रकाशः) कर्तृकरणभिन्नवाचकादपि क्वचित् तृतीयेष्टेत्याह — **प्रकृत्यादिभ्य इति**। **प्रकृत्याभिरूप इति**। आभिरूप्यस्य सौन्दर्यस्य गुणस्य क्रियात्वाभावेन तत्र प्रकृतेर्निर्व्यापारत्वेन च [7]तत्र करणत्वासंभवात् सूत्रेणाप्राप्ता तृतीया। **प्रायेण याज्ञिका इति**। प्रायस्य बाहुल्यस्य गुणस्य निर्व्यापारस्य याज्ञिकत्वं गुणं प्रति करणत्वासंभवः। **माठरोऽस्मि गोत्रेणेति**। गोत्रस्य सन्तत्याः परम्परारूपाया निर्व्यापाराया माठरत्वे गुणे करणत्वाभावः। **समेन धावतीति**। समं यथा भवति तथा धावतीति क्रियाविशेषणस्य निर्व्यापारस्य करणत्वासंभवः। **द्विद्रोणेन धान्यं क्रीणातीति**। द्वयोर्द्रोणयोः समाहारस्य कर्मरूपधान्याभिन्नस्य तत्कर्मकक्रयणे करणत्वासंभवः। **पञ्चकेनेति**। पञ्च परिमाणं यस्य संघस्य तेनेत्यर्थः। [8]"संख्याया अतिशदन्तायाः' इति कन्। **साहस्रेणेति**। सहस्रं परिमाणं यस्य संघस्य तेनेत्यर्थः। [9]'शतमानविंशतिकसहस्रवसनात्' इत्यण्। **कर्तृकरणयोरित्येव सिद्धमिति**। अनेनैव सूत्रेण सर्वत्र तृतीया सिद्धेत्यत्रास्य न तात्पर्यम्, किं तु विनापि 'प्रकृत्यादिभ्यः' इति वचनेन सा सिद्धेत्यत्रैव। **प्रकृतिकृतमिति**। प्रकृतिहेतुक-

---

[1] प्रदीपे 'प्रथमा षष्ठी वा' इत्यत्र 'प्रथमा वा षष्ठी वा' इत्यन्नंभट्टपाठ इति भाति।
[2] पा. सू. ५. १. २२.
[3] पा. सू. ५. १. २७.
[4] अश्रवणादिति छेदः।
[5] प्रकृतेत्यस्य — अ, ऋ.
[6] तेनाहमिति — अ, ऋ.
[7] 'तत्र' इत्यधिकं भाति।
[8] पा. सू. ५. १. २२.
[9] पा. सू. ५. १. २७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मित्यर्थः। तथा च [1]'हेतौ' इति तृतीया सिद्धेति भावः। एतेन 'गम्यमानापि क्रिया करणादिव्यपदेशनिमित्तं भवति, यथा प्रविश, पिण्डीमित्यत्र। इह करणान्तरव्युदासाय प्रकृतेरेव करणत्वं विवक्षितम्। स्वभावेनायं कृतोऽभिरूपो भवति, न तु वस्त्रालङ्करणादिनेत्यर्थः' इति निरस्तम्। एतादृशस्यैतादृशस्थले करणत्वेऽभ्युपगम्यमाने [2]'हेतौ' इति तृतीयाविधानवैयर्थ्यापत्तेः। न हि तादृशं स्थलमस्ति, यत्र हेतोः करणत्वं न संभवति। प्रविश, पिण्डीमित्यत्र तु प्रकारान्तरासंभवादध्याहृतपदाभ्यामन्वयः स्वीक्रियते। **येन तेऽधीयत इति**। येन विशिष्टास्तेऽधीयत इत्यर्थः। तथा चेत्थंभूतलक्षणे तृतीयेति भावः। 'बहुत्वोपलक्षिता याज्ञिकत्वविशिष्टास्ते' इति हि गम्यते। करणत्वानुपपत्तिस्तु पूर्ववद् बोध्या। एतेन 'बाहुल्यमध्ययने करणत्वेन विवक्षितमित्यर्थः' इति निरस्तम्। इत्थंभूतलक्षणे तृतीयाविधानानर्थक्यापत्तेः। **एतेनाहं [सं]ज्ञाय इति**। गोत्रोपलक्षितगार्ग्यत्वविशिष्टोऽहमस्मि, न तु विद्याचारादिनेति ज्ञाय इत्यर्थः। तथा चात्रापीत्थंभूतलक्षण एव तृतीयेति भावः। **समेन पथेति**। क्वचिन्मार्गोऽपि धावने करणं संभवतीत्याशयेनेदम्। यत्र तु विनैव मार्गं समं यथा भवति तथा धावति तत्रेत्थंभूतलक्षणे तृतीया। समशब्दो भावप्रधानः, समत्वोपलक्षितधावनाश्रय इत्यर्थः। **द्विद्रोणेन हिरण्येनेति**। एवमपि कल्पयितुं शक्यमित्येतदभिप्रायकमिदम्। वस्तुतस्तु द्विद्रोणोपलक्षितं द्रोणद्वयात्मकं धान्यं क्रीणातीत्यर्थः। तथा चेत्थंभूतलक्षणे तृतीयैव तत्र भवति। एवं 'पञ्चकेन, साहस्रेण' इत्यत्र ज्ञेयम्॥

सहयुक्तेऽप्रधाने २. ३. १९.

[२, ७९१–७९३]

(उद्द्योतनम्) उदाहरणस्य स्पष्टत्वात् प्रश्नाशयमाह — **सूत्रान्तरेणेति**। तिलानां साहित्यहेतुत्वात् [3]'हेतौ' इति तृतीया स्यादेव, अत आह — **अत्रेति**। ननु 'तत्र करण इत्येव' इत्ययुक्तम्, मिश्रणे साधकतमत्वेऽपि प्रधाने वपने तथायुक्ततया परत्वात् कर्मसंज्ञाप्रसङ्गात्, अत आह — **अन्तरङ्गत्वादिति**। मिश्रीकरणपूर्वकत्वाद्वपनस्येत्यर्थः। [4]कर्तृत्वेनैवात्र तृतीया सिद्धा, अत आह — **पितुरेवेति**। **शाब्दमिति**। 'आगतो देवदत्तः' इति सामानाधिकरण्यात्। लादिविधौ क्ते किमायातम्, अत आह — **क्तादीनामिति**। आदिना कृत्यखलर्थग्रहणम्। ननूभयस्मिन्नपि कर्तरि लादयो [5]भवन्ति, अत आह — **तत्रैकेनेति**। गतशब्दगतेनेत्यर्थः। विनिगमकमाह — **प्रधान इति**। अशाब्दं कर्तृत्वमित्येतन्निराह — **प्रतीयमानेति**। प्रविश, पिण्डीमित्यादाविवेत्यर्थः। ननूक्तरीत्या तृतीयासिद्धेर्विधानं व्यर्थम्, अत आह — **ल्युटेति**। नन्वप्रधाने कर्तर्यपि तेन सूत्रेण षष्ठ्या भाव्यम्, अत आह — **सा चेति**। ननु कृद्ग्रहणं विनापि [6]तिङो लादेशे षष्ठीनिषेधेनैव व्यावृत्तेः कृत्येव षष्ठी भविष्यतीत्यप्रधानकर्तृप्रतिपत्त्यर्थं चेति तत्र वक्ष्यते। तत्र कथं प्रधान एव षष्ठी, अत आह — **यदा त्विति**। **भेदिकेति**। यज्ञदत्तस्येति प्रयोजकः प्रधानकर्ता, देवदत्तस्येति

---

[1] पा. सू. २. ३. २३.
[2] पा. सू. २. ३. २३.
[3] पा. सू. २. ३. २३.
[4] करणत्वेनात्र — अ.
[5] 'भवन्तु' इत्युचितं भाति।
[6] लादेशे षष्ठीनिषेधेनैव तिङो व्यावृत्तेरित्यन्वयः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रयोज्योऽप्रधानकर्ता । [1]**षष्ठीबाधनाय** पुत्रशब्दादित्यादिः **भवत्येवेति** । तथा चेदमप्युदाहरणमेवेति भावः। ननु मिश्रीकरणाभावे सहार्थाभावात् तृतीया कथम्, अत आह — **एकक्षेत्र इति**। **अन्तरङ्गत्वादिति**। क्रियाकारकसम्बन्धोऽन्तरङ्गः। प्रथमा च कारकविभक्तिरित्यसकृदुक्तम्। अन्तरङ्गत्वस्य नियामकत्वं षष्ठ्यामप्याह — **शिष्येणेति**। गोः शिष्यः पालकः, उपाध्यायः स्वामी, [2]स्वस्वामिभावोऽत्र संबन्धोऽन्तरङ्गः। गोद्वारा शिष्यसाहित्यं बहिरङ्गम्। 'गाः स्वामी' इत्यत्र द्वितीयोदाहरणमित्याह — **अत्रापीति**॥

[२, ७९१–७९३]

(रत्नप्रकाशः) **तिलैर्मिश्रीकृत्येति**। संभवत्येवमपीत्येतावन्मात्रपरम्, विनापि मिश्रणेन पृथगेकस्मिन् क्षेत्रे तेषां वापसंभवेन तत्र तत्प्रयोगस्यैतत्सूत्रविषयत्वसंभवात्। तत्र माषाणां बाहुल्यात् प्राधान्यम्, तिलानामल्पत्वादप्राधान्यम्। विवक्षाभेदेन 'माषांस्तिलांश्च वपति' इति प्रयोगोऽपि तत्र भवत्येव। **पुत्रेण सहेति**। अत्र पितापुत्रयोर्लोकसिद्धः प्रधानगुणभावः। वैवक्षिकस्तु विपरीतोऽपि [3]भवत्येव 'पित्रा सहागतः पुत्रः' इति। [4]तत्राप्रधानस्य वस्तुगत्या गमनाश्रयत्वेऽपि शाब्दत्वं तस्य न भवति। अत्रापि विवक्षावैचित्र्येण 'पिता पुत्रश्चागतः' इत्यपि भवति। इदमप्युदाहरणमन्यथा साधयितुं शक्यत इत्याह — **एतदपीति**। **प्रधाने कर्तरि लादय इति**। [5]'प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः' इति न्यायादिति भावः। तत्रादिशब्देन क्तादयो गृह्यन्ते। **कर्तरीत्येव तृतीयेति**। तथा च 'पुत्रेणागतम्' इति भिन्नं वाक्यमित्यर्थः। वस्तुगत्या तत्र वाक्यभेदाश्रयणमनुभवविरुद्धमिति प्रकृतसूत्रेणैव तृतीया न्याय्या। **पुत्रेण सहागमनमिति**। ल्युटा कर्तुरनभिधानादुभयत्र तृतीयाप्राप्तावप्रधान एव तृतीयेति नियमार्थमिदं भविष्यतीति भावः। **षष्ठ्यत्र बाधिकेति**। [6]प्रधानाप्रधानन्यायेन प्रधानादेव षष्ठ्यां जातायामप्रधाने औत्सर्गिकी तृतीया भविष्यतीति भावः। वस्तुतस्तु पुत्रस्यागमनेन शाब्दान्वयाभावात् प्रकृतसूत्रोदाहरणतैव न्याय्या। किं च षष्ठीविधौ [7]प्रधानाप्रधानन्याय आश्रयितुं न युज्यते, ण्यन्ताण्वुलि 'भेदिका देवदत्तस्य यज्ञदत्तस्य काष्ठानाम्' इत्यादावप्रधानेऽपि कर्तरि षष्ठ्या इष्टत्वात्। तथा च पुत्रस्य कर्तृत्वाश्रयेण तत्र तृतीयासाधनमयुक्तमेव। **पुत्रेण सह स्थूल इति**। अत्र क्रियापदाभावात् पुत्रेणेति [8]कर्तरि तृतीया न घटत इति मन्यते। वस्तुतस्तु 'पुत्रेण सहागतो देवदत्तः' इत्यत्रागतमिति पदस्येवात्रापि [9]भवतीति पदेन सह 'स्थूलेन भूयते' इति पदद्वयस्याध्याहारेणात्रापि[10] कर्तरि तृतीयापादयितुं शक्यत एव। परमार्थतस्तु 'पुत्रेण सहागतो देवदत्तः' इतिवदस्यापि प्रकृतसूत्रोदाहरणत्वमेवेत्यन्यदेतत्। **इदं चाप्युदाहरणमिति**। यथेदं तथोक्तं प्राक्। उपलक्षणमिदमन्ययोरप्युदाहरणत्वे। तदपि प्रतिपादितमेव। इदानीमप्रधानेग्रहणं व्यर्थमित्याह — **सहयुक्त इति**। **गाः स्वामीति**। अत्र [11]'स्वामीश्वराधिपति' इत्यादिना षष्ठीसप्तम्यौ प्राप्ते, ते बाधित्वा कारकविभक्तिर्द्वितीया भवति॥

---

[1] षष्ठीबाधाय — अ, ऋ.
[2] स्वस्वामिसंबन्धः — ऋ.
[3] अपिशब्दो नास्ति — ब, य.
[4] तत्रप्रधानस्य — प, ब.
[5] परिभाषा १०६.
[6] परिभाषा १०६.
[7] परिभाषा १०६.
[8] करणतृतीया — प, ब.
[9] 'भवतीति पदेन सह' इत्यधिकं भाति। यद्वा, 'स्थूलः' इत्यत्र भवतिक्रियान्वयः, वाक्यान्तरे 'स्थूलेन भूयते' इत्यध्याहार इत्याशयः।
[10] 'अत्रापि' इत्यधिकं भाति।
[11] पा. सू. २. ३. ३९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

येनाङ्गविकारः २. ३. २०.

[२, ७९३–७९४]

(उद्द्योतनम्) नन्वङ्गशब्दस्यावयविवाचित्वे[1] शङ्कानुपपत्तिः, अत आह — **अङ्गशब्द इति**। अक्षि काणमित्यत्र काणशब्दात् तृतीयापाद्यत इति वक्तुं सूत्रार्थमाह — **ततो येनेति**। [2]अस्मिन्नर्थे 'अक्ष्णा काणः' इत्यत्र तृतीयाया अप्राप्तेरसंभवोऽपीत्याह — **इहैवेति**। काणशब्दस्य विकारद्योतकगुणवाचित्वमाह — **कण निमीलन इति**। **निमीलनम्** उपघातादिना दृष्टचभावः। **चौरादिकस्य**[3] भावे एरजन्तस्य। तर्ह्यक्षिसामानाधिकरण्यं कथम्, अत आह — **काणेति**। काणशब्दात् तृतीयाप्राप्तिमाह — **तत्रेति**। [4]एवकारव्यवच्छेद्यमाह — **अक्ष्णेति**। अक्षिशब्दस्य विकारद्योतकगुणवाचित्वाभावादित्यर्थः। उक्तातिप्रसङ्गाप्रसङ्गनिरासाय व्याचष्टे — **अङ्गवाचिन इति**। अङ्गशब्दस्यावयवे प्रसिद्धत्वात् कथं समुदायवाचित्वम्, अत आह — **अङ्गानीति**। विकृतनिर्देशे हेतुः — **न हीति**। अक्षि काणमस्येत्यत्रातिव्याप्तिनिरासाय 'न चैतेन' इति भाष्यं व्याचष्टे — **अक्षीति**। नन्वक्षि [5]काणमस्येत्यत्रावयविनोऽपि विकारप्रतीतेः कथं तृतीयाया अभावः, अत आह – **अवयवश्चेति**। अक्षीत्यर्थः। **अवयविना** अस्येत्यनेन। **तस्यैव** अवयवस्यैव, न त्ववयविनः। [6]**विकारप्रतीतिः** शाब्दी, अवयविनस्त्वार्थीति न तृतीयाप्रसङ्ग इति भावः॥

[२, ७९३–७९४]

(रत्नप्रकाशः) अङ्गशब्दस्यावयववाचित्वेन प्रसिद्धत्वाद् येन गुणेनाङ्गस्य विकारो लक्ष्यते तद्गुणवाचकात् तृतीया स्यादिति सूत्रार्थं मत्वा पृच्छति — **इहेति**। **अक्षि काणमस्येति**। अत्र काणशब्दात् तृतीयापाद्या। सूत्रस्यान्य एवार्थ इति नोक्तदोष इत्याशयेनाह — **अङ्गाद्विकृतादिति**। विकृताङ्गवाचकादित्यर्थः। **तद्विकारतश्चेदिति**। तस्याङ्गस्य यो विकारः काणत्वादिस्तेन विशिष्टतयाङ्गी चेदुच्यत इत्यर्थः। उक्तोदाहरणे तु काणत्वेनाङ्गमेवोक्तम्, न त्वङ्गीत्यक्षिशब्दादपि[7] तृतीया न भवति। 'अक्ष्णा काणः' इत्यत्र तु काणशब्देन देवदत्तादिरङ्गचुच्यत इति भवति तत्राक्षिशब्दात् तृतीया। सूत्रार्थ एवैवं दर्शित इत्यविद्वान् पृच्छति — **तत्तर्हीति**। सूत्रार्थ एव मया दर्शितो न त्वपूर्वं वाक्यं पठितमित्याशयेनाह — **न वक्तव्यमिति**। **अङ्गशब्दोऽयमिति**। 'अङ्गविकारः' इत्यत्र निर्दिष्ट इति भावः। **समुदायशब्द इति**। मत्वर्थलक्षणया अर्शआद्यजन्ततया वेति भावः। **करण एषेति**। ननु तर्हि [8]'कर्तृकरणयोस्तृतीया' इत्येव सिद्धे व्यर्थमिदं सूत्रमिति चेन्न, अङ्गिनो विकारप्रत्यक्षे विकारविशिष्टतया [9]ज्ञायमानस्य यस्याङ्गस्य करणत्वं भवति

---

[1] अवयववाचित्वशङ्कानुपपत्तिः — अ.

[2] तस्मिन्नर्थे — अ.

[3] प्रदीपे 'चौरादिकस्याचि घञि वा रूपम्' इति दृश्यते। 'चौरादिकस्य रूपम्' इत्यन्नंभट्टस्याभिमतः पाठः इति प्रतीयते।

[4] प्रदीपे 'इहैव कस्मान्नेत्यर्थः' इत्यत्रत्यैवकारेत्यर्थः।

[5] काणमस्येत्यत्रावयववाचिनोऽपि — अ.

[6] प्रदीपे 'विकारप्रतिपत्तिः' इत्यत्र 'विकारप्रतीतिः' इति पाठोऽन्नंभट्टस्येति ज्ञायते।

[7] अपिना काणशब्दादपि न भवतीति विवक्षितम्।

[8] पा. सू. २. ३. १८.

[9] ज्ञाप्यमानस्याङ्गस्य — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्य वाक्यार्थघटकं कंचित्प्रति[1] करणत्वाभावेऽपि तद्वाचकात् तृतीया भवतीति सूत्रार्थस्य विवक्षितत्वेन गतार्थत्वाभावात्। न हि 'अक्ष्णा काणः' इत्युक्ते काचित् क्रियाक्ष्णा कृता प्रतीयते, येन तत्र करणत्वादक्षणस्तृतीया स्यात्। **न चैतेनावयवेनेति**। तत्रावयवेनेति हेतुगर्भितं विशेषणम्। अवयववाच्यक्षिशब्दसमानाधिकरणत्वादनेन 'अक्षि काणमस्य' इति वाक्यगतेन काणशब्देन समुदायो नोच्यते हीत्यर्थः॥

इत्थंभूतलक्षणे २. ३. २१.

[२, ७९४–७९५]

(उद्द्योतनम्) वचनस्य प्रयोजनमाह — **यदेति**। अत्र तृतीयाप्रसङ्गमुपपादयति — **बहुव्रीहाविति**। ननु कमण्डलुशब्दात् [2]'सुपो धातु' इति सुपो लुक्यपि प्रत्ययलक्षणेन 'अप्रत्ययः' इति प्रातिपदिकत्वनिषेधात् तदाश्रया तृतीया कथं स्यात्, अत आह — **न चेति**। अन्यथा राजाश्व इत्यादौ नलोपो न स्यादिति भावः। ननूत्पन्नायास्तृतीयायाः [3]'सुपो धातु' इति लुप्तत्वान्न रूपभेदः, अत आह — **न चेति**। समासरूपं यत् प्रातिपदिकं तदनवयवत्वादित्यर्थः। तत्र हेतुः — **कृत इति**। 'लक्षणेन' इति तृतीयां साधयति — **पृथगिति**। सूत्रे 'इत्थंभूतलक्षणे' इत्यत्र लक्षणस्य प्राधान्यं दर्शयति — **षष्ठीतत्पुरुषस्येति**। समासावयवव्यावृत्त्यर्थमाह — **अप्राप्तेति**। प्राधान्यविवक्षया समासावयवे व्यावृत्तिमाह — **बहुव्रीहाविति**॥

[२, ७९४–७९५]

(रत्नप्रकाशः) इत्थंभूतवाचिसमानाधिकरणोऽपीत्थंभूतलक्षणविशिष्टवाची इत्थंभूतलक्षणे वर्तमान एवेति ततोऽपि तृतीया प्राप्नोतीति तन्निरासायाह — **तत्स्थे प्रतिषेध इति**। यत्स्थं यदित्थंभूतलक्षणं भवति तद्विशिष्टतद्वाचकात् तृतीया नेति वाच्यमित्यर्थः। **कमण्डलुपाणिमिति**। इत्थंभूतश्छात्रः, तस्य लक्षणं कमण्डलुः, तद्विशिष्टस्य छात्रस्य वाचकः कमण्डलुपाणिशब्द इति ततस्तृतीया न भवतीति भावः। अपूर्वं वचनमन्तरेणैव कमण्डलुपाणिशब्दात् तृतीया न भविष्यतीत्याह — **न वेति**। कमण्डलुपाणिशब्देन योऽर्थ उच्यते स इत्थंभूतादन्यो नेति कमण्डलुपाणिशब्दात् तृतीया न भविष्यत्येवेति तन्निषेधवचनं न कर्तव्यमिति भावः। **यत्रेत्थंभूतस्य पृथग्भूतं लक्षणमिति**। य इत्थंभूतलक्षणवाचकः शब्द इत्थंभूतवाचको न भवति ततस्तृतीयया भवितव्यम् — यथा कमण्डलुना छात्र इतीति भावः। उक्तार्थः सूत्राक्षरान्न लभ्यत इति मन्यमान आह — **किं वक्तव्यमेतदिति**। सूत्राक्षरैरेव सोऽर्थो लभ्यत इत्याशयेनापर आह — **न हीति**। **तथा हीति**। यथा सोऽर्थः सूत्रेण लभ्यस्तथा ह्ययं पाणिनिः प्राधान्येन लक्षणं प्रतिनिर्दिशतीत्यर्थः। तथा च यः शब्दः प्राधान्येनेत्थंभूतस्य लक्षणमाह तत एव तृतीया भवतीति सूत्राक्षरैरेव सोऽर्थो लब्ध इति भावः। एतेनाशङ्कासमाधानपरं सर्वं भाष्यं कमण्डलुपाणिशब्दावयवकमण्डलुशब्दविषयकतया योजयन् निरस्तः। [4]'स्वौजसमौट्' इत्यादिसूत्रेण प्रथमादिषु ङ्याप्प्रातिपदिकाद्विहितासु

---

[1] 'कंञ्चित्प्रति' इत्यस्यानन्तरं 'तस्य' इत्यधिकं वर्तते — प, ब, य.

[2] पा. सू. २. ४. ७१.

[3] पा. सू. २. ४. ७१.

[4] पा. सू. ४. १. २.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]'कर्मणि द्वितीया' इत्यादिप्रकरणस्य नियमार्थमारब्धत्वेन कमण्डलुशब्दात् प्रातिपदिकार्थमात्रे नियतायाः प्रथमायाः [2]'सुपो धातुप्रातिपदिकयोः' इति [3]लुप्तत्वेऽपि [4]'सकृल्लक्षण'न्यायेन पुनस्तत्र [5]'स्वौजसमौट्' इति सूत्रप्रवृत्तौ मानाभावेन तत्र प्रकृतसूत्रस्य नियमरूपस्य प्रसक्त्यभावात्। अन्यथा [6]'सुपो धातुप्रातिपदिकयोः' इति यत्र यत्र सुपो लुक् [7]कृतः तत्र तत्र "स्वौजसमौट्' इति पुनः सुबुत्पत्तौ सर्वोपप्लवः स्यात्। यत्तूक्तम् "[8]'न ङिसंबुद्धयोः' इति ज्ञापकात् प्रत्ययलक्षणेन 'अप्रत्ययः' इति पर्युदासो न भवति" इति। तन्न, ज्ञापकस्य सजातीयापेक्षत्वेन नलोपे कर्तव्ये सुबन्तस्य प्रत्ययलक्षणेन 'अप्रत्ययः' इति पर्युदासो नेति तेन ज्ञापयितुमुचितत्वात्। सामान्यतः प्रत्ययलक्षणेन प्रत्ययान्तपर्युदासाभावज्ञापनाश्रयणे कृत्तद्धितग्रहणस्य नियमार्थताश्रयेण 'अप्रत्ययः, अधातुः' इति पर्युदासद्वयनिराकरणस्य भाष्यकृत्कृतस्यायुक्तत्वापत्तेः, मानप्रयोजनयोरभावाच्च। यदप्युक्तम् 'न च तृतीयाया लुक् प्राप्नोति, समासप्रातिपदिकानवयवत्वात्, तस्याः कृते समास उत्पादनात्' इति। तत् प्रत्याहाराह्निकस्थेन [10]'श्रवणं तु विभक्तेर्न भवति, यतो यदैवावयवानां प्रातिपदिकसंज्ञा प्रवर्तते तदैव समुदायस्यापीति तदन्तर्गतत्वाद्विभक्तेर्लुका भाव्यम्' इति स्वग्रन्थेन विरुद्धम्॥

संज्ञोऽन्यतरस्यां कर्मणि २. ३. २२.

[२, ७९६]

(उद्द्योतनम्) 'संजानीते' इत्यात्मनेपदं साधयति — **संप्रतिभ्यामिति**। गवामन्ययोगाभावात् [11]पञ्चम्या अप्रसङ्गशङ्कां निराह — **एकस्मिन्निति**। नन्वेकस्मिन् वाक्ये गवामन्ययोगोऽस्तीत्युक्तेः 'न ह्यत्र' इत्ययुक्तम्, अत आह — **युक्तेति**। [12]'अन्यारादितर'सूत्रे। **व्यभिचारेति**। स्वस्वामिभावस्य भेदगर्भत्वादित्यर्थः। **अन्ययुक्तः** अन्यत्वप्रतियोगी। पूर्वस्वामिन इदानीं स्वामित्वाभावात् कथं स्वामिनः प्रतियोगित्वम्, अत आह — **भूतेति**। ननु [13]तुल्यार्थेन गवां संबन्धाभावात् कथं तृतीयाप्राप्तिः, येन विप्रतिषेधाश्रयणं स्यात्, अत आह — **गवां य इति**। अनेन स्वामिसंबन्ध उक्तः॥

[२, ७९६]

(रत्नप्रकाशः) मातरं संजानीत इति। [14]'संप्रतिभ्यामनाध्याने' इत्यात्मनेपदम्। **अन्यो गवां स्वामीति**। गोभ्य एवान्यत्वं विवक्षितमिति गोशब्दात् पञ्चम्यपि प्राप्नोतीति भावः। एतेन

---

[1] पा. सू. २. ३. २.
[2] पा. सू. २. ४. ७१.
[3] लुप्तेऽपि — प, व.
[4] परिभाषा १२०.
[5] पा. सू. ४. १. २.
[6] पा. सू. २. ४. ७१.
[7] 'कृतः' इति तत्र नास्ति — व.
[8] पा. सू. ४. १. २.
[9] पा. सू. ८. २. ८.
[10] हयवरट्सूत्रे वर्णानामर्थवत्त्वे 'अर्थवत्कृतानि प्राप्नुवन्ति' इति भाष्यव्याख्यानावसरे प्रदीप इदमुक्तम्।
[11] पञ्चम्याः प्रसङ्ग — ऋ.
[12] पा. सू. २. ३. २९.
[13] तुल्यार्थे गवां — अ.
[14] पा. सू. १. ३. ४६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'एकस्मिन् वाक्ये सहप्रयोगादस्त्यन्ययोगो गवामिति मन्यते' इति निरस्तम् । स्वामिनो गोभ्य एवान्यत्वस्य विवक्षितत्वेन स्वामियोगवदन्ययोगस्याप्यविशिष्टत्वेन 'मन्यते' इत्यस्वरसोक्तौ मानाभावात् । **न ह्यत्र गावोऽन्ययुक्ता इति** । यद्यपि गोशब्दस्य स्वाम्यपेक्षितस्वविशेषसमर्पकत्वमन्यापेक्षितावधिविशेषसमर्पकत्वं च संभवति, तथापि युगपदुभयसमर्पकत्वासंभवेन पर्यायेण तत्समर्पकत्वे यदा स्वविशेषसमर्पकत्वं तदावधिविशेषसमर्पकत्वाभावादन्ययोगो गोशब्दस्य नेति भावः। योगश्चार्थद्वारको न त्वानन्तर्यलक्षण इति सूचयितुं 'गावः' इति बहुवचनान्तनिर्देशः । एतेन 'युक्तग्रहणाद्यदपेक्षमन्यत्वं [1]तद्वाचिनः पञ्चमी । न चात्र गवापेक्षमन्यत्वं स्वामिनः प्रतिपाद्यम्, व्यभिचाराभावात् । किं तु पूर्वस्वाम्यपेक्षम्,' इति निरस्तम् । कंचिन्मन्दबुद्धिं प्रति स्वात् स्वामी भिन्नो यथान्यो गवां स्वामीति प्रयोगस्य संभवात्, तस्मिन्नर्थे पक्षेऽन्यो गोभ्यः स्वामीति प्रयोगस्यापि संभवात् । एतावतैवावलम्बनेन [2]विप्रतिषेधवार्तिकोदाहरणसंभावनाया अपि युक्तत्वाच्च । ननु गावश्चेदन्ययुक्ता न भवन्ति तर्हि कस्तत्रान्ययुक्त इति पृच्छति — **कस्तर्हीति** । उत्तरमाह — **स्वामीति** । एतेन 'भूतपूर्वो यः स्वामी सोऽन्ययुक्त इत्यर्थः' इति निरस्तम् । तदा तद्वाक्ये स्वामिपदस्यान्यसमानाधिकरणस्य सत्त्वेन तदपेक्षयैव यथाश्रुतभाष्यस्योपपन्नत्वेनान्यथाव्याख्यानानौचित्यात् । **तुल्यो गोभिः स्वामीति** । इदमप्युदाहरणं पूर्वोदाहरणवदयुक्तम् । पूर्वोदाहरणस्य दूषितत्वात् तथैवेदं च दूषितप्रायमित्युपेक्षितमिदम् । तथा च 'गोषु स्वामी तुल्यः' इत्यपि प्रयोगः साधुरेव । परं तु प्रत्यासत्त्या तत्र तुल्यत्वं गोनिरूपितमेव, यथा गोभिस्तुल्यः स्वामीत्युक्ते आर्थिकं गोनिरूपितं स्वामित्वम् । एतेन 'गवां यः स्वामी स गोभिर्जाड्यादिना धर्मेण सदृश इत्यर्थविवक्षायामस्ति [3]गवां पदार्थद्वययोगः' इति निरस्तम् । विभक्तिविधावर्थद्वारकसंबन्धस्यापेक्षितत्वेन युगपद् गवां शाब्दस्य पदार्थद्वयान्वयस्यासंभवात् । अस्यार्थस्य समर्थसूत्रे [4]'नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः' इति वार्तिकव्याख्यावसरे भाष्ये निर्दशितत्वाच्च ॥

हेतौ २. ३. २३.

[२, ७९७]

(उद्द्योतनम्) करणतृतीययान्यथासिद्धिनिरासाय करणाद्धेतोर्विशेषमाह — **योग्यतेति** । **अनाश्रितेति** । क्रियायां व्याप्रियमाणं साधकतमं करणमुच्यते । वनस्थदण्डसाधारणयोग्यस्य हेतुत्वम् । **द्रव्येति** । करणं तु क्रियाया एव । उक्तं च — [5]'द्रव्यादिविषयो हेतुः कारकं नियतक्रियम् ।' इति । [6]'अनाश्रिते तु व्यापारे निमित्तं हेतुरिष्यते ।' इति च । अनेकविभक्तिविधानसाम्यात् [7]'सर्वनाम्नः' इत्यत्रेदं पठितुमुचितम्, अत आह — **असर्वनाम्नोऽपीति** । **असर्वनाम्न इति** । 'ज्ञानेन निमित्तेन शिवः सेव्यः' इत्यादौ । पर्यायोपादानस्य मतभेदेन प्रयोजनमाह — **पर्यायेति** ॥

[२, ७९७]

(रत्नप्रकाशः) द्रव्यादिविषयं निर्व्यापारसाधारणं च हेतुत्वम् । यथा दण्डेन घटः, पुण्येन

---

[1] तद्भाविनः — य.
[2] पूर्वविप्रतिषेध — प, ब.
[3] 'गवा पदद्वयार्थयोगः' इति प्रदीपे दृश्यते।
[4] का. वा. २. १. १–५.
[5] वाक्यपदीयम् ३. ७. २५.
[6] वाक्यपदीयम् ३. ७. २४.
[7] पा. सू. २. ३. २७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दृष्टो हरिः, इति। करणत्वं तु क्रियामात्रविषयं व्यापारनियतं च। यथा कुठारेण छिनत्ति, इति। **निमित्तकारणेति**। असर्वनाम्नोऽपि विधानार्थमत्रेदं पठितम्, न तु [1]"सर्वनाम्नस्तृतीया च' इत्यत्र। यत्तु 'प्रायग्रहणात्त्वसर्वनाम्नः प्रथमाद्वितीये न स्तः' इति। तन्न, तत्र मानाभावात्। को हेतुः, कं हेतुमित्यनयोरन्नं हेतुः, अन्नं हेतुमित्युत्तरस्योचितत्वेन सर्वस्मादेव सर्वासामाश्रयितुमुचितत्वात्, भाष्यस्यापि तथोपपन्नत्वाच्च। न हि सर्वो हेतुर्वसति, सर्वं हेतुं वसतीतिवत् 'अन्नं हेतुर्वसति, अन्नं हेतुं वसति' इति प्रयोगे क्रियमाणे [2]किंचिद्बाधकमस्ति। प्रायग्रहणं तु प्रयोगदर्शनस्य वचनपदार्थसंपादकत्वसूचनाय। निमित्तकारणहेतूनां त्रयाणां ग्रहणं निदानबीजादिशब्दैर्योगे मा भूदिति केचित्। प्रपञ्चार्थमित्यपरे, तेषां मते किं निदानं, किं बीजम्, इत्यादि भवति साधु॥

अपादाने पञ्चमी २. ३. २८.

[२, ७९७–८००]

(उद्द्योतनम्) ल्यब्लोपशब्दार्थमाह — [3]**यत्रेति**। [4]गम्यमानार्थतयाप्रयोग[5] एव लोप इत्यर्थः। **सप्तम्यपवाद इति**। आसन उपविश्य प्रेक्षत इत्यर्थावगमात्। अतिप्रसङ्गं निराह — **विशिष्ट इति**। विशेषमेवाह — **यत्रेति**। अपादानत्वाभावाद्वचनापेक्षेत्याह — **क्रियाया इति**। निर्माणशब्दार्थमाह — **यदाश्रित्येति**। तद्युक्तस्य प्रकृतित्वं कालस्याभिधेयत्वमिति शङ्कां [6]वारयितुमाह — **काले विषय इति**। विवक्षितमर्थमाह — **तेनेति**। [7]बहुलक्षणानिरासायाह — **अथवेति**। **परे काले** तद्वाचिनः सप्तमीत्यर्थः। [8]**चात्** 'प्रथमा च' इति चात्। दृश्यतेऽनेनेति दर्शनं चक्षुः, तत्तैजसं विषयपर्यन्तं व्याप्नोति, इन्द्रियाणां [9]प्राप्यकारित्वनियमात्। अतः 'अपादाने' इत्येव पञ्चमी सिद्धेत्याह — **दर्शनमिति**। मतान्तरे निष्क्रान्तस्य तेजसः स्थायित्वाङ्गीकारादाह — **क्षणिकेति**। **तेजोरूपस्य** तेजोद्रव्यस्य। नन्वन्यस्यान्यस्येत्यर्थेऽन्यान्यशब्दः कथं साधुः। द्वन्द्वे एकशेषप्रसङ्गात्, विवक्षितार्थालाभाच्च। अत एव न विशेषणसमासः, विशेषणत्वाभावाच्च। नापि वीप्सायां द्विर्वचनम्, [10]'पदस्य' इत्यधिकारेण[11] प्रातिपदिकस्य तदभावात्। पदस्य द्विर्वचने विभक्तिश्रवणप्रसङ्गात्, अत आह — **भाष्यकारेति**। द्विरुक्तस्यापि विभक्तिलोपः, 'सुप् सुपा' इति समासो [12]वाभ्युपेय इति भावः। **प्रतीयमानत्वादिति**। प्रतीयमानक्रियापेक्षयापि[13] कारकत्वं 'प्रविश, पिण्डीम्' इत्यादिवदुपपन्नमिति भावः। सूत्रवार्तिकयोरभावादाह — **भाष्यकारेति**। **सिद्धा प्रथमेति**। 'चतुर्षु योजनेषु' इत्यत्र सतिसप्तम्यपि सिद्धेत्यर्थः॥

---

[1] पा. सू. २. ३. २७.

[2] किं विधायकमस्ति — य.

[3] तत्रेति — ऋ.

[4] 'गम्यमानार्थतया' इत्यादि 'यत्रेति' इत्यन्तं नास्ति — अ.

[5] अप्रयोग इति छेदः।

[6] कारयितुमाह — अ.

[7] बहुलक्षणनिरासायाह — अ.

[8] 'चात्' इति पदं प्रदीपेषु नोपलभ्यते। प्रदीपे 'तद्युक्तादित्यपेक्षते' इत्यस्मादनन्तरं 'चात् सप्तमी' इत्यन्नंभट्टपाठ इति भाति।

[9] व्याप्यकारित्व — अ.

[10] पा. सू. ८. १. १६.

[11] अधिकरिष्यमाणस्य पदस्येत्यस्य तत्रापकर्षादिति भावः।

[12] वाशब्दो नास्ति — अ.

[13] अपिशब्दो नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ७९७–८००]

(**रत्नप्रकाशः**) **ल्यब्लोप इति**। गम्यमानार्थत्वादप्रयोग एव ल्यबन्तस्य लोपः। गम्यमानापि क्रिया कारकविभक्तौ निमित्तमिति द्वितीयायां प्राप्तायां पञ्चमी विधीयते। **अधिकरणे चेति**। ल्यब्लोप इत्यनुषज्यते। सप्तम्यपवादोऽत्र पञ्चमी। **प्रश्नाख्यानयोरिति**। प्रश्नप्रतिवचनयोरित्यर्थः। इदं वचनं व्यर्थमेवेति वक्ष्यत इति 'कोऽयम्, देवदत्तः', 'कस्यायम्, देवदत्तस्य' इत्यादावतिप्रसङ्गो नापादनीयः। **कुतो भवानिति**। पञ्चम्यां जातायां ततस्तसिल्। अत्र क्रियापदाप्रयोगात् पञ्चमी न प्राप्नोतीति मन्यते। वस्तुतस्तु 'आगतः' इति क्रियापदस्य गम्यमानत्वान्न्यायसिद्धैवेयं पञ्चमी। **यतश्चेति**। यदाश्रित्याध्वकालौ परिच्छिद्येते तत्र पञ्चमीत्यर्थः। **गवीधुमत इति**। नगरविशेषादित्यर्थः। **सांकाश्यमिति**। संकाशेन निर्वृत्तं नगरमित्यर्थः। **तद्युक्तात्काल इति**। काले विषये सति पञ्चम्यन्तार्थेन यो युक्तस्तद्वाचिनः सप्तमीत्यर्थः। अथवा पञ्चमीयुक्तार्थात् परे काले वर्तमानात् सप्तमीत्यर्थः। **अध्वन इति**। तद्युक्तादित्यनुषज्यते। **अपक्रामति तत्तस्माद्दर्शनमिति**। इन्द्रियाणां प्राप्यप्रकाशकत्ववादिमतावलम्बनेन चक्षुरिन्द्रियस्य निर्गमनमभ्युपेत्यैवमुक्तम्। वस्तुतस्तु क्लिष्टकल्पनेयमिति युक्तं वार्तिकाश्रयणमेव। **संततत्वादिति**। प्रवाहवदिति भावः। अत्यन्तापक्रमणमभ्युपेत्याह — **अथवेति**। **अन्यान्यप्रादुर्भावादिति**। अन्यस्यान्यस्य तेजोरूपस्य प्रादुर्भावादत्यन्तापक्रमणेऽपि दोषाभाव इति भावः। अत एव भाष्यादन्यान्यशब्दसाधुत्वं क्षणिकवादप्रसिद्धिश्च। **प्रयोक्तव्यं सदिति**। शाब्दबोधस्य शब्दं 'विनासंभवादिति[1] भावः। **न प्रयुज्यत इति**। विनापि प्रयोगं प्रकरणवशादभ्यासपाटवाच्च तस्योपस्थितिसंभवादिति भावः। **गवीधुमतो निःसृत्येति**। इदं प्रौढिमात्रम्, निस्सृत्यशब्दे विद्यमानेऽन्यस्यार्थस्य प्रतीयमानत्वात्। तदभावे हि गवीधुमतः संबन्धसामान्ये षष्ठी प्राप्नोति, तदपवादतया पञ्चम्यां सत्यां गवीधुमत्संबन्धियोजनचतुष्टयान्तरालकं सांकाश्यमिति बुद्धिर्जायते। तस्मिन् सति तु गवीधुमतो निःसृत्य सांकाश्यमार्गश्चतुर्योजनात्मक इति। नानादेशभाषाव्यवहारश्च वार्तिकानुगुण एव भवति। **कार्तिक्याः प्रभृतीति**। कार्तिकीमवधिं कृत्वेत्यर्थः। अत एव भाष्यात् प्रभृतिशब्दयोगे पञ्चमी। अस्यापि भाष्यस्य प्रभृतिशब्दयोगे पञ्चमी भवतीत्येतावन्मात्रेण प्रवृत्तिः, न तु वार्तिकं मास्त्विति। प्रभृतिशब्दस्मरणमन्तरेणापि 'कार्तिक्या आग्रहायणी मासे' इत्यनेन कार्तिकीसंबन्धिमासान्तरालिकाग्रहायणीति बोधस्य सकलभाषानुसारेण जायमानत्वात्। एवमुत्तरभाष्यस्यापि प्रौढिपरतोन्नेया। एवं च 'प्रश्नाख्यानयोः' इत्येकमेव वार्तिकं प्रत्याख्यातम्, अन्यानि तु स्थितान्येव॥

अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते २. ३. २९.

[२, ८००]

(**उद्द्योतनम्**) **अथेति**। [2]'सहस्य सध्रिः'। अस्यायमादेशोऽप्रत्ययेऽञ्चतौ परे। सहाञ्चतीति सध्र्यङ्। **नान्यस्येति**। तेन सध्र्यङ् च देवदत्तेनेति सहार्थे तृतीयैव भवतीति भावः। **भाष्ये अपकर्षः** अपवादः॥

---

[1] विना, असंभवादिति छेदः।

[2] पा. सू. ६. ३. ९५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८००]

(रत्नप्रकाशः) अत्र दिक्छब्दशब्दसाहचर्यादञ्चूत्तरपदमपि [1]दिग्वाचकमेव गृह्यत इति निर्विवादम्। तथा च दिक्शब्दग्रहणेनैव सिद्धम्, अञ्चूत्तरपदग्रहणं व्यर्थमिति मन्यमानः पृच्छति — **अञ्चूत्तरपदग्रहणं किमिति। अतसर्थप्रत्ययेनेति वक्ष्यतीति।** [2]'अञ्चेर्लुक्' इत्यञ्चत्यन्तात् परस्यास्तातेर्लुक्यञ्चत्यन्तमतसर्थप्रत्ययमिति तद्योगे षष्ठ्यां प्राप्तायां तदपवादतया पञ्चमीं विधातुमञ्चूत्तरपदग्रहणमत्र कृतमिति भावः। **अपकर्षः** अपवादः॥

षष्ठ्यतसर्थप्रत्ययेन २. ३. ३०.

[२, ८०१]

(उद्द्योतनम्) अर्थग्रहणाभावे [3]प्रत्ययान्तरग्रहणं कथं स्यात्, अत आह — **अतस्शब्द इति।** **अशक्यत्वात्** लक्षणाप्रसङ्गादित्यर्थः। प्रत्ययत्वं न व्यभिचरतीति यदुक्तं तत्राह — **तस्यतेरिति।** क्षयार्थस्तसिर्दिवादिः। तथा च [4]तद्व्यावर्तकतया प्रत्ययग्रहणस्य सार्थकत्वान्नार्थोपलक्षणार्थत्वम्, तथा सत्यतिप्रसङ्गश्चेति भावः। **अधिकमिति।** ननु नञ्पूर्वतसिनिवर्तकत्वात् कथमधिकम्। अन्यथा तदर्थकस्यापि ग्रहणप्रसङ्गादिति चेन्न, लक्षणप्रतिपदोक्तपरिभाषया प्रत्ययस्यैव ग्रहणसंभवादित्याशयात्। **लुप्तेति।** प्राच्यां, प्राच्याः, प्राची वा दिगित्यर्थे [5]'दिक्शब्देभ्यः' इत्युत्पन्नस्यास्तातेः [6]'अञ्चेर्लुक्' इति लुकि [7]'लुक्तद्धितलुकि' इति स्त्रीप्रत्ययलोपे 'प्राक्' इति रूपम्। अन्यतरवैयर्थ्ये हेतुः — **एकेति॥**

[२, ८०१]

(रत्नप्रकाशः) यश्चान्यस्तेन समानार्थ इति। तेनापि सिद्धमिति शेषः। [8]'प्रत्ययाप्रत्यययोः प्रत्ययस्यैव ग्रहणम्' [9]'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषितत्वेनातस् प्रत्यय एव गृह्यत इति [10]तदर्थोऽपि प्रत्यय एव ग्राह्यः। तथा चात्र प्रत्ययग्रहणं व्यर्थमेवेति मन्यमानः शङ्कते — **अथेति। प्राग्ग्रामादिति।** प्रत्ययग्रहणं त्वौपदेशिकप्रत्ययसंज्ञकपरिग्रहार्थम्। [11]'अञ्चेर्लुक्' इत्यस्तातेर्लुकि [12]तत्स्थानिकं प्रत्ययत्वमिति तदन्तेन योगे षष्ठी नेति भावः। **अन्यतरच्छक्यमवक्तुमिति।** तथा च पूर्वसूत्रेऽञ्चूत्तरपदग्रहणं न कर्तव्यम्, शब्दतः प्रतिपत्तितश्च गौरवादिति भावः। ननु विष्वक्सध्र्यक्प्रभृतयो येऽदिग्वृत्तयस्तेषां तत्राञ्चूत्तरपदेन ग्रहणं भवतु, [13]सहचरितपरिभाषा तु तत्र न प्रवर्ततेऽञ्चूत्तरपदग्रहणसामर्थ्यादिति चेत्, सत्यम्, 'यथोत्तरं मुनीनां प्रामाण्यम्' इति सर्वैर्वैयाकरणैः स्वीकृतत्वेनात्र च भाष्यकारवचनस्यैवाश्रयितुमुचितत्वात्॥

---

[1] दिग्वाचकमवगम्यत इति — य.
[2] पा. सू. ५. ३. ३०.
[3] अतसर्थकस्य प्रत्ययान्तरस्य ग्रहणमित्यर्थः।
[4] तद्व्यावृत्त्यर्थतया प्रत्यय — ऋ.
[5] पा. सू. ५. ३. २७.
[6] पा. सू. ५. ३. ३०.
[7] पा. सू. १. २. ४९.
[8] परिभाषा १११.
[9] परिभाषा ११४.
[10] तदर्थक इत्यर्थः। बहुव्रीहिर्बोध्यः।
[11] पा. सू. ५. ३. ३०.
[12] तत्स्थानिकत्वादातिदेशिकमित्यर्थः।
[13] परिभाषा ११२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् २. ३. ३२.

[२, ८०१–८०३]

(उद्द्योतनम्) नन्वन्यतरस्यांग्रहणेन पक्षे पञ्चमी विधीयताम्, किं तद्वचनेन, अत आह — **अन्यतरस्यामिति**। नित्यत्वं निराह — **पक्ष इति**। नकारस्यानुपयोगं निराह — **नशब्द इति**। काक्वावधारणं द्योत्यत इति नकारोपयोग इत्याह — **एवेति**। ननु 'अनधिकारः' इत्ययुक्तम्, तथा सति "[1]अन्यारात्' इति सूत्रेऽप्यननुवृत्तिप्रसङ्गात्, अत आह — **अन्यारादिति**। विकल्पेन प्राप्तानुज्ञानं [2]पक्षे क्रियत इति कथं पञ्चमी प्राप्यते, अत आह — **अन्यतरस्यामिति**। कार्यान्तर-प्राप्तावभ्यनुज्ञा, अप्राप्तौ प्रापकत्वमपि वैयर्थ्यपरिहारायाङ्गीक्रियत इति भावः। **यस्य कस्येति**। तथा सति षष्ठ्या अपि प्रापणाप्रसङ्गादिति भावः। 'अवसानतः' इत्यनेन विभक्तिविधानावसान-परेण शेष इति लभ्यत इत्याह — **यत्रेति**। उक्तमर्थं श्लोकेन संगृह्णाति — **यथेति**। **विधी-यते** क्रियते। अन्यथा यस्य कस्याप्यभ्यनुज्ञा स्यादित्यर्थः। 'अन्ततः षष्ठ्याम्' इत्यस्य संग्रहः — **प्राप्त्यभाव इति**। विभक्त्यन्तरस्येत्यादिः। तत्र हेतुः — **सा हीति**। भावे घञन्तस्य प्रकृतानन्वयात् कर्मणि घञित्याह — [3]**संबध्यत इति**। अन्यादिग्रहणसंबद्धमित्यर्थः। पञ्चम्या उत्सर्गत्वाभावाद् बाधमात्रे दृष्टान्त इत्यभिप्रेत्य [4]बाधप्रकारमाह — **पञ्चमीति**॥

[२, ८०१–८०३]

(रत्नप्रकाशः) अन्यतरस्यांग्रहणेन तृतीयाया एवाप्रवृत्तिः पाक्षिकी बोध्यते, न तु विभक्त्य-न्तरं समुच्चीयत इति मन्यमान आह — **पृथगादिष्विति**। पक्ष इति शेषः। **किमर्थं न प्रकृत-मिति**। किंशब्दसहितस्य नञ एवकारार्थत्वेन प्रकृतं पञ्चमीग्रहणमनुवर्तत एवेत्यर्थः। **अन-धिकारः स इति**। [5]"अन्यारात्' इत्युत्तरसूत्रेऽनुवृत्त्यर्थं स्वरितत्वेऽपि तदुत्तरत्र नाधिकृत इति भावः। तत्रापि तस्याधिकारे को दोष इत्यत आह — **अधिकारे हीति**। **अन्यतरस्यांग्रहणसामर्थ्यादिति**। [6]"न केवला प्रकृतिः प्रयोक्तव्या' इति नियमेन [7]"कर्मणि द्वितीया' इत्यादिप्रकरणस्य नियमार्थत्वेन चान्यतरस्यांग्रहणेन विभक्त्यन्तरमनुगृह्यत इत्यकामेनापि वक्तव्यम्। तथा चानुवर्तमानपञ्चमी-द्वितीययोरेव तेनानुग्रहः क्रियते, न तु वक्ष्यमाणशेषषष्ठ्या इति भावः। प्रकृतवचनमन्तरेण यस्याः प्राप्तिरस्ति तस्या एव विभक्तेरन्यतरस्यांग्रहणमनुग्राहकमुचितम्, विकल्पवाचकस्यैवं स्वभावादित्या-शयेनाह — **अस्त्यन्यदिति**। **अन्ततः षष्ठ्यामिति**। अन्ते वक्ष्यमाणायां षष्ठ्यामित्यर्थः। तदेव-मन्यतरस्यांग्रहणस्य पञ्चम्यनुग्राहकत्वं विघटितमिति मन्यमान आह — **तर्हि वक्तव्यमिति**। अव्ययानामनेकार्थत्वात् चार्थेऽत्रान्यतरस्यांग्रहणमित्याश्रयणात् तस्य पञ्चम्यनुग्राहकत्वं युज्यत इत्या-

---

[1] पा. सू. २. ३. २९.
[2] पक्षीक्रियत इति — अ.
[3] एतेन प्रदीपे '**संबन्धमिति**। संबध्यत इति संबन्धम्।' इति पाठोऽन्नंभट्टस्येति प्रतीयते। उपलभ्यमानेषु तु '**संबन्धमिति**। अन्यादि-ग्रहणसंबद्धमित्यर्थः' इत्येव दृश्यते।
[4] बाधकप्रकारमाह — अ.
[5] पा. सू. २. ३. २९.
[6] महाभाष्यम् १. २. ६४.
[7] पा. सू. २. ३. २.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शयेनाह — **न वक्तव्यमिति**। [1]**संबद्धमनुवर्तिष्यत इति**। अन्यादिग्रहणेनेति शेषः। 'संबन्धम्' इति पाठेऽप्यर्थः स एव। किं तु [2]'संबन्धशब्दः अर्शआद्यजन्तस्तदा ज्ञेयः। [3]''इको गुणवृद्धी' इति सूत्रेऽप्युक्तमेवमेव। **यथोत्सर्गेणेति**। तथानुवृत्तस्यापि विधाने प्रसक्ते साक्षादुपात्तविधिना बाध इति भावः। **वक्ष्यत्येतदिति**। [4]''विभाषा तिलमाष' इत्यत्रेति शेषः। **यत्नादिति**। व्याख्यानादित्यर्थः ॥

दूरान्तिकार्थेभ्यो द्वितीया च २. ३. ३५.

[२, ८०३–८०४]

(उद्द्योतनम्) पूर्वसूत्रेण षष्ठीपञ्चम्योः प्राप्तयोः पञ्चमीनिषेधार्थं वार्तिकं व्याचष्टे — **दूरेति**। **योगः** प्रतियोगित्वमित्याह — **यदपेक्षयेति**। **षष्ठचेव** न पञ्चमी। पञ्चम्योः सामानाधिकरण्यशङ्कां निराह — **आवसथस्येति**। पञ्चमीप्रापकमाह — **पूर्वसूत्रेणेति**। अपिना षष्ठीसमुच्चयः ॥

[२, ८०३-८०४]

(रत्नप्रकाशः) [5]''दूरान्तिकार्थैः षष्ठचन्यतरस्याम्' इति सूत्रेऽन्यतरस्यांग्रहणं पञ्चमीसमुच्चयार्थमित्यविद्वानाह — **दूरान्तिकार्थेभ्य इति**। **पञ्चमीविधान इति**। अत्र पञ्चमी चेन्न विधीयते तदा पूर्वसूत्रे पञ्चमीग्रहणं नानुवृत्तमित्येव तत्र तदभावः सिद्ध इति भावः। **तद्युक्तादिति**। दूरान्तिकार्थयुक्तादित्यर्थः। उक्ताभिप्रायेण समाधत्ते — **न वेति**। **दूरादावसथादिति**। आवसथस्य दूर इत्यर्थः ॥

सप्तम्यधिकरणे च २. ३. ३६.

[२, ८०४–८०६]

(उद्द्योतनम्) क्तेनाभिहितत्वात् कथं द्वितीयाप्राप्तिः, अत आह — **यथेति**। कृतमिति भावे निष्ठा, पूर्वमिति क्रियाविशेषणम्, [6]''सपूर्वाच्च' इतीनिः। सुप् सुपेति समासः। पूर्वं कृतमनेन कृतपूर्वी कटम्। निष्ठया [7]कर्मत्वस्यानभिधानाद् द्वितीया। [8]यद्वा, कर्मसामान्यं क्तेनाभिधीयते, न तु विशेषगतमिति तदभिधानाय कटादेर्द्वितीया। तद्वद्व्याकरणे[9]ऽपि द्वितीया प्राप्नोतीत्यर्थः। **अधिकरणेति**। अध्ययनस्य व्याकरणविषयत्वात् तद्द्वाराध्येतुरपि व्याकरणमधिकरणम्।

---

[1] भाष्ये 'संबन्धमनुवर्तिष्यते' इत्यत्र 'संबद्धमनुवर्तिष्यते' इति रत्नप्रकाशकृत्संमतः पाठः।
[2] 'संबन्धशब्दः' इति नास्ति — व.
[3] पा. सू. १. १. ३.
[4] पा. सू. ५. २. ४.
[5] पा. सू. २. ३. ३४.
[6] पा. सू. ५. २. ८७.
[7] कर्मत्वस्याभिधानात् — ऋ.
[8] यद्यपि कर्म — ऋ.
[9] व्याकरणशब्दादपीत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'मासमधीती व्याकरणे' इत्यत्र मासे कथं न सप्तमी, अत आह — **मासमिति**। काले आतिदेशिकत्वात् कर्मत्वस्य वहिरङ्गत्वम्। साधुग्रहणस्य प्रयोजनमाह — **साध्विति**। [1]"साधुनिपुणाभ्याम्' इत्यनेन। **तत्त्वकथन इति**। साधुर्मातरीत्यत्र। तर्हि तत्रार्चाग्रहणं व्यर्थम्, अत आह — **अर्चाग्रहणमिति**। तर्हि 'साधुर्भृत्यो राज्ञः' [इति] [2]तत्त्वकथने सति षष्ठी न स्यात्, अत आह — **साधुर्भृत्य इति**। **न त्विति**। तदपेक्षायां तु[3] 'साधुः राज्ञि' इति भवत्येव सप्तमीति भावः। न चैवं तस्मिन् सूत्रे साधुग्रहणं व्यर्थमिति वाच्यम्, [4]"अर्चायामप्रतेः' इति प्रतिषेधार्थं [5]तदुपपत्तेरित्याहुः। **लक्ष्यलक्षणेति**। आसिभुजिक्रिययोरित्यादिः। निमित्तशब्दार्थमाह — **क्रियाफलमिति**। **ततो हेताविति**। फलस्यापि स्वसाधनताज्ञानद्वारा प्रवृत्तिहेतुत्वं ज्ञेयम्। कर्मसंयोग इत्येतद्व्याचष्टे — **तस्येति**। तस्य व्यावर्त्यमाह — **वेतनेनेति**। लवनक्रियाफलं वेतनम्, तस्य न धान्येन संयोग इति सप्तम्यभावात् तृतीयैव भवतीत्यर्थः। सम्यग्योगः संयोग इति संयोगसमवायलक्षणः संबन्धो विवक्षितः। तत्र चर्मद्वीपिनोः समवायः, दन्तकेशादीनां संयुक्तद्रव्यत्वपक्षे संयोगः, अवयवत्वपक्षे समवायः। भाष्ये **सीम्नीति**। [6]सीमनिर्णयार्थं **पुष्कलकः** शङ्कुः, **निहतः** निखात इत्यर्थः। अत्र शङ्कोः सीम्नश्च संयोगः संबन्धः॥

[२, ८०४–८०६]

(रत्नप्रकाशः) **क्तस्येन्विषयस्येति**। इन्प्रकृतिभूतस्य क्तान्तस्येत्यर्थः। **अधीती व्याकरण इति**। अधीतमनेनेत्यधीती, अधीतवानित्यर्थः। [7]"इष्टादिभ्यश्च' इतीनिः। 'कृतपूर्वी कटम्' इत्यत्रेव कर्मणि द्वितीयायां प्राप्तायां तदपवादतया सप्तमीविधानम्। यत्तु 'मासमधीती व्याकरण इति कालकर्मणो वहिरङ्गत्वादिहाग्रहणात् सप्तम्यभावः' इति। तत्तुच्छम्, अकर्मकधातुयोगे कालादेर्विधीयमानायाः कर्मसंज्ञायाः सकर्मकधातुयोगेऽप्रसक्तेः। अन्तरङ्गवहिरङ्गयोरन्तरङ्गस्यैव ग्रहणमिति परिभाषाभावेन वहिरङ्गस्याग्रहणमित्यस्य निर्मूलत्वाच्च। तर्हि तत्र द्वितीया केनेति चेत् [8]"कालाध्वनोरत्यन्तसंयोगे' इति सूत्रेणेति गृहाण। **साध्वसाधुप्रयोगे चेति**। अनर्थं साधुग्रहणम्। [9]"अप्रतेः' इति निषेधस्त्वत्रापि भवति। एवं चेदं वार्तिकं तस्मिन्नेव सूत्रे कर्तुमुचितम्। **कारकार्हणामिति**। कारकत्वार्हाणामित्यर्थः, क्रियासंबन्धार्हाणामिति यावत्। [10]**कारक इति**। कारकत्व इत्यर्थः। **ऋद्धेषु भुञ्जानेष्विति**। ऋद्धा भोजनसंवन्धमर्हन्ति, अन्नादिसामग्र्याः सत्त्वात्। भावलक्षणत्वाविवक्षायां संवन्धसामान्यषष्ठ्यां प्राप्तायां वचनम्। **मूर्खेष्वासीनेष्विति**। यद्यपि

---

[1] पा. सू. २. ३. ४३.

[2] तत्त्वकथनेनेति — अ, ऋ.

[3] तुशब्दो नास्ति — अ.

[4] पा. सू. २. ३. ४३.

[5] तदुपपत्तिरित्याहुः — अ.

[6] अत्र कौमुद्यां सीमशब्दस्याण्डकोशपरत्वं पुष्कलकशब्दस्य गन्धमृगपरत्वं चोक्तम्। पदमञ्जर्यमितादृशार्थकरणात् तदनुरोधोऽत्र। "दुर्गवाक्यप्रबोधे तु कुलचन्द्रस्त्वाह — **सीमा** अण्डकोशः, **पुष्कलको** गन्धमृगः। उक्तं च मेदिनीकोशे—सीमा घाटस्थितिक्षेत्रेष्वण्डकोशेषु च स्त्रियाम्। इति। 'अथ पुष्कलको गन्धमृगे क्षपणकीलयोः।' इति च॥" इति शब्दकौस्तुभ उक्तम्॥

[7] पा. सू. ५. २. ८८.

[8] पा. सू. २. ३. ५.

[9] पा. सू. २. ३. ४३.

[10] वार्तिके 'कारकार्हाणां च कारकत्वे' इत्यत्र 'कारकार्हाणां च कारके' इति पाठो रत्नप्रकाशकृत्संमतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मूर्खा आसिक्रियासंबन्धार्हाः, तथापि भुजिक्रियां प्रत्येवानर्हत्वाकारकत्वे विवक्षिते इति न गतार्थता। **तद्विपर्यासे चेति**। कारकार्हाणामकारकत्वेऽकारकार्हाणां कारकत्व इत्यर्थः। **निमित्तात् कर्मसंयोग इति**। **कर्मणा** क्रिययाप्तुमिष्टतमेन, संयोगे संबन्धे सति, यत् **निमित्तं** क्रियायाः फलं, तद्वाचकात् सप्तमी वाच्येत्यर्थः। वेतनेन धान्यं लुनातीत्यत्र वेतनेन धान्यस्य संबन्धाभावेन वेतनशब्दात् सप्तमी न भवति, किं तु [1]"हेतौ' इति तृतीयैव॥

यस्य च भावेन भावलक्षणम् २. ३. ३७.

[२, ८०६–८०७]

(**उद्द्योतनम्**) **अभावलक्षणे** यस्य भावलक्षणत्वं नास्ति [2]तत्रापीत्यर्थः। तमुपपादयति— **भूय इति**। व्याप्तेर्भूयोदर्शनग्राह्यत्वादित्यर्थः। **क्रियानिमित्तकः** न तु व्याप्तिनिमित्तकः॥

[२, ८०६–८०७]

(**रत्नप्रकाशः**) **अभावलक्षण इति**। यद् भावलक्षणं न भवति तद्वाचकादपि सप्तमी वाच्येत्यर्थः। **येन पुनः पुनर्लक्ष्यत इति**। यथा धूमेन वह्निरिति भावः। **कथंचिदग्निषु हूयमानेष्विति**। होमोपक्रमकालेऽग्नीनां हूयमानत्वाभावेनौपचारिकहूयमानत्वाभ्युपगमेनैवमुक्तम्। **सकृदपीति**। तावतैव लक्ष्यतेऽनेन लक्षणमिति लक्षणत्वं निर्ज्ञातकालस्य हवनादेरनिर्ज्ञातकालगमनादिकं प्रति युज्यत इति भावः॥

पञ्चमी विभक्ते २. ३. ४२.

[२, ८०७]

(**उद्द्योतनम्**) **गोमण्डलादिति**। [3]अन्यथा गोमण्डलं संपन्नक्षीरमित्येव स्यादित्यर्थः। **कृष्णाया इति**। अश्वादिवन्नात्यन्तभिन्ना, किं तु विशेषप्रतिपादनाय बुद्ध्या भिन्नत्वेन विवक्षितेत्यर्थः। **सर्वत्रेति**। अस्मिन् सूत्रे [4]"यतश्च निर्धारणम्' इत्युनुवर्तते। **पूर्वत्रेति**। विभागमात्रविवक्षायां सर्वत्र पञ्चम्या आवश्यकत्वात्। **अवधारणं** नित्यं विभक्तमेव [5]यदित्येवंरूपम्॥

[२, ८०७]

(**रत्नप्रकाशः**) **कृष्णा गवां संपन्नक्षीरतमेति**। निर्धार्यमाणाया गोर्गोमण्डलाद्विभक्तत्वमस्तीति गोशब्दात् पञ्चमी प्राप्नोतीति मन्यते। [6]**नैतद्विभक्तमिति**। निर्धारणावधितावच्छेदकगोत्वा-

---

[1] पा. सू. २. ३. २३.
[2] तत्रापीत्यर्थमुपपादयति — अ.
[3] कृष्णाया गोः पृथक्करणाभाव इत्यर्थः।
[4] पा. सू. २. ३. ४१.
[5] यदित्येकं रूपं — अ.
[6] भाष्ये 'न चैतद् विभक्तम्' इत्यत्र- 'नैतद्विभक्तम्' इति पाठोऽभिमतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वच्छिन्नत्वान्नि[र्धारणावधिनि]र्धार्यमाणयोरिति भावः। तं भावमविद्वानाह — **विभक्तमेतदिति।** उभयत्र सामान्ये नपुंसकम्। **विभक्तमेव यन्नित्यमिति।** यथा माथुराः पाटलिपुत्रकेभ्य आढ्यतरा इति। तत्र हि निर्धारणावधितावच्छेदकेन पाटलीपुत्रकत्वेन माथुरा नावच्छिद्यन्ते। **विभक्तग्रहणमनर्थकं स्यादिति।** निर्धार्यमाणस्य विभक्तत्वाव्यभिचारादिति भावः। यत्तु 'पूर्वत्रैव पञ्चमीग्रहणं कुर्यात्' इति। तन्न, [1]चकारस्याधिकस्य कर्तव्यतापत्त्या गौरवात्। भिन्नसूत्रत्वे तु विनैव चकारं विभक्तिद्वयविधानं सिध्यति॥

साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः २. ३. ४३.

[२, ८०८]

(उद्द्योतनम्) आदिशब्दो व्यवस्थावाची, [2]'लक्षणेत्थंभूत' इत्यत्र संनिविष्टास्त्रयो गृह्यन्त इत्याह — **प्रतीति॥**

[२, ८०८]

(रत्नप्रकाशः) अप्रत्यादिभिरिति। [3]'लक्षणेत्थंभूत' इत्यादिसूत्रे निर्दिष्टानां प्रतिपर्यनूनामत्र पर्युदासो ज्ञेयः॥

प्रसितोत्सुकाभ्यां तृतीया च २. ३. ४४.

[२, ८०८]

(उद्द्योतनम्) शुक्ल इति। सितशब्दस्य शुक्ले रूढत्वात्। योगेऽपि द्वैधमाह — **स्यतेरिति।** 'षो अन्तकर्मणि' इत्यस्य [4]'द्यतिस्यति' इति तादौ कितीत्वविधानात् सितमिति रूपमित्यर्थः। **कारकं कर्मरूपम्।** तदर्थग्रहणे हेतुमाह — **उत्सुकेति।** [5]तत्सदृशश्चार्थो नित्यप्रसक्तत्वम्। ननु मुख्यं विहाय गौणग्रहणमयुक्तम्, अत आह — **मुख्यस्येति। व्यतिषङ्गरूपस्य** चेतनस्य स्वाधीनव्यापारप्रतिबन्धकरूपस्य। खदिराभावे [6]कदरग्रहणवदिति भावः॥

[२, ८०८]

(रत्नप्रकाशः) कः प्रसित इति। सितशब्दस्य शुक्लवाचकस्य संबद्धवाचकस्य च सत्त्वात् संदेहः। **यस्तत्रेति।** [7]'व्याख्यानतो विशेषप्रतिपत्तिः' इति भावः। एतेन 'उत्सुकशब्दसाहचर्यात्

---

[1] सर्वत्रैव निर्धारणे विभक्तत्वस्यावश्यंभावात् तत्र पञ्चम्या भवितव्यमिति पूर्वसूत्रे पञ्चमीग्रहणकरणे षष्ठीसप्तम्योः प्राप्तयोर्बाधिका पञ्चमी स्यादिति तयोरबाधनाय चकारोऽपि कर्तव्यः स्यात्। योगभेदे तु चकारकरणं विना तयोरपि विधानं भवतीति भावः।

[2] पा. सू. १. ४. ९०.

[3] पा. सू. १. ४. ९०.

[4] पा. सू. ७. ४. ४०.

[5] तत्सदृशश्चार्थे नित्य — अ.

[6] **कदरः** श्वेतखदिरः।

[7] परिभाषा १.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तदर्थसदृशाऽर्थो गृह्यते' इति निरस्तम्। आसक्तार्थः प्रसितशब्द उत्सुकशब्देन सहचरितोऽन्यो न सहचरित इत्यत्र मानाभावात्। [1]संबद्ध इवेति। मुख्यस्य व्यतिषङ्गरूपस्य संबन्धस्याभावात् सादृश्योपादानम्॥

नक्षत्रे च लुपि २. ३. ४५.

[२, ८०८]

(उद्द्योतनम्) पुष्येणेति। पुष्येण युक्तः कालः पुष्य इत्यर्थः। [2]'नक्षत्रेण युक्तः कालः' इत्यण्। **लुबिति**। [3]कालस्याविशेषे प्रत्ययस्य लुबित्यर्थः। **नन्विति**। प्रातिपदिकार्थव्यतिरेकाभावादित्यर्थः। [4]**सर्वेति**। विनिगमकाभावादित्यर्थः। **अन्तरङ्गत्वादिति**। कारकत्वस्य क्रियापेक्षत्वेन [5]तदनपेक्षप्रातिपदिकार्थ[6]मात्रसापेक्षप्रथमाया अन्तरङ्गत्वमित्यर्थः॥

इति श्रीमहाभाष्यप्रदीपोद्द्योतने द्वितीयाध्यायस्य तृतीये पादे द्वितीयमाह्निकम्॥

[२, ८०८]

(रत्नप्रकाशः) अद्य पुष्य इति। पुष्यशब्दात् [7]'नक्षत्रेण युक्तः कालः' इति विहितस्याणो [8]'लुबविशेषे' इति लुपि तस्य लुप्तस्याणोऽर्थे वर्तमानः [9]पुष्यरूपः शब्दो नक्षत्रवाचक इति ततस्तृतीयासप्तम्यौ कुतो न भवत इति प्रश्नः। यद्यपि [10]'मध्येऽपवाद'न्यायेनेमे तृतीयासप्तम्यौ प्राचीनविभक्तीनामेवापवादिके इति परत्वादत्र प्रातिपदिकार्थमात्रे प्रथमैव भविष्यतीति वक्तुं शक्यते, तथापि प्राचीनानामपि सर्वासामपवादत्वमनयोर्नेष्टम्, 'पुष्यं जानात्यसौ, पुष्यादन्यस्मिन् दिने' इत्यादौ द्वितीयादेरिष्टत्वादित्याशयेन समाधत्ते — **अधिकरण इति वर्तत इति**। तथा च तत्र पुष्यस्याधिकरणत्वं न विवक्षितमिति नोक्तदोष इति भावः। एतेन 'अधिकरणपदाननुवृत्तौ सर्वविभक्त्यपवादोऽयं विज्ञायेत। अन्तरङ्गत्वाद्वा प्रातिपदिकार्थमात्र एवेदं विधानं स्यात्' इति निरस्तम्। अत्र मध्येऽपवादन्यायानाश्रयणेऽन्तरङ्गबहिरङ्गयोरन्तरङ्गेऽर्थे विधिर्भवतीत्यत्र च मानाभवात्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्री-
शिवरामेन्द्रसरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
द्वितीयस्याध्यायस्य तृतीये पादे द्वितीयमाह्निकम्॥

---

[1] भाष्ये 'बद्ध इव' इत्यत्र 'संवद्ध इव' इति रत्नप्रकाशकृत्पाठ इति भाति।
[2] पा. सू. ४. २. ३.
[3] कालस्याविशेषप्रत्ययस्य — अ, ऋ.
[4] 'सर्वेति। विनिगमकाभावादित्यर्थः' इति नास्ति — अ.
[5] तदनपेक्षं प्राति — अ.
[6] 'मात्र' इति नास्ति — अ.
[7] पा. सू. ४. २. ३.
[8] पा. सू. ४. २. ४.
[9] पुष्यशब्दरूपः — प, ब, य.
[10] परिभाषा ६१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य तृतीयपादे तृतीयमाह्निकम्

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २. ३. ४६.

[२, ८०९–८१४]

(उद्द्योतनम्) 'प्रातिपदिकग्रहणं किमर्थम्' इति पाठे प्रातिपदिकार्थे प्रथमार्थं तदावश्यकमिति प्रश्नानुपपत्तिं निराह — **ङ्याप्प्रातिपदिकादिति।** **प्रकरणं** [1]'कर्मणि द्वितीया' इत्यादिप्रकरणम्, कर्मणि द्वितीयैवेत्यादिनियमार्थमित्यर्थः। **प्रातिपदिकार्थ एवेति।** कर्मादिव्यतिरिक्तप्रातिपदिकार्थं एवेत्यर्थः। अत्रार्थग्रहणस्य नाक्षेपः, किं तु प्रातिपदिकग्रहणस्य, द्वितीयव्याख्याने [2]तदाक्षेपकथनात्। तथा चार्थग्रहणं परिशेषात् प्रातिपदिकार्थपरम्। [3]केचित्तु "संपूर्णसूत्रस्यैवायमाक्षेपः। तत्र प्रातिपदिकार्थे कथं प्रथमा स्यात्, अत आह — **ङ्याप्प्रातिपदिकादिति।** ततश्च [4]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति प्रातिपदिकार्थ एव प्रथमा भविष्यति।" इति व्याचक्षते। अत्र लिङ्गादौ प्रथमाविधानाय सूत्रस्यावश्यकत्वात् 'अथ लिङ्गग्रहणम्' इति भाष्यानुसारेण 'उच्चैः' इत्युत्तरानुसारेण च [5]प्रातिपदिकार्थमात्राक्षेपप्रतीतेरुक्तरीत्या तन्मात्राक्षेपपरत्वमेव युक्तम्। **अस्य** 'अर्थलिङ्ग' इत्यादिप्रथमाविधायकस्य। **प्रातिपदिकग्रहणादिति।** वाक्यभेदेन संख्यारहितेऽपि प्रातिपदिकार्थे प्रथमाविधानार्थं प्रातिपदिकग्रहणं संपद्यत इत्यर्थः। **अथवेति।** लिङ्गं प्रातिपदिकार्थ एवेति भावः। तत्र पाठान्तरं [6]संवादयति — **अत एवेति।** **अन्वयेति।** अनेन [7]वृत्त्या प्रातिपदिकेन योऽर्थः प्रतिपाद्यते स प्रातिपदिकार्थ इति विवक्षितम्। अश्रवणादनुपयोगः प्रश्नार्थ इत्याह — **अव्ययादिति।** अश्रवणात् [8]पदत्वमपि कथम्, अत आह — **प्रत्ययेति।** [9]पदत्वस्य प्रयोजनमाह — **तन्निबन्धनमिति।** प्रातिपदिकार्थव्यतिरिक्तस्यापि शेषशब्दार्थत्वात् कथं षष्ठी, अत आह — **यस्मिन्निति।** [10]प्रातिपदिकार्थग्रहणस्य प्रयोजनसिद्धेः पूर्वं सोऽपि शेष एवेति भावः। **असंख्यत्वादिति।** [11]'बहुषु' इत्यादेरेतत्प्रकरणेनैकवाक्यत्वात्। **तुल्यजातीयेति।** वचनार्थत्वेन तुल्यजातीयत्वम्, एकत्व एवैकवचनम्, न द्वित्वबहुत्वयोः, द्वित्व एव द्विवचनम्, नैकत्वबहुत्वयोः, बहुत्व एव बहुवचनम्, नैकत्वद्वित्वयोः। संख्यारहितस्याव्ययार्थस्य न व्यावृत्तिः। [12]**स्वार्थेति।** स्वार्थद्रव्यलिङ्गसंख्याकारकेत्यर्थः। **मात्रेति।** तस्यावधारणार्थत्वादित्यर्थः। **संबोधने चेति।** प्रातिपदिकार्थादाधिक्येऽपि प्रथमा चेत् संबोधनाधिक्येऽपि 'प्रातिपदिकार्थे' इत्येव [13]प्रथमासिद्धेस्तत्

---

[1] पा. सू. २. ३. २.
[2] तदाक्षेपकरणात् — अ.
[3] व्याचक्षत इत्यनेनास्यान्वयः।
[4] परिभाषा १२२.
[5] प्रातिपदिकमात्राक्षेप — अ.
[6] संपादयति — अ.
[7] शक्तिलक्षणान्यतररूपयेत्यर्थः।
[8] परत्वमपि — अ.
[9] परत्वस्य — अ.
[10] प्रातिपदिकग्रहणस्य — अ.
[11] पा. सू. १. ४. २१.
[12] प्रदीपे 'सत्त्वभूतार्थाभिधायीनि' इत्यत्र 'सत्त्वभूतस्वार्थाभिधायीनि' इत्यत्रंभट्टपाठः स्यादिति भाति।
[13] प्रथमासिद्धेरेतत् सूत्रं — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सूत्रं पूर्वेण प्रातिपदिकार्थमात्रे [1]प्रथमाविधानं ज्ञापयतीत्यर्थः। **अधिकेति**। अत्र लिङ्गमधिकमित्यर्थः। लिङ्गस्याधिकत्वमित्याह — [2]**स्त्रीद्रव्यमिति**। प्रातिपदिकार्थ इति शेषः। आधिक्यं निराह — **यमर्थमिति**। उपलक्षणत्वे हेतुः — **वृक्षकुण्डेति**। कुण्डशब्दस्योदाहरणत्वं कैश्चिदुक्तमाह — **कुण्डेति**। अमृते भर्तरि जारजः कुण्डः। वृक्षकुण्डयोरप्युदाहरणत्वमाह — **जातिरिति**। **अत्र** वृक्षकुण्डशब्दयोः। वृक्षत्व[3]घटत्वरूपजातेः प्रवृत्तिनिमित्तत्वात् स एव प्रातिपदिकार्थ इत्यर्थः। यदा द्रोणपरिमिता व्रीहयो द्रोणशब्देनोच्यन्ते तदा परिमेयस्य प्रातिपदिकार्थत्वाभावात् प्रथमार्थं परिमाणग्रहणमित्याह — **यदेति**। [4]**व्यतिरेकात्** प्रातिपदिकार्थपरिमाणापेक्षयाधिकत्वात्। यद्वा, **व्यतिरेकात्** व्यभिचारात्। कदाचिदेव मेयवृत्तित्वेन तस्य न प्रातिपदिकार्थत्वमित्यर्थः। **अर्थ इति**। प्रथमायाः प्रत्ययत्वेन परत्वनियमात् परिमाणान्तार्थात् परत्वासंभवेन तद्वाचिशब्दादेव भविष्यतीत्यर्थः। वचनग्रहणाभावे समुदायादेव [5]प्रथमाप्रसङ्गमुपपादयति — [6]**अत्रेति**। अस्मिन् सूत्रे। यद्यपि 'दध्ना जुहोति' इत्यादौ गुणस्यापि विधेयत्वमस्ति, तथापीह प्रातिपदिकार्थादिविशिष्टा प्रथमा विधीयते। अज्ञातज्ञापनं विधिः। तत्र द्वन्द्वावगतसाहित्यं विशेषणे विवक्षितमिति समुदायादेव स्यादित्यर्थः। अत एव 'अत्र' इत्युक्तम्। **एतत्** प्रातिपदिकार्थलिङ्गपरिमाणत्रयम्। वचनग्रहणे तु प्रत्येकसिद्धिरित्याह — **वचनेति**। वचनग्रहणसामर्थ्यादेव द्वन्द्वान्ते श्रूयमाणवचनशब्दस्य प्रत्येकं संबन्धाद्वाक्यत्रयेण प्रत्येकं प्रथमासिद्धिरित्यर्थः। प्रथमाया विधेयत्वे उक्तरीत्या प्रत्येकान्वयो न संभवतीति वचनग्रहणं विना कथमिष्टसिद्धिः, अत आह — **प्रथमेति**। वाक्यभेदाङ्गीकारेण [7]'स्वौजसमौट्' इत्यनेन ङ्याप्प्रातिपदिकात् [8]सामान्येन विहितप्रथमानुवादेनार्थनियमोऽनेन क्रियते। **संबन्धिभेदात्** प्रतिसंबन्धिनां त्रयाणां भेदात्। ननु द्वन्द्वेन साहित्यावगमात् समुदाये वाक्यपरिसमाप्तेश्च समुदायस्यैव प्रतिसंबन्धित्वम्, न प्रत्येकम्, अत आह — **अथवेति**। वचनग्रहणाभावे [9]उक्तेष्वप्राप्तिकथनपूर्वकं तेन प्राप्तिमुपपादयति — **अनभिहितेति**। ननु [10]'बहुषु बहुवचनम्' इत्यत्राभिहिताधिकाराभावादेकत्वादावभिहितेऽपि प्रथमा स्यात्, अत आह — **बहुष्विति**। ननु [11]तिङादिषु संख्याशब्दस्यापरिगणनात् प्रथमा भविष्यति, अत आह — **परिगणनस्य चेति**। **प्रत्याख्यान इति**। अप्रत्याख्यानेऽप्यस्मिन् सूत्रे तन्न संबध्यते, अभिहित एव प्रातिपदिकार्थे प्रथमाविधानादिति ज्ञेयम्। वचनशब्दस्यैकत्वादिवाचकत्वाभावात् कथं तेन प्रथमा, अत आह — [12]**वचनशब्दस्येति**। **तेन** वचनशब्देन। अर्थनियमे कर्मादिविशिष्टे प्रथमा न भविष्यति, अत आह — **कर्मण्येवेति**। कार्त्स्न्यार्थिकत्वे कर्मादिषु प्रथमाव्यावृत्तिर्न सिध्यति, अत आह — [13]**अवधारणेति**।

---

[1] प्रथमाभिधानं — अ, ऋ.

[2] प्रदीपे 'द्रव्यमत्र' इत्यत्र 'स्त्रीद्रव्यमत्र' इत्यन्नंभट्टपाठ इति भाति।

[3] 'कुण्डत्वरूप' इति युक्तम्।

[4] प्रदीपे 'तदा व्यभिचारान्नास्ति मेयस्य' इत्यस्य 'स्थाने 'तदा व्यतिरेकान्नास्ति मेयस्य' इति पाठोऽत्र स्वीकृतः।

[5] 'प्रथमाप्रसङ्गम्' इत्यादि 'विवक्षितमिति समुदायादेव' इत्यन्तं नास्ति — अ.

[6] प्रदीपे 'प्रथमा विधीयमानत्वात् प्रधानम्' इत्यत्र 'अत्र प्रथमा विधीयमानत्वात् प्रधानम्' इत्यन्नंभट्टपाठः।

[7] पा. सू. ४. १. २.

[8] सामान्यविहितप्रथमोपादानेऽर्थनियमः — अ.

[9] उक्ते त्वप्राप्ति — अ.

[10] पा. सू. १. ४. २१.

[11] परिगणितेषु तिङ्कृत्तद्धितसमासेष्वित्यर्थः।

[12] प्रदीपे 'वचनग्रहणस्य पूर्वाचार्य' इत्यत्र 'वचनशब्दस्य पूर्वाचार्य' इत्यन्नंभट्टपाठ इति भाति।

[13] प्रदीपे 'अवधारणान्न भवति' इत्यत्र 'अवधारणार्थान्न भवति' इति निर्णयसागरमुद्रिते पाठः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अवधारणमेवाह — **तेनेति**। [1]प्रत्ययनियमे बाधकत्वं न संभवति, अत आह — **कर्मणीति**। ज्ञापकत्वमेवाह — **यदीति**। नन्ववधारणार्थमात्रग्रहणेन् कथमेकत्वादौ प्रथमा सिध्यति, अत आह — **मात्रशब्द इति**। **सामान्यवचनः** कात्स्न्र्यवचनः। [2]कात्स्न्र्ये प्रयोगं दर्शयति — **यथेति**। **एवमिति**। सर्वस्मिन् प्रातिपदिकार्थ इत्यर्थः। 'सर्वस्मिन्' इति विशेषणस्य प्रयोजनमाह — **अभिहितेऽपीति**। नन्वेवं 'प्रातिपदिकार्थ[3]मात्रलिङ्गपरिमाणवचने प्रथमा' इति न्यासः स्यात्, सर्वसंबन्धाभावेन द्वन्द्वान्ते मात्रशब्दानुपयोगात्, अत आह — **अन्ये त्विति**॥

[२, ८०९–८१४]

(रत्नप्रकाशः) **प्रातिपदिकग्रहणं किमर्थमिति**। [4]"ङ्याप्प्रातिपदिकात्' इति विहितानां नियमार्थमिदं प्रकरणमिति विनापि प्रातिपदिकग्रहणमर्थशब्दः प्रातिपदिकार्थ एव पर्यवस्यतीति भावः। **उच्चैर्नीचैरिति**। मात्रग्रहणादधिकव्यावर्तकाद् यस्मादधिकं संभवति कर्मादिकं, तत्रैव प्रथमा स्यात्, न त्वव्ययार्थे, तत्र कर्माद्यसंभवादिति भावः। एतेन "असति प्रातिपदिकग्रहणेऽव्ययात् प्रथमा न स्यात्। [5]"बहुषु बहुवचनम्' इत्यादिनास्यैकवाक्यतायां संख्यायुक्त एव प्रातिपदिकार्थे स्यात्। प्रातिपदिकग्रहणात्तु यत्नात् संख्यारहितेऽप्यव्ययार्थे प्रथमा सिध्यति" इति निरस्तम्। [6]"बहुषु बहुवचनम्' इत्यादिनास्यैकवाक्यतायां मानाभावात्। यदप्युक्तम् "अथवा लिङ्गग्रहणात् सर्वत्र प्रथमा सिध्यतीति प्रश्नः। अत एव 'प्रातिपदिकार्थग्रहणं किमर्थम्' इति क्वचित् पाठः। अलिङ्गेऽप्यव्ययार्थे यथा स्यादित्युत्तरम्" इति। तदपि न, पाठभेदाश्रयणे 'अथवा' इति विकल्पानौचित्यात्। अव्ययानामलिङ्गतेति किंचिद्व्युत्पन्नेनापि ज्ञातुं शक्यत्वेन लिङ्गग्रहणात् सर्वत्र प्रथमा सिध्यतीत्याशयेन प्रश्नस्यात्यन्तमौर्ख्याविहत्वेनास्य पक्षस्योत्तरत्र प्रदर्शनानौचित्याच्च। यदप्युक्तम् 'प्रातिपदिकार्थश्चेह भाष्यकारेण न विचारितः। अन्वयव्यतिरेकाभ्यां यस्य यो जात्यादिरर्थः प्रतीतस्तस्येहाभिमतत्वाद्विचारे प्रयोजनाभावात्' इति। तदपि न, प्रातिपदिकशब्देनात्र लिङ्गविशिष्टस्यापि ग्राह्यत्वेन प्रातिपदिकातिरिक्तस्य लिङ्गवाचकस्याभावेन चान्वयव्यतिरेकाभ्यां लिङ्गस्यापि प्रातिपदिकार्थत्वेन लिङ्गस्य पृथग्ग्रहणानर्थक्यापत्तेः। द्विकं प्रातिपदिकार्थ इति लिङ्गग्रहणान्यथानुपपत्त्या प्रतीयत इति कृत्वैव भगवता प्रातिपदिकार्थो न दर्शित इत्येव वक्तुमुचितत्वाच्च। **किं पुनरत्रेति**। षष्ठ्यात्र पदत्वं भविष्यतीति भावः। **पदत्वमिति**। प्रथमान्तत्वसहितमिति भावः। **षष्ठ्यात्रेति**। द्वितीयादयो यत्र न विहिताः स शेष इति भावः। यत्तु 'नन्वसंख्यत्वादव्ययार्थस्य कथं षष्ठी स्यात्' इति। तन्न, षष्ठीविधेः [7]"बहुषु बहुवचनम्' इत्यादिनैकवाक्यताया निराकृतत्वेनाव्ययेभ्यः षष्ठीविधाने बाधकाभावात्। यदप्युक्तम् 'नैष दोषः, एकत्वाद्यर्थनियमे षष्ठ्याः संख्यायामनियमात्। प्रत्ययनियमेऽपि वा तुल्यजातीयापेक्षत्वान्नियमस्यैकत्वादिभिः परस्परव्यावर्तनात्' इति। तदपि न, तत्समाधानस्याव्ययेभ्यो वचनत्रयं भवतीत्येतावन्मात्रसाधकत्वेऽपि षष्ठीसाधकत्वाभावेन वचननियमनैरपेक्ष्येण [8]"षष्ठी शेषे' इति सूत्रेण षष्ठ्याः प्रवृत्तौ बाधकाभावस्योक्तत्वेन च तस्यासंबद्धप्रलापत्वात्। **अथ लिङ्गग्रहणं किमर्थमिति**। प्रातिपदिकार्थ एव लिङ्गस्यान्तर्भावादिति भावः। प्रष्टुर्बुद्धिपरीक्षार्थं तावदुत्तरमाह — **स्त्री पुमान्नपुंसकमिति**।

---

[1] प्रत्ययबाधकत्वं — ऋ.
[2] कात्स्न्र्यप्रयोगं — अ, ऋ.
[3] 'मात्र' इति नास्ति — अ.
[4] पा. सू. ४. १. १.
[5] पा. सू. १. ४. २१.
[6] पा. सू. १. ४. २१.
[7] पा. सू. १. ४. २१.
[8] पा. सू. २. ३. ५०.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]एष एव चात्रेति। लिङ्गमेवेत्यर्थः। प्रतिनिर्दिश्यमानानुसारेण पुंस्त्वम्। **प्रातिपदिकार्थ इति**। प्रातिपदिकप्रवृत्तिनिमित्तत्वादिति भावः। **कुमारी वृक्षः कुण्डमिति**। द्विकं प्रातिपदिकार्थ इत्याश्रयणादत्र लिङ्गं प्रथमाद्योत्यमिति भावः। एतेन 'विनापि स्त्रीत्वेन कुमारो देवदत्त इति कुमारशब्दप्रयोगदर्शनात् स्त्रीत्वं न प्रातिपदिकार्थः' इति निरस्तम्। कुमारशब्दस्य कुमारीशब्दाद् भिन्नत्वेन तस्य स्त्रीत्वेन विना प्रवृत्तावपि कुमारीशब्दस्य स्त्रीत्वेन विना प्रयोगस्यानुपपादनात्। यदप्युक्तम् "**वृक्षः कुण्डमिति**। पुंनपुंसकोपलक्षणमेतत्। 'तटः तटम्' इत्येतत्तूदाहरणम्। वृक्षकुण्डशब्दयोस्तु पुंनपुंसकत्वाभ्यां विना प्रयोगाभावाल्लिङ्गस्य प्रातिपदिकार्थता" इति। तदपि न, स्वयमन्यथा प्रातिपदिकार्थनिर्वचनं कृत्वा यथाश्रुतभाष्यस्यान्यथानयने मानप्रयोजनयोरभावात्। अर्थभेदे शब्दभेद इति मते पुंस्त्वविशिष्टवाचकतटशब्दान्नपुंसकत्ववाचकस्य तटशब्दस्यान्यत्वात् तयोरपि वृक्षादिशब्दसाम्येनोदाहरणत्वानापत्तेः। तयोरुदाहरणत्वे वृक्षादिशब्दानामुदाहरणत्वत्यागे मानाभावात्। अर्थभेदे शब्दभेदो नेति मते नानार्थकशब्देभ्यः प्रथमाया अप्रसङ्गाच्च। यदप्युक्तम् 'कुण्डशब्दस्तु जीवति भर्तरि परेण जाते वर्तमानः पुँल्लिङ्ग इति नपुंसकत्वेन विनापि तस्य प्रयोगात् कुण्डीति स्त्रियामपि प्रवर्तनात् कुण्डमित्येतदुदाहरणमित्यपरे' इति। तदपि न, सलिङ्गस्य सर्वस्याप्युदाहरणतेति भगवतोऽभिमतत्वेन वृक्षशब्दस्येवानायासेनैव कुण्डशब्दस्याप्युदाहरणत्वसिद्धया यत्नविशेषेण तत् साधयतां मौर्ख्यानपायात्। यदप्युक्तम् 'जातिरेवात्र प्रातिपदिकार्थो न तु लिङ्गमित्यन्ये ब्रुवते' इति। तदपि न, जातिद्रव्यगुणक्रियाणां यथायथं विशेषणविशेष्यभावापन्नानां सर्वेषां प्रातिपदिकार्थताथाः प्रकृते वक्तुमुचितत्वेन जातिमात्रस्य प्रातिपदिकार्थत्वकथने मानप्रयोजनयोरभावात्। **अथ परिमाणग्रहणमिति**। प्रातिपदिकार्थत्वादेव परिमाणस्य तत्र प्रथमा सिद्धेति भावः। **द्रोणः खारीति**। यदा द्रोणादयः शब्दाः स्ववाच्यमानमात्रपरिच्छिन्नव्रीह्यादिषु वर्तन्ते तदा तेभ्यः प्रथमा [2]भवत्वित्येतदर्थं परिमाणग्रहणं कर्तव्यमिति भावः। परिमाणग्रहणस्य लाक्षणिकोपलक्षणत्वात् 'गौर्वाहीकः' इत्यादौ गवादिशब्दादपि प्रथमा ज्ञेया। तथा च तत्र लक्ष्यद्योतनाय प्रथमेति फलितम्। **वचनग्रहणं किमर्थमिति**। तद्विनापि प्रातिपदिकार्थमात्रे वर्तमानाल्लिङ्गमात्रेऽधिके द्योत्ये लक्ष्ये च द्योत्ये प्रथमायाः सिद्धत्वादिति भावः। उत्तरमाह — **इह समुदाय इति**। गुणप्रधानभावनैरपेक्ष्येणैव समुदाये वाक्यपरिसमाप्तिरिति मन्यमानस्योक्तिरियम्। एतेन 'प्रथमा विधीयमानत्वात् प्रधानम्। न च गुणभेदे प्रधानभेदो भवति' इति निरस्तम्। विधीयमानस्य प्राधान्यमित्यत्र मानाभावात्। **प्रत्येकमिति**। सुबन्तसमुदायानां संस्कार्याणां प्राधान्यात् तेषां प्रातिपदिकार्थादिभेदेन भेदात् प्रथमाविधिरूपवाक्यार्थः प्रत्येकं पर्यवस्यतीति भावः। एतेन 'प्रथमा सिद्धैव, केवलं नियमाय तदनुवादेन प्रातिपदिकार्थादिभिस्तस्याः संबन्धो विधीयते। स [च] संबन्धिभेदाद् भिन्नः' इति। विधीयमानस्य प्राधान्यं नियम्यमानस्य प्राधान्यं नेत्यत्र प्रथमानुवादेन संबन्धो विधीयत इत्यत्र च मानाभावात्। तेनैवास्वरसेन 'अथवा न्यायद्वयसंभवे लक्ष्यदर्शनवशात् प्रत्येकं वाक्यपरिसमाप्तिरिति पक्ष इहाश्रयिष्यत इति भावः' इति पक्षान्तरपरिग्रहात्। प्रधानावृत्तौ गुणावृत्तेर्न्याय्यत्वेनागतिकगतिभूतलक्ष्यदर्शनावलम्बनमयुक्तमित्यन्यदेतत्। **उक्तेष्वपीति**। वचनशब्दस्य पूर्वाचार्यमते संख्यावाचित्वेन प्रसिद्धत्वात् संख्यावाचिभ्य एकादिभ्यः प्रथमाविधानार्थं वचनग्रहणमिति भावः। **कर्मादिविशिष्ट इति**। कर्मण्येव द्वितीयेति प्रत्ययनियमे कर्मादीनामनियमात् तत्रापि प्रथमा स्यात्। मात्रग्रहणे तु तत्र कर्मत्वविशिष्टे सा न भवतीति भावः। **बाधिका भविष्यन्तीति**। 'कर्मणि द्वितीयैव' इत्यादिरूपेण कर्मादिनियमाश्रयणात्

---

[1]भाष्ये 'एष एवात्र' इत्यत्र 'एष एव चात्र' इति निर्णयसागरमुद्रिते पाठः॥ एष एवात्रेति — य.

[2]भवतीत्येतदर्थं — य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत्र प्रथमा न भविष्यतीति भावः। वस्तुतस्तु प्रत्ययनियमपक्षेऽपि कर्मादिविशिष्टे प्रथमा न भविष्यति, कर्मण्येव द्वितीयेत्यादिवदत्रापि प्रातिपदिकार्थलिङ्गपरिमाणवचन एव प्रथमेति प्रत्ययनियमसंभवात्। तदेवं न्यायसिद्धेऽर्थे लिङ्गदर्शनमपि संभवतीत्याह — **अथवेति**। **यदयमिति**। यदि प्रातिपदिकार्थसद्भावमात्रेणाधिकार्थसद्भावेऽपि प्रथमा स्यात् तदा संबोधनाधिके प्रथमा सिद्धैवेति तत्र तद्विधानं व्यर्थं सदधिकसद्भावे प्रथमाभावं ज्ञापयतीति भावः। एतेन 'प्रत्ययनियमपक्षेऽपि दोषाभाव इत्यर्थः' इति निरस्तम्। प्रकृतज्ञापकं विनैव पक्षद्वये कर्माद्याधिक्ये प्रथमाभावस्य सिद्धत्वेनोभयत्रैवास्य ज्ञापकस्योपोद्वलकतासंभवेनार्ध[1]जरतीयाश्रयणानौचित्यात्। [2]**अन्यतरच्छक्यमवक्तुमिति**। ननु सर्वत्र प्रातिपदिकेनोक्त एव प्रातिपदिकार्थे प्रथमा विधीयत इति वृक्षादिशब्देभ्य इवैकादिभ्योऽपि प्रथमा भविष्यतीति द्वे अपि ग्रहणे अनर्थके इति चेत्, सत्यम्, संख्या विभक्त्यर्थ इति पक्षे एकत्वेऽभिधेये एकवचनम्, द्वित्वे द्विवचनम्, बहुत्वे बहुवचनमिति नियमोऽभिहितेऽप्येकत्वादौ भवतीत्याशयेनान्यतरग्रहणं स्थापितमित्यवेहि। यद्यनन्वितार्थकविभक्त्यपेक्षयानुवादकविभक्तिरुचितेति वचनसाङ्कर्यं परिह्रियते तर्हि व्यर्थमेवोभयोर्ग्रहणम्। अत्रेदमवधेयम् — 'अर्थे प्रथमा' इत्येव सूत्रयितुमुचितम्, कस्यार्थ इत्यपेक्षायां प्रकृत्यर्थ इत्यन्वयसंभवात्। अथवा 'प्रथमा' इत्येव सूत्रणीयम्। [3]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति न्यायेन प्रकृत्यर्थ एव भविष्यति। प्रकृतिश्च प्रातिपदिकं लिङ्गविशिष्टं च। स्वार्थद्रव्यलिङ्गरूपः प्रकृत्यर्थः। तथा च लिङ्गग्रहणं न कर्तव्यम्। त्रिकं प्रातिपदिकार्थ इति पक्ष एव च सर्वलोकप्रसिद्धः। अत एव द्वितीयादिविभक्तौ लिङ्गावगतिर्युज्यते। ननु [4]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति न्यायो यत्र प्रत्ययो विधीयते तत्रानिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीत्येवंपरः। प्रकृते तु प्रथमा नियम्यत इति न सा परिभाषात्र प्रवर्तत इति चेन्न, नियमविधीनां विधिमुखेन प्रवृत्तिरिति पक्षस्यापि भाष्यादिप्रसिद्धत्वेनात्रापि तत्परिभाषाप्रवृत्तौ बाधकाभावात्। ण्वुलादीनां द्वितीयादीनां च विधार्थस्यानिर्दिष्टत्वेन स्वार्थिकत्वापत्त्या यत्र कुत्रचिदनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्तीत्येवं वक्तुं युक्तत्वाच्च। यद्युच्येत — [5]'द्व्येकयोर्द्विवचनैकवचने' [6]'बहुषु बहुवचनम्' इत्यनेन प्रथमाया अप्यर्थ उक्त एवेति चेत् तर्हि कर्मणि द्वितीयैवेत्यादिरूपेणार्थनियम एवाङ्गीकर्तव्यः। तथा च 'प्रथमा' इति [7]सूत्रेण प्रथमा चाप्रथमा च यत्र प्राप्नोति तत्र प्रथमैवेति नियमसंभवान्न काप्यनुपपत्तिः। अस्मिन् पक्षे कारकभिन्न एव शेषः। षष्ठी च द्वितीयादिवत् प्रथमया निवर्त्यते। एवं चेत् 'द्रोणो व्रीहिः' इत्यादौ द्रोणादिशब्देभ्यः प्रातिपदिकार्थे प्रथमायां विहितायामेव पश्चाद् व्रीह्यादिसामानाधिकरण्यान्यथानुपपत्त्या द्रोणादिशब्दानां व्रीह्यादिलक्षकत्वमाश्रीयत इति तत्रापि प्रथमोपपत्तौ परिमाणग्रहणमपि व्यर्थमेव। एतदभिप्रायेणैव हि [8]"शब्दाश्रये वृद्धचात्वे' इत्युक्तमोत्सूत्रे॥

[२, ८१४–८१८]

(उद्द्योतनम्) कार्त्स्न्यार्थे [9]संख्यार्थे वाधिकेऽपि प्रथमा स्यात्, अत आह — **अवधारणेति**।

---

[1] लौ. न्या. साहस्री. पृष्ठम् १०४.
[2] भाष्ये 'अन्यतरच्छक्यमकर्तुम्' इत्यत्र 'अन्यतरच्छक्यमवक्तुम्' इति निर्णयसागरमुद्रिते पाठः।
[3] परिभाषा १२२.
[4] परिभाषा १२२.
[5] पा. सू. १. ४. २२.
[6] पा. सू. १. ४. २१.
[7] अस्य नियमसंभवादित्यनेनान्वयः।
[8] महाभाष्यम् १. १. १५.
[9] संख्यार्थे चाभावेऽपि प्रथमा — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]अर्थान्तरेऽप्याह — **संबोधने चेति**। प्रकृतेऽधिकार्थमाह[2] — **अस्तीति**। **न च समासेति**। [3]'पूर्वापर' इति सूत्रेण वीरशब्दस्य समासो विधीयते। स च प्रथमान्तस्यैवेत्याधिक्येऽपि प्रथमा-सिद्धिरिति न वाच्यमित्यर्थः। वाक्यसंस्कारपक्षे आधिक्यं दुर्वारम्, अत आह — **वीरेति**। पद-संस्कारपक्षेण समाधानम्। वीरप्रातिपदिकात् स्वार्थमात्रनिष्ठादित्यन्वयः। तन्मात्रनिष्ठत्वमेवाह — **अनपेक्षितेति**। अनपेक्षितः शब्दान्तरार्थसंसर्गेण **उपहितः** संपन्नः **विशेषणभावो** व्यावर्तकत्वं यस्य तस्मादिति विग्रहः। केनाभिहित इत्यपेक्षायामाह — **तिङिति**। **आधिक्येऽपीति**[4]। विशेषण-विशेष्यभावस्येत्यादिः। **अभिहितत्वमात्रेति**। तिङादिव्यतिरिक्ताभिहितेऽपीत्यर्थः। तदर्थमेव न्यासान्तराश्रयणात्। अभिहितानभिहितत्वमुपपादयति — **सदीति**। **एकस्याः** सदिक्रियाशक्तेः घञन्तेन सदिनाभिहितत्वात्। अस्मिन् पक्षे नाप्रसङ्गातिप्रसङ्गावित्याह — **यथेति**। 'तिङोऽ-प्रयोगे' इत्यस्य तात्पर्यमाह — **न हीति**। 'उक्तम्' इत्यस्य [5]तदाह — **आक्षिप्तेति**। तिङ-सामानाधिकरण्यमात्रं विवक्षितमित्यर्थः। 'तिङसामानाधिकरण्ये प्रथमा' इति पक्षे लटस्तिङादेशो न भविष्यतीति दोषाभिधानार्थं 'शतृशानचोश्च' इति वार्तिकम्। तदुपपादयति — **देवदत्तेति**। **अविशेषविहिता इति**। अर्थनियमपक्षे विभक्तीनामनियमादित्यर्थः। विधानसामर्थ्यात् तिङोऽपि स्युः, अत आह — **तेषामिति**। [6]लिटि शतृशानचोः प्रसङ्गाभावादित्यर्थः। तिङसामानाधि-करण्ये प्रथमाविधानस्यापि लिडादिरेव विषय इति शतृशानच्स्थले प्रथमा विधानसामर्थ्याद् भविष्य-तीति न वाच्यमित्याह — **तद्विषय एवेति**। कर्मधारयः, [7]स एव विषय इत्यर्थः। 'अविशेष-विहिताः' इत्यत्र हेतुः — **कर्मणीति**। 'निमित्तभावात्' इत्यत्र निमित्तं व्याचष्टे — **निमित्तमिति**। 'पूर्वं हि, प्रकल्प्य' इति भाष्यद्वयस्य मतभेदेन प्रवृत्तिरित्याह — **इहेति**। समाधानमवतारयितुं शङ्काशयमुपसंहरति — **एवमिति**। [8]'अप्रथमा' इत्यत्र पर्युदासः, कर्मणि द्वितीयैवेत्याद्यर्थनियमः। तत्र विभक्त्यन्तरमादाय शतृशानचोः पूर्वं प्रवृत्तेर्लटस्तिङो न प्राप्नुवन्ति। समाधानतात्पर्यमाह — **प्रसज्येति**। इदमनुपदमेवोपपाद्यते। **पक्षद्वयेऽपीति**। [9]'अप्रथमा' इत्यत्र पर्युदासप्रसज्यप्रतिषेध-पक्षद्वयेऽपीत्यर्थः। **प्रत्ययनियमेति**। कर्मादौ द्वितीयादीनां नियतत्वेन 'देवदत्त पच् ल्' इति स्थिते देवदत्तशब्दाद्विभक्त्यन्तरप्रसङ्गाभावेन शतृशानचोरभावात् तिङादेशे देवदत्तः पचतीति सिध्य-तीत्यर्थः। 'तद्यदा' इति पाक्षिकदोषप्रतिपादनार्थं भाष्यं व्याचष्टे — **कर्मणीति**। 'अप्रथमा च' इति पर्युदासाश्रयणतात्पर्यमाह — **प्रसज्येति**। **तत्र** 'देवदत्त पच् ल्' इत्यत्र। [10]**तदाश्रय** प्रथ-माश्रय। [11]**प्रत्ययनिषेधः** शतृशानच्प्रत्ययनिषेधः। **न दोषः**। [12]तिङोऽप्रवृत्तिदोषो नास्तीत्यर्थः। दोषाभावमेवाह — **शतृशानचोरिति**। अर्थनियमपक्षे प्रातिपदिकार्थे प्रथमैवेति नियमात् तत्र

---

[1] कार्त्स्न्यें संख्यायां वेत्यर्थः।

[2] अधिकारार्थमाह — अ.

[3] पा. सू. २. १. ५८.

[4] प्रदीपे 'वीरः पुरुष इत्यत्रार्थाधिक्येऽपि' इत्यत्र 'वीरः पुरुष इत्यत्राधिक्येऽपि' इत्यन्नंभट्टपाठ इति प्रतीयते।

[5] तात्पर्यमाहेत्यर्थः।

[6] प्रदीपे 'लङादिरवकाशः' इत्यस्य स्थाने 'लिडादिरवकाशः' इत्यन्नंभट्टपाठः स्यादिति भाति। यद्वा, आदिपदग्राह्ये कस्मिंश्चि-दुपपादनमिदं बोध्यम्।

[7] स एव तद्विषय एव विषय इत्यर्थः — अ; स एव तद्विषय इत्यर्थः — ऋ.

[8] पा. सू. ३. २. १२४.

[9] पा. सू. ३. २. १२४.

[10] तदाश्रयः प्रथमाश्रयः — अ.

[11] प्रदीपे 'तदाश्रयप्रतिषेधः' इत्यत्र 'तदाश्रय-प्रत्ययनिषेधः' इत्यन्नंभट्टपाठ इति भाति।

[12] तिङः प्रवृत्ति — अ, ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयादीनां प्रसङ्गो नास्ति। [1]यत्र तिङसामानाधिकरण्यं संभवति [2]तत्र प्रथमां भाविनीमाश्रित्य प्रत्ययनिषेधः प्रवर्तत इति 'शतृशानचोरभावात्' इत्युक्तम्। यथाश्रुते तिङुत्पत्तेः प्राक् तत्सामानाधिकरण्याभावेन प्रथमाया अभावान्निषेधाभावेन [3]शतृशानचोरभावो न संभवतीति ज्ञेयम्। अनुपदमुपपाद्यत इति यदुक्तं तदनेनोपपादितम्। प्रत्ययनियमपक्षाश्रयेण पक्षद्वयेऽपि दोषपरिहारार्थं 'यदा हि' इति भाष्यं व्याचष्टे — **कर्मण्येवेति**। **तदभावे** कर्मादीनामभावे। **तासां** द्वितीयादीनाम्। **अत्र** 'देवदत्त पच् ल्' इत्यत्र। **अनियतायाः** सामान्यविहितायाः। एतच्च प्रसज्यप्रतिषेधपक्षे दोषाभावार्थमुक्तम्। [4]अत्रापि भाविप्रथमामाश्रित्य प्रतिषेधो बोध्यः। तिङः पूर्वं तिङसामानाधिकरण्याभावेन सामान्यविहिताया अपि प्रथमाया अभावात्॥

[२, ८१४–८१८]

(**रत्नप्रकाशः**) इदानीं [5]यथाश्रुतं सूत्रमभ्युपगम्याव्याप्तिदोषमुद्भावयति — **प्रातिपदिकेति**। **वीरः पुरुष इति**। अत्र पुरुषशब्दात् प्रथमा न प्राप्नोति, वीरत्वस्याधिकस्य तत्र भासमानत्वादिति भावः। **वाक्यार्थत्वादिति**। वाक्येऽपि समासादिवृत्ताविव विशिष्टार्थबोधकताशक्त्यभ्युपगमादिति भावः। तथा च पुरुषशब्देन वीरत्वं न प्रतीयत इति तत्र प्रथमाप्रवृत्तौ न काप्यनुपपत्तिः। न्यासान्तरमाह — **अथवेति**। समास[तिङ]कृत्तद्धिताव्ययैरभिहिते कर्मादौ प्रथमेति कर्तव्यमिति भावः। **सदिप्रत्ययेनेति**। सदिधातोर्निष्पन्नेन घञाभिहितमधिकरणमिति तत्र प्रथमा स्यादिति भावः। न्यासान्तरमाह — **एवं तर्हीति**। **शतृशानचोश्चेति**। अर्थनियमपक्षे प्रातिपदिकार्थे सर्वा विभक्तयः प्रसक्ताः। तत्राप्रथमासामानाधिकरण्यसत्त्वेन तिङपवादौ शतृशानचौ स्याताम्। ततो [6]निमित्ताभावात् तत्र प्रथमैवेति नियमो न स्यादिति भावः। **पूर्वं ह्यपवादा इति**। तद्यथा राज्ञि देशान्तरं गच्छति प्रबलै राजकीयै राजार्हे स्थले परिगृहीते सति तत इतरे सेवकजनास्तद्भिन्नस्थलं परिगृह्णन्ति, तथोत्सर्गा अप्यपवादेषु प्रवृत्तेषु ततोऽन्यत्र प्रवर्तन्त इति भावः। [7]**प्रकल्प्य चापवादविषयमिति**। यथा पूर्वोक्त एव विषये पूर्वं गता अपि सेवकजना राजादिप्रबलार्हस्थलं विहायान्यदेव स्थलं परिगृह्णन्ति, तथोत्सर्गा इति भावः। एतेन 'इह दर्शनद्वयम् — सर्वविशेषस्वीकारेण वोत्सर्गस्य प्रवृत्तिः, कतिपयविशेषावगाहनेन वा। तत्र पूर्वस्मिन् दर्शने उत्सर्गस्य विषयविभागाय पूर्वमपवादः प्रवर्तते, पश्चात्तद्विमुक्ते विषय उत्सर्गः। द्वितीये तु दर्शनेऽपवादविषयं प्रकल्प्योत्सर्गः प्रवर्तते' इति निरस्तम्। तदुट्टङ्कितदर्शनद्वयस्य निर्मूलत्वात्। द्वितीयदर्शने आद्यवचनमाद्यदर्शने द्वितीयं च[8] वचनं न प्रवर्तत इत्यत्र मानाभावाच्च। **प्रतीक्षत इति**। अपवादविषयत्वं ज्ञात्वा ततो निवर्तत इति भावः। यद्यपि चेतनेष्वेवेदं युज्यते, तथाप्यध्येत्रध्यापकयोश्चेतनत्वेन तद्विषयत्वात् शास्त्रस्योपपन्नं बोध्यम्। **पाक्षिक इति**। पक्षे भव इत्यर्थः। अध्यात्मादिः। **कतरस्मिन् पक्ष इति**। भवः स दोष इति शेषः। **अप्रथमा वेति**। [9]अ-

---

[1] यत्र यत्र तिङ — अ.

[2] तत्र तत्र प्रथमां — अ.

[3] 'शतृशानचोरभावः' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — अ.

[4] तत्रापि — ऋ.

[5] यथाश्रुतसूत्रं — य.

[6] तिङसामानाधिकरण्यरूपस्य निमित्तस्याभावादित्यर्थः।

[7] भाष्ये 'प्रकल्प्य वापवाद' इत्यत्र 'प्रकल्प्य चापवाद' इति निर्णयसागरमुद्रिते पाठः।

[8] चशब्दो नास्ति — य.

[9] अप्रथमासमानाधिकरण इत्यत्रत्याप्रथमाशब्दस्य व्यस्ततया निर्देशः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रथमायाः' इत्यस्य पर्युदासताश्रयणादिति भावः। [1]**प्रथमा वेति**। तस्य प्रसज्यप्रतिषेधत्वाश्रयणादिति भावः। **विभक्तिनियमे चापि द्वैतमिति**। अर्थनियमोऽपि सामान्यरूपेण विभक्तिनियमो भवति, नियमस्यानेकाश्रितत्वात्। **विभक्तिनियम इति**। विभक्तेरर्थान्तरसंबन्धनिवर्तको [2]नियमः कर्मण्येव द्वितीयेत्यादिरूप इति भावः। **अर्थनियम इति**। अर्थस्य विभक्त्यन्तरसंबन्धनिवर्तको नियमः कर्मणि द्वितीयैवेत्यादिरूप इति भावः। एवं च पक्षचतुष्टयं संपन्नम् — पर्युदासार्थनियमौ, पर्युदासविभक्तिनियमौ, प्रसज्यप्रतिषेधार्थनियमौ, प्रसज्यप्रतिषेधविभक्तिनियमौ चेति। तत्राद्य एव पक्षेऽयं दोषो नान्येष्वित्याह — **तद्यदेति**। **तदेति**। तदैवेत्यर्थः। **विभक्तिनियम इति**। उपलक्षणमिदं प्रसज्यप्रतिषेधयुक्तार्थनियमस्य। तत्र विभक्तिनियमपक्षेऽप्रथमाया एवासंभवेन शतृशानचोः प्रसक्तिरेव नास्ति वा,[3] प्रसक्तप्रतिषेधो [4]वा भवति। अर्थनियमपक्षे प्रसक्तस्य प्रतिषेधो भवति॥

षष्ठी शेषे २. ३. ५०.

[२, ८१९–८२५]

(उद्द्योतनम्) उपयुक्तादन्यः शेष इति प्रसिद्धत्वात् प्रश्नायोगः, अत आह — **किमिति**। [5]'शेषः परार्थत्वात्' इति तन्त्रान्तरे [6]शेषशब्दस्याप्रधाने प्रसिद्धत्वादित्यर्थः। **तत्रापि** कर्मादिष्वपि। ननु कर्मादौ द्वितीयादि बाधकं [7]भविष्यति। नैष दोषः, वक्ष्यमाणरीत्या सर्वत्र कर्मादिसंभवेन षष्ठ्या अनवकाशत्वात्। अत एव न द्वितीय इत्याह — **सर्वत्रेति**। विनिगमकमाह — **कर्मादीति**। कारकव्यतिरिक्तमर्थमाह — **स्वेति**। ननु तत्रापि वेतनदानादिक्रियाकर्तृत्वं राज्ञः [8]स्वामित्वम्, पुरुषस्य तत्संप्रदानत्वं स्वत्वमिति कथं कारकाद् भेदः, अत आह — **तदुक्तमिति**। क्रियाजन्यः स्वस्वामिभावसंबन्धः कारकादन्य एवेत्यर्थः। श्रुतायामश्रुतायां वा क्रियायां कारकेभ्यो व्यतिरिक्तः क्रियाकारकपूर्वको यः संबन्धः स षष्ठ्याभिधीयत इति श्लोकार्थः। 'अश्रुतायाम्' इत्येतदुदाहरति — **तत्रेति**। 'श्रुतायाम्' इत्येतदुदाहरति — **मातुरिति**। [9]'अधीगर्थदयेशां कर्मणि' इति [10]शेषत्वेन विवक्षिते षष्ठीविधानात् कर्मत्वाविवक्षा। **विशेषणभावः** विशेषणत्वम्, तदेवाह — **मात्रिति**। उक्तेऽर्थे 'यद्येवम्' इत्ययुक्तम्, अत आह — **अविदितेति**। राज्ञः पुरुष इत्यत्र तयोः कर्तृत्वसंप्रदानत्वप्रतीतिरस्तीत्याह — **राजेति**। **ददाति** वेतनम्। अवयविनोऽवयव आधारो न तु वैपरीत्यम्, अत आह — **लोकेति**। सिद्धान्ते परिणामवादेऽवयवावयविनोर्भेदाभावात् 'वैशेषिक' इत्युक्तम्। भाष्ये **अपहरणादिति**। वनस्थकाष्ठादीनामाहरणम् **अपहरणम्**, चौर्येण गृहीते स्व-

---

[1] भाष्ये 'प्रथमा प्रतिषेधेन' इत्यत्र 'प्रथमा वा प्रतिषेधेन' इति निर्णयसागरमुद्रिते पाठः।

[2] निरासः — प.

[3] वाशब्दो भिन्नक्रमः, प्रसक्तिरेव वा नास्तीत्यन्वयः॥

[4] वाशब्दो नास्ति — य.

[5] मीमांसासूत्रम् ३. १. २.

[6] शेषपदार्थस्याप्रधाने — अ.

[7] 'भविष्यति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — अ.

[8] स्वामित्वात्, पुरुषस्य — अ.

[9] पा. सू. २. ३. ५२.

[10] कर्मणीत्यादिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्वानङ्गीकारात्। यद्वा, [1]एतद्भगवद्वचनाच्चौर्यमपि स्वत्वहेतुः। [2]**विपरिवर्तनं** स्वकीयं किंचिद्वस्तु दत्त्वा वस्त्वन्तरग्रहणं [3]क्रयविक्रयविलक्षणम्। समाधानतात्पर्यमाह — **क्रियाकारकेति**। संबन्धद्वयस्य भेदात् कस्यचिद्विवक्षा, कस्यचिन्नेत्युपपन्नमित्यर्थः। सतोऽविवक्षायां हेतुमाह — **लोमेति**। 'असतः' इत्यस्य प्रकृतानुपयोगं निराह — **दृष्टान्तेति**। असतो विवक्षायां हेतुमाह — **कुण्डिकायामिति**। उत्तरविचारस्य तात्पर्यमाह — **अर्थेति**। नन्वस्मिन् शास्त्रे नियमशब्देन परिसंख्योच्यते। सा च युगपदुभयप्राप्तावन्यतरनिवृत्तिफलिका। न ह्यत्रैकस्मात् प्रातिपदिकाद्युगपत् षष्ठीद्वितीयादीनां प्रसङ्गः, येन द्वितीयादि[4]निवृत्त्या षष्ठीविधिः परिसंख्या स्यात्। अतः 'नियमार्थम्' इत्ययुक्तम्, अत आह — **यथेति**। [5]'कर्तृदेशकालानामचोदनं प्रयोगे नित्यसमवायात्' 'नियमार्था वा श्रुतिः' इति पूर्वोत्तर[6]पक्षसूत्राभ्यां [7]समादिविधिरप्राप्तांशपरिपूरणफलको नियमविधिरिति [8]चतुर्थाधिकरणे व्यवस्थापितम्। तथात्र शेषषष्ठ्या द्वितीयादीनां च पर्यायेण प्राप्तौ शेषषष्ठीविधानं द्वितीयादिप्रसङ्गेऽपि षष्ठीं नियच्छद् द्वितीयादिनिवृत्तिकरमित्यर्थः। सूत्रानुवादस्य प्रयोजनमाह — **अस्मिन्निति**। दोषमेवाह — **संबन्धस्येति**। 'अस्मिन्' इत्यस्य व्यावर्त्यमाह — **व्याकरणेति**। ननु षष्ठीप्रतिषेधे द्वितीयादेरप्रसङ्गात् प्रातिपदिकार्थे प्रथमा भविष्यतीति तद्विधिर्व्यर्थः, अत आह — **प्रतिषिद्धायामपीति**। मात्रशब्दस्यावधारणार्थकत्वादित्यर्थः। [9]वाक्यार्थत्वमेवाह — **राज्ञ इति**। 'कुतो नु' इति साम्यापादनस्य तात्पर्यमाह — **पुरुषपदेति**। अनियतः प्रतियोगी यस्येति विग्रहः। [10]संबन्धित्वमाने हेतुः — **यस्मादिति**। **परोपकारित्वेन** परविशेषणत्वेन। पूर्वत्र भावशब्दः सत्तावाची, उतरत्रोत्पत्तिवाचीत्यभिप्रेत्याह — **न हीति**। तत्र स्वामिनि [11]षष्ठी, स्वे प्रथमेत्यत्रार्थस्य निमित्तत्वमाह — **तत्रेति**। स्वामित्वस्य षष्ठीं [12]विनाभानात् प्रातिपदिकार्थातिरिक्तत्वाच्चेत्यर्थः। **स्वनिष्ठत्वेन** स्वप्रधानत्वेन। स्वस्वामिसंबन्धस्य द्विनिष्ठत्वेऽपि स्वामिन्येव षष्ठी, न स्व इत्यत्र संमतिमाह — **तदुक्तमिति**। **असौ** स्वस्वामिभावसंबन्धः। **गुणेषु** राजादिषु। **व्यतिरिच्यते** स्फुटीभवति। परार्थस्य गुणस्य प्रधानोपकारायातिरिक्तसंबन्धपरत्वमपि संभवति, न तु स्वनिष्ठस्य प्रधानस्येति 'परार्थत्वात्' इत्यनेनोक्तम्। **तत्र** गुणेष्वित्यर्थः। **उपयुज्यते** अन्यसंबन्धित्व[13]व्यावृत्त्येत्यर्थः। संबन्धस्यैव [14]षष्ठ्यर्थत्वोक्तेराह — **स्वस्वामीति**। तल्लाभे हेतुः — **समासेति**। 'स्वकृतम्' इत्युक्ते संबन्धस्य वाक्यार्थत्वं प्रतीयते, तथा च राजशब्दात् प्रथमा स्यात्, अत आह — **ततश्चेति**। संबन्धस्य प्रातिपदिकार्थातिरेकात् षष्ठी भवतीत्यर्थः। 'क्रियाकृताः' इत्यत्र कृतिरपेक्षावाची, उपजननमाश्रयणमित्यभिप्रेत्य वाक्यार्थमाह — [15]**क्रियापेक्षयेति**। **शक्तिनिमित्ता इति**। बहुव्रीहिः। **संज्ञाः** कर्मादिसंज्ञाः। **यदेति**। क्रियां

---

[1] अत्र 'अपहरणादिति यथा युद्धे क्षत्रियादीनाम्' इति नागेशव्याख्या। सा भाष्यस्वारस्यमप्यपरित्यज्य शास्त्रीयपथानुसारिण्यपि वर्तते॥ एतद्वचनात् — अ.

[2] प्रदीपे 'परिवर्तनादित्यर्थः' इत्यत्र 'विपरिवर्तनादित्यर्थः' इत्यन्नंभट्टपाठ इति प्रतीयते।

[3] क्रयविक्रयलक्षणम् – अ; क्रियोपलक्षणम् – ऋ.

[4] आदिशब्दो नास्ति — अ.

[5] मीमांसासूत्रम् ४. २. २३, २४.

[6] 'पक्ष' इति नास्ति — अ.

[7] समप्रदेशादिविधिरित्यर्थः।

[8] मीमांसाचतुर्थाध्यायद्वितीयपादनवमाधिकरण इत्यर्थः।

[9] वाक्यार्थमेवाह — अ.

[10] संबन्धिनो भावे — अ.

[11] षष्ठी, न प्रथमेत्यत्रार्थस्य — अ.

[12] विना, अभानादिति छेदः॥ विनाभावात् – अ.

[13] व्यावृत्त्यर्थः — अ.

[14] षष्ठ्यर्थत्वोक्तिरित्याह — अ.

[15] प्रदीपे 'क्रियाफलापेक्षया' इति दृश्यते। 'क्रियापेक्षया' इत्यन्नंभट्टपाठः स्यादिति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कुर्वद्धि कारकमिति व्यापारावेशं विना कारकत्वासंभवात् । व्यभिचारशब्दार्थमाह — **यदेति** । **अतिरेकः** उद्भवः । **अपरोपकारित्वेनेति** । व्यापारावेशाविवक्षायामित्यर्थः । उदाहरणानुरूपमर्थं दार्ष्टान्तिकेऽप्याह — **तदेवमिति** । संज्ञारूपत्वासंभवाद् भूतशब्दस्य प्राप्त्यर्थत्वमाश्रित्याह — **ताः शक्तय इति** । उक्तेऽर्थे संमतिमाह — **तदुक्तमिति** । **स्वशब्दैः** करणादिशब्दैः । **स धर्मः** क्रियावेशलक्षणः, शक्त्यतिरेकलक्षणो वा । **आदिभिरिति** । आदीयत इत्यादिः, विभक्तिमात्रप्रतिपाद्यत्वात् क्रियावेशस्य । 'पुरुषेऽपि' इत्यपिशब्दार्थमाह — **द्वाभ्यामिति** । वस्तुस्थितिमाह — **शक्तिस्त्विति** । करणादिशक्तिरित्यर्थः । उभयनिष्ठत्वेऽपि 'दात्रेण लुनाति' इत्यत्राप्रातिपदिकत्वेन तिङन्तात् तृतीयादेरसंभवात् । **गुणेति** । 'राज्ञः' इत्युक्ते सामान्येन स्वमप्युपस्थितम्, संबन्धस्य सप्रतियोगिकत्वादित्युक्तमित्यर्थः । किं ततस्तत्राह — **तत्रेति** । **पदं न्यस्य** षष्ठ्या प्रतीयमानः, **संस्पृशति** तन्निरूपितत्वेन प्रतीयत इत्यर्थः । तर्हि प्रधान एव षष्ठी किं न स्यात्, अत आह — **गुणश्चेति** । **उपकारः** इतरव्यावृत्तिः । गुणशब्दस्यैव संबन्धपरत्वं न प्रधानशब्दस्येत्यर्थः । **नैव** कदापीति शेषः । **भवत्येवेति** । तदा पुरुषस्य राजा स्वामीति प्रतीतेरित्यर्थः । नन्वेकस्यैकदा गुणप्रधानभावविरोधात् कथं पुरुषस्येति षष्ठी, अत आह — **एकस्यापीति** । एकस्मिन्नेकप्रतियोगिकयोर्गुण[1]प्रधानयोर्विरोधः, न भिन्नप्रतियोगिकयोरित्यर्थः ॥

[२, ८१९–८२५]

(रत्नप्रकाशः) [2]'कर्मणि द्वितीया' इत्यादेः कर्मत्वेन विवक्षिते द्वितीयेत्यादिरर्थः । तथा च कर्मत्वादिविशिष्टत्वेन विवक्षितादन्यो वा शेषः, उत तद्विवक्षाभेदोपलक्षितसंबन्धसामान्यविवक्षेति संदेहात् पृच्छति — **कः शेष इति** । एतेन 'किमप्रधानं शेषः, उतोपयुक्तादन्यः । [3]आद्ये पक्षे सर्वेषां कारकाणां क्रियार्थत्वात् शेषत्वमिति तत्रापि षष्ठीप्रसङ्गः । सर्वत्र कर्मादीनां सद्भावादुत्तरोऽपि शेषशब्दार्थो न प्रकल्पत इति प्रश्नः' इति निरस्तम् । [4]'शेषो घ्यसखि' [5]'शेषे प्रथमः' [6]'शेषो बहुव्रीहिः' इत्यादावुपयुक्तादन्यस्यैव शेषपदार्थत्वेनास्मिन् शास्त्रेऽन्यत्र च प्रसिद्धत्वेन तेन सहाप्रधानरूपस्य पूर्वमीमांसा[7]मात्रप्रसिद्धस्य कोटचन्तरत्वासंभवात् । प्रकृतभाष्येण तत्कोटेः स्पर्शलेशस्याप्यभावात् । सिद्धान्त्यभिमतकोटिनैरपेक्ष्येण संशयवर्णने बीजाभावाच्च । इदानीं प्रथमकोटचवलम्बनेनोत्तरमाह — **कर्मादिभ्यो येऽन्येऽर्था इति** । कर्माद्यन्याप्रसिद्धयानुपपन्नार्थकं सूत्रं स्यादित्याशयेनाह — **यद्येवमिति** । **राजा कर्तेति** । 'राजा पुरुषाय ददाति' इत्यादौ राज्ञः कर्तृत्वेन पुरुषस्य संप्रदानत्वेनोपयुक्तत्वादशेषत्वमिति भावः । ननु राज्ञः पुरुषस्य च शेषत्वं मा भून्नाम, तयोर्यः संबन्धस्ततो भिन्नः स्वस्वामिभावलक्षणस्तस्य शेषत्वं संभवतीत्युपपन्नार्थकमेव सूत्रमिति चेन्न, 'राजपुरुषयोः स्वस्वामिभावः संबन्धो भवति' इत्यत्र तस्यापि कर्तृत्वेनोपयुक्तत्वात् । एतेन 'स्वस्वामिभावादयः संबन्धाः कर्मादिभ्योऽन्ये' इति निरस्तम् । तेषामपि कर्मत्वकर्तृत्वादिसंभवेन तद्भिन्नत्वासंभवात् । यदप्युक्तम् —

[8]"संबन्धः कारकेभ्योऽन्यः क्रियाकारकपूर्वकः ।
श्रुतायामश्रुतायां वा क्रियायां सोऽभिधीयते ॥' इति ।

---

[1] भावप्रधानो निर्देशः, गुणप्रधानभावयोरित्यर्थः ।
[2] पा. सू. २. ३. २.
[3] पूर्वस्मिन्नित्यस्यार्थानुवादः ।
[4] पा. सू. १. ४. ७.
[5] पा. सू. १. ४. १०८.
[6] पा. सू. २. २. २३.
[7] मानप्रसिद्धस्य — प, ब, य.
[8] वाक्यपदीयम् ३. ७. १५६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[तदपि न,] संबन्धस्य कारकादन्यत्वाभावस्योक्तत्वात् । जन्यजनकत्वादेः संबन्धविशेषस्य क्रियाकारकपूर्वकत्वेऽपि समीपसमीपिभावादौ तदसंभवेन संबन्धसामान्येन क्रियाकारकपूर्वकत्वकथनानौचित्यात्। अत एव 'श्रुतायामश्रुतायाम्' इत्यस्याप्यनर्थकत्वाच्च। यदप्युक्तम् 'अश्रुतायां क्रियायां राज्ञः पुरुष इत्यादौ क्रियाकारकसंबन्धपूर्वकोऽन्य एव स्वस्वामिभावादिकः संबन्धः प्रतीयते' इति। तदपि न, यस्मै राज्ञा पूर्वं किमपि दत्तं नास्ति तस्यापि राजपुरुषत्वसत्त्वेन तत्साधारणस्य स्वस्वामिभावस्य क्रियाकारकसंबन्धपूर्वकत्वे मानाभावात् । स्वस्वामिभावादेरपि कर्तृत्वकर्मत्वादिसंभवेन शेषत्वाभावस्योक्तत्वाच्च । यदप्युक्तम् 'मातुः स्मरतीत्यादौ तु श्रूयमाणे क्रियाशब्दे सदपि कर्मत्वमविवक्षित्वा विशेषणभाव एव स्मरणं प्रति मातुः प्रतिपाद्यते — मातृसंबन्धि स्मरणमिति' इति। तदपि न, तत्संबन्धसामान्यपूर्वकत्वं वा कर्मत्वस्य, कर्मत्वपूर्वकत्वं वा संबन्धसामान्यस्येति विनिगन्तुमशक्यत्वेन तत्रापि संबन्धसामान्यस्य क्रियाकारकपूर्वकत्वासंभवात् । यदप्युक्तम् 'अविदिताभिप्राय आह — **यद्येवमिति**। क्रियामन्तरेण संबन्धाभावात् सर्वत्र तस्या अवश्यंभावात् तन्निमित्तस्य च कर्मादेरिति भावः' इति। तदपि न, तस्यैव तदभिप्रायाज्ञानमूलकत्वात्। तदभिप्रायस्य मया दर्शितत्वात्। क्रियामन्तरेणापि स्वस्वामिभावादिसंबन्धस्योपपादितत्वाच्च। **वृक्षः शाखाया अधिकरणमिति**। वृक्षे शाखा वर्तत इत्यादौ शाखाद्वारा तन्निष्ठवर्तनक्रियाया अधिकरणं वृक्ष इत्यर्थः। एतेन वैशेषिकादिभिरुक्तम् — अवयवेष्ववयविनो वर्तन्त इति, तदनुभवविरुद्धमिति सूचितम्। न हि कश्चिद्वदति लोके 'शाखासु वृक्षो वर्तते' इति। ननु राज्ञः पुरुष इत्यत्र राजा पुरुषाय किंचिद्ददातीत्यत्र राजा कर्ता पुरुषः संप्रदानं भवतु नाम, राज्ञो वस्त्रम्, चोरस्य वस्त्रम्, ब्राह्मणस्य गौः, ब्राह्मणस्य तिलाः, इत्यादौ तदसंभवात् शेषत्वं भविष्यतीत्यत आह — **तथा तदेतत् स्वं नामेति**। **क्रयणादिति**। तथा च वस्त्रादेः कर्मत्वं स्थितमिति भावः। **विनिमयादिति**। परिवर्तनादित्यर्थः। तिलान् गृह्णाति माषान् दत्त्वेत्यादौ तिलानां कर्मत्वं स्थितमिति भावः। तदेवमाद्यायां कोटौ निराकृतायां द्वितीयां परिगृह्णाति — **एवं तर्हीति**। **कर्मादीनामविवक्षेति**। कर्मत्वादिविवक्षाभिन्नविवक्षाविषयः शेष इति भावः। तथा च स्वस्वामिभावादीनां कर्तृत्वादिविवक्षाविषयत्वेऽपि तद्विवक्षाभिन्नविषयत्वमस्तीति तत्र षष्ठीबोधनेनोपपन्नं सूत्रमिति भावः। **अलोमिकेति**। विद्यमानेष्वपि लोमसु सूक्ष्मत्वादविद्यमानत्वारोप इति भावः। एवमनुदरेत्यत्र। **असतश्चेति**। यथासतो[1] विवक्षा तथा सतोऽप्यविवक्षा भवतीति दृष्टान्तान्तरेण प्रकृतोपयोगिदृष्टान्तोपपादनायेदम्। **समुद्रः कुण्डिकेति**। बहुपानीय[2]संभवप्रतिपादनाय कुण्डिकायां समुद्रत्वारोपः। **विन्ध्यो वर्धितकमिति**। वर्धितकशब्देन मूलेन स्थूलमग्रेण सूक्ष्मं विशिष्टसंस्थानयुक्तं भक्तमुच्यते। तस्मिन् महत्त्वप्रतिपादनाय विन्ध्यत्वारोपः। शेषपदस्य संभवदर्थकत्वे प्रतिपादिते तस्य प्रयोजनं पृच्छति — **किमर्थमिति**। उत्तरमाह — **प्रत्ययावधारणादिति**। 'कर्मण्येव द्वितीया' इत्यादिरूपेण प्रत्ययनियमादित्यर्थः। अर्थावधारणपक्षेऽपि सार्थकं शेषग्रहणमित्याह — **अर्थावधारणाद्वेति**। वाशब्दोऽप्यर्थे। **तन्नियमार्थमिति**। तेन विनापि षष्ठ्यास्तत्र सिद्धत्वादिति भावः। संबन्धस्य द्विनिष्ठत्वाद् विशेष्यवाचकादपि षष्ठी प्राप्नोतीति तन्निषेधः कर्तव्य इत्याह — **षष्ठी शेष इति चेदिति**। षष्ठ्यां प्रतिषिद्धायामपि संबन्धस्याधिकस्य भानात् [3]'प्रातिपदिकार्थ' इति प्रथमा न प्राप्नोतीति सापि वचनान्तरेण विधेयेत्याह — **तत्र प्रथमाविधिरिति**। विशेष्ये प्रथमापि[4] विधेयेत्यर्थः। **पूर्वेणेति**। पूर्वसूत्र इति भावः। **वाक्यार्थः स इति**। तथा च षष्ठी न भविष्यति,

---

[1] असतः इति छेदः।
[2] अत्र संभवः स्वस्मिन् समावेशो बोध्यः।
[3] पा. सू. २. ३. ४६.
[4] अपिशब्दो नास्ति — य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वाक्येनोक्तत्वात्। प्रथमा तु भविष्यति, पुरुषशब्दस्य तत्र स्वार्थमात्रवृत्तेरिति भावः। **कुतो नु खल्वेतदिति**। संबन्धस्य द्विनिष्ठत्वादेकत्वाच्च तस्य पुरुषे वाक्यार्थत्वं राजन्यवाक्यार्थत्वमित्यत्र किं बीजमिति प्रश्नः। **अन्तरेणापीति**। विशेषणविशेष्ययोः संसर्गो विशेषणापेक्षया प्रधानं विशेष्यापेक्षयाप्रधानम्,[1] प्रत्ययार्थश्च प्रकृत्यर्थापेक्षया प्रधानम्। एवं स्थिते विशेषणवाचकादेव संबन्धवाचकः प्रत्यय उचितः, न तु विशेष्यवाचकात्। [2]ततो निष्पन्नेन तेन तद्गुणीभूतसंबन्धभानाभावादिति भावः। एतेन 'राज्ञ इति केवलेऽपि पद उच्चार्यमाणे संबन्धित्वमनियतप्रतियोगि राज्ञो गम्यते। यस्माद्राजा परोपकारित्वेन विवक्षितः, न तु स्वनिष्ठत्वेन' इति निरस्तम्। 'स्वायत्ते शब्दप्रयोगे नावाचकं प्रयोक्तव्यम्' इति न्यायेन विशेषणपरतयाङ्गपर्यायोपकारिशब्दप्रयोगानौचित्यात्। लोके हि राजा पुरुषायोपकरोति, पुरुषोऽपि राज्ञे। न हि विशेषणमङ्गमिति लोके व्यवह्रियते। किं च विशेषणपरतया कथंचिदुपकारिशब्द उपपद्यतां नाम, तथापि परशब्दो व्यर्थः। भवतु वा सोऽप्युपपन्नः, तथापि राज्ञो विशेषणत्वकथनमात्रेण संबन्धित्वेनावगमो नोपपादितो भवति। यद्युपपादितस्तावतैव, तर्हि पुरुषस्य विशेष्यत्वकथनमात्रेणापि पुरुषस्येत्युक्ते तस्य संबन्धित्वेनावगम उपपादितः स्यात्। न हि विशेषणत्वं संबन्धितावच्छेदकं भवति विशेष्यत्वं नेत्यत्र किंचिन्नियामकमस्ति। अपि च संबन्धस्य विशेषणं प्रतियोगि विशेष्यमनुयोगीति सकलशिष्टसंमतत्वेन 'अनियतप्रतियोगि' इत्यपि [3]तत्रायुक्तं भवति। इदानीं भगवतो भावमविद्वानाह— **अस्ति कारणमिति**। परिहरति — **ननु चेति**। **नैतेनैवं भवितव्यमिति**। **एतेन** पुरुषस्येति शब्देन, **एवं** पुरुषोपसर्जनसंबन्धबोधकेन, न भवितव्यमित्यर्थः। कुत इत्यत आह — **न हि शब्दकृतेनेति**। बुबोधयिषितार्थानुसारेणैव शब्दप्रयोग आश्रयणीयः, न तु शब्दप्रयोगानुरोधेनार्थस्यान्यथात्वाश्रयणम्, गुणस्यैव प्रधानानुसरणस्य न्याय्यत्वात्। लोकेऽपि हि प्रधानभूतराजादीननुसरन्ति गुणभूता भृत्यादय इति भावः। एतेन 'न हि शब्दस्य भावाभावाभ्यामर्थस्य भावाभावौ क्रियेते। किं तर्हि, अर्थस्य प्रतिपिपादयिषया विषयीकरणाकरणाभ्यां शब्दस्योच्चारणानुच्चारणलक्षणौ भावाभावावित्यर्थः' इति निरस्तम्। प्रकृतभाष्यस्य तदर्थकत्वाभावात्। न हि 'अस्ति कारणम्' इत्यादिना शब्दस्य भावाभावाभ्यामर्थस्य भावाभावौ भवतः, [4]न त्वर्थस्य प्रतिपिपादयिषया विषयीकरणाकरणाभ्यां भावाभावाभ्यां शब्दस्योच्चारणानुच्चारणलक्षणौ भावाभावावित्याक्षिप्तमस्ति, येन तद्भाष्यस्य सोऽर्थः स्यात्। यदप्युक्तम् 'परोपकारित्वेन राज्ञो विवक्षितत्वात् षष्ठी भवति, पुरुषस्य तूपकार्यतया स्वनिष्ठत्वेन विवक्षितत्वात् प्रथमा। तदुक्तं हरिणा — [5]'द्विष्ठोऽप्यसौ परार्थत्वाद् गुणेषु व्यतिरिच्यते। तत्राभिधीयमानश्च प्रधानेऽप्युपयुज्यते ॥ इति' इति। तदपि न, हरिकारिकार्थस्य मदीयव्याख्यानानुगुणत्वात्। तेन तत्कारिकार्थो न ज्ञात इति बालकेनापि ज्ञातुं शक्यत्वाच्च। **किं पुनस्तदिति**। कः स इत्यर्थः। स्वामित्वमित्युत्तराभिप्रायेण नपुंसकता। **स्वामित्वमिति**। स्वमस्यास्तीति मत्वर्थीय आमिनच्। ततो विहितेन [6]त्वेन संबन्धोऽभिधीयते, [7]'कृत्तद्धितसमासेभ्यः' इत्युक्तेः। तथा च तेन स्वस्वामिभावलक्षणः संबन्धो निर्दशितो भवति। **किंकृतमिति**। किं पुरुषरूपविशेषकृतं वा, सामान्येन [8]'स्वकृतं वेति

---

[1] अप्रधानमिति छेदः।
[2] विशेष्यवाचकादुत्पन्नेनेत्यर्थः।
[3] तत्र युक्तं — प, व.
[4] न तु शब्दस्य — व, य.
[5] वाक्यपदीयम् ३. ७. १५७.
[6] त्वप्रत्ययेनेत्यर्थः।
[7] इदं महाभाष्यटीकायां हरिणोक्तमिति वैयाकरणभूषणसारे भावप्रत्ययार्थनिरूपण उक्तम्।
[8] स्वशब्दोऽत्र धनवाची।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भावः। **स्वकृतमिति**। अत एव तत्र पुरुषशब्दस्य प्रयोगः सार्थक इति भावः। तत्र दृष्टान्तमाह — **तद्यथेति**। **विशेषाः** संबन्धाः। **तत्कृताः** संबन्धकृताः। **आख्याः** संज्ञाः। **प्रादुर्भवन्तीति**। प्रातिपदिकार्थानामित्यनुषज्यते। ताः का इत्यत आह — **कर्मेति**। कर्तुरुपलक्षणमिदम्। **ताश्चेति**। कर्माद्याख्या इत्यर्थः। **यदा व्यभिचरन्तीति**। प्रातिपदिकानीति शेषः। तद्व्यभिचारश्च विवक्षाप्रयुक्त इति यदा तत्तत्संबन्धविशेषविवक्षा तदा सा सा विभक्तिर्भवतीति फलितम्। **आख्याभूता एवेति**। आख्यां प्राप्ता एवेत्यर्थः। एवकारेण तत्तद्विभक्त्यभावः सूच्यते। **कर्मेति**। आनयने गौः कर्म, दण्डः करणमित्यादिव्यवहारो भवतीति भावः। **एवं पुरुषेऽपीति**। संबन्धस्य द्विष्ठत्वादिति भावः। क्रियाकारकसंबन्धस्य द्विष्ठत्वेऽपि तत्प्रयुक्तकर्मादिसंज्ञानां प्रातिपदिकार्थवृत्तित्वात् तत्प्रयुक्ता विभक्तयः प्रातिपदिकादेव भवन्तीति वैषम्यम्। एतेन 'कर्मत्वादिशक्तिस्तु '[1]प्रातिपदिकार्थस्यैव, न क्रियास्येति विशेषः' इति निरस्तम्। कर्मत्वादीनामपि स्वामित्वादिवत् संबन्धत्वाविशेषेण द्विष्ठत्वस्यैव स्वीकर्तुमुचितत्वात्। तत्स्वीकारे दोषाभावाच्च। **राजशब्दादिति**। वैपरीत्यं तु शङ्कितव्यं न भवति, विशेष्यापेक्षया संबन्धस्य विशेषणत्वेन विशेष्यवाचकादुत्पन्नया षष्ठ्या तत्संबन्धभानासंभवात्। एतेन 'गुणप्रधानभावेनार्थद्वयं व्यवस्थितमित्युक्तमेतत्। तत्र संबन्धो गुणे पदं न्यस्य द्विष्ठत्वात् प्रधानमपि संस्पृशति। गुणश्च प्रधानोपकाराय प्रवृत्तो रूपान्तरमाश्रयति। प्रधानं तु स्वनिष्ठमेव, न तु रूपान्तरं भजते' इति निरस्तम्। तस्य प्रधानवाचकात् षष्ठ्यभावे मुख्यहेतोरज्ञानेन तदुपपादनाग्रहेण च विजृम्भितत्वात्। तावता प्रधानात् षष्ठ्यभावस्यानुपपादनात्। विशेषणस्य रूपान्तरप्राप्तिर्भवति न तु विशेष्यस्येत्यत्र मानाभावाच्च। विशेषणविशेष्यभावस्य कामचारमविद्वान् शङ्कते — **न तर्हीदानीमिति**। विशेष्यत्वं विशेषणत्वं चैकस्य युगपन्न संभवतीति मन्यमानः शङ्कते — **न तर्हीदानीमिति**। यं प्रति यस्य यदा विशेष्यत्वं तं प्रति तदा विशेषणत्वं मा भून्नाम, अन्यं प्रति तु तत्संभवत्येवेत्याशयेन समाधत्ते — **भवतीति**॥

अधीगर्थदयेशां कर्मणि २. ३. ५२.

[२, ८२६–८२७]

(उद्द्योतनम्) ननु सर्वसंबन्धः क्रियाकृतो वाच्यः, मातृस्मरणयोः किंक्रियाकृतः संबन्धः, अत आह — **अवस्थानादीति**। संबन्ध्यवस्थानस्य संबन्धहेतुत्वादित्यर्थः। स्मरणकृत [2]एव संबन्ध इत्याह — **अन्ये त्विति**। स्वस्यैव स्वसंबन्धहेतुत्वे दृष्टान्तः — **यथेति**। ननु कर्मादिकारकाणामक्रियात्वेनाकर्मकत्वस्य सिद्धत्वादकर्मकवद्वचनं व्यर्थम्, अत आह — **आदिशब्द इति**। आश्रयवाचित्वे प्रयोगमाह — **यथेति**। 'विष्णुः समाश्रयः' इत्यनेनादिशब्दार्थो विवृतः। कर्माश्रयशब्देन कथं धातवो लभ्यन्ते, अत आह — **तेनेति**। [3]अकर्मकवद्भावस्य प्रयोजनमाह — **तेनेति**। **विनापीति**। अब्रह्मदत्ते ब्रह्मदत्तशब्दवदित्यर्थः। वत्यभावे स्वाश्रयनिवृत्तिप्रसङ्गमाह — **नाप्राप्त इति**। अकर्मकवदित्यनुक्तौ दोषाभिधानाय 'कर्माभिधाने हि' इति वार्तिकं व्याचष्टे — **यदीति**। तथा सति को दोषः, अत आह — **तत इति**। **तत्सामानाधिकरण्यात्** मात्रादिकर्मसामानाधि-

---

[1] प्रातिपदिकार्थस्यैव — व, य.
[2] एवकारो नास्ति — ऋ.
[3] 'अकर्मक' इत्यादि 'तेनेति' इत्यन्तं नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

करण्यात्। **नपुंसकत्वमिति**। मातुः स्मृतमित्यादिः। तत्र 'स्मृताया मातुर्वस्त्रम्' इति षष्ठीष्यत एवेत्यनुशयादाह — **अन्ये त्विति**। **अनभिहितेति**। कर्मणि [1]"क्तप्रत्यये क्तेनोक्तेऽपि कर्मणि यथा मातुरिति षष्ठी, मातुः स्मृतमिति प्रयोगस्य सर्वसंमतत्वात् तथा स्मृतशब्दादपि स्यादित्यर्थः। **प्रापणीया** वक्तव्या। भाष्ये **तत्तर्हीति**। उक्तेऽपि कर्मत्वे मातृशब्दात् षष्ठीति वक्तव्यमित्यर्थः। [2]यद्यत्रापि शेषषष्ठी तदा [3]"षष्ठी शेषे' इत्येव सर्वत्र षष्ठीसिद्धेः [4]"ज्ञोऽविदर्थस्य करणे' इत्यादिधातुकारकविशेषोपादानेन षष्ठीविधायकसूत्रसंघस्य वैयर्थ्यं स्यात्, अत आह — **प्रकरणं चेदमिति**। **समासेति**। शेष इत्येवात्र षष्ठीसिद्धेः पुनः षष्ठीविधानं समासनिवृत्त्यर्थम् — षष्ठी भवत्येव, श्रूयत एव, न तु तस्याः समासो भवति। समासे हि सति तस्या अभावः स्यात्। तस्मात् [5]"प्रतिपदविधानषष्ठ्या न समास इति न[6]' वक्तव्यमिति तत्रोक्तम्। प्रकरणस्य समासनिवृत्त्यर्थत्वे हरिसंमतिमाह — **तदुक्तमिति**। 'मातुः स्मृतम्' इत्यादौ **साधनैः** कर्मादिकारकैः सह, क्तप्रत्ययादिना व्यपदिष्टे श्रूयमाणस्मृतादिक्रियासहिते [7]"शेषे' इत्येव षष्ठीसिद्धावपि पुनः 'अधीगर्थ' इत्यादिना या प्रतिपदं षष्ठी [8]प्रोक्ता सा समासस्य निवृत्तय इति योजना। मातुः स्मर्यत इत्यादौ कर्मणि लकारेऽपि मातुः स्मृतमितिवत् शेषविवक्षया षष्ठ्युपपत्तेः कर्मादिष्वकर्मकवद्भावोऽपि न वक्तव्य इत्याहुः॥

[२, ८२६-८२७]

(**रत्नप्रकाशः**) **कर्मादिष्विति**। कर्मशब्देन मत्वर्थलक्षणया प्रकृतसूत्रगता अधीगादयो गृह्यन्ते। समासेन तु तदादीनां [9]दिविपर्यन्तानां संग्रहः। एतेन "आदिशब्दोऽत्राश्रयवाची। यथा 'विष्णुरादिः पृथासूनोर्भीष्मादिश्च सुयोधनः। ते जयन्ति रणे शत्रून् येषां विष्णुः समाश्रयः' इति। तेन कर्माश्रया द्वितीयाविधिनिमित्तभावेनोपात्ताः सकर्मका अधीगर्थादयः प्रेष्यब्रूपर्यन्ताः कर्मादिशब्देनोच्यन्ते" इति निरस्तम्। [10]"इको गुणवृद्धी' इति सूत्रे शब्दसंज्ञयोरपि गुणवृद्धिशब्दयोः स्वरूपपरताया भगवताश्रितत्वेनात्रापि कर्मशब्दस्य स्वरूपपरस्य मत्वर्थलक्षणया कर्मपदसमभिव्याहृताधीगर्थादिपरत्वाश्रयेणादिशब्दस्य चात्यन्तप्रसिद्धव्यवस्थापरत्वाश्रयेणोपपत्तौ [11]"वकबन्धनीयाश्रयणानौचित्यात्। न हि कृष्णादीनां यादृशं पार्थादीन् प्रत्याश्रयत्वं तादृशं वा, घटादीनां रूपादिकं प्रति यादृशं तादृशं वा कर्मणोऽधीगर्थादीन् प्रत्यस्ति, येन तदुपपद्येत। यथाकथंचिद् द्वितीयादि[12]विधिनिमित्तभावेनोपादानेन तेषां तदाश्रयत्वाश्रयणे तु वकबन्धनप्रयासः स्फुट एव। यदप्युक्तम् 'मातुः स्मरतीत्यत्र मातृस्मरणयोरवस्थानादिक्रियानिमित्तः संबन्ध इति केचिदाहुः' इति तदपि न, [13]असंबद्धया क्रियया संबन्धस्य संपादयितुमशक्यत्वेन संबन्धमात्रस्य [14]"क्रियानिमित्तकत्वेऽनवस्था-

---

[1] क्तप्रत्ययः, क्तेनोक्तेऽपि — अ; क्तप्रत्यये-नोक्तेऽपि — ऋ.

[2] यद्वात्रापि — अ.

[3] पा. सू. २. ३. ५०.

[4] पा. सू. २. ३. ५१.

[5] प्रतिपदविधानविहितषष्ठ्याः — अ.

[6] 'न' इति नास्ति — ऋ.

[7] पा. सू. २. ३. ५०.

[8] प्राप्ता — अ.

[9] दिवस्तदर्थस्येत्यत्र निर्दिष्टदिवुधातुपर्यन्तानामित्यर्थः।

[10] पा. सू. १. १. ३.

[11] वकबन्धनन्यायः — लौ. न्या. साहस्री द्वितीयभागे पृष्ठम् ५१.

[12] विधिशब्दो नास्ति — प.

[13] असंबन्धया — य.

[14] क्रियानिमित्तकत्वेनानवस्थापातात् — ब, य.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पातात्। यदप्युक्तम् 'अन्ये तु स्मरणस्य क्रियारूपत्वात् क्रियान्तरमन्तरेणैव द्रव्येण संवन्धोपपत्तिमाहुः। यथा द्वयोः काष्ठयोर्जतुकृतः संश्लेषः, जतुनस्तु काष्ठेन स्वत एव, न जत्वन्तरकृतः' इति। तदपि न, द्रव्ययोर्गुणयोः क्रिययोर्द्रव्यगुणयोर्द्रव्यक्रिययोर्गुणक्रिययोश्च परस्परं स्वत एव संबन्धस्य संभवेन क्रियाद्रव्ययोरत्र संबन्धोपपादनयत्नस्य व्यर्थत्वात्। **ल इति**। उपलक्षणमिदं कृत्यक्तखलर्थानाम्। **मातुः स्मर्यत इति**। मातृकर्मकस्मरणनिष्ठं वर्तमानं भवनमिति वाक्यार्थः। **स्वाश्रयमपीति**। कर्मात्र स्वशब्देनाभिमतम्। वत्करणेन हि सत्येव सकर्मकत्वे लादिविध्युपयोगितयाकर्मकत्वव्यपदेशोऽतिदिष्ट इति कर्माश्रयोऽपि लादिर्भवतीति भावः। एतेन 'विनापि वतिनातिदेशः सिध्यति, परार्थे शब्दप्रयोगात्' इति प्रश्नम्, 'नाप्राप्ते स्वाश्रयेऽतिदेश आरभ्यमाणस्तद् बाधेत' इति प्रतिवचनं चोपपादयन् निरस्तः। लक्षणाश्रयेण वाचकपरित्यागानौचित्येन प्रश्नोपपादनस्य, वत्यर्थलक्षणायां स्वाश्रयबाधने मानाभावेन प्रतिवचनोपपादनस्य चात्यन्तमौर्ख्यावहत्वात्। **माता स्मर्यत इति**। माता वर्तमानस्मरणकर्माभिन्ना सती वर्तमानभवनाश्रय इत्यर्थः। ननु या माता मृता तत्रापि 'माता स्मर्यते' इति प्रयोगसंभवात् तत्र कथं वर्तमानभवनाश्रयता तस्या इति चेन्न, स्मरणकर्मत्वेनोपस्थितमात्राकारविशेषस्य मातृशब्देनाभिमततया तदाकारस्य वर्तमानभवनाश्रयत्वसंभवात्। नन्वधीगर्थादीनामकर्मकवद्भावो न वक्तव्यः, मातुः स्मर्यत इत्यत्र कर्मण्येव भवतु लडित्यत आह — **कर्माभिधाने हीति**। **लिङ्गवचनानुपपत्तिरिति**। यदि लकारमात्रमकर्मकवद्भावफलं स्यात् तदा कथंचित् त्वदुक्तं स्यात्, किं तु कृत्यक्तखलर्था अपि। तथा च तत्र लिङ्गवचनानुपपत्तिरिति भावः। वस्तुतस्तु 'मातुः स्मर्यते' इति प्रयोगोऽपि कर्मलकारपक्षे नोपपद्यते, लेनाभिहिते कर्मणि प्रथमाया एव न्याय्यत्वात्। [1]'कर्तृकर्मणोः कृति' इति सूत्रेऽनुवर्तमानेनानभिहितग्रहणेनात्रापि संबन्धस्येष्टत्वात् लिङ्गवचनानुपपत्तिमात्रं न दोषः, किं तु प्रथमानुपपत्तिरपीत्याह — **षष्ठीप्रसङ्गश्चेति**। स्मृतशब्दस्य तत्र कर्मक्तान्तत्वे मातृशब्दात् प्रकृतसूत्रेण कर्मणि षष्ठी तावन्न भवति, क्तेन कर्मणोऽभिहितत्वात्। किं तु बाह्यवस्त्राद्यपेक्षया शेषषष्ठी। तथा च तत्सामानाधिकरण्यात् स्मृतशब्दात् षष्ठ्यां सत्यां 'मातुः स्मृतायाः' इति प्रयोगः स्यात्, न तु मातुः स्मृतमिति भावः। अश्रूयमाणवस्त्रादिसंबन्धे मातृशब्दात् षष्ठीं [2]सिद्धवत्कृत्य स्मृतशब्दात् षष्ठ्यापादनमयुक्तम्, किं तु मातृशब्दात् षष्ठी न युज्यते, अभिहिते कर्मणि प्रथमाया एव न्याय्यत्वादित्येव वक्तुमुचितमित्याशयेनाह — **अपर आहेति**। **प्रसङ्क्तव्येति**। वक्तव्येत्यर्थः। **षष्ठी न प्राप्नोतीति**। तथा च 'मातुः स्मृतम्' इत्यादिप्रयोगस्याकर्मकवद्भावैकसाध्यतेति भावः। तदेवं 'कर्मादिष्वकर्मकवद्वचनम्' इति वार्तिके आवश्यकतया भगवतोपपादिते मध्यस्थः कश्चित् पृच्छति — **तत्तर्हीति**। भगवानाह — **न वक्तव्यमिति**। वार्तिकार्थलाभः कथमित्यत आह — **अविवक्षिते कर्मणीति**। अविद्यमानत्वेन विवक्षिते कर्मणीत्यर्थः। तथा च [3]कर्मणोऽत्राविद्यमानत्वविवक्षयाधीगर्थादीनामविद्यमानकर्मत्वे सत्यकर्मकत्वप्रयुक्ता लादयो भवन्तीति वार्तिकफलं संगृहीतं भवति। अविवक्षितपदस्याप्रकृतत्वेन तदपि वचनमेवेति मन्यमानः पृच्छति — **किं वक्तव्यमेतदिति**। भगवानाह — **न हीति**। इतर आह — **कथमिति**। भगवानाह — **शेष इतीति**। **अविवक्षा शेष इति**। तथा च शेषशब्देनैवानुवर्तमानेनाविद्यमानत्वेन विवक्षित इत्यर्थलाभ इति भावः। [4]**यदा च कर्म विवक्षितमिति**। अविद्यमानत्वेन न विवक्षितं चेति शेषः। अत्र यद्यपि भाष्यव्याख्यानं किंचित्

---

[1] पा. सू. २. ३. ६५.
[2] सिद्धवत्कृत्वा — प, ब, य.
[3] कर्मणोऽत्र विद्यमानत्व — ब, य.
[4] भाष्ये 'यदा कर्म विवक्षितम्' इत्यत्र 'यदा च कर्म विवक्षितम्' इति निर्णयसागरमुद्रिते पाठः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्लिष्टकल्पनया व्याख्यातम्, तथापि तद्बीजस्य [१]"षष्ठी' इति सूत्र एव प्रपञ्चितत्वान्न दोषः॥

रुजार्थानां भाववचनानामज्वरेः २. ३. ५४.

[२, ८२८]

(उद्द्योतनम्) अव्यभिचारादिति। तथा च विशेषणं व्यर्थमित्यर्थः। ननु 'चोरस्य रुजति रोगः' इत्यत्र चोरस्य भावकर्तृकत्वाभावात् कथं षष्ठी, अत आह — **ल्यब्लोप इति**। **आश्रित्येति**। रुजतीति भावकर्तृकम्, **तदाश्रित्य** [२]तत्कर्मणि षष्ठीत्यर्थः। ननु तावता कर्मणीति न लभ्यत इति कर्तर्यपि षष्ठी स्यात्, अत आह — **अथवेति**। **उक्तम्** लक्षणया। **कथमिति**। भाववचनशब्दस्य भावकर्तृकवाचित्वे उक्तार्थः सिध्येत्, तदेव कुत इत्यर्थः। **तस्य** साध्यरूपस्य तिङवाच्यस्य। 'भवेदपि भवेत्' इत्यादौ क्वचिद्दर्शनेऽपि लोकेऽदर्शनादित्यर्थः। ल्युडर्थः कथं कर्ता, अत आह — **कर्तरीति**। [३]'कृत्यल्युटो बहुलम्' इत्यनेन। ननु प्रकृत्यर्थकर्तरि ल्युड् विधीयते, तस्य च प्रकृतेऽनन्वयः, अत आह — **प्रकृतीति**। **वचन इति**। भावार्थल्युडन्तस्यैव नपुंसकत्वनियमः। कल्पनाक्लेशपरिहारायाह — **अन्ये त्विति**। विग्रहमुक्त्वा विवक्षितमर्थमाह — **सतीति**। भावे कर्तरि सतीत्यन्वयः। **धातुमात्रेति**। रुजिधातुमात्रार्थविवक्षया, न तु रुजाशब्दार्थविवक्षया। धातूनामनेकार्थत्वात् कूलं रुजतीत्यत्र[४] पातयतीत्यर्थः। प्रत्ययान्तपुरस्कारे तूदाहरणान्तरमाह — **रुजेति**। 'रुजो भङ्गे' [५]इत्यस्माद् भिदादित्वादस्मादेव निपातनाद्वाङि रुजेति रूपम्॥

[२, ८२८]

(रत्नप्रकाशः) चौरं संतापयतीति। एतेनात्र कृदन्तमेव प्रत्युदाहरणमिति वदन्तः प्रत्युक्ताः, कर्मण्येवात्र षष्ठ्या विधीयमानत्वेन तिङन्तघटितप्रत्युदाहरणेऽपि बाधकाभावात्। **भाववचना एवेति**। धातुमात्रस्य भाववाचकता भूवादिसूत्रे निर्दशिता। **भावकर्तृकादिति**। ल्यब्लोपे [६]कर्मणि पञ्चमीयम्। सामान्येनैकवचनम्, भावकर्तृकानाश्रित्येत्यर्थः। उच्यते भावो धात्वर्थोऽस्मिन्निति वचनः कर्ता, धातूपात्तव्यापाराश्रयो हि कर्ता। तन्निष्ठ एव हि धातुना व्यापार उच्यते। भावो वचनः कर्ता येषां ते भाववचना इत्यभिमतलाभः। एतेन 'वचनशब्दे प्रत्ययार्थः कर्ता विवक्षितः, कर्तरि ल्युटो विधानात्। प्रकृत्यर्थस्तु वचनक्रिया न विवक्ष्यते। तेन भावो वचनः कर्ता येषां ते भाववचनाः, भावकर्तृका इत्यर्थः संपद्यते' इति निरस्तम्। कर्तरि ल्युटः साक्षादविधानात्। क्लृप्तेनैवाधिकरणल्युटोपपत्तौ बहुलग्रहणात् कर्तरि तत्कल्पनस्य तत्र प्रकृत्यर्थत्यागस्य च चातुर्यानावहत्वाच्च। **नदी कूलानीति**। 'रुजो भङ्गे' इति पठितत्वात् तत्कर्मत्वमचेतनानामपि कूलानां युज्यत एव॥

---

[१] पा. सू. ५०.
[२] 'तत्' इति नास्ति — अ.
[३] पा. सू. ३. ३. ११३.
[४] 'इत्यत्र' इति नास्ति — ऋ.
[५] भिदादिभ्य इत्यत्रादिशब्दस्य प्रकारवाचित्वमाश्रित्याह — **इत्यस्मादिति**। पक्षान्तरमाह — **अस्मादिति**॥
[६] 'कर्मणि' इत्येतदन्तमेव 'य' मातृकायां वर्तते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीया ब्राह्मणे २. ३. ६०.

[२, ८२८–८२९]

(उद्द्योतनम्) ननु पूर्वसूत्रेण विकल्पेन द्वितीयाप्राप्तावुपसर्गेऽपि छन्दसि नित्यार्थमिदं वचनमिति 'पूर्वेणापि' इत्ययुक्तम्, अत आह — **पूर्वेति**। [1]**नित्येति**। तथा च तद्बाधनार्थमिदं सूत्रमित्यर्थः। ननु शेषत्वाविवक्षायां द्वितीया भविष्यतीति सूत्रमेतद्व्यर्थम्, अत आह — [2]**तत्रेति**। [3]'दिवस्तदर्थस्य' इत्यत्रेत्यर्थः। **पूर्वेति**। शेषत्वस्य [4]विवक्षाविवक्षावशादेव शतस्य शतं वा प्रतिदीव्यतीति रूपद्वयस्य पूर्वसूत्रेणैव सिद्धेर्विभाषाविधानं व्यर्थं सत् तत्र शेषाननुवृत्तिं ज्ञापयतीत्यर्थः॥

[२, ८२८–८२९]

(रत्नप्रकाशः) [5]**पूर्वेणापीति**। [6]'विभाषोपसर्गे' इत्यनेन गां प्रदीव्यन्तीति सिध्यति। गामुपहरन्तीति तु [7]'कर्मणि द्वितीया' इत्यनेनैव। न हि तत्र केनचिद् द्वितीयां बाधित्वा षष्ठी प्राप्नोति। **गामस्य तदहरिति**। यद्यप्यत्रापि "कर्मणि द्वितीया' इत्येव द्वितीया सिध्यति, तथापि [9]'दिवस्तदर्थस्य' इति षष्ठीं बाधितुमिदम्॥

प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने २. ३. ६१.

[२, ८२९]

(उद्द्योतनम्) प्रस्थितत्वं हविषो विशेषणम्, न यजमानस्य देवताया वेत्याह — **प्रस्थितत्वेनेति**॥

[२, ८२९]

(रत्नप्रकाशः) [10]**प्रस्थितस्येति**। यदा प्रस्थितत्वेन हविर्विशेष्यते तदा षष्ठी न भवतीत्यर्थः॥

चतुर्थ्यर्थे बहुलं छन्दसि २. ३. ६२.

[२, ८३०–८३१]

(उद्द्योतनम्) **खर्वपात्रेति**। खर्वं वह्निपक्वं मृन्मयं पात्रं शरावादिकम्। ननु 'चतुर्थी'

---

[1] प्रदीपे 'नित्यं षष्ठी प्राप्नोति' इत्यत्र 'नित्या षष्ठी प्राप्नोति' इत्यन्नंभट्टपाठ इति भाति।
[2] प्रदीपे 'अत्र च शेष इति' इत्यत्र 'तत्र च शेष इति' इत्यन्नंभट्टपाठ इति भाति।
[3] पा. सू. २. ३. ५८.
[4] विवक्षावशादेव — ऋ.
[5] पूर्वसूत्रेणापीति — व.
[6] पा. सू. २. ३. ५९.
[7] पा. सू. २. ३. २.
[8] पा. सू. २. ३. २.
[9] पा. सू. २. ३. ५८.
[10] भाष्ये 'अप्रस्थितस्येति वक्तव्यम्' इत्यत्र 'प्रस्थितस्य नेति वक्तव्यम्' इति रत्नप्रकाशकृत्पाठः। अयं पाठो निर्णयसागरमुद्रितेऽधो निर्दिष्टः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यनेन षष्ठ्यर्थे चतुर्थीति कथं लभ्यते, अत आह — **षष्ठीप्रकरणादिति**। **चतुर्थ्यर्थ इति**। 'अर्थे' इत्यत्रानन्तर्याच्चतुर्थ्यर्थ एव गृह्यत इत्यर्थः ॥

[२, ८३०–८३१]

(**रत्नप्रकाशः**) **या खर्वेणेति**। रजस्वलायाः खर्वपाननिषेधे निन्दार्थवादोऽयम्। **चतुर्थीति**। षष्ठीप्रकरणात् षष्ठ्यर्थे चतुर्थीत्यर्थलाभ इति भावः। **अर्थे बहुलमिति**। चतुर्थीत्यनुवर्तनात् चतुर्थ्यर्थे षष्ठीत्यर्थलाभः ॥

कर्तृकर्मणोः कृति २. ३. ६५.

[२, ८३१–८३६]

(**उद्द्योतनम्**) 'तस्य' इत्यनेन कर्तृ[1]कर्मविशेषणत्वं विवक्षितमित्याह — **कर्तृकर्मेति**। 'नैतदस्ति' इत्यादेस्तात्पर्यमाह — **यथोक्तेति**। बहुव्रीहिः। **पश्चात्** 'किं तर्हि, उत्तरार्थम्' इत्यादिना। 'धातोर्हि' इत्ययुक्तम्, तस्यात्राप्रसक्तत्वात्, अत आह — **इहेति**। तत्संनिधौ हेतुः — [2]**क्रियायां हीति**। **सा चेति**। वाचकशब्दं विना व्यवहारासंभवादित्यर्थः। 'दर्शयति' इति यदुक्तं तदुपसंहरति — [3]**तदेवमिति**। 'पश्चात्' इति यदुक्तं तदाह — [4]**उत्तरार्थतामिति**। 'किं तर्हि' इत्यादिकं व्याचष्टे — **न लोकेति**। वार्तिके **तदन्तकर्मकर्तृत्वात्** कृदन्तकर्मकर्तृत्वात्। तदुपपादयति — **न लोकेति**। विशेषणत्वमेवाह — **अव्ययस्येति**। **अन्यस्य** उच्चैरित्यादेः। कृतोः कर्तृकर्मणी अपि कृतः संबन्धिनी इति व्यपदिश्येते इति न तद्व्यावृत्तिः, अत आह — **एकस्यैवेति**। कृत इत्येकत्वं विवक्षितमित्यर्थः। ननूभयोः [5]प्राप्तिर्यस्मिन्निति [6]बहुव्रीहिणैव कृत्संबन्धप्रतीतेः कृद्ग्रहणं व्यर्थम्, अत आह — **कृद्ग्रहण इति**। अन्तरङ्गत्वं स्वपदार्थवृत्तित्वेन। **तत्पुरुषः** षष्ठीतत्पुरुषः। तत्पुरुषे सति 'ओदनस्य पाकः, ब्राह्मणानां प्रादुर्भावः' इत्यत्र ब्राह्मणानामिति कर्तरि षष्ठी न स्यात्। कृतीत्येकत्वविवक्षायां बहुव्रीहौ च कथमियमाशङ्का, अत आह — **एकत्वस्येति**। परिहारतात्पर्यमाह — **कृतीति**। एवं च कृतोर्ये कर्तृकर्मणी तत्र नियमः प्रवर्तत इत्याह — **तेनेति**। तत्रारुच्या 'अथवा' इत्येतदित्याह — **यदीति**। **उत्तरत्र** उभयप्राप्तौ कृति कर्मणीति। तत्राप्यनुपयोगमाह — **अथवेति**। 'कृतपूर्वी कटम्' इत्यत्र कटात् षष्ठीनिरासाय कृद्ग्रहणमित्येतदुपपादयति — **कृतमिति**। **इनिप्रत्ययः** अनेनेत्यर्थे। **ततः** कृतपूर्विशब्दात्। कृतं पूर्वमनेनेति वाक्ये न काप्यनुपपत्तिः, अत आह — **कृतपूर्वीति**। [7]द्वितीयाया अप्राप्तेः प्रकृतोपयोगमाह — **तस्याश्चेति**। **न प्राप्नोतीति**। तथा च तन्निरासाय [8]कृद्ग्रहणं व्यर्थमित्यर्थः। नन्वपवादत्वाभावेऽपि 'कर्तृकर्मणोः' इति कर्मणि षष्ठी कुतो न स्यात्, अत आह — **इहापीति**। 'कर्तृकर्मणोः' इत्यादिषष्ठीविधाने-

---

[1] 'कर्म' इति नास्ति — अ.

[2] प्रदीपे 'क्रियाया हि कारकम्' इत्यत्र 'क्रियायां हि कारकम्' इति चौखाम्बामुद्रिते पाठः।

[3] इदानीमिति — अ.

[4] प्रदीपे 'उत्तरार्थत्वमाशङ्क्य' इत्यत्र 'उत्तरार्थतामाशङ्क्य' इत्यन्नंभट्टपाठः।

[5] प्राप्तिरस्मिन्निति — अ.

[6] बहुव्रीहिणैवैकत्वसंबन्ध — अ.

[7] तृतीयाप्राप्तेः — अ; द्वितीयायाः प्राप्तेः — ॠ.

[8] तद्ग्रहणं — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऽपीत्यर्थः। **कृत इति**। कृतशब्दस्य कटरूपकर्मविशेषपरत्वविवक्षायां तद्धितो न भवतीत्यर्थः 'योऽसौ' इति भाष्यमर्थविशेषे तद्धितद्वितीययोरभावाङ्गीकारपरत्वेन व्याचष्टे — **कृतः कट इति**। **वृत्त्या** तद्धितवृत्त्या। उपलक्षणमिदम्, न द्वितीययेत्यपि द्रष्टव्यम्। कुतः, अत आह — **तस्या इति**। तद्धितवृत्तेः। सामान्यविषयत्वमेवाह — **तस्मादिति**। यस्माद् विशेषे न वृत्तिरनभिधानात्, तस्मादित्यर्थः। **कर्मसामान्ये** [1]कटाद्यविशेषिते। सामान्यवाचित्वे प्रत्ययार्थमाह — **तत्रेति**। कर्मसामान्ये [2]भावे वा क्ते सतीत्यर्थः। प्रत्ययान्तस्य द्वितीयानुगुणमर्थमाह — **तेनेति**। कटमिति द्वितीयोपपत्तिमाह — **तत्रेति**। कृतवानित्यर्थसंपत्तावित्यर्थः। उक्तेऽर्थे हरिसंमतिमाह — [3]**तथा चेति**। कृतः पूर्वं कटोऽनेनेत्यत्र कृतादिशब्दैः कर्माभिधायिभिः कटादिशब्दसमभिव्याहारात् कर्मविशेषसंबन्धे **निर्भुक्ते** प्रतिपादितेऽपि, तत्र तद्धितद्वितीययोरभावेऽपीति यावत्। तद्धितद्वितीयोपपत्त्यर्थमाह — **विशेषेति**। कर्मसामान्यवाचीत्यर्थः। **प्रवर्तते** वृत्तिविषये। **अकर्मकत्वे** कर्म[4]सामान्यस्याप्यविवक्षायाम्, [5]'प्रसिद्धेरविवक्षातः कर्मणोऽकर्मिका क्रिया' इति वचनात्। अथवात्र वृत्तिविषये सकर्मकादपि भावे क्त इति भावः। **एवं** विशेषानभिधाने सति। **ततः** इनिप्रत्ययानन्तरम्, कृतपूर्वीतीनन्ताभिधेयक्रियावत्कर्त्रा कटादीनां कर्मणां योगो भवति। तथा च द्वितीयोपपत्तिः। ननूपसर्जनप्रकृत्यर्थक्रियया कटादीनां कथं संबन्धः, अत आह — **अविग्रहेति**। ग्रहशब्दो ज्ञानवचनः, यथा विशेषज्ञानरहिता, प्राधान्येनागृहीतापीति यावत्, गतादिशब्दवाच्यत्वेन स्थिता क्रिया ग्रामादिकर्मभिः संबध्यते तद्वत् कृतपूर्व्यादिषु कटादिकर्मसंबन्धित्वेन क्रियाया अवस्थानम्[6]। ग्रामं गतो देवदत्त इतिवत् कृतपूर्वी कटमित्युपपद्यत इत्यर्थः। ननु कृद्ग्रहणेनाप्रधानकर्तरि कथं षष्ठी लभ्यते, [7]तस्य प्रत्ययविशेषसंज्ञात्वात्, अत आह — **करोतीति**। लक्ष्यानुसारादत्र [8]'कृत्रिमाकृत्रिमन्यायो [9]नाश्रीयत इति भावः। अस्मिन् पक्षे दोषमाह — **एवमिति**। कृतपूर्वी कटमित्यत्र षष्ठीप्रसङ्गादित्यर्थः। अण्यन्ताण्वुलि प्रयोजककर्ता न लभ्यते, अत आह — **भिदेरिति**। **पर्यायेति**। [10]'पर्यायार्हर्णोत्पत्तिषु ण्वुच्'। एषु गम्येषु धातोर्ण्वुच् स्त्रियाम्। [11]**ण्यर्थेति**। प्रत्ययार्थस्य प्राधान्यात्। **अथेति**। सांप्रतिकाभावे भूतपूर्वत्वम्, तस्मिन् सति कथं तदित्यर्थः। ननु प्रयोजकव्यापारेणाप्यमानतया कर्मत्वात् [12]कर्तृत्वमपैति, अत आह — **गत्यादीति**। प्रयोजकव्यापारस्य प्राधान्यात् तत्कर्मणि द्वितीयासिद्धेर्गत्यर्थादावेवाणि कर्तुर्ण्यन्ते कर्मत्वम्, नान्यत्रेति नियमार्थं तदित्युक्तमित्यर्थः। **एवं तर्हीति**। प्रयोजकासंनिधौ प्राधान्यं स्थितम्, तत्संनिधौ नास्तीत्यर्थः। एतत् प्रयोजनं दूषयति — **एतच्चेति**। **विशेषेति**। [13]प्रधानाप्रधानन्यायापेक्षायाम्। लक्ष्यानुरोधेन सर्वत्र तन्न्यायो नाश्रीयत इत्याह — **यदेति**। यथा कृद्ग्रहणाभावेऽपि 'कारयति कटं भृत्येन' इत्यत्राप्रधानेऽपि कर्तरि तृतीया, तद्वत् षष्ठ्यपि भविष्यतीत्यर्थः। यद्येकया षष्ठ्या द्वयोरभिधानं

---

[1] कटाद्यविशेषेऽपि — अ.

[2] भावे चोक्ते — अ, ऋ.

[3] प्रदीपे 'तयाह हरिः' इत्यत्र 'तथा च हरिः' इत्यन्नंभट्टपाठ इति भाति।

[4] सामान्यस्याविवक्षायां — अ.

[5] वाक्यपदीयम् ३.७.८८.

[6] एतेन वाक्यपदीये 'कृतपूर्व्यादिषु स्थिता' इत्यत्र 'कृतपूर्व्यादिषु स्थितिः' इति पाठः स्वीकृत इति भाति। अयं च पाठो मञ्जूषायां सुबर्थविचार उपलभ्यते।

[7] कृच्छब्दस्येत्यर्थः।

[8] १.१.२३. सूत्रे महाभाष्येऽयं न्याय उक्तः।

[9] परिभाषा नाश्रीयत इति — अ.

[10] पा. सू. ३.३.१११.

[11] प्रदीपे 'ण्यर्थस्य प्राधान्यात्' इत्यत्र 'ण्यर्थप्राधान्यात्' इत्यन्नंभट्टपाठ इति भाति।

[12] कर्तृत्वमप्येति — ऋ.

[13] परिभाषा १०६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

स्यात् तदा भिन्नकक्ष्ययोर्युगपदभिधातुमशक्यत्वात् प्राधान्यं विनिगमकं भवेत् । शब्दभेदात्तु न तदपीत्याह — **भिन्नेति**। [1]तद्धितनिवृत्तिस्तु कृद्ग्रहणस्य प्रयोजनं [2]स्थितमित्याह — **तद्धितेति** ॥

[२, ८३१–८३६]

(रत्नप्रकाशः) **लप्रयोगे नेतीति**। लादेशप्रयोगे नेतीत्यर्थः। **कृतो ये कर्तृकर्मणी इति**। कृदन्तवाच्यक्रियाया ये कर्तृकर्मणी इत्यर्थः। **अन्यस्येति**। तद्धितस्येत्यर्थः। तमर्थमजानन्नाह — **नैतदस्तीति**। **धातोर्हीति**। धातुवाच्या क्रिया, क्रियां प्रत्येव कर्तृकर्मणी भवतो नान्यस्येति भावः। **वक्ष्यतीति**। [3]'न लोकाव्यय' इति सूत्रेणेति शेषः। **उच्चैः कटानां स्रष्टेति**। उच्चैः-शब्दार्थान्वयात् कटानामव्ययसंबन्धिकर्मत्वमिति मन्यते। **कृत एते इति**। कृदन्तसंबन्धिनी एते इत्यर्थः। तत्र कर्ता तृच्प्रत्ययवाच्यः। कर्म तु तृच्प्रकृतिभूतसृज्यर्थान्वितमिति भावः। **नाव्ययस्येति**। उच्चैःशब्दस्येति शेषः। तर्ह्यव्ययार्थस्य कटैः कः संबन्ध इत्यत आह — **अधिकरणमत्राव्ययमिति**। अत्र वाक्येऽव्ययार्थ उन्नतप्रदेशः सर्जनक्रियायाः कटद्वाराधिकरणमित्यर्थः। **कृतो ये इति**। एकस्यैव कृदन्तस्य ये इत्यर्थः। **ब्राह्मणानां च प्रादुर्भाव इति**। तेषां तत्र समागम इत्यर्थः। **अथेति**। कृतीत्येकत्वस्य सामान्यापेक्षयोपपत्तेरिति भावः। **उभयोः प्राप्तिर्यस्मिन्निति**। एवं च कृतीत्यत्रैकत्वस्य सामान्यापेक्षत्वेऽपि प्रकृतबहुव्रीहावेकत्वस्य व्यक्त्यभिप्रायेण विवक्षणान्न दोष इति भावः। नन्वेवमेव सिद्धे कृतीत्यनर्थकमेव, अन्यपदार्थविशेषसमर्पकपदाभावेऽपि बहुव्रीह्याश्रयणसंभवादित्यत आह — **अथवेति**। **कृतपूर्वी कटमिति**। कर्मणोऽविवक्षायामकर्मकत्वाद् भावे क्ते कृतमिति जाते तस्य कृतं पूर्वमनेनेत्यर्थे मयूरव्यंसकादित्वात् पूर्वशब्देन समासे ततः [4]'पूर्वादिनिः, [5]'सपूर्वाच्च' इतीनिप्रत्यये कृतपूर्वीति शब्दः सिद्धः। तस्य पूर्वं कृतवानित्यनेन पर्यायता भवति। तत्र 'किं कृतवान्' इत्यत्रेव कर्माकाङ्क्षायां 'पूर्वं कटं कृतवान्' इतिवत् कृतपूर्वी कटमिति कर्मान्वयो भवति। ननु कर्माविवक्षायां क्ते सति निष्पन्नस्य कृतशब्दस्य पुनः कर्मान्वयस्वीकारे 'पूर्वं कटं कृतमनेन' इत्यपि प्रयोगः स्यादिति चेन्न, भाष्यकारवचनबलेन 'कृतपूर्वी कटम्' इत्येवंजातीयप्रयोगाभ्युपगमेऽप्यसमस्तकृतशब्देन सह कर्मवाचकपदप्रोगस्य स्वीकारे मानाभावात्। अन्यथाकर्मकेभ्यो भावे लादिविधिवैयर्थ्याच्च। इदानीं कश्चिन्मन्दबुद्धिः कृतशब्दस्तत्र कर्मक्तान्त इति मन्यमान आह — **ननु चेति**। **वाक्येनेति**। पूर्वं कृतः कटोऽनेनेत्येवंरूपेण पदचतुष्टयात्मकेन वाक्येनैवानेन 'कृतपूर्वी कटम्' इति शब्देन योऽर्थो विवक्षितस्तदर्थकेन भवितव्यम्, न तु 'कृतपूर्वी कटम्' इति पदद्वयात्मकेनेति भावः। कुतस्तेन न भवितव्यमित्यपेक्षायामाह — **तत्रेति**। 'कृतपूर्वी कटम्' इत्यत्रेत्यर्थः। [6]**न भवितव्यमिति**। कटशब्दादिति शेषः। **क्तेनाभिहितमिति**। कटरूपमिति शेषः। तथा च तत्र षष्ठ्याः प्रसङ्ग एव नास्ति, यद्वारणाय कृतीति स्यादिति भावः। **सापेक्षमिति**। कृतपूर्वशब्दस्य कटमिति कर्मसापेक्षत्वात् तत इनिर्न स्यादिति भावः। एतेन "'कृतः पूर्वं कटोऽनेन' इति विवक्षायां कटापेक्षत्वात् तद्धितेन न भाव्यमित्यर्थः" इति निरस्तम्। कृतपूर्वशब्दात् सिद्धान्त इनेः क्रियमाणत्वेन पूर्वशब्दाद्वा कृत-

---

[1] तद्धिते षष्ठीनिवृत्तिरित्यर्थः ॥ तद्धितानिवृत्तिस्तु — अ.

[2] स्थिरमित्याह — ऋ.

[3] पा. सू. २. ३. ६९.

[4] पा. सू. ५. २. ८६.

[5] पा. सू. ५. २. ८७.

[6] 'न भवितव्यम्' इत्यतः प्राक् 'किम्'-इत्यधिकम् — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शब्दाद्वेर्निराकरणस्यासंवद्धप्रलापत्वात्। 'योऽसौ' इत्युत्तरभाष्याननुगुणत्वाच्च। **उत्पन्ने प्रत्यय इति।** कृतपूर्वशब्दादिनाविति शेषः। **'निर्वर्तत इति।** प्रकटीभवतीत्यर्थः। यथेदं तथा निर्दर्शितं प्राक्। **अस्ति च करोतेरिति।** कृतपूर्वीशब्दघटककरोतिवाच्यस्येत्यर्थः। **कटेनेति।** तेनान्वये तस्य कर्मत्वसंपादनेनेति भावः। **सामर्थ्यमिति।** संवन्धिशब्दत्वादिति शेषः। **वाक्यं चेति।** कटं कृतपूर्वमनेनेति रूपम्, इनिप्रत्ययश्चेति भावः। **यदा वाक्यमिति।** अत्र वाक्यप्रयोगे न तात्पर्यम्, तस्येनिप्रत्ययं विनासाधुत्वात्[2]। किं त्विनिप्रत्ययात् पूर्वं कटशब्दासहित एव कृतपूर्व-शब्द इनिप्रत्ययप्रकृतित्वेन संबध्यत इत्यत्र। यथेदं तथोक्तं प्राक्। **यदा प्रत्ययः सामान्येनेति।** कर्माविवक्षायां **सामान्येन** कारकनैरपेक्ष्येण, भावे क्तप्रत्ययः, तदा तस्य क्तान्तस्य पूर्वशब्देन सह **वृत्तिः समासः,** ततस्तत्समासादिनिर्भवति। तत इन्यन्तस्य कर्माकाङ्क्षायां कटमिति पदं संबध्नातीति पदसंस्कारपक्ष एवात्राश्रयणीय इति भावः। एतेन 'कर्मसामान्ये क्तप्रत्यये तदन्तस्य पूर्वशब्देन समासे तत इनिः' इति निरस्तम्। तस्मिन् पक्षे कटशब्दाद् द्वितीयाया दुर्लभत्वापत्तेः। 'कृतः कटो भीष्म उदारः' इत्यादौ हि क्तेन कर्मसामान्यस्योक्तत्वेन कटादिभ्यो द्वितीया न भवतीति भगवता [3]प्रागुक्तम्। यत्तूक्तं हरिणा — [4]'विशेषकर्मसंबन्धे [5]निर्भुक्तेऽपि कृतादिभिः। विशेष-निरपेक्षोऽन्यः कृतशब्दः प्रवर्तते॥ अकर्मकत्वे सत्येवं क्तान्ते भावाभिधायिनि। ततः क्रियावता कर्त्रा योगो भवति कर्मणाम्॥ अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः। क्रिया संबध्यते तद्वत् कृतपूर्व्यादिषु स्थिता॥ इति। तत्तु कर्मणोऽविवक्षायां भावे क्ते सति तदन्तस्य पूर्वशब्देन समासे तत इनि तदन्तेनोपस्थितविशिष्टार्थघटकक्रियायां कटादिकर्मणामन्वय इत्येतत्तात्पर्यकमेव, न तु कर्मक्तान्तस्य पूर्वशब्देन समासे जात इत्याद्यभिप्रायकं च। उभयथा व्याख्याने मानप्रयोजनयोर-भावात्। समीचीनं कृत्पदव्यावर्त्यमुक्त्वापि प्रौढिमाश्रित्यान्यदपि कृत्पदप्रयोजनं वक्तुं शक्यत इत्याह — **अथवेति।** **कर्तृभूतपूर्वमात्रादिति।** स्वतन्त्रभूतपूर्वादित्यर्थः। करोतीति **कृत्** कर्ता। तथा च गुणभूतेऽपि कर्तरि षष्ठी यथा स्यादित्येवमर्थं द्वितीयं कर्तृवाचकं कृदिति पदमिति भावः। **भेदिकेति।** [6]'पर्यायार्हर्णोत्पत्तिषु' इति ण्वुच्। तत्र प्रयोजककर्ता आख्यातार्थत्वात् प्रधानम्, प्रयो-ज्यस्त्वप्रधानम्। [7]'प्रधानाप्रधानन्यायः कारकविषये नाश्रीयते [8]"साधकतमं करणम्' इति तमग्रहणा-दिति प्रागेव प्रपञ्चितमिति तद्धितव्यावृत्तिरेव कृद्ग्रहणप्रयोजनमिति तत्त्वम्॥

उभयप्राप्तौ कर्मणि २. ३. ६६.

[२, ८३६]

(उद्द्योतनम्) ननु [9]'षष्ठीप्रतिषेधे' इत्ययुक्तम्, सूत्रे नञ्भावात्, अत आह — **नियमेनेति।**

---

[1] भाष्ये 'उत्पन्ने प्रत्यये निवर्तते' इत्यत्र 'उत्पन्ने प्रत्यये निर्वर्तते' इति पाठो रत्नप्रकाशकृदभि-मतः। अयं पाठो निर्णयसागरमुद्रितेऽधो निर्दशितः।

[2] असाधुत्वादिति छेदः।

[3] अनभिहित इति सूत्र इति भावः।

[4] वाक्यपदीयम् ३. १४. ६५.

[5] निर्मुक्तेऽपि — ब.

[6] पा. सू. ३. ३. १११.

[7] परिभाषा १०६.

[8] पा. सू. १. ४. ४२.

[9] भाष्ये 'षष्ठ्याः प्रतिषेधे' इति दृश्यते। तत्र 'षष्ठीप्रतिषेधे' इति समस्ततयात्रंभट्टपाठ इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कर्मण्येवेति परिसंख्यायाः कर्तरि षष्ठीनिषेधफलकत्वादित्यर्थः। 'शेषे विभाषा' इत्यस्य व्याख्याद्वयमाह — 'अत्रेति ॥

[२, ८३६]

(रत्नप्रकाशः) षष्ठ्याः प्रतिषेध इति। नियमविधेर्निषेधमुखेन प्रवृत्तिरित्याशयेनैवमुक्तम्। अकादीति। आदिशब्देन प्रकारार्थेन स्त्रीप्रत्ययानां ग्रहणम्। तन्मतमयुक्तमित्याशयेनाह — अपर आहेति। अकाकारयोरिति। अकारः [२]'अ प्रत्ययात्' इति विहितः। शेषे विभाषेति। अकाकारव्यतिरिक्ते स्त्रीप्रत्यय इत्यर्थः। तथैवोदाहरति — शोभना खल्विति। 'एतेन 'अकाकारवर्जिते प्रत्ययमात्रे विभाषेत्यर्थः' इति निरस्तम्। 'उभयप्राप्तौ कर्मणि षष्ठ्याः' इति स्त्रीप्रत्ययमात्रविषयकपूर्ववार्तिकस्वरसेनात्रत्यभाष्योदाहरणस्वरसेन 'अकाकारयोः प्रयोगे न' इत्ति पृथङ्निषेधाश्रयणस्वरसेन च शेषशब्दस्याकाकारभिन्नस्त्रीप्रत्ययपरताया एव न्याय्यत्वात्। अन्यथा 'अनकाकारे कर्तरि वा' इत्येव लाघवेनैकवाक्यतयोक्त्वा प्रकृतसूत्रस्यैव निराकरणीयत्वेन वाक्यभेदेन गौरवाश्रयणानर्थक्यापत्तेश्च ॥

क्तस्य च वर्तमाने २. ३. ६७.

[२, ८३७–८३८]

(उद्द्योतनम्) ननु [३]'कर्तृकर्मणोः' इत्येव सिद्धा षष्ठी, किं वचनेन, अत आह — तत्रच्छात्रस्येति। अविवक्षयेति। कारकाणां विवक्षावशात् [४]स्वानुरूपविभक्त्युत्पादकत्वेनाविवक्षितमविद्यमानप्रायमित्यर्थः। अत्र विवक्षितमाह — संबन्धित्वेति। न तु कर्तृत्वमित्यर्थः। तदेवाह — छात्रस्येति। 'उत्तरत्र' इत्येतदुत्तरसूत्रपरमित्याह — अधिकरणेति। अधिकरणे क्त इति। [५]'क्तोऽधिकरणे च' इत्यनेन। भावे क्त इति। [६]'नपुंसके भावे क्तः' इत्यनेन। कर्तरीति। [७]'गत्यर्थाकर्मक' इत्यनेन। [८]अत्र किमनिष्टं [९]चोद्यते, अत आह — तत्रेति। अहेः सृप्तं ग्रामस्य पार्श्वं इत्यत्राहिशब्दादित्यर्थः। 'अत्र क्तस्याधिकरणवाचित्वाभावात् [१०]'अधिकरणवाचिनश्च' इत्यनेनाप्राप्तेराह — शेषेति। परिहार इति। शेषविवक्षयात्र षष्ठीष्यत एवेत्यर्थः। 'ग्रामस्य पार्श्वे' [११]इत्यस्य प्रयोजनमाह — ग्रामस्येति। अन्यथा क्तेनोक्तत्वादधिकरणस्य[१२] पार्श्वशब्दात् प्रथमा स्यादित्यर्थः ॥

---

[१] प्रदीपे 'अकाकारव्यतिरिक्त' इत्यत्र 'अत्राकाकारव्यतिरिक्त' इत्यन्नंभट्टपाठ इति भाति। तत्रेति — ऋ.

[२] पा. सू. ३. ३. १०२.

[३] पा. सू. २. ३. ६५.

[४] स्वरूपानुरूप — अ.

[५] पा. सू. ३. ४. ७६.

[६] पा. सू. ३. ३. ११४.

[७] पा. सू. ३. ४. ७२.

[८] तत्र — ऋ.

[९] चोत्पद्यते — अ.

[१०] पा. सू. २. ३. ६८.

[११] इत्यत्र — ऋ.

[१२] अधिकरणत्वस्य — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८३७–८३८]

(रत्नप्रकाशः) **छात्रस्य हसितमिति**। [1]'न लोकाव्ययनिष्ठा' इति प्रतिषेधे प्राप्ते पुनर्वचनं षष्ठ्यर्थम्। **शेष इति**। संबन्ध[2]सामान्यमित्यर्थः। **उत्तरत्रेति**। [3]'अधिकरणवाचिनश्च' इत्यत्र। इदमहेः **सुप्तमिति**। अत्राधिकरणे क्तः, तेनाभिहितमधिकरणमितीदंशब्दात् प्रथमा। अहिशब्दात् [4]'अधिकरणवाचिनश्च' इति षष्ठी। **इहाहिना सुप्तमिति**। इह भावे क्तः। अहिनेति कर्तरि तृतीया। **इहाहिः सुप्त इति**। अत्र कर्तरि क्तः। तेनाभिहितत्वात् [5]तस्याहिरिति प्रथमा। **इहाहेः सुप्तमिति**। अत्र भावे क्तः। तद्द्योतिका 'इह' इति सप्तमी। अहेरिति शेषे षष्ठी। उत्तरमाह — **इष्यत इति**॥

न लोकाव्ययनिष्ठाखलर्थतृनाम् २. ३. ६९.

[२, ८३८–८४०]

(उद्द्योतनम्) 'सल्लिड्ग्रहणम्' इत्येव वक्तव्ये 'लादेशे' इति किमर्थमुक्तम्, अत आह — **लग्रहणमिति**। तत्स्थान इदं कर्तव्यमिति द्योतनार्थमित्यर्थः। न्यासान्तर इष्टसिद्धिमाह — **तत्रेति**। **लिड्ग्रहणेनेति**। [6]'लिटः कानज्वा' [7]'क्वसुश्च' इति विहितौ। लकारमात्रस्य प्रयोगाभावेन सामर्थ्यात् तदादेशो ग्राह्यो निषेधस्य [8]प्रसक्त्यपेक्षत्वात् तस्याश्च कृतप्रयोग एव भावात् कानच्क्वसू एव गृह्येते इति भावः। किकिनोर्ग्रहणमाह — **लिट्संज्ञेति**। [9]'आदृगमहनजनः किकिनौ लिट् च' इति तयोर्लिट्संज्ञा [10]विधीयते, लकारविशेषस्य तु लिट्संज्ञा वैयाकरणानां प्रसिद्धा, अविशेषाद् द्वयं गृह्यत [11]इति भावः। यथान्यासे किकिनोरग्रहणमाह — **लग्रहणे त्विति**। लादेशत्वाभावादित्यर्थः। लिड्भावोऽङ्गीक्रियते, न तु लादेशत्वम्, अत आह — **लिट्कार्येति**। लादेशशब्दो गौण इत्यर्थः। ननु वक्तव्यवादिनो बाढमित्येवमङ्गीकारो न युक्तः, अत आह — **परस्त्विति**। लादेशत्वे सति न[12] वक्तव्यं स्यात्, तच्च नास्तीति वक्तव्यमावश्यकमिति मत्वाहेत्यर्थः। अपूर्ववतिप्रक्षेपशङ्कां वारयति — **व्याख्यास्यामीति**। ननु लिट्कार्यातिदेशो लकारमात्राश्रितषष्ठीनिषेधः कथं स्यात्, अत आह — **विशेषातिदेश इति**। ननु [13]'लिट् च' इति संज्ञाविधानमित्युक्तम्, तत्र वार्तिकं कर्तव्यमेव, अत आह — **तदत्रेति**। इष्णुच्संग्रहार्थमाह — **उकारान्तेति**। निष्ठादिसाहचर्यादुकारेण प्रत्ययविशेषणादुकारान्तप्रत्ययलाभ इत्यर्थः। तद्दर्चुप्रत्ययस्य कथं ग्रहणम्, अत आह — **उप्रत्ययोऽपीति**। नन्वेवं 'ल उ उक' इति स्थिते प्रथमोपस्थितयोरकारोकारयोर्गुणेऽवादेशे च 'लवुक' इति निर्देशः स्यात्, तथा च कथमुकारप्रश्लेषः, अत आह —

---

[1] पा. सू. २. ३. ६९.
[2] सामान्य इत्यर्थः — व.
[3] पा. सू. २. ३. ६८.
[4] पा. सू. २. ३. ६८.
[5] कर्तुरित्यर्थः।
[6] पा. सू. ३. २. १०६.
[7] पा. सू. ३. २. १०७.
[8] प्रसक्त्यपेक्षितत्वात् — ऋ.
[9] पा. सू. ३. २. १७१.
[10] 'विधीयते' इत्यादि 'लिट्संज्ञा' इत्यन्तं नास्ति — अ.
[11] इत्यर्थः — अ.
[12] 'न' इति नास्ति — अ.
[13] पा. सू. ३. २. १७१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

उश्चेति। **अन्यथा** सर्वेषां युगपद्द्वन्द्वे। क्वचिदेतत्संग्राहकः 'उकारस्य' इत्यादिश्लोकः पठ्यते, तत्र **परे** परस्तात्। 'प्रतिषेधो न प्राप्नोति' इत्यत्र हेतुः — [1]**एतेषामिति**॥

[२, ८३८–८४०]

(**रत्नप्रकाशः**) **लादेशे सल्लिङ्ग्रहणमिति**। लादेशसमर्पकं लग्रहणमपनीय सल्लिङ्ग्रहणं कर्तव्यमित्यर्थः। तत्र सच्छब्देन शतृशानचोर्ग्रहणम्, लिट्शब्देन तु क्वसुकानचौ किकिनौ च, [2]"किकिनौ लिट् च' इति हि तयोर्लिट्संज्ञा विहिता। लग्रहणे तु लादेशानामेव ग्रहणं स्यात्, न तु किकिनोः, तयोरलादेशत्वादिति[3] भावः। [4]"लिट् च' इत्यनेन लिड्व्यपदेशातिदेशः क्रियत इत्याशयेनाह — **अथ ताविति**। लादेशत्वमेव तयोर्दुर्लभमिति मन्यमान आह — **बाढमिति**। **लिड्वदिति**। लिट्शब्दो यं व्यपदेशं लभते तं व्यपदेशं किकिनौ लभेते इति व्याख्यास्यामीति भावः। तथा च लिट् 'ल' इति व्यपदेशं लभत इति प्रकृतसूत्रस्थेन लग्रहणेन शत्रादीनामिव किकिनोरपि ग्रहणं सिध्यति। एतेन [5]"लिड्वत्कार्यातिदेशात् सिद्धम्' इति निरस्तम्। प्रकृतसूत्रेण क्रियमाणस्य षष्ठीनिषेधस्य लिट्कार्यत्वाभावात्। 'अथ तौ लादेशौ स्याताम्' इति भाष्यस्वरसमङ्गाच्च। लादेशशब्दो हि लव्यपदेशपरः। **उकारप्रयोग इति**। [6]"सनाशंसभिक्ष उः' इत्युप्रत्ययान्तप्रयोगे नेति वाच्यमित्यर्थः। एतेन 'उकारान्तप्रत्ययप्रयोग इत्यर्थः। उप्रत्ययोऽपि चान्तवद्भावाद्गृह्यते' इति निरस्तम्। [7]"प्रत्ययग्रहणे नाप्रत्ययस्य' [8]"सहचरितासहचरितयोः सहचरितस्यैव ग्रहणम्' इति परिभाषाभ्यामुकारशब्देनोप्रत्ययरूपस्यैव वर्णस्य निर्देश इत्यङ्गीकर्तुमुचितत्वात्। 'नरकस्य जिष्णुः' इत्यत्र [9]षष्ठ्या एवाङ्गीकर्तुमुचितत्वाच्च। **उ उक ऊकेति**। उश्च उकश्चेति द्वन्द्वं कृत्वा पश्चात् लश्च ऊकौ चाव्ययं चेत्यादिरूपेण सर्वेषां द्वन्द्व आश्रयणीयः। लश्च उश्च उकश्चेत्यादिरूपेण द्वन्द्वेऽभ्युपगम्यमाने तु परं सवर्णदीर्घं [बाधित्वा] नित्यत्वादन्तरङ्गत्वाच्चाद्गुणेऽवादेशे च 'लवुकाव्यय' इत्यादिरूपं स्यादिति भावः। **पुरा सूर्यस्योदेतोरिति**। सूर्योदयात्पूर्वमित्यर्थः। एवमुत्तरयोर्वत्सापाकरणात् पूर्वम्, क्रूरविसर्पणात्पूर्वमिति चार्थः। सुगममन्यत्॥

अकेनोर्भविष्यदाधमर्ण्ययोः २. ३. ७०.

[२, ८४०–८४१]

(**उद्द्योतनम्**) वचनस्य प्रयोजनमाह — **यथासंख्येति**। यथासंख्यसूत्रे स्वरितेनेत्यपकृष्य यत्र [10]"स्वरितत्वप्रतिज्ञा तत्रैव यथासंख्यम्, यत्र न तत्प्रतिज्ञा न तत्र यथासंख्यं [11]"स्तोः श्चुना श्चुः' इत्यादाविति स्थितम्। एवं चात्र स्वरितत्वप्रतिज्ञानाभावादेव यथासंख्यं न भविष्यति, किं वच-

---

[1] तेषामिति — अ, ऋ.
[2] पा. सू. ३. २. १७१.
[3] लादेशत्वाभावादित्यर्थः।
[4] पा. सू. ३. २. १७१.
[5] अर्थानुवादोऽयम्।
[6] पा. सू. ३. २. १६८
[7] परिभाषा १११. अर्थानुवादोऽयम्।
[8] परिभाषा ११२.
[9] कर्मणि षष्ठ्या इत्यर्थः। अत्र शेषषष्ठीति कौमुद्यामुक्तम्।
[10] स्वरितत्वं प्रतिज्ञायते तत्रैव — अ.
[11] पा. सू. ८. ४. ४०.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नेन, अत आह — **स्वरितत्वेति**। 'नन्वेवमकस्याप्यर्थद्वये[१] निषेधः स्यात्, भविष्यत्येवेष्यते, तद् वचनं विना न संभवति, अत आह — **अकस्य त्विति**। भविष्यत्येव [३]'तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम्' इति ण्वुल् विधीयते, नाधमर्ण्य इति तत्रैव प्राप्ता षष्ठी निषिध्यते। इनस्तूभयत्र विधानमित्युभयत्र प्राप्ता निषिध्यत इति नार्थो वचनेनेत्यर्थः। ननु [४]'गत्यर्थ'सूत्रे द्वितीयाग्रहणं 'ग्रामं गन्ता' इत्यादौ षष्ठीबाधनार्थमित्युक्तम्, तथा च 'ग्रामं गमी' इत्यादावपि तत एव षष्ठ्यभावोपपत्तेर्नात्रोदाहरणत्वं युक्तम्, अत आह — **गत्यर्थेति**। **नाभिमतमिति**। तत्र भाष्यकारेणानुक्तत्वादत्रैतदुदाहरणान्चेति भावः[५]॥

[२, ८४०–८४१]

(रत्नप्रकाशः) यथासंख्यवारणायाह — **अकस्येति**। **भविष्यतीति**। आधमर्ण्ये हि तस्य विधानं नास्ति। **शतं दायीति**। [६]'आवश्यकाधमर्ण्ययोः' इति णिनिः। **ग्रामं गमीति**। [७]'भविष्यति गम्यादयः' इत्युक्तेर्भविष्यति गमेरिनिः। एतद्भाष्यविरोधात् [८]'गत्यर्थकर्मणि' इत्यत्र 'चतुर्थी वा' इत्येव सिद्धे द्वितीयाग्रहणं कृद्योगलक्षणषष्ठीबाधनार्थं ग्रामं गन्तेतीति वदन्तो निरस्ताः॥

कृत्यानां कर्तरि वा २. ३. ७१.

[२, ८४१–८४२]

(उद्द्योतनम्) [९]भाष्ये **गेय इति**। गायतीति गेयः, [१०]'भव्यगेय' इति कर्तरि कृत्यः। साम्नामित्यत्र कर्मणि [११]षष्ठीनिषेधार्थं कर्तरीत्युक्तमित्यर्थः। 'द्वौ नञौ' इति न्यायेनाभिहितमित्यर्थः स्यात्, स च प्रकृतानुपयुक्तः, अत आह — **काक्वेति**। [१२]कर्मणोऽनभिधानमुपपादयति — **कृषेरिति**। **तन्निवृत्त्यर्थं** ग्राममित्यत्र षष्ठीनिवृत्त्यर्थम्। अनेन सूत्रेण कर्तृग्रहणात् षष्ठ्यभावेऽपि [१३]'कर्तृकर्मणोः' इत्यनेन कस्मात् षष्ठी न भवतीत्यत आह — भाष्ये **एवं तर्हीति**। तद्व्याचष्टे — **कृत्यानामिति**। एकस्मिन् [१४]कृत्य उभयप्राप्त्यभावात् 'उभयप्राप्तिरेव' इत्ययुक्तम्, अत आह — **पर्यायेणेति**। समाधानतात्पर्यमाह — **बहुव्रीहीति**। तथा च 'गेयो माणवकः साम्नाम्' इत्यत्रैकस्मिन् कृत्य उभयप्राप्त्यभावान्न षष्ठीनिषेध इति भावः॥

इति श्रीमहाभाष्यप्रदीपोद्द्योतने द्वितीयाध्यायस्य तृतीयपादे तृतीयमाह्निकम्॥

॥ इति तृतीयः पादः॥

---

[१] नन्वेवमेकस्यापि — अ, ऋ.
[२] द्वयनिषेधः — अ.
[३] पा. सू. ३. ३. १०.
[४] पा. सू. २. ३. १२.
[५] 'अत्र' इत्यादि 'भावः' इत्यन्तं नास्ति — अ.
[६] पा. सू. ३. ३. १७०.
[७] पा. सू. ३. ३. ३.
[८] पा. सू. २. ३. १२.
[९] भाष्ये 'गेय इति' इत्यादि 'काक्वेति' इत्यन्तं नास्ति — अ.
[१०] पा. सू. ३. ४. ६८.
[११] षष्ठीविकल्पाभावार्थमित्यर्थः।
[१२] अत्रैतदुपपादयति — अ.
[१३] पा. सू. २. ३. ६५.
[१४] कृत्युभय — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८४१–८४२]

(रत्नप्रकाशः) कर्तृग्रहणप्रयोजनकथनवार्तिकमवतारयति — **कर्तृग्रहणमिति** । भव्यादिकर्मव्यावर्तनार्थं कर्तृग्रहणं न युज्यते, 'ग्राममाक्रष्टव्या शाखा देवदत्तेन' इत्यादौ कर्तर्यपि षष्ठ्या अनिष्टत्वेनोभयप्राप्तौ कृत्यानां योगे उभयत्र षष्ठ्याः प्रतिषेधनीयत्वादित्याशयेनाह — **किमुच्यत इति** । **नेहापीति** । [1]हेतावत्र नञ्, इहापि हीत्यर्थः । **आक्रष्टव्या ग्रामं शाखेति** । देवदत्तेनेति शेषः । तदेवं वार्तिके निरस्ते समाधत्ते भगवान् — **एवं तर्हीति** । **षष्ठी न भवतीति** । विनिगमनाविरहादुभयत्र निषेधः । **कर्तरि वेति** । देवदत्तस्य देवदत्तेन वा कर्तव्यमित्याद्युदाहरणम् । **उभयप्राप्तिरेवेति** । कर्मकर्तृवाचकयोरुभयोः प्रयोगस्य सत्त्वादिति भावः । परिहरति — **उभयप्राप्तिर्नामसेति** । **युगपत्प्रसङ्ग इति** । षष्ठ्या इति शेषः । एतेन [2]'अथ शब्दानुशासनम्' इत्यादौ कर्तृवाचकपदाभावेऽपि [3]'उभयप्राप्तौ कर्मणि' इति नियमस्य प्रवृत्तिमङ्गीकुर्वन्तो निरस्ताः । प्रकृतभाष्यविरोधात् ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्य-
श्रीशिवरामेन्द्रसरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
द्वितीयस्याध्यायस्य तृतीये पादे तृतीयमाह्निकम् ॥

॥ समाप्तस्तृतीयश्चरणः ॥

---

[1] अव्ययानामनेकार्थत्वादित्याशय इति भाति । [2] महाभाष्यारम्भः । [3] पा. सू. २. ३. ६६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य चतुर्थपादे प्रथममाह्निकम्

द्विगुरेकवचनम् २. ४. १.

[२, ८४३–८४६]

(उद्द्योतनम्) सूत्रारम्भाक्षेपपरः प्रश्न इत्याह — **इहेति**। **तत्संख्याश्रयं** तत्संख्याप्रतिपादकम्। उदाहरणे योजयति — **पञ्चपूलीति**। पञ्च पूलाः समाहृता इति समाहारशब्देन सामानाधिकरण्यम्। [1]तत्कथनस्य प्रयोजनमाह — [2]**अनेनेति**। भावसाधनत्वे वैयधिकरण्यमाह — **भावेति**। ननु 'समाहारः' इत्येकवचनान्तप्रतिपाद्यस्यापि समाहारस्य संख्यासामानाधिकरण्यमस्तीति न तत् कर्मसाधनत्वे प्रमाणम्, अत आह — **संख्याशब्देनेति**। तथा च पञ्चशब्दस्य समाहारशब्दसामानाधिकरण्यं कर्मसाधनत्वं विना न संभवतीत्यर्थः। व्याख्यानप्रयोजनमाह — **तेनेति**। भाष्ये **अस्य** समाहारशब्दस्य। [3]**पारिभाषिकस्येति**। 'सु अम् टा' इत्यादेरित्यर्थः। [4]'कर्मणि च येन संस्पर्शात्' इत्यत्र कर्मणीत्यस्योपपदत्वात् कर्मणि [5]विशेषविध्यभावादाह — **कृत्येति**। पदार्थमुक्त्वा वाक्यार्थमाह — **एकस्येति**। **उच्चार्यत इति**। उच्यत इति वचनमित्यत्र वचिरुच्चारणार्थ इत्यर्थः। नन्वनेन द्विग्वर्थ एवैकवदिति कथं लभ्यते, अत आह — **तत्रेति**। सामर्थ्यमेवाह — **यो हीति**। [6]द्विगोरपीत्यपिनानुप्रयोगं समुच्चिनोति। 'एकशेषप्रतिषेधश्च' इत्ययुक्तम्, पञ्चपूल्य इत्येकशेषस्येष्टत्वात्, अत आह — **एकशेषविषय इति**। प्रसक्तिपूर्वत्वात् प्रतिषेधस्य प्रसक्तिमाह — **अत्रैकशेषे कृत इति**। शिष्यमाणस्य द्विगुत्वादित्यर्थः। ननु शिष्यमाणस्य वचनभेदेऽपि[7] द्विगुत्वानपायात् तदर्थोऽपि द्विग्वर्थ एव, अत आह — **बहिरङ्गत्वादिति**। शिष्यमाणस्य समुदायार्थत्वमेकशेषसापेक्षम्, प्राथमकल्पिकस्य तु तन्निरपेक्षत्वादन्तरङ्गत्वादित्यर्थः। ननु प्रतिलक्ष्यं लक्षणावृत्तेर्बहिरङ्गेऽपि प्रवर्तताम्, अत आह — **प्राथमकल्पिक इति**। वचनभेदेऽपि [8]शब्दस्यैकत्वात् पूर्वमन्तरङ्गाश्रयेण प्रवृत्तं शास्त्रं पुनर्न प्रवर्तत इत्यर्थः। **संस्कृतेति**। [9]'संस्कृतं भक्षाः' इत्यनेन। पञ्चसु कपालेषु [10]संस्कृतः पञ्चकपालः, पञ्चकपालश्च पञ्चकपालश्च पञ्चकपालश्च पञ्चकपाला इति वा विवक्षितम्, पञ्चसु कपालेषु संस्कृताः पञ्चकपाला इति वा। आद्य आह — **यदीति**। द्वितीय आह — **अथेति**। भाष्ये 'अथ' इत्यनेन द्वितीयकल्पमनूद्य तद्-

---

[1] तत्करणस्य — ऋ.

[2] प्रदीपे 'एतेन कर्मसाधनत्वम्' इत्यत्र 'अनेन कर्मसाधनत्वम्' इत्यन्नंभट्टपाठ इति भाति।

[3] प्रदीपे 'पारिभाषिकैकवचनाश्रयेण' इत्यत्र 'पारिभाषिकस्यैकवचनस्याश्रयेण' इत्यन्नंभट्टपाठ इति भाति।

[4] पा. सू. ३. ३. ११६.

[5] विशेषे विध्यभावादाह — अ.

[6] प्रदीपे 'प्रयुज्यमानस्याद्विगोरपि' इत्यत्र 'प्रयुज्यमानस्य द्विगोरपि' इति पाठश्चौखाम्बामुद्रिते समुपलभ्यते। सोऽन्नंभट्टस्वीकृतः।

[7] अपिशब्दो नास्ति — अ.

[8] शब्दैक्यात् — अ.

[9] पा. सू. ४. २. १६.

[10] 'संस्कृतः' इत्यस्यानन्तरं 'पुरोडाशः' इत्यधिकम् — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

दूषणार्थत्वेन 'न वा' इति वार्तिकमवतार्य [1]'नैतत्' इत्यनेन व्याख्यातम्। तद्व्याचष्टे — **तदा तेषामिति**। भाष्ये 'नैतत्' इत्येतच्छब्देन समुदायव्यावृत्तिर्विवक्षिता। एकत्वशब्देन लक्षणया ग्रहणं विवक्षितम्। तथा च समाहारग्रहणादपि समुदायव्यावृत्तिर्न संभवतीत्यक्षरसाङ्गत्यमभिप्रेत्याह — **क्रियमाण इति**। 'एवं तर्हि' इति समाधानभाष्यं व्याचष्टे — **न हीति**। सूत्रप्रत्याख्यानपरं व्याख्यानान्तरमित्याह — **न वेति**। ननु कर्मसाधनसमाहारपक्षे सूत्रं विना कथमेकवद्भावसिद्धिः, अत आह — **अयं भाव इति**। **न कर्तव्यमिति**। तद्धितार्थस्थले तिरोहितावयवभेदसमुदायस्य द्विग्वर्थत्वाभावादेवैकवचनाप्रसक्तिरित्यर्थः। ननूद्भूतावयवभेदसमुदायस्य द्विग्वर्थत्वे सूत्रं कर्तव्यमेव, अत आह — **क्रियमाणे त्विति**। ननु क्रियमाणेऽपि समाहारग्रहणे न तन्निवृत्तिः सिध्यतीत्युक्तम्, अत आह — **तेनेति**। समाहारे द्विगुरिति विहितो द्विगुः समाहारेण व्यपदिश्यते, नान्य इत्यतिप्रसङ्गाभावः। तद्धितार्थव्यावृत्तेः प्रयोजनमाह — **तेनेति**। **पञ्चगव इति**। [2]'तेन क्रीतम्' इति ठक्। तस्य [3]'अध्यर्धपूर्व' इति लुक्। ननु पञ्चपूल्य इत्यत्रेव पञ्चगव इत्यत्राप्येकशेषप्रतिषेधेनैव व्यावृत्तेः समाहारग्रहणं न कर्तव्यम्, अत आह — **यदा बहूनामिति**। तथैव विग्रह उक्तः पञ्चभिर्गोभिः क्रीता इति। [4]प्रत्याख्यानस्य तात्पर्यमाह — [5]**एतदेवेति**। **असमाश्वसता** अपरितुष्यता। सूत्रे कृते समाहारग्रहणस्यावश्यकत्वाद्गौरवप्रसङ्गं मन्यमानेन प्रत्याख्यानपरतया [6]व्याख्यातमित्यर्थः। ननु वार्तिककारमते सूत्रं समाहारग्रहणं च कर्तव्यमिति स्थितम्, तत्रोत्तरपदद्विगुप्रतिषेधार्थं च समाहारग्रहणमिति वक्तव्ये 'तद्धितार्थप्रतिषेधार्थम्' इत्येव कथमुक्तमित्याशङ्क्य [7]सिंहावलोकितेनाह — **उत्तरपद इति**। **अर्थान्तरे** अन्यपदार्थे। प्रातिपदिकत्वाभावादेव [8]प्रत्ययानुत्पत्तिरिति मा शङ्कीत्याह — **सत्यपीति**। [9]'न ङिसंबुद्ध्योः' इति ज्ञापकेन [10]प्रत्ययलक्षणेनाप्रत्यय इति निषेधाप्रवृत्तेर्ज्ञापितत्वादित्यर्थः। समासावयवविभक्तेर्लोपे पुनः समासावयवाद्विभक्त्युत्पत्तौ प्रयोजनाभावादिति भावः॥

[२, ८४३–८४६]

(**रत्नप्रकाशः**) समाहारद्विगोरेवात्र ग्रहणस्येष्टत्वेन समाहारस्य चैकत्वेन सिद्धे व्यर्थमिदं सूत्रमिति मन्यमानः पृच्छति — **किमर्थमिति**। उत्तरपदार्थप्रधानस्तत्पुरुष इति सिद्धान्तात् पञ्च समाहृताः पूलाः पञ्चपूलीति विग्रहे बहुवचनान्तदर्शनाच्च बहुवचने प्रसक्ते सूत्रमिदमावश्यकमित्याशयेन समाधत्ते — **प्रत्यधिकरणमिति**। **संख्यया बह्वर्थयेति**। बहुशब्दोऽनेकोपलक्षकः। तेन 'द्विग्रामी' इत्यपि सिध्यति। एकवचनशब्दः कृत्रिम आश्रित इति मन्यमानोऽव्याप्तिमुद्भावयति — **तत्रेति**। यौगिकमेकवचनशब्दमाश्रित्य समाधत्ते — **सिद्धं त्विति**। **द्विग्वर्थस्यैकवद्वचनादिति**। फलितार्थकथनपरमिदम्। सूत्रार्थस्त्वन्यथा वक्ष्यते। **उच्यत इति**। अनेनेति शेषः। **वचनमिति**। वचः करणे ल्युट्, सामान्ये नपुंसकम्। **एकवचनमिति**। एकवचनवदित्यर्थः। न ह्यनेकवचनमे-

---

[1] भाष्ये 'नवैतत्' इत्यत्र 'नैतत्' इत्यन्नंभट्टपाठ इति प्रतीयते।

[2] पा. सू. ५. १. ३७.

[3] पा. सू. ५. १. २८.

[4] व्याख्यानस्य — अ.

[5] तदेवमिति — अ, ऋ.

[6] व्याख्यास्यत इत्यर्थः — अ.

[7] लौ. न्या. साहस्री, पृष्ठम् १४.

[8] प्रत्ययानुत्पत्तेरिति — अ; प्रत्ययानुपपत्तिरिति — ऋ.

[9] पा. सू. ८. २. ८.

[10] 'प्रत्ययलक्षणेन' इति नास्ति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कवचनं भवति। एतेन "[1]'कृत्यल्युटो बहुलम्' इति कर्मणि ल्युट्" इति निरस्तम्। ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण [2]साधनायोगात्। अत एव 'एकस्यार्थस्येति वाच्यवाचकभावे षष्ठी, एकस्यार्थस्य वाचको द्विगुसमास उच्चार्यत इत्यर्थः' इत्यपि निरस्तम्। एकस्येति कर्मषष्ठ्यन्तस्य करणल्युडन्तेन समासोपपत्तौ कुत्सितकल्पनानौचित्यात्। **एकशेषस्येति**। एकशेषरूपस्य द्विगोरित्यर्थः। **प्रतिषेध इति**। एकवचनवत्त्वस्येति शेषः। एकशेषो द्विगुरेकवचनवन्नेति वाच्यमिति फलितम्। एतेन 'एकशेषविषय एकवद्भाव उपचारादेकशेषशब्देनोच्यते' इति निरस्तम्। सूत्रेणैकवद्भावस्याविहितत्वेनानुक्तप्रतिषेधानौचित्यात्। **पञ्चपूल्य इति**। एकशेषे सति यः शिष्टः स द्विगुरेवेति तस्यैकवचनवत्त्वं प्रसज्यत इति भावः। एतेन 'अत्रैकशेषे कृतेऽपि द्विगुत्वात् तदर्थस्यैकवद्भावः प्रतिषिध्यते' इति निरस्तम्। द्विगवर्थस्यैकवद्भावस्याविहितत्वेन तन्निषेधानौचित्यात्। **न वान्यस्यानेकत्वादिति**। अन्यस्य द्विगवर्थसमुदायस्यानेकत्वात् तद्वाचकस्य द्विगोरेकवचनवत्त्वातिदेशो न प्रसक्त एव, सकृल्लक्ष्ये लक्षणप्रवृत्तेर्न्याय्यत्वादिति भावः। एतेन 'प्रथमस्य द्विगवर्थस्यानेकसंख्यायुक्तस्यानेनैकवद्भावः कृतः। तत एकशेषे कृते द्विगवर्थसमुदायस्याद्विगवर्थत्वाद् बहिरङ्गत्वाच्च प्राथमकल्पिकेऽन्तरङ्गे द्विगवर्थे चरितार्थत्वाच्चैकवद्भावो न प्रवर्तत इत्यर्थः' इति निरस्तम्। सूत्रेण द्विगवर्थस्यैकवद्भावस्याविहितत्वात्। एकशेषस्यापि द्विगुत्वानपायेन तदर्थस्य द्विगवर्थसमुदायस्य [3]द्विगवर्थत्वाभावेऽन्तरङ्गस्यैकवद्भावो भवति न बहिरङ्गस्येत्यत्र[4] च मानाभावाच्च। **समाहारग्रहणं चेति**। 'समाहारे द्विगुरेकवचनम्' इति वक्तव्यमिति भावः। **तद्धितार्थे यो द्विगुरिति**। तद्धितस्य लुकि कृते तदर्थे वर्तमानो यो द्विगुरित्यर्थः। **तस्य मा भूदिति**। एकवचनवत्त्वमिति शेषः। **पञ्चकपालाविति**। पञ्चसु कपालेषु संस्कृत इत्यर्थे विहितस्य प्राग्दीव्यतीयस्याणो [5]"द्विगोर्लुगनपत्ये" इति लुक्। यदि पञ्चकपालशब्दः संस्कृते प्रत्येकं परिसमाप्यते तदा पञ्चपूल्य इत्यनेन समकक्षम्। अथ संस्कृतसमुदाये परिसमाप्यते तर्हि समाहारग्रहणे कृतेऽपि स दोषस्तदवस्थ इत्युभयथा समाहारग्रहणं व्यर्थमित्याशयेनाह — **किं पुनरिति । परिहृतं चेति** । अन्तरङ्गत्वादेकवचनवत्त्वातिदेशे सति ततस्तद्धिततल्लुकोः सतोरेकशेषे च पुनरेकवचनवत्त्वातिदेशो न भवति, सकृत्प्रवृत्तत्वादिति भावः। **समाहारैकत्वादपि सिध्यतीति**। पञ्चसु कपालेषु संस्कृता इत्यर्थे तद्धिते सति तद्धितार्थस्य समाहारस्यैकत्वात् समाहारग्रहणे कृतेऽपि न सिध्यतीति भावः। अस्मिन्नपि पक्षे पूर्वस्मिन् पक्ष इव सकृल्लक्षणप्रवृत्त्येष्टसिद्धिरित्यन्यदेतत्। **एवं तर्हीति**। यतः कारणात् समाहारग्रहणं व्यर्थं भवति, तथा संस्काराप्रसिद्धिश्चात इत्यर्थः। अस्मिन्नपि पक्षे समाहारग्रहणे कृतेऽपि न सिध्यतीति स दोषः संभवत्येव, द्विगोः समाहारवृत्तित्वानपायात्, समाहारस्य चानेकार्थरूपत्वात्। एवं चास्य विकल्पस्य फलं पञ्चसु कपालेषु संस्कृता इत्यर्थे तद्धितो न भवतीत्येतावन्मात्रं भवति, एकवचनवत्त्वातिदेशपरिहारस्योभयत्राविशिष्टत्वात्। 'न वा समाहारैकत्वात्' इति वार्तिकं सूत्रप्रत्याख्यानपरतया कश्चिद्व्याचष्ट इत्याह — **अपर आहेति**। [6]'तिरोहितावयवभेदः समुदायः समाहारः, स चैक एवेत्येकवचने सिद्धे व्यर्थं सूत्रम्। पञ्चानां पूलानां समाहारः पञ्चपूलीति तु तत्र विग्रह इति भावः। वस्तुतस्तूत्तरपदार्थप्रधानस्तत्पुरुष इति मतमेव सूत्रकृतो भाष्यकृतश्चेष्टमिति सूत्रं स्थितमेव। एतेन "क्रियमाणे तु सूत्रे समाहारग्रहणं कर्तव्यमेव तद्धितार्थद्विगुव्यावृत्त्यर्थम्। तेन समाहारेण व्यपदिष्टस्य द्विगोर्ग्रहणं भवति। यस्तु तद्धितार्थे, तस्य न भवति। तेन 'पञ्चभि-

---

[1] पा. सू. ३. ३. ११३.

[2] साधनयोगात् — ब.

[3] अस्य मानाभावाच्चेत्यनेनान्वयः।

[4] 'इत्यत्र' इत्यस्यानन्तरं 'तत्र' इत्यधिकम् — ब.

[5] पा. सू. ४. १. ५८.

[6] अतिरोहितावयव — प, ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गोभिः क्रीताः पञ्चगवः पटाः' इत्यादौ द्विग्वर्थस्यैकवद्भावाभावः। यदा बहूनां पञ्चगुत्वं, न तु प्रत्येकं, तदैकशेषस्यायमविषयः। एतदेव मन्यमग्नेन भगवता भाष्यकारेण पूर्वव्याख्यानेऽसमाश्वसता प्रत्याख्यानत्वेन वार्तिकं व्याख्यातम्'' इति निरस्तम्। समाहारग्रहणमन्तरेणैव भगवता यथाश्रुतसूत्रस्य निर्दुष्टतया व्यवस्थापितत्वात्। तद्भाष्यार्थाज्ञानेन यत्किंचिदसंबद्धप्रलापानौचित्यात्। उत्तरपदार्थप्रधानस्तत्पुरुष इति [१]निःसंकोचेन व्यवहरतो भाष्यकारस्य प्रकृतसूत्रप्रत्याख्याने तात्पर्यकल्पनानौचित्याच्च। यदप्युक्तम् 'उत्तरपदे तु यो द्विगुस्तदर्थस्यार्थान्तरे गुणभावादस्वातन्त्र्यात् सत्यपि प्रातिपदिकत्वे ततः प्रत्ययानुत्पादादेकवद्भावातिदेशः प्रयोजनाभावान्न भवति' इति। तदपि न, सूत्रप्रत्याख्यानमभ्युपगच्छतो मते तत्र प्रयोजनाभावादप्रवृत्तिकथनस्यासंबद्धप्रलापत्वात्। सूत्रे स्थिते [२]पर्जन्यवन्न्यायेन तत्राप्यतिदेशप्रवृत्तेरौचित्याद्दोषाभावाच्च॥

द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् २.४.२.

[२, ८४६–८४७]

(उद्द्योतनम्) ननु [३]'प्राण्यङ्गैः प्राण्यङ्गानामित्ययमर्थो वार्तिकान्न प्रतीयते, अत आह — **यदङ्गेति**। एकवचनान्तस्य प्रत्येकमङ्गशब्दस्य संबन्धेऽपि व्यतिकरो न निवर्तते, अत आह — [४]**बहुवचनान्तेति**। कथं प्रत्येकमित्येतावता [५]'बहुवचनान्तस्येत्यभिप्राय उन्नीयते, अत आह — [६]**पूर्वपक्षे चेति**। **अन्यथा** समुदाये। पूर्वपक्षे प्रत्येकसंबन्धमभिनयति — **प्राण्यङ्गेति**। [७]'स त्वन्यथेत्यत्र हेतुमाह — **न हीति**। सामर्थ्यादेव प्रत्येकसंबन्धे सिद्धे पुनः 'प्रत्येकम्' इति वचनं बहुवचनान्तस्य प्रत्येकसंबन्धविवक्षयेत्याह — **तस्मादिति**। 'अन्यथा' इत्यस्य विवरणम् — **बहुवचनान्तस्य सत इति**। **ग्रहणकवाक्यात्** संग्रहसूत्रात्। **वाक्यत्रयं** प्राण्यङ्गानां प्राण्यङ्गैरित्यादिभाष्योक्तम्॥

[२, ८४६–८४७]

(**रत्नप्रकाशः**) अत्र 'द्वन्द्वश्च' इति विभज्यते। चो वार्थे। तेन सर्वो द्वन्द्वो वैकवचनवद् भवति। 'प्राणितूर्यसेनाङ्गानाम्' इत्यादिप्रकरणं सर्वं नियमार्थम् — एषां द्वन्द्व एकवचनवदेवेति। यद्यपि [८]"तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य' इति बहुवचनं ज्ञापयति सर्वो द्वन्द्वो विभाषयैकवद्भवतीति, तथापि तद्भाष्यकारैरन्यथाप्युपपादितमित्यत्र योगविभागेन तत् साधितम्। यैः [९]"द्विगुरेकवचनम्' इति सूत्रं प्रत्याख्यायते तेषां मते समाहारद्वन्द्वस्यैकार्थकत्वं न्यायसिद्धमेवेति योगविभागोऽत्र नापेक्षितः। **तत्पूर्वोत्तरपदग्रहणमिति**। यदङ्गवाचि पूर्वपदं तदङ्गवाच्येव यद्युत्तर-

---

[१] तृतीयासप्तम्योरिति विकल्पादम्भावाभावः।

[२] परिभाषा १२०.

[३] 'प्राण्यङ्गैः' इति नास्ति — ऋ.

[४] प्रदीपे 'बहुवचनान्तोऽङ्गशब्दः' इत्यत्र 'बहुवचनान्ताङ्गशब्दः' इति पाठोऽन्नंभट्टस्येति भाति।

[५] 'प्रत्येकमङ्गशब्दः परिसमाप्यते' इति भाष्यानुरोधेन 'बहुवचनान्तश्चेत्यभिप्रायः' इति युक्तं भाति।

[६] प्रदीपे 'पूर्वपक्षेऽपि प्रत्येकम्' इत्यत्र 'पूर्वपक्षे च प्रत्येकम्' इत्यन्नंभट्टपाठ इति भाति।

[७] न त्वन्यथेत्यत्र — अ, ऋ.

[८] पा. सू. १. २. ६३.

[९] पा. सू. २. ४. १.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पदं तदैवैकवद्भाव[1]नियम इति भावः। **व्यतिकरो मा भूदिति**। तेन 'पाणिमार्दङ्गिकाश्वारोहाः' इत्यादिकमपि सिध्यतीति भावः। **प्रत्येकमिति**। द्वन्द्वान्वितत्वादिति भावः। एतेन 'पूर्वपक्षेऽपि प्रत्येकमेवाङ्गशब्दस्य संबन्धः। स त्वन्यथा — प्राण्यङ्गतूर्याङ्गसेनाङ्गवाचिनां द्वन्द्व एकवदिति। न हि प्राणितूर्यसेनानामेकमङ्गं भवतीति सामर्थ्यादेव प्रत्येकपरिसमाप्तिरङ्गशब्दस्य सिद्धा। तस्मादन्यथा प्रत्येकपरिसमाप्तिर्बहुवचनान्तस्य सतः प्रतिपाद्यते। तेनास्माद् ग्रहणकवाक्याल्लक्ष्यसंस्कारकं वाक्यत्रयमुपप्लवंत इति [2]'व्यतिकरो न भवति' इति निरस्तम्। समुदायेन बहुवचनान्तस्याङ्गशब्दस्यान्वयापेक्षया वार्तिकं प्रवृत्तं, प्रत्येकमन्वयाभ्युपगमेन तत् प्रत्याख्यातमिति बालकेनापि ज्ञातुं शक्यत्वेनोपपन्नत्वेन चासंबद्धप्रलापानौचित्यात्॥

अनुवादे चरणानाम् २. ४. ३.

[२, ८४७]

(उद्द्योतनम्) माष्ये यथाश्रुतसूत्रेऽतिप्रसङ्गमाह — **इह कस्मादिति**। धातुविशेषप्रयोग एवैकवद्भाव इति परिहरति — **स्थेणोरिति**। तत्राप्यतिप्रसङ्गं चोदयति — **तिष्ठन्त्विति**। लकारविशेषविवक्षया परिहरति — **अद्यतन्यां चेति**। अद्यतनीति लुङः पूर्वाचार्यसंज्ञा। स्थेणोरद्यतन्यामेवायमेकवद्भाव इति 'नन्दन्तु कठकालापाः, तिष्ठन्तु कठकालापाः' इत्यत्र न भवति। सूत्रस्यानुवादशब्दार्थमाह — **यदेति**॥

[२, ८४७]

(रत्नप्रकाशः) ज्ञातस्यार्थस्य धर्मान्तरसंबन्धबोधनायोपादानम् **अनुवादः**। **अद्यतन्यामिति**। लुङोऽद्यतनीति प्राचां संज्ञा॥

विशिष्टलिङ्गो नदीदेशोऽग्रामाः २. ४. ७.

[२, ८४८]

(उद्द्योतनम्) 'अग्रामाः' इति प्रतिषेधो [3]नगरभिन्नानामिति वक्तव्यम्, तथा च 'मथुरापाटलिपुत्रम्' इत्यत्र द्वयोर्नगरवाचित्वादेकवद्भावो [4]भवत्येवेत्युक्तम्। अत्र नगरस्य ग्रामत्वाभावादेव [5]प्रतिषेधाप्रसक्तेर्वचनं व्यर्थम्, अत आह — **जनपदेति**। [6]जननिकायनिवासस्थानविशेषो ग्रामः, तथा च नगरमपि ग्राम इत्यर्थः। नगरेऽपि ग्रामशब्दप्रयोगोऽस्तीत्याह — **ग्राम इति**। ग्रामशब्दस्य नगरसाधारण्यं [7]'प्राचां ग्रामनगराणाम्' इत्यत्र माष्ये प्रपञ्चितम्। 'उभयतः' इत्यस्यार्थ-

---

[1] 'एकवचनवद्भाव' इति पूर्वसूत्रोक्तरीत्या माव्यम्।

[2] संक्रन्द इत्यस्यार्थानुवादः।

[3] नगरभिन्नानामेवेति वक्तव्यम् — अ.

[4] 'भवत्येव' इत्यतः प्राक् नञाधिकः — ऋ.

[5] प्रतिषेधाप्रवृत्तेः — अ.

[6] **जननिकायः** जनसंघः।

[7] पा. सू. ७. ३. १४.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

माह — **ग्रामनगरेति**। 'ग्रामाणाम्' इत्येतद्व्याचष्टे — **ग्रामसंबन्ध्येवेति**। एवकारेण 'अनगराणाम्' इति प्रतिषेधो न प्रवर्तत इत्युक्तम् ॥

[२, ८४८]

(रत्नप्रकाशः) ग्रामशब्दो नगरेऽपि वर्तते, 'अभक्ष्यो ग्राम्यकुक्कुटः, ग्रामे नाध्येयम्' इत्यादौ नगरस्यापि ग्रहणात्। तथा च 'अग्रामाः' इति पर्युदासो नगरस्यापि प्राप्नोतीति तत्परिहारायाह — **ग्रामप्रतिषेधे नगरप्रतिषेध इति**। **उभयत इति**। ग्रामवाचकनगरवाचकयोर्द्वन्द्वे एकवचनवद्भावो नेति वाच्यमित्यर्थः। अनगराणामिति पर्युदासेऽग्रामाणामिति प्रसज्यप्रतिषेध इत्याश्रयणीयमिति भावः। शौर्यं नगरम्, [१]कैतवता ग्रामः। जाम्बवं नगरम्, शालूकिनी ग्रामः ॥

क्षुद्रजन्तवः २. ४. ८.

[२, ८४८]

(उद्द्योतनम्) स्मृतीनामिति। क्षुद्रजन्तुवधे पापाल्पत्वप्रदर्शनाय क्षुद्रजन्तुशब्दार्थः [२]स्मृतिष्वनेकरूप उक्तः, स भाष्ये प्रदर्शितः। स्मृतिरपि — [३]'क्षुद्रजन्तुरनस्थिः स्यादथवा क्षुद्र एव यः। शतं वा प्रसृतौ येषां केचिदानकुलादपि'। इति। **क्षोत्तव्या इति**। रुधादिरुभयपदी, अनिट्। अर्हे कृत्यमुपपादयति — **ये क्षुद्यमाना इति**। अत्र कः सिद्धान्तः, अत आह— **एतदेवेति** ॥

[२, ८४८]

(रत्नप्रकाशः) क्षुद्रजन्तुपरिज्ञानाय पृच्छति — [४]**के क्षुद्रजन्तव इति**। वक्ष्यमाणसर्वार्थसाधारण्येन क्षुद्रजन्तुशब्दं तावद् व्युत्पादयति — **क्षोत्तव्या जन्तव इति**। 'क्षुदिर् संपेषणे' इत्यस्मात् कर्मणि रकि तदन्तस्य जन्तुशब्देन कर्मधारय इति भावः। 'क्षोत्तव्याः' इत्यनेनार्हार्थतव्येन रकोऽर्हार्थत्वं दर्शितमिति मन्यमानो [५]जलौकाभिन्नानां क्षोदानर्हाणां ग्रहणं न स्यादित्याशयेनाह — **यद्येवमिति**। **यूकालिक्षमिति**। [६]ते क्षोदे क्रियमाणे म्रियन्त इति क्षोदं नार्हन्तीति भावः। **नकुलपर्यन्ता इति**। अयमेव पक्षो व्यापक आश्रयणीयः। अत एवायमन्ते निर्दिष्टः ॥

---

[१] 'केतवता' इति भाष्ये दृश्यते।
[२] स्मृतिष्वेकरूपः — अ.
[३] काशिकायामुपात्तेयं स्मृतिः।
[४] भाष्ये 'के पुनः क्षुद्रजन्तवः' इत्यत्र पुनःशब्दरहितः पाठो निर्णयसागरमुद्रिते दृश्यते।
[५] जलमोको यस्याः सेति विग्रहे जलौकाशब्दः। ओकशब्दः 'ओक उचः के' इति सूत्रेणादन्तो निष्पादितः। तस्माट्टाप्।
[६] यूकशब्दः पुंल्लिङ्गोऽपि शब्दकल्पद्रुमे प्रदर्श्यते। लिक्षाशब्दस्तु स्त्रीलिङ्ग एव। अत्रोभयोः स्त्रीलिङ्गत्वेनैव निर्दिष्टत्वात् 'ताः'– इति युक्तं भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

येषां च विरोधः शाश्वतिकः २. ४. ९.

[२, ८४९]

(उद्द्योतनम्) 'यदन्यत्' इत्यन्यशब्देन [1]"विभाषा वृक्षमृग' इति विकल्पः परामृष्टः। तस्य परस्य चकारेण कथं बाधः, अत आह — **चकारेणेति**॥

[२, ८४९]

(रत्नप्रकाशः) **एकवचनमेवेति**। एकवचनवदेवेत्यर्थः। तेन 'काकोलूकम्, अश्वमहिषम्' इत्यादौ यथोचितं द्विवचनबहुवचने न स्तः॥

शूद्राणामनिरवसितानाम् २. ४. १०.

[२, ८४९–८५०]

(उद्द्योतनम्) निरवसितव्याख्यानपूर्वकं प्रश्नाशयमाह — **निरवसिता इति**। तृतीयान्तभ्रमं वारयति — [2]**एनबन्तमिति**। [3]"उत्तराधरदक्षिणात्' इत्यनुवृत्तौ [4]"एनवन्यतरस्याम्' इत्यनेन। ननु 'कः पुनरार्यावर्तः' इति प्रश्नस्य 'प्राक्' इत्यादि कथमुत्तरम्, प्रथमान्तत्वाभावात्, अत आह — [5]**तत्रेति**। तत्र प्राक्प्रत्यक्शब्दाभ्यां प्रथमान्ताभ्यां देशेऽर्थे [6]"दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इत्यनेन विहितस्यास्तातेः [7]"अञ्चेर्लुक्' इत्यनेन लुक्। तद्योगे [8]"अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते' इति पञ्चमी। दक्षिणोत्तरशब्दाभ्यां प्रथमान्ताभ्यां तस्मिन्नेवार्थे [9]"एनबन्यतरस्याम्' इत्येनप्। [10]"एनपा द्वितीया' इति द्वितीया। प्रथमान्तात् प्रत्यय इति प्रश्नोत्तरयोः सामानाधिकरण्यसिद्धिरित्याह — **एतदिति**। [11]**एतेषु** ग्रामादिषु। **प्रसिद्ध इति**। ब्राह्मणवृषलादीनां निवासो ग्रामः प्रसिद्ध इत्यर्थः। नगरमपि प्राकारपरिखादियुक्तमनेकविधचेतननिवासस्थानं प्रसिद्धमित्यर्थः। मृतं शवं पान्ति रक्षन्ति करग्रहणाय ये[12] ते[13] मृतपाः। [14]"आतोऽनुपसर्गे कः' इति कः। तर्हि शूद्राणामित्यनन्वितम्, यज्ञानधिकारात्, अत आह — **शूद्राणामिति**। **संस्कारः** [15]"भस्मना शुध्यते कांस्यम्' इत्यादिनेत्यर्थः। **अधिकेनेति**। यद्यपि [16]"स्मृत्युक्तः संस्कारो नास्ति, तथाप्यात्मतुष्ट्यर्थं

[1] पा. सू. २. ४. १२.
[2] प्रदीपे 'एनबन्तः' इत्यत्र 'एनबन्तम्' इत्यत्रं-भट्टपाठ इति प्रतीयते।
[3] पा. सू. ५. ३. ३४.
[4] पा. सू. ५. ३. ३५.
[5] प्रदीपे 'प्रागादिभ्यः' इत्यत्र 'तत्र प्रागादिभ्यः' इत्यन्नंभट्टपाठः स्यादिति भाति।
[6] पा. सू. ५. ३. २७.
[7] पा. सू. ५. ३. ३०.
[8] पा. सू. २. ३. २९.
[9] पा. सू. ५. ३. ३५.
[10] पा. सू. २. ३. ३१.
[11] तेषु — अ.
[12] 'ये' इति नास्ति — अ.
[13] 'ते' इति नास्ति — ऋ.
[14] पा. सू. ३. २. ३.
[15] पराशरस्मृतिः ७. ३.
[16] स्मृत्यनुक्तसंस्कारः — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कल्पितसंस्कारान्तरमधिकशब्देनोक्तम्, [1]"आत्मनस्तुष्टिरेव च" [2]इति तुष्टेः स्मृतिगृहीतत्वात् ॥

[२, ८४९–८५०]

(रत्नप्रकाशः) [3]**प्रागादर्शादिति** । आदर्शादयः पर्वतविशेषाः । **दक्षिणेनेति** । एनबन्तः । तद्योगे हिमवतो द्वितीया । तत्र प्रागादिभ्यः प्रथमान्तेभ्यो देशवृत्तिभ्यः प्रत्ययो विहितः । तथा चैतत्पर्वतचतुष्टयमध्यदेश आर्यावर्त इति फलितम् । अव्याप्तिमाह — **यद्येवमिति** । **किष्किन्धगन्धिकमिति** । किष्किन्धादयो जातिविशेषा आर्यावर्ताद्बहिर्वसन्ति । **घोषः** गोमहिष्यादिनिवासः । **संवाहः** वणिक्प्रधानः । **संस्त्यायाः** निवासविशेषाः, नगराणीति यावत् । **मृतपा इति** । श्मशाननिकटे ये वसन्ति मृतवस्त्रचितिकाष्ठादिसंग्राहकाश्चण्डालसदृशास्त इत्यर्थः । **इति न सिध्यतीति** । सर्वस्य द्वन्द्वस्य विकल्पेनैकवचनवत्त्वस्येष्टत्वात् प्रकरणस्य चास्य नियमार्थत्वात् तदसिद्धिरेव दोष इति भावः । **याज्ञात् कर्मण इति** । शूद्राणामपि केषांचिद्याज्ञे कर्मण्यधिकारोऽस्तीत्याशयेनैवमुक्तम् । एतेन 'शूद्राणां पञ्चयज्ञानुष्ठानेऽधिकारोऽस्तीति भावः' इति निरस्तम् । तक्षायस्कारस्यापि तस्य सत्त्वेन तत्राव्याप्त्यापादनभाष्यस्यासंगतत्वापत्तेः । तक्षायस्कारस्य रजकतन्तुवायस्य वा पञ्चयज्ञानुष्ठानेऽधिकारो नास्ति, अन्येषामस्तीत्यत्र मानाभावाच्च । **संस्कारेणेति** । यः संस्कारः स्मृतिकारैर्द्रव्यशुद्धौ पठितस्तेनेत्यर्थः ॥

गवाश्वप्रभृतीनि च २. ४. ११.

[२, ८५१]

(उद्द्योतनम्) द्वन्द्ववृत्तशब्देन द्वन्द्वकार्यमेकवद्भावलक्षणं विवक्षितमित्याह — **इदं कार्यमिति** । **पशुद्वन्द्व इति** । [4]"विभाषा वृक्ष" इत्यनेन । व्याख्यानमिदम्, नापूर्ववचनमित्याह — **एतेनेति** ॥

[२, ८५१]

(रत्नप्रकाशः) **यथोच्चारितमिति** । यादृशं रूपं गणे पठितं तादृशमेव नियमविषयो नान्य इत्यर्थः । तेन 'गोऽश्वाः, गोअश्वाः' इत्यादौ विकल्पेनैवैकवचनता भवति ॥

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् २. ४. १२.

[२, ८५१–८५५]

(उद्द्योतनम्) ननु 'बहुप्रकृतिः' इति न षष्ठीतत्पुरुषः, अत्र द्वन्द्वात् परस्यैकस्यानेकस्य वा विधानाभावात् । नापि बहुव्रीहिः, द्वन्द्वस्य कस्माच्चित्परत्वेनाविधानात्, अत आह — **बहव इति**।

---

[1] मनुस्मृतिः २. ६.

[2] इति मनुस्मृति — अ.

[3] भाष्ये 'प्रागदर्शनात्' इत्यत्र 'प्रागादर्शात्' इति निर्णयसागरमुद्रिते पाठः ।

[4] पा. सू. २. ४. १२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]"चार्थे द्वन्द्वः' इत्यर्थस्य द्वन्द्वनिमित्तत्वादित्यर्थः। **यस्य** द्वन्द्वस्य। 'विभाषा वृक्ष' इत्यनेन प्राप्त्यभावादाह — **जातिरिति**। ननु नित्यैकवद्भावे 'बदरामलकानि' इति नोपपद्यते, अत आह — **क्वचित्त्विति**। **नित्य इति**। [2]'जातिरप्राणिनाम्' इत्यनेन। **अनेन** 'बहुप्रकृतिः' इत्यनेन। नन्वस्य विध्यर्थत्वे विकल्प[3]विधिर्भवेत्, तच्च 'नियम्यते' इति भाष्यविरुद्धम्, अत आह — **अन्ये त्विति**। ब्राह्मणाश्च क्षत्रियाश्च ब्राह्मणक्षत्रिया इतिवद् बहुप्रकृतित्वे बदरामलकानीत्येव प्राप्तौ [4]"जातिरप्राणिनाम्' इति नित्य एकवद्भावः। स 'बहुप्रकृतिः' इत्यनेन नियम्यत इत्यर्थः। भाष्ये बदरामलकानीति न रूपान्तराङ्गीकारपरम्, किं तु [5]"जातिः' इत्यस्याभावे तथा प्राप्त्यमिधानपरमिति भावः। **प्रदर्श्यते** नियम्यते। 'हस्त्यश्वाः' इति साधुरेवेत्याह — **सेनाङ्गत्वेऽपीति**। फलादिष्वनेन[6] प्राप्त्यभावेन संशयायोगादाह — **येषामिति**। **वनस्पत्यादीनामिति**। तत्र [7]"जातिरप्राणिनाम्' इत्यनेनानेन च प्राप्तिरस्तीत्यर्थः। **अन्यतरेति**। अनेनैव वा [8]'सूत्रान्तरैरेव वा यत्र प्राप्तिर्न तत्र संशय इत्यर्थः। **व्यापित्वादिति**। प्लक्षन्यग्रोधावित्यादौ [9]"जातिरप्राणिनाम्' इत्यस्यापि विकल्पसंभवात्। पूर्वविप्रतिषेधस्यावश्यकत्वार्थवार्तिके 'पशुद्वन्द्व' इति। तद्व्याचष्टे — **पशुत्वादिति**। "अस्मिन् सूत्रे 'अश्ववडवयोः' इति पूर्वविप्रतिषेधोपन्यासस्य कः संबन्धः, अत आह — **पशुत्वादिति**।" [इति] केचित्, तच्चिन्त्यम्, अत्राश्ववडवेत्युक्तसंगतेः स्पष्टत्वात्। नन्वत्रैकवद्भावो विधीयते, न लिङ्गमिति 'नपुंसकम्' इत्ययुक्तम्, अत आह — **तत्रेति**। **नपुंसकत्वमपीति**। [10]"स नपुंसकम्' इत्यनेन। ननु पशुशब्देन विधानं न प्रतिपदम्, अत आह — **नात्रेति**। नन्वत्रैकवत्त्वस्य प्रतिपदविधानम्, न लिङ्गस्य, अत आह — **तच्छब्देनेति**। ननु [11]'पूर्ववदश्ववडवौ' इति पुंस्त्वमपि प्रतिपदविहितं विशेषविहितं च, तच्छब्देन त्वेकवद्भावसामान्यपरामर्शोऽन्यत्रापि सावकाश इति पूर्वविप्रतिषेध आवश्यक इति चेत्, अत्राहुः, [12]'अश्ववडवौ' इति निर्देशादेकवद्भावाभावपक्ष एव पुंस्त्वं परवल्लिङ्गबाधेन। एकवद्भावे तु नपुंसकत्वमेव, न पूर्वलिङ्गमिति व्यवस्थोपपद्यत इति। ननु कर्मसाधनसमाहारशब्दस्य समाह्रियमाणप्रधानत्वात् कथमेकत्वम्, अत आह — **तिरोहितेति**। 'इह'द्वयस्यार्थमाह — **द्वन्द्वश्चेति**। **यदीति**। 'तिष्यपुनर्वसु, तिष्यपुनर्वसू' इति द्वैरूप्यमिष्यते। तत्रैकवद्भावं विनैकवचनं नास्ति। तत्र पठितानामेव प्राण्यङ्गादीनामेकवद्भावे तिष्यपुनर्वस्वोस्तत्र[13] [14]"पाठाभावादेकवद्भावाभावादेकवचनस्यात्राप्रवृत्तेस्तन्निवृत्त्यर्थं बहुवचनस्येति व्यर्थं सदत्रान्यत्र चैकवद्भावं ज्ञापयतीत्येकवद्भावप्रकरणं व्यर्थमित्यर्थः। पक्षे वाक्यस्याङ्गीकारात् 'नित्यार्थम्' इत्ययुक्तम्, अत आह — **प्राण्यङ्गादीनामिति**। **क्वचिदिति**। अस्मिन् सूत्रे ये वृक्षतृणधान्यादयस्तत्रेत्यर्थः। प्राणिनां त्वप्राप्तविभाषा। प्रयोजनान्तरमाह — **व्यतिकरेति**। वस्तुतः 'सर्वो द्वन्द्वः' इत्येव प्राणिषु विभाषासिद्धेर्व्यतिकरनिवृत्तिरेव प्रयोजनम्। मृगवाचिनां मृगवाचिभिरेव द्वन्द्वैकवद्भावः, तृणवाचिनां तृणवाचिभिः, न तु मृगतृणवाचिनां द्वन्द्व एकवदिति व्यतिकर[15]निवृत्तिशब्दस्यार्थ इत्याहुः। मृगस्य सेनाङ्गादिना द्वन्द्वनिवृत्त्यर्थमिति केचित्॥

---

[1] पा. सू. २. २. २९.
[2] पा. सू. २. ४. ६.
[3] विधिर्भवति — ऋ.
[4] पा. सू. २. ४. ६.
[5] नित्यस्याभावे — अ.
[6] विभाषा वृक्षमृगेति सूत्रेणेत्यर्थः।
[7] पा. सू. २. ४. ६.
[8] सूत्रान्तरेण वा — ऋ.
[9] पा. सू. २. ४. ६.
[10] पा. सू. २. ४. १७.
[11] पा. सू. २. ४. २७.
[12] पा. सू. २. ४. २७.
[13] अत्र — ऋ.
[14] पाठाभावादेकवचनस्य — अ.
[15] निरासशब्दस्यार्थानुवादः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८५१–८५५]

(रत्नप्रकाशः) **बहुप्रकृतिरिति**। बहुवचनान्ताः प्रकृतयोऽवयवा [1]घटकपदानि यस्य स इत्यर्थः। **बदरामलकानीति**। [2]'जातिरप्राणिनाम्' इति नित्यमेकवचनतायां प्राप्तायामनेन विकल्प इति भावः। **हस्त्यश्वा इति**। सेनाग्रहणं [3]'पूर्वत्र न कर्तव्यमिति भावः। **यूकालिक्षा इति**। [4]'क्षुद्रजन्तवः' इति सूत्रं न कर्तव्यमिति भावः। **बदरामलके इति**। अत्रैकवद्भावो न भवति केनापीति हीष्टमिति भावः। **किं पुनरिति**। फलादीनां द्वन्द्वो बहुप्रकृतिर्विकल्पेनैकवचनं भवतीत्येकवाक्यताश्रीयते, आहोस्विदेषां द्वन्द्वो बहुप्रकृतिरेवैकवचनं भवति, तत्तु वेति वाक्यभेद आश्रीयत इति भावः। एकवाक्यतायां हि फलसेनाङ्गक्षुद्रजन्तुद्वन्द्वांशे विकल्पविधानार्थमितरांशे प्रकृतसूत्रेण विकल्पे सिद्धे नियमार्थमिदं वचनं संपद्यते। वाक्यभेदे त्वाद्येन वाक्येन फलादीनां [5]'सर्वद्वन्द्वस्य बहुप्रकृतिकतानियमे जाते द्वितीयेन फलसेनाक्षुद्रजन्तुविषये विकल्पो बोध्यते। **प्लक्षन्यग्रोधाविति**। अत्र केनाप्येकवद्भावो न भवतीति हीष्टमिति भावः। **यथा न दोष इति**। वाक्यभेद आश्रयणीय इति भावः। एतेन 'बदरामलकानि, हस्त्यश्वाः, यूकालिक्षाः' इत्युदाहरणैः 'किं पुनः' इत्यादि 'तथास्तु' इत्यन्तेन प्रश्नप्रतिवचनग्रन्थेन च फलसेनाङ्गक्षुद्रजन्तूनां बहुप्रकृतिकस्य द्वन्द्वस्य वैकल्पिकत्वम्, [6]'क्षुद्रजन्तवः' इति सूत्रं [7]'द्वन्द्वश्च प्राणि' इत्यादिसूत्रे सेनाग्रहणं च न कर्तव्यमिति च भाष्यवार्तिककृतोरिष्टमिति ये न जानन्ति ते निरस्ताः। यत्तु "**बदरामलकमिति**। "जातिरप्राणिनाम्' इत्येकवद्भावः। क्वचित्तु बदरामलकानीत्यपि पठचते। तत्रैवं व्याचक्षते — नित्य एकवद्भावे प्राप्ते विकल्पोऽनेन विधीयत इति। अन्ये तु बदरामलकानीत्येवं प्राप्ते जातिलक्षणो नित्य एकवद्भावो बहुप्रकृतेर्भवतीति प्रदर्श्यत इत्याहुः" इति। तत्र नित्यैकवद्भावाश्रयणं 'क्वचिद्'ग्रहणम् अन्ये त्वित्यादि च तुच्छम्। सर्वेषु पुस्तकेषु तदुदाहरणस्य सत्त्वात्। 'तत्रैवं व्याचक्षते' इति मतेन भाष्यानुगुणेन विरोधाच्च। यदप्युक्तम् '**हस्त्यश्वमिति**। सेनाङ्गत्वेऽपि परत्वात् पशुलक्षणो विकल्पो भवति' इति। तदपि न, सेनाग्रहणस्य 'रथपदाति, रथपदातयः' 'हस्त्यश्वरथपदाति, हस्त्यश्वरथपदातयः' इत्याद्युदाहरणसाधारणस्यैकेनोदाहरणेन संकोचानौचित्यात्। यदप्युक्तम् '**किं पुनरिति**। अस्मिन् प्रदेशे पठितत्वात् किमेतत्सूत्रविहित एवैकवद्भावो नियतविषयो व्यवस्थाप्यते, अथ प्रकरणविहितः' इति। तदपि न, फलक्षुद्रजन्तूनामेतत्सूत्रविषयत्वाभावेन वचनस्यैतत्सूत्रमात्रविषयव्यवस्थापकत्वासंभवेन मद्वर्णितरीत्यैव प्रश्नस्योपपन्नत्वात्। यदप्युक्तम् 'व्यापित्वात् प्रकरणापेक्षोऽयं विषय[नियम] इत्यर्थः' इति। तदपि न, तेन कस्यचिदर्थस्य भाष्योदाहरणनिर्वाहकस्यानिर्दशितत्वात्। तस्माद्यत्किंचिदेतत्। **अश्ववडवयोरिति**। पशुद्वन्द्वत्वाद्विभाषैकवद्भावः। तत्रैकवद्भावपक्षे [9]'स नपुंसकम्' इति नपुंसकत्वं प्राप्तम्, [10]'पूर्ववदश्ववडवौ' इत्यतिदेशात् पुंस्त्वमपि। तत्र परत्वात् पुंस्त्वे प्राप्ते पूर्वविप्रतिषेध उच्यते। **प्रतिपदविधानादिति**। यावन्त्येकवद्भावविधायकानि वचनानि तावन्ति [11]सनपुंसकसूत्राणीति 'अश्ववडवयोर्द्वन्द्व एकवत्' इति वचनविषयकं

---

[1] प्रकटपदानि — ब.
[2] पा. सू. २. ४. ६.
[3] द्वन्द्वश्च प्राणितूर्येति सूत्र इत्यर्थः।
[4] पा. सू. २. ४. ८.
[5] 'सर्वेषां द्वन्द्वस्य' इत्युचितं भाति।
[6] पा. सू. २. ४. ८.
[7] पा. सू. २. ४. २.
[8] पा. सू. २. ४. ६.
[9] पा. सू. २. ४. १७.
[10] पा. सू. २. ४. २७.
[11] सनपुंसकमिति — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'स नपुंसकम्' इति वचनं निरवकाशं सत् [1]'पूर्ववदश्ववडवौ' इत्यतिदेशं बाधिष्यत इति भावः। इदानीं [2]मतान्तरेणैकवद्भावप्रकरणस्यानर्थक्यमाह — **एकवचनमिति**। **समाहारैकत्वादिति**। तिरोहितावयवभेदस्य समुदायस्यैकत्वादित्यर्थः। **ज्ञास्यामीति**। [3]ज्ञापयिष्यामीत्यर्थः। **इह नित्य इति**। [4]'द्विगुरेकवचनम्' इत्यारभ्यैतत्सूत्रात् प्रागित्यर्थः। **इह विभाषेति**। प्रकृतसूत्रे एतदुत्तरसूत्रे चेत्यर्थः। **नैतदस्तीति**। 'इह विभाषा' इत्यंशापेक्षमिदम्। एतेन 'यद्येतत्प्रकरणस्थानामेवैकवद्भावः स्यात् तदा तिष्यपुनर्वसुशब्दयोरत्रापठितत्वादेवैकवद्भावस्याभावात् तन्निवृत्तये बहुवचनग्रहणमनर्थकं स्यादित्यर्थः' इति निरस्तम्। तत्रत्यबहुवचनग्रहणस्य सर्वो द्वन्द्वो विभाषैकवद् भवतीत्येवमर्थज्ञापकत्वेन सार्थकतायाः स्पष्टत्वेनानेन प्रकरणेन तस्यानर्थक्यापादनस्य स्वमौर्ख्यप्रकटनात्मकत्वात्। **व्यभिचारार्थमिति**। विभाषार्थमित्यर्थः। यद्यपि ज्ञापकेन सर्वत्रैकवद्भावविकल्पः सिद्धः, तथापि क्वचित् [5]'जातिरप्राणिनाम्' इति नित्यमेकवद्भावे प्राप्ते विकल्पोऽनेन बोध्यते। क्वचिद्विकल्पे सिद्धे बहुप्रकृतिकतार्थं व्यतिकरनिरासार्थं च [6]वचनम्॥

विभाषा समीपे २. ४. १६.

[२, ८५५–८५६]

(उद्द्योतनम्) **अनुप्रयोग इति**। 'नैतदस्ति' इति भाष्ये वक्ष्यमाणो दोषः। **नन्विति**। अर्थस्यैकवद्भावे तत्समानाधिकरणस्यानुप्रयोगस्याप्येकवचनं सिद्धम्। द्वन्द्वस्य त्वेकवद्भावेऽद्वन्द्वस्य न स्यात्। **बहुवचनमिति**। **उपदशाः पाणिपादा इति**। अव्ययीभावस्य सत्त्वप्रधानत्वेऽप्याह — **सत्यपीति**। **तस्मिन्** बहुवचने। **षष्ठी स्यादिति**। नियमतो बहुव्रीहेरेवानुप्रयोगे पाणिपादस्य सौन्दर्यमिति षष्ठीविवक्षायां तत्समानाधिकरणस्यापि [7]'उपदशस्य' इति षष्ठी स्यात्, 'उपदशं पाणिपादस्य' इति चेष्यत इत्यर्थः। **एतदेवेति**। पाणिपादशब्दस्यैकवचनान्तत्वे एकवचनान्तस्यैवानुप्रयोगः, बहुवचनान्तत्वे बहुवचनान्तस्यैवेत्येतदेवेत्यर्थः। [8]यद्वा, एकवचनान्तस्याव्ययीभाव एवानुप्रयुज्यते, बहुवचनान्तस्य [9]बहुव्रीहिरेवेत्येतदित्यर्थः। नन्वव्ययस्यासंख्यत्वात् कथमव्ययादेकवचनम्, अत आह — **एकवचनस्येति**। [10]'अव्ययादाप्सुपः' इति ज्ञापकादिति भावः। एकवचनस्योत्सर्गत्वे 'एकार्थः' इत्ययुक्तम्, अत आह — **अभेदेति**। समासे संख्याविशेषानवगमः **अभेदैकत्वम्**, तच्चासंख्येष्वस्तीति भावः। ननु बहुव्रीह्यर्थस्य समीपस्यैकत्वात् कथं बहुवचनम्, अत आह — **समीपीति**॥

[२, ८५५–८५६]

(रत्नप्रकाशः) अनुप्रयोगपरिज्ञानाय पृच्छति — **किमुदाहरणमिति**। तत्रोप[11]पदस्यैकवद्भाव-

---

[1] पा. सू. २. ४. २७.
[2] मतान्तराश्रयेणैकवद्भाव — प.
[3] अन्तर्भावितण्यर्थक इति भावः।
[4] पा. सू. २. ४. १.
[5] पा. सू. २. ४. ६.
[6] वचने — व.
[7] उपपदस्येति — अ.
[8] यद्येकवचनान्तस्य — अ, ऋ.
[9] बहुव्रीहिरेवेत्यर्थः — ऋ.
[10] पा. सू. २. ४. ८२.
[11] उपदशस्येत्युचितं भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विकल्पोदाहरणमयुक्तम्, [1]"द्वन्द्वश्च" इत्यनुवृत्तेरित्याशयेनाह — **नैतदस्तीति**। **एतत्** उपदशम् उपदशा इत्युदाहरणं, न भवतीत्यर्थः। एतेन 'नन्वर्थस्यैकवद्भावादनुप्रयोगस्यापि सेत्स्यति' इति निरस्तम्। अनेन प्रकरणेन शब्दस्यैवैकवचनवत्त्वातिदेशात्। यदप्युक्तम् "नैतदस्ति। यदि तावदव्ययीभाव एवानुप्रयुज्यते तदा तस्याव्ययत्वाद् बहुत्वाभावाद् बहुवचनं न स्यात्। सत्यपि वा तस्मिन् अम्भावे कृते 'उपदशाः' इति न स्यात्" इति। तदपि न, अम्भावस्य पञ्चमीव्यतिरिक्तविषयकत्वेन 'उपदशेभ्यः' इत्युदाहरणस्य दशानां समीपादित्यस्मिन्नर्थे स्वीकर्तव्यतापत्त्या बहुवचनाङ्गीकारानौचित्यात्। यदप्युक्तम् "अथ बहुव्रीहिरेवानुप्रयुज्यते 'उपदशस्य पाणिपादस्य' इति षष्ठी स्यात्, 'उपदशम्' इति चेष्यते" इति। तदपि न, अर्थस्यैकवद्भावातिदेशे स्वीकृते बहुव्रीहेरनुप्रयोगे 'उपदशं पाणिपादम्' इति प्रयोगस्यापि न्यायसिद्धत्वेन 'उपदशस्य पाणिपादस्येति षष्ठी स्यात्' इत्यापादने मानाभावात्। यदप्युक्तम् 'एतदेव मनसिकृत्याह — **एवं तर्हीति**।' [इति], तदपि न, प्रकृतसूत्रेण क्रियमाणस्यैकवचनवत्त्वस्योपदशशब्दसंबन्धो न युज्यत इति शङ्कामभ्युपगम्योपदशमिति प्रयोगोपपादनाय 'एवं तर्हि' इति भगवतोक्तमिति बालकेनापि ज्ञातुं शक्यत्वात्। **अव्ययीभावोऽप्यारभ्यत इति**। [2]'अव्ययं विभक्ति' इत्यादिनेति शेषः। **बहुव्रीहिरपीति**। [3]'संख्ययाव्यय' इत्यादिनेति शेषः। **एकवचनमिति**। द्वन्द्व इति शेषः। **एकार्थस्यैकार्थ इति**। औचित्यादिति शेषः। यद्यप्यव्ययस्यैकार्थकत्वं नास्ति, तथाप्यौत्सर्गिकस्यैकवचनस्यैव [4]क्वचिदेकत्वबोधकत्वमिति तदन्तस्य तदन्त एवानुप्रयुज्यत इत्याशयान्न दोषः॥

तत्पुरुषोऽनञ्कर्मधारयः २. ४. १९.

[२, ८५६–८५७]

(उद्द्योतनम्) अन्यथासिद्धिर्भाष्ये[5] व्यक्ता। नन्वन्यथासिद्धोदाहरणं किमर्थमुच्यते, अत आह — **शिष्येति**। सामान्येन [6]वक्ष्यमाणस्यावतारणात् 'आह' इत्यनन्तरं न प्रतीकोपादानम्। 'संज्ञायामित्यादि' इति शेषो वा। **पश्चादिति**। एकैकमुदाहरणं प्रदर्श्य [निरस]नानन्तरमित्यर्थः। नन्विदानींतनसंज्ञारूपस्य जीर्णकन्थाशब्दस्यापि नपुंसकत्वं स्यात्, अत आह — **अनादिरिति**। **षष्ठीतत्पुरुषस्यैवेति**। समासान्तरे समूहसमूहिभावस्याप्रतीतेरिति भावः। नन्वेवं [7]"विभाषा सेना' इत्येतस्मात् पूर्वमिदं सूत्रं कर्तव्यम्, तन्मात्रोपयुक्तत्वात्, अत आह — **अत्र तु प्रदेश इति**। उक्तविधया समासान्तराभावस्य मन्दैर्ज्ञातुमशक्यत्वादित्यर्थः॥

[२, ८५६–८५७]

(रत्नप्रकाशः) उत्तरेषु केषुचिद्योगेष्वन्यथासिद्धिसंभवात् किमर्थोऽयमधिकार इति पृच्छति

---

[1] पा. सू. २. ४. २.
[2] पा. सू. २. १. ६.
[3] पा. सू. २. २. २५.
[4] क्वचिदेकत्वबोधकमिति — प; क्वचिदेकत्वमिति — ब.
[5] भाष्येऽप्यस्तीति। ननु — अ.
[6] वक्ष्यमाणस्योपकारणात् — अ; वक्ष्यमाणस्यावकरणात् — ऋ.
[7] पा. सू. २. ४. २५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

किमर्थमिति। तदाशयप्रकटनाय समाधानमाह — **संज्ञायामिति**। इतरः स्वाशयमाह — **नैतदस्तीति**। **न हि संज्ञायामिति**। तथा चानादिस्तत्र संज्ञा गृह्यत इति भावः। **न हि तदाद्याचिख्यासायामिति**। षष्ठीतत्पुरुषं विना तदादित्वासंप्रत्ययादिति भावः। **न हि च्छायान्त इति**। पूर्वपदार्थबाहुल्यं षष्ठीतत्पुरुष एव गम्यते, न त्वन्यस्मिन् समास इति मन्यते। **न हि सभान्त इति**। [1]'अशाला' इति वचनात् संघातवचनः सभाशब्दो ग्राह्यः। न च समूहिभिर्विना समूहोपपत्तिरिति षष्ठीतत्पुरुषस्यैव ग्रहणमिति मन्यते। **इदं तर्हीति**। नन्विदं प्रयोजनं चेदत्रैव 'तत्पुरुषोऽनञ्कर्मधारयः' 'विभाषा सेना' इत्यादि कुतो न सूत्रितमिति चेत्, प्रतिपत्तिसौकर्याय पृथगधिकारः कृत इति गृहाण॥

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २. ४. २६.

[२, ८५७–८६२]

(उद्द्योतनम्) 'किमर्थमिदम्' इति सामान्यनिर्देशेन तत्पुरुषस्यापि प्रश्नविषयत्वं भाति, तत्र नियमपक्षासंभवाद् द्वन्द्वापेक्षोऽयं प्रश्न इत्याह — **द्वन्द्वेति**। यद्यवयवार्थातिरिक्तो द्वन्द्वार्थः, स चालिङ्गः, तदा विध्यर्थत्वम्। यदा त्ववयवार्थाविव परस्परापेक्षौ समासार्थः, व्यतिरिक्तोऽपि वावयवार्थलिङ्गेन लिङ्गवान्, तदा नियमार्थत्वम्। उभयसाधारणं संशयान्तरमाह — **तथेति**। द्वन्द्वतत्पुरुषयोरिति षष्ठीपक्षे द्वन्द्वार्थस्य तत्पुरुषार्थस्य [च] [2]परपदार्थलिङ्गातिदेशः। सप्तमीपक्षे द्वन्द्वे तत्पुरुषे च परवल्लिङ्गं भवतीत्युक्ते परत्वस्य पूर्वसापेक्षत्वादर्थात् पूर्वपदस्येति लभ्यत इत्यर्थः। अत्र षष्ठीनिर्देशपक्षे उक्तविधया द्वन्द्वे विधिनियमद्वयसंभवः, सप्तमीनिर्देशपक्षे तु द्वन्द्वेऽपि [3]विध्यर्थत्वमेवेति ज्ञेयम्। द्वन्द्वार्थस्यातिरिक्तत्वेऽलिङ्गत्वे च नियमार्थत्वं न संभवति, अत आह — [4]**तत्रेति**। नियममुपपादयति — **तत्रेति**। **विरुद्धेति**। वचनावश्यकत्वार्थमुक्तम्। **यद्येवमिति**। केवलमयूरीशब्दस्य 'कुक्कुटमयूर्यौ' इति द्वन्द्वावयवस्य च भेदाभावाद्वृतिर्नोपपद्यत इत्यर्थः। **केवलेति**। एवं च [5]"गगनं गगनाकारम्' इत्यादावपि प्रदेशभेदेन भेदं विवक्षित्वा सादृश्यमुक्तम्, न त्वत्यन्ताभेदे सादृश्यमस्तीति सूचितम्। [6]"रामरावणयोरिव' इत्यत्र तु समयभेदेन युद्धभेदात् सादृश्योपपत्तिः। यद्वा, यत्राभेदेऽपि सादृश्यप्रतिपादनं तदुपमाननिरासपरम्, न त्वभेदेऽपि सादृश्यपरम्, वाधितत्वादिति वोध्यम्। द्वन्द्वे नियम उक्तः, तस्यात्रासंभवादाह — **तत्पुरुषापेक्षयेति**। ननु षष्ठीनिर्देशपक्षाश्रयेण समाधाने कृते पूर्वपदस्य परलिङ्गप्रसङ्गाभावात् प्रतिषेधोऽनर्थकः, अत आह — **सप्तमीति**। तथापि सूत्रे पूर्वपदस्येत्यश्रवणात् कथं तस्य [7]परलिङ्गप्राप्तिः, अत आह — [8]'**तत्र हीति**। ननु पूर्वपदस्य [9]'परलिङ्गातिदेशेऽप्यनिष्टाभावे प्रतिषेधो व्यर्थ इत्याशङ्क्यानिष्टमाह — **तत्रेति**। 'स्त्रीप्रत्ययप्रसङ्गः' इत्यत्र पूर्वपदस्येत्यनुषङ्गः। **तथेति**। अर्धशब्दस्यापि स्त्रीप्रत्ययप्रसङ्ग इत्यर्थः। ननु सप्तमीपक्षे पूर्व[10]पदप्रतिषेधे कस्य [11]कार्यित्वम्, अत आह — **पूर्वपदेति**।

---

[1] पा. सू. २. ४. २४.
[2] पूर्वपदार्थ — अ, ऋ.
[3] विध्यर्थमेवेति — अ.
[4] अत्रेति — अ, ऋ.
[5] रामायणे युद्धकाण्डे सर्ग ११० श्लो. २३
[6] रामायणम्, युद्धकाण्डम् सर्ग ११० श्लो. २४
[7] परवल्लिङ्गप्राप्तिः — अ.
[8] तत्रापीति — अ.
[9] परवल्लिङ्गातिदेशेऽपि — अ.
[10] 'पद' इति नास्ति — अ.
[11] कार्यत्वम् — अ, ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'यदि' इति पक्षान्तरपरिग्रह इत्याह — **षष्ठीनिर्देश इति**। तावन्मात्रं [1]'पूर्वस्मादभिन्नम्, अत आह — **व्यतिरिक्तेति**। स चालिङ्ग इति मते विद्ध्यर्थमिदम्, अवयवार्थलिङ्गेन लिङ्गवानिति मते तु नियमार्थमित्युक्तमेव। तदाश्रयणस्य प्रयोजनमाह — **व्यतिरिक्तेति**। **मुख्येति**। पूर्वत्र त्वौपाधिक[2]भेदेन गौणसादृश्यमिति भावः। षष्ठीपक्षे समासार्थस्य कार्यित्वाल्लिङ्गस्य समासात् परत्वासंभवात् समासादन्यस्य चासंदिग्धत्वेनावक्तव्यत्वाच्च व्याचष्टे — **समासार्थेति**। [3]समासावयवार्थगतलिङ्गं लक्षणया समासशब्देन विवक्षितमित्यर्थः। पदार्थमुक्त्वा वाक्यार्थमाह — **तेनेति**। पुंस्त्वातिदेशे स्त्रीत्वनिवृत्तौ टापो [4]निवृत्तिसिद्धेर्लुग्वचनं व्यर्थम्, अत आह — **परवल्लिङ्ग इति**। अनेन सूत्रेण। नन्वत्रोत्तरपदार्थस्य पुंस्त्वं न निपात्यते, अत आह — **टाविति**। **रूपमेतदिति**। [5]'अश्ववडवपूर्वापर' इति रूपम्। अन्यथा 'अश्ववडवापूर्वापर' इति स्यादित्यर्थः[6]। [7]'अश्ववडवौ' इति निपातनमुक्तमिति मत्वा प्रश्न इत्याह — **पूर्ववदिति**। **वचनान्तरे** वहुवचने, इतरेतरद्वन्द्व एकवचनासंभवात्। अत [8]एवाह — **अश्ववडवानिति**। **द्वन्द्वे** सर्वस्मिन्, तत्र वचन[9]विशेषाश्रवणात्। **अनेकमिति**। [10]'चार्थे द्वन्द्वः' इत्यत्रानेकमित्यनुवर्तनादिति भावः। अननुवृत्तावप्याह — **समुदायार्थे चेति**। [11]'उपसर्जनम्' इत्यन्वर्थग्रहणादिति भावः। ह्रस्वत्वे को दोषः, अत आह — **कुक्कुटमयूरी इति**। दीर्घान्ते [12]'दीर्घाज्जसि च' इति पूर्वसवर्णनिषेधाद्यणादेशः। ह्रस्वत्वे तु पूर्वसवर्णदीर्घप्रसङ्ग इत्यर्थः। [13]नन्वेकेन लिङ्गशब्देन लिङ्गं तद्वाचकप्रत्ययरूपशब्दश्च कथं लभ्यते, अत आह — **लिङ्गशब्देनेति**। **प्रत्ययः** स्त्रीप्रत्ययः। **अर्थः** लिङ्गम्। एको लिङ्गशब्दो लक्षणया तद्वाचकप्रत्ययपरः, एकोऽर्थपरः, तयोरेकशेषे लिङ्गमित्येकवचनं सौत्रत्वादुपपन्नमित्यर्थः। भाष्ये **औपदेशिकस्येति**। 'कुक्कुटमयूर्यौ' इत्यत्र [14]समासकालिकस्य ङीप उपसर्जनत्वेन ह्रस्वत्वेऽपि[15] समासानन्तरमतिदिष्टस्य श्रवणं भविष्यतीत्यर्थः। आतिदेशिकस्यापि ह्रस्वत्वं किं न स्यात्, अत आह — **तस्यानुपसर्जनत्वादिति**। समासावयवार्थस्य [16]समुदायार्थे उपसर्जनत्वमित्यौपदेशिकस्योपसर्जनत्वम्, समासादुत्पन्नस्य तु नोपसर्जनत्वमित्यर्थः। युक्त्यन्तरमाह — **तदन्तस्य चेति**। [17]'गोस्त्रियोरुपसर्जनस्य' इत्यत्र पूर्वसूत्रात् [18]प्रातिपदिकस्येत्यनुवर्तत इत्यर्थः। यद्यप्यातिदेशिकस्य समासावयवत्वे तदन्तस्य समासप्रातिपदिकत्वमस्ति, तथापि प्रत्ययस्य परस्य पूर्वावयवत्वाभावात् तदन्तसमुदायस्य न[19] प्रातिपदिकत्वमिति भावः। भाष्ये प्रत्ययातिदेशे दोषाभिधानार्थं 'दत्ता च' इत्यादि। तत्राविकृतप्रत्ययद्वयश्रवणप्रसङ्गापादनभ्रान्तिं निराह — **तत्रेति**। पूर्वस्य लोपे [20]द्वयाभावः, अत आह — **हल इति**। तया च पक्षे यकारद्वयप्रसङ्ग इत्यर्थः। [21]नन्वेकप्रत्ययपक्षेऽपि मयः परस्य यणो द्विर्वचनाद्यकारद्वयं

---

[1] पूर्वस्मादभिन्नमित्याह — अ.
[2] भेदे गौण — अ.
[3] समासार्थावयवार्थगत — ऋ.
[4] निवृत्तिः सिध्यतीति लुग्वचनं — ऋ.
[5] पा. सू. २. ४. १२.
[6] 'इत्यर्थः' इति नास्ति — अ.
[7] पा. सू. २. ४. २७.
[8] एवकारो नास्ति — अ.
[9] विशेषाश्रयणात् — अ.
[10] पा. सू. २. २. २९.
[11] पा. सू. १. २. ४३.
[12] पा. सू. ६. १. १०५.
[13] नन्वेकलिङ्गशब्देन — अ.
[14] समासकालीनस्य — अ.
[15] अपिशब्दो नास्ति — अ.
[16] 'समुदायार्थे' इति नास्ति — अ.
[17] पा. सू. १. २. ४८.
[18] प्रातिपदिकान्तस्येत्यनुवर्तत इत्यर्थः — अ, ऋ.
[19] 'न' इति नास्ति — अ.
[20] द्वयाभावादत आह — अ.
[21] नन्वनेकप्रत्यय — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नानिष्टम्, अत आह — **यद्यपीति** । **पक्षे** लोपाभावपक्षे । 'दत्तागार्ग्यायण्यौ' इत्यत्र ष्फद्वयस्य श्रवणप्रसङ्गः स्थित इत्येव । **भस्येति** । पूर्वस्य पुंवद्भावेन निवृत्तिरित्यर्थः । 'उपसर्जनह्रस्वत्वं च' इति यदुक्तं तदपि न संभवतीत्याह — **उपसर्जनेति** । **अन्वर्थेति** । [1]'अनेकम्' इति प्रथमानिर्दिष्टत्वेऽपीत्यर्थः । द्वन्द्वेऽन्वर्थोपसर्जनत्वं [2]नास्तीत्याह — **सकलेति** । ननु समुदायार्थत्वपक्षेऽवयवार्थस्योपसर्जनत्वं स्यात्, अत आह — **व्यतिरिक्तेति** । 'अभ्युपगमेऽपि' इत्यपिना स पक्षो मन्द इति सूचितम् । **कार्येति** । आनयनादिरूपेत्यादिः । **फलतः** शब्दतः । समुदायप्राधान्येऽपि कार्यतोऽवयवानामेव प्राधान्यमिति भावः । पूर्वस्मादस्पष्टं भेदं दर्शयति — **नायमिति** । [3]एवार्थे वत्यभावात् [4]'परस्यैव' इत्ययुक्तम्, अत आह — [5]**एवशब्दस्येति** । ननु नियमपक्षे परस्यैव लिङ्गं परस्य क्रियत इति भेदाभावाद्वतिनिर्देशोऽनुपपन्न इति स पक्षो वतिनिर्देशेनैव निरवकाशः, अत आह — **यथा चेति** । [6]'केवलाकेवलावस्थाभेदेन तदुपपत्तिरुक्तेत्यर्थः । नियमविध्योर्विषयभेदं सुखग्रहणार्थं दर्शयति — **इहेति** । [7]**पूर्वमिति** । 'द्वन्द्वोऽयमुभयपदार्थप्रधानः' इत्यादिनेत्यर्थः । [8]'अथ पुनरिति । 'यदि पुनर्यथाजातीयकम्' इत्यादिनेत्यर्थः । [9]**व्यतिरिक्तेति** । 'अथवा' इत्यनेनेत्यर्थः । निपातानामनेकार्थत्वात् 'अथ'शब्दोऽतःशब्दार्थ इत्याह — **अत इति** । विधिपक्षे 'पूर्वपदस्य च' इति प्रतिषेधो न वक्तव्य इति भाष्यार्थः । एतद्भाष्यस्य प्रयोजनमाह — **एतेनेति** । पूर्वपदस्य [10]परलिङ्गातिदेशपक्षे एतद् दूषणम्, समासार्थस्य लिङ्गातिदेशपक्षे तु नास्तीत्यर्थः । नन्ववयवलिङ्गेन लिङ्गवान् समुदायः समासार्थ इति मध्यमपक्षे समुदायावयवयोर्लिङ्गभेदाभावाद्वतिनिर्देशो न युक्तः, अत आह — **षष्ठीति** । पूर्वपदस्य प्रतिषेधावचनार्थं षष्ठ्याश्रयेण मतत्रयप्रवृत्त्यनुवादः 'दर्शनत्रयेऽपि' इत्युक्तिः । [11]सति मध्यमे दर्शन इत्यन्वयः । समुदायावयवरूपाश्रयभेदात् । एकदेशिसमासशब्देन सूत्रत्रयं विवक्षितमित्याह — **पूर्वापरेति** । **एतावच्चेति** । तथा प्राप्तादिषु प्रतिषेधो न वक्तव्य इत्यर्थः । सामानाधिकरण्यमुपपादयति — **अवयव इति** । अनेन भाष्येण तत्पुरुषग्रहणवैयर्थ्यं सूचितमित्याह — **तत्रेति** । समानाधिकरणसमासे सतीत्यर्थः । तत्र दैवकृतं परवल्लिङ्गमिति भावः । व्यधिकरणषष्ठीसमासापेक्षया समानाधिकरणसमासस्य भिन्नविषयत्वेन द्वयोर्युगपत्प्राप्त्यभावाद्विप्रतिषेधायोगादाह — **अयमर्थ इति** । **नर्त इति** । पिप्पलीशब्दस्य लक्षणयावयवपरत्वं विना सामानाधिकरण्यं न संभवति । तत्र प्रयोजनं विना लक्षणा नाङ्गीक्रियते । तथा च पिप्पलीशब्दस्य मुख्यार्थत्वाय षष्ठीसमास एव युक्तो न कर्मधारय इति विवक्षितोऽर्थः । भेदाश्रयणमेव युक्तम्, [12]न सामानाधिकरण्यमित्यर्थः । अस्मिन्नर्थे भाष्यस्थपरशब्दं योजयति — **परं मुख्यमिति** । **ततश्चेति** । पिप्पलीशब्द[13]मुख्यार्थत्वानुरोधादित्यर्थः । एवं व्याख्याने हेतुमाह —

---

[1] पा. सू. २. २. २४.

[2] नास्तीत्यत आह — अ.

[3] एकार्थे — अ.

[4] पदस्यैव — अ.

[5] प्रदीपे 'एवशब्दप्रयोगेण' इत्यत्र 'एवशब्दस्य प्रयोगेण' इति व्यस्ततयान्नंभट्टपाठ इति भाति ।

[6] केवलावस्थाभेदेन — ऋ.

[7] प्रदीपे 'अवयवावेवापेक्षितपरस्परौ' इत्यतः प्राक् 'पूर्वम्' इति पाठोऽन्नंभट्टस्येति भाति ।

[8] प्रदीपे 'अवयवार्थव्यतिरिक्तः' इत्यतः प्राक् 'अथ पुनः' इति पाठोऽन्नंभट्टस्येति भाति ।

[9] प्रदीपे 'यदा तु समुदायो द्वन्द्वार्थः' इत्यत्र 'यदा तु व्यतिरिक्तसमुदायो द्वन्द्वार्थः' इत्यन्नंभट्टपाठः स्यादिति भाति ।

[10] परवल्लिङ्गातिदेशपक्षे तद् दूषणम् — अ.

[11] प्रदीपे 'मध्यमे तु दर्शने' इत्यत्र 'मध्यमे सति दर्शने' इत्यन्नंभट्टपाठ इति भाति ॥ सति मध्यमदर्शने — अ, ऋ.

[12] 'न' इति नास्ति — अ.

[13] मुख्यार्थानुरोधादित्यर्थः — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भिन्नेति । सामानाधिकरण्ये कर्मधारयः, वैयधिकरण्ये षष्ठीसमास इत्युभयोर्युगपत्प्राप्त्यभावान्न शास्त्रीयविप्रतिषेधसंभव इत्यर्थः । 'नर्ते प्रयोजनात्' इति यदुक्तं तत्राह — **एवमादीति** । मुख्यानुरोधेनायं प्रयोग एव त्यज्यताम्, अत आह — **मुनिद्वयादिति** । तत्र हेतुः — **अधिकेति** ।।

[२, ८५७–८६२]

(रत्नप्रकाशः) 'द्वन्द्वतत्पुरुषयोः' इति सप्तम्यन्तं चेत् परपदार्थस्येव पूर्वपदार्थस्य लिङ्गं भवतीति सूत्रार्थः । षष्ठ्यन्तं चेत् परपदार्थस्येव समासार्थस्य लिङ्गं भवतीति । उभयत्र दोषदर्शनात् पृच्छति — **किमर्थमिति** । एतेन 'द्वन्द्वापेक्षया किमिदं विध्यर्थम्, आहोस्विन्नियमार्थम्, तथा किं षष्ठीनिर्देशेन समासार्थस्य लिङ्गातिदेशः, अथ सप्तम्याश्रयेण पूर्वपदस्येति संशयानः पृच्छति' इति निरस्तम् । द्वन्द्वांशे विधिकोटेरनुत्थित्या प्रथमसंशयस्यानुत्थानात् । वक्ष्यमाणदोषसूचननैरपेक्ष्येण द्वितीयसंशयकथनमात्रेण प्रश्नोपपादने न्यूनतादोषाच्च । अन्यत्र हि तेनाप्येवंजातीयके स्थले वक्ष्यमाणदोषसंस्पर्शेन प्रश्न उपपादितः । पक्षद्वयसाधारण्येन प्रयोजनमाह — **द्वन्द्वोऽयमिति** । एतेन 'षष्ठीनिर्देशो नियमश्चेति भावः' इति निरस्तम् । सप्तमीनिर्देशेऽपि परपदस्येव पूर्वस्य लिङ्गातिदेशे [1]द्वन्द्वस्यैकलिङ्गतासिद्धेः । विधिर्वा नियमो वेति संदेहेन प्रश्नमुपपादयता विधिपरित्यागे कारणस्यावश्यं वक्तव्यत्वाच्च । **कदाचिदिति** । यौगपद्यासंभवादिति भावः । **तदिति** । तदेवेत्यर्थः । **यः पूर्वपदार्थप्रधान इति** । सप्तमीनिर्देशपक्षेऽपि पूर्वस्य परवल्लिङ्गातिदेशे तत्प्रधानत्वात् समासस्य तल्लिङ्गतासिद्धिः । यत्तु 'यद्येवं परस्यैव संबन्धि लिङ्गं क्रियत इति सादृश्याभावाद्वतिनिर्देशो नोपपद्यते' इति । तत्तुच्छम्, अन्यसंबद्धस्य धर्मस्यान्यत्रातिदेष्टुमशक्यत्वेन व्यपदेशातिदेशेनेष्टसिद्ध्या च लिङ्गस्याभेदप्रयुक्तदोषकथनस्यानौचित्यात् । अत एव 'नैष दोषः, केवलाकेवलावस्थाभेदाश्रयेण भेदमाश्रित्य वतिनिर्देशः कृतः' इत्यपि निरस्तम् । [तथा] सत्यपि स्वतः सिद्धधर्मस्यातिदेशासंभवात् । इदानीमुभयपक्षावलम्बेन तावदतिव्याप्तिमुद्भावयति — **परवल्लिङ्गमिति** । सप्तमीनिर्देशाश्रयेणातिव्याप्तिमाह — **पूर्वपदस्य चेति** । **मयूरीकुक्कुटाविति** । अत्र पूर्वस्य परवल्लिङ्गातिदेशे ङीषो निवृत्तिः स्यादिति भावः । उपलक्षणमिदं 'कुक्कुटमयूर्यौ' इत्यत्र कुक्कुटशब्दात् ङीष्[2] स्यादित्यस्य । इदानीं 'पूर्वपदस्य च' इत्युक्तं दोषं षष्ठीनिर्देशाश्रयेण परिहरति — **यदि पुनरिति** । **समासादिति** । पर्यायप्राप्तसमासार्थलिङ्गादित्यर्थः । **अन्यदिति** । नियतमित्यर्थः । एतेन 'षष्ठीनिर्देशो व्यतिरिक्तसमुदायदर्शनं चाश्रीयते । व्यतिरिक्तसमुदायपक्षे हि मुख्यसादृश्योपपत्तिः । तेनोत्तरपदार्थलिङ्गसदृशं समासार्थस्य स्वलिङ्गबाधनाय लिङ्गान्तरमतिदिश्यत इत्युक्तं भवति' इति निरस्तम् । अतिरिक्तसमुदायपक्षे समासार्थलिङ्गस्याप्रसिद्ध्या 'तद्बाधकतया तदन्यल्लिङ्गमतिदिश्यते' इति वदतो व्याघातः, तत्परिहारायानतिरिक्तपक्षस्यैवाश्रयितुं युक्तत्वात् । लिङ्गस्यातिदेष्टुमशक्यत्वेन सादृश्यस्य मुख्यत्वकथनस्याजागलस्तनायमानत्वाच्च । अत्र षष्ठीपक्षाश्रयणे [3]उत्तरसूत्रेऽपि तदाश्रयणाद्दोष इत्याह — **समासादिति** । **अश्ववडवाविति** । प्रकृतसूत्रेण परवल्लिङ्गतायां प्राप्तायां [4]'पूर्ववदश्ववडवौ' इति पूर्वलिङ्गातिदेशः समासार्थस्य क्रियत इत्युत्तरपदलिङ्गानिवृत्त्या टापो निवृत्तिर्न प्राप्नोतीति भावः । **निपातनात् सिद्धमिति** । टापो

---

[1] परपदस्य पूर्वपदस्य चैकलिङ्गत्वाद् उभयपदार्थप्रधानद्वन्द्वे उभयपदार्थलिङ्गस्यापि पर्यायेणातिदेशेऽप्येकलिङ्गत्वस्यैव सिद्धेरिति भावः ।

[2] ङीप् स्यादित्यस्य — ब.

[3] पूर्ववदश्ववडवाविति सूत्र इत्यर्थः ।

[4] पा. सू. २. ४. २७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

निवर्तनमिति शेषः। **अश्ववडवपूर्वापरेति।** तत्र टापोऽनुच्चारणं निपातनम्। एवं [१]"पूर्ववदश्ववडवौ' इत्यपि निपातनं ज्ञेयम्। एतेन "[२]"पूर्ववदश्ववडवौ' इति निपातनमाश्रयितुं न युज्यते। वचनान्तरे 'अश्ववडवान्' इत्यादौ पूर्वपदलिङ्गातिदेशाप्रसङ्गात्" इति निरस्तम्। रूपविशेषगतस्यापि निपातनस्य सामान्यापेक्षाश्रयणे बाधकाभावात्। अन्यथा [३]"अश्ववडवपूर्वापर' इत्यत्रापि पूर्वापरशब्दपरत्व एव निपातनं स्यात्। तथा [४]"सर्वनामानि' इति णत्वाभावनिपातनं प्रथमाबहुवचनविषयकं स्यात्। प्रौढिमाश्रित्य शङ्कितृबुद्धिपरीक्षार्थं समाधानान्तरमाह — **उपसर्जनह्रस्वत्वं वेति।** समासार्थस्यातिरिक्तत्वं तत्रावयवार्थस्य गुणत्वं च कल्पनीयमिति मन्यते। दुष्टं तत्कल्पनमित्याहाक्षेप्ता — **इहापीति। प्राप्नोतीति।** उपसर्जनह्रस्व[त्वम्] इत्यनुषज्यते। तथा च कुक्कुटमयूरी[५] इति स्यादिति भावः। तत्परिहारसाधारण्येनान्यथा सूत्रार्थमाश्रयति — **अस्त्विति। लिङ्गमिति शब्दशब्दार्थाविति।** लिङ्गशब्देन लिङ्गं तदभिधायी प्रत्ययश्च बोध्यत इत्युभयातिदेश इति भावः। **आतिदेशिकस्य श्रवणमिति।** तस्यानुपसर्जनत्वादिति भावः। एतेन 'तदन्तस्य प्रातिपदिकत्वाभावात्' इति निरस्तम्। प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात्। **द्वौ ष्यङाविति।** तत्र [६]"यस्येति च' इत्याकारलोपे कृतेऽपि यकारद्वयश्रवणं स्यादिति भावः। ननु तत्र [७]"यणो मयः' इति द्वित्वेन भाव्यमेव, व्यञ्जनपरस्य व्यञ्जनस्यैकस्यानेकस्य वोच्चारणे च भेदो नानुभवारूढ इत्यत आह — **द्वौ ष्फाविति।** तथा च 'दत्तागार्ग्यायिणायन्यौ' इति स्यादित्यत्यन्तविलक्षणमनिष्टरूपं स्यादिति भावः। **पुंवद्भावेनेति।** "भस्याढे तद्धिते' इत्यनेनेति शेषः। **द्वौ तिशब्दाविति।** तत्र ह्यभत्वान्नास्ति पुंवद्भावः। **तस्मादिति।** यस्मात् 'दत्तायुवतिती' इत्यनिष्टं प्राप्नोति, तस्मादित्यर्थः। तमाक्षेप्तारं पृच्छति मध्यस्थः कश्चित् — **ननु चेति।** आक्षेप्तोत्तरमाह — **परिहृतमिति।** इदानीं भगवान् प्रौढिमाश्रित्य द्वन्द्वस्यावयवार्थातिरिक्तलिङ्गशून्यार्थकत्वमाश्रित्य द्वन्द्वांशेऽप्यप्राप्तलिङ्गसंबन्धफलक एवायमतिदेशः, न तु नियमफलक इत्याशयेनाह — **अथवेति। परस्यैवेति।** परस्यैव लिङ्गं भवत्विति नियमफलकोऽयमतिदेश इति न विज्ञायत इति भावः। न ह्येवकारार्थे वतिरस्ति। **परस्येवेति।** अप्राप्तलिङ्गसंबन्धफलक आश्रीयत इति भावः। **अथेति।** एवमपीत्यर्थः। सप्तमीनिर्देशाश्रयण एव हि 'मयूरीकुक्कुटौ' इत्यादौ ङीप्निवृत्त्यादिरूपः स दोष इति भावः। वस्तुतस्तु द्वन्द्वस्य सर्वपदार्थप्राधान्यसिद्धान्तविरोधेनावयवार्थातिरिक्तार्थकल्पने मानाभावादयुक्त एवायं पक्षः। एतेन 'अत इत्यर्थः' इति निरस्तम्। नियमफलकतापक्षेऽपि पूर्वपदप्रतिषेधाभावस्य सिद्धत्वेन तदसिद्धिसूचकहेतुपरव्याख्यानानौचित्यात्। तत्पुरुषांशेऽतिप्रसङ्गपरिहारः कथमिति पृच्छति — **प्राप्तादिषु कथमिति।** सूत्रे तत्पुरुषग्रहणमेव प्रत्याख्यायते, तस्यैकदेशिसमासमात्रविषयत्वात्, एकदेशिसमासस्य प्रत्याख्येयत्वाच्चेत्याशयेनाह — **प्राप्तादिषु चेति। अर्धं च सा पिप्पली चेति।** अवयवे समुदायतादात्म्यारोपात् सामानाधिकरण्यम्। तत्र चकारो निरर्थको वाक्यालङ्कारार्थः प्रयुक्तः। **परत्वादिति।** औपचारिकाभेदविवक्षायां प्राप्तं कर्मधारयं वास्तविकभेदाश्रयः षष्ठीतत्पुरुषः परत्वाद्बाधत इति मन्यते। एतेन "अयमर्थः — [८]"तर्ते प्रयोजनादिष्टं मुख्यशब्दार्थलङ्घनम्' इति भेदाश्रयणमेव परं मुख्यं प्रधानम्। तथा च षष्ठी-

---

[१] पा. सू. २. ४. २७.
[२] पा. सू. २. ४. २७.
[३] पा. सू. २. ४. १२.
[४] पा. सू. १. १. २७.
[५] ह्रस्वे प्रथमाद्विवचनमिदम्।
[६] पा. सू. ६. ४. १४८.
[७] का. वा. ८. ४. ४७–१.
[८] का. वा. ६. ३. ३५–११.
[९] श्लोकार्धोऽयं हेतुबिन्दुटीकायां पृ. १२ उदाहृतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

समास एव प्राप्नोति। भिन्नविषयत्वात्तु शास्त्रापेक्षं परत्वमत्र न विवक्षितम्" इति निरस्तम्। "नर्ते प्रयोजनात्' इति श्लोकार्धस्य केनचिदालङ्कारिकेण शास्त्रमर्यादानभिज्ञेन कृतस्य सर्वत्रैच्छिकौपचारिकप्रयोगनिवारकत्वासंभवात्। प्रकृतभाष्यस्य शास्त्रापेक्षपरत्वाभिप्रायेणोपपन्नत्वेनात्यन्तक्लिष्टकल्पनया व्याख्यानानौचित्याच्च। परत्वात् षष्ठीसमास एवाभ्युपगत इति मन्यमानः पृच्छति— **कथमिति। समानाधिकरण इति।** वस्तुस्वभावेन न कापि विभक्तिः प्रवर्तते, न कोऽपि समासः। किं तु विवक्षानुसारेणैव तत् सर्वमङ्गीकर्तव्यम्। तथा च सामानाधिकरण्यविवक्षायां कर्मधारयः, भेदविवक्षायां तु षष्ठीतत्पुरुष इत्युभयं सिध्यति। विवक्षाद्वयस्य यौगपद्यासंभवेन विप्रतिषेधसूत्रस्य त्वयमविषय इति भावः। एतेन 'एवमादिप्रयोगसिद्धिरेवोपचाराश्रयस्य प्रयोजनम्' इति निरस्तम्। सर्वत्र तत्तत्प्रयोगसिद्धेः प्रयोजनत्वसंभवेन श्लोकार्धस्य प्रागुक्तस्य निर्विषयत्वापत्तेः। तदेवं भगवता 'पूर्वपदार्थप्रधानोऽव्ययीभावः' इत्यादीन्यव्ययीभावादिलक्षणान्यभ्युपगच्छतैकदेशिसमासः प्रकृतसूत्रे तत्पुरुषग्रहणं च प्रत्याख्यातम्। यथोत्तरं च मुनीनां प्रामाण्यम्॥

रात्राह्नाहाः पुंसि २. ४. २९.

[२, ८६२]

(उद्द्योतनम्) वचनस्यावश्यकतामाह — **अनूच्यत इति।** कर्मणि घञन्तस्य विशेष्यलिङ्गत्वादित्यर्थः॥

[२, ८६२]

(रत्नप्रकाशः) अनुवाक इति। अनूच्यतेऽनेनेत्यनुवाकः। बाहुलकात् करणे घञ्। अनूच्यते यः स इति कर्मणि वा। इदं तु [२]"घञबन्तः पुंसि"[३] इति लिङ्गानुशासनमनालोच्योक्तं ज्ञेयम्। सर्वं ह्यष्टाध्यायीस्थलिङ्गानुशासनं पृथक्स्थितलिङ्गानुशासनानालोचनमूलकम्। एतेनैतद्वार्तिकानुसारेण [४]"घञबन्तः' इति लिङ्गानुशासने घञ्ग्रहणं भावघञ्परमिति वदन्तो निरस्ताः। तस्य तत्परत्वे आनर्थक्यस्य [५]"इको गुणवृद्धी' इति सूत्रे प्रपञ्चितत्वात्॥

अपथं नपुंसकम् २. ४. ३०.

[२, ८६३–८६४]

(उद्द्योतनम्) वचनावश्यकतामाह — **रात्रेति।** दिनाहःशब्दयोः पर्यायत्वात् सहप्रयोगो न युक्तः, अत आह — **सुदिनशब्द इति। सुदिनास्विति।** अत्र प्रशस्तवाचित्वं विना सभासामानाधिकरण्यं न संभवति। **षष्ठीति।** चतुर्णां पन्थाः, [६]"ऋक्पूः' इत्यकारः समासान्तः। **सिद्ध-**

---

[१] हेतुबिन्दुटीकायां पृ. १२ उदाहृतः
[२] लिङ्गानुशासनसूत्रम् ३६.
[३] 'पुंसि' इति त्वधिकारप्राप्तार्थानुवादः।
[४] लिङ्गानुशासनसूत्रम् ३६.
[५] पा. सू. १. १. ३.
[६] पा. सू. ५. ४. ७४.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मिति। [1]''द्विगुश्च' इत्यनेन। **कुगतीति**। पथ उद्गतः पथिव्यतिरिक्तो देशः **उत्पथम्**। उत्पथाद्यर्थं वार्तिकस्यावश्यकत्वात् [2]सूत्रवैयर्थ्यं शङ्कते — **अव्ययेति**। **पूर्वकालत्वादिति**। सूत्रानुक्तस्य वार्तिककृता वक्तव्यत्वात् तदतिरिक्ताव्ययपरमेव वार्तिकमिति भावः। तच्छब्देनानन्तरस्यैव परामर्शे दृष्टान्तः — **यथेति**। तत्र प्रातिपदिकार्थसूत्रविहितप्रथमा न गृह्यते, तया व्यवधानात्। 'पञ्चकपालः' इत्यादिव्यावृत्त्यर्थमाह — **समाहारेति**। व्याख्यानात्। ननु समाहारद्विगौ समाहारैकत्वादेकवचनम्, नपुंसकत्वं च प्रयोगात् सिद्धमिति वचनानर्थक्यम्, अत आह — **यदेति**। समाहारशब्दस्य कर्मसाधनत्वपक्ष इत्यर्थः। परवल्लिङ्गसूत्रे तत्पुरुषग्रहणाभावेऽप्याह — **प्राधान्यादिति**। भावसाधनत्वपक्षेऽप्याह — **यदा त्विति**। यद्यपि वनादिवद्वचनं विनापि प्रयोगादेव नपुंसकत्वं सिद्धम्, तथापि परवल्लिङ्गसूत्रे तत्पुरुषग्रहणस्य सूत्रकृदभिमतत्वात् तद्बाधनायेदमिति भावः। ननु नपुंसकह्रस्वत्वं विनादन्तत्वाभावात् कथमकारान्ताद् द्विगोर्विहितो ङीप्, अत आह — **उपसर्जनेति**। [3]''गोस्त्रियोः' इत्यनेन। उपसर्जनत्वमेव कथम्, अत आह — [4]**यदा चेति**। समाहारशब्दस्य [5]भावसाधनत्वपक्षे वर्तिपदार्थस्योपसर्जनत्वमित्यर्थः। **न त्विति**। कर्मसाधनपक्षे वर्तिपदार्थस्य प्रधानत्वात् खट्वाशब्दस्य समासशास्त्रे प्रथमानिर्देशाभावाच्चोपसर्जनत्वाभावात् [6]'ह्रस्वाप्रसङ्ग इति [7]'तद्धितार्थोत्तरपदसमाहारे च' इत्यत्र स्वयमुक्तमित्यर्थः। अत्र [8]''पञ्चखट्वी' इति नित्यमेव स्त्रीत्वपक्षे रूपम्। तेन समाहारशब्दो भावसाधन एवेति केचित्। अन्ये तु भावसाधन इदं रूपम्, कर्मसाधने 'पचखट्वा' इति भवतीत्याहुः। ननूपसर्जनत्वाभावे कथं पञ्चखट्वमिति ह्रस्वः, अत आह — **पञ्चखट्वमिति**। **उपसर्जनत्व इति**। समूहप्राधान्यपक्षे। **तदाश्रयम्** [9]'उपसर्जनत्वाश्रयम्। [10]**परत्वात्** नपुंसकह्रस्वत्वादुपसर्जनह्रस्वत्वस्य परत्वात्। **चशब्देनेति**। तदेव भाष्ये विवृतमित्यर्थः। लोपस्य तु न विकल्प इत्याह — **नलोपस्त्विति**। ननु प्रत्ययलक्षणेन पदसंज्ञायां [11]'न लोपः प्रातिपदिकान्तस्य' इत्येव राजाश्व इत्यादाविव [12]'नलोपसिद्धौ लोपविधानं व्यर्थम्, अत आह — **उत्तरपदत्वे चेति**। [13]'न लुमता' इति सूत्रस्थमिदं वार्तिकम्। उत्तरशब्दस्य पदसंज्ञायां कर्तव्यायां प्रत्ययलक्षणं न भवति, परमवाचा। अत्र प्रत्ययलक्षणेन पदत्वाभावात् कुत्वं न भवति। अपदादिविधाविति किम्, दधिसेचावित्यत्र [14]''सात्पदाद्योः' इति षत्वनिषेधे प्रत्ययलक्षणेनोत्तरपदस्य [15]'पदसंज्ञा भवत्येव। पञ्चमीभ्रमं वारयति — **तादर्थ्य इति**। 'पञ्चपात्रम्' इत्यादिसिद्धयर्थं 'द्विगुः स्त्रियाम्' [16]''वा टावन्तः' इत्यस्य च प्रतिषेधो वक्तव्य इत्यर्थः॥

---

[1] अत्र सूत्रे पठितेन वार्तिकेनेत्यर्थः॥ एतेन प्रदीपे 'समाहारद्विगौ तु द्विगुश्चेति सिद्धमेव' इत्यत्र 'द्विगुश्च' इत्यन्नंमट्टपाठे नास्तीति ज्ञायते।

[2] सूत्रे वैयर्थ्यं — अ.

[3] पा. सू. १. २. ४८.

[4] प्रदीपे 'यदा तु समूहोऽभिधेयः' इत्यत्र 'यदा च समूहोऽभिधेयः' इत्यन्नंमट्टपाठ इति भाति।

[5] भावप्रधानपक्षे — अ.

[6] ह्रस्वप्रसङ्ग इति — ऋ.

[7] पा. सू. २. १. ५१.

[8] पञ्चखट्वेति — अ, ऋ.

[9] उपसर्जनाश्रयम् — अ.

[10] प्रदीपे 'परत्वात् तदाश्रयम्' इत्यत्र 'तदाश्रयं परत्वात्' इत्यन्नंमट्टपाठ इति प्रतीयते।

[11] पा. सू. ८. २. ७.

[12] नलोपसिद्धेः — ऋ.

[13] पा. सू. १. १. ६३.

[14] पा. सू. ८. ३. १११.

[15] 'पद' इति नास्ति — अ.

[16] 'वाबन्तः' इत्यस्यार्थानुवादः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८६३–८६४]

(**रत्नप्रकाशः**) **पुण्याहमिति**। [1]"रात्राह्नाहाः पुंसि' इति पुंस्त्वे प्राप्ते वचनम्। **सुदिनाहमिति**। सुदिनशब्दोऽत्र प्रशंसावाची। तेन दिनाहश्शब्दयोः सह प्रयोगो न विरुद्धः। दृश्यते च प्रशंसायां सुदिनशब्दप्रयोगः 'सुदिनासु सभासु कार्यमेतत् प्रविचिन्वीत विशेषतः स्वयं च' इति। **द्विपथमिति**। षष्ठीतत्पुरुषोऽयम्, समाहारद्विगोस्त्वेकवद्भावे सति [2]"स नपुंसकम्' इत्येव सिद्धेः। **उत्पथमिति**। उद्गतः पन्था इति प्रादिसमासे उत्तरपदार्थानुसारेण पुंस्त्वे प्राप्ते वचनम्। एतेन 'अव्ययादित्वादपथशब्दस्य नपुंसकत्वे सिद्धे किं सूत्रेण' इति निरस्तम्। [3]अव्ययादेर्नपुंसकत्वे मानाभावात्। अत एव 'पूर्वकालत्वात् सूत्रस्य न दोषः' इत्यपि निरस्तम्। सूत्रस्य यदपेक्षया पूर्वत्वं तस्यानिर्दिष्टत्वेनासंवद्धप्रलापत्वात्। **द्विगुश्चेति**। [4]"स नपुंसकम्' इत्यत्र तच्छब्देन द्वन्द्व एव परामृश्यत इति मन्यते। वस्तुतस्तु यस्यैकवद्भावः स सर्वस्तेन परामृश्यत इति व्यर्थमिदं वचनम्। **पञ्चगवमिति**। उत्तरपदार्थप्राधान्यात् समाहारस्य पुंस्त्वाद्वा पुंस्त्वं प्राप्तमत्र। एतेन 'यदा समूहोऽभिधीयते तदा तस्य वनं सेना संघ इत्यादिवदनियतलिङ्गत्वं प्राप्तमिति वचनम्' इति निरस्तम्। वनसेनासंघशब्दानामपर्यायत्वेन समाहारसमूहसंघादीनां पर्यायाणां प्रायेण पुंस्त्वदर्शनेन समाहारशब्देन पुँल्लिङ्गेन निर्दिष्टेऽर्थे विहितस्य समासस्योत्सर्गतः पुंस्त्वौचित्येन चानियतलिङ्गप्राप्त्युक्तेरयुक्तत्वात्। **अकारान्तोत्तरपद इति**। अदन्तोत्तरपद इति विवक्षितम्। द्विगोरदन्तात् स्त्रियां ङीपं विदधता सूत्रकारेणैव हि ज्ञापितोऽयमर्थो वार्तिककृता स्पष्टीकृतः। तथा च [5]"ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वप्रवृत्त्युत्तरं प्रकृतवचनप्रवृत्तौ 'द्विसोमपी' इत्यादि च सिध्यति। एवं [6]"वा टावन्तः' इत्युत्तरवचनेऽप्यस्योपस्थानात् 'अदन्तोत्तरपदो द्विगुष्टावन्तो वा स्त्रियाम्' इत्यर्थलाभात् नपुंसकह्रस्वोत्तरं स्त्रीत्वे सति ङीपि 'पञ्चखट्वी, पञ्चखट्वम्' इत्यादि सिध्यति। एवं च [7]"द्विगोः' इति सूत्र एव 'अदन्तोत्तरपदात्' इति वक्तव्यम्। 'वा टावन्तात्' इत्यादि वक्तुं युक्तम्। एतेन 'समूहेऽभिधेये उपसर्जनह्रस्वत्वे परत्वान्नपुंसकह्रस्वत्वं बाधित्वा प्रवृत्ते सति ङीपि पञ्चखट्वीति भवति' इति निरस्तम्। [8]"एकविभक्तावषष्ठ्यन्तवचनम्' इत्युपसर्जनतानिषेधेन[9] स्त्रीत्वेन विशेषविहितेन नपुंसकत्वस्य बाधितत्वेन च तन्मते पञ्चखट्वीति रूपासिद्धेः। यद्युच्येत — एकदेशिसमासविषयकोऽयं षष्ठ्यन्तप्रतिषेध इति। तन्न, संकोचे मानाभावात्। एकदेशिसमासस्य प्रत्याख्यानात्। पञ्च खट्वाः समाहृता इत्यर्थ एव समाहारद्विगुरित्येव [10]"द्विगुरेकवचनम्' इति वदतः सूत्रकारस्योत्तरपदार्थप्राधान्यं तत्पुरुषस्याश्रयतो भाष्यकारस्य चाभिमतत्वेनोपसर्जनत्वसंभावनाया अप्यभावाच्च। तस्मादत्र मामकेनैव पथा पञ्चखट्वीसिद्धिः। **अनो नलोपश्चेति**। 'वा स्त्रियाम्' इति चेनानुकृष्यते। तत्र नलोपो नित्यः, तत्र स्त्रीत्वं तु वैकल्पिकम्, तथैव व्याख्यातं भगवता। [11]"उत्तरपदत्वे चापदादिविधौ' इति प्रत्ययलक्षणप्रतिषेधादप्राप्तो नलोपस्तत्र विहितः। **पात्रादिभ्यः प्रतिषेध इति**। पात्राद्यन्तेभ्यो द्विगुभ्यो ङीप् न भवतीति वाच्यमित्यर्थः।

---

[1] पा. सू. २. ४. २९.
[2] पा. सू. २. ४ १७.
[3] अव्ययादेरव्ययत्वे — ब.
[4] पा. सू. २. ४. १७.
[5] पा. सू. १. २. ४७.
[6] 'वावन्तः' इति वार्तिकस्यार्थानुवादः।
[7] पा. सू. ४. १. २१.
[8] का. वा. १. २. ४४–१.
[9] निषेधेन स्त्रीत्वे च विशेष — प; निषेधेनास्त्रीत्वे च विशेष — ब.
[10] पा. सू. २. ४. १.
[11] का. वा. १. १. ६३–६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथा चाकारान्तोत्तरपद इत्यादि वार्तिकचतुष्टयं [1]"द्विगोः' इति सूत्र एव कर्तुमुचितमिति सूचितम्। एतेन 'तादर्थ्ये चतुर्थीयम्' इति निरस्तम्। प्रतिषेधस्य [2]पात्राद्युपकारकत्वस्याप्रसिद्धेः। पात्रादिराकृतिगणः॥

अर्धर्चाः पुंसि च २. ४. ३१.

[२, ८६४–८६५]

(उद्द्योतनम्) नापूर्ववचनमिदम्, [3]किं तु बहुवचनस्य व्याख्यानमित्याह [भाष्ये] — **बहुवचनेति**। अर्धर्चशब्देन कार्षापणादयः कथमुच्यन्ते, अत आह — **साहचर्यादिति**। छत्रिन्यायेनाजहल्लक्षणयेत्यर्थः॥

[२, ८६४–८६५]

(रत्नप्रकाशः) अर्धर्चशब्दस्तदादिलक्षको भवति, बहुवचननिर्देशात्, गणपाठसत्त्वाच्चेत्यविद्वानाह — **अर्धर्चादय इति वक्तव्यमिति**॥

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ २. ४. ३२.

[२, ८६५–८६७]

(उद्द्योतनम्) ननूक्तस्य पुनरुक्तिरन्वादेश इति व्यधिकरणे प्रसङ्गाभावाद्वचनं व्यर्थम्, अत आह — **पश्चादिति**। अनुः पश्चादर्थे, दिशिस्तूच्चारणक्रिय इति पश्चात्कथनवाच्यन्वादेशशब्द इत्यर्थः। **एनादेश इति**। इमं च यज्ञदत्तमित्यत्र 'एनं च' इति प्रयोगनिरासाय समानाधिकरणग्रहणमिति। [4]इदमैव पुनर्वचनमिति [5]भ्रान्तौ बीजमाह — **प्रत्यासत्त्येति**। वार्तिकोक्तं समानाधिकरणत्वमादाय मात्रशब्दस्य साकल्यवाचित्वमाह — **तत्रेति**। मुख्यद्वेषविषयत्वाभावादाह — **विपरीतत्वादिति**। अभिमतविरुद्धमित्यर्थः। भाष्ये **अथेति**। [6]"अश्' इति त्यक्त्वा 'इदमोऽन्वादेशेऽनुदात्तस्तृतीयादौ' इति सूत्रं कार्यम्। तत्र तृतीयादिरजादिर्हलादिश्च। आद्ये [7]"द्वितीयाटौस्स्वेनः' इत्यनेन भाव्यम्, द्वितीये "हलि लोपः' इतीदो लोपेऽकारमात्रमेव शिष्यत इत्यशादेशो व्यर्थ इत्यर्थः। स्मायाद्यादेशेन सुटा चाजादिपञ्चकस्य हलादित्वात् 'टायामोसि च' इत्युक्तम्। ननु तत्रापीदो लोपेन कथं न रूपसिद्धिः, अत आह — **साकच्कस्येति**। अभ्युपेत्याह — **नेति**। [8]मकारस्य स्थानित्वेन 'न वान्त्यस्य' इत्यस्यानुत्थानमाशङ्क्याह — [10]**त्यदादीति**। भाष्ये **येऽन्येऽ-**

---

[1] पा. सू. ४. १. २१.
[2] पात्राद्युपकारकस्याप्रसिद्धेः — प.
[3] किं च बहुवचनस्य व्याख्यानमाह — अ.
[4] इदमेन — अ.
[5] भ्रान्तिबीजमाह — अ.
[6] अशितीत्युक्त्वा — ऋ.
[7] पा. सू. २. ४. ३४.
[8] पा. सू. ७. २. ११३.
[9] मकारस्य स्थानित्वेन — अ.
[10] प्रदीपे 'त्यदादित्वादकारस्येत्यर्थः' इत्यत्र 'त्यदाद्यकारस्येत्यर्थः' इत्यन्नंभट्टपाठ इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कारस्यादेशा इति। पररूपदीर्घादयः। नन्वकारद्वयस्य स्वतन्त्रत्वात् प्रत्येकं विभक्त्युत्पत्तावाद्यस्य पदान्तत्वेन पररूपाभावात् सूत्रप्रयोगे चाकारद्वयस्य सवर्णदीर्घस्य वा श्रवणं स्यात्, अत आह — **समुदायादिति। अर्थवत्त्वादिति।** समुदायस्य विवेयतया तस्यैवानुकार्यत्वादनुकार्यानुकरणयोर्भेदविवक्षायां समुदायानुकरणस्यार्थवत्त्वमित्यर्थः। अभेदविवक्षायामर्थवत्त्वाभावाद्विभक्त्यनुत्पत्तावस्यापदान्तत्वं ज्ञेयम्। नन्वादेशात् पूर्वं पररूपे सर्वादेशो न प्राप्नोतीत्यत आह — **तत्रेति।** द्वयोच्चारणसामर्थ्यादिव पश्चात् पररूपमिति भावः। ननु 'अथवा' इत्यनेन सर्वादेशे युक्त्यन्तरं नोक्तम्, अत आह — **आदेशस्यैवेति। अनुदात्तत्वमात्रमिति।** [1]'ऊडिदम्' इत्यनेनान्तोदात्ताधिकारादन्तोदात्तादिदमः परस्या असर्वनामस्थानविभक्तेरुदात्तत्वं विधीयते। अन्वादेशेऽनुदात्तविधाने विभक्तेरनुदात्तत्वात् 'आभ्याम्' इति सर्वानुदात्तं भवति। प्रवृत्त्यप्रवृत्तिभ्यां तद्धितवैचित्र्ये हेतुमाह — **महेति।** अकजनुत्पत्तौ हेत्वन्तरमप्याह — **किं चेति।** अश्रूयमाणस्योत्पत्तावुपयोगाभावादित्यर्थः। अनुत्पत्तौ तु लाघवमित्याह — **एवं हीति॥**

[२, ८६५–८६७]

(रत्नप्रकाशः) **समानाधिकरणग्रहणमिति।** [2]आदेशविषयाभिन्नान्वादेशविषयस्येदमोऽश् वक्तव्य इति भावः। **इमं चेति।** पूर्ववाक्ये देवदत्तो भोजनकर्मत्वेनोपात्तः, अत्र तु यज्ञदत्त इति तयोरैक्याभावादत्राशादेशाभावः। नन्विदमा कथितस्य पुनरिदमा कथनमन्वादेशः, तथा च तत्र प्रसङ्ग एव नास्तीति मन्दबुद्धिशङ्कापनोदनायाह — **अन्वादेशश्चेति।** [3]**कथितानुकथित[मात्र]मिति।** कथनानुकथनमित्यर्थः। कथनं च विशिष्टवाक्यार्थस्य। तच्च वाक्येन भवति। तथा च पूर्ववाक्योपात्तवाचकस्योत्तरवाक्यगतस्येदमोऽशादेश इति फलितम्। एवं च [4]"निपात एकाच्' सूत्रगतम् 'ईषदर्थे' इत्यादि 'एतमातं ङितं विद्यात्' इत्यन्तमेकमेव वाक्यमिति तत्र [5]"द्वितीयाटौस्स्वेनः' इति वक्ष्यमाणेनैनादेशो न भवति। नन्वीषदादिषु य आद्वर्तते एतमातं ङितं विद्यादिति वाक्यद्वयं तद् भवति, तिङन्तपदद्वयघटितत्वात्, [6]"एकतिङ' इति हि वाक्यलक्षणमिति चेन्न, एको मुख्यस्तिङ तिङन्तं यस्मिन् तदेकतिङिति तदर्थत्वेन ईषदर्थादिषु वर्तते य एतमातं ङितं विद्यादित्यत्र 'वर्तते' इत्याख्यातार्थस्य कर्तुर्यच्छब्दार्थविशेषणत्वेन तस्य मुख्यतिङत्वाभावेन च तस्य वाक्यद्वयरूपताया असंभवात्। एवमेव हि चित्रा गावो यस्य स चित्रगुर्भवतीत्येकं वाक्यं भवति। एतेन [7]"किंचित् कार्यं विधातुमुपात्तस्य कार्यान्तिरं विधातुं पुनरुपादानमन्वादेशः' इत्यन्वादेशलक्षणं वदन्तो निरस्ताः। **आदेशः** उपदेशः, अज्ञातज्ञापनम्, **अनु** ततः पश्चादादेशोऽन्वादेश इत्यन्वादेशशब्दार्थस्य सर्वलोकप्रसिद्धत्वेन पाणिनेरुत्कृष्टाभ्यां वार्तिकभाष्यकाराभ्यां तथैव स्वीकृतत्वेन च कुतार्किकवत् स्वेच्छया यत्किंचिदन्वादेशनिर्वचनमाश्रित्य 'अन्वादेशे समानाधिकरणग्रहणम्' इति वार्तिकनिराकरणे चातुर्याभावात्। कथंचिदुच्छृङ्खलताश्रयणेऽप्यादेशविषयविषयकोऽनन्तर आदेशोऽन्वादेश इत्येव निर्वक्तुमुचितत्वाच्च। **तद् द्वेष्यमिति।** संकोचे मानाभावादिति भावः। **साकच्कार्थमिति।**

---

[1] पा. सू. ६. १. १७१.

[2] आदेशः—पूर्वं निर्देशः॥

[3] भाष्ये 'कथितानुकथनमात्रम्' इत्यत्र 'कथितानुकथितमात्रम्' इति पाठो निर्णयसागरमुद्रिते।

[4] पा. सू. १. १. १४.

[5] पा. सू. २. ४. ३४.

[6] का. वा. २. १. १–१०.

[7] इदं लक्षणं सिद्धान्तकौमुद्यां हलन्तपुंल्लिङ्गप्रकरण उक्तम्।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

साकच्कस्येद्रूपलोपो न भवति, अक इति प्रतिषेधात्। तल्लोपेऽपि 'अकाभ्याम्' इति स्यात्, न तु 'आभ्याम्' इतीति भावः। **अन्त्यस्येति**। परत्वात् त्यदाद्यत्वे पररूपे च सति तस्यैवायमकार आदेशः स्यादिति भावः। **येऽन्य इति**। [1]'सुपि च' इति दीर्घादय इत्यर्थः। **अ अ इति**। अकारद्वयात्मक आदेशो विवक्षित इति तत एव विभक्तिर्भवति, न तु पृथगकाराभ्याम्। तेन [2]'अतो गुणे' इति पररूपेण प्रश्लेषसंभवः। तथा च तदनुकार्यस्याकारद्वयस्यानेकाल्त्वात् सर्वादेशत्वे जाते तदनन्तरं पररूपे सिध्यतीष्टं रूपम्। **विचित्रास्तद्धितवृत्तय इति**। तस्मै प्रयोगाय हितास्तद्धिता इत्यन्वर्थसंज्ञाकरणसामर्थ्यात् प्रयोगानुसारेणैव तद्धितो भवति न त्वन्यथेत्यकचोऽप्रवृत्तौ हलि लोपेनेष्टसिद्धावशादेशो न कर्तव्य इति भावः। वस्तुतस्त्विदं प्रौढिवादमात्रम्, लक्षणैकचक्षुष्कार्थं कृतस्याशादेशस्य लक्ष्यैकचक्षुष्कताश्रयेण प्रत्याख्यानानौचित्यात्। अन्यथा समस्तव्याकरणशास्त्रस्यैव प्रत्याख्येयतापत्तेः॥

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ २. ४. ३.

[२, ८६७–८६८]

(उद्द्योतनम्) 'अत्र' 'अतः' इत्युदाहरण[3]द्वयोपादानम्। **लित्स्वर इति**। लिति परे प्रत्ययात् पूर्वमुदात्तमित्युदात्तत्वे। **शेषेति**। [4]'अनुदात्तं पदमेकवर्जम्' [5]इत्यनेन। **अशनुदात्तः** अनेन सूत्रेण। पूर्वमशादेशे [6]'निघाताभावात् प्रत्ययानुदात्तत्वं न सिध्येदित्यनुदात्तस्य[7] पश्चात्करणमुक्तम्। **एतावदिति**। [8]'अशनुदात्तार्थमित्यर्थः। कृतेऽप्यनुदात्तत्वे लित्स्वरप्राप्तेः सोऽपि नित्यः, अत आह — **लित्स्वरस्त्विति**। अनुदात्तविधानवैयर्थ्यप्रसङ्गादित्यर्थः। नन्वनुदात्तस्य लित्स्वरापवादत्वादत्र लित्स्वरप्रसङ्ग एव नास्तीति किं [9]नित्यानित्यत्वोपपादनेन, अत आह — **एतच्चेति**। अपवादत्वानङ्गीकारेऽपि नित्येनानित्यबाध उक्त इत्यर्थः। ननु 'लितः पूर्वः' इति वक्तव्यम्, [10]'तस्मिन्' इति परिभाषाया विधावेवोपस्थानेनानुवादेऽनुपस्थानात्, अत आह — **औपश्लेषिकेति**। एवं सप्तमीं प्रसाध्य पञ्चम्यभावे हेतुमाह — **उपपदेति**। **वर्षेति**। कर्मण्युपपदे पूरयतेर्णमुल् स्यात्, अस्य ऊलोपो वा वर्षप्रमाणे गम्ये। [11]'णेरनिटि' इति णिलोपे [12]'टिलोपे च पकाररेफमात्रं स्थितमित्युदात्तभावि नास्तीत्यर्थः। **कृदिति**। [13]'गतिकारकोपपदात् कृत्' इति विहितेन। [14]'एतदोऽन्' इत्यनेनैव सिद्धेऽश्ग्रहणमनुदात्तार्थम्॥

[२, ८६७–८६८]

(रत्नप्रकाशः) 'अत्र, अतः' इत्यत्र लित्स्वरेण प्रकृतेरुदात्तत्वे जाते शेषनिघातेनैव त्रतसिलो-

---

[1] पा. सू. ७. ३. १०२.
[2] पा. सू. ६. १. ९७.
[3] द्वयापादनम् — अ; द्वयोपादानात् — ऋ.
[4] पा. सू. ६. १. १५८.
[5] इति सूत्रेण — अ.
[6] शेषनिघाताभावादित्यर्थः।
[7] अशनुदात्तस्येत्यर्थः।
[8] 'अश्' इति नास्ति — अ.
[9] नित्यानित्योपपादनेन — अ.
[10] पा. सू. १. १. ६६.
[11] पा. सू. ६. ४. ५१.
[12] ऊलोप इत्यर्थः।
[13] पा. सू. ६. २. १३९.
[14] पा. सू. ५. ३. ५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

रनुदात्तत्वस्य सिद्धत्वेन प्रकृतेरनुदात्ताश्विधानाय 'एतदस्त्रतसोः' इत्येतावदेव सूत्रं कर्तुमुचितमित्याशयेन पृच्छति — **किमर्थमिति** । **नित्यमनुदात्तत्वमिति** । [1]"असति संभवे बाधनं भवति" इति मुख्यापवादलक्षणं न संभवति, लित्स्वरप्रवृत्त्युत्तरमनुदात्तप्रवृत्तिसंभवादिष्टसिद्धेश्च । अतो नित्यत्वेन परिहार आश्रितः । अनुदात्तविधानोत्तरं तु लित्स्वरो न प्रवर्तते, अनुदात्तविधानानर्थक्यापत्तेः । तदिदमाह — **लिति पूर्वं उदात्तभावी नास्तीति** । अकारो विद्यमानोऽप्युदात्तभावी नेति भावः । **प्रत्ययस्वरः प्रसज्येतेति** । अपवादे बाधित उत्सर्गप्रवृत्तेर्न्याय्यत्वादिति भावः । एतेन [2]"नान्तःपादम्' इति पूर्वरूपे प्रतिषिद्धेऽय्वोरप्रवृत्तिः[3], इति निर्युक्तिकमिति स्पष्टमेव । **गोष्पदप्रमिति** । [4]"वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम्' इति णमुलूलोपौ सह विहितौ । तत्रोदात्तभाविनोऽसंभव एव । गोष्पदशब्दाकारः प्रकृतिसंबन्धी नेति तस्य लित्स्वराप्रसङ्गः । लिति प्रत्ययात् पूर्वस्य विधीयमानमुदात्तत्वं प्रकृतेरेव हि न्याय्यम्, प्रकृतिप्रत्यययोः परस्परं संबन्धित्वात् । तथा च 'गोष्पदप्रम्' इति कृदुत्तरपदप्रकृतिस्वरेणान्तोदात्तं भवति ॥

द्वितीयाटौस्स्वेनः २. ४. ३४.

[२, ८६८–८७०]

(उद्द्योतनम्) ननु [5]"इदमो हः' इति ह्प्रत्ययेन त्रलो बाधात् कथं त्रल्यशादेशविधानमत्र, अत आह — **इदंशब्दादिति** । [6]त्रल्यशादेशविधानसामर्थ्यात् पक्षे त्रलपि भविष्यतीत्यर्थः । [7]चेतनत्वाभावेनोत्प्लवनासंभवात् पूर्वत्रासंबन्धेऽत्र संबन्धे च हेतुमाह — **इह केवलस्येति** । अर्थभेदे कथमेकयोगत्वम्, अत आह — **एकमिति** । एकभवतिक्रियाध्याहारेण युगपत् समूहालम्बनप्रतीतौ पश्चाद्वाक्यभेदेनार्थभेदप्रतीतिरित्यर्थः । **शास्त्रीयः** स्वरितत्वनिमित्तः । अपेक्षाप्यानन्तर्यदितद एवास्तु, अत आह — **अपेक्षा चेति** । एनादेशेनैव 'एनत्' इति सिद्धेर्वार्तिकं व्यर्थम्, अत आह — **यदीति** । एनस्य सर्वादेशत्वादित्यर्थः । पूर्वं त्यदाद्यत्वे 'एनश्रितकः' इति सिध्यति, अत आह — **अन्तरङ्गानिति** । लुक् [8]"सुपो धातु' इत्यनेन । **प्रत्ययेति** । [9]"न लुमता' इत्यनेन । [10]"लोकतोऽर्थप्रयुक्ते' इत्युक्तत्वादप्रयुक्त इत्ययुक्तम्, अत आह — **यस्येति** । अत्र [11]"न लुमता' [12]इत्यस्यार्थभेदेन प्रकारद्वयमाह — **तत्रेति** । **तदेति** । [13]एनदादेशस्यात्रत्यस्याङ्गाधिकारविहितत्वाभावेन प्रत्ययलक्षणप्रतिषेधाभावादित्यर्थः । [14]**बाध्यते** [15]"न लुमता' इति निषेधेन । [16]**आदेशः एनदादेशः** ॥

---

[1] महाभाष्यम् ६. १. २.

[2] 'प्रकृत्यान्तःपादम्' इति सूत्रस्य पाठान्तरमिदम् ।

[3] 'सुजाते अश्वसूनृते' इत्यादाविति भावः ।

[4] पा. सू. ३. ४. ३२.

[5] पा. सू. ५. ३. ११.

[6] त्रल्यादेशविधान — अ.

[7] इदंशब्दस्येत्यादिः ॥ चेतनत्वाभावेनोत्पादनासंभवात् — अ.

[8] पा. सू. २. ४. ७१.

[9] पा. सू. १. १. ६३.

[10] का. वा. १.

[11] पा. सू. १. १. ६३.

[12] इत्यस्यार्थे भेदेन — अ.

[13] एनदादेशस्याङ्गाधिकार — ऋ.

[14] 'आदेशः एनदादेशः' इत्यतः परं 'बाध्यते, न लुमतेति निषेधेन' इति वर्तते — अ, ऋ. बोध्यते — अ. प्रदीपे 'अङ्गकार्यं निषिध्यते' इत्यत्र 'अङ्गकार्यं बाध्यते' इत्यत्रभट्टपाठ इति भाति ।

[15] पा. सू. १. १. ६३.

[16] 'आदेश, एनदादेश ।' इति युक्तम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८६८–८७०]

(रत्नप्रकाशः) इदमेतदोरुभयोरेनादेश इष्टः, स न सिध्यति, अनन्तरस्यैतद एवानुवृत्तिसंभवादित्याशयेन पृच्छति — **कस्यायमिति**। स एव स्वाभिप्रायमाह — **एतद इत्यादिना कर्तव्यमित्यन्तेन**। तथा [च] प्रश्नोपक्रमाक्षेप एव स संपन्नः। उत्तरमाह — **न कर्तव्यमिति**। **तदपेक्षिष्यामह इति**। [१]'व्याख्यानतो विशेषप्रतिपत्तिः' इतीदमेतदावध्याहृत्य व्याख्यास्यामीति भावः। एतेन 'लौकिकाधिकारोऽपेक्षालक्षण आश्रीयते, न तु शास्त्रीयः। अपेक्षा च लक्ष्यवशात् समुदायविषयैवेति भावः' इति निरस्तम्। लौकिकापेक्षाया अनन्तरसंबन्धमात्रेणैव शान्तेः। 'देवदत्ताय गौर्देयः, यज्ञदत्तायाश्वः, विष्णुमित्राय च' इत्यत्र हि लोके 'अश्वः' इत्येव संबध्यते, न तु गौरित्यपि। तस्माल्लक्ष्यदर्शनसापेक्षव्याख्यानपरतयैव तद् भाष्यमुपपन्नम्। **एनो न वक्तव्य इति**। 'द्वितीयाटौस्स्वेनत्' इत्येव वक्तुमुचितमिति भावः। **अथो एनमिति**। पुंसीदम्। **एनच्छ्रितक इति प्राप्नोतीति**। मूर्खस्य शङ्केयम्, विभक्तेर्लुकि भाविनि विभक्तिनिमित्तादेशस्य कर्तुमनौचित्यात्। अन्तरङ्गानपि विधीन् तन्निमित्तविघातको बहिरङ्गो विधिर्बाधते, लुक् त्वतन्निमित्तविघातकोऽपीति हि सिद्धान्तो भगवतोऽभिमतः। एतेन "[२]'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति त्यदाद्यत्वमकृत्वा लुक् क्रियते। [३]कृते च तस्मिन् प्रत्ययलक्षणनिषेधात् त्यदाद्यत्वाभावः" इति निरस्तम्। त्यदाद्यत्ववदेनदादेशस्यापि विभक्तिनिमित्तत्वेन त्यदाद्यत्वानङ्गीकारे एनदादेशाङ्गीकारे च मानाभावात्। [४]"न लुमताङ्गस्य' इत्यनेनाङ्गाधिकारकार्यस्येवानङ्गाधिकारकार्यस्यापि तस्य प्रत्यये परतो जायमानस्य प्रतिषेधाच्च। **यथालक्षणमप्रयुक्त इति**। 'एनश्रितकः' इतिवत् 'एनच्छ्रितकः' इत्यपि शिष्टैर्न प्रयुक्तम्। तत्र लक्षणानुसारी 'एतच्छ्रितकः' इत्येव रूपमाश्रयणीयमिति भावः। एतेन "यस्य प्रयोगो नोपलभ्यते तल्लक्षणानुसारेण संस्कर्तव्यम्। तत्र यदा [५]'न लुमताङ्गस्य' इत्यङ्गाधिकारो निर्दिश्यते तदा प्रत्ययलक्षणेन 'एनच्छ्रितकः' इति भाव्यम्" इति निरस्तम्। अनङ्गाधिकारकार्यमपि तेन निषिध्यत इत्येव सिद्धान्तात्। 'यथालक्षणमप्रयुक्ते' इति भगवता यत्र यत्रोक्तं तत्र तत्रानन्तरनिराकरण एव तस्य तात्पर्याच्च॥

आर्धधातुके २. ४. ३५.

[२, ८७०–८७२]

(उद्द्योतनम्) ननु जातिपक्षे विषयसप्तम्यां च [६]'नायं दोषः, अत आह — **व्यक्ताविति**। नन्वनन्तरजग्ध्यादित्यागेन [७]'अस्तेर्भूः, [८]'अजेर्व्यघञपोः, [९]'चक्षिङः ख्याञ्' एतत्पर्यन्तं किमर्थं गतम्, अत आह — **तत्रेति**। [१०]'अदो जग्धिर्ल्यप्ति किति' [११]'लुङसनोर्घस्लृ' इत्यार्धधातुकविशेषे परत आदेशविधानान्नास्त्यतिप्रसङ्ग इत्यर्थः। **तथापीति**। तेषामार्धधातुकसामान्ये विधानादित्यर्थः।

---

[१] परिभाषा १

[२] परिभाषा ५२

[३] 'लुकि च कृते' इत्यस्यार्थानुवादः।

[४] पा. सू. १. १. ६३.

[५] पा. सू. १. १. ६३.

[६] नायं प्रतिषेधोऽत आह — ऋ.

[७] पा. सू. २. ४. ५२.

[८] पा. सू. २. ४. ५६.

[९] पा. सू. २. ४. ५४.

[१०] पा. सू. २. ४. ३६.

[११] पा. सू. २. ४. ३७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

'वच् [2]'ब्रुवो वचिः'। ननु [3]'अचो यत्' इत्यस्य ण्यदुत्सर्गो न भवतीति 'उत्सर्गलक्षणप्रतिषेधः' इत्ययुक्तम्, अत आह — **उत्सर्गशब्देनेति**। [4]'बाध्यत्वमुपचारनिमित्तमित्याह — **आदेशेनेति**। **आकृतीति**। व्यक्तिविशेषानुपादानान्नोक्तदोष इत्यर्थः। भाष्ये **यि प्रत्ययेति**। ण्यद्यत्साधारणेत्यर्थः। दाञो धाञश्च सन्नन्तात् [5]'सनि मीमा' इत्यादिनेसादेशेऽभ्यासलोपे सस्य तत्वे यत्यतो लोपे **दित्स्यम् धित्स्यम्**। व्यापकत्वान्न देशतः पौर्वापर्यम्, नित्यत्वाच्च न कालतः। ननु परत्वाभावेऽपि [6]'निमित्तत्वमस्तु, अत आह — **सप्तम्या चेति**। [7]'तस्मिन्' इति परिभाषयार्धधातुक इति सप्तमी परत्वं बोधयतीत्यर्थः। एतस्य व्यक्ति[8]'पक्षदोषे पर्यवसानमाह — **तस्मादिति**। **भूतपूर्वस्येति**। तथा च लव्यमित्यादौ भूतपूर्वाजन्तत्वमादाय यद् भविष्यतीत्यर्थः। **अर्थः** प्रयोजनमित्याह — **एषैवेति**। पौर्वापर्याभाव एवेष्टं सिध्यतीत्यर्थः। विषयशब्दार्थमाह — **बुद्धीति**। वुद्धिं विशिनष्टि — [9]'**अभिव्यज्यत इति**। शब्दस्य नित्यत्वात् 'अभिव्यज्यते' इत्युक्तम्। 'अथवा' इत्यनेन पौर्वापर्ये न काचिद्युक्तिरुक्ता, अत आह — **व्यक्तिपक्षेति**। तदेवोपपादयति — **नित्यानामिति**। अनेन 'आर्धधातुके' इत्यादिप्रकरणेन। **साधुत्वमात्रमिति**। अपूर्वो यत्प्रत्ययो भूरादेशश्च न क्रियते, किं तु विद्यमान एव यकारे यति भ्वादेश इति प्रकृतिप्रत्ययविभागकल्पनया साधुत्वं प्रतिपाद्यत इति नोक्तदोष इत्यर्थः। ननु 'आर्धधातुकासु' इत्ययुक्तम्, तस्य क्लीबत्वेन स्त्रीत्वाभावात्। भावेऽप्यर्धधातुशब्दाद् व्याख्यातव्यनाम्नः [10]'बह्वचोऽन्तोदात्ताट्ठञ्' इति [11]'ठञि तदन्तान्ङीपो वाच्यत्वात्, अत आह — **तत्रेति**। आर्धधातुकावयवा इति बहुव्रीहिः। **ता एव** आर्धधातुकावयवाः, सामान्यशब्दस्य विशेषपरत्वात्। संहतिः शब्दार्थ एवेत्याह — **अन्ये त्विति**। समवायसंहत्योर्भेदात् कथं पर्यायत्वम्, अत आह — **समवाय इति**। पदषट्कस्यापुनरुक्तमर्थमाह — **अर्थेनेति**। सतिसप्तमीमङ्गीकृत्याध्याहारेणाशयमाह — [12]'**तत्रेति**॥

[२, ८७०–८७२]

(**रत्नप्रकाशः**) 'आर्धधातुके' इत्यस्य सतसप्तम्यन्तत्वे दोषमाह — **जग्ध्यादिष्विति**। एतेन 'व्यक्तौ पदार्थे परसप्तम्यां सत्यां परस्मिन् व्यवस्थित आर्धधातुके आदेशेन भाव्यम्' इति निरस्तम्। जातिनिरपेक्षव्यक्तिपक्षस्य व्यक्तिनिरपेक्षजातिपक्षस्य च सरूपसूत्रे भगवता निराकृतत्वेन व्यक्तिपक्षाश्रयेण वार्तिकव्याख्याने बीजाभावात्, परसप्तम्या अप्रसिद्धेश्च। **उत्सर्गलक्षणप्रतिषेध इति**। [13]'ऋहलोर्ण्यत्' इति ण्यत्प्रत्यय [14]'उत्सर्गः, तस्यापवादः [15]'अचो यत्'। तत्र ण्यति सति भ्वाद्यादेशे

---

[1] इदं पदं प्रदीपे नोपलभ्यते। प्रतीकग्रहणपूर्वकं विवरणकरणात् प्रदीपे 'भूवीख्याञ्सु दोषः' इत्यस्मादनन्तरं 'एवं वच्यपि' इत्यन्नंभट्टपाठः स्यादिति भाति।

[2] पा. सू. २. ४. ५३.

[3] पा. सू. ३. १. ९७.

[4] बाध्यत्वमाचार — अ.

[5] पा. सू. ७. ४. ५४.

[6] निमित्तत्वमस्ति — अ.

[7] पा. सू. १. १. ६६.

[8] पक्षे दोषे — अ.

[9] प्रदीपे 'अभिव्यङक्ष्यते' इत्यत्र 'अभिव्यज्यते' इत्यन्नंभट्टपाठ इति भाति।

[10] पा. सू. ४. ३. ६७.

[11] ठञ्, ठञन्तात् — अ; ठञ्, तदन्तात् — ऋ.

[12] प्रदीपे 'ततश्च यस्य च भावेन' इत्यत्र 'तत्र च यस्य च भावेन' इत्यन्नंभट्टपाठ इति भाति।

[13] पा. सू. ३. १. १२४.

[14] आदेशात् पूर्वं प्राप्तत्वमात्रेणोत्सर्गत्वमित्याशयः।

[15] पा. सू. ३. १. ९७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ण्यतो निवृत्तिर्वक्तव्येति दोष इति भावः। एतेन 'उत्सर्गशब्देन स्थानी विवक्षितः, आदेशेनापवादेन बाध्यमानत्वात्' इति निरस्तम्। उत्सर्गापवादशब्दयोः स्थान्यादेशपरतया व्याख्याने मानप्रयोजनयोरभावात्। स्थानित्वेन तद्विशेषास्तित्वादिना वा ण्यतं प्रति, आदेशत्वेन तद्विशेषभवतित्वादिना वा यतं प्रति च निमित्तत्वाभावाच्च। **सामान्याश्रयत्वादिति**। अनुत्पन्नस्यार्धधातुकत्वेनाश्रयणं सामान्याश्रयणम्, उत्पन्नस्य त्वार्धधातुकस्यार्धधातुकत्वेनाश्रयणं विशेषाश्रयणमेव संपद्यत इति भावः। एतेन 'आकृतिपदार्थाश्रयेणोत्तरम्' इति निरस्तम्। आकृत्याश्रयणपक्षेऽपि सत्सप्तमीपक्षानुपपत्तेस्तुल्यत्वेन तदाश्रयेण समाधानस्यासंभवात्। 'आर्धधातुके' इति सत्सप्तमीं मत्वैवाकृतिपक्षावलम्बनेन समाधानमुक्तमिति मन्यमानो मन्दबुद्धिरन्यत्राप्याकृतिपक्ष एवाश्रयणीयः, तथा च दोष इत्याशयेनाह — **उवर्णाकारान्तेभ्य इति**। **आर्धधातुकसामान्य इति**। [1]'सार्वधातुकार्धधातुकयोः' इति [2]परत्वाद् गुणे [3]'वान्तो यि प्रत्यये' इति वान्तादेशे च कृते हलन्तलक्षणो ण्यत् प्रसज्येतेति भावः। **दित्स्यमिति**। दातुमिच्छा,[4] इष्टं वेत्यर्थः। डुदाञः सनि [5]'सनि मीमा' इतीस्यभ्यासलोपे सस्य तकारे [6]'अतो लोपः' इति सनोऽकारस्य लोपे हलन्तलक्षणो ण्यत्। तस्मिन् सति [7]'तित् स्वरितम्' इति स्वरितान्तो दित्स्यशब्दः स्यात्। इष्ठस्तु यति [8]'यतोऽनावः' इत्याद्युदात्त इति भावः। **पौर्वापर्याभावाच्चेति**। [9]'तस्मिन्निति निर्दिष्टे पूर्वस्य' इति परिभाषायाः केवलसामान्यविषयेऽप्रवृत्तेर्वैयर्थ्यम्, [10]सप्तमीनिर्देशकार्यस्याव्यवस्था च स्यादिति भावः। एतेन 'सामान्यस्य व्यापकत्वान्नित्यत्वाच्च देशकालकृतं पौर्वापर्यं नास्ति। सप्तम्या चेह परत्वं प्रतिपादितम्। तस्माद्व्यक्तिपक्षः परत्वोपपत्तय आश्रयणीयः। तत्र भव्याद्यसिद्धिः' इति निरस्तम्। सप्तम्या परत्वं प्रतिपादितमित्यत्र मानाभावात्। अनुत्पन्ने प्रत्यये व्यक्त्यापि पौर्वापर्यासंभवात्। उत्पन्ने तु तस्मिन् व्यक्तिद्वाराकृतेरपि पौर्वापर्यसंभवाच्च। [11]'तुष्यतु दुर्जनः' इति न्यायेन तावन्यासान्तरमनुसरति — **सिद्धं त्विति**। **वक्ष्यतीति**। [12]'अचो यत्' इत्यत्रेति शेषः। **अर्थसिद्धिरेवैषेति**। अस्मदभिमतविषयसप्तमीपक्षस्य सिद्धिरेव पौर्वापर्याभावापादनेन त्वया संपादिता, न तु किंचित् प्रातिकूल्यं संपादितमिति भावः। एतेन 'एषैव च प्रयोजनसंपत्तिरित्यर्थः' इति निरस्तम्। प्रसिद्धतरयोर्र्थसिद्धिशब्दयोः पर्यायशब्दैनैरपेक्ष्येण तत्कथनस्योपयोगाभावात्। **आर्धधातुके विषय इति**। [13]'सार्वधातुकार्धधातुकयोः' इत्यादौ तु सत्सप्तम्यैवाश्रितेत्यार्धधातुकादिनिष्पत्त्युत्तरमेव गुणादिप्रवृत्तिरिति न काप्यनुपपत्तिरिति भावः। इदानीमस्त्यादिभ्योऽप्यार्धधातुकनिष्पत्तिमभ्युपगम्यार्धधातुकघटितपदान्येव [14]'अस्तेर्भूः' इत्यादिना संस्क्रियन्त इति पक्षान्तरमनुसरति — **अथवेति**। एतेन 'व्यक्तिपक्षाश्रयणेऽपि न दोष इत्युक्तं भवति' इति निरस्तम्। सत्सप्तमीपक्षाश्रयेणाक्षेपस्य विषयसप्तम्याश्रयेण समाधानस्य च कृतत्वेनाकृतिपक्षव्यक्तिपक्षयोः पुनःपुनः कीर्तनस्यात्र भाष्यस्वारस्याज्ञानमूलकत्वात्। **आर्धधातुकास्विति**। आर्धधातुकं विद्यते यासु भव्याख्येयादिष्वित्यर्थः। तत्र अर्शआद्यचि टापि निर्धारणे सप्तमी, उक्तिषु मध्ये। तथा च [15]'अस्तेर्भूः' इत्यस्यायमर्थः —

---

[1] पा. सू. ७. ३. ८४.
[2] अचो यदिति यदपेक्षयेत्यर्थः।
[3] पा. सू. ६. १. ७९.
[4] भावकर्मणोरुभयोर्यतो विधानादित्यर्थः।
[5] पा. सू. ७. ४. ५४.
[6] पा. सू. ६. ४. ४८.
[7] पा. सू. ६. १. १८५.
[8] पा. सू. ६. १. २१३.
[9] पा. सू. १. १. ६६.
[10] सप्तमीनिर्देशसंबन्धिकार्यस्येत्यर्थः।
[11] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[12] पा. सू. ३. १. ९७.
[13] पा. सू. ७. ३. ८४.
[14] पा. सू. २. ४. ५२.
[15] पा. सू. २. ४. ५२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अस्तेः अस्तिघटितायाः उक्तेः, **भूः** भूघटितोक्तिरादेशः स्यादिति। तेनासिप्रकृतिकस्य ण्यदन्तस्यास्यशब्दस्य भूशब्दप्रकृतिकेन यदन्तेन भूव्यशब्देन निवृत्तिः सिध्यति। [1]'अदो जग्धिर्ल्यप् ति किति' इत्यत्र तु [2]'घसेर्जग्धिभावनिपातनद्वारा घसिप्रकृतिको ल्यप्तिकिदन्तस्[3]तदन्तस्यादिप्रकृतेरादेशः क्रियते। [4]"चक्षिङः ख्याञ्' इत्यत्र तु ख्यातेः [5]ख्शादित्वनिपातनद्वारा तदादिरार्धधातुकान्तस्तदन्तस्य[6] चक्षिङ आदेशः क्रियते। एवमन्यत्राप्यूह्यम्। एतेन 'ख्याञ्घस्लृप्रभृतय आदेशा गणपठितधातुभिन्नाः' इति जानन्तो निरस्ताः। **उक्तिष्विति**। उच्यन्त इत्युक्तयः प्रकृतिप्रत्ययसंहतयः, तास्वित्यर्थः। युज्यन्तेऽर्थैरिति युक्तयः, प्रकृतिप्रत्ययसंहतयो हि प्रशस्तार्थिका भवन्ति। तदेव स्पष्टयति — **रूढिष्विति**। केवला प्रकृतिर्वा प्रत्ययो वा न रूढिरित्यर्थः। **प्रतीतिष्विति**। प्रयुज्यमानास्वित्यर्थः। प्रकृतिप्रत्ययसंहतय एव खलु प्रयुज्यन्ते, [7]"न केवला प्रकृतिः प्रयोक्तव्या, न केवलः प्रत्ययः' इति संकेतादिति भावः। तथैव श्रूयन्ते चेत्याह — **श्रुतिष्विति**। अतस्ता एव सम्यग् ज्ञायमानाः, न तु केवला प्रकृतिर्वा प्रत्ययो वेत्याह – **संज्ञास्विति**। तथा चोक्तकल्पना युक्तैव भवतीति भावः॥

अदो जग्धिर्ल्यप् ति किति २. ४. ३६.

[२, ८७३]

(उद्द्योतनम्) भाष्ये **ल्यपि कृत इति**। [8]"अनल्विधौ' इति स्थानिवत्त्वनिषेधादिति भावः। जग्धिल्यबादेशयोरन्तरङ्गत्वबहिरङ्गत्वे आह — **तकारादिति**। प्रधायेत्यत्र [9]"दधातेर्हिः' इति हिः प्राप्नोति। प्रस्थायेत्यत्र [10]"द्यतिस्यतिमास्थामित्' इतीत्वम्। वार्तिकशेषमवतारयति — **कथमिति**। हित्वादेशात् पूर्वं ल्यबादेशः कथं न प्राप्नोतीत्यर्थः। **इत्याह** इत्यत आह। ति कितीत्येवान्तरङ्गत्वात् पूर्वं जग्धौ सिद्धेऽपि [11]"**ल्यबुच्यते** ल्यब्ग्रहणं क्रियते, तदन्तरङ्गाणां हित्वादीनां ल्यपा बाधनं [भवतीति] ज्ञापयतीति द्वितीयश्लोकार्थः॥

[२, ८७३]

(रत्नप्रकाशः) ल्यपि कृते न प्राप्नोतीति। तादिकितोऽभावादिति भावः। **अन्तरङ्ग आदेश इति**। प्रकृतिप्रत्ययमात्रापेक्षत्वात्। जग्ध्यादेशोऽन्तरङ्ग इति भावः। ल्यप्त्वनेकपदघटितसमासप्रयुक्त इति बहिरङ्गः। **बहिरङ्गो ल्यब्बाधत इति**। प्राचीनैर्वैयाकरणैर्ल्यब्ग्रहणस्य विशेषापेक्षमेव ज्ञापकत्वमुक्तमिति भगवतापि तथैवात्र दर्शितम्। भगवतोऽभिमतं तु 'अन्तरङ्गानपि विधींस्तन्निमित्तविघातको बहिरङ्गो विधिर्बाधते' इत्यर्थं ल्यब्ग्रहणमिदं ज्ञापयतीति। सूचितं ह्रीदं

---

[1] पा. सू. २. ४. ३६.

[2] 'लुङ्सनोर्घस्लृ' इति घस्लादेशविधानात् 'अदो जग्धिः' इत्यत्रापि घस्लादेशस्यैव जग्धिभावो निपात्यत इत्याशयः।

[3] ल्यप्तिकिदन्तस्येत्यर्थः।

[4] पा. सू. २. ४. ५४.

[5] ख्शादित्वात् तत्त्वनिपातनद्वारा — प.

[6] आर्धधातुकान्तस्येत्यर्थः।

[7] महाभाष्यम् १. २. ६४.

[8] पा. सू. १. १. ५६.

[9] पा. सू. ७. ४. ४२.

[10] पा. सू. ७. ४. ४०.

[11] ल्यबित्युच्यते — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]'न बहुव्रीहौ' इति सूत्रेऽन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधत इति वदता भगवतैव। ननु तद्भाष्यात् 'अन्तरङ्गानपि विधीन् बहिरङ्गो लुग्बाधते' इति परिभाषास्थाने सामान्यरूपेण सा परिभाषोत्प्रेक्षितेति चेत्, सत्यम्, युक्तिसाम्येनैतत्परिभाषासाधारण्येनैव तद्भाष्यस्योपपन्नत्वात्। तथा चोभयसाधारण्येनेदं परिभाषास्वरूपं भगवतोऽभिमतम् — अन्तरङ्गानपि विधीन् तन्निमित्तविघातको बहिरङ्गो विधिर्बाधते, लुक् त्वतन्निमित्तविघातकोऽपीति। एवं चानयैव परिभाषया सर्वेष्टसिद्धौ भाष्यकृतास्पृष्टाभिः [2]'अकृतव्यूहाः पाणिनीयाः' [3]'कृतमपि निवर्तयन्ति' [4]'निमित्तापाये नैमित्तिकस्याप्यपायः' इति परिभाषाभिर्व्यवहरन्तो निरस्ताः। तत्परिभाषार्थस्य भगवदभिमतास्मदुत्प्रेक्षितपरिभाषयैव संगृहीतत्वात्। **अनादिष्टार्थमिति**। 'प्रधाय, प्रस्थाय' इत्यादौ [5]'दधातेर्हिः' इत्यादिना हित्वादिष्वकृतेष्वेव ल्यब् यथा स्यादित्येवमर्थमित्यर्थः। कुतो न स्यात्, अत आह — **बहिरङ्गलक्षणत्वादिति**। **वक्ष्यतीति**। [6]'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इति सूत्र इति भावः। अयमेवार्थो व्याघ्रभूतिनाप्युक्त इत्याह — **जग्धिविधिरिति**। **यत्तदिति**। सामान्ये नपुंसकनिर्देशः, यः स इत्यर्थः। **अकस्मादिति**। न कस्माच्चिदर्थात् प्रयोजनात्, अनर्थक इति भावः। कुत इत्यत आह — **सिद्धमदस्ति क्तितीति विधानादिति**। यतोऽत इति शेषः। तत्र 'अदः' इति सामान्ये नपुंसकम्, असौ जग्धिविधिरित्यर्थः। जग्धिविधेरानर्थक्ये सति किं सिध्यतीत्यत आह — **हिप्रभृतींस्त्विति**। **हरतीति**। बाधत इत्यर्थः। **कृतं तदिति**। तेन कृतमित्यर्थः। उ इति निपातः श्लोकपूरणार्थः। **एष एवार्थ इति**। अन्येन निबद्ध इति वा, मया निबध्यत इति वा शेषः। **जग्धौ सिद्ध इति**। स्फुटार्थः श्लोकः॥

लुङ्सनोर्घस्लृ २. ४. ३७.

[२, ८७४]

(रत्नप्रकाशः) अचीति। प्रत्यय इति शेषः॥

हनो वध लिङि २. ४. ४२. लुङि च २. ४. ४३.

[२, ८७४]

(उद्द्योतनम्) 'वध' इत्यकारान्तनिर्देशात् संशयो न युक्तः, अत आह — **किमिति**। वृद्ध्यादिप्रसङ्गमुपपादयति — **अतो हलादेरिति**। ण्वुलि वधादेशाभावाद् 'वधकः' इति कथम्, अत आह — **औपसंख्यानिक इति**। उपसंख्यानं [7]'बहुलं तणि। 'अन्नवधकगात्रविचक्षणाजिराद्यर्थम्'

---

[1] पा. सू. १. १. २९.
[2] परिभाषा ५६.
[3] प्रौढमनोरमायां परिभाषाप्रकरणे प्रदर्शितोऽयं न्यायः।
[4] ५६. परिभाषायामेवायं न्यायोऽपि प्रदर्शितः।
[5] पा. सू. ७. ४. ५२.
[6] पा. सू. ७. १. ३७.
[7] का. वा. २. ४. ५४–११.
[8] का. वा. २. ४. ५४–१२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति [1]'चक्षिङः ख्याञ्' इति सूत्रस्थम्। [2]'जनिवध्योः' इति वृद्धिद्वय[3]निषेधार्थम्। तत्र वधिग्रहणं कर्तव्यमिति गौरवमित्यर्थः। [4]तत्वप्रसक्तिमाह — **स्थानिवदिति**। इटो वक्तव्यत्वमाह — **अवधीदिति**। अदन्तत्वे उक्तदोषाभावमाह — **अदन्तत्व इति**। तथा च [5]'जनिवध्योः' इत्यत्र वधिग्रहणं न कर्तव्यमिति भावः। वधिः प्रकृत्यन्तरमस्ति, तदर्थं तद्ग्रहणं कर्तव्यमिति [6]काशिकायां स्थितम्। तत्वाप्रसक्तिमाह — **तत्वमिति**। इडपि न विधेय इत्याह — **उपदेश इति**। वधादेशस्योपदेशेऽनेकाच्त्वादित्यर्थः॥

[२, ८७४]

(रत्नप्रकाशः) उक्तमिति। स्थानिवत्सूत्र इति शेषः। यद्यपि तस्य दोषस्य परिहारोऽपि तत्रोक्तः, तथापि तत्रेट्प्रतिषेधपरिहारः क्लिष्ट इति भावः। **न दोष इति**। 'अवधीत्' इत्यादावल्लोपस्य स्थानिवत्त्वात् [7]'अतो हलादेर्लघोः' इति वृद्ध्यभावादुपदेशेऽनेकाच्त्वेनेट्सिद्धेश्च न दोषः। वधक इत्यत्र तु [8]'बहुलं तणि' इति वधादेशेऽल्लोपस्य स्थानिवत्त्वात् तत्वाभावान्न दोषः॥

इणो गा लुङि २. ४. ४५.

[२, ८७४]

(रत्नप्रकाशः) इण्वदिक इति। 'इकश्च' इत्युक्ते गादेशमात्रमनेन [9]विधीयेत। उत्तरसूत्रद्वयविधेयो गमिर्न विधीयेत। अतो गागमिसाधारण्येनातिदेशो [10]भवत्वित्याशयेन वतिनिर्देशः। तदेव स्पष्टमुत्तर[11]सूत्रद्वयेऽपि दर्शितं भगवता॥

गाङ लिटि २. ४. ४९.

[२, ८७५–८७७]

(उद्द्योतनम्) आत्मनेपदार्थं ङित्त्वं स्यादिति प्रश्नायोगः, अत आह — **स्थानिवदिति**। 'इणादेशस्यापि' इत्ययुक्तम्, [12]'गातिस्था' इति सिचो लुकि ङित्त्वभाजोऽभावात्, अत आह — **ततश्चेति**। **अगासातामिति**। इणः कर्मणि लुङि गादेशः। यद्यपि 'अगास्त' इत्यप्युदाहरणम्, तथापि वैचित्र्याद् द्विवचनमुक्तम्। **ङित्त्वात्** सिच इत्यादिः। ङित्त्वेऽनिष्टमाह — **ईत्वेति**। [13]'घुमास्था'

---

[1] प.. सू. २. ४. ५४.
[2] पा. सू. ७. ३. ३६.
[3] अतो हलादेः, अत उपधाया इति च वृद्धिद्वयेत्यर्थः।
[4] तत्र प्रसक्तिमाह — अ, ऋ.
[5] पा. सू. ७. ३. ३५.
[6] जनिवध्योश्चेति सूत्र इत्यादिः।
[7] पा. सू. ७. २. ७.
[8] का. वा. २. ४. ५४ — ११.
[9] विधीयते — ब.
[10] भवतीत्याशयेन — प.
[11] सूत्रद्वये निर्दशितम् — प.
[12] पा. सू. २. ४. ७७.
[13] पा. सू. ६. ४. ६६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यनेन। [1]**इति त्विति**। [2]सामान्याग्रहणादित्यर्थः। ननु गाङ्ग्रहणेऽपि धातोरपि ग्रहणात् 'अगास्त' इति न स्यात्, अत आह — **अस्यैवेति**। इङादेशस्यैवेत्यर्थः। [3]अत्र हेतुः — [4]**एतस्येति**। धातोरित्यर्थः। **अनन्यार्थेति**। आदेशङकारस्य विशेषणमात्रार्थत्वात्। [5]अत्र केन किं ज्ञाप्यते, अत आह — [6]**सानुबन्धकादिति**। [7]कृतायां चेत्संज्ञायामित्यन्वयः। शतुरात्मनेपदत्वाभावेनैत्व-प्रसङ्गाभावात् तन्नोदाहरणमित्याह — **सूत्र इति**। ननु [8]"युवोः' इत्यत्रोकारस्येत्संज्ञकत्वाभावात् कथं तदादेशे उगित्कार्याभावज्ञापकत्वम्, उगितः षष्ठीनिर्देशाभावात्, अत आह — **युवोरिति**। [9]'भुजिमृङ्भ्यां युक्त्युकौ' इति भुज्युशब्दो युगन्तः। [10]'कंशंभ्याम्' इति शंयुशब्दो युस्प्रत्ययान्तः। [11]'ऊर्णाया युस्' इत्यूर्णायुशब्दो युसन्तः। आद्यः कृत्[12], द्वौ [13]तद्धितान्तौ। [14]अनादेशनिरासायेति योजना। **तत्र** तयोः। मेरिति मिपो ग्रहणम्। तदवतार्य व्याचष्टे — **ज्ञापकस्येति**। तथा निर्देशस्य प्रयोजनमाह — **तेनेति**। सानुबन्धकस्य स्थानित्वे पित्कार्यं न स्यात्। पकारस्य ङित्त्वा-भावसंपादनद्वारा गुणप्रापकत्वाद् गुणः पित्कार्यम्। प्रयोजनान्तरमाह — **मा[15] हीति**। अचिनव-मित्यस्य [16]'हिं च' इत्याष्टमिकनिघातनिषेधे सत्यमादेशस्य प्रत्ययस्वरेणाद्युदात्तत्वं स्यात्, लावस्थायां विहितागमस्वरापेक्षयामादेशस्य[17] तस्य सतिशिष्टत्वात्। पित्त्वे त्वनुदात्तत्वं भवति। यद्यपि [18]'मा हिं' इत्यनुक्तौ 'अचिनवमहम्' इत्यादावप्येतद्वक्तुं शक्यम्, तथाप्यतिङन्तात् परत्वेऽप्येतदुपपादनाय [19]'मा हिं' इत्युक्तम्। 'सानुबन्धकाद्यत्र षष्ठी' इत्युक्तत्वान्नेदं युक्तमित्याह — **णलादीति**। ननु 'मेश्च' इत्येक एव दोषः स्थितः, अत आह — **दोषबहुत्वेति**। [20]'ज्ञापनेन' इति भाष्यसूचितमाह — **विशेषणार्थमिति**। भाष्ये विभाषापदं व्यवस्थाभिप्रायम्। न ह्यकर्तृगे फले विभाषेष्यत इत्याह — [21]**तत्रेति**। **अनुनासिकेति**। [22]'युवोः' इत्यत्र यकारवकारौ सानुनासिकौ स्थानित्वेन निर्दिश्येते। उकार उच्चारणार्थो नानुबन्धः। तत्र 'युव्वोः' इति वक्तव्ये युवोरिति सौत्र [23]उकारलोपः।

---

[1] तद्वदिति। सामान्यग्रहणादित्यर्थः — अ, ऋ.

[2] गासामान्याग्रहणादित्याशयः।

[3] तत्र — ऋ.

[4] प्रदीपे 'एतन्ङकारस्य' इत्यत्र 'एतस्य ङकारस्य' इति व्यस्ततया पाठोऽन्नंभट्टस्येति प्रतीयते।

[5] तत्र — अ.

[6] प्रदीपे 'सानुबन्धाद्यत्र' इत्यत्र 'सानुबन्धका-द्यत्र' इत्यन्नंभट्टपाठ इति भाति।

[7] 'कृतायां वेत्संज्ञायाम्' इति प्रदीपे पाठ उप-लभ्यते। 'कृतायां च' इत्यन्नंभट्टपाठ इति भाति। अन्वयकथनात् पूर्ववाक्यादित्संज्ञा-यामित्यस्य संबन्धोऽभिसंहित इति प्रतीयते। तेनास्मिन् वाक्ये 'इत्संज्ञायाम्' इत्येतदन्नं-भट्टपाठे नास्तीति च भाति।

[8] पा. सू. ७. १. १.

[9] उणादिसूत्रम् ३०८.

[10] पा. सू. ५. २. १३८.

[11] पा. सू. ५. २. १२३.

[12] कृदन्त इत्यर्थः।

[13] तद्धितौ — अ.

[14] अर्थानुवादोऽयम्, आदेशशब्देन युवोरनाका-वित्यनादेशस्य ग्रहणं बोध्यम्।

[15] न हीति — अ, ऋ.

[16] पा. सू. ८. १. ३४.

[17] अमादेशसंबन्धिनः स्वरस्येत्यर्थः।

[18] न हीत्यनुक्तौ — अ, ऋ.

[19] न हीत्युक्तम् — अ, ऋ.

[20] भाष्ये 'नार्थोऽनेन ज्ञापकेन' इत्यत्र 'नार्थो-ऽनेन ज्ञापनेन' इत्यन्नंभट्टपाठ इति भाति।

[21] प्रदीपे 'कर्त्रभिप्राये क्रियाफले' इत्यतः प्राक् 'तत्र' इति पाठोऽन्नंभट्टस्येति ज्ञायते।

[22] पा. सू. ७. १. १.

[23] वुशब्द इत्यादिः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]ल्युण्वुलादावपि यकारवकारौ सानुनासिकावेवोच्चारितावित्युकार उच्चारणार्थ एवेति नेत्संज्ञकः। [2]'युवोः' इत्यत्रानुनासिकयोरेव ग्रहणम्, न मुज्व्वादिस्थानामिति सर्वसामञ्जस्यमित्यर्थः। अस्मिन् पक्षे उगित्कार्यशङ्का नास्तीत्याह — **ततश्चेति** ॥

[२, ८७५–८७७]

(**रत्नप्रकाशः**) स्थानिवद्भावादात्मनेपदं सिद्धमिति मत्वा पृच्छति — **ङित्करणं किमर्थमिति।** उत्तरमाह — **गाङ्यनुबन्धकरणमिति । विशेषणार्थमिति।** गाङ गतावित्ययमेव धातुरादेशत्वेन वोधित इति तस्यैव [3]'गाङ्कुटादिभ्यः' इत्यत्र ग्रहणं यथा स्यादित्येतत्फलकं विशेषणम् **अर्थः** प्रयोजनं यस्य तदित्यर्थः। **इणादेशस्यापीति।** अपिशब्दात् प्रकृतस्येङादेशस्य गाङ गतावित्यस्य च संग्रहः। [4]'गामादाधाग्रहणेष्वविशेषः' इत्युक्तेः [5]'निरनुबन्धकग्रहणे न सानुबन्धकस्य' इति परिभाषा तत्र नोपतिष्ठते। ननु तर्हि [6]'गाङ्कुटादि' इति पाठेऽपि स दोषस्तदवस्थ एवेति चेन्न, गाङ्ग्रहणस्य गारूपग्रहणत्वाभावेन तत्र गामादाग्रहणपरिभाषाया अप्रवृत्तेः। गामादाधाश्च ते ग्रहणाश्चेति हि तत्र कर्मधारय आश्रितो भवति। प्रकृतभाष्यं च तत्रानुकूलम्। ननु 'गाकुटादिभ्यः' इत्युक्ते इणादेशस्यापि ग्रहणं भवतु नाम। तत्र [7]'गातिस्था' इति सिचो लुका लुप्तत्वादार्धधातुक एव [8]'घुमास्था' इतीत्वस्य विधानान्न दोष इति चेन्न, आत्मनेपदे परे सिचो लुगभावेन [9]'घुमास्था' इतीत्वापत्तेः। किं च 'गै शब्दे' इत्यस्यैवेण आदेशत्वेन वोधिततया तस्यापि ग्रहणं स्यादित्यत्र तस्य तात्पर्यं युज्यते। नन्वर्थसाम्ये सत्यादेशादेशिभाव उचितः, यथा-[10]'अस्तेर्भूः, [11]अदो जग्धिः, [12]चक्षिङः ख्याञ्, [13]हनो वध' इति। एवं च 'गै शब्दे' इति धातुरेव ङकारानुबन्धक इङ आदेशत्वेन वोधितः। 'गाङ गतौ' इत्ययमेवोत्सृष्टङकार इण आदेशत्वेन वोधित इति चेत्, भवतु नाम तथैव। तस्मिन्नपि पक्षे गाङ्कुटादिसूत्रे इङादेशस्य 'गाङ गतौ' इत्यस्य च ग्रहणं [14]भवति, इणादेशस्य 'गै शब्दे' [15]इत्यस्य चेति न [16]पूर्वोक्ताद्विशेषः। एतेन 'गाङ्कुटादिसूत्रेऽनन्यार्थकङकारस्येङादेशस्यैव ग्रहणम्, न तु गाङ गतावित्यस्य। तदीयस्य ङकारस्यात्मनेपदविधौ चरितार्थत्वादादेशेनानन्यार्थङकारेण तुल्यत्वाभावात्' इति निरस्तम्। एकत्र कार्ये चरितार्थोऽनुबन्धो न कार्यान्तर उपयुज्यत इत्यत्र प्रमाणाभावेनोभयोरपि ग्रहणमित्यस्यैवौचित्यात्। अन्यथा [17]'इदितो नुम् धातोः' इत्यत्र [18]'उदितो वा' इत्यादौ च परस्मैपदिनामेव ग्रहणं स्यात्, न त्वात्मनेपदिनामुभयपदिनां च,

---

[1] ण्वुल्ल्युडादावपि — अ.
[2] पा. सू. ७. १. १.
[3] पा. सू. १. २. १.
[4] परिभाषा ११५. गामादाग्रहणेष्वविशेष इति परिभाषायां 'गामादाधाग्रहणेषु' इति धाघटितपाठ एव रत्नप्रकाशकृदभिमतः। दाधाघ्वदाविति सूत्रे प्रतिपादितं तेनैवेदम्।
[5] परिभाषा ८२.
[6] पा. सू. १. २. १.
[7] पा. सू. २. ४. ७७.
[8] पा. सू. ६. ४. ६६.
[9] पा. सू. ६. ४. ६६.
[10] पा. सू. २. ४. ७२.
[11] पा. सू. २. ४. ३६.
[12] पा. सू. २. ४. ५४.
[13] पा. सू. २. ४. ४२.
[14] 'भवति' इत्यस्यानन्तरं 'न तु' इत्यधिकम् — प.
[15] इत्यस्यास्य चेति — प.
[16] पूर्वोक्ताविशेषः — प, ब.
[17] पा. सू. ७. १. ५८.
[18] पा. सू. ७. २. ५६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तदीयानामिदाद्यनुबन्धानामात्मनेपदविधौ चरितार्थत्वात्। किं चैवं [1]'क्रीङ्जीनां णौ' इत्यत्र विशेषणतया चरितार्थ इङ्ङ्कारो नात्मनेपदं प्रवर्तयेदिति गाङादेशङकारस्यात्मनेपदार्थतैव भवतीति [2]'गाङ्कुटादिभ्यः' इत्यत्र विनिगमनाविरहादुभयोर्ग्रहणं स्यात्। उत्तरभाष्यस्वरसेनाप्युभयोरेव तत्र ग्रहणमिति स्पष्टं बालकस्यापि। इदानीं लक्षणप्रतिपदोक्तपरिभाषाया अनित्यत्वेनेङो ङकारेणैव गादेशस्य गाङरूपत्वसंभवेनोभयोः [3]'गाङ्कुटादिभ्यः' इत्यत्र ग्रहणं स्यादेव। अतो ङकारस्यान्यत् प्रयोजनमुच्यत इत्याशयेनाह — **ज्ञापकं वेति**। स्थानिस्वरूपविशेषसंपादकानुबन्धसंबन्धिनी येत्संज्ञा तत्प्रयुक्त[4]कार्यसंबन्ध आदेशो न भवतीत्येतज्ज्ञापनार्थं ङित्करणमिति भावः। एतेन 'सानुबन्धकाद्यत्र षष्ठ्युच्चार्यते तत्राकृतायामेवेत्संज्ञायामादेशः प्रवर्तत इति ज्ञापनार्थं ङकारोच्चारणम्' इति निरस्तम्। तादृशक्लिष्टकल्पनया ज्ञापकोपपादने बीजाभावात्। 'इत्कार्यं न भवति' इति भाष्यस्वरसभङ्गात्। [5]'टित आत्मनेपदानाम्' [6]'परस्मैपदानां णलतुस्' इत्यादावुत्तरभाष्यविषये सानुबन्धकात् षष्ठ्यभावाच्च। [7]**नित्यमात्मनेपदं न भवतीति**। यद्यपि ञित्करणसामर्थ्यादपीदं सिद्धम्, तथापि ज्ञापकेनैव सिद्धे सामर्थ्यं नाश्रयणीयमिति भावः। **शतृशानचाविति**। सूत्रे सहैव निर्दिष्टावित्येतावतात्रोभयोर्निर्देशः। एत्ववारणं तु शानच एव, आत्मनेपदत्वात्। तथैव दर्शयति — **पचमान इति**। **युवोरनाकाविति**। [8]भुज्युमृत्युशंयूर्णायुप्रभृतिष्वतिव्याप्तिवारणायानुनासिकोकारानुबन्धौ युवू सूत्रे निर्दिष्टौ। अनुनासिकोकारस्य चानुकार्यगतस्येत्संज्ञायां तदादेशयोरनाकयोरुगित्त्वात् [9]'उगितश्च' इति ङीप् प्रसक्त इति भावः। ज्ञापितस्य वचनस्यातिप्रसक्तिमाह — **मेश्चेति**। [10]'तस्थस्थमिपां तांतंतामः' इत्यत्र सानुबन्धकस्य मिपो निर्दिष्टत्वेन तदादेशस्यामः पित्त्वाभावेन ङित्त्वे गुणनिषेधः स्यात्। अतः 'तस्थस्थमीनाम्' इति निरनुबन्धकस्तत्र मिः पठनीय इति भावः। **अचिनवमिति**। अमः पित्त्वान्ङित्त्वाभावाद् गुणो भवति। वार्तिककारस्य न्यूनतादोषमाह — **अत्यल्पमिति**। यत्तु 'णलादिविधौ सानुबन्धयोस्तिप्सिपोरनुपादानान्नास्ति दोष इति चिन्त्यमेतत्' इति। अत्रेयं चिन्ता — तिप्सिपावपि तत्र सानुबन्धावेव निर्दिष्टौ, [11]'परस्मैपदानाम्' इत्यनेन तिप्तस्झिसिप्थस्थमिब्वस्मसामित्यर्थप्रतीतेः। [12]'टित आत्मनेपदानाम्' इत्यत्रापि ह्येषैव गतिः। न हि टिच्छब्दः सानुबन्धको भवति, येन तदुक्तं संगच्छेत। ङकारस्योक्तज्ञापकतां दूषयति — **अस्य ज्ञापकस्येत्यादिना**। **भूयांसो वेति**। ईयसुन्प्रत्ययः स्वार्थे। 'प्रभिद्य' इत्यादौ क्त्वो ल्यपि तस्य कित्त्वाभावात् [13]'क्ङिति च' इति गुणनिषेधो न स्यात्। तथा च बहव इति बहुवचनमुपपन्नम्। एतेन 'दोषबहुत्वारोपेण निन्दामाह' इति निरस्तम्। तेनाङ्गीकृतेन 'मेश्च' इत्यनेन सह बहूनां दूषणानां निर्दशितत्वात्। **नार्थोऽनेन ज्ञापकेनेति**। तथा च लक्षणप्रतिपदोक्तपरिभाषया 'गाङ गतौ' इत्यस्यैव ग्रहणं मा भूत्, उभयोर्ग्रहणं भवतु [14]'गाङ्कुटादिभ्यः' इत्यत्रे-

---

[1] पा. सू. ६. १. ४८.

[2] पा. सू. १. २. १.

[3] पा. सू. १. २. १.

[4] कार्यसंबद्ध आदेशो भवतीति — ब.

[5] पा. सू. ३. ४. ७९.

[6] पा. सू. ३. ४. ८२.

[7] भाष्ये 'आत्मनेपदं नित्यं न भवति' इत्यत्र 'नित्यमात्मनेपदं न भवति' इति पाठः स्वीकृतः।

[8] भुज्युमृत्युशब्दयोः भुजिमृङ्भ्यामित्युणादिसूत्रेण युक्त्युकौ, शंयूर्णायुशब्दयोः कंशंभ्याम्, ऊर्णाया युस् इत्याभ्यां युस्प्रत्ययः।

[9] पा. सू. ४. १. ६.

[10] पा. सू. ३. ४. १०१.

[11] पा. सू. ३. ४. ८२.

[12] पा. सू. ३. ४. ७९.

[13] पा. सू. १. १. ५.

[14] पा. सू. १. २. १.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

त्येव ङित्करणप्रयोजनं स्थितम् ।॰ न हि तत्परिभाषाया अनित्यत्वेनानुबन्धनिराकरणमुचितम् । अन्यथा व्याख्यानपरिभाषां पृषोदरादिसूत्रं चाश्रित्य समस्तस्यैव शास्त्रस्य प्रत्याख्येयत्वापत्तेः। **विभाषात्मनेपदमिति।** कर्तृगामिनि क्रियाफले आत्मनेपदम्, अन्यत्र परस्मैपदमिति व्यवस्थित-विभाषेति भावः। **वक्ष्यतीति।** [1]''टित आत्मनेपदानाम्' इत्यत्र। **प्रकृतानामिति।** [2]''तिप्तस्-झि' इत्यादिसूत्रनिर्दिष्टानामित्यर्थः। **वक्ष्यतीति।** [3]''युवोरनाकौ' इत्यत्र। **अनुनासिकत्वादिति।** अनुनासिकयणत्वादित्यर्थः ।।

चक्षिङः ख्याञ् २. ४. ५४.

[२, ८७७–८७९]

(**उद्द्योतनम्**) भाष्ये [4]**कशादिः** ककारशकारसंयोगादिः, क्शाञित्येवंरूपः। **खयादिः** खकार-यकारसंयोगादिः ख्याञित्येवंरूपः[5]। ननु खयादेरेव पाठात् प्रश्नो न युक्तः, अत आह— **लक्ष्य इति।** अख्यत्, अक्शासीत्, इति प्रयोगद्वयदर्शनादित्यर्थः। भाष्ये [6]''कशादिः खयादिश्च' इत्युभयथा सूत्रं पठनीयमित्यर्थः। पाठान्तरेण पाठद्वयप्रयोजनं साधयति— भाष्ये **खशादिर्वेति।** एवं तर्हि रूपद्वयस्याप्यसिद्धिरिति मत्वाद्यासिद्धिं शङ्कते— भाष्ये **केनेति।** भाष्ये **चर्त्वेनेति।** शकारे परतः खकारस्य चर्त्वेनेत्यर्थः। द्वितीयासिद्धिं शङ्कते— भाष्ये **अथ खयादिरिति।** 'असिद्धे शस्य' इति समाधानं व्याचष्टे— **पूर्वत्रासिद्धमिति। अनन्तरमिति।** [7]''स्तोः श्चुना श्चुः' इत्यतः पूर्वमित्यर्थः। **शस्य** ख्शाआदेशस्थस्य। **विभाषेति।** तेन यत्वपक्षे खयादित्वम्, तदभावे [8]कशादित्वं च भविष्यतीत्यर्थः। असिद्धाधिकारोक्तेः प्रयोजनमाह— **तत्रेति। तन्निमित्तं** यत्व-निमित्तम्, [9]'योपधाद्वुञ्' इत्यादिकम्। **शकारनिमित्तमिति।** शकारे सति योपधत्वाभावात् [10]'व्यञ् भवतीति तच्छकारकार्यम्। णत्वानन्तर्यस्य प्रयोजनमाह— [11]''**चर्त्वे त्विति।** [12]'खरि च' इति चर्त्वस्य परत्वात् परस्मिन् पूर्वं सिद्धमित्यर्थः। भाष्ये असिद्धे यत्वविधानस्य प्रश्नपूर्वकं प्रयोजन-मुक्तम्। तद्व्याचष्टे— [13]**'सौप्रख्येऽवुञ्विधिरिति। सुप्रचष्ट इति।** अनेन चक्षिङः ख्याञा-देशपक्षे इदं प्रयोजनम्, न ख्याधातुरूपपक्ष इति दर्शितम्। **योपधेति।** [14]''योपधाद् गुरूपोत्तमाद्वुञ्' इति विहितेत्यर्थः। **सुप्रख्येनेति।** [15]''तेन निर्वृत्तम्' इत्यण्। **धन्वेति।** धन्वविशेषवाचिनो योपधाच्च देशवाचिनो वृद्धाद्वुञ् शैषिकः। धन्वशब्दो मरुदेशवाची। ऐरावतकः, सांकाश्यकः।

---

[1] पा. सू. ३. ४. ७९.
[2] पा. सू. ३. ४. ७८.
[3] पा. सू. ७. १. १.
[4] क्शादिः — अ.
[5] 'एवंरूपः' इत्यस्यानन्तरं 'खयादिः' इत्यधिकम् — ऋ.
[6] क्शादिः — ऋ.
[7] पा. सू. ८. ४. ४०.
[8] क्शादित्वं च — ऋ.
[9] योपधाद् गुरूपोत्तमाद्वुञ्, धन्वयोपधाद्वुञ्, इत्युभयं विवक्षितम्।
[10] व्यञ् न भवतीति — ऋ.
[11] चर्त्वे चेति — अ, ऋ.
[12] पा. सू. ८. ४. ५५.
[13] 'सौप्रख्येऽवुञ्विधिरित्यकारप्रश्लेषात्' इति विशिष्टं प्रदीपग्रन्थत्वेनाभिमतम्, न तु सौ-प्रख्येऽवुञ्विधिरिति प्रतीकत्वेन।
[14] पा. सू. ५. १. १३२.
[15] पा. सू. ४. २. ६८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

भाष्ये ख्यात इत्यत्र यत्वस्यासिद्धत्वात् [1]'संयोगादेरातो धातोर्यण्वतः' इति निष्ठानत्वं न भवतीत्युक्तम्। [2]'न ध्याख्या' इति निषेधान्नैतत् प्रयोजनम्, अत आह — **न ध्येति।** **अस्य** चक्षिङादेशस्य। लक्ष्यानुरोधेन लक्षणप्रतिपदोक्तपरिभाषानाश्रयणं सूचयति — **मन्यत इति।** **असिद्धत्वादिति।** रुत्वाद्यत्वस्य परत्वात्। भाष्ये **पर्याख्यानमिति।** यत्वस्यासिद्धत्वेन शकारव्यवधानात् [3]'कृत्यचः' इति णत्वं न भवति। तत्राप्यडादिव्यतिरिक्तव्यवधाने णत्वं नेष्यते। अन्यथा 'प्रधानम्' इत्यादावपि स्यात्। ननु ख्याधातोरपि प्रख्यानमिति णत्वाभाव इष्यते। तत् कथं, तत्र यकारस्यासिद्धत्वासंभवात्, अत आह — **ख्यो प्रकथन इति।** [4]'प्रख्यानात्' इति णत्वाभावनिपातनादित्यर्थः। **शर्पर इति।** यत्वस्यासिद्धत्वेन शर्परत्वाद्विसर्जनीय एव भवति, न जिह्वामूलीय इत्यर्थः। यद्यपि 'कः त्सरुः' इत्यादौ सावकाशं विसर्जनीयमत्र परत्वाद्बाधित्वा जिह्वामूलीयेन भाव्यम्, तथापि शकारपरे खरि विसर्जनीयोऽनवकाशत्वाज्जिह्वामूलीयं बाधते। एतद्भाष्याद्वा पूर्वविप्रतिषेध आश्रयणीय इति भावः। ननु चक्षिङः [5]'असुन्' इत्यौणादिकासुन्प्रत्यये रक्षोविशेषणत्वेन क्लीबत्वात् सोर्लुकि प्रत्ययलक्षणनिषेधात् [6]'अत्वसन्तस्य' इति दीर्घाभावात् 'नृचक्षाः' इत्ययुक्तम्, अत आह — **प्रयोग इति।** **अनुदात्तेति।** हलादेरनुदात्तेतो धातोर्युच् प्रत्ययः। अन्नगात्राद्यनुरोधेनाह — **सर्वेति।** अत्रत्यार्धधातुकप्रकरणापेक्षयेत्यर्थः। [7]'दाम्नी' सूत्रे इणोऽभावादाह — **औणादिक इति।** **निपातनमिति।** [8]'अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः' इत्युणादौ निपातनम्। **एतदुक्तम्** प्रयोजनम्। अजिरमित्यत्राजेर्व्यादेशाभावः॥

[२, ८७७–८७९]

(**रत्नप्रकाशः**) लक्ष्ये रूपद्वयदर्शनादेकाश्रयणे इतरासिद्धिप्रसङ्गात् पृच्छति — **किमयमिति।** द्वेधाप्यादेशो विधेय इति तावदुत्तरमाह — **चक्षिङ इति।** तथापि वक्ष्यमाणप्रयोजननिर्वाहो न भवतीत्याशयेनाह — [9]**'ख्शादिर्वेति।** **असिद्ध इति।** त्रिपाद्यां णत्वप्रकरणानन्तरं 'ख्शाञः शस्य यो वा' इति वक्तव्यमिति भावः। नन्वस्मिन् पक्षेऽत्यन्त[10]गौरवं वृत्तम्, तदाश्रयणे किं प्रयोजनमित्याशयेन पृच्छति — **किमिति।** समाधत्ते — **सौप्रख्ये्ऽवुञ्विधिरिति।** अवुञ्विधिरिति छेदः। **सौप्रख्य इतीति।** अस्मादिति शेषः। **योपधलक्षण इति।** [11]'धन्वयोपधाद्वुञ्' इत्यनेन। **न भवतीति।** यत्वस्यासिद्धत्वादिति शेषः। **सौप्रख्यीय इति।** सुप्रचष्ट इति सुप्रख्यः। [12]'आतश्चोपसर्गे' इति कः। तेन निर्वृत्तो [13]'देश इत्यर्थः। सुप्रख्यस्य भाव इत्यर्थेऽपि [14]'योपधाद् गुरूपोत्तमाद्वुञ्' इति वुञ् न भवति, किं तु त्वतलावेव। ब्राह्मणादेराकृतिगणत्वात् ष्यञित्येके। **निष्ठा-**

---

[1] पा. सू. ८. २. ४३.
[2] पा. सू. ८. २. ५७.
[3] पा. सू. ८. ४. २९.
[4] पा. सू. १. २. ५४.
[5] 'सर्वधातुभ्योऽसुन्' इति सूत्रं विवक्षितम्. उणादिसूत्रम् ६३८.
[6] पा. सू. ६. ४. १४.
[7] पा. सू. ३. २. १८२.
[8] उणादिसूत्रम् ५६.
[9] भाष्ये 'खशादिर्वा' इत्यत्र 'ख्शादिर्वा' इति निर्णयसागरमुद्रिते पाठः।
[10] गौरववृत्तं — ब.
[11] पा. सू. ४. २. १२१.
[12] पा. सू. ३. १. १३६.
[13] देश इत्यर्थेऽणि सौप्रख्यशब्दः, ततो भवार्थे वृद्धाच्छे सौप्रख्यीय इति विवक्षितमत्र। मध्ये ग्रन्थः कियांश्चित् त्रुटितः स्यादिति भाति।
[14] पा. सू. ५. १. १३२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नत्वमाख्यात इति। तथा च [1]'न ध्याख्या' इति सूत्रे ख्याग्रहणं न कर्तव्यमिति भावः। एतेन "[2]'न ध्याख्या' इति तु प्रतिषेधः 'ख्या प्रकथने' इत्यस्यैव, [प्रतिपदोक्तत्वात्" इत्यपास्तम्।] आर्धधातुकविषये चक्षिङादेशत्वञित्त्वख्शादित्वानां वोधितत्वेनार्धधातुकविषयेऽन्यस्य ख्याधातोरसंभवेन तत्सूत्रे ख्याग्रहणानर्थक्यस्यैव वक्तुं युक्तत्वात्। **पुंख्यानमिति।** [3]'पुमः खय्यम्परे' इति रुत्वं न भवति। यत्वस्यासिद्धत्वेन खयोऽम्परत्वाभावात्। [4]'संपुंकानां सो वक्तव्यः' इति वार्तिकानुसारेणेदम्। तत्रत्यभाष्यपर्यालोचने तु सत्वं न भवतीति वोध्यम्। **णत्वं न भवतीति।** [5]'कृत्यचः' इत्यनेनेति शेषः। यत्तु "'ख्या प्रकथने' इत्यस्मादपि परस्य [6]'लुब्योगाप्रख्यानात्' इति निपातनाण्णत्वाभावः" इति। तन्न, तस्यैव चक्षिङादेशत्वेन प्रकृतसूत्र उपादानात्। अप्रख्यानादित्यस्यापि प्रकृतसूत्रविषयतासंभवेन 'ख्या प्रकथने' इति धातुरूपत्वे मानाभावाच्च। **अप्रख्यान भवतीति।** जिह्वामूलीयो न भवतीत्यर्थः। सस्थानो जिह्वामूलीय इति प्राचां मतम्। तत्र 'कुप्वोः' इति योगं [7]विभज्य शर्परयोः कुप्वोर्विसर्गस्य विसर्ग एवेति व्याख्यानात् जिह्वामूलीयाभाव इति भावः। एतेन "[8]'शर्परे विसर्जनीयः' इत्येवात्र भवति" इति निरस्तम्। [9]'शर्परे विसर्जनीयः' इति नियमस्यानन्तरसत्वमात्रनिवर्तकतौचित्यात्। न च तथात्वे 'शर्परे न' इत्येव ब्रूयादिति वाच्यम्, [10]'कुप्वोः ᳲक ᳲपौ च' इत्यत्रानुवृत्त्यर्थं विसर्जनीयग्रहणस्यावश्यकत्वात्। न हि तत्र नञनुवृत्त्या विसर्गो लभ्यते, तत्रानुवृत्तेन नञा सत्वे निषिद्धेऽपि ᳲक ᳲपयोर्नित्यत्वात्। न च विनापि सत्वनिषेधेन ᳲक ᳲपयोर्विधानसामर्थ्यादिव सकारनिवृत्तौ सिद्धायां पुनस्तन्निषेधसामर्थ्यान्निषेध एव पक्षे भविष्यति, न तु ᳲक ᳲपाविति वाच्यम्, सत्वनिषेधाभावे 'शर्परे न' इति सूत्रेण यत्र सत्वं निषिद्धं तत्र चरितार्थयोः ᳲक ᳲपयोरसिद्धत्वेन 'क करोति' इत्यादौ सत्वापत्तेः। निषेधे सति तु तत्संनियोगेन विहितौ ᳲक ᳲपौ 'कᳲकरोति, कᳲपठति' इत्यादावपि सिध्यतः। यथा [11]'कुषिरञ्जोः प्राचां श्यन् परस्मैपदं च' इति यक्प्रतिषेधसंनियोगेन विधीयमानः श्यन् परस्मैपदं च सार्वधातुकविषय एव भवति। ननु 'कुप्वोः' इति विभज्य शर्परयोः कुप्वोः सत्वनिषेध एवेति व्याख्यानात् 'ᳲक ᳲपौ च' इति सूत्रांशः सत्वापवाद एव भविष्यतीति चेन्न, तथात्वे विसर्जनीयग्रहणानर्थक्यदाढर्च्येन [12]वृश्चिकभीन्यायापातात्। **वर्जने प्रतिषेध इति।** वर्जने वर्तमानस्य चक्षिङः ख्याञ् नेति वाच्यमित्यर्थः। **नृचक्षा रक्ष इति।** छान्दसोऽयं प्रयोगः। भाषायां तु 'नृचक्षो रक्षः' इति भवति। **विचक्षण इति।** [13]'अनुदात्तेतश्च हलादेः' इति युच्। **बहुलमिति।** प्रकृतार्धधातुकाधिकारापेक्षमिदम्। तेनान्नशव्दे जग्ध्यभावः। **वधकेति।** ण्वुलि वधादेशः। **गात्रेति।** डण औणादिके ष्ट्रनि गादेशः। **विचक्षणेति।** चक्षिङो युचि ख्याञभावः। **अजिरेति।** अजेर्वीभावाभावः। यत्तु "[14]'अजिरशिशिर' इति निपातनमनपेक्ष्येदम्" इति। तन्न, [15]'अदोऽनन्ने' इति निपा-

---

[1] पा. सू. ८. २. ५७.
[2] पा. सू. ८. २. ५७.
[3] पा. सू. ८. ३. ६.
[4] का. वा. ८. ३. ५–१.
[5] पा. सू. ८. ४. २९.
[6] पा. सू. १. २. ५४.
[7] 'शर्परे विसर्जनीयः' इति सूत्राद्विसर्जनीयपदमनुवर्त्येति शेषः।
[8] पा. सू. ८. ३. ३५.
[9] पा. सू. ८. ३. ३५.
[10] पा. सू. ८. ३. ३७.
[11] पा. सू. ३. १. ९०. 'कुषिरजोः' इत्यत्र 'कुषिरञ्जोः' इति बालमनोरमामुद्रालयमुद्रिते पाठः।
[12] लौ. न्या. द्वितीयभागे पृष्ठम् ७६.
[13] पा. सू. ३. २. १४९.
[14] उणादिसूत्रम् ५६.
[15] पा. सू. ३. २. ६८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तनादन्नशब्दस्य, 'असनयोश्च' इति संनिहितवचनेन विचक्षणशब्दस्य, औणादिकक्वुन्प्रत्ययेन[1] वधघातोर्वधक इत्यस्य, 'गाङ गतौ' इत्यस्मादौणादिके [2]ष्ट्रनि गात्रमित्यस्य च सिद्धत्वेनैकस्यैवाजिरशब्दस्यान्यथासिद्धत्वकथने चातुर्याभावात्। [3]'अजिर' इति निपातनपर्यालोचनेऽप्युपायस्योपायान्तरादूषकत्वात्। प्रकृतवचनस्य व्यापकत्वेन तन्निपातनं न कर्तव्यं भवतीत्यत्र तात्पर्यसंभवाच्च॥

अजेर्व्यघञपोः २.४.५६.

[२, ८८०–८८१]

(उद्द्योतनम्) भाष्ये **समजनं समज्येति**। वक्ष्यमाणरीत्या ल्युटचपि वीभावो नास्तीति समज्येत्यस्य व्याख्यानार्थं 'समजनम्' इत्युक्तम्, न तु प्रत्याहारमध्ये ल्युडस्ति। **समज्येति**। [4]'संज्ञायां समज' इति क्यप्। [5]'ॠदोरप्' इत्यारभ्य [6]'व्रजयजोर्भावे क्यप्' इतिपर्यन्तं प्रत्याहारः। भाष्ये **संवीतिरिति**। क्तिनः प्रत्याहारपातित्वाद्वीभावो न स्यादित्यर्थः। ननु प्रवेतेत्युक्त्वा 'प्राजिता' इति कथमुक्तम्, अत आह— **वलादाविति**। प्रयोगानुसारात् क्वचिद्व्यवस्था, क्वचिद्विकल्पश्च सिध्यतीत्यर्थः। 'सूतः' इत्यादेः प्रकृतानुपयोगं निराह— **प्रयोगेति**। **विकल्पं** 'प्राजिता', प्रवेता' इत्यत्र वलादावार्धधातुके विकल्पम्। प्राप्तिज्ञश्चेद् दोषज्ञोऽपीति 'न त्विष्टिज्ञः' इत्ययुक्तम्, अत आह— **सौत्रीमिति**। देवानांप्रिय इति कथं निन्दा, अत आह— **देवेति**। देवशब्दस्य मुख्यार्थेऽप्याह— **अथवेति**। उत्तरापरिस्फूर्त्या 'अहो' इति वाक्यम्। तस्य तात्पर्यमाह— **पराजितत्वादिति**। **वेञ इति**। निष्ठायां [7]'वचिस्वपि' इति संप्रसारणे कृत इति भावः। धातूनामनेकार्थत्वाद्वेञः प्रेरणार्थस्य निष्ठान्तस्य पूजार्थेन सुशब्देन बहुव्रीहौ सूतशब्दं मत्वा तस्य निन्दार्थम् 'अयं सूतो न भवति, किं तु दुरुतः' इति सुशब्दमपहाय दुःशब्दसहितेनोतशब्देन तन्निर्देशः कृत इत्यर्थः। वेञः प्रेरणार्थत्वाभावात् सूतशब्दस्तस्मान्नोत्पन्न[8] इति निन्दावाक्यस्याप्यर्थसाधुत्वं नास्तीति वक्तुं [9]'न खल्वपि' इति भाष्यम्। तत्र सुवतेः कर्तरि क्तं साधयति— **बहुलेति**। [10]'कृत्यल्युटो बहुलम्' इति बहुलग्रहणं [11]'नपुंसके भावे क्तः' इत्यत्र क्तेनापि वाक्यभेदेन संबध्यत इति भावः। [12]**चकारस्येति**। [13]'आदिकर्मणि क्तः कर्तरि च' [14]इति चकारस्येत्यर्थः। **वर्तमान इति**। [15]'मतिबुद्धि' इति सूत्रे चकारस्यानुक्तसमुच्चयार्थत्वादित्यर्थः। अस्मिन् पक्षेऽन्वर्था संज्ञेत्याह— **रथवाहस्येति**। मम चेन्निन्दा कार्या [16]'दुःसूतेन' इति वक्तव्यम्, न तु 'दुरुतेन' इति सूतवाक्यार्थः। भाष्ये **न तर्हीति**। 'आर्धधातुके वा' इति 'प्रवयणः, प्राजनः' इति ल्युटि रूपद्वयसिद्धेरिदं सूत्रं व्यर्थमित्यर्थः।

---

[1] हनो वध चेत्यनेनेति भावः।
[2] सर्वधातुभ्यः ष्ट्रन् इत्यनेनेति भावः।
[3] उणादिसूत्रम् ५६.
[4] पा. सू. ३. ३. ९९.
[5] पा. सू. ३. ३. ५७.
[6] पा. सू. ३. ३. ९८.
[7] पा. सू. ६. १. १५.
[8] तत्स्थानोत्पन्न इति— अ.
[9] भाष्ये 'न खलु वेञः' इत्यत्र 'न खल्वपि वेञः' इत्यन्नंभट्टपाठ इति भाति।
[10] पा. सू. ३. ३. ११३.
[11] पा. सू. ३. ३. ११४.
[12] 'कर्तरि चेति' इत्येव प्रतीको दृश्यते— अ, ऋ.
[13] पा. सू. ३. ४. ७१.
[14] 'इत्यतः कर्तरीत्यनुवर्तमाने गत्यर्थाकर्मकेति सूत्रे चकारस्येत्यर्थः' इत्युचितं भाति।
[15] पा. सू. ३. २. १८८.
[16] दुष्टसूतेनेति— ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अजेर्युप्रत्ययमाह — **यजीति** । [1]"यजिमनिशुन्धिदसिजनिभ्यो युच्" इत्युणादिसूत्रेण युच्प्रत्ययेऽजेर्वादेशे वायुरिति रूपमित्यर्थः । [2]"कृवापाजि" इत्यादिना वातेरुण्प्रत्ययेन वायुशब्दस्य सिद्धत्वाद्बहुलग्रहणानुवृत्त्या युच्प्रत्ययो वादेशार्थं सूत्रं चेति गौरवं भाष्ययोजनामात्रार्थमित्याहुः ॥

[२, ८८०–८८१]

(रत्नप्रकाशः) इदमपीति । वलाद्यार्धधातुकविषये विकल्पः सिध्यतीति भावः । प्राजितेति रूपमनिष्टमिति मन्यमानः पृच्छति — **किंच भो इति** । उत्तरमाह — **बाढमिति** । तदेवोपपादयति — **एवं हीति** । **प्राप्तिज्ञ इति** । प्राप्तिशब्दस्य सामान्यवचनत्वेऽपि सौत्री या प्राप्तिस्तत्परत्वं बोध्यम् । **देवानांप्रिय इति** । मूर्ख इत्यर्थः । **दुरुतेनेति** । सूतशब्दानर्हेण दुरुतशब्दार्हेणेति भावः । **न खलु वेञ इति** । यदि वेञः सूतशब्दः स्यात् तदा त्वदुक्तं 'दुरुतेन' इति वचनं किंचिच्चमत्कारकारि स्यात्, न तु तत्तथा । तथा चेतोऽपि त्वया मौर्ख्यमेवात्मनः प्रकटितमिति भावः । **सुवतेरिति** । बाहुलकाद्वा [3]गत्यादिसूत्रे चकाराद्वा कर्तरि क्त इति भावः । पराजितोऽपि वैयाकरणो मुखमस्तीति कृत्वा किंचिद्वदति — **यदीत्यादिना** । एवं तर्हि [4]"वा यौ" इति सूत्रं व्यर्थं स्यादिति मन्यमान आह — **न तर्हीति** । **वायुरिति** । [5]"यजिमनि" इति बाहुलकाद्युच् । [6]"कृवापाजिमि" इत्युणि सिद्धमेतत् ॥

ण्यक्षत्रियार्षञितो यूनि लुगणिञोः २. ४. ५८.

[२, ८८१–८८२]

(उद्द्योतनम्) ण्यादयो गोत्रापत्यप्रत्यया गृह्यन्ते । एतदन्तेभ्यो यून्युत्पन्नयोरणिञोर्लुक् स्यात् । [7]"कुर्वादिभ्यो ण्यः", तस्माद्यूनि "अत इञ्" । तस्य लुक्, कौरव्यः पिता, कौरव्यः पुत्रः । [9]"क्षत्रिय" इति गोत्रप्रत्ययान्तग्रहणम् । [10]"ऋष्यन्धक" इत्यण्, तस्मादिञो लुक् । श्वाफल्कः पिता, श्वाफल्कः पुत्रः । आर्ष — ऋष्यण्, वासिष्ठः पिता, वासिष्ठः पुत्रः । ञितः — बैदः पिता, बैदः पुत्रः । अणोऽपि — [11]"तिकादिभ्यः फिञ्" । तस्माद्यूनि [12]"प्राग्दीव्यतोऽण्" तस्य लुक् । तैकायनिः पिता, तैकायनिः पुत्रः । [13]"साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ्" । जनपदशब्दात् क्षत्रियादिति वर्तते । साल्वाः क्षत्रियाः, तेषां निवासो जनपदः साल्वः, तदवयवा [14]उदुम्बरबुधादयः । साल्वावयवेभ्यः क्षत्रियवाचिभ्यः प्रत्यग्रथादिभ्यश्चेञ् स्यात् । जनपदशब्दात् क्षत्रियादञोऽपवादः । **फगिति** । अणिञोरित्युक्तेः फको लुक् न प्राप्नोतीति 'तद्राजात्' इति वक्तव्यमित्यर्थः ।

---

[1] उणादिसूत्रम् ३०७.
[2] उणादिसूत्रम् १.
[3] गत्यर्थाकर्मकेति सूत्र इत्यर्थः ।
[4] पा. सू. २. ४. ५७.
[5] उणादिसूत्रम् ३०७.
[6] उणादिसूत्रम् १.
[7] पा. सू. ४. १. १५१.
[8] पा. सू. ४. १. ९५.
[9] ण्यक्षत्रियेति — ऋ.
[10] पा. सू. ४. १. ११४.
[11] पा. सू. ४. १. १५४.
[12] पा. सू. ४. १. ८३.
[13] पा. सू. ४. १. १७३.
[14] उदुम्बरादयः — ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयस्य प्रयोजनमाह — **स चेति**। **फक इति**। [१]"यञिञोश्च" इति विहितस्य। वचनस्य प्रयोजनमाह — **तेनेति**। **इदमेवेति**। बौध्यादेरप्यनेनैव [२]सिद्धेरित्यर्थः। भण्डिजङ्घस्यापत्यम्, [३]"अत इञ्"। यूनि [४]"यञिञोश्च" इति फक्, तस्य लुक्। एवं कार्णखरकिः। वैश्यगोत्राद-पीत्युपपत्तये 'वैश्यौ' इत्युक्तम्॥

इति श्री[महा]भाष्यप्रदीपोद्द्योतने द्वितीयाध्यायस्य चतुर्थपादे प्रथममाह्निकम्॥

[२, ८८१-८८२]

(रत्नप्रकाशः) **तद्राजादिति**। [५]"ते तद्राजाः" इति तद्राजसंज्ञकप्रत्ययान्तात् परस्येत्यर्थः। **बौधिरिति**। बुधोदुम्बरशब्दाभ्यां साल्वावयवलक्षण इञ्। तदन्ताद्यूनि [६]"यञिञोश्च" इति फक्। **जाबालिरिति**। जबालस्यापत्यम्, [७]"अत इञ्", स तद्राजो नेति वचनान्तरारम्भः। **अब्राह्मणगोत्रमात्रादिति**। तेन वैश्यगोत्रादपि सिध्यति। व्यापकत्वादिदमेव वचनमादर्तव्यम्, भण्डिजङ्घकार्णखरकौ वैश्यौ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्य-
श्रीशिवरामेन्द्रसरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
द्वितीयस्याध्यायस्य चतुर्थे पादे प्रथममाह्निकम् ॥

---

[१] पा. सू. ४. १. १०१.
[२] सिद्धिरित्यर्थः — अ.
[३] पा. सू. ४. १. ९५.
[४] पा. सू. ४. १. १०१.
[५] पा. सू. ४. १. १७४.
[६] पा. सू. ४. १. १०१.
[७] पा. सू. ४. १. ९५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य चतुर्थपादे द्वितीयमाह्निकम्

तद्राजस्य बहुषु तेनैवास्त्रियाम् २. ४. ६२.

[२, ८८२-८८७]

(उद्द्योतनम्) ननु बहुत्वे उत्पन्नस्य तद्राजादेर्लुग् विधीयते। न च प्रियाङ्गा इत्यादौ तद्राजस्य बहुत्वे उत्पत्तिरिति लुकोऽप्रसङ्गान्निषेधो व्यर्थः, अत आह — **इहेति**। ननु बहुवचनशब्दस्य प्रत्ययविशेषसंज्ञात्वात् तदेकदेशस्य तत्र कथं साधुत्वम्, अत आह — **संज्ञानां चेति**। एकदेशस्यापि वर्णमात्रस्य प्रयोगो नास्तीति सूचयितुं 'पद' इत्युक्तम्। 'तेनैव' ग्रहणस्य वचनपरत्वद्योतकत्वमुपपादयति — **अर्थेति**। बहुष्वित्यस्य [१]बहुत्वार्थकत्वे तेनैवेति व्यर्थमित्यर्थः। तत्र हेतुः — **प्रियेति**। वचनपरत्वे तु तेनैवेति [२]वक्तव्यमित्याह — **बहुवचनमिति**। [३]प्रियाङ्गा इत्यत्र बहुवचनस्य परत्वात् तस्मिन् परतस्तद्राजस्य लुक् स्यात्। [४]तेनैवेत्युक्तौ तद्राजार्थबहुत्ववाचिनि बहुवचने परत इत्यर्थलाभान्न लुक्प्रसङ्ग इत्यर्थः। विचारस्य कोटिद्वयाधीनत्वाद् बहुशब्दस्यार्थपरत्वमपि सलिङ्गमाह — **अस्त्रियामिति**। **स्त्रीप्रत्ययेनेति**। बहुवचने परतस्तद्राजस्य लुक्। स्त्रीप्रत्ययेन व्यवधाने बहुवचनपरत्वाभावेन लुगभावात् 'अस्त्रियाम्' इति प्रतिषेधो व्यर्थ इत्यर्थः। **अर्थेति**। बह्वर्थत्वात् तद्राजस्य लुक्प्रसङ्ग इत्यर्थः। प्रत्ययग्रहणपक्षे वार्तिकमवतारयति — **तत्रेति**। **वक्ष्यमाणाः** [५]यञञादयः। 'प्रियवाङ्गाः' इति बहुव्रीहिसमासस्यैकत्वात् 'समासबहुत्वे' इत्ययुक्तम्, अत आह — **समासार्थेति**। विशेषणस्यैव निषेधो न तु विशेष्यस्य बहुत्वस्येत्याह — **अन्येति**। एकस्मिन् वाक्ये आख्यातद्वयायोगादाह — **एतावदिति**। **इत्याह** इत्यत आह। 'क्रियमाणमपि चोदयन्ति' इत्येतद्व्याचष्टे — **सूत्र इति**। क्रियमाणे कर्तव्यत्ववचनस्य प्रयोजनमाह — **बहुवचनेति**। 'तेनैव' इत्यनेन 'समासबहुत्वे' इत्यनेन चेति 'सर्वथा'शब्दार्थः। 'अबहुत्वे' इत्यनेन [६]कस्मिन् पक्षे किमुच्यते, अत आह — **प्रत्ययपक्ष इति**। समासाद्बहुवचनाभावे हेतुमाह — **समासार्थस्येति**। बहुशब्दस्यार्थपरत्वे तु लुङ न वक्तव्य इत्याशयेनाह — **प्रत्ययश्चेदिति**। 'अबहुत्वे' इति कस्मिन् पक्षे वक्तव्यम्, अत आह — भाष्ये **बहुवचने परत इति**। ननु परत्वात् सुपो लुकि कृते बहुवचनपरत्वाभावात् 'बहुवचन इत्येव सिद्धम्' इत्ययुक्तम्, अत आह — **शसमिति**। समासप्रातिपदिक[७]सापेक्षविभक्तिलुगपेक्षया बहुवचनमात्रापेक्षस्तद्राजस्य लुगन्तरङ्ग इत्यर्थः। [८]ननु पूर्वं तद्राजस्य लुप्तत्वात् [९]'नात्र' इत्ययुक्तम्, अत आह — **अन्तरङ्गानिति**। 'त्वत्पुत्रः' इत्यत्रान्तरङ्गत्वात् पूर्वं त्वादेशे पश्चाद्बहिरङ्गः [१०]'सुपो धातु' इति लुगिति सिद्धे [११]'प्रत्ययोत्तरपदयोश्च' इति सूत्रारम्भाद् बहिरङ्गोऽपि लुगन्तरङ्गानपि विधीन् बाधत इति ज्ञापितम्।

---

[१] बहुत्वार्थसत्त्वे — अ.
[२] वक्तव्यमित्यर्थः। बहुवचनमितीति — अ.
[३] प्रियवाङ्गा इत्यत्र — ऋ.
[४] तेनैवेत्युक्ते — अ.
[५] यञिञादयः — अ; येञादयः — ऋ.
[६] तस्मिन् पक्षे —अ.
[७] 'सापेक्ष' इति नास्ति — अ.
[८] ननु तद्राजस्य लुक उक्तत्वात् — अ.
[९] भाष्ये 'न चात्र' इत्यस्य चकारं विनानुवादः।
[१०] पा. सू. २. ४. ७१.
[११] पा. सू. ७. २. ९८.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तथा चात्र शस एव पूर्वं लुगिति तस्मिन् [1]परतस्तद्राजस्य लुङ न प्राप्नोतीत्यर्थः। 'अन्तरङ्गानपि' इति न्यायेनायं लुक् तद्राजलुको [2]बाधक इत्यन्वयः। तत्र हेतुः — **प्रत्ययोत्तरेति**। [3]बाधकत्वेऽतिशयमाह — **अस्यैवेति**। [4]'सुपो धातु' इत्यस्यैव। **अत्र** प्रकृते। उत्तरपदग्रहणेन यस्य बलवत्त्वं ज्ञापितं तदेवास्ति, न तु लुगन्तरम्। एतज्ज्ञापकवशाद्यत्र लुगन्तरस्यापि बाधकत्वं तत्रास्य बाधकत्वं किं वक्तव्यमिति भावः। यथाश्रुतसूत्रे 'वक्ष्यामि' इत्ययुक्तम्, अत आह — **यथास्थितमिति**। व्याख्यानमेवाह — **लुमतेति**। [5]**तस्य त्विति**। 'गर्गाः' इत्यत्र [6]'यञञोश्च' इति यञो लुकि प्रत्ययलक्षणेन ञित्स्वरो नेष्यते। तस्याङ्गाधिकारविहितत्वाभावेऽप्यङ्गस्यैव स्वरो भवतीति [7]तत्संग्रहार्थम् 'अन्यत्' इत्युक्तम्। ननु तद्राजस्य लुगप्यङ्गसंबन्ध्येवेति तस्यापि निषेधः स्यात्, अत आह — **लुगिति**। तद्राजस्येति षष्ठीनिर्देशात् प्रत्ययस्यैव कार्यित्वं नाङ्गस्येति भावः। **क्रीतार्थस्येति**। [8]'तेन क्रीतम्' इति विहितस्य। 'पञ्चगार्ग्य ई मिस् ठक्' इति स्थिते [9]'सुपो धातु' इति मिसो लुकि ठग्ङीपोर्लुकि पञ्चगार्ग्यः। ननु 'आङ्गचः' इत्यत्रैव 'अस्त्रियाम्' इति प्रतिषेधः किं न स्यात्, अत आह — **अस्त्रियामिति**। ननु सर्वेषां बहुवचनान्तानां द्वन्द्वे लुक् सिध्यत्येव, अत आह — [10]**अत्राकारेति**। व्यवहितेऽपि [11]परशब्दोऽस्ति, अत आह — **प्रत्ययेति**। नन्वत्र भ्यसो लुक्यपि प्रत्ययलक्षणेन बहुवचने परतो यञो लुक् स्यात्, अत आह — **सुबन्तेनेति**। **इतश्चेति**। इकारान्ताद् द्व्यचोऽपत्ये ढक्, न त्विञन्तात्। कितस्तद्धितस्यान्तोदात्तत्वम्। ढकः [12]'अत्रिभृगु' इति लुक्। तस्य प्रत्ययनिमित्तत्वे यस्मिन्ननुदात्ते परत उदात्तो लुप्यते तस्यानुदात्तस्योदात्त इति [13]'अनुदात्तौ सुप्पितौ' इत्यनुदात्तस्य जस उदात्तत्वं स्यादित्यर्थः। [14]नापूर्वं वचनमित्याह — **व्याख्यानादिति**। **वृद्धेति**। वृद्धादिकारान्तात् कोसलाजादाभ्यां चापत्ये ञ्यङ। अम्बष्ठाः क्षत्रियविशेषाः, तेषां निवासो जनपद आम्बष्ठः। तस्मात् क्षत्रियवाचिनोऽपत्ये ञ्यङ। एवं सौवीर्याः। तेनैव व्यवधानाज्जसः परत्वं नास्ति, अत आह — **स चेति**। प्रत्ययपक्षे 'अस्त्रियाम्' इति [15]न वक्तव्यम्, किं त्वर्थपक्ष एवेत्युपसंहरति — **तदेवमिति**। प्रत्ययपक्षोक्तदूषणमर्थपक्षेऽपीति वक्तुं 'द्वन्द्वेऽबहुषु' इति भाष्यम्। तदुपपादयति — **एकस्मिन्नेवेति**। प्रत्ययपक्षेऽन्त्यस्य प्रत्ययपरत्वाल्लोपः सिध्यतीति विशेषमाह — **प्रत्ययेति**। [16]गोत्रपदं व्याचष्टे — **अपत्येति**। 'बहुषु लोपिनः' इत्यस्य व्याख्या — **लोपभागिति**। बहुवचनान्तस्येत्येतद् व्याचष्टे — **यदेति**। अर्थपक्ष एवेत्येवार्थमाह[17] — **प्रत्ययपक्ष इति**। 'द्व्येकयोः' इति द्विवचनं भावप्रधानत्वेनेत्याह — **द्व्येकशब्दाविति**। **अञ्प्रत्ययः** [18]'अनृष्यानन्तर्ये बिदादिभ्योऽञ्'

---

[1] तस्मिन् परतो विहित इत्यर्थः।

[2] प्रदीपे 'संभवाद्बाधत इति भावः' इत्यत्र 'संभवाद्बाधक इति भावः' इत्यन्नंभट्टपाठ इति प्रतीयते।

[3] बाधकपरत्वेऽतिशयमाह — अ.

[4] पा. सू. २. ४. ७१.

[5] प्रदीपे 'तस्य यत् कार्यम्' इत्यत्र 'तस्य तु यत् कार्यम्' इत्यन्नंभट्टपाठ इति भाति॥ अस्य त्विति — ऋ.

[6] पा. सू. २. ४. ६४; यञिञोश्च — ऋ.

[7] तत्संग्रहणार्थं — अ.

[8] पा. सू. ५. १. ३७.

[9] पा. सू. २. ४. ७१.

[10] तत्राकारेति — अ.

[11] परशब्दोऽस्तु — अ.

[12] पा. सू. २. ४. ६५.

[13] पा. सू. ३. १. ४.

[14] नापूर्ववचनमित्याह — अ.

[15] 'न' इति नास्ति — अ.

[16] अपत्यपदम् — अ, ऋ.

[17] इत्यत्रत्यैवशब्दार्थमाहेत्यर्थः।

[18] पा. सू. ४. १. १०४.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यनेन। **गोत्रेऽलुगिति**। [1]"यस्कादिभ्यो गोत्रे' इति प्रकरणे येषां गोत्रप्रत्ययानां लुगुक्तस्तेषामजादौ प्राग्दीव्यतीये न लुक्। गर्गाणां छात्राः गार्गीयाः। भाष्ये **न चात्रेति**। यून्युत्पन्नस्येञो [2]'ण्यक्षत्रियार्ष' इति लुप्तत्वादित्यर्थः। भाष्ये **वर्णाश्रय इति**। [3]'गोत्रेऽलुगचि' इति वर्णाश्रयोऽलुक्। अर्थपक्षे दोषान्तरमाह — भाष्ये **एकवचनेति**। ननु बहुष्विति 'प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य च ग्रहणम्' इति परिभाषा। श्रुतबहुत्वविशिष्टप्रत्ययेनापि तदन्तविधिसंभवात् 'मन्यते' इत्युक्तम्। **इव इति**। इवार्थे वर्तमानात् कन् स्यात् प्रतिकृतावभिधेयायाम्। **जीविकेति**। जीविकार्थं यदपण्यं प्रतिकृतिरूपं [4]तत्रोत्पन्नस्य कनो [5]लुप्। अर्चापूजयोः कायिकमानसिकादिभेदेन भेदो ज्ञेयः। अर्चापूजनयोः शिवः, विष्णुः। चित्रकर्मसु, दुर्योधनः। ध्वजेषु, कपिः। 'काश्यपाः' इत्यत्राप्येतदन्यतमत्वेन[6] लुबित्यर्थः। देवपथादिराकृतिगणः। 'अञ् यो बहुषु' इत्युक्तौ तु नात्र लोपप्रसङ्ग इत्याह — **अञ् प्रत्यय इति**। प्राप्तस्तदन्तविधिः कथं नाभ्युपगन्तव्यः, अत आह — **प्रत्ययादर्शनस्येति**। लुक्प्रतियोगित्वेन प्रत्ययस्यैव प्राधान्यादित्यर्थः॥

[२, ८८२–८८७]

(**रत्नप्रकाशः**) 'बहुषु' इत्यस्यार्थपरत्वे वर्तमानस्येति पदमध्याहर्तव्यं स्यात्। तदपेक्षया तस्य बहुवचनलक्षकत्वमेव युक्तमाश्रयितुम्। तथा च 'अस्त्रियाम्' इति न कर्तव्यमेव, स्त्रीप्रत्ययेन व्यवधानादेव तत्र लुगप्रवृत्तेरित्याशयेन प्रवृत्तं वार्तिकं व्याख्यातुमुपन्यस्यति — **तद्राजादीनामिति**। आदिशब्देनोत्तरसूत्रविषया लुग्भाजो गृह्यन्ते। एतेन 'तेनैवग्रहणाद् बहुशब्देन बहुवचनमुच्यत इति लक्ष्यते' इति निरस्तम्। बहुशब्दस्य बहुवचनपरतामाश्रित्यैव वार्तिककृता तेनैवेत्यस्यास्त्रियामित्यनेनैव सहोपेक्षितत्वात्। तस्योत्तरभाष्य एव स्पष्टत्वात्। यदप्युक्तं 'संज्ञानां चैकदेशप्रयोगो दृश्यते, यथा भीमसेनो भीम इति' इति। तदपि न, बहुवचनानुपपत्तेः। अर्थपरस्य तद्वाचकलक्षकत्वे तु 'गङ्गायां घोषः' इत्यादौ गङ्गाशब्दादेः स्त्रीत्ववत् तत्र बहुवचनमुपपन्नं भवति। **समासबहुत्व इति**। समासार्थबहुत्व इत्यर्थः। 'तेनैव'ग्रहणेनैव [7]तत्रातिप्रसङ्गस्य वारितत्वेन [8]'तत्रातिप्रसङ्गवारकवचनान्तरकरणमनुचितमिति शङ्कते — **किमिति**। **तेनैव चेत् कृतं बहुत्वमिति**। तच्छब्देन तद्राजः परामृश्यते, बहुत्वं बहुवचनम्, तत्कृतत्वं नाम तदर्थगतबहुत्ववाचकत्वम्, तथा चायं सूत्रार्थः — तद्राजस्य लुक् स्याद् बहुवचने परे, तच्चेद् बहुवचनं तद्राजार्थगतबहुत्ववाचीति। एवं च नोक्तातिप्रसङ्ग इति तद्वारकं वचनान्तरमयुक्तमिति भावः। समाधत्ते — **भवति वै किंचिदिति**। एतावदेकं वाक्यम्, एवंविधं किंचिद् भवतीत्यर्थः। किं तदित्यत आह — **आचार्या इति**। **चोदयन्तीति**। आक्षिपन्तीत्यर्थः। तत् पुनर्विवृणोति — **तद्वा कर्तव्यमिति**। तत्र बहुशब्दस्य बहुवचनपरत्वेऽव्याप्तिमाह — **अबहुत्व इति**। तद्राजात् परस्य बहुवचनस्य लुकि समासार्थस्याबहुत्व इत्यर्थः। ननु कस्मिन् पक्षे दूषणमिदमिति पृच्छन्तं प्रत्याह — **बहुवचने परत इति**। तत्रापि प्रत्ययलक्षणेन बहुवचनपरत्वमस्त्येवेति मन्यमान आह — **अथ किमर्थमिति**। इतरस्तदाशयं बोद्धुमाह — **न सिध्यतीति**। प्रष्टा स्वाशयमाह — **प्रत्ययलक्षणेनेति**। इतरस्तन्निराकरोति — **न लुमता तस्मि-**

---

[1] पा. सू. २. ४. ६३.
[2] पा. सू. २. ४. ५८.
[3] पा. सू. ४. १. ८९.
[4] तत्र निष्पन्नस्य — अ.
[5] लुक् — अ, ऋ.
[6] अन्यतमत्वेन न लुगित्यर्थः — अ.
[7] तत्रापि प्रसङ्गस्य — ब.
[8] तत्रापि प्रसङ्ग — ब.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

न्निति। प्रष्टा पुनराह— **न लुमताङ्गस्येति।** अङ्गाधिकारकार्यं प्रत्येव स निषेध इति पक्ष आश्रयिष्यत इति भावः। एतेन 'यथास्थितमेव न्यासमेवं व्याख्यास्यामि— लुमता लुप्तो यः प्रत्ययस्तस्मिन् यदङ्गं तस्य यत् कार्यमङ्गाधिकारविहितमन्यद्वा तन्न भवतीति। [1]'लुक् तु प्रत्ययस्य कार्यं, न समस्तस्याङ्गस्येति प्रत्ययलक्षणेन भविष्यतीति भावः' इति निरस्तम्। [2]'न लुमता तस्मिन्' इति वार्तिककाराभिमतन्यासे योऽर्थस्तस्य तदुक्तरीत्या यथाश्रुतसूत्रारूढतया [3]'क्ङिति च' इति सूत्रे भगवता दर्शितत्वेऽपि प्रकृते आश्रयणानौचित्यात्। अङ्गावयवस्य प्रत्ययस्य जायमानो यो लुक् तस्याङ्गसंबन्धित्वाभावे मानाभावात्। अन्यथा [4]'क्ङिति च' इति सूत्रभाष्यविरोधाच्च। **नैवं शक्यमिति।** आश्रयितुमिति शेषः। **पञ्चभिर्गार्गीभिरिति।** क्रीतार्थस्यार्हीयस्य ठकः [5]'अध्यर्धपूर्व' इति लुक्। [6]'लुक् तद्धितलुकि' इति ङीपो लुक्। तत्र प्रत्ययलक्षणेन भिसमाश्रित्य [7]'यञञोश्च' इति लुक् स्यादिति भावः। ननु ङीब्लुकः[8] 'अचः परस्मिन्' इति स्थानिवत्त्वात् तेन व्यवहितत्वेन तत्र यञो लुग् न भविष्यतीति चेन्न, [9]'लुका लुप्तं न स्थानिवत्' इति स्थानिवत्त्वनिषेधात्। न च प्रकृतसूत्रावयवेनोत्तरत्रानुवृत्तेन तत्र लुग् वारणीय इति वाच्यम्, बहुवचने परे लुगिति पक्षे 'अस्त्रियाम्' इत्यस्यानपेक्षितत्वस्योत्तरत्र भाष्य एव स्पष्टत्वात्। तदपेक्षायां तु तत्कृतं गौरवं [10]चापादनीयम्। मतान्तरे तु 'तेनैव' इत्यस्यानपेक्षितत्वेन लाघवस्य स्पष्टत्वात्। एतेन 'अस्त्रियामिति चात्र प्रतिषेधो न भवति, अर्थान्तरे पुंसि संक्रान्तत्वाद्वृत्तिपदार्थस्य' इति निरस्तम्। पञ्चगार्ग्यशब्दस्य विशिष्टार्थवृत्तित्वेऽपि गार्ग्यशब्दस्य स्त्रीवृत्तित्वानपायात्। एतदभिप्रायेणैव [11]'यू स्त्र्याख्यौ' इति सूत्रे [12]'प्रथमलिङ्गग्रहणं च' इति वार्तिकस्य भगवता प्रत्याख्यातत्वाच्च। **द्वन्द्वेऽबहुषु लुग्वचनमिति।** द्वन्द्वेऽबहुवचनपरा ये तद्राजादयस्तेषां लुग् वक्तव्य इत्यर्थः। **गर्गवत्सवाजा इति।** एकवचनान्तानां गार्ग्यादीनां द्वन्द्वे वाजशब्दात् परस्य यञो बहुवचनपरत्वसत्त्वेन लुकि सिद्धेऽपि गर्गवत्साभ्यां परस्य तस्य लुङ न स्यात्, बहुवचनपरत्वाभावादिति भावः। **इह चेति।** पूर्ववार्तिके 'द्वन्द्वे' इत्युक्तमिति कृत्वा पृथगिदं वचनमुक्तम्। **गर्गरूप्यमिति।** गर्गेभ्य आगतमिति [13]'हेतुमनुष्येभ्योऽन्यतरस्याम्' इति पञ्चम्यन्ताद्रूप्यः। एतेन 'सुबन्तेन केवलं वाक्यं क्रियते, प्रत्ययस्तु प्रातिपदिकाधिकारात् प्रातिपदिकादेवोत्पद्यत इति बहुवचनपरत्वाभावाल्लुङ न प्राप्नोति' इति निरस्तम्। सुबन्तादेव तद्धित इति [14]सिद्धान्तयिष्यमाणत्वात्। [15]'न लुमताङ्गस्य' इति निषेधेन प्रत्ययलक्षणाभावाल्लुङ न स्यादित्येव तदाशयसंभवाच्च। **अत्रय इति।** [16]'इतश्चानिञः' इत्यत्रिशब्दादपत्ये ढक्, तस्य [17]'अत्रिभृगुकुत्स' इत्यादिना लुक्। स यदि बहुवचननिमित्तः स्यात् तर्हि [18]'अनुदात्तस्य च यत्रोदात्तलोपः' इत्युदात्तनिवृत्तिस्वरेण जसोऽ-

---

[1] प्रदीपे 'लुक् च' इत्यत्र चस्त्वर्थ इत्याशय्यैवमनुवादः।
[2] का. वा. १. १. ६५–१३.
[3] पा. सू. १. १. ५.
[4] पा. सू. १. १. ५.
[5] पा. सू. ५. १. २८.
[6] पा. सू. १. २. ४९.
[7] पा. सू. २. ४. ६४.
[8] पा. सू. १. १. ५७.
[9] महाभाष्यम् १. १. ५७.
[10] नापादनीयम् — प, ब.
[11] पा. सू. १. ४. ३.
[12] का. वा. १. ४. ३–२.
[13] पा. सू. ४. ३. ८१.
[14] विभाषा पूर्वाह्णापराह्णाभ्यामिति सूत्रे भाष्य इति भावः।
[15] पा. सू. १. १. ६३.
[16] पा. सू. ४. १. १२२.
[17] पा. सू. २. ४. ६५.
[18] पा. सू. ६. १. १६१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कारस्योदात्तत्वं स्यादिति भावः। तदेवं बहुशब्दस्य बहुवचनपरत्वे दुष्टे सति तस्यार्थपरत्वमेवाश्रित्य तान् दोषान् परिहरति — **सिद्धं त्विति**। **प्रत्ययार्थबहुत्व इति**। बहुष्वर्थेषु वर्तमानस्य तद्राजादेर्लुगित्यर्थाश्रयणात् सर्वमिष्टं सिद्धमिति भावः। अस्मिन् पक्षे 'तेनैव' इति न कर्तव्यं भवति, पक्षान्तरे 'अस्त्रियाम्' इति न कर्तव्यमिति तदंशे पक्षद्वयसाम्यमेवेत्याशयेनाह — **यदीति**। **आम्बष्ठचा इति**। आम्बष्ठशब्दात् [1]"वृद्धेत्कोसलाजादात्' इति ञ्यङि ततः [2]'यङश्चाप्' इति चाप्येकादेशे सति बहुवचनपरत्वमस्तीति मन्यते। **व्यवधानमेवेति**। रूपातिदेशादिति भावः। इदानीं प्रत्ययार्थबहुत्वपक्षेऽपि द्वन्द्वेऽबहुषु लुग् वक्तव्य एवेत्याह — **द्वन्द्वेऽबहुष्विति**। **गर्गवत्सवाजा इति**। अत्र यञामेकैकार्थकत्वाल्लुग् न प्राप्नोति। बहुवचनपक्षे तु वाजशब्दात् परस्य यञो लुक्यप्यन्ययोर्लुग्न [3]भवति। अव्याप्तिदोषस्तु तुल्य एव। प्रत्ययार्थपक्षेऽतिव्याप्तिपरिहारार्थं वचनान्तरं कर्तव्यमित्याह — **गोत्रस्येति**। बहुवचनान्तस्य [4]द्वयेकार्थकप्रत्ययविषये प्रकृतित्वेन प्रवृत्तौ सत्यामित्यर्थः। **माणवक इति**। युवेत्यर्थः। **बैद इति**। विदस्य गोत्रापत्यानि विदाः, [5]"विदादिभ्यः' इत्यञ्। ततो यूनि [6]"अत इञ्'। तस्य [7]"ण्यक्षत्रियार्षञितः' इति लुक्। तत्राञो गोत्रबहुत्वे वर्तमानत्वेन प्राप्तो लुक् प्रतिषेद्धव्य इति भावः। **किमर्थमिदमिति**। अलुग्वचनमिति शेषः। **नाचीत्येवेति**। [8]"गोत्रेऽलुगचि' इति सूत्रेणैव तत्रालुक् कुतो न सिद्ध इत्यर्थः। **न चात्राजादिमिति**। [9]"यस्मिन् विधिस्तदादावल्ग्रहणे' इति तदादिविधिप्रवृत्त्यैवमुक्तम्। **प्रत्ययलक्षणेनेति**। प्रत्ययलुकः स्थानिवद्भावेनाजादित्वं भविष्यतीति भावः। **वर्णाश्रय इति**। अजादिसंज्ञाया अल्विधौ वर्तमानत्वादतिदेशो नेति भावः। वस्तुतस्त्वजादौ प्राग्दीव्यतीये विवक्षिते गोत्रप्रत्ययस्यालुगिति व्याख्यानान्नायं दोषः। अवश्यं च तथा व्याख्येयं गर्गाणां छात्राः 'गार्गीयाः' इत्यादिसिद्ध्यर्थम्। अन्यथान्तरङ्गत्वाल्लुकि सति गर्गादिशब्दप्रकृतिकादणि [10]"गार्गाः' इत्यापत्तेः। अतिव्याप्तिदोषमुद्भाव्येदानीं तस्मिन्नेव पक्षेऽव्याप्तिदोषमुद्भावयति — **एकेति**। एकवचनान्तस्य द्विवचनान्तस्य च बहुषु लोपितद्धितप्रकृतिकस्य प्रवृत्तौ सत्यां तदवयवस्य तस्य तद्धितस्य लुग् वक्तव्य इत्यर्थः। **अञन्तमिति**। [11]"प्रत्ययग्रहणं चापञ्चम्याः' इति तदन्तविधौ सति तदन्तस्यैव विशेषणं युक्तमिति तस्य युववहुत्वे वर्तमानस्य जायमानो लुक् निर्दिश्यमानस्य प्रत्ययस्यैव भविष्यति, [12]'तत् प्रत्ययस्यैव भवतीत्युक्तेरिति भावः। **काश्यपा इति**। बिदाद्यञन्तात् काश्यपशब्दात् [13]"इवे प्रतिकृतौ' इति विहितस्य कनः [14]"अर्चासु पूजनार्थासु चित्रकर्मध्वजेषु च' इति [15]"देवपथादिभ्यश्च' इति सूत्रगतवार्तिकेन लुप्। अस्यातिप्रसङ्गस्य परिहारं वक्ष्यति भगवान्॥

---

[1] पा. सू. ४. १. १७१.
[2] पा. सू. ४. १. ७४.
[3] 'भवति' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — ब.
[4] ह्येकार्थक — ब.
[5] पा. सू. ४. १. १०४.
[6] पा. सू. ४. १. ९५.
[7] पा. सू. २. ४. ५८.
[8] पा. सू. ४. १. ८९.
[9] का. वा. १. १. ७२–२९.
[10] गार्ग्याः — ब.
[11] का. वा. १. १. ७२–२८.
[12] लुग्रूपादर्शनमित्यर्थः।
[13] पा. सू. ५. ३. ९६.
[14] इदं वार्तिकं भाष्ये न दृश्यते, देवपथादिभ्यश्चेति सूत्रस्यैव भाष्यकृता व्याख्यातत्त्वात्। काशिकायां पठितमिदम्। अभियुक्तानां पाठोऽयम्, न त्विदिमार्षमित्युद्द्योत उक्तम्।
[15] पा. सू. ४. ३. १००.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८८८–८९३]

(**उद्द्योतनम्**) 'ततोऽयम्' इत्यादेस्तात्पर्यमाह — **इदानीमिति** । **पक्षद्वयेऽपि** अञ् यो वहुषु, अञन्तं यद्वहुष्विति पक्षद्वयेऽपि। **ततः** पक्षद्वयेऽपि दोषोपन्यासानन्तरम्, **अयं** वार्तिककारः, समाधानमाहेति सामान्येनाग्रिमवार्तिकावतारो भाष्ये 'यस्य' इति भाष्येण। 'न वा' इति वार्तिककारः। प्रत्ययान्तपक्षेऽयं परिहार इत्याह — **एकैकमिति**। अस्मिन् पक्षे काश्यपा इत्यत्र लुक्प्रसङ्गस्य कः परिहारः, अत आह — **यश्चेति**। **उत्तरत्रेति**। लौकिकगोत्रग्रहणेनेत्यर्थः। भाष्ये **ततोऽयमाहेति**। अर्थपक्षे दोषाभावात् प्रत्ययपक्ष एवायं दोष इत्यर्थवादी प्रत्ययवादे दोषमाहेत्यर्थः। प्रत्ययवादी स्वपक्षे दोषमुद्धरति — **यदीति**। चोदेर्द्विकर्मकत्वमाह — [1]**चोदिरिति**। भाष्ये **बहुवचनं परमिति**। वह्वर्थत्वे वहुवचनान्तानामेव द्वन्द्वाङ्गीकारादित्यर्थः। [2]अन्तरङ्गत्वात् पूर्वं तद्धितस्यैव लुक् स्यात्, अत आह — **अन्तरङ्गानपीति**। पञ्चगर्ग इत्यत्र यञः कथं लुक्, अत आह — **प्रत्ययलक्षणेनेति**। 'समर्थात्तद्धितः' इत्यत्र हेतुः — **समर्थानामिति** । **सुबन्तेनेति**। गर्गेभ्य आगतमित्यर्थे रूप्यः। [3]तत्र [4]संवन्धिपदस्यैवान्वययोग्यत्वात् सुबन्तादेव तद्धित इत्यर्थः। सुवन्तेन केवलं वाक्यं क्रियते। प्रातिपदिकाधिकारात् तस्मादेव प्रत्ययः, अन्यथा तद्वैयर्थ्यप्रसङ्गात्, अत आह — **प्रातिपदिकेति**। **वृद्धादीति**। वृद्धावृद्धावर्णस्वरद्वयचां प्रातिपदिकविशेषणत्वार्थं प्रातिपदिकाधिकार इत्यर्थः। ज्ञानामपत्यमित्यत्र [5]'उदीचां वृद्धादगोत्रात्' इति फिञ् [न] भवति, सुबन्तस्य वृद्धत्वेऽपि प्रातिपदिकस्यावृद्धत्वादिति [6]'ङ्याप्प्रातिपदिकात्' इत्यत्र वक्ष्यते । भाष्ये **ततोऽयमाहेति**। प्रत्ययवादी अर्थवादिन एव दोषः, न ममेत्याहेत्यर्थः। अर्थवादी स्वदोषं परिहरति — **अहमपीति** । तस्य तात्पर्यमाह — **यो हीति** । **द्वयोरपि** प्रत्ययार्थवादिनोर्द्वयोरपि । **अतृणेडिति**। तृहः श्नम्, लङ्यडागमः, [7]'इतश्च' इतीकारलोपः, हल्ङ्यादिलोपः, [8]'हो ढः' जश्त्वचर्त्वे। [9]'तृणह इम्'। [10]तृहः श्नमि कृते इमागमः स्यात् पिति हलादौ सार्वधातुके, इति [11]हलादिलक्षणो वर्णाश्रयोऽपि प्रत्ययलक्षणेनेमागमो भवतीत्यर्थः। वर्णाश्रयेऽपि क्वचित् प्रत्ययलक्षणं क्वचिन्नेत्यत्र नियामकमाह — **अयं भाव इति**। 'हलि न' इत्यस्योदाहरणमाह — **यथेति** । अत्र यञो लुग् भवत्येवेत्यर्थः। भाष्ये **बिदा इति**। अञन्ताद् बिदशब्दाद्बहुवचनान्ताद् यूनि [12]'अत इञ्', तस्य [13]'ण्यक्षत्रिय' इति लुक् । [14]'यञञोश्च' इत्यञो लुक्। [15]इञो हलादित्वाभावादञो न लुक् स्यादित्यर्थः। ननु गोत्रापत्यबहुत्वे वर्तमानस्य लुग् विधीयते, न युवबहुत्वे, अत आह — **अपत्याधिकारादिति** । **युवबहुत्व इति** । इञो लुक्यञ एव युवबहुत्ववृत्तित्वादित्यर्थः । प्रथमादित्यनुवृत्तौ प्रथमस्येति कथं लभ्यते, अत आह — **प्रतियोगमिति**। [16]'गोत्रेऽलुगचि' इत्यत्रा-

---

[1] प्रदीपे 'चुदिः पृच्छत्यर्थत्वात्' इत्यत्र 'चोदिः पृच्छत्यर्थत्वात्' इति निर्णयसागरमुद्रिते पाठः।
[2] अन्तरङ्गात्पूर्वं — अ.
[3] तस्य — अ.
[4] संवन्धितस्यैवान्वय — अ, ऋ.
[5] पा. सू. ४. १. १५७.
[6] पा. सू. ४. १. १.
[7] पा. सू. ३. ४. १००.
[8] पा. सू. ८. २. ३१.
[9] पा. सू. ७. ३. ९२.
[10] तृणहः — अ.
[11] हलादिलक्षणवर्णाश्रयोऽपि — ऋ.
[12] पा. सू. ४. १. ९५.
[13] पा. सू. २. ४. ५८.
[14] पा. सू. २. ४. ६४. यञिञोश्च — अ, ऋ.
[15] 'इञः' इत्यादि 'न लुक् स्यादित्यर्थः' इत्यन्तं नास्ति — ऋ.
[16] पा. सू. ४. १. ८९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नुवृत्तस्यायमर्थ इत्यर्थः। अर्थापेक्षं[1]प्राथम्यम्, न प्रत्ययान्तरापेक्षमित्याह — **प्राथमकल्पिके चेति**। **गार्गीया इति**। गर्गाणां छात्रा इत्यत्र छप्रत्यये [2]'गोत्रेऽलुगचि' इति [3]'यञञोश्च' इत्यनेन प्राप्तस्य लुको निषेधे [4]'यस्य' इति लोपे [5]'आपत्यस्य' इति यलोपे रूपम्। **अत्रेति**। विदानामपत्यं बहवो माणवका बिदा इत्यत्रेत्यर्थः। **युवप्रत्ययस्य** अत इञः, [6]'ण्यक्षत्रिय' इति लुकि कृते। **अत्रिभृग्विति**[7]। '**यञञोश्चेति**[9]'। लुगित्यनुषङ्गः। [10]'द्वन्द्वाद्वुन् वैरमैथुनिकयोः'। द्वन्द्वाद्वुन् स्यादेतयोः। मिथुनकर्म **मैथिनिका**। वुनन्तं स्वभावात् स्त्रियाम्। **यथान्यास इति**। 'हलि न' इति न्यासे तु सुतरामलुक्प्रसङ्ग इत्यर्थः। **ऋष्यण्**, [11]'ऋष्यन्धक' इत्यनेन। **कश्यपादञ्** [विदादित्वात्।] **पूर्ववत्** [12]ण्यक्षत्रियार्षेति, [13]यञञोश्चेति, अत्रिभृग्विति लुगित्यनुषङ्गः। **ऋष्यण्** द्वाभ्यामपि। **तस्य लुक्** [14]'ण्यक्षत्रियार्ष' इति। **अणो लुक्** [15]'अत्रिभृगु' इति। **कुशिकादञ्** विदाद्यञ्। **अन्यदिति**। [16]'यूनि [17]'अत इञ्', तस्य [18]'ण्यक्षत्रियार्ष' इति लुक्, कुत्सादणः [19]'अत्रिभृगु' इति लुक्, कुशिकादञः [20]'यञञोश्च' इति। ततो वुन्। **गर्गशब्दादिति**। गर्गस्य गोत्रापत्यानि बहूनीत्यत्र [21]'यञञोश्च' इति यञो लुक्। **तस्य लुक्** [22]'ण्यक्षत्रियार्ष' इति। [23]**यथोक्त** [24]भाष्योक्त। **अर्थनिर्देशेति**। बहुष्वित्यस्येत्यादिः। लौकिकगोत्रशब्दार्थमाह — **अपत्यस्येति**। 'न लौकिकम्' इत्युक्ते शास्त्रीयमिति भ्रमः स्यात्, अत आह — **यद्यपीति**। **एवमुक्तं** लौकिकस्य गोत्रस्य ग्रहणमित्युक्तम्। 'यस्य' इत्यस्यानुपयोगं निराह — **इदानीमिति**। अर्थपक्षपरिग्रहार्थमित्यर्थः। अर्थपक्षे उदात्तनिवृत्तिस्वरप्रसङ्गो नास्तीत्याह — **अर्थपक्ष इति**। **एकैकमिति**। युगपदधिकरणवचनतायां द्वन्द्वाङ्गीकारादित्यर्थः। [25]अन्यत्र प्रतिषेधे। **न्याय्यत्वमिति**। तथा च

---

[1] प्राधान्यम् — अ.

[2] पा. सू. ४. १. ८९.

[3] पा. सू. २. ४. ६४. यञिञोश्च — अ, ऋ.

[4] पा. सू. ६. ४. १४८.

[5] पा. सू. ६. ४. १५१.

[6] पा. सू. २. ४. ५८.

[7] इतीत्यनन्तरम् 'अत्र' इत्यधिकम् — ऋ.

[8] यञिञोश्चेति — अ, ऋ.

[9] इतीत्यनन्तरम् 'अत्र' इत्यधिकम् — ऋ.

[10] पा. सू. ४. ३. १२५.

[11] पा. सू. ४. १. ११४.

[12] ण्यक्षत्रियार्षेतीञो लुक्, अत्रिभृग्विति वसिष्ठशब्दादुत्पन्नस्य ऋष्यणो लुक्, कश्यपशब्दाज्जातस्याञो यञञोश्चेत्याशयः। 'ण्यक्षत्रियार्षेति' इत्यस्यानन्तरम् 'अत्रिभृग्विति यञञोश्चेति लुगित्यर्थः' इत्युचितं भाति।

[13] यञिञोश्चेति — अ, ऋ.

[14] पा. सू. २. ४. ५८.

[15] पा. सू. २. ४. ६५.

[16] 'यूनि' इत्यादि ण्यक्षत्रियार्षेति लुगित्यन्तं कुशिकशब्दमात्रविषयम्, न कुत्सशब्दविषयमपि। तस्य युवार्थविवक्षायाम् 'अणो द्व्यचः' इतीञपवादस्य फिञः प्रसङ्गात्। तस्य च श्रवणप्रसङ्गात् कुत्सेति रूपासंभवापत्तेः। इदं च गोत्रेऽलुगचीति सूत्रभाष्यव्याख्याने कैयटेनोक्तम्, अन्नंभट्टेन विवृतं च तत्रैव। अतोऽत्र कुत्सशब्दे गोत्रबहुत्वमात्रविवक्षा। तत्र च ऋष्यणः 'अत्रिभृगु' इति लुगिति वक्ष्यते। युवार्थविवक्षायां फक्फिञोरिति लुक्यपि पाक्षिकश्रवणप्रसङ्ग इत्याशय इति भाति।

[17] पा. सू. ४. १. ९५.

[18] पा. सू. २. ४. ५८.

[19] पा. सू. २. ४. ६५.

[20] पा. सू. २. ४. ६४. यञिञोश्च — अ, ऋ.

[21] पा. सू. २. ४. ६४. यञिञोश्च — अ, ऋ.

[22] पा. सू. २. ४. ५८.

[23] यथोक्तः — अ.

[24] भाष्योक्तः — अ, ऋ.

[25] प्रदीपे 'प्रसज्यप्रतिषेधे तु न भाव्यम्' इत्यत्र 'अन्यत्र तु न भाव्यम्' इत्यन्नंभट्टपाठः स्यादिति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सर्वेषां लुका भाव्यमित्यर्थः। **स्त्रीत्वयुक्तानामिति**। स्वाभिधेयद्वारा [1]समुदाये वृत्तिरित्यर्थः। **अन्येषां** वात्स्यादीनाम्। लोप्यशब्दे ण्यन्तत्वभ्रमं वारयति — **लोपभाजामिति**। संशयबीजमाह — **यदेति। द्वौ लौपिनाविति**। भृगुशब्दादृष्यण्। तस्य [2]'अत्रिभृगु' इति लुक्। वत्सशब्दाद् गर्गादियञ्। तस्य [3]'यञञोश्च' इति लुक्। काश्यपशब्दो विदाद्यञन्तः। गार्ग्य[4]काश्यपशब्दयोः [5]'यञञोश्च' इति [6]लोपः प्राप्तो न कृतः॥

[२, ४८८–८९३]

(रत्नप्रकाशः) **ततोऽयमाहेति**। अतिव्याप्त्यव्याप्त्यापादनानन्तरं बहुषु वर्तमानस्य लुगिति [7]यस्य मतं सोऽयमाहेत्यर्थः। **द्वन्द्वेऽबहुषु लुग्वचनमित्यस्य परिहार इति**। इदं लेखकेनोपरितनं मध्ये प्रक्षिप्तम्। **न वैष दोष इति**। द्वन्द्वेऽबहुषु लुग्वचनमित्येवंरूपो दोषो नेत्यर्थः। **सर्वाणि द्वन्द्वे बह्वर्थानीति**। तथा च गार्ग्यादीनां यञन्तानामेकैकार्थानामपि द्वन्द्वे बह्वर्थत्वात् तदवयवानां यञां लुग् भविष्यतीति भावः। **तत इति**। बह्वर्थवादिकृताव्याप्तिपरिहारानन्तरमित्यर्थः। **अचोद्यं चोद्य इति**। अवक्तव्यमुच्य इत्यर्थः। ब्रूञर्थत्वेन चुदेर्दुह्यादित्वाद् गौणे कर्मणि लट्। **लुकि कृते न प्राप्नोतीति**। बहुवचनस्य लुकि कृते सति यञो लुग् न प्राप्नोतीत्यर्थः। **इष्टमेवैतत् संगृहीतमिति**। इदं बहुवचनवादिना स्वमतस्य स्थापनाभिनिवेशेनोक्तमित्येतावतास्य न साधुत्वम्। भगवता हि प्रत्ययार्थबहुत्वपक्ष एव व्यवस्थापयिष्यते। तत्पक्षे पञ्चगार्ग्यो दशगार्ग्य इत्येव भवति, अस्त्रियामिति निषेधात्। साधु च तदेव। **सामर्थ्यं च सुबन्तेनेति**। तथा च तत्र भ्यसो लुकि प्रत्ययलक्षणेन बहुवचनपरत्वाद्यञो लुग् भविष्यतीति [8]मन्यते। **तत इति**। बहुवचनवादिकृताव्याप्तिपरिहाराभासानन्तरमित्यर्थः। **ननु चोक्तमिति**। त्वयैवेति शेषः। तत्रापि स परिहाराभासमाह — **यदि वेति**। यथा वेत्यर्थः। **कानिचिदिति**। तृणह इमादीनीति भावः। "प्रत्ययलोपे प्रत्ययलक्षणम्" इति सूत्रं नियमार्थतया व्यवस्थापितमिति तेन तन्न सिध्यतीति पक्षान्तरं परिगृह्णाति — **अथवेति। हलि नेति वक्ष्यामीति**। प्रत्ययलोपसूत्रे भगवतोक्तम् — पिति सार्वधातुके इमागममुक्त्वा 'अचि न' इति वक्ष्यामीति। तथैवाहमपि वक्ष्यामीति मन्यते। वस्तुतस्त्विदमयुक्तम्, अपाणिनीयत्वापत्तेः। 'अचि न' इति वक्ष्यामीति भाष्यकारोक्तं युक्तमेव, [10]'तृणह इम्' इत्यत्र [11]'नाभ्यस्तस्याचि पिति सार्वधातुके' इत्यतो नाचीति पदद्वयानुवृत्त्या तस्य सूत्राक्षरारूढत्वात्। पक्षान्तरे तु तत्र परिहारः [12]प्रागेव निर्दशितः। **युवबहुत्वे वर्तमानस्येति**। अपत्याधिकारादन्यत्र लौकिकस्य गोत्रस्य ग्रहणाद् यूनोऽपि लौकिकगोत्रत्वसत्त्वादिति भावः। नन्वेवं विदानामपत्यं माणवको बैद इत्यञोऽपि पुनर्लुक् कस्मान्न भवति, तस्य गोत्रबहुत्वे वर्तमानत्वादिति चेन्न, युवबहुत्वाश्रयेण लुकः पूर्वमप्राप्तत्वेनान्याश्रयेण प्राप्तस्य तस्य प्रतिषेधेऽपि [13]तदाश्रयस्य लुकः

---

[1] समुदायवृत्तिरित्यर्थः — अ.
[2] पा. सू. २. ४. ६५.
[3] पा. सू. २. ४. ६४. यञिञोश्चेति — ऋ.
[4] काश्यपयोः — अ.
[5] पा. सू. २. ४. ६४. यञिञोश्चेति — ऋ.
[6] लुगित्यर्थः।
[7] तस्य मतं — ब.
[8] मृग्यते — प; युज्यते — ब.
[9] पा. सू. १. १. ६२.
[10] पा. सू. ७. ३. ९२.
[11] पा. सू. ७. ३. ८७.
[12] 'वस्तुतस्त्वजादौ प्राग्दीव्यतीये' इत्यादिना स्वयं निर्दशित इत्यर्थः।
[13] युवबहुत्वाश्रयस्येत्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रवृत्तौ [1]बाधकाभावात्। प्रकृते तु यद्बहुत्वाश्रयेण प्राप्तस्य लुकः [2]प्रतिषेधो भवति तद्बहुत्वाश्रयेणैव पुनस्तस्य प्रवृत्तौ निषेधानर्थक्यापत्तेः। नन्वविशेषेणालुगुक्तौ लुगेव व्यर्थः स्यादिति महद् दूषणमिति चेन्न, प्राग्दीव्यतीये परेऽलुकमुक्त्वा हलि नेति वक्ष्यामीत्यत्र तस्य तात्पर्यात्। **पुनरलुक् कस्मान्न भवतीति**। विदानां माणवकानां छात्रा इत्यर्थविवक्षायामिति शेषः। [3]"गोत्रेऽलुगचि' इत्यस्याप्यपत्याधिकारबहिर्भूतत्वाविशेषाल्लौकिकस्यैव गोत्रस्य तत्रापि ग्रहणात् प्रसक्तिः। **समर्थानां प्रथमस्येति**। अत्र समर्थग्रहणस्योत्तरत्र तस्यानुवृत्तिसूचनमेव फलम्, प्रकृतोपयोगि तु प्रथमादिति। तत् सप्तम्यन्ततया [4]विपरिणाम्य प्रथमे गोत्रे वर्तमानस्य यो लुक् स नेति व्याख्यानात् प्रकृते प्रत्ययस्य द्वितीयगोत्रे वर्तमानस्य क्रियमाणो लुग् न निषिध्यत इति भावः। **अवश्यमिति**। पक्षान्तरेऽपीति शेषः। **अत्रिभरद्वाजिकेति**। अत्रेरपत्यानि, [5]"इतश्चानिञः' इति ढक्। भरद्वाजस्यापत्यानि, बिदाद्यञ्। तत उभाभ्यां युवबहुत्वे [6]"अत इञ्', तस्य [7]"ण्यक्षत्रियार्ष' इति लुक्। ढकः "अत्रि भृगु' इत्यादिना, अञः [8]"यञञोश्च' इत्यनेन। ततः [10]"द्वन्द्वाद्वुन् वैरमैथुनिकयोः' इति वुन्यकादेशद्वाराजादौ विवक्षिते ढगञोरलुग् मा भूदित्येवमर्थं तादृशं व्याख्यानमवश्याश्रयणीयमिति भावः। **वसिष्ठकश्यपिकेति**। वसिष्ठशब्दादृष्यण्, कश्यपशब्दाद् बिदाद्यञ्, अन्यत् पूर्ववत्। **भृग्वङ्गिरसिकेति**। भृग्वङ्गिरस्शब्दाभ्यामृष्यण्, अन्यत्पूर्ववत्। **कुत्सकुशिकिकेति**। कुत्सादृष्यण्, ततः [11]"अणो द्व्यचः' इति फिञ्, तस्य [12]"फक्फिञोः' इति लुक्। कुशिकाद्बिदाद्यञ्, अन्यत् पूर्ववत्। **गर्गभार्गविकाग्रहणं वेति**। अयं भावः — [13]"गोत्रेऽलुगचि' इत्यत्र प्रथमादित्यनुवर्त्योक्तप्रकारेण व्याख्यानेऽपि तत्रावश्यं 'गर्गभार्गविका च' इति पठनीयम्, भृगुशब्दादुत्पन्नस्य ऋष्यणः [14]"अत्रिभृगु' इति प्राप्तो लुङ मा भूदित्येवमर्थम्। तथा च तस्य नियमार्थतासंभवेन तत्सूत्रे प्रथमादित्यस्य पदस्य संबन्धो न कर्तव्य इति। नियमशरीरं तु द्वितीयमर्थमुपसंक्रान्तस्य गोत्रप्रत्ययस्यालुक् चेत् तर्हि मैथुनिकेति वुन्विषयद्वन्द्वघटकभार्गवशब्दावयवस्यैव नान्यस्येति। तेन भृगुयुवापत्यानां छात्रा भार्गवा इत्यत्र लुग् भवत्येव। एतेन "गर्गशब्दाद्यञ्, तस्य लुक्। भृगुशब्दादृष्यण्, तदन्ताद्यूनि [15]"अत इञ्', तस्य [16]"यूनि लुक्' इति लुक्। ततो गर्गभार्गवशब्दयोर्द्वन्द्वे [17]ततः [18]"द्वन्द्वाद्वुन् वैरमैथिनिकयोः' इति वुन्। तत्र [19]"अत्रिभृगु' इति भृगुशब्दादणो लुक् प्राप्तो गोपवनादिपाठेन प्रतिषिध्यते। यदि च द्वितीयमर्थमुपसंक्रान्तस्याप्यलुक् स्याद् गोपवनादिषु न

---

[1] बाधकाभावेन — प, ब.

[2] प्रतिषेधे सति — प, ब.

[3] पा. सू. ४. १. ८९.

[4] 'ब' मातृकायां 'विपरिणाम्य' इत्येवोपलभ्यते। नमधातोः 'ज्वलह्वलह्मलनमामनुपसर्गाद्वा' इति घटादिगणसूत्रेणानुपसर्ग एव मित्त्वविकल्पकथनात् सोपसर्गस्यामन्तत्वप्रयुक्तनित्यमित्त्वेन ह्रस्वे नमयतेर्ल्यपि 'ल्यपि लघुपूर्वात्' इति णेरयादेशे सति विपरिणमय्येत्येवोचितम्। विपरिणामशब्दात् तत्करोतीति णिजन्ताद्वा ल्यपि साधुत्वं बोध्यम्।

[5] पा. सू. ४. १. १२२.

[6] पा. सू. ४. १. ९५.

[7] पा. सू. २. ४. ५८.

[8] पा. सू. २. ४. ६५.

[9] पा. सू. २. ४. ६४.

[10] पा. सू. ४. ३. १२५.

[11] पा. सू. ४. १. १५६.

[12] पा. सू. ४. १. ९१. अनेन वैकल्पिकलुगित्यर्थः, पाक्षिकश्रवणं त्विष्टमेवेति भाव इति भाति।

[13] पा. सू. ४. १. ८९.

[14] पा. सू. २. ४. ६५.

[15] पा. सू. ४. १. ९५.

[16] पा. सू. २. ४. ५८.

[17] गर्गभार्गवशब्दादित्यर्थः।

[18] पा. सू. ४. ३. १२५.

[19] पा. सू. २. ४. ६५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पठ्येत। पठितस्तु यथोक्तार्थज्ञापनायेत्यर्थः" इति निरस्तम्।[५] गोपवनादेर्बिदाद्यन्तर्गणत्वेन तत्र भृगुशब्दपाठे 'भृगुशब्दादृष्यण्' इति स्वोक्त्या सह विरोधाद् गर्गभार्गविकाशब्दस्य गोपवनादिपाठ-परिकल्पनेनाभिमतसाधनासंभवात्। "[१]गोत्रेऽलुगचि' इति सूत्रगतस्य प्रकृतसूत्रगतस्य च भाष्यस्य स्वरसेन तत्रैव 'गर्गभार्गविका च' इति वचनस्य नियमार्थस्य कर्तुमुचितत्वाच्च। **क्रियत इति।** "[२]गोत्रेऽलुगचि' इति सूत्र इति शेषः। **एतस्यैवेति।** वुन्विषयद्वन्द्वघटकभार्गवशब्दावयवस्यैवेत्यर्थः। इदानीं वह्वर्थवादि[३]मते आपादितमव्याप्तिदोषं निष्कण्टकं यथा भवति तथा परिहर्तुमाह — **यदप्युच्यत इति। नैष दोष इति।** यदि गोत्रप्रत्ययान्तस्य बहुषु वर्तमानस्य लुगिति व्याख्यायेत तदा दोषः स्यात्। यदा तु बहुषु गोत्रेषु वर्तमानस्य यञाद्यन्तस्य लुगिति व्याख्यायते तदा नोक्त-दोष इति भावः। **एतदिति।** प्रतिकृतिरूपमित्यर्थः। इदानीं प्रकृतसूत्रस्योक्तमतद्वयसाधारणत्वे-ऽपि प्रत्ययार्थबहुत्वपक्ष एव समीचीन इत्याशयेन सूत्रस्य मतद्वयसाधारण्यं दर्शयति — **यस्येति। अयमधिको दोष इति।** दोषोपलक्षणमिदम्। तेन 'गर्गवत्सवाजाः' इत्यत्र [गर्गवत्साभ्यां] परस्य, गर्गरूप्यं वत्सरूप्यमित्यत्र च यञो लुग् न स्यादित्यपि दोषो ज्ञेयः। प्रत्ययलक्षणेन तत्समाधानं तु प्रागेव खण्डितम्। **तस्मादिति।** यस्मात् 'तेनैव' इति पदद्वयानर्थक्यातिरिक्तो दोषो नास्ति तस्मादित्यर्थः। **अस्त्यत्रास्त्रीति कृत्वेति।** युगपदधिकरणवचनो द्वन्द्व इति पक्षस्य गार्ग्यवात्स्य-वाज्यानामेकवचनान्तानां पुंल्लिङ्गानां द्वन्द्वे 'गर्गवत्सवाजाः' इति रूपसिद्धयेऽवश्याश्रयणीयत्वेन प्रकृतेऽपि त्रयाणां पदानां स्त्रीपुंसवृत्तित्वेऽपि स्त्रीभिन्नवृत्तित्वमादाय लुका भवितव्यमिति भावः। एवम् 'अस्त्यत्र [४]स्त्रीत्वम्' इत्यत्रापि ज्ञेयम्। **देवा इति।** दीव्यन्ति प्रद्योतन्ते बुद्धिविशेषेणेति **देवाः** पण्डिताः, ते ज्ञातुमर्हन्तीत्यर्थः। तथा च सत्यामेकवाक्यतायां वाक्यभेदाश्रयणे मानाभावात् पर्युदासपक्षाश्रयेण तत्र लुक् कर्तव्य इति भावः। एतेन 'गार्गीशब्देन स्त्रीत्वयुक्तानामर्थानामभि-धानाद्यञो लुका न भाव्यम्। अन्येषां तु भाव्यम्' इति निरस्तम्। सर्वेषां स्त्रीपुंसवाचकताया न्यायसिद्धत्वाद् भगवतोक्तत्वाच्च। **लोप्यलोपिनामिति।** लोपार्हः प्रत्ययो लोपशब्देनोच्यते, लुप्यत इति लोपः, कर्मणि घञ्, बाहुलकात्। स येषामस्ति ते लोपिनः, तदन्येऽलोपिनः, उभयेषामित्यर्थः। 'गार्ग्यवात्स्यघटाः' इत्यादौ लुग् न भवति। तत्र यञो गोत्रबहुत्वे वर्तमानत्वाभावात्। गार्ग्यौ च वात्स्यौ च घटौ चेत्यादौ तु लुग् भवत्येव, यञो गोत्रबहुत्वे वर्तमानत्वात्। यद्युच्येत — 'सर्वं वाक्यं सावधारणम्' इति न्यायस्य "[५]उगितश्च' इति सूत्रे प्रातिपदिकग्रहणेन प्रातिपदिकाप्राति-पदिकग्रहणस्याग्रहणमिति प्रतिपादयता भाष्यकृता स्वीकृतत्वेन गोत्रमात्रबहुत्वे वर्तमानस्यैव लुगिति, तर्हि तत्र 'गार्ग्यवात्स्यघटाः' इत्येव भवितव्यम्, यदा तु गार्ग्यौ च वात्स्यौ चेति द्वन्द्वं कृत्वा पुन-र्घटशब्देन द्वन्द्वः क्रियते तदा पूर्वद्वन्द्वोत्तरं यञो लुकं कृत्वा द्वितीयो द्वन्द्वः कर्तव्य इति गर्गवत्सघटा इति भवितव्यमेव। **उभयं हि दृश्यत इति।** लोपस्य न्यायसिद्धत्वेऽपि ज्ञापकबलादुभयमा-श्रयणीयमिति भावः। **भृगुवत्साग्रायणेष्विति।** भार्गववात्स्यशब्दौ लोपिनौ। आग्रायणशब्दो नडादिफगन्तोऽलोपी। तत्राप्यञोर्लुक् कृतः। **अगार्ग्यकाश्यपगालवानामिति।** आद्यौ लोपिनौ, गालवस्तु ऋष्यणन्तोऽलोपी, तत्र लोपिनोरप्यवयवस्य लुङ न कृतः॥

---

[१] पा. सू. ४. १. ८९.
[२] पा. सू ४. १. ८९.
[३] 'मते' इत्यस्यानन्तरम् 'अन्ः' इत्यधिकम्—व.
[४] स्त्रीति कृत्वेत्यत्रापीत्याशयः।
[५] पा. सू. ४. १. ६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यञञोश्च २. ४. ६४.

[२, ८९३]

(उद्द्योतनम्) आदिशब्दस्य प्रकारवाचित्वे तद्राजस्याप्ययं विकल्पः स्यात्, अतो व्यवस्थावाचित्वमाह — [1]**इतः प्रभृतीति** ॥

[२, ८९३]

(रत्नप्रकाशः) **यञादीनामिति किमर्थमिति**। [2]"तद्राजस्य बहुषु तेनैवास्त्रियाम्' इति सूत्र एव 'एकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसंख्यानम्' इति कुतो न पठितमिति भावः ॥

बह्वच इञः प्राच्यभरतेषु २. ४. ६६.

[२, ८९३–८९४]

(उद्द्योतनम्) द्वन्द्वो वा कर्मधारयो वेति प्रश्न इत्याह — **द्वन्द्वेति**। भरतस्य [3]प्राच्यविशेषत्वात् सामान्यविशेषयोः कथं द्वन्द्वः, अत आह — **गोबलीवर्देति**। **औद्दालकायन इति**। [4]"यञिञोश्च' इति फक् ॥

[२, ८९३–८९४]

(रत्नप्रकाशः) 'प्राच्यभरतेषु' इत्यत्रान्यतरग्रहणमनर्थकमित्याशयेनाह — **किमयमिति**। **प्राक्ष्विति**। प्राच्येष्वित्यर्थः। **प्राग्ग्रहणमिति**। प्राच्यग्रहणमित्यर्थः। वक्ष्यमाणज्ञापनफलस्य प्राक्शब्दविषयत्वादेवमुक्तम्। **समुच्चय इति**। अभेदाविवक्षायां सामान्यविशेषवाचिनोश्चार्थे वृत्तिसंभवाद् भवति द्वन्द्व इति भावः। **औद्दालकिरिति**। उद्दालको भरतकुलोत्पन्नः ॥

न गोपवनादिभ्यः २. ४. ६७.

[२, ८९४]

(उद्द्योतनम्) वचनस्यावश्यकतामाह — **बिदादीति**। **तत्समाप्तये** गोपवनादिसमाप्तये। **इत्याह** अत आह ॥

---

[1] अतः प्रभृतीति — ऋ.
[2] पा. सू. २. ४. ६२.
[3] प्राच्यविशेषणत्वात् — अ, ऋ.
[4] पा. सू. ४. १. १०१. यञञोश्चेति — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८९४]

(रत्नप्रकाशः) विदाद्यन्तर्गणो गोपवनादिर्हरितादिश्च। तत्र विदादिगणसमाप्तिरेव यथा हरितादिसमाप्तिः, एवं गोपवनादिसमाप्तिरपि स्यादिति तन्निरासायाह — **गोपवनादिप्रतिषेध इति**। प्रतिषेधविषयो गोपवनादिरित्यर्थः॥

उपकादिभ्योऽन्यतरस्यामद्वन्द्वे २. ४. ६९.

[२, ८९४–८९५]

(उद्द्योतनम्) अस्मात् भाष्यकारीयाद्विकल्पोदाहरणात्। **अस्य** भ्रष्टककपिष्ठलशब्दस्य। **अनार्ष इति**। तत्र पाठे पूर्वसूत्रेण द्वन्द्वे नित्यं लुक् स्यात्, तथा च वृत्तौ तत्र पाठाङ्गीकार उद्माप्य इति भावः। ननु द्वन्द्व इत्यस्यास्वरितत्वात् कथमधिकारशब्दः, अत आह — **अधिकारशब्देनेति**। अद्वन्द्व इति सौत्रपदमुक्तेऽर्थे [1]योजयितुं पदार्थमाह — **द्वन्द्वशब्देनेति**। वाक्यार्थमाह — **तेनेति**॥

[२, ८९४–८९५]

(रत्नप्रकाशः) अद्वन्द्वपदकृत्यदर्शनवार्तिकमवतारयति — **किमर्थमित्यादिना**। **भ्राष्ट्रकिकापिष्ठलय इति**। अतो भाष्यात् तिककितवादिष्वस्य पाठोऽनार्ष इति ज्ञायते। **द्वन्द्वाधिकारनिवृत्त्यर्थमिति**। द्वन्द्वाधिकारभ्रमनिरासार्थमिति भावः। तथा च मन्दप्रयोजनमद्वन्द्वग्रहणम्, न ह्यधिकारनिवृत्त्यर्थं यत्नोऽपेक्षित इति भावः। एतेन 'अधिकारशब्देनात्र शास्त्रीयोऽधिकारः स्वरितत्वनिमित्तो न गृह्यते। न हि पूर्वसूत्रे द्वन्द्वशब्द आसक्तस्वरितः। किं तर्हि, लौकिकाधिकारोऽपेक्षालक्षणो निविवर्तयिषितः। द्वन्द्वशब्देन तद्विषयोऽधिकारोऽभिधीयते। तस्य नञा निषेधो द्योत्यते। तेनायमर्थः — द्वन्द्व इह नापेक्ष्यते। तदनपेक्षायां च सामान्येन द्वन्द्वे चाद्वन्द्वे च लुग्विकल्पसिद्धिः' इति निरस्तम्। अनुनासिकपाठवत् स्वरितपाठस्यापि नष्टत्वेन पूर्वसूत्रगतद्वन्द्वशब्दस्यास्वरितत्वनिर्णयासंभवेन तन्निर्णयपरतयैव कथंचिदद्वन्द्वपदसार्थक्यस्य वक्तुमुचितत्वात्। शास्त्रीयाधिकारसंभवस्थले लौकिकाधिकाराश्रयणे शास्त्रीयाधिकारस्य निर्विषयतापत्तेश्च॥

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् २. ४. ७०.

[२, ८९५–८९६]

(उद्द्योतनम्) वचनस्यावश्यकत्वं प्रयोजनं चाह — **प्रकृतीति**। **आदेशे कृते समुदायस्येत्यादिः**। **छो न स्यादिति**। प्रकृतिमात्रादेशे प्रत्ययस्य [2]'गोत्रेऽलुगचि' इति लुकि प्रतिषिद्धे

---

[1] नियोजयितुं — अ.

[2] पा. सू. ४. १. ८९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आगस्त्यशब्दाद् वृद्धाच्छः सिध्यतीत्यर्थः। **इत्याह** इत्यत आह। समुदायादेशोऽपि **'प्रकृतेर्भवति**[1]। आदेशश्चायम्, न निपातनम्, अत आह — **प्रकृतेरेवेति**। **आदेशस्य** अगस्त्यादेशस्य। अगस्त्यशब्दादृष्यणन्ताच्छप्रत्यये विवक्षिते लुकि प्रतिषिद्धे आदेशस्याप्यभावे आगस्त्यशब्दाच्छे [2]'यस्य' इति लोपे [3]'सूर्यतिष्य' इति यलोपे च 'आगस्तीयाः' इति सिध्यति। **कण्वेति**। गोत्रप्रत्ययान्तेभ्य एभ्योऽण् शैषिकः। ननु कौण्डिन्यस्य छात्रा इत्यत्र समुदायस्य कुण्डिनादेशेऽप्यणमाश्रित्यादिवृद्धया 'कौण्डिनाः' इति सिध्यतीति नेदं प्रकृत्यादेशप्रयोजनम्, अत आह — **अस्येति**। द्वन्द्वनिर्दिष्टयोरेकत्र समुदायादेशोऽन्यत्र प्रकृत्यादेश इति विशेषो न युक्त इति प्रतिपादनायेत्यर्थः। 'आगस्त्यकौण्डिन्ययोर्बहुषु लुग् भवति' इत्ययुक्तम्,[4] तयोरप्रत्ययत्वेन तददर्शनस्य लुक्संज्ञाया अभावात्, अत आह — **बहुष्विति**। प्रकृत्यादेशत्वं कथं लभ्यते, अत आह — **सामर्थ्येति**। तदेवाह — **प्रत्यये हीति**। लुगादेशयोर्यौगपद्यासंभवः, अत आह — **ततश्चेति**। पर्यायप्रसङ्गं निराह — **तत्रेति**॥

[२, ८९५–८९६]

(रत्नप्रकाशः) [4]आगस्त्यकौण्डिन्ययोर्यञ्प्रत्ययान्तयोरगस्तिकुण्डिनचावादेशौ प्रति स्थानित्वं प्रतीयते, तन्नेष्टम्। किं तु प्रकृतिभागयोरेव तदिष्टमित्याशयेनाह — **आगस्त्यकौण्डिन्ययोरिति**। **प्रकृतिनिपातनमिति**। प्रकृतिभागस्य निर्देशो ज्ञेय इत्यर्थः। **किं प्रयोजनमिति**। प्रकृत्यंशस्यादेशान्तरं विधाय प्रत्ययस्य लुक्करण इति शेषः। यञन्तयोरगस्तिकुण्डिनजादेशयोरपि हि 'अगस्तयः, कुण्डिनाः' इति रूपे सिद्धे। **लुक्प्रतिषेध इति**। [5]'गोत्रेऽलुगचि' इत्यनेनेति शेषः। प्रतिषेधशब्देन लुक्संनियोगशिष्टादेशाभाव उपलक्ष्यते। **वृद्धचर्थमिति**। वृद्धिनिमित्तवृद्धत्वप्रयुक्तछप्रत्ययार्थमित्यर्थः। **प्रत्ययान्तनिपातने हीति**। यञ्प्रत्ययान्तस्यागस्तिकुण्डिनजादेशे हीत्यर्थः। **वृद्धचभावः स्यादिति**। छप्रत्ययो न स्यात्, अगस्तिशब्दस्य वृद्धत्वाभावादिति भावः। **कौण्डिना इति**। [6]'कण्वादिभ्यो गोत्रे' इत्यण्। इदं तु वास्तवप्रतिपादनमात्रपरम्, कुण्डिनशब्दादौत्सर्गिकेऽप्यणि तत्सिद्धेः। एतेन 'अस्य विशेषाभावप्रदर्शनायोपन्यासः' इति निरस्तम्। तथात्वे तस्यात्यन्तमौर्ख्यविहत्वेन तत्र भाष्यकृतस्तात्पर्यकल्पनानौचित्यात्। **अधिकारादिति**। लुक इति शेषः। **तर्त्तर्हीति**। अगस्त्यकुण्डिन्योरिति निर्देशः कर्तव्यः किमित्यर्थः। **आगस्त्यकौण्डिन्ययोरिति**। एकदेशविकृतस्यानन्यत्वात् लुगुत्तरं तेन प्रकृतिभागग्रहणमिति भावः। **प्रत्ययान्तयोरेव प्राप्नोतीति**। तथा च लुका सहागस्तिकुण्डिनचोः पर्यायता स्यादिति भावः। **षष्ठीमुच्चारयतीति**। यतः षष्ठ्युच्चारिता तस्यैवादेश उचितः, [7]'षष्ठी स्थानेयोगा' इति परिभाषितत्वादिति मन्यते। **परिभाषितमिति**। संज्ञासूत्रस्यापि परिभाषात्वेन व्यवहारे न कापि क्षतिः, [8]'संज्ञा च परिभाषा च' इत्यादिकारिकायास्तथाप्युपपत्तेः। व्यवहारषड्विधत्वमात्रे हि तस्यास्तात्पर्यम्, न तु तद्व्यवहारस्यासंकीर्णतायामपि॥

---

[1] प्रकृतिर्भवति — अ.
[2] पा. सू. ६. ४. १४८.
[3] पा. सू. ६. ४. १४९. आपत्यस्येति यलोपे — ऋ.
[4] आगस्त्यशब्द ऋष्यणन्त इति काशिकाकौस्तुभकौमुद्यादिषु दृश्यते। अगस्त्यशब्दस्य गर्गादिपाठेऽपि यञो यञञोश्चेत्यनेनैव तत्र लुकः सिद्धत्वादिति तदाशय इति भाति।
[5] पा. सू. ४. १. ८९.
[6] पा. सू. ४. २. १११.
[7] पा. सू. १. १. ४९.
[8] 'संज्ञा च परिभाषा च विधिर्नियम एव च। अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।' इति कारिका।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

यङोऽचि च २. ४. ७४.

[२, ८९६–८९७]

(**उद्द्योतनम्**) अत्र यङो लुकि बाधकमाह — **यदीति**। लुगभावेऽप्यतोलोपयलोपाभ्यां भाव्यमिति तत्र नलोपः कथम्, अत आह — **मत इति**। लुका लुप्तत्वाभावात् प्रत्ययलक्षणेन नलोपः सेत्स्यतीत्यर्थः। स्रंसेर्यङन्तात् पचाद्यच्यल्लोपयलोपाभ्यां यङो लोपे प्रत्ययलक्षणेन नलोपे [१]"नीग्वञ्चु' इत्यभ्यासस्य नीगागमे 'सनीस्रसः' इति रूपम्॥

[२, ८९६–८९७]

(**रत्नप्रकाशः**) **ऊतोऽचीति**। ऊतः परस्य यङो लुक् स्यादचि प्रत्यये पर इत्यर्थः। **सनीस्रस इति**। यद्यत्र लुक् स्यात् तदा [२]'न लुमताङ्गस्य' इति [३]निषेधान्नलोपो न स्यात्। [४]"अतो लोपः' [५]"यस्य हलः' इति पृथग्लोपे तु [६]"अचः परस्मिन्' इत्यल्लोपस्य स्थानिवत्त्वान्नलोपः स्यादिति भावः। **योयूय इति**। यु मिश्रणामिश्रणयोः, [७]"अकृत्सार्वधातुकयोः' इति दीर्घः। "अतो लोपः'। **विहितविशेषणमिति**। ऊकारान्ताद्विहितस्य यङो लुग् भवत्यचि प्रत्यय इति सूत्रार्थाश्रयणान्नोक्तदोष इति मन्यते। **सनीस्रंस इत्येव भवितव्यमिति**। उपलक्षणमिदं 'योयुवः, रोरुवः, इत्येव भवितव्यम्, न तु योयूय इत्यादिना[९]' इत्यस्य॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु २. ४. ७७.

[२, ८९७–८९८]

(**उद्द्योतनम्**) ननु पिवादेशो लुङि नास्तीति ततः परस्य सिचः कथं लुगुच्यते, अत आह **पिबतेरिति**। यत्र कुत्रापि प्रत्यये परे यस्य [१०]"पिवादेशो दृष्टः स पाशब्द इह गृह्यत इत्यर्थः। **यमेति**। [११]"इट ईटि' इति सिचो लोपः। सिचो लुकि तु प्रत्ययलक्षणनिषेधादिट्सकौ[१२] न स्याताम्। आदेशानुकरणत्वे व्याख्यानमेव शरणम्। 'सर्वत्र'शब्दार्थमाह — **घुमेति**। तस्य प्रयोजनमाह — **तेनेति**। पिबतेस्तु पीतम्, पातेस्तु 'पातं, पात्वा' इत्येव भवतीत्यर्थः। ननु [१३]"पै शोषणे' इत्यस्य भौवादिकस्येत्वं कुतो न भवतीत्यत आह — [१४]"**शोषणार्थस्येति**। [१५]"आदेचः' इत्यात्वे कृते पारूपमिति 'पातम्' इत्येव तस्य भवतीत्यर्थः॥

---

[१] पा. सू. ७. ४. ८४.
[२] पा. सू. १. १. ६३.
[३] प्रत्ययलक्षणस्येत्यादिः।
[४] पा. सू. ६. ४. ४८.
[५] पा. सू. ६. ४. ४९.
[६] पा. सू. १. १. ५७.
[७] पा. सू. ७. ४. २५.
[८] पा. सू. ६. ४. ४८.
[९] अस्य भवितव्यमित्यनुषक्तेनान्वयः।
[१०] सिजादेशः — अ.
[११] पा. सू. ८. २. २८.
[१२] इट्सकारौ — अ.
[१३] पै ओवै शोषणे — ऋ.
[१४] शोषणार्थेति — अ, ऋ.
[१५] पा. सू. ६. १. ४५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८९७–८९८]

(रत्नप्रकाशः) इण्पिबत्योरिति। इण्पिबत्योर्वाच्यौ यौ तयोरेव गापोर्ग्रहणमिति व्याख्येयमिति भावः। तदुपपत्तिस्तु इणादेशस्य स्थानिवद्भावेनेण्संज्ञकत्वात्, [1]"इक्श्तिपौ धातुनिर्देशे" इति पानार्थकात् पाधातोः श्तिपि शपि पिबादेशे सति पाधातोः पिबतिवाच्यत्वसंभवाच्च। एतेन "पिबतेर्यः स्थानी दृष्टः पाशब्द इत्यर्थः। शिति पिबादेशो [2]विहित इति 'पा पाने' इत्यस्यैव भौवादिकस्य ग्रहणम्" इति निरस्तम्। इणंशे एकः संबन्धः पिबत्यंशेऽन्यः संबन्ध इत्याश्रयणे मानाभावात्। मदुक्तरीत्यैकेनैव संबन्धेन तस्योपपन्नत्वाच्च। [3]**अगासीदिति।** गै शब्दे, पा रक्षणे, अनयोः [2]"यमरमनमातां सक् च" इति सगागमः सिचश्चेट्। **वार्तमिति।** सिद्धमित्यर्थः। **निर्देशादेवेति।** गातीति निर्देशो हीणादेशस्यैव युज्यते, न तु गै शब्द इत्यस्य, तदनुकरणे गायतीत्यस्य रूपस्यौचित्यात्। यद्युच्येत — लुङि सिचि च परे 'गा' इति यत् स्वरूपं तस्य॰ गातीत्यनुकरणमिति। तत्र [5]परत्वात् सगिटोः सतोर्लुङि सिचि परतो गारूपासंभवात्। एतेन 'गातीत्यादादिकादेशानुकरणत्वाददादिलुका गातिशब्दः श्तिपा निर्दिष्टः' इति निरस्तम्। अदादित्वे निर्णीते शपो लुगिति ज्ञानम्, तस्मिन् ज्ञातेऽदादित्वज्ञानमित्यन्योन्याश्रयात्। शपो लुगभावे एकादेशेऽपीणादेशस्यैव स निर्देश इति ज्ञातुं शक्यत्वाच्च। [4]**उक्तमिति।** [5]"लुग्विकरणालुग्विकरणयोरलुग्विकरणस्यैव ग्रहणम्, [6]'लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणम्' इति परिभाषाभ्यां व्यवस्थापितमिति भावः। **सर्वत्रेति।** [7]"घुमास्थागापा' इत्यादावपीत्यर्थः। तेन लुग्विकरणस्य पातेः 'पायते' इत्येव रूपं भवति, न तु पीयत इति। तथा पै शोषण इत्यस्यापि लाक्षणिकस्य। **अलुग्विकरणस्येति।** उपलक्षणमिदं प्रतिपदोक्तस्येत्यस्य॥

तनादिभ्यस्तथासोः २. ४. ७९.

[२, ८९८]

(रत्नप्रकाशः) सहचरितपरिभाषामबुद्ध्वाह — **तथासोरिति॥**

आमः २. ४. ८१.

[२, ८९८–९०२]

(उद्द्योतनम्) निपातनादिति। [8]"विदांकुर्वन्त्वित्यन्यतरस्याम्' [9]"विदामक्रन्निति च्छन्दसि' इति निपातनम्। **तरबादेरिति।** आमन्तादप्यतिशयविवक्षायां तरबाद्युत्पत्तिं मन्यते। नन्वनेन कथं

---

[1] का. वा. ३. ३. १०८–२.

[2] पा. सू. ७. २. ७३.

[3] एतत्सूत्रापेक्षयेत्याशय इति भाति।

[4] भाष्ये 'वक्तव्यमेतत्' इत्यत्र 'उक्तमेतत्' इति निर्णयसागरमुद्रिते पाठः।

[5] परिभाषा ९१.

[6] परिभाषा ११४.

[7] पा. सू. ६. ४. ६६.

[8] पा. सू. ३. १. ४१.

[9] पा. सू. ३. १. ४२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रत्ययमात्रलोपसिद्धिः, अत आह — **व्यवहितेति**। चकार कारयामिति विपर्यस्तप्रयोगः। तरबादेर्वास्तवो लुगत्र नास्तीत्याह — **आमन्तस्येति**। अभिव्यक्तस्य प्रकर्षयोगो नानभिव्यक्तस्य, अभिव्यक्तश्च प्रातीतिकः स्वरूपविशेषः। नन्वामप्यनर्थकः। न च [1]"कर्तरि कृत्' इत्यर्थनिर्देशः, तृतीय[2]धात्वधिकारविहितस्यैव कृत्संज्ञकत्वात्, अत आह — **अनिर्दिष्टेति**। 'आम' इत्यत्र मान्तावधेरर्थसत्त्वमुपपादयति — **अमेति**। **एकादेश इति**। सवर्णदीर्घ इत्यर्थः। भाष्ये **संनिपातेति**। णल्निमित्तकवृद्धिवशादामिति [3]रूपम्। तत् णलो लुकं न प्रयोजयतीत्यर्थः। कोटिद्वयं सहेतुकमुपपादयति — **यदेति**। विरोधाभावेऽपि तक्रकौण्डिन्यन्यायेन भाष्यकारमत इत्यर्थः। **अथेति**। वार्तिककारमत इत्यर्थः। **कृतेष्विति**। परत्वादित्यादिः[4]। भाष्यकारमतमेव सम्यगित्याह — **सत्यपीति**। [5]अनिष्टत्वात् अनङ्गीकारात्। [6]सुवनुत्पत्तौ हेतुमाह — **आम इति**। [7]'अतिङ' इति लकारस्य कृत्संज्ञानिषेधो नास्तीत्याह — **अतिङिति**। **अतिङभाविन इति**। पचतीत्यादौ लकारस्य कृत्संज्ञानिवृत्तये तथा व्याख्यानमित्यर्थः। **तथापीति**। मानान्तरेण [8]संख्याविशेषावगमे सतीत्यर्थः। **न तु कृत इति**। तथा सत्यामोऽकृत्त्वेनाव्ययत्वं न स्यात्। तदन्तविशेषणत्वे तु लकारस्य [9]कृत्त्वात् प्रत्ययलक्षणेन कृदन्तत्वं मान्तत्वं च श्रूयमाणमित्यामन्तस्याव्ययत्वं सिध्यति। ननु स्वरादिषु 'आम्' इति पाठात् तस्यैवाव्ययत्वं भविष्यति, किं तदन्तस्याव्ययत्वोपपादनेन, अत आह — **स्वरादिष्विति**। **तद्धितेति**। [10]तसिलादिस्तद्धित एधाच्पर्यन्त इत्यनन्तरममामः पाठात् 'तत्प्रकरणात्' इत्युक्तम्। संदंशाभावेनावान्तरप्रकरणानुद्भूतावप्याह — **साहचर्यादिति**। आदेशानन्तरं लुगनङ्गीकारे दोषाभिधानार्थं 'स्वरः कथम्' इति भाष्यम्। तद्व्याचष्टे — [11]**अत्रेति**। **गतिर्गताविति**। उत्तरसूत्रे गतिरित्यस्यानुवृत्त्यर्थमिदमुक्तम्। गतौ परे गतिरनुदात्तः। **तिङि चेति**। उदात्तवति तिङि परे गतिरनुदात्तः। अत्र यच्छब्दयोगे [12]'निपातैर्यद्यदि' इत्यादिना निघातनिषेधादामन्तस्य प्रत्ययस्वरेणोदात्तत्वादादेशलुकि प्रत्ययलक्षणेन तिङन्तत्वात् प्रशब्दस्यानुदात्तत्वसिद्धिरित्यर्थः। अपवादपक्षेऽपि [13]स्वरसिद्धिरित्युत्तरतात्पर्यमाह — **प्रशब्दस्येति**। **समासे** प्रादिसमासे। **समासेति**। [14]'समासस्य' इत्यन्तोदात्तत्वे प्राप्ते [15]'तत्पुरुषे तुल्यार्थ' इति प्रशब्दस्योदात्तत्वे प्राप्ते [16]'गतिकारकोपपदात् कृत्' इति परत्वात् कृदुत्तरपदप्रकृतिस्वरत्वे शेषनिघातेन प्रशब्दस्यानुदात्तत्वं सिध्यतीत्यर्थः। आदेशपक्षे[17] इष्टस्वरासिद्ध्यभिधानार्थं 'तस्य च' इति भाष्यं व्याचष्टे — **आमन्तस्येति**। **चकारेति**। भाष्योदाहरणग्रहः। आदिनोदाहरणान्तरसंग्रहः। समासेऽनिष्टमाह — **तत इति**। 'न चकारकारयाम्' इत्ययुक्तम्, अनुप्रयोगस्यामः परत्वनियमात्, अत आह — **नञ इति**। आमन्तेन सामर्थ्याभावे हेतुमाह — **अभिव्यक्तेति**॥

---

[1] पा. सू. ३. ४. ६७.
[2] धात्वविकारस्यैव — अ.
[3] रूपं सत् णलः — अ.
[4] 'आदिः' इति नास्ति — अ.
[5] अनिर्दिष्टत्वात् — अ, ऋ.
[6] सुवनुवृत्तौ — अ.
[7] पा. सू. ३. १. ९३.
[8] संज्ञाविशेषावगमे — अ.
[9] कृतत्वात् — अ.
[10] 'तसिलादयः प्राक् पाशपः' इत्युक्तत्वात् 'याप्ये पाशप्' इति सूत्रात् प्राक् 'एधाच्च' इति सूत्रसत्वादेवमुक्तम्।
[11] तत्रेति — अ, ऋ.
[12] पा. सू. ८. १. ३०.
[13] 'स्वर' इति नास्ति — अ.
[14] पा. सू. ६. १. २२३.
[15] पा. सू. ६. २. २.
[16] पा. सू. ६. २. १३९.
[17] 'पक्षे' इत्यस्मादनन्तरम् अपिशब्दोऽधिकः — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[२, ८९८–९०२]

(रत्नप्रकाशः) अत्र पूर्वसूत्राल्लेरित्यस्यानुवृत्तौ दोषमाह — **आमो लेरिति**। [1]'विदांकुर्वन्त्वित्यन्यतरस्याम्' [2]'अभ्युत्सादयाम्' इत्यादिनिपातनमनालोच्य दूषणमिदमुद्भावितम्। **लिग्रहणं निवर्तिष्यत इति**। लेरित्यस्याननुवृत्तौ सर्वेष्टसिद्धौ तदनुवृत्तिमभ्युपगम्य लुङ्लोटोर्निपातनाश्रयणमयुक्तमिति भावः। एतेन 'निपातनादप्यत्र लुक् सिध्यति। तत्त्वनपेक्ष्यायं परिहार उक्तः' इति निरस्तम्। तदपेक्ष्याप्यस्यैव परिहारस्य युक्तत्वात्। [3]'यस्येति च' इति सूत्रे इकारस्येति परे लोप इत्यस्य 'अतिसखेरागच्छति, अतिसखेः स्वम्' इत्युदाहरणव्यवस्थापनपर[4]भाष्यस्याप्यत्रानुकूलत्वाच्च। **प्रत्ययमात्रस्येति**। तरबादेरपीति भावः। **इष्यत एव प्रत्ययमात्रस्येति**। आमन्तात् परस्य लुगिति शेषः। युक्त्यन्तरमाह — **आतश्चेति**। एतेन 'आमन्तस्यानभिव्यक्तपदार्थत्वात् स्वाभाविक्येवानुत्पत्तिस्तरबादेर्लुग्द्वारान्वाख्यायत इति भावः' इति निरस्तम्। प्रकृतभाष्यस्योत्पन्न[5]प्रत्ययस्य लुग्भवतीत्यत्रैव तात्पर्यसंभवेन प्रत्ययानुत्पत्तिपरतया व्याख्यानानौचित्यात्। अव्ययत्वाविशेषादुच्चैःप्रभृतेरिवानभिव्यक्तपदार्थकादप्यामन्तात् तरबाद्युत्पत्तौ बाधकाभावाच्च। [6]न च तरपो लुकि प्रत्ययलक्षणेन तत आम् स्यादिति वाच्यम्, तस्याप्युत्पन्नस्यानेन लुक्संभवात्। लिग्रहणानुवृत्त्यननुवृत्तिसाधारण्येनातिप्रसङ्गं शङ्कते — **आमन्तेभ्यो णल इति**। **अर्थवत इति**। [7]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इत्याम्प्रत्ययोऽर्थवान्। प्रत्ययग्रहणपरिभाषयापि तस्यैव ग्रहणं ज्ञेयम्। **आमेति**। 'अम गत्यादिषु' इत्यस्माण्णलि वृद्धिः। **उक्तं वेति**। [8]'कृन्मेजन्तः' इति सूत्रे। **संनिपातलक्षण इति**। प्रत्ययग्रहणपरिभाषयापि सिध्यतीदम्। **आदेशापवाद इति**। [9]'सत्यपि संभवे बाधनम्' इति न्यायाश्रयणादिति भावः। **कृतेष्विति**। [10]'असति संभवे बाधनम्' इति न्यायेन [11]परेष्वादेशेषु, तदनन्तरमिति भावः। **कस्येति**। निघातादेस्तिङ्कार्यस्यानिष्टत्वात् प्रश्नः। **कथमिति**। आमः प्रत्ययत्वादप्रत्यय इति प्रातिपदिकत्व[12]निषेधादिति भावः। **लकारस्येति**। [13]'अतिङ्' इति निषेधस्य तिङ्विषयत्वाल्लकारस्य कृत्संज्ञायां न काप्यनुपपत्तिरिति भावः। एतेन "[14]'अतिङ्' इति कृत्संज्ञाप्रतिषेतधस्तिङ्भाविनो लकारस्य। अयं तु तिङ्भावी न भवतीति भावः" इति निरस्तम्। तत्र तिङ्पदस्य तिङ्भाविलकारलक्षकत्वे मानप्रयोजनयोरभावात्। न च तिङः कृत्संज्ञानिषेधेऽपि [15]लकारे तत्संज्ञासत्त्वेन स्थानिवत्त्वेन पुनस्तिङः कृत्संज्ञा मा भूदिति लकारस्यैव कृत्त्वं निषेध्यमिति वाच्यम्, तिङः कृत्त्वनिषेधसामर्थ्येन तत्रातिदेशेन कृत्त्वाप्रसक्तेः। लकारस्य कृत्त्वनिषेधपक्षेऽपि तत्सामर्थ्यादेव तिङः कृत्त्वाभावस्य वक्तव्यत्वात्। अन्यथा लकारस्य कृत्त्वनिषेधेऽपि तिङां स्थानिवद्भावेन प्रत्ययत्वे सति शतृशानचोरिव कृत्संज्ञाया दुर्वारत्वापत्तेश्च। **सुपः श्रवणमिति**। आमन्तस्याव्ययत्वमजानत उक्तिरियम्। तत्र प्रथमैकवचनस्य हल्ङ्यादिलोपे-

---

[1] पा. सू. ३. १. ४१.
[2] पा. सू. ३. १. ४२.
[3] पा. सू. ६. ४. १४८.
[4] तत्र सख्यशिश्वीति निपातनानाश्रयणादित्याशयः स्यादिति भाति।
[5] प्रत्ययस्यालुक् — ब.
[6] न च परयोर्लुकि — ब.
[7] परिभाषा १२२.
[8] पा. सू. १. १. ३९.
[9] महाभाष्यम् १. १. ४७, ६. १. २.
[10] महाभाष्यम् ६. १. २.
[11] पदेष्वादेशेषु — प, ब.
[12] प्रतिषेधादिति — प.
[13] पा. सू. ३. १. ९३.
[14] पा. सू. ३. १. ९३.
[15] लकारस्य तत्संज्ञा — प.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

ऽपि द्विवचनादेः श्रवणं स्यादिति मन्यते। **कृदन्तं मान्तमिति**। [1]कृद्यो मान्त इति पक्षे तु 'आमः' इत्यनेनैव तत्र सुपो लुग् ज्ञेयः। [1]'अम्, आम्, कृत्वोऽर्थाः' इति तद्धितपरिगणनान्तर्गतेनाम्ग्रहणे- नास्यामो ग्रहणं नेति प्रकारान्तरेणैवास्याव्ययसंज्ञा साधिता। एतेन तत्रत्याम्ग्रहणेनास्याप्यामो ग्रहणं वदन्तो मन्दा निरस्ताः। **यत्प्रकारयांचकारेति**। तिङश्चेदनेन लुक् क्रियते तदा [2]'तिङि चोदात्तवति' इति प्रशब्दाकारस्य निघातः सिध्यतीति भावः। **कृदन्तप्रकृतिस्वरत्वादिति**। अव्यय- प्रकृतिस्वरं बाधित्वा प्रवृत्तेन [3]'गतिकारकोपपदात् कृत्' इति कृदुत्तरपदप्रकृतिस्वरेण तत्सिद्धिरिति भावः। ननु [4]'असति संभवे बाधनम्' इत्यस्य संभवे तत्परित्यागेन [5]'सत्यपि संभवे बाधनम्' इति पक्षाश्रयणमयुक्तमिति चेन्न, निघातानिघातसिद्धयै [6]'सत्यपि संभव'पक्षस्यैवात्राश्रयणीयत्वादित्याशये- नाह — **तथा चेति**। **नञा तु समासप्रसङ्ग इति**। नञ् आमन्तेन समासप्रसङ्ग इति भावः। **उक्तं वेति**। समर्थसूत्रे। **असामर्थ्यादिति**। स्वाभाविकमत्रासामर्थ्यं, न त्वविवक्षाप्रयुक्तम्, अन्यथा पक्षे तदभ्युपगमापत्तेः। **न चकार कारयामिति**। कारयामित्यनेन नञः सामर्थ्याभाव- प्रदर्शनाय चकारव्यवधानेनोभयोस्तयोर्निर्देशोऽयम्, न तु लोके एतादृशप्रयोगोऽस्तीति, चकारेत्या- द्यनुप्रयोगमन्तरेण तस्यासाधुत्वात्॥

अव्ययादाप्सुपः २.४.८२.

[२, ९०२–९०३]

(उद्द्योतनम्) ननु [7]'स्त्रियाम्' इत्यस्य स्त्रीसमानाधिकरणं यत् तस्माट्टाबादय इत्यर्थः, तत्र 'यस्यां शालायाम्' इत्यत्रेव 'यत्र शालायाम्' इत्यादौ त्रलाद्यन्तस्य स्त्रीत्वविशिष्टे वृत्त्यभावेऽपि स्त्रीसामानाधिकरण्याट्टाबुत्पत्तौ [8]लोपो विधेयः, अत आह — **न चेति**। **भूतमिति**। नियत- नपुंसकस्य 'वेदाः प्रमाणम्' इतिवत् सामानाधिकरण्यमविरुद्धमिति भावः। [9]ननूत्पन्नस्य सुपः कथं लोप उच्यते, प्रत्ययलक्षणस्य वा[10] किं प्रयोजनम्, अत आह — **स्वाभाविकीति**। निस्दुस् इत्यादौ रुत्वम्। स्वाभाविक्येवान्वाख्यायत [11]इत्युक्तम्, अत आह — **प्रसक्तेति**। अन्यथा 'दधि, मधु' इत्यादौ क्विपोऽदर्शनस्य लोपसंज्ञायां प्रत्ययलक्षणेन तुक्प्रसङ्गादिति भावः। **वाक्यैकवाक्यतयेति**। [12]'द्व्येकयोः' इत्यादेः [13]'स्वौजसमौट्' इत्यादेश्चेत्यर्थः। [14]**वाक्यान्तर** [15]'द्व्येकयोः' इत्यादि[16]वाक्यान्तर। भाष्ये **उत्पन्नानां नियमः**। एकस्मिन्नेकवचनमेवेत्याद्यर्थनियमः। एकस्मिन्नेवैकवचनमित्यादिप्रत्यय-

---

[1] महाभाष्यम् १. १. ३८. 'मान्तः' इत्यस्य विवरणमिदम्।
[2] पा. सू. ८. १. ७१.
[3] पा. सू. ६. २. १३९.
[4] महाभाष्यम् ६. १. २.
[5] महाभाष्यम् १. १. ४७, ६. १. २.
[6] महाभाष्यम् १. १. ४७, ६. १. २.
[7] पा. सू. ४. १. ३.
[8] लुगित्यर्थः।
[9] नन्वनुत्पन्नस्य — अ.
[10] 'वा' इति नास्ति — ऋ.
[11] इत्ययुक्तम् — ऋ.
[12] पा. सू. १. ४. २२.
[13] पा. सू. ४. १. २२.
[14] वाक्यान्तरं — अ.
[15] पा. सू. १. ४. २२.
[16] वाक्यान्तरम् — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

नियमेऽपि न[1] दोष इत्याह — भाष्ये **अथवेति**। **ज्ञापकादिति**। आपो लुकि प्रयोजनाभावात् ज्ञापकान्नाप उत्पत्तिरुक्तेत्याब्ग्रहणं व्यर्थमिति स्थितम् ॥

[२, ९०२–९०३]

(रत्नप्रकाशः) अलिङ्गमव्ययमिति। तस्य तत्त्वं स्वाभाविकम्। तेन स्त्रियां वर्तमानात् प्रातिपदिकाद्विधीयमानस्यापोऽव्ययादप्रसङ्ग इति भावः। ननु संख्याभावात् सुवप्यव्ययान्न भवतीति [2]तदभ्युपगमे आपोऽनभ्युपगमे चार्धजरतीयं स्यात्, तन्न युज्यत इत्याशयेनाह — **किमिदमिति**। प्रयोजनसद्भावादर्धजरतीयं दोषावहं नेति मनसि निधाय समाधत्ते — **सत्यमिति**। यत्तु 'स्वाभाविक्येव सुपोऽनुपलब्धिर्लुग्द्वारेण पदत्वनिबन्धनरुत्वादिकार्यसिद्धयेऽन्वाख्यायत इत्यर्थः' इति। तन्न, समस्तेनैव शास्त्रेण साक्षात् परम्परया वा स्वाभाविकस्यैवान्वाख्येयतयात्र विशिष्य तत्कथनस्याध्येतृव्यामोहमात्रफलकत्वात्। **उच्यमानेऽप्येतस्मिन्निति**। सुपो लुकीति शेषः। **स्वाद्युत्पत्तिर्न प्राप्नोतीति**। तथा च सुपो लुग्विधानमयुक्तम्। न ह्यनुत्पन्नस्य प्रत्ययत्वम्, न वा अप्रत्ययस्य लुगिति भावः। एतेनापि 'स्वाभाविक्यनुपलब्धिः' इत्यादि प्रागुक्तं निरस्तम्। **अविशेषेणोत्पद्यन्त इति**। [3]'स्वौजसमौट्' इत्यादिना सूत्रेणेति शेषः। **उत्पन्नानां नियम इति**। उत्पन्नस्वादिसंबन्धितया संख्याया नियमः क्रियत इत्यर्थः। तथा चाव्ययेभ्यः सर्वाणि वचनानि स्वादीनि भवन्तीत्युत्पन्न एव सुपो लुगिति भावः। ननु संख्यानियमपक्षे तदुपपन्नं भवतु नाम, एकवचनादिप्रत्ययनियमपक्षे कथं तदुपपद्यत इत्यत आह — **अथवेति**। **एकत्वादय इति**। तथा चाव्ययार्थस्यैकत्वाद्यन्वयाभावात् सर्वाणि वचनानि भवन्तीति भावः। ननु 'एकस्मिन्नेवैकवचनम्' इत्युक्ते नान्यत्रेति सामान्यत एव नियमः प्रतीयते, न तु न द्वयोर्न बहुष्वितीत्यस्वरसादाह — **अथवेति**। वस्तुतस्तु 'पचतिरूपम्, पचतोरूपम्, पचन्तिरूपम्' इत्याद्यनुगुणतया [4]'एकवचनमुत्सर्गतः करिष्यते' इति भाष्यानुसारेण [5]'न केवला प्रकृतिः प्रयोक्तव्या' इति शिष्टसमयेन च प्रातिपदिकार्थमात्रप्रसिद्धप्रथमैकवचनमात्रस्य लुग्विधानेन चरितार्थमिदं सूत्रं नाव्ययात् सुबुत्पत्तिं ज्ञापयति ॥

नाव्ययीभावादतोऽम्त्वपञ्चम्याः २. ४. ७३.

[२, ९०३–९०४]

(उद्द्योतनम्) भाष्ये **एकयोग इति**। 'अपञ्चम्याः' इति पञ्चम्या [6]'अमः प्रतिषेध इष्यते, अलुगिष्यते। [7]तस्यापि प्रतिषेधप्रसङ्ग इत्यर्थः। नियमेन योगविभागकार्यसिद्धिप्रकारमाह — **तेनेति**। [8]अत्र आपाटलिपुत्रमित्यत्र तु। 'आ पाटलिपुत्रात्' इति [9]'आङ् मर्यादाभिविध्योः' इत्यव्ययीभावे [10]'सुपो धातु' इति पञ्चम्या लुकि समासात् सुरुत्पद्यते, तस्यामादेशः, न तु पञ्चम्या

[1] 'न' इति नास्ति — अ.
[2] सुपोऽभ्युपगम इत्यर्थः।
[3] पा. सू. ४. १. २.
[4] महाभाष्यम् १. १. ३७.
[5] महाभाष्यम् १. २. ६४.
[6] अम्प्रतिषेधः — अ.
[7] अलुकोऽपीत्यर्थः।
[8] तत्र — अ, ऋ.
[9] पा. सू. २. १. १३.
[10] पा. सू. २. ४. ७१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यर्थः। समासादुत्पन्नपञ्चम्यास्तु श्रवणमेवेति प्रतिपादनाय 'यदा च' इति भाष्यम्। [1]"तत्र तदा पञ्चमी' इत्यत्र साकाङ्क्षत्वात् पूरयति — **श्रूयत इति**॥

[२, ९०३–९०४]

(रत्नप्रकाशः) **योगव्यवसानमिति**। योगविभाग इत्यर्थः। ननु विधेयभेद[कतु]शब्दस्य वाक्यभेदमन्तरेणानुपपद्यमानस्य सत्त्वेन किं वाक्यभेदोऽपूर्व आपाद्यत इति चेत्, सत्यम्, एकसूत्रत्वे सति वाक्यभेदेऽभ्युपगम्यमाने 'अपञ्चम्याः' इति पदस्य वाक्यद्वयेऽपि घटकता स्यात्, योगविभागेन वाक्यभेदे सति तु तन्नेति वैषम्यमित्याशयेनाह — **एकयोगे हीति**। **तुर्नियामक इति**। यदि पूर्ववाक्येऽपि 'अपञ्चम्याः' इत्येतद्घटकं स्यात् तर्हि उत्तरे पूर्वस्माद्विशेषाभावेन तद्वाचकस्य तुशब्दस्यानर्थक्यं स्यात्। अतः सत्यप्येकसूत्रत्वेऽभिमतवाक्यभेदः सिध्यतीति भावः। एतेन 'अवधारणे तुर्वर्तते। तेनामेवापञ्चम्याः, अलुक् तु पञ्चम्या अपीत्यर्थः' इति निरस्तम्। तुशब्दस्य पूर्वस्मादुत्तरस्य विशेषबोधकत्वं प्रसिद्धं यत्, तदादायैव योगविभागेन योऽर्थो गम्यते तस्यैव निदर्शनीयत्वेन तदभिप्रायेणैव 'तुर्नियामकः' इति भाष्यस्य तुरर्थव्यवस्थापक इत्यर्थकस्योपपन्नत्वेन वैपरीत्येन वाक्यार्थ[2]निदर्शनस्यानौचित्यात्। कर्मप्रवचनीययोगे विहितपञ्चम्यन्तेन कर्मप्रवचनीयस्य समासे सति तस्याः पञ्चम्याः [3]"सुपो धातुप्रातिपदिकयोः' इति लुकि पुनः समासात् कर्मप्रवचनीयघटितात् [4]"पञ्चम्यपाङ्परिभिः' इति पञ्चमी भवतीति मन्यमान आह — **अमि पञ्चमीप्रतिषेध इति**। कर्मप्रवचनीययुक्तादुत्तरपदत्वाहर्ात् पञ्चम्या विहितत्वात् तत्कर्मप्रवचनीयघटितसमासस्य च कर्मप्रवचनीयान्तरयोगाभावेन तत्रापादानपञ्चम्येव भवतीति व्यर्थमेवापादानग्रहणमित्याशयेन समाधत्ते — **न वोत्तरपदस्येति**। अपादानग्रहणे कृते प्रत्युत दोष एव, अव्ययीभावाज्जातायाः कर्मप्रवचनीययोगपञ्चम्या अपि श्रवणस्येष्टत्वादित्याशयेनाह — **यदा चेति**॥

तृतीयासप्तम्योर्बहुलम् २. ४. ८४.

[२, ९०४]

(उद्द्योतनम्) **मद्राणामिति**। [5]"अव्ययं विभक्ति' इत्यादिनेत्यर्थः। ननु 'एकविंशतिभारद्वाजम्' इत्यत्र भरद्वाजशब्दाद् विदाद्यञः [6]"यञञोश्च' इत्यनेन, 'त्रिपञ्चाशद्गौतमम्' इत्यत्र गोतमशब्दादृष्यणः [7]"अत्रिभृगु' इत्यनेन च लुक् कस्मान्न भवति, अत आह — **तत्रेति**। **एकत्वविशिष्ट इति**। [8]'भरद्वाजानां [9]'गोतमानां च समुदायोऽत्र समासार्थ इत्यर्थः। यद्यप्यन्तरङ्गत्वात् समासात् प्रागेव लुका भाव्यम्, तथापि भाष्यकारवचनप्रामाण्यादन्तरङ्गन्यायोऽत्र नाश्रीयत

---

[1] भाष्ये 'भवति तदा प्रतिषेधः' इत्यत्र 'भवति, तत्र तदा पञ्चमी' इत्यन्नंभट्टपाठः स्यादिति भाति।

[2] निदर्शनानौचित्यात् — प.

[3] पा. सू. २. ४. ७१.

[4] पा. सू. २. ३. १०.

[5] पा. सू. २. १. ६.

[6] पा. सू. २. ४. ६४.

[7] पा. सू. २. ४. ६५.

[8] भारद्वाजानां — अ.

[9] गौतमानां च — अ, ऋ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति भावः। **तत इति**। समासात् सप्तम्यर्थे उत्पन्नसप्तम्या[1] इत्यर्थः। नेदमपूर्ववचनमित्याह — **बहुलेति**। [2]'क्वचित् प्रवृत्तिः' इत्यादिस्तदर्थः॥

[२, ९०४]

(रत्नप्रकाशः) बहुलग्रहणलभ्यमर्थं दर्शयति — **सप्तम्या इति**। **सुमद्रमिति**। मद्राणां समृद्धिरित्यव्ययीभावः। **एकविंशतिभारद्वाजमिति**। एकविंशतिर्भरद्वाजानां वंश्यानामिति [3]'संख्या वंश्येन' इत्यव्ययीभावः॥

लुटः प्रथमस्य डारौरसः २. ४. ८५.

[२, ९०५–९११]

(उद्द्योतनम्) कृत्र आत्मनेपदेऽप्येवमेव रूपमिति कथमयमवकाश उक्तः, अत आह — **तिप्तस्झीनामिति**। अनेन कथमेत्वबाधः, परत्वस्य तादवस्थ्यात्, अत आह — **लुट इति**। चकारेण परस्मैपदानां चेत्यर्थः। **विशेषेति**। प्रथमस्यादेशाः, पुरुषत्रयस्याप्येत्वम्। 'ज्यायः' इत्यत्र प्रकर्षो न विवक्षित इत्याह — **कस्येति**। **सामान्येन** प्रशस्यत्वमात्रेण, न तु प्रकर्षाश्रयेण। तत्र हेतुः — **इहेति**। भाष्ये उक्तार्थसंग्रहश्लोकः 'डारौ' इत्यादिः। तद्व्याचष्टे — **परत्वाट्टेरेत्वे कृत इति**। दृष्टान्तं व्याचष्टे — **यथेति**। यजेः परत्वात् संप्रसारणे कृते जातिपक्षाश्रयेण पुनः प्रसङ्गाद् द्विर्वचनं यथा, तथात्राप्येत्वे कृते [4]पुनः प्रसङ्गादादेशा भविष्यन्तीत्यर्थः। एवं पूर्वविप्रतिषेधार्थम् 'आत्मनेपदानां च' इति न वक्तव्यमित्युक्तम्। अर्थत [5]आन्तर्याश्रयणात् [6]'स्थानेऽन्तरतमः' इत्येवादेशव्यवस्थासिद्धेः[7] संख्यातानुदेशस्यानपेक्षितत्वात् तदर्थमपि तन्न [8]वक्तव्यमित्युत्तरार्धस्यार्थः। पूर्वश्लोकेनार्थायाः पौनरुक्त्यं निराह — [9]**एष एवार्थ इति**। [[10]**भाष्ये टेरेत्वमिति**।] परत्वाट्टेरेत्वं च पूर्वमस्तु, कृते च तस्मिन् पुनः प्रसङ्गादिमे सन्त्वित्यर्थः। 'डाविकार': इति कर्मधारय इत्याह — **डादेश इति**। नन्वनेकाल्त्वादेव सर्वादेशत्वसिद्धेः शित्त्वं न वक्तव्यम्, अत आह — **नानुबन्धेति**। सर्वादेशत्वे [11]'डा' इत्यस्यानुदात्तत्वं स्यादित्यापादनाय 'निघात' इत्यादि। तद्व्याचष्टे — [12]**लुट इति**। [13]**तास्यनुदात्तत्वं तासेः परस्य**[14]

---

[1] प्रदीपे 'ततः सप्तमी। नित्योऽम्भावः' इत्यत्र 'ततः सप्तम्या नित्योऽम्भावः' इत्यन्नंभट्टाभिमतः पाठ इति भाति।

[2] 'क्वचित् प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव। शिष्टप्रयोगाननुसृत्य लोके विज्ञेयमेतद् बहुलग्रहे तु' इति प्राचीनकारिका। सारस्वतव्याकरणे।

[3] पा. सू. २. १. १९.

[4] पुनः प्रसङ्गेनादेशो भविष्यतीत्यर्थः — अ.

[5] आन्तर्याश्रयणेन — ऋ.

[6] पा. सू. १. १. ५०.

[7] सिद्धेति संख्यातानु — अ.

[8] कर्तव्यमिति — ऋ.

[9] 'एष एवार्थ इति' इति नास्ति — अ.

[10] अथवेति — अ, ऋ.

[11] ता इत्यस्यानुदात्तत्वं — ऋ.

[12] प्रदीपे 'तिपो डादेशः' इत्यत्र 'लुटस्तिपो डादेशः' इति पाठोऽन्नंभट्टस्येति भाति।

[13] प्रदीपे 'तास्यनुदात्तेन्ङिदित्यनुदात्तत्वं प्राप्नोति' इत्यत्र 'तास्यनुदात्तत्वं प्राप्नोति' इत्यन्नंभट्टपाठ इति भाति।

[14] लसार्वधातुकस्येति शेषः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

[1]'तास्यनुदात्तेत्' इति सूत्रेणानुदात्तत्वम्। 'कर्ता' इत्यन्तोदात्तत्वमिष्यते। ननु [2]'तिङ्ङतिङः' इति कर्तेत्यस्य सर्वस्यानुदात्तत्वमिष्टमेव, अत आह — **यस्त्विति**। **न लुङिति**। अतिङन्तात् परं लुङन्तं नानुदात्तम्। 'डिति टेर्लोपः' इत्यस्यार्थमाह — **आकार इति**। तीत्यत्रेकारस्य डादेशे 'आस्त्' इत्यस्य टेर्लोप इत्यर्थः। [3]**तत एवेति**। अङ्गाधिकारविहितलोपेऽङ्गत्वस्यापेक्षितत्वात्। तान्त-स्याङ्गत्वाभावमाह — **न हीति**। अनित्त्वमनिकारत्वमिति शङ्कां निराह — **अनिदिति**। इका-रादेशत्वेऽप्रत्ययत्वमाह — [4]**प्रत्ययावयव इति**।[5] प्रश्लिष्टस्य कृतैकादेशस्य [6]न सर्वादेशत्वम्, अत आह — **तत्रेति**। प्रश्लिष्टनिर्देशादेतावल्लभ्यते। [6]सिंहावलोकितन्यायेनाद्यसमाधाने दोषशङ्के-त्याह — **सिद्धमिति**। तिप्शब्दस्य य इकारस्तस्य डादेशे कृते तयोस्तकाराकारयोस्तिङ्ग्रहणे-नाग्रहणात् तदन्तस्य पदसंज्ञा न स्यादित्यर्थः। **यथेति**। [7]'एरुः' इतीकारस्योकारादेशे यथा तिङ्-ग्रहणेन ग्रहणं पदत्वं च तथेहापीत्यर्थः। 'न्याय्यः' इति विशेषणेनान्यस्यान्याय्यत्वमुक्तम्, तदाह — [8]**पूर्वेति**। **अथवेति**। पूर्वं परत्वादनुदात्तत्वे कृते [9]पुनःप्रसङ्गादुदात्तनिवृत्तिस्वराङ्गीकारादित्यर्थः। **टिलोपे [च] कृत इति**। परत्वाट्टिलोपानन्तरं स्वरयोरेव संप्रधारणस्यारब्धत्वादिति भावः। उक्तरीत्या पिद्वचन उदात्तनिवृत्तिस्वरः सिध्यति, न त्वपिद्वचन इत्यभिधानार्थं 'तदेतत्' इति भाष्यम्। तदवतारयति — **नन्विति**। **नैवेति**। अपिद्वचने। पिति सिद्धिमन्यत्रासिद्धिं च विशदयति — **तिप इति**। [10]'अनुदात्तौ सुप्पितौ' इत्यनेन। **क्रियते** डादेश इत्यनुषङ्गः। **न कृत इति**। तस्यानुदात्तत्वमकृत्वैव परत्वाट्टिलोपकरणादित्यर्थः। **पुनःप्रसङ्गेति**। पूर्वं लक्षणान्तरेण प्र-सक्तस्य परेण बाधे पुनःप्रसङ्गः। उदात्तनिवृत्तिस्वरस्त्वनुदात्तत्वाभावादप्राप्तः। तास्यनुदात्तत्वं तु परेण टिलोपेन बाधितं पुनःप्रसङ्गेन स्यात्। तत्त्वनिष्टमित्यर्थः। **शास्त्रीय इति**। [11]'अनु-दात्तस्य च' इति सूत्रेऽनुदात्तशब्देन [12]'नीचैरनुदात्तः' इति लक्षितमनुदात्तत्वं न गृह्यते, किं तूदात्त-त्वरहितमित्यर्थः। तथा च [13]तिशब्दस्य तास्यनुदात्तत्वं विनापि तदादेशस्य डाकारस्योदात्तनिवृत्ति-स्वरः सेत्स्यतीति भावः। ननु तासेः [14]प्रत्ययाद्युदात्तात् पूर्वं परत्वाट्टिलोपे सति कथमुदात्तनिवृत्ति-स्वरः सिध्येत्, अत आह — भाष्ये **प्रत्ययस्वरश्चेति**। तत्र वृत्तिशब्दार्थमाह — **वृत्तिरिति**। वाक्यार्थमाह — **यदैवेति**। **अपवादेति**। लसार्वधातुकानुदात्तत्वं प्रत्ययस्वरस्यापवाद इति तद्-विषये स न प्रवर्तते। तासेस्त्वपवादाभावादुत्पत्तिसमय एव स[15] प्रवर्तत इत्यर्थः। **श्लोकेनेति**।

---

[1] पा. सू. ६. १. १८६.
[2] पा. सू. ८. १. २८.
[3] अत एवेति — ऋ.
[4] प्रदीपे 'प्रत्ययस्य ह्यवयवः स्यात्' इत्यत्र 'प्रत्ययावयवः स्यात्' इत्यत्रंभट्टपाठ इति भाति।
[5] 'न' इति नास्ति — ऋ.
[6] लौ. न्या. साहस्री पृष्ठम् १४.
[7] पा. सू. ३. ४. ८६.
[8] प्रदीपे 'पूर्वं प्रदर्शितो हि' इत्यत्र 'पूर्वप्रदर्शितो हि' इति निर्णयसागरमुद्रिते पाठः।
[9] पुनःप्रसङ्गादुदात्तादिस्वराङ्गीकारादित्यर्थः — ऋ.
[10] पा. सू. ३. १. ४.
[11] पा. सू. ६. १. १६१.
[12] पा. सू. १. २. ३०.
[13] तशब्दस्य — ऋ.
[14] प्रत्ययानुदात्तात् — अ.
[15] न प्रवर्तत इत्यर्थः — अ.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

श्लोकाभ्यामित्यर्थः। यद्वा, पूर्वश्लोकेन पूर्वोक्तसंग्रहः, द्वितीयेनापूर्वमुक्तमित्येकवचनेन सूचितम्। एतदर्थमेव श्लोकद्वयान्ते एतदुक्तमिति॥

इति श्रीमहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावतंसश्रीतिरुमलाचार्यवर्यस्य
सूनोरन्नंभट्टस्य कृतौ व्याकरणमहाभाष्यप्रदीपोद्द्योतने
द्वितीयाध्यायस्य चतुर्थपादे द्वितीयमाह्निकम्॥

इति चतुर्थः पादः। अध्यायश्च समाप्तः॥

[२, ९०५-९११]

(रत्नप्रकाशः) पुनःप्रसङ्ग[1]विज्ञानमनपेक्ष्याह — **टितां टेरेविधेरिति**। आचार्यदेशीय आह — **आत्मनेपदानां चेति**। 'लुटः प्रथमस्यात्मनेपदानां [च] डारौरसः' इत्यवश्यं सूत्रन्यास आश्रयणीयः। तथा च टेरेत्वापवादा एव डारौरस इतीष्टसिद्धिरिति भावः। भगवानाह — **पूर्वविप्रतिषेधार्थेनेति**। पूर्वविप्रतिषेधफलसाधनार्थेनेत्यर्थः। **पुनःप्रसङ्गविज्ञानादिति**। लक्ष्यानुसारेणास्यापि पक्षस्यावश्याश्रय[णीय]त्वादिति भावः। ननु शास्त्रस्यालक्ष्यदर्शिविषयकत्वादलक्ष्यदर्शिना [2]चादेशव्यवस्थायाः पूर्वमादेशानामेकार्थत्वादिकं न ज्ञायते, तस्य लक्षणैकचक्षुष्कत्वादित्यत आह — **अथवेति**। **न दोषो भवतीति**। यः शिष्यते स लुप्तार्थाभिधायीति न्यायेन 'डारौरसः, डारौरसः' इति क्रमेण षण्णामुपस्थितिसंभवात् प्रथमस्येत्यनेनापि तिप्तस्झि[3]ताताञ्झानामिति भावः। वचनत्रयस्य प्रथमत्वपर्याप्त्यधिकरणत्वात् तत्समुदायस्य युगपत्प्रयोगाभावात् तदवयवानां स्थानित्वे सति यथासंख्यं भविष्यति, [4]'प्रतिप्रधानं गुणावृत्तिः' इति न्यायेन प्रथमान्तरस्यापि तथैव ते[5] भविष्यन्तीत्युपपत्तिर्ज्ञेया। कृतैकशेषाणामेव द्वन्द्वो भवति, न तु द्वन्द्वैकशेष इति मन्यमानः पृच्छति — **किं पुनरत्र ज्याय इति**। उक्तमर्थं संगृह्णाति — **डारौरस इति**। **यथा द्वित्वमिति**। जुहाव जुहुवतुरित्यादाविति शेषः। तमेवार्थमार्ययान्यः संगृह्णाति — **आन्तर्यतो व्यवस्थेति**। यत आन्तर्यतो व्यवस्था भवति, यतश्च प्रतिप्रधानं गुणावृत्तिः, अतस्त्रय एवेमे डारौरसो निर्दिष्टा भवन्तु। सर्वेषां द्विविधानामपि प्रथमानां ते भविष्यन्तीति न काप्यनुपपत्तिरिति भावः। [6]**कृतेऽपि तवास्मिन्निति**। अस्मिन्नेत्वे कृते तवापि मते इमे डारौरसः सन्तु, का तत्रानुपपत्तिरिति भावः। **डाविकारस्येति**। डारूपस्य विकारस्यादेशस्येत्यर्थः। **शित् कर्तव्य इति**। डाश्रौरस इति निर्देशः कर्तव्य इति भावः। **अन्त्यस्य प्रसज्येतेति**। [7]'नानुबन्धकृतमनेकाल्त्वम्' इति सर्वादेशत्वं न भविष्यतीति मन्यते। शित्त्वेऽशित्त्वे च डादेशस्यानुदात्तता प्राप्नोति, इष्यते तूदात्ततेत्याशयेनाह — **निघातप्रसङ्गस्त्विति**। अन्त्यादेशप्रसङ्गं तावदभ्युपगम्याद्यं दूषणं परिहरति — **सिद्धमलोऽन्त्यविकारादिति**। अलोऽन्त्यविकारत्वादपि सिद्धमभिमतं रूपमित्यर्थः। **टेर्लोपाल्लोप इति**। तिपस्तकारेण सह वर्णत्रयस्य

---

[1] विज्ञानमनवेक्ष्याह — ब.
[2] चादेशाव्यवस्थायाः — ब.
[3] ताताञ्झानामुपस्थितिसंभवादित्यनुकृष्टेनान्वयः।
[4] मीमांसातृतीयाध्यायप्रथमपादसप्तमे ग्रहसंमार्जनाधिकरणेऽयं न्याय उक्तः।
[5] डारौरस इत्यर्थः।
[6] भाष्ये 'कृतेऽपि तस्मिन्' इति पाठ उपलभ्यते। 'कृतेऽपि तवास्मिन्' इति पाठाङ्गीकारे नार्यावृत्तानुगुण्यं प्रतीयते। 'तेऽस्मिन्' इति वा पाठोऽभिसंहितः स्यात्।
[7] परिभाषा ६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

टिसंज्ञायां सत्यां तस्य लोपे सति कर्तेति सिध्यतीति भावः। [६] **अभत्वादिति।** भाधिकारे [१]"टेः" इति सूत्रस्य कृतत्वादिति भावः। **डित्करणसामर्थ्यादिति।** ननु वक्ष्यमाणप्रकारेण सर्वादेशार्थत्वे [२]डकारस्य कथं टिलोपः स्यादिति चेन्न, [३]"जश्शसोः शिः" इत्यादाविव 'लुटः प्रथमस्य शारौरसः' इति वा [४]"इदम इश्" इत्यादाविव 'प्रथमस्य लुट आश्रौरसः' इति वा कर्तव्ये तदपहाय क्रियमाणस्य डकारानुबन्धनकरणस्योभयार्थतासंभवात्। **अनित्त्वाद्वेति।** डादेशस्य प्रवृत्तेः पूर्वं डकारस्येत्संज्ञा न संभवतीति तत्प्रयुक्तमनेकाल्त्वमाश्रित्य सर्वादेशत्वं भविष्यतीति भावः। **असत्यामित्संज्ञायामिति।** इत्संज्ञार्हस्येति शेषः। तथा च शिशीरूपयोरादेशयोः शकारस्य प्रयोजनाभावेनेत्संज्ञानर्हस्य विनिगमनाविरहेण सर्वादेशतादेशस्यरूपविशेषोभयसंपादनार्हस्य सर्वादेशत्वोत्तरमित्संज्ञाभावेऽपि लोपः सिध्यति। ननु [५]"शि सर्वनामस्थानम्" [६]"विभाषा ङिश्योः" इत्यत्र शकारस्य विशेषणत्वेनोपादानात् शकारस्यास्तु विशेषणार्थता, सर्वादेशार्थतायां तु शकारस्य न किंचिन्मानमिति चेन्न, [७]"आदेः ॰परस्य" इति जश्शसोरादेरकारस्य शौ सति तस्य सर्वनामस्थानसंज्ञायां सत्यामपि प्रत्ययत्वाभावेन तस्मिन् परतः पूर्वस्य तन्निमित्ताङ्गसंज्ञाभावेनाङ्गस्य सर्वनामस्थाने परतो विधीयमानं कार्यं तस्मिन् परतः पूर्वस्य न भविष्यत्येवेति सर्वनामस्थानसंज्ञाया आनर्थक्यापत्त्या तत्सार्थक्याय शकारस्य [८]सर्वादेशार्थताया अपि कल्पयितुं युक्तत्वात्। [९]"सर्वे सर्वपदादेशाः" इत्यार्षप्रयोगानुसारेण शीभावशकारस्यापि सर्वादेशार्थतासंभवाच्च। तदेवं सर्वादेशार्थत्वं शकारस्य क्लेशसाध्यमिति कृत्वा शिशीसाधारण्येनानुबन्धनैरपेक्ष्येणैव सर्वादेशत्वं साधयति — **अथवेति। डा आ इति।** एवं [१०]"शी ई" इत्यत्र प्रश्लेषो ज्ञेयः। तत्र 'शि इ' इत्यत्रैक इकारो द्वयोर्निपातित इति कल्पनीयमिति। पूर्वापेक्षयात्र प्रतिपत्तिलाघवं ज्ञेयम्। उक्तसमाधानत्रयमध्ये आद्यसमाधाने दूषणमाह — **यदा तर्हीति।** परिहरति — **तिङ्ग्रहणमिति। विप्रतिषेधात् सिद्धमिति।** परत्वात् [११]"तास्यनुदात्तेत्" इति निघाते सति ततः प्रत्ययस्वरेण तासेराद्युदात्तत्वे सति ततो डादेशे टिलोपे चोदात्तनिवृत्तिस्वरेण डाविकारस्योदात्तता सेत्स्यतीति भावः। **उभयोरनित्ययोरिति।** कृताकृतप्रसङ्गित्वमात्रेण नित्यत्वमिति भाष्यकृन्मते उभयोर्नित्ययोरिति बोध्यम्। तद् दूषयति — **न सिध्यतीति। परत्वाट्टिलोपेनेति।** तया चोदात्तनिवृत्तिस्वराभावाड्डादेशोऽनुदात्त एव स्यादिति भावः। इदानीं डारौरसां प्रथमप्रवृत्तिमभ्युपेत्यैव समाधत्ते — **एवं तर्हीति। न्याय्य एवेति।** अन्तरङ्गेषु डारौरस्सु प्रवृत्तेषु ततस्तासौ तस्याद्युदात्तत्वे टिलोपे च ततः प्रवृत्तत्वेन पूर्ववदन्तरङ्गविषयकत्वाभावादिति भावः। उक्तप्रकारेण तिपो डादेशे सिध्यति, न तु [१२]तस्य डादेशे, तत्र प्रत्ययाद्युदात्तत्वे सति तासेर्विकरणस्यानुदात्तत्वेनोदात्तनिवृत्तिस्वराप्रसक्तेरित्याह — **तदेतदिति।** ननु [१३]"तास्यनुदात्तेत्" इत्येतत्प्रवृत्तेः पूर्वं टिलोपे उदात्तनिवृत्तिस्वरस्तत्र कथं स्यादित्यत आह —

---

[१] पा. सू. ६. ४. १४३.

[२] डकारस्य सर्वादेशार्थत्व इत्यन्वयः।

[३] पा. सू. ७. १. २०.

[४] पा. सू. ५. ३. ३.

[५] पा. सू. १. १. ४२.

[६] पा. सू. ६. ४. १३६.

[७] पा. सू. १. १. ५४.

[८] सर्वार्थताया अपि — प, ब.

[९] महाभाष्यम् १. १. २०.

[१०] शि ई इत्यत्र — ब.

[११] पा. सू. १. ६. १८६.

[१२] 'त' इत्यात्मनेपदप्रथमपुरुषैकवचनस्येत्यर्थः।

[१३] पा. सू. ६. १. १८६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सोऽसावविद्यमानोदात्तत्व इति। [1]"नीचैरनुदात्तः' इति संकेतितस्तत्र न गृह्यत इति न दोष इति भावः। उक्तमर्थं चूर्णिकया संगृह्णाति — **प्रत्ययस्वरापवाद इति। वृत्तिसंनियोगशिष्ट इति।** तत्प्रवृत्तिकाल एव प्रवृत्त इत्यर्थः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्र-सरस्वतीविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे द्वितीयस्याध्यायस्य चतुर्थपादे द्वितीयमाह्निकम्॥

॥ समाप्तोऽयमध्यायः॥

[1] पा. सू. १. २. ३०.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अनुबन्धः

[महाभाष्यप्रदीपव्याख्याने द्वितीयाध्यायमुद्रणानन्तरं जम्मुरघुनाथदेवालयकोशागारात् श्रीरामचन्द्रसरस्वतीविरचितभाष्यप्रदीपविवरणस्य मातृका मध्येमध्ये ग्रन्थलोपभूयिष्ठा प्राप्ता। तत्र प्रथमाध्याये प्रथमपादे नवाह्निकपर्यन्ते श्रीरामचन्द्रसरस्वतीव्याख्यानभूतं विवरणं मातृकान्तरेषूपलब्धत्वात् पूर्वमेव मुद्रितम्। प्रथमाध्यायीयद्वितीयपादात् प्रभृति तुरीयपादान्तं परं तदानीमनुपलब्धत्वान्न मुद्रितम्। स भागः पुनरन्यैरमुद्रितैरपूर्णैर्व्याख्यानैः सह सत्यवकाशे मुद्रयिष्यते। द्वितीयाध्यायभागोऽधुनानुबन्धत्वेनात्र संघटचते। द्वितीयाध्याये 'नदीभिश्च' (२.१.२०) इति सूत्रमध्यभागात् प्रभृत्येवात्रोपलभ्यते। संपादितपाठाद्वचत्यस्तो मातृकापाठोऽधस्तात् प्रदर्श्यते।]

द्वितीयाध्यायस्य प्रथमपादे द्वितीयमाह्निकम्

श्रीरामचन्द्रसरस्वतीविरचितं

भाष्यप्रदीपविवरणम्

नदीभिश्च २.१.२०.

(**विवरणम्**) ...[1]व्ययीभाव इति कथं लभ्यत इत्यत आह — **पूर्वाचार्येति**। वचनसामर्थ्यात् पूर्वपदार्थप्राधान्याभावेऽप्यव्ययीभावः स्यादिति शङ्कते — **नन्विति**। ननु व्यस्तप्रयोगे द्विशव्दार्थस्य प्राधान्यं कथंचित् स्यात्, समासे तु पूर्वपदार्थस्य प्राधान्यमित्यत्र शपथ एव प्रमाणम्, अन्यत् किंचिन्नेत्यत आह — **अथवेति**। 'ननु च' इति चोद्यस्य प्रकृतोपयोगमाह — **इदानीमिति**। ननु द्विशव्देन केवलेनेरावतीशव्देन वा देशविशेषो नाभिधीयत इति कथमसावन्यपदार्थो न स्यादित्यत आह — **अयमिति**। यद् येनोच्यते स तस्यार्थो भवतीत्यभिधेयस्यार्थत्वे स्थिते कथम् 'एतदेव' इत्युक्तमित्यत आह — [**अस्याभिप्राय इति**।] [2]**यस्त्विति**। वचनस्य का गतिरित्यत आह — **अव्ययीभावे त्विति**। **समाहारविवक्षायामिति**। अव्ययीभावेनेति शेषः। 'एकापूपीवत्' इति दृष्टान्तोपादानं यथा प्रत्यवयवमपूपत्वारोपात् समाहार उच्यते एवं प्रकृतेऽव्ययीभाव इति प्रदर्शनार्थम्॥

द्विगुश्च २.१.२३.

(**विवरणम्**) **टजचाविति**। [3]'गोरतद्धितलुकि' इति टच्, [4]'तत्पुरुषस्याङ्गुलेः' इत्यच्॥

---

[1] द्वितीयध्याये एतावत्प्रभृत्येवोपलभ्यते—मातृकायाम्. (मा)

[2] अस्य प्रतीकस्यावतारिका वा विवरणं वा न दृश्यते — मा.

[3] पा. सू. ५.४.९२.

[4] पा. सू. ५.४.८६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २. १. २४.

(विवरणम्) 'ग्रामं गमी' इत्यादौ कैश्चित् [1]'कर्तृकर्मणोः कृति' इति षष्ठ्याः [2]'अकेनोः' इति प्रतिषेध उक्तः, तन्मतं निरस्यति — **गत्यर्थेति**। 'अहीने' इति विशेषणकृत्यं दर्शयति — **अतीतादिभिरिति**। **यदा त्विति**। स च भेदाभावो भाष्ये प्रतिपादितः। किं च बहुव्रीहिणा कृतत्वमुच्यत इत्यत आह — **बहुव्रीहिणेति**। ननु समानाधिकरणानां बहुव्रीहिः, द्वितीयातत्पुरुषस्तु [3]व्यधिकरणानामिति कथमुत्सर्गापवादभाव इत्यत आह — **अर्थभेद इति**। [4]अर्थाभेदेनोत्सर्गापवादभावस्योक्तत्वात् कथम् 'अथ' इति शङ्कावकाश इत्यत आह — **कष्टं श्रित इतीति**। भवतु रुहादीनां क्तः कर्तरि धात्वर्थस्यानपवर्गे, कष्टश्रितादिषु किमायातमित्यत आह — **आदिशब्द इति**। यदि कथमपि धात्वर्थस्यानपवर्गः, कथं तर्हि भूतकालविहितनिष्ठेत्यत आह — **सर्वस्येति**। [5]**परिनिष्ठित इति**। परिसमाप्त इत्यर्थः। ननु शाब्दोऽर्थसंप्रत्ययः कथं 'प्रत्यक्षेण' इत्युच्यते, अत आह — **अव्यवधानेनेति**॥

खट्वा क्षेपे २. १. २६.

(विवरणम्) स्नानं नाम समावर्तनं भाष्ये विवक्षितम्। क्षेपस्य प्रतिपादितत्वात् 'नातिव्रतवान्' इति पुनः किमर्थमभिधानमित्यत आह — **खट्वारोहणं** [6]**चेति**॥

अत्यन्तसंयोगे च २. १. २९.

(विवरणम्) षण्णां मुहूर्तानां युगपद्गमनाभावात् कथं 'गच्छन्ति' इति लट्प्रयोग इत्यत आह — **क्रमेणेति**॥

तृतीया तत्कृतार्थेन गुणवचनेन २. १. ३०.

(विवरणम्) तदा सामर्थ्येति। साक्षादिति शेषः। यदुक्तं साक्षात्सामर्थ्यं नास्तीति समासो न भविष्यतीति, तद्विघटयति — **सर्वत्रेति**। **इह त्विति**। खडिधातुवाच्यक्रियापेक्षयेत्यर्थः। **तामन्तरेणेति**। कारकतृतीयातिरिक्ते तु नेदं प्रवर्तते, उत्तरसूत्रे निपुणादिग्रहणाज्ज्ञापकादिति भावः। शङ्कुलाखण्ड इत्यादौ करोतिक्रियापेक्षा, दध्ना पटुरित्यत्र भुजिक्रियापेक्षेति वैषम्यमाशङ्क्याह — **परस्परेति**। **व्यतिरिक्तेति**। पूर्वोत्तरपदार्थव्यतिरिक्तेत्यर्थः। **तदपेक्षेति**। भुजिक्रियापेक्षेत्यर्थः। **स्वभावसिद्धमिति**। 'दण्डेन घटः' इत्यादौ दण्डहेतुको घट इत्येव बोधाच्छब्दशक्तिस्वाभाव्याद् घटादिपदाद् द्रव्यस्य सिद्धत्वेनैव बोधात् तत्कृतत्वप्रतीत्यभाव इति भावः।

---

[1] पा. सू. २. ३. ६५.

[2] पा. सू. २. ३. ७०.

[3] द्व्यधिकरणानामिति — मा.

[4] अर्थाभावेनोत्सर्गापवाद — मा.

[5] प्रदीपे 'धात्वर्थे निष्ठित इत्यर्थः' इत्यत्र 'धात्वर्थे परिनिष्ठित इत्यर्थः' इति पाठोऽभिमत इति भाति।

[6] वेति — मा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत्कृतत्वमस्तीति। 'दण्डेन घटः' इत्यादावुक्तरीत्या घटादीनां तथात्वाभावेऽपि [1]'सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधीयते' इति भट्टपादोक्तरीत्या यत्र वपावदादिशब्दैः संबन्धविशिष्टद्रव्यप्रतीतिस्तत्र वपादिसंबन्धस्य गवादिकृतत्वाद्विशिष्टस्यापि तत्कृतत्वमस्तीति तात्पर्यम्। मतुब्लोपेन द्रव्यवचनत्वं चेत् [2]शब्दानित्यत्वमपीत्यत आह — **अर्थभेदेनेति**। भाष्ये **यद्येवमिति**। 'गुणवचनेन' इत्यस्य करण इत्यर्थः। ननु 'भवति हि' इत्यनुपपन्नम्, क्रियया हि साक्षात्कारकाणां संबन्धाद् गुणवचनेन संबन्धाभावात् क्रियाद्वारके तु सामर्थ्ये 'दध्ना पटुः' इत्यत्रापि समासप्रसङ्गादित्यत आह — **अव्यतिरिक्तेति**। अव्यतिरिक्तकल्पत्वं समासार्थान्तर्भावहेतुः, तत्र चान्तरङ्गप्रतीयमानत्वम्। ननु सूत्रविपर्यासपरिहाराय भाष्ये वाक्यभेदो योगविभागोऽभिप्रेत इति वक्तव्यम्। ततश्च 'तत्कृतार्थेन' इति द्वन्द्वनिर्देशे कथं गुणवचनेनेत्येत् समासैकदेशस्य तत्कृतस्य विशेषणं स्यादित्यत आह — **तत्कृतेति**। **तृतीयाया इति**। ननु [ऊन]पर्यायग्रहणार्थमर्थग्रहणं कर्तव्यमित्यत आह — **अर्थशब्देनेति**। 'शङ्कुलाखण्डः' इत्यत्र खडिधातुवाच्यक्रियापेक्षे सामर्थ्ये संभवति करोतिक्रियापेक्षं सामर्थ्यं कस्मादुक्तमित्यत आह — **सत्त्व इति**॥

पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः २. १. ३१.

(विवरणम्) हेतुकालेति। प्रयत्नविशेषादिर्हेतुः, तस्य भूतकालत्वेन संप्रेक्षितत्वादित्यर्थः। अयं भावः — कार्यस्य कारणत्वेनोपचारात् तस्य च भूतत्वाद् भूतप्रत्यय इत्यर्थः। कार्यं भाष्यकारवचनम्, कारणं वार्तिककारवचनम्, वार्तिकवचनपूर्वकत्वाद् भाष्यवचनस्य। 'सदृशग्रहण उक्तम्' इतीहत्यो भाष्यग्रन्थः। [3]'सदृशप्रतिरूपयोः' इत्यत्रत्यस्तु वार्तिकग्रन्थ इति भावः। 'पूर्वपद' इत्यादि 'भविष्यति' इत्यन्तमाद्यवार्तिकव्याख्यानम्, 'अथ' इत्यादि द्वितीयस्य। आद्यव्याख्यानं त्विहत्योऽपि वार्तिकग्रन्थ एवेत्यभिप्रायेण। पूर्वपदप्रकृतिस्वराभावे त्वन्तोदात्तत्वं स्यात्। नन्वव्यविकन्यायेन[4] तृतीयासमास एव क्रियताम्, मा कारि षष्ठीसमासः, त्रैरूप्यस्य सिद्धत्वात्, अत उक्तम् — **तथा चेति**॥

कर्तृकरणे कृता बहुलम् २. १. ३२.

(विवरणम्) लाघवात् क्तग्रहणं कर्तुमुचितम्, अत आह — **अयं भाव इति**॥

कृत्यैरधिकार्थवचने २. १. ३३.

(विवरणम्) ननु यत्र कृत्यैः समासो गृह्यते तत्र [5]'कर्तृकरणे कृता' इत्यनेन समासस्य सिद्धत्वात् किं 'कृत्यैरधिकार्थ' इत्यनेन, तत्राह — **स्तुतिनिन्देति**। 'काकपेया' इत्यादौ काककर्तृक-

---

[1] तन्त्रवार्तिके ३. १. १२. मीमांसासूत्रभाष्यव्याख्यानेऽयं श्लोकः।

[2] 'अनित्यत्वमपीत्यपिशब्दादर्थभेदेन शब्दैक्ये मतुब्लोपवैयर्थ्यं चेत्युच्यते' इति मातृकायां कोणे लिखितम्। इदं यस्य कस्यचिट्टिप्पणी स्यादिति भाति।

[3] पा. सू. ६. २. ११.

[4] अयं न्यायो महाभाष्ये ४. १. ८८ सूत्रे.

[5] पा. सू. २. १. ३२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पानकर्म नदीति वोघेऽल्पाम्भस्त्वपूर्णाम्भस्त्वादिना निन्दास्तुतिमात्रे तात्पर्यात् क्रियाया निष्प्रयोजनत्वेन गौणत्वात् कर्तृकरणयोरपि गौणत्वमिति भावः। **केचिदिति।** कर्तृत्वादेस्तृतीयाप्रयोजकत्ववत् समासप्रयोजकत्वस्यापि संभवादित्यरुचिः। ननु 'कृत्यैरधिकार्थवचने' इति नियमार्थं स्यात्, अत आह — **काकपीतेति।** **नेदमिति।** 'कृत्यैरधिकार्थवचन एव' इत्येवं नियमार्थं नेदमित्यर्थः। 'साधनं कृता' इत्यस्य समानार्थत्वाभावाद्वाशब्दोऽनुपपन्न इत्यत आह — **बहुलेति।** **सूत्रसंदर्भेति।** [1]'कर्तृकरणे, कृत्यैः' इत्येतत्सूत्रद्वयेत्यर्थः। वहुलग्रहणसहितमिदं वा कर्तव्यं तत्सहितसूत्रसंदर्भो वेति तात्पर्यम्। वहुलग्रहणं त्वत्रापि कर्तव्यमेव 'परशुना छिन्नवान्' इत्याद्यर्थम्। पादाभ्यामित्यस्य कर्तृकरणतृतीयान्तत्वे यथा [न्यासेऽपि सिध्यतीत्यत्त आह — **अपादाने पञ्चमीति**॥]

अन्नेन व्यञ्जनम् २. १. ३४.

(विवरणम्) काष्ठद्वयस्य निश्रयण्यन्तर्भावात् 'निश्रयण्याः काष्ठाभ्यां सामर्थ्यम्' इत्ययुक्तमित्यत आह — **निश्रयणीशब्देनेति।** ननु नानाकारकाणां प्रतिषेधे दध्योदन इत्यत्रापि कर्मकरणभावेनौदनस्य दध्नश्च नानात्वात् समासनिषेधः स्यादित्यत आह — **भिन्नेति।** अनेनापि करणतृतीययैव समासः, करण इत्यनुवृत्तेरित्यभिप्रायेणासामर्थ्याशङ्का। दध्नेति सहयोगतृतीयायामुक्तरीत्या करणतृतीयाभावात् समासाप्राप्तेराह — **जीवत्विति।** [2]'न लोक' इति निषेधात् 'अश्वानाम्' इति षष्ठ्यनुपपन्नेत्यत आह — **संबन्धेति।** दध्योदन इत्यादिसंग्रहार्थमाह — **युक्तग्रहणमिति।** नन्वध्यवसानं संप्रत्यय इति पर्यायः, तथा च हेतुसाध्ययोरविशेष इत्यत आह — **सर्वलोकेति।** प्रतिज्ञातार्थस्य साध्यधर्मविशिष्टस्य साध्यलक्षण एकदेशो हेतुर्न भवतीत्यर्थः॥

चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २. १. ३६.

(विवरणम्) अनवगमादिति। एवं चैतत्सूत्रीयहितग्रहणज्ञापकसिद्धमेव [3]'हितयोगे च' इति वार्तिकमिति पूर्णोऽर्थः। **स्ववचनेनैवेति।** स्वशब्देनात्र पूर्वपक्षी ज्ञेयः। केषुचिच्चतुर्थ्यन्तेषु समास इष्ट इति सर्वशब्दः संकुचद्वृत्तिर्वक्तव्यः। तत्र केनाकारेण संकुचद्वृत्तित्वमित्यत आह — **असत्यपीति।** [4]**आनन्तर्यमिति।** सर्वन्यासेषु वचनारम्भस्यावश्यकत्वरूपसामर्थ्येत्यर्थो बोध्यः। भाष्ये **समासस्याभिधानमिति।** समासार्थस्येत्यर्थः। ननु सति संवन्धविशेषे संवन्धसामान्यसद्भावात् तदाश्रयषष्ठीसमासाश्रयेणाश्वघासादयः साध्यन्ते, ततो यूपदार्वादयोऽपि तथा साधयितुं शक्यन्त इति किं चतुर्थीसमासेनेत्यत आह — **यूपदार्वादिष्विति।** प्रत्ययपक्षेऽपि लौकिकानुगुण्यं दर्शयति — **तदर्थमिति।** **सुशब्दस्य त्विति।** वृत्तिविषय एव तस्य सत्त्ववाचित्वमिति भावः। विग्रहमात्रं न निषिध्यत इत्याह — **अत्रेति**॥

सप्तमी शौण्डैः २. १. ४०.

(विवरणम्) ननु यतो वहुवचनं तत् तदर्थगतवहुत्वमाह। इह च शौण्डस्य स्वरूपार्थत्वात्

---

[1] पा. सू. २. १. ३२.
[2] पा. सू. २. ३. ६९.
[3] का. वा. २. ३. १३ — ४.
[4] आनन्तर्यार्थमिति — मा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तस्य चैकत्वाद् धूर्तादिस्वरूपस्य च शौण्डशब्दार्थत्वाभावात् कथं बहुवचनम्, कथं वा धूर्तादीनां ग्रहणमित्यत आह — **धूर्तादीनामिति**। **अन्तश्शब्दोऽत्रेति**। मध्यरूपाधिकरण इत्यर्थकः। 'वनान्तः' इत्युदाहरणम्, वनवर्तिमध्य इत्यर्थस्तस्य। यस्त्वधिकरणशक्तिमात्रवृत्तिस्तेनाव्ययीभाव एव। अन्तर्वणमिति यथा॥

कृत्यैर्ऋणे २. १. ४३.

(विवरणम्) भाष्ये **नियोग इति**। आवश्यक इत्यर्थः। देयविशेषे ऋणशब्दस्य प्रसिद्धत्वात् कथं नियोगतः कर्तव्ये प्रवृत्तिरित्यत आह — **अवश्येति**। भाष्ये **यद्ग्रहणं चेति**। चस्त्वर्थे। यद्ग्रहणं त्विति तदर्थः॥

पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन २. १. ४९.

(विवरणम्) भाष्ये **इह कस्मादिति**। समाहारद्विगोरिवास्यापि बाधः स्यादिति प्रश्नः। **एकत्वविशेषणादिति**। एकत्वविशिष्टेन नद्या इतरेभ्यो व्यावर्तनादित्यर्थः। **नद्यत्रेति**। नदीत्वेन नदी प्रधानम्, न त्वेकत्वेनेत्यर्थः। भाष्ये **विप्रतिषेधेनेति**। एकशब्दातिरिक्तसंख्याशब्देऽव्ययीभावस्य चारितार्थ्यमिति भावः। [भाष्ये] **समाहार इति**। स च नात्रेति भावः॥

इति प्रदीपविवरणे द्वितीयस्य प्रथमे द्वितीयमाह्निकम्॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य प्रथमपादे तृतीयमाह्निकम्

तद्धितार्थोत्तरपदसमाहारे च २. १. ५१.

(**विवरणम्**) नायं शब्दस्वरूपमात्रविषयः प्रश्नः, किं त्वर्थविशेषविशिष्टशब्दविषय इत्याह—**किमिति**। किं चात इत्यत आह—**तत्रेति**। तयोर्मध्य इत्यर्थः। **द्रव्यस्येति**। अशब्दार्थत्वात् तस्येति भावः। समूहस्य तद्धितार्थत्वात् तद्रूपत्वाच्च समाहारस्येति योजना। **भेदेनेति**। तद्धितार्थादिति विपरिणम्यानुषञ्जनीयम्। **उपसर्जनह्रस्वत्वमिति**। एकविभक्तित्वाभावात् [१]"एकविभक्ति' इत्युपसर्जनसंज्ञाभावादिति भावः। **द्विगुरिति**। समाह्रियमाणार्थत्वे समासस्य तेषामनेकत्वाद् द्विवचनबहुवचनप्राप्तावेकवचनार्थमित्यर्थः। नन्वत्र कर्मणि घञ् केन। [२]"अकर्तरि च कारके' इत्यनेन चेत् संज्ञायामिति वचनादसंज्ञायां न प्राप्नोतीत्यत आह—**संज्ञाग्रहणं चेति**। **कुमार्यर्थस्येति**। अनेन कुमार्यर्थस्य नानाक्रियासंबन्धयोग्यत्वात् तत्क्रियाविशेषसंबन्धे नानाविभक्त्युत्पत्तावेकविभक्तित्वाभावात् [३]"एकविभक्ति च' इत्युपसर्जनसंज्ञाभावमाह। [४]"प्रथमानिर्दिष्टम्' इत्यनेनाप्युपसर्जनसंज्ञा कुमारीशब्दस्य नास्तीत्याह—**समासेति**। भावसाधने तु समाहारस्य प्राधान्यात् कुमार्यर्थस्य तद्विशेषणत्वान्नानाक्रियासंबन्धयोग्यत्वाभावात् तत्र क्रियाविशेषसंबन्धाभावे समासलक्षणविशेष्यसंबन्धे षष्ठ्येकविभक्तित्वात् [५]"एकविभक्तावषष्ठ्यन्तवचनम्' इत्यस्य चैकदेशिसमासविषयत्वादिहाभावात् [६]"एकविभक्ति' इत्यनेनोपसर्जनसंज्ञायां ह्रस्वः सेत्स्यतीति बोद्धव्यम्। भाष्ये 'पञ्चकुमारि' इत्यस्योपलक्षणार्थत्वमाह—**यद्यप्यत्रेति**। **पञ्चखट्वीति त्विति**। अत्र हि यदा [७]"वा टावन्तः' इति स्त्रीत्वं तदा नपुंसकह्रस्वत्वाभावात् [८]"गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वत्वमिष्यते। ह्रस्वत्वाभावे ह्यकारान्तत्वाभावात् ङीप् न प्राप्नोति, ह्रस्वत्वं चोपसर्जनत्वाभावान्न प्राप्नोतीति पञ्चखट्वीति न सिध्यतीत्यर्थः। अर्जने समाहारेऽर्जनाभावे 'पञ्चग्रामी' इत्यादि न सिध्यतीत्याशङ्क्याह—**एकस्यामिति**। **बुद्ध्या** हस्तादिवत् करणभूतया, **एकस्यां क्रियायां** क्रियारूपे, **गुणे** गुणरूपे वा वस्तुनि **समीपीकरणं** संघटनमित्यर्थः। 'अर्जननिमित्तत्वात्' इति बहुव्रीहिः। अर्जने ह्येतावतेदमर्जितमित्येकक्रियायां घटनं भवतीति भावः। अर्जनं स्वस्वत्वाक्रान्तताकरणम्। **एकवर्गीकरणेनेति**। फलरूपहेतौ तृतीया। आभिमुख्यार्थकाङा वर्गीकरणं लब्धम्। भाष्ये **सादृश्येऽपि वर्तत इति**। एकक्रियाकारकत्वादिरूपं सादृश्यमेव समाहारशब्दार्थोऽनुहरतिवत्। नन्वनुपूर्वकस्यैव तत्र शक्तिः, अत आह—भाष्ये **अथवेति**। किमिति तावत्येवावतिष्ठत इत्यत आह—**केवलेनेति**। तथापि कथं समाहार इत्यत आह—**तत्र चेति**। 'स च समाहारः' इत्ययुक्तम्, तथा सति क्रियागुणयोः समासवाच्यत्वेन [९]भावशब्दप्रयोगो न प्राप्नोति। प्रयोगे वा

---

[१] पा. सू. १. २. ४४.
[२] पा. सू. ३. ३. १९.
[३] पा. सू. १. २. ४४.
[४] पा. सू. १. २. ४३.
[५] का. वा. १. २. ४४—१.
[६] पा. सू. १. २. ४४.
[७] का. वा. २. ४. ३०—५. 'वाबन्तः' इत्यस्यार्थानुवादोऽयम्।
[८] पा. सू. १. २. ४८.
[९] भाविशब्द—मा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विशेषाभिव्यक्तये तद्वाचिनः क्रियापदेन सामानाधिकरण्यं नियमेन प्राप्नोतीत्यत आह — **तन्निमित्तत्वादिति** । **वास्तवभेदाभावादिति** । द्रव्याकृत्योरिव समाहारसमाह्रियमाणयोरपि वास्तवभेदाभाव इति भावः । नन्वेवं गवां समाहार इति भेदे षष्ठी न स्यात् । किं च कर्मसाधनपक्षे यद् दूषणमुक्तं तदभेदपक्षे भावसाधनेऽपि प्राप्नोतीत्यत आह — **बुद्धीति** । ननु 'प्रत्ययोत्तरपदयोः' इति कस्य विचार इत्यत आह—**काशेति** । ननु पाणिनीयसूत्रव्याख्यानाय प्रवृत्तस्य किमित्यन्यदीयलक्षणविचार इत्यत आह—**पाणिनीयं त्विति**। द्विगुसमासलक्षणे एकस्मिन् साध्ये लक्षणद्वयोपस्थितावुभयत्रापि दोषदर्शनात् कोटचन्तरत्वेन तेषामपि लक्षणं विचार्यत इत्यर्थः। ननु द्विगोरिति प्रत्ययो न विधीयते, तत् कथं द्विगु[संज्ञा]निमित्तः प्रत्ययः, तदभावे वा कथमितरेतराश्रयत्वमित्यत आह — **पञ्चस्विति** । प्रातिपदिकत्वं क्वचिद् द्विगु[संज्ञा]निमित्तमिति तन्निमित्तः प्रत्ययो द्विगुनिमित्त इतीतरेतराश्रय इति भावः । नन्वेवमप्युत्तरपदे नेतरेतराश्रयः, द्विगोरुत्तरपदनिमित्तत्वेऽपि वहुव्रीहौ त्रयाणामपि भावेनोत्तरपदत्वस्य द्विगुनिमित्तत्वाभावादित्यत आह — **पञ्चेति** । किमिति तत्पुरुषे कृते बहुव्रीहिः, न प्रागित्यत आह — **सुप् सुपेतीति** । अविशेषेण बहुव्रीहिरिति पक्षस्य स्थितत्वात् पूर्वोक्तेन प्रकारेणेतरेतराश्रयोद्भावनं न संगच्छत इत्यपरितोषेणाह — **अथवेति** । संक्षिप्तत्वे हेतुः — **एकार्थीभावादिति** । 'एवं तर्हि' इत्यनुपपन्नम्, अर्थस्यावच्छेदकत्वमनुपात्तमिति सर्वस्मिन् समासप्रसङ्गात्, अत आह — [1]**पाणिनीयमिति** । अर्थशब्दो न प्रयोजनवाचीत्याह — **तद्धिताभिधेय इति** । तत्र वाच्य इत्यर्थः । अस्मिन्नपि पक्षे यदि तद्धिताभिधेयस्य द्योतकत्वेन द्विगुरित्युच्यते तदोत्पन्ने तद्धिते द्विगुरितीतरेतराश्रयत्वं तदवस्थितमित्यत आह — **तद्धितार्थ इति** । **प्रकृत्यर्थव्यतिरिक्तेति** । वाचकप्रत्ययस्थले तथावश्यकमिति भावः । 'समासतद्धितविधौ' इति किमीयो न्यास इत्यत आह — **न्यासद्वय इति** । अपूर्वमेतद्वचनं नान्यस्य कस्यचिदित्यर्थः । **यानि तु द्विगोरिति** । द्विगोः परस्य तद्धितस्य लुगिति सूत्रार्थे समाहारद्विगोः परस्य तद्धितस्य लुगर्थमिदमपि सावकाशमेव, [2]'अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपि' इति वार्तिकात् । द्विगोर्निमित्तं यस्तद्धित इत्यर्थे तु दोषस्यैवाभाव इति चिन्त्यम् । **प्रत्ययसंज्ञासंबन्धमिति** । प्रत्ययशब्देनोपादानात् प्रत्ययसंज्ञासंबन्धमाश्रित्य समासः क्रियत इति योजनार्थः । **समाससंज्ञाप्रतिबद्धं चेति** । समाससंज्ञानिमित्तकत्वादुत्तरपदत्वस्य समाससंज्ञाप्रतिबद्धत्वं बोध्यम् । **लोके स्त इति** । नित्यत्वेऽपि [3]संज्ञायास्तदीयसंकेतग्रहस्य शास्त्रनिरपेक्षं लोकेऽसत्त्वमिति भावः । ननु संज्ञामात्राश्रयो नायमितरेतराश्रयदोषः, अपि तु संज्ञा[परत्वोभया]श्रयः, तत् कथं भाविनीं संज्ञामाश्रित्य परिहारः, अत आह — **प्रत्ययोत्तरपदयोरिति विषयेति** । **भवतीत्यर्थ इति** । ज्ञापकेन तद्धितार्थ इति विषयसप्तमीति ज्ञाप्यत इति तात्पर्यम् । भाष्ये **द्विगोः [वा] लुग्वचनमिति** । एतच्च ज्ञापकं द्विगोर्निमित्तं यस्तद्धित इत्यर्थसत्त्वे । द्विगोः परस्य तद्धितस्येत्यर्थे तु समाहारद्विगोः परस्य तद्धितस्य लुगर्थं स्यादिति बोध्यम् । ननु [4]"एकार्थानामपि विरूपाणाम्' इत्येकशेषः कस्मान्न भवतीत्यत आह— **स्वरूपेति** । स्वरूपे विशेषोऽस्तीति 'अविशेषात्' इत्ययुक्तमित्यत आह — **एकार्थत्वादित्यर्थ इति** । ननु समाहार इत्युच्यमानेऽपि समाहारे वर्तने द्विगोर्लुक् तद्धितस्यास्तीति 'पञ्चपूली' इत्यत्र [5]"तद्धितलुकि' इति ङीप्प्रतिषेधः प्राप्नोत्येव । 'पञ्चाश्वा' इत्यत्र न प्राप्नोति, द्विगोः समाहारे वृत्त्यभावादित्यत आह — **न तद्धितलुकीति** । **समाहार एव तद्धितलुकीति** । नियमस्य सजातीया-

---

[1] प्रदीपे 'पाणिनीयलक्षणम्' इत्यत्र 'पाणिनीयं लक्षणम्' इति व्यस्ततया पाठोऽभिमतः ।

[2] का. वा. ४. १. ८८ — २.

[3] संज्ञायां तदीय — मा.

[4] का. वा. १. २. ६४ — २२.

[5] पा. सू. ४. १. २२.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पेक्षत्वात्। तेन 'पञ्चगवघनः' इत्यादौ टच्सिद्धिरिति भावः। समाहारेण कस्याभिधानमित्यत आह — **समाहारेऽभिधेय इति**। 'समाहारेण' इति भाष्ये इत्थंभूतलक्षणे तृतीयेति भावः। एवं 'तद्धितार्थेन' इत्यपि। नित्यद्वन्द्वो भवतीत्यभिधानस्य प्रकृतासांगत्यमाशङ्क्याह — **उत्तरेति**। **तदाकार्ये नैव भेदः स्यादिति**। अकार्य इति छेदः। कार्यभिन्नस्वरूपे नैव भेदः स्यादित्यर्थः। एतेन स्वररूपकार्ये भेदस्य सत्त्वाच्चिन्त्यमेतदिति प्रत्युक्तम्। द्विगुसंज्ञकस्योत्तरपदेन समासो विधेय इत्युच्यत इति प्रतिभाति, तदयुक्तम्, स्वरे दोषप्रसङ्गात्, [1]'कालाः परिमाणिना' इति समासस्य सिद्धत्वाच्चेत्यत आह — **द्विगोर्निष्पत्तय इति**। [2]परिमाणिवाचिनोत्तरपदेन हेतुना द्विगोर्निष्पत्तये बहूनां समासो विधेय इति वार्तिकार्थः। यदि हि समाहारे द्विगुं कृत्वा [3]'कालाः परिमाणिना' इति समासः क्रियते ततो [4]'न संख्यादेः समाहारे' इत्यह्लादेशनिषेधाद् 'द्व्यह्लजातः' इति न कदाचित् स्यादित्याह भाष्यकारः — **द्व्यह्लजातश्चेति**। **अशेषत्वादिति**। अनुक्तसमासः शेष इति भावः। त्रिक्तः शेषे तु परत्वाद् बहुव्रीहिसिद्धिरिति बोध्यम्। **चित्रग्वादिरिति**। संख्यापूर्वपदत्वाभावादत्र द्विगोः प्राप्तिर्नास्तीति भावः। **ङीप् प्राप्नोतीति**। परिमाणान्तत्वादिति भावः। [5]'न तद्धितलुकि' इति निषेधस्त्वपरिमाणान्तादिविषयक इति तात्पर्यम्॥

संख्यापूर्वो द्विगुः २. १. ५२.

(विवरणम्) ननु 'एकभिक्षा' इत्यत्र सत्यामपि द्विगुसंज्ञायामकारान्तत्वाभावाद् द्विगुलक्षणो ङीप् न भविष्यतीत्यत आह — **भिक्षशब्द इति**। **समासार्थस्येति**। [6]'अकारान्तोत्तरपदो द्विगुः स्त्रियाम्' इति वचनादिति भावः। नन्वेतद्वचनं समाहारद्विगुविषयम्, अयं तु समाहारद्विगुर्न भवतीति कथं स्त्रीत्वमित्यत आह — **यथेति**। **यत्रापो ह्रस्वत्वमिति**। [7]'स नपुंसकम्' इति प्रकरणात् समाहारद्विगुविषय एव तत्प्रवृत्तिरिति भावः। यदा तर्हि भिक्षशब्देन समासस्तदा ङीप् स्यादित्यत आह — **भिक्षशब्देन त्विति**। **प्रकृतिस्वरपूर्वपद इति**। बहुव्रीहिगर्भो बहुव्रीहिः॥

कुत्सितानि कुत्सनैः २. १. ५३.

(विवरणम्) **इष्यत इति**। तथैव लक्ष्यदर्शनात् प्रत्यासत्तेश्चेति भावः। **आश्रयदोषः** अप्रतिमत्वम्॥

उपमानानि सामान्यवचनैः २. १. ५५.

(विवरणम्) ननूपमानस्वरूपमात्रस्य प्रष्टुमिष्टत्वादेकवचनं कर्तुमुचितमित्यत आह — **सूत्रेति**। **सर्वाश्रयेति**। श्यामत्वजातिमनिच्छद्भिरित्यर्थः[8]। ....
तस्य नित्यत्वेऽपि शुक्लो नष्ट इति प्रतीतिः संबन्धनाशमवगाहते। तेनैकस्मिन् शुक्ले नष्टे जगद-

---

[1] पा. सू. २. २. ५.
[2] परिमापावाचिनोत्तर — मा.
[3] पा. सू. २. २. ५.
[4] पा. सू. ५. ४. ८९.
[5] पा. सू. ४. १. २२.
[6] का. वा. २. ४. ३० — ४.
[7] पा. सू. २. ४. १७.
[8] 'इत्यर्थः' इत्येतदुपरि ग्रन्थपात इति भाति — मा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

शुक्लं स्यादिति पूर्वपक्षः प्रत्युक्तः। अस्मिन् मते शुक्लत्वादिकमेकव्यक्तिवृत्तित्वान्न जातिः। **अथेति**। वस्तुत एव विद्यमानो भेद आधारभेदादत्र सूचित इत्यर्थः। **श्यामत्वस्येति**। श्यामगुणस्येत्यर्थः। **स्ववाचेति**। करणम्, स्वशब्देन शङ्किता, प्रयोजककर्ता तु प्रष्टा बोध्यः। **व्यक्तिगतानां भेदानामिति**। शुक्लादीनामित्यर्थः। तथा च भेदे सति समानधर्मसंबन्ध उपमेत्येतल्लक्षणा[ना]क्रान्तत्वात् 'गौरिव गौः' इत्यादौ नोपमालङ्कारः, किं त्वनन्वय इत्युक्तमालङ्कारिकैः। **गुणजातेरिति**। गुणत्वावान्तरजातेरित्यर्थः। **परिच्छेदवशादिति**। तत्तारतम्यादिति भावः। [1]**पितापुत्रवदिति**। ज्ञानप्रदत्वाद्यत्र पुत्राणामपि पितृव्यवहारः, तद्विषयो दृष्टान्तः, जातिस्मरत्वे जन्मान्तरविषयो वा। **वैयधिकरण्यादिति**। समानाधिकरणेनेत्यधिकाराद् वैयधिकरण्ये समासेन न भाव्यमिति भावः। श्रुत्या प्रकरणं बाध्यतामित्यत आह — **वचनेति**। ननु देवदत्तायां वर्तमानः श्यामशब्दो विशेषवचनत्वात् सामान्यवचनो न भवतीति कथं-तेन समास इत्यत आह — **साधारणेति**। एतच्च प्रतिपादयिष्यत इति हृदयम्। ननु देवदत्ताया देवदत्तशब्देनैवाभिधानमिति किमत्र प्रष्टव्यमित्याशङ्क्य देवदत्तशब्देन तस्या अभिधानेऽपि समासेनाभिधानाभावात् सामानाधिकरण्यं न प्राप्नोतीति चोद्यमित्यभिप्रेत्य समासेनाभिधानाभावे हेतुमाह — **पूर्वेति**। 'समासेन' इत्यनुपपन्नम्। यद्यपि चित्रगोशब्दयोरसमासे विशिष्टयां गवि वर्तमानयोः समासे तद्वति वृत्तिः, तथाप्यन्यपदार्थे समासविधानात् सा युक्ता। इहोपमेये समासविधानाभावात् तेनोपमेयस्याभिधानायोगादित्यत आह — **स्वाभाविकत्वादिति**। **अश्वकर्णादिवज्जातिविशेषस्येति**। अश्वकर्णादिर्यथा जातिविशेषस्येत्यर्थः। ननु प्रथमानिर्दिष्टत्वाभावादेकविभक्तित्वाभावाच्च कथमुपसर्जनत्वमित्यत आह — **अप्राधान्यादिति**। ननु भवत्वप्रधानस्योपसर्जनस्य ग्रहणे दोषः। शास्त्रीयमेव गृह्यत इत्यत्र का युक्तिः, तत्राह — **ह्रस्वविधाविति**। **कृत्रिममेवेति**। लौकिकसमानाधिकरणमिति बोध्यम्। **न तु लौकिकमपीति**। केवललौकिकमित्यर्थः। **दोषप्रसङ्गादिति**। आचारक्यजन्तप्रकृतिककुमारीशब्दादौ ह्रस्वप्रसङ्गादित्यर्थः। ननु समासानन्तरमुपसर्जनत्वमिति समासात् प्राक् स्त्रीप्रत्ययः क्रियतामित्यत आह — **अत्रोपमानस्येति**। तित्तिरिः पुमान्, कुम्भकपालं क्लीवम्। इदमेवाभिप्रेत्योक्तं [2]प्राक् 'गुणवचनस्याश्रयलिङ्गानुविधायित्वात्' इति। एतेन पुंल्लिङ्गश्यामशब्देन समासे शस्त्रीश्यामो देवदत्त इति रूपसिद्धिर्यत् केनचित् तत्राशङ्कचत सापि प्रत्युक्ता। ननु वर्णद्वये एक उपमानवर्ती, द्वितीय उपमेयवर्ती। तत्रोपमानवर्णवाची कल्माषशब्द उपसर्जनम्, उपमेयवर्णवाची तु समास इत्यनुपसर्जनात् ङीब्ङीषौ भविष्यत इत्यत आह — **सत्यपीति**। अथवा [3]'श्येण्या च शलल्या' इत्यादिसिद्धये [4]'वर्णादनुदात्तात्' [5]'अन्यतो ङीष्' इत्यनयोरनुपसर्जनत्वस्य तदन्तविशेषणत्वात् समासोत्तरं स्त्रीप्रत्यय इत्याशयः। **उपमानस्वरमिति**। [6]'तत्पुरुषे तुल्यार्थ' इति पूर्वपदप्रकृतिस्वरमित्यर्थः। एवं च 'तित्तिरिकल्माषी' इत्यत्रैव दोष इति भावः। **गुणो न निर्दिष्टः स्यादिति**। एवं च श्यामाशब्दस्य सामान्यवचनत्वाभाव इत्यपि बोध्यम्। [7]'जातेश्च' इति प्रतिषेधात् कथं पुंवद्भाव इत्यत आह — **पुंवत्कर्मेति**। **मृगचपलेति भविष्यतीति**। मृगीव चपलेति त्वव्यविकन्यायाद्[8] वाक्यमेवेति भावः। भाष्ये **अपेक्ष्यं स्यादिति**। तत्त्वेन बो-

---

[1] प्रदीपे 'पितापुत्रादिव्यवहारवत्' इति दृश्यते। अतः 'पितापुत्रादिव्यवहारवदिति' इति युक्तं भाति।

[2] प्रदीप इत्यर्थः।

[3] आपस्तम्बगृह्यसूत्रे चतुर्दशखण्डे सूत्रम् ३.

[4] पा. सू. ४. १. ३९.

[5] पा. सू. ४. १. ४०.

[6] पा. सू. ६. २. २.

[7] पा. सू. ६. ३. ४१.

[8] अयं न्यायो महाभाष्ये ४. १. ८८. सूत्रे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

धार्थमिति भावः। उपमेये वर्तमान उपमानवाची न भवतीति कथम् 'उपमानानि' इति समास इति [न] वाच्यमित्याह — **पूर्वेति**। श्यामशब्दस्य कथं विशेषभाक्त्वमित्यत आह — **शस्त्री-श्यामेति**। ननूभयत्र वर्तमानः श्यामगुण एको न भवतीति कथमुपमेयवर्तिगुणवचनः शब्दः सामान्यवचन इत्यत आह — **शस्त्रीशब्दोपादानेति**। उपमाननिष्ठश्यामगुणगतश्यामत्वावान्तरजात्याधारतयोपमेयनिष्ठश्यामगुणस्य तद्द्वारा तेन सहाभेदेन तद्वाची सामान्यवचन इति भावः। अभेदविवक्षां विनापि सामान्यवचनत्वं सुसाधमित्याह — **तत्रेति**। **सादृश्यमिति**। अवान्तरसामान्यमित्यर्थः। पूर्वोक्तप्रकारेण वा सामान्यवचनत्वं ज्ञेयमित्याह — **गुणो वेति**। द्वयोर्वृत्तिर्द्विवृत्तिः, [1]तया भिन्न इत्यर्थः॥

उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २. १. ५६.

(विवरणम्) एतदिति। इवघटितं वाक्यम्। **यदा त्विति**। इवशब्दस्तु तद्गतोपमानत्वद्योतक इति बोध्यम्॥

विशेषणं विशेष्येण बहुलम् २. १. ५७.

(विवरणम्) ननु 'विशेषणविशेष्ययोः' इति किमपेक्षा षष्ठी। उपसर्जनाप्रसिद्धिरित्येतदपेक्षा चेत्, इष्टापादनं तर्हि स्यात्, नाप्युभयोरुपसर्जनसंज्ञेष्यते। उभय[विशेषणत्वादित्येतदपेक्षा चेत् तत्र किमुभयापेक्षया, उत विशेषणत्वादित्येतदपेक्षया। आद्ये उभयशब्दस्य] विशेषणत्वादित्यनेनासमासप्रसङ्गः। न द्वितीयः, उभयस्य विशेषणत्वादिति समासे विशेषणत्वस्योभयसंबन्धित्वेन विशेषणविशेष्यसंबन्धित्वाभावात् तदपेक्षया षष्ठ्ययोगादित्यत आह — **उभयापेक्षेति**। विशेषणविशेष्ययोरुभयत्वं चेत् तदोभयोरुपसर्जनत्वादुपसर्जनाप्रसिद्धिरिति दूषणं व्याहतमित्याह — **विशेषणेति**। व्यावर्तकं विशेषणं व्यावर्त्यं विशेष्यमुच्यते। व्यावर्त्यव्यावर्तकभावश्च परस्परमुभयोरपि विद्यत इत्यव्यवस्था प्राप्नोतीति चोद्यम्। न व्यावर्त्यव्यावर्तकमात्रमिह विशेष्यविशेषणशब्देन विवक्षितम्, किं तु प्रधानाप्रधाने। प्रधानाप्रधानभावश्च व्यवस्थित इत्यभिप्रेत्य वार्तिककृता 'न वा' इत्युक्तम्। तत्रान्यतरशब्दार्थमाह — **अन्यतरस्येति**। **द्रव्यस्य** तिलादिरूपस्य। तिलानां प्राधान्येन विवक्षायां को हेतुरित्यत आह — **ते हीति**। तत्र प्रकरणादिनापेक्षितनिर्ज्ञानं यदा तदा गुणवचनस्य द्रव्यवचनेन सहविवक्षा संभवतीत्यत्राह — **यदि त्विति**। गुणवचनस्याप्रधानत्वात् 'प्रधानशब्दौ' इत्ययुक्तमित्यत आह — **प्रथमान्ताविति**। प्रथमान्तस्य प्राधान्यं प्रधानक्रियायां साक्षादन्वययोग्यत्वाद् बोध्यम्। **एतच्चावयवार्थेति**। विग्रहवाक्याभिप्रायेणेत्यर्थः। समासे तु द्वन्द्वेऽप्येकार्थीभावसत्त्वादुभयोरेकार्थवृत्तित्वमस्त्येवेत्याह — **समुदायार्थापेक्षायामिति**। परिहरति — **उत्पत्तेरित्यादिना**। भाष्ये **अवरुध्येते इति**। प्रयुज्येते इत्यर्थः। किमिति नावश्यकः समावेश इत्यत आह — **यदा प्रथमत इति**। **यदा तु प्रथममिति**। अनेन न केवलं गुणद्रव्यसमभिव्याहारे द्रव्यस्य प्राधान्यमित्येव नियमः, किं तु व्याप्यव्यापकजातिसमभिव्याहारे व्यापकस्य विशेष्यत्वमपीति बोध्यम्। एतदुक्तं भाष्ये 'नावश्यकः' इति। न नियत इति तदर्थः। वृक्षत्वस्य प्राधान्ये हेतुद्वयं 'प्रथमतस्तस्यैवोपलम्भात्' इति 'महाविषयत्वात्' इति

---

[1] 'द्विवृत्तिर्मिन्नोऽपि' इति प्रदीपे दृश्यते। 'द्विवृत्तिभिन्नोऽपि' इति पाठोऽभिमत इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

च। महाविषयत्वमुपपादयति — **वृक्षत्वस्येति**। अस्मिन्नर्थे स्वयमपि चोदितव्यवहारं निदर्शनायोपन्यस्यति — **तथा चेति**॥

पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च २. १. ५८.

(विवरणम्) 'एवमादि' इति भाष्यस्थैवंशब्दार्थमाह — **एतदिति**। पूर्वेषामनुक्रमणं कस्मान्न प्रत्याख्यायत इत्याशङ्क्याह — **पूर्वकालेत्ययमिति**। **ऊह्यमिति**। [1]'दिक्संख्ये' इति नियमात् [2]'तद्धितार्थ' इत्यावश्यकम्, इवार्थान्तर्भाविण समासशक्तये सामान्यवचनैरेवेति नियमाय च [3]'उपमानानि' इति, विशेष्यस्य पूर्वनिपातनियमार्थम् [4]'उपमितम्' इत्यर्थ इति। **यत्र त्विति**। वीरैकादिव्यावृत्तये बहुलग्रहणानुवृत्तेरत्राप्यावश्यकत्वाद् गुणादिसमभिव्याहारे तेनैव पूर्वनिपातनियमसिद्धिरिति भावः। 'अकृत्स्नत्वात्' इत्यत्राकृत्स्नशब्दार्थमाह — **अकृत्स्नप्रतिपत्त्विति**। व्याख्यान्तरमाह — **चतुर्भिरिति**। अत्र पक्षे कृत्स्नादिशब्दैः शब्दमर्यादयैतदर्थालाभादरुचेराह — **अन्ये त्विति**। **कारकमितीति**। प्रवृत्त्यादिमत्त्वेन व्यापकमित्यर्थः। भाष्ये **अवश्यं खल्वपीति**। अवश्यं विकल्पार्थकशब्दप्रयोगे कर्तव्ये पर्यायेषु लाघवगौरवविचारा[भावा]द् वेदे नानाशब्दैर्व्यवहारदर्शनाच्च वेदाङ्गत्वमस्यैवेति ध्वनयितुं वेदव्यवहृतनानाशब्दैर्व्यवहार इत्यर्थः॥

श्रेण्यादयः कृतादिभिः २. १. ५९.

(विवरणम्) 'श्रेण्यादयः पठ्यन्ते' इत्यभिधानं किमर्थमित्यत आह — **अत एवेति**। **नित्यविकल्पितगतीति**। [5]'ऊर्यादिच्वि' इति नित्या च्व्यन्तस्य गतिसंज्ञा, [6]'साक्षात्' इत्यनेन तु वैकल्पिकी प्रसज्यते॥

क्तेन नञ्विशिष्टेनानञ् २. १. ६०.

(विवरणम्) सावधारणाधिक्यवचने विशिष्टशब्दे भिन्नप्रकृतिकत्वे प्राप्तिरेव नास्तीति समानप्रकृतिग्रहणं न कर्तव्यमित्याशङ्क्याह — **विशिष्टशब्दो यदेति**। 'अनञ्' इति प्रतिषेधे क्रियमाणेऽपि नञ्व्यतिरिक्तत्वात् कर्तव्यशब्दस्य 'कर्तव्यमकृतम्' इत्यत्रापि समासः प्राप्नोतीत्यत आह — **न विद्यत इति**। **अर्थभेदमिति**। [7]'शृतं पाके' इत्याद्यर्थविशेषे निपातनेन 'शृतमश्राणम्' इत्यादौ समासाभावाय 'अर्थभेदमकुर्वतः' इति। **[8]कृतेत्वेनापीति**। [9]'शाच्छोरन्यतरस्याम्' इत्यनेन। .....चेत्यादिविग्रहः। **समसंप्रधारणेति**। समयोर्मध्येऽन्यतरस्य **संप्रधारणा** गुणाधिक्यम्। भाष्ये **नाप्यनञ्गितीति**। नञैव विशिष्टेन क्तान्तेन सुबन्तं समस्यत इत्युक्ते क्तान्तप्रकृतिकमेव

---

[1] पा. सू. २. १. ५०.
[2] पा. सू. २. १. ५१.
[3] पा. सू. २. १. ५५.
[4] पा. सू. २. १. ५६.
[5] पा. सू. १. ४. ६१.
[6] पा. सू. १. ४. ७४.
[7] पा. सू. ६. १. २७.
[8] प्रदीपे 'शाच्छोरन्यतरस्यामितीत्वे कृते तदधिकेनापि' इत्यत्र 'कृतेत्वेनापि' इति पाठोऽभिमत इति भाति।
[9] पा. सू. ७. ४. ४१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

लभ्यत इति भावः। **यत्सर्वयेति**। अयं भावः — सूत्रस्थनञ्विशिष्टपदं लक्षणया विसमाप्ति-वचनेत्यर्थपरं व्याख्येयमिति सूत्रेणैव सिध्यतीति ॥

युवा खलतिपलितवलिनजरतीभिः २. १. ६७.

(**विवरणम्**) **नोपपद्यत इति**। न च 'मुखं चन्द्रः' इत्यादौ मुखे चन्द्रत्वाद्यारोपात् सामानाधिकरण्यमिव यूनि जरतीत्वारोपादिना तत् संभवति, वक्ष्यमाणरीत्या गुणारोपस्यावश्यवक्तव्यतया तत्र लिङ्गारोपे गौरवाल्लक्ष्यानुरोधाच्च परिभाषाज्ञापनौचित्यात् ॥

वर्णो वर्णेन २. १. ६९.

(**विवरणम्**) **बुद्धयेति**। वक्ष्यमाणमसंनिहितमपीत्यर्थः। बुद्धिविषयत्वेनैव च प्रत्यक्षता। यद्ययं विचारः प्रत्याख्यानपरः स्यात् तदा 'लक्षणप्रतिपदोक्तयोः' इत्येतदभिधानमयुक्तं स्यादित्यभिप्रेत्याह — **न तावदिति**। किं त्वेतत् सूत्रं तृतीयासमासप्रकरणे कृत्वा 'कृष्णसारङ्गः' इत्यादिस्तृतीयासमासः संपाद्यते, उत यथान्यासं कर्मधारय इति विचार इति भावः। कथं प्रत्याख्यानं भविष्यति, अत्राह — **इहेत्यादिना सिद्ध इत्यन्तेन**। नन्वेतत्सूत्राभावे 'कृष्णसारङ्गः' इत्यादौ सहयोगतृतीयया समासो न सिध्यति, तत्कृतत्वाभावात्, अत आह — **हेतुतृतीयेति**। समासविधावेतप्रतिषेधो नास्तीत्यत आह — **स्वर इति**। नन्वनेन वर्णग्रहणं पूर्वपदप्रकृतिस्वरार्थं चेत् तन्न, [१]'तत्पुरुषे' इत्यनेन पूर्वपदप्रकृतिस्वरस्य सिद्धत्वादित्यत आह — **कृष्णसारङ्ग इत्यादाविति**। कृष्णेनेत्यत्र तृतीया कस्मिन्नर्थ इत्यत आह — **कृष्णेनेति सहयोग इति**। [२]**अनेन समास इति**। हेतुतृतीयायां [३]'तत्कृतार्थेन' इति समासे तु लाक्षणिकत्वात् [४]'अनेते' इति निषेधो न स्यात्। एतेन च 'कृष्णेन सारङ्गः' इति समनन्तरोक्तं भाष्ये सहयोगे तृतीयेत्युक्तम्। [५]'अनेते' इति निषेधस्य प्रयोजनमुक्त्वा वर्णग्रहणस्य व्यावर्त्यमाह — **वर्णेति**। एतशब्द उत्तरपदे वर्णवाचिनः पूर्वपदप्रकृतिस्वरनिषेधादेवावर्णवाचिनः [६]'तत्पुरुषे तुल्यार्थ' इत्यनेन पूर्वपदप्रकृतिस्वरो भवत्येवेत्यर्थः। नन्वेतशब्दस्येणः क्तप्रत्यये व्युत्पादितस्य कृदन्तत्वात् कृदुत्तरपदप्रकृतिस्वरः प्राप्नोतीत्यत आह — **कृत्स्वरस्त्विति**। **अकारकत्वादिति**। नह्येतशब्दं प्रति कारकत्वं हिमस्य, क्रियापेक्षत्वात् तस्य, [नापि] शेषविषये तृतीयाविधानशङ्केति भावः। व्यवच्छेद्यत्वेन प्रयोजको नास्तीत्युक्ते वर्णवाचिनः सत्ताप्रतिपादनमयुक्तमित्यत आह — **इतर इति**। [७]'अनेते' इति निषेधः [८]'तृतीया कर्मणि' इत्यस्यापि कस्मान्न भवतीत्यत आह — [९]**अनेत इति निषेध इति**। ननु 'परत्वात्' इत्ययुक्तम्, असति त्वेतविशेषणे वर्णग्रहणे 'कृष्णेतः' इत्यत्र 'वर्णोऽनेते' इति निषेधप्रवर्तनात् पूर्वपदप्रकृतिस्वरप्राप्त्यभावेन परत्वात् तद्बाधकत्वायोगात्, अत आह — **कृष्णेतेति**। [१०]"निषेधाश्च

---

[१] पा. सू. ६. २. २.

[२] प्रदीपे 'अनेनैव समासः' इत्यत्र एवकाररहितः पाठो निर्णयसागरमुद्रिते।

[३] पा. सू. २. १. ३०.

[४] पा. सू. ६. २. ३.

[५] पा. सू. ६. २. ३.

[६] पा. सू. ६. २. २.

[७] पा. सू. ६. २. ३.

[८] पा. सू. ६. २. ४८.

[९] प्रदीपे 'अनेत इति प्रतिषेधः' इत्यत्र 'अनेत इति निषेधः' इति पाठोऽभिप्रेतः।

[१०] परिभाषा १२१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वलीयांसः' इति न्यायमभिप्रेत्याह — **अथवेति**। कथं समानाधिकरणपक्षस्य ज्यायस्त्वमित्यत आह — **एतदिति**। ननु कथं तत्पुरुषे उभयोः प्राधान्यमुपसर्जनत्वं वा, अत आह — **प्रधानेति**। भाष्ये **इभ्ययुवतिराढ्ययुवतिरिति**। इभ्यत्वादिर्जातिविशेषः। अत एव [1]'जातेरस्त्रीविषयात्' इति सूत्रे 'अयोपधात्' इत्यस्य 'इभ्या क्षत्रिया' इति प्रत्युदाहरणं भाष्ये दत्तमित्याहुः। स्वपदार्थे विधीयमानत्वादन्तरङ्गस्य तत्पुरुषस्यान्यपदार्थे विधीयमानत्वेन बहिरङ्गस्य बहुव्रीहेश्च कथं विप्रतिषेध इत्यत आह — **वार्तिकेति**। **न्यायव्युत्पादनायेति**। प्रत्यासत्त्यादिन्यायेत्यर्थः। विप्रतिषेधप्रकरणादिष्टिरूपत्वं कथं लभ्यमित्यत आह — **प्रत्यासत्तेरिति**। 'कण्ठेकालः' इति बहुव्रीहेरवकाशोऽनुपपन्नः, [2]'बहुव्रीहिः समानाधिकरणानाम्' इति वचनात्, अत आह — **व्यधिकरणानामिति**। ननु शेषविषये बहुव्रीहिर्विधीयते। उपयुक्तादन्यः शेषः, ततश्च तत्पुरुषप्राप्तौ बहुव्रीहेरप्राप्तिरिति कथं विप्रतिषेधोपपत्तिरित्यत आह — [3]**शेषग्रहणे चेति**। 'कदाचित्' इत्ययुक्तम्, सर्वत्र बहुव्रीहिविषये पक्षे कर्मधारयप्रसङ्गादित्यत आह — **विषयेति**। **विषयविशेषः** सर्वधनादिरूपः। **नास्ति वस्तुभेद इति**। क्वचिदित्यतो नार्थभेद इत्यर्थः। कथमिव कर्मधारयो लभ्यतेऽपेक्षितोऽपीत्यत आह — **तदिति**। 'किं प्रयोजनम्' इति पुनःप्रश्नस्य तात्पर्यमाह — **सर्वधनाद्यर्थ इतीति**। सर्वधनाद्यर्थं इत्युक्ते कथं कर्मधारयप्रकृतिभिरित्ययमर्थो लभ्यत इत्यत आह — **मत्वर्थीयेति**। 'यद्युक्तत्वम्' इत्ययुक्तम्, अन्यपदार्थ इत्यनभिधानात् कर्मधारयेण तस्याभिधानायोगादित्यत आह — **सर्वाणीति**। ननु स्वपदार्थमात्रविवक्षायां सर्वत्र कर्मधारय इष्यत एवेत्यत आह — **एतदुक्तमिति**। पक्षान्तरस्वीकारे किं भवतीत्यत आह — **कार्या इति**। ततः किमित्यत आह — **तत्रेति**। नन्विष्टसिद्धये विप्रतिषेधो न युक्त इत्यभिप्रायश्चेत् तन्न, पूर्वोक्तप्रकारेणेष्टसिद्धेर्भावादित्यत आह — **विप्रतिषेधापनयनायेति**। स्वपदार्थाश्रयत्वादन्तरङ्गत्वं कर्मधारयस्य चेद् बहुव्रीहेरपि तथात्वादन्तरङ्गत्वं स्यादित्यत आह — **स्वपदार्थेति**। ननु कर्मधारयस्य स्वपदार्थमात्राश्रयेण विधानादित्ययुक्तम्, सामानाधिकरण्यस्याप्यपेक्षणादित्यत आह — **अन्यपदार्थेति**। 'अस्तु' इत्यभिधानमयुक्तम्, विप्रतिषेधासमर्थनादित्याशङ्क्य तत्फलसाधनात् तदसमर्थनेऽपि न दुष्यतीत्यभिप्रेत्याह — **इतर इति**। [4]**स्वे पदार्थे ह्यसाविति**। प्राधान्येन विवक्षित इति शेषः। कथमन्यपदार्थे सति स्वपदार्थस्य प्राधान्यविवक्षेत्यत आह — **एतदिति**। प्रतिपत्तिलाघवं 'लघुत्वात्' इत्यनेन विवक्षितमित्यभिप्रेत्य विपक्षे तद्गौरवमाह — **यदीति**। भाष्ये **कृष्णसर्पो नाम [सर्प]जातिरिति**। जातिव्यक्त्योरभेदाश्रयेणैतदुक्तम्। ननु समासार्थस्य प्रकर्षश्चेद्विवक्ष्येत ततोऽनुक्तसिद्धः प्राग्वद् बहुव्रीहिरित्यत आह — **अतिशयेनेति**। **समासार्थस्य** लिङ्गसंख्याद्याकाङ्क्षारहितस्य। **सुबन्तेन पदेनेति**। तेन हेतुना लिङ्गसंख्यादिभिः परिसमाप्तार्थस्य प्रकर्षादिसंबन्धसामर्थ्यमिति भावः। **नान्यथेति**। केवलप्रातिपदिकोपस्थाप्येनेत्यर्थः। **प्रतियोगिवस्त्वन्तरापेक्षयेति**। हेतौ तृतीया। **तद्वतोऽपेक्षणादिति**। बहुव्रीह्यातिशायिकयोर्युगपत्प्राप्तिविषये वस्त्राणां तद्वन्तमपेक्ष्य सौक्ष्म्यगुणविषया स्पर्धा भवति। यथा-अस्य सूक्ष्माणि वस्त्राणि, अस्य त्वस्मादतिशयेन सूक्ष्माणीति। एवं च सौक्ष्म्यगुणविषयप्रकर्षस्य विशेषणस्यैव सापेक्षत्वमिति भावः। **अर्थान्तरत्वम्** इष्टिरूपत्वम्। 'यदा हि' इत्यादेः पृथग्ग्रन्थत्वात् पूर्वस्य संबन्धमाशङ्क्याह — [5]**नासाविति**। भाष्ये 'न तर्हि' इत्यादिनेष्टिप्रत्याख्यानं दृढीकृतम्, तद्विवृणोति — **अतिशय-**

---

[1] पा. सू. ४. १. ६३.

[2] का. वा. २. २. २४ — १०.

[3] प्रदीपे 'शेषग्रहणे प्रत्याख्याते' इत्यत्र 'शेषग्रहणे च प्रत्याख्याते' इति पाठोऽभिमतः।

[4] प्रदीपे 'स्वपदार्थे' इत्यत्र 'स्वे पदार्थे' इति पाठोऽभिमत इति भाति।

[5] प्रदीपे 'सा नाश्रीयत इत्यर्थः' इत्यत्र 'नासावाश्रीयत इत्यर्थः' इति पाठोऽभिमतः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

मात्रेति। **द्रव्यस्येति**। तथाचोच्यते—गौर्न स्वरूपेण गौः, नाप्यगौः, गोत्वाभिसंबन्धाद् गौः, इति। **गुणः** परतन्त्रः। कथं पारतन्त्र्यम्, अत आह—**भेदक इति**। **एक एवासाविति**। गुणप्रकर्ष एव द्रव्यप्रकर्ष इत्यर्थः। स च क्वचित् प्रवृत्तिनिमित्तगुणप्रकर्षः, यथा शुक्लतर इत्यादौ। क्वचित् तत्सहचरितगुणप्रकर्षः, यथा गोतर इत्यादौ। क्वचित् तद्घटकगुणप्रकर्षः, यथा प्रकृते। 'नैवान्यस्य' इत्यादिभाष्येणापि पृथग् द्रव्यप्रकर्षाभाव एव प्रतिपाद्यत इति बोध्यम्॥

मयूरव्यंसकादयश्च २. १. ७२.

(विवरणम्) प्रतिपदेति। [1]''तत्पुरुषे तुल्य' इत्युपमानपूर्वपदप्रकृतिस्वरो [2]लक्षणप्रतिपदोक्त-परिभाषया [3]''उपमानानि' इति विहितसमासविषयः, तद्बाधनार्थ इत्यर्थः॥

इति श्रीभाष्यप्रदीपविवरणे द्वितीयस्य प्रथमे तृतीयमाह्निकम्।
॥ पादश्च समाप्तः॥

---

[1] पा. सू. ६. २. २.
[2] परिभाषा ११४.
[3] पा. सू. २. १. ५५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य द्वितीयपादे प्रथममाह्निकम्

अर्धं नपुंसकम् २. २. २.

(**विवरणम्**) 'नपुंसकम्' इत्यभिधानात् कथं 'ग्रामार्धः' इत्यत्र प्राप्तिरित्यत आह — **नपुंसकस्येति**। नपुंसकमित्युपादानं किं समासेऽर्थविशेषप्रतिपत्तये उत समासगतरूपविशेषाय, आहोस्वित् षष्ठीसमासस्यापि प्रतिपत्तये। नाद्य इत्याह — **अव्यवस्थितत्वादिति**। न द्वितीय इत्याह — **कृते चेति**। नपुंसकत्वलक्षणविशेषानवधारणात् तत्कृतरूपविशेषस्याभावादिति भावः। न तृतीयः, उपरितनान्यतरस्यांग्रहणस्येहैव कर्तव्यत्वादिति भावः। नपुंसकार्धशब्दोत्तरपदसमासस्य चेष्टत्वादित्यपि द्रष्टव्यम्। अधिकरणस्याकाशस्य निर्ज्ञातत्वात् प्रश्नानुपपत्तिमाशङ्क्याह — **नपुंसकत्वेति**। पुंल्लिङ्ग एवेति भ्रमं वारयति — **नियमेनेति**। **अपूपार्धमिति**। न ह्ययमर्धशब्दः समप्रविभागे वर्तते, तथा सति षष्ठीसमासापवादैकदेशिसमासेऽर्धशब्दस्य पूर्वनिपातप्रसङ्गः। कथमेवैतत्सिद्धिरित्यत आह — **तदत्रेति**। वस्तुतस्तु 'समप्रविभागे नपुंसकलिङ्गोऽवयववाची पुंल्लिङ्गः' इति भाष्यं यथाश्रुतमेव व्याख्येयम्। अत एवामरसिंहेनापि [1]"भित्तं शकलखण्डे वा पुंस्यर्धः' इत्यवयवे पुंस्त्वमुक्त्वा 'अर्धं समेंऽशके' इत्युक्तम्। तत्र 'वा पुंसि' इति पूर्वान्वयी, 'अर्धः' इति 'अर्धम्' इति रूपभेदात् पुंनपुंसकत्वे। न च समप्रविभागे नित्यनपुंसकत्वे [2]"एओङ्' [3]"एच इक्' इति सूत्रयोः 'नैव लोके नापि वेदेऽर्ध एकारोऽर्ध ओकारो वास्ति' इति भाष्यप्रयोगविरोधः, समांशस्याप्यवयवत्वानपायात् तदभिप्रायेण तथा प्रयोगात्। नाप्यवयववाचिनो नित्यपुंस्त्वे 'अपूपार्धम्' इत्यादिप्रयोगविरोधः, समप्रविभागत्वारोपेण सति संभवे तथा प्रयोगात्। षष्ठीसमासस्त्वेकदेशिसमासविषय इष्यत एव, [4]"प्रेम्णा शरीरार्धहरां हरस्य' इति कालिदासप्रयोगात्। स्पष्टं चेदं [5]"परवल्लिङ्गम्' इति सूत्रभाष्ये। इममर्थं गूढाभिसंधिराह — **निर्देशादेवेति**। एतेनावयववाचिनोऽपि नपुंसकत्वोक्त्या द्वयोः सामान्येन ग्रहणं स्यादिति तद्व्यावृत्तये नपुंसकमित्युक्तमित्यपास्तम्। अवयववाचिनो नपुंसकत्वाभावात्। **लिङ्गाविवक्षाया इति**। तेन [6]"सर्वादीनि सर्वनामानि' इत्यादौ नपुंसकानामेव ग्रहणमिति नियमो न भवतीति भावः॥

द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् २. २. ३.

(**विवरणम्**) **यद्यपूर्व इति**। [7]"दिक्पूर्वपदात्' इत्यत्र 'असंयोगोपधात्' इत्यादीनामनुवृत्तौ प्रतिपत्तिगौरवमिति भावः। **न तु तदधिकारेति**। तदधिकारविहितप्रत्ययग्रहणे च 'भिक्षाद्वितीयम्' इत्यादौ षष्ठीसमासप्रापणेनान्यतरस्यांग्रहणस्य चरितार्थत्वात् 'भिक्षाचतुर्थम्' इत्यादि न स्यात्। तस्मात् [8]"पूरण' इत्यर्थग्रहणमेवेति भावः॥

---

[1] अमरकोशे प्रथमकाण्डे दिग्वर्गे श्लो. १६.
[2] माहेश्वरसूत्रम् ३.
[3] पा. सू. १. १. ४८.
[4] कुमारसंभवे सर्ग १ श्लो० ५०.
[5] पा. सू. २. ४. २६.
[6] पा. सू. १. १. २७.
[7] पा. सू. ४. १. ६०.
[8] पा. सू. २. २. ११.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्राप्तापन्ने च द्वितीयया २. २. ४.

(**विवरणम्**) **विषयसप्तमीति**। प्राप्तापन्नस्थानिकोऽकारो भवतीत्यर्थः संपद्यते। नन्वस्मिन् पक्षे प्रथमानिर्दिष्टत्वाभावादुपसर्जनसंज्ञा न प्राप्नोतीत्यत आह — **सुबिति चेति**। **सूत्रेति**। यदि द्वितीयान्तः पूर्वं निपतेत् ततः [1]"द्वितीया श्रित' इत्यनेनैव सिद्धत्वात् सूत्रमेतदनर्थकं स्यादित्यर्थः। 'प्राप्तो जीविकाम्' इत्यत्र समाससिद्धये प्राप्तशब्दो निर्दिष्ट इति वक्तव्यम्। तथा च कथं प्राप्ताशब्दस्य जीविकाशब्देन समास इत्यत आह — **लिङ्गेति**॥

कालाः परिमाणिना २. २. ५.

(**विवरणम्**) इह यद्यपि मासो जातोऽस्येति बहुव्रीहिणापि 'मासजातः' इति सिद्धम्। [2]"निष्ठा' इति पूर्वनिपातस्तु [3]"जातिकालसुखादिभ्यः परा निष्ठा वाच्या' इति प्रतिषिद्धः। [4]"जातिकालसुखादिभ्योऽनाच्छादनात् क्तोऽकृतमितप्रतिपन्नाः' इत्यनेनान्तोदात्तविधानात् स्वरे विशेषो नास्ति, तथापि [5]"वा जाते' इति विशेषविधानाद् विकल्पेनान्तोदात्तत्वं प्राप्नोति। इष्यते तु नित्यमिति। तदर्थमिदं सूत्रमित्याहुः। **इहेति**। वाक्येनाभिधाने प्राप्ते समासारम्भादिति भावः। **अन्येति**। षष्ठीपरित्यागेन प्रथमोपादानमित्यर्थः। ननु संबन्धस्य निवृत्तौ नैव संबन्धो भासेत, अत आह — **संबन्धस्येति**। यदि निवृत्तः संबन्धः, कथम् 'अभिहितः' इत्युच्यते, तत्राह — **अनुद्भूतोऽपीति**। यत्तु वृत्तिवाक्ययोर्गुणप्रधानभाववैपरीत्यमुक्तम्, तत्राह —, **इहेति**। जातस्य मासः परिमाणमिति वदन् प्रष्टव्यः — किं पिण्डस्य कर्तुः प्रत्ययार्थस्य, उत सत्तायाः, आहोस्वित् प्रकृत्यर्थस्य जन्मनः। आद्यं निरस्यति — **तस्येति**। द्वितीयं निरस्यति — **नापीति**। तृतीयमपनयति — **नापि जन्मेति**। ननु कालस्य मासः परिमाणं चेत् कथं 'त्रिंशद्रात्रस्य' इत्युक्तम्, अत आह — **स चेति**। ततश्च त्रिंशद्रात्रात्मना परिच्छिद्यमानस्य कालस्येति भाष्यार्थः। **एतदेवेति**। यद् येन परिच्छिद्यते तत् तस्य परिमाणमित्येतदेवेत्यर्थः। ननु कालशब्देन कालविशेषस्य मासादेरभिधाने परिमाणशब्देन कालशब्दस्य बहुव्रीहिर्वाच्यः। तथा च समासार्थं उपसर्जनीभूतस्य सर्वनाम्ना परामर्शोऽयुक्त आपद्येत, अत आह — **कालशब्देनेति**। नन्वेवं सति 'यस्य' इत्येतदपेक्षमाणस्य कालशब्दस्य परिमाणशब्देनासमर्थसमासः स्यादित्यत आह — **अथवेति**। उपसर्जनीभूतस्य तु सर्वनाम्ना परामर्शः [6]"केषां शब्दानाम्' इत्यत्र प्रतिपादित इति भावः। 'कं पुनः' इति प्रष्टुः सिद्धान्तिनोऽभिप्रायमाह — **यदीत्यादिना**। उपाधिशब्देन सूर्यगत्याद्यभिधानं 'जातमपि' इत्येतच्च प्रतिपादयिष्यते। **प्रत्ययान्तराविशेष इति**। कारणान्तराविशेष इत्यर्थः। **इत्याहेति**। इत्यत आहेत्यर्थः। **तस्यात्मेति**। कालस्य स्वरूपमित्यर्थः। **भेदैः** सूर्यगत्यादिभिरित्यर्थः। स्वत एव किं न स्यादित्यत आह — **न हीति**। स्वतो भिन्नं वस्तु न किंचन, नाप्यभिन्नत्वेनेह प्रतीतिः, तद्वतो भेदानिरूपणाच्चेति भावः। एकत्वादिव्यवहारः सर्वोऽपि परोपाधिक एव, न भेदव्यवहार एवेत्याह — **नैक इति**। 'तस्यात्मा' इत्युक्तं विवृणोति — **संसर्गिणामिति**। **जातस्येति**। जननक्रियाक्षणस्य वर्तमानक्षणादिरवधिर्मासेन **परिच्छिद्यते** अवगम्यते। **परिमाणम्**

---

[1] पा. सू. २. १. २४.
[2] पा. सू. २. २. ३६.
[3] का. वा. २. २. ३६–१.
[4] पा. सू. ६. २. १७०.
[5] पा. सू. ६. २. १७१.
[6] महाभाष्ये पस्पशाह्निकारम्भः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

एकत्वम्। **स्वभावत इति**। प्रातिपदिकार्थस्य तथाभूतत्वादित्यर्थः। 'द्विमासजातः' इत्यादौ तु वस्त्वन्तरापेक्षालक्षणोपाधिना **भूतां निष्पन्नां संख्यां** द्वित्वादिकामाश्रित्य मासादिः **भेदेन** द्वित्वादि-विशिष्टत्वेन वर्तत इत्यर्थः॥

नञ् २. २. ६.

(विवरणम्) असत्सामान्यमिति। अभावो भेदः, तस्यासत्त्वं निरूपयितुमशक्यत्वात्। तथा हि — भिन्नाभ्यां हि धर्मिप्रतियोगिभ्यां स निरूप्यः। तत्रायमेव स चेदात्माश्रयः, अन्यश्चेदन्यो-न्याश्रयः, तृतीयादेरन्यस्य स्वीकारे चक्रकमनवस्था चेति तन्त्रान्तरे स्फुटम्। सामान्यत्वं च केवला-न्वयित्वात्। **तद्वृत्तिः** तद्वद्वृत्तिः। एवं च ब्राह्मणभिन्न इत्यर्थः फलितः। नञ्प्रयोगे सति कथं ब्राह्मणमात्रस्यानयनमित्यत आह — **अनियतेति**। **न्यासभेदेनेति**। [1]"परवल्लिङ्गं द्वन्द्वैकदेशिनोः' इति न्यासान्तरेणेत्यर्थः। **अब्राह्मणको देश इत्यादीति**। कप्प्रत्ययाभावादिति भावः। अपरि-तोषाद् भाष्ये पक्षान्तरपरिग्रह इति दर्शयितुमस्मिन् पक्षे दोषं दर्शयति — **अत्रापीति**। 'अनेकम्' इत्यत्रैकवचनासिद्धिरूपं तु दोषं भाष्यकारः स्वयमेव वक्ष्यति। पाणिनेरप्युत्तरपदार्थप्रधानपक्ष एवाभिमत इत्याह — **एतत्तदोरिति**। **अर्थद्वारेणेति**। पञ्चमीनिर्देशे कर्तव्ये षष्ठीनिर्देशादर्थ-द्वारेण संबन्धिन इति लभ्यते। नञ् शब्दः, कथं तद्विशिष्टस्य क्षत्रियादेरानयनमित्यत आह — **आरोपितेति**। मुख्यं ब्राह्मण्यं गृहीत्वा चोद्यमित्यभिप्रेत्याह — **भावाभावयोरिति**। ननु ब्राह्मण-शब्दस्यार्थनिवृत्तौ तस्य प्रयोगो न स्यादित्यत आह — **निवृत्त इति**। अध्यारोपितब्राह्मण्यं कथ-मवसीयत इत्यत आह — **नञ्द्योतितेति**। **नास्ति नञ इति**। प्रकरणादिकं च तात्पर्यग्राहकं भविष्यतीति भावः। **सोत्प्रासमिति**। सोल्लुण्ठनम्, निरर्थकमिति यावत्। पुनर्दार्ढ्यायोक्तमेव स्मारयति — **पदार्थशब्देनेति**। इदानीं प्रकारान्तरेणापि नञो द्योतकत्वं प्रतिपादयति — भाष्ये **अथवा सर्व एत इति**। सर्वेषां शब्दानां गुणसमुदाये वृत्तौ यत् फलति तदाह — **तत्रेति**। **अवशिष्टानामिति**। तथा च तद्गुणप्रतिपादनाय [2]ब्राह्मणप्रयोगः, निवृत्तगुणानां निवृत्तिप्रतिपाद-नाय नञ्प्रयोग इत्यर्थः। याजनादयोऽपि ब्राह्मणगुणाः, तत् कथमेतावन्त एवेत्यत आह — **नि-दर्शनायेति**। [3]"कर्तरि च' इति समासप्रतिषेधात् 'ब्राह्मणकारकम्' इति समासायोगमाशङ्क्याह — **शेषेति**। शुक्लावयवान्तरेणासादितं शौक्ल्यं यस्य समुदायस्य तद्रूपारोपेणेत्यर्थः। **आशङ्कनीयमिति**। तथा चासामर्थ्यात् समासो न स्यादिति भावः। संदेहादित्यभिधाय 'अध्यवस्यति' इति कथनम-युक्तमित्यत आह — **संदेहनिमित्तमिति**। 'अर्थैकदेशस्य' इति वक्तव्ये 'अर्थस्य' इत्ययुक्तम्, अत आह — **अयमत्रार्थ इति**। **एकदेशविगमादिति**। एवं चोभयप्रतिपादनायोभयप्रयोग इति भावः। **एतच्च प्रसज्येति**। उत्तरपदार्थस्य क्रियया साक्षादन्वयमात्रेणास्मिन् पक्षे उत्तरपदार्थप्राधान्यं ज्ञेयम्। उत्तरपदार्थप्राधान्यपक्षोक्तदोषप्रतिविधानपरत्वान्न त्वस्मिन् पक्षे निर्भर इत्याह — **पर्युदासे त्विति**। ननु द्वौ नञौ प्रकृतमर्थं गमयत इति न्यायादेकस्यैव सुखस्य प्रतिपत्तिः स्यान्न द्व्यादीनामित्यत आह — **आबाधे चेति**। यदभिप्रायेण 'न न' इत्याद्युक्तं तं दर्शयति — **तस्माद्यत्रेति**। पूर्वविप्रति-षेधापनयनायाह — **तत्र [भाव]प्रत्यय इति**। उत्तरपदार्थप्राधान्ये **प्रकृत्यर्थस्य** ब्राह्मणार्थस्य,

---

[1] महाभाष्यम् २. ४. २६.

[2] ब्राह्मणशब्दप्रयोग इत्यर्थः।

[3] पा. सू. २. २. १६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सापेक्षत्वात् नञर्थरूपविशेषणसाकाङ्क्षत्वात्। **प्रधानस्य** भावप्रत्ययार्थस्य। पूर्वपदार्थस्य प्राधान्ये तु पूर्वविप्रतिषेध इति "तस्य भावः' इति सूत्रे भाष्ये॥

ईषदकृता २. २. ७.

(विवरणम्) ननु जातावीषदर्थान्वियासंभवादेव सिद्धः समासाभाव इत्याशङ्क्याह — **यथेति**॥

षष्ठी २. २. ८.

(विवरणम्) प्रतिषेधन्निषय इति। 'सर्पिषो ज्ञानम्' इत्यादौ। [1]**कृद्योगायामिति।** इध्म-प्रव्रश्चन इत्यादौ। वार्तिकद्वयं प्रत्याख्यातुमाह — **तत्र शेषेति**। 'तत्स्थैः' इति विशेषणोपादानस्य प्रयोजनमाह — **इह केचिदित्यादिना। द्रव्यस्योपरञ्जकत्वेनेति।** द्रव्यं प्रत्यभेदोपचारेण विशेषणत्वेनेत्यर्थः। **निष्कृष्टरूपा इति।** अभेदोपचारमन्तरेण विशेष्या इत्यर्थः। **तस्माद् द्विविधेति।** यद्यपि महदादिशब्दैर्द्रव्येणैकत्वमापन्ना एव गुणा अभिधीयन्त इति त्रिविधेति वक्तव्यम्, प्रकृतोपयोगात्तु 'द्विविध' इत्युक्तमिति द्रष्टव्यम्। शब्दविशेषापेक्षया तत्स्थत्वेनाभिधानं गृहीत्वा शङ्कते — **अथेति। अर्थस्य [च] तत्स्थत्वमिति।** एवं च गुणिपरत्ववाचकशब्दाभाववत्त्वं तात्स्थ्यमिति फलितम्। तीव्रशब्दस्य तत्स्थगुणाभिधायित्वाभावात् समासप्राप्त्यभावमाशङ्क्याह—**यश्चेति**॥

पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन २. २. ११.

(विवरणम्) संख्ययापि गुणत्वात् समासो न प्राप्नोतीत्यत आह — [2]**गोविंशतिरित्यादौ त्विति। शतेति।** 'निष्कशतम्' इत्यादेस्तेन प्रत्ययोऽपि विधीयते ठञ्, स च षष्ठीसमासेन व्युत्पाद्यः, न च संख्यया समासनिषेधे संभवतीति[4] भावः। **आवर्जनवाचीति। आवर्जनम्** आहरणम्, यथा [5]'मरीचिमावर्जितवतीव श्लाघसे' इति दशकुमारचरिते। [6]'आवर्जितानि मया सकलसामाजिकमनांसि' इति च रत्नावल्याम्। नन्वनन्तरत्वात् [7]'लटः शतृ' इत्यनेन विहितयोरेव शतृशानचोः सत्संज्ञेति [8]'द्विषोऽमित्रे' इत्यनेन विहितस्य शतुः सत्संज्ञाभावात् कथं 'चोरस्य द्विषन्' इत्यत्र 'सदव्ययतव्य' इति समासनिषेध इत्यत आह — **तौ सदित्यत्रेति।** लादेशत्वादिरुपाधिः, तदसंबन्धार्थत्वादित्यर्थः। अस्य शतुर्लादेशत्वाभावादाह — **प्रत्याहारेणेति।** अस्योदाहरणत्वं व्यवस्थापयति — **भाष्ये वक्ष्यत्येतदिति। इत्यादीन्यपीति।** पूर्वोत्तरसाहचर्यात् कृदव्ययमेव गृह्यते, [9]'यत्कृतेऽरीन् व्यगृह्णीम' इति भट्टिप्रयोगादिति तु रक्षितः। नैतद् भाष्यानुगृहीतम्, 'अव्यये किमुदाहरणम्? ब्राह्मणस्योच्चैः' इत्युदाहरणविरोधात्॥

---

[1] पा. सू. ५. १. ११९.

[2] प्रदीपे 'कृद्योगाया अपि' इत्यत्र 'कृद्योगायामपि' इति निर्णयसागरमुद्रिते पाठः।

[3] प्रदीपे 'गोविंशतिरित्यादौ' इति तुशब्दरहितपाठ उपलभ्यते।

[4] 'सः' इति पूर्ववाक्यादनुषङ्गः।

[5] दशकुमारचरिते द्वितीयोच्छ्वासे.

[6] रत्नावली. प्रथमाङ्के नान्द्यन्ते.

[7] पा. सू. ३. २. १२४.

[8] पा. सू. ३. २. १३१.

[9] भट्टिकाव्यम् सर्ग १७ श्लो. २३.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

कर्मणि च २. २. १४.

(**विवरणम्**) **क्वचित्तु तृजकाभ्यामिति**। [1]'तृजकाभ्याम्' इत्यस्य कर्त्रर्थतृजकाभ्यामित्यर्थे इदम्। [2]'कर्तरि च' इत्यस्यैवायमर्थ इति वृत्तिमतेऽप्याह — **कर्तरि चेति**। अन्यैस्त्वनुपपदकृदन्तैः शेषषष्ठ्या समासो भवत्येव गङ्गाधरभूधरादौ। स्वरेऽपि न विशेषः, उभयथाप्यन्तोदात्तत्वात्। **तत्र सामर्थ्यादिति**। तृजकाभ्यां कर्तुरभिहितत्वेन तत्र षष्ठ्ययोगादिति भावः। ननु ब्राह्मणस्येति कर्तरि षष्ठ्यां साक्षात् 'भुक्तम्' इत्यनेन सामर्थ्यं संभवतीत्यत आह — **ब्राह्मणस्येति**। **भवति वायिति**। 'ब्राह्मणस्य शुक्लाः' इत्यत्रोक्तो न्यायः। **अतिप्रसङ्ग इति**। अन्यत्राप्येवं न्यायैः समासापादनसंभवात् तत्रापि प्रतिषेधो वक्तव्य इत्यर्थः॥

कुगतिप्रादयः २. २. १८.

(**विवरणम्**) ननु गतिग्रहणेन प्रादिषु विशेष्यमाणेषु कर्मप्रवचनीयानां प्राप्तिरेव नास्तीत्यनर्थकः प्रतिषेध इत्यत आह — **प्रादिग्रहणस्येति**। निष्कौशाम्बिरित्यादौ। **प्रत्यादयः** [3]'लक्षणेत्थंभूत' इति सूत्रे निर्दिष्टाः। **द्वितीयेति**। [4]'कर्मप्रवचनीययुक्ते द्वितीया' इत्यत्र युक्तग्रहणादिति भावः। **तथा चेति**। अव्ययपूर्वपदप्रकृतिस्वरे सति मन्द्रशब्दस्य पृथगुदात्तत्वं न स्यादिति भावः। यद्यपि वेदे आपाद्यं रूपं नास्ति, तथाप्येवंजातीयके लौकिकप्रयोगे दोष इत्यर्थः। **सामर्थ्यमेव नास्तीति**। एकक्रियान्वयित्वरूपसामर्थ्यग्रहणे 'कृतः सर्वो मृत्तिकया' इत्यादौ समासापत्तिरिति भावः। अनिन्दायां दुष्कृतमित्यादौ क्रियायोगे कथं समास इत्यत आह — **प्रादिग्रहणेनेति**। [5]'आबद्धम्' इत्यादावीषदर्थाभावे कथं समास इत्याशङ्क्याह — **क्रियायोग इति**। 'दुर्निन्दायाम्' इत्यनन्तरमेव वार्तिकं कस्मान्न कृतमित्यत आह — **प्रशस्तेऽपीति**। पृथ्वीवाचिकुशब्दनिवृत्तये 'पापार्थे' इति विवक्षितं चेत् कथमीषदर्थे 'कालवणम्' इति समास इत्यत आह — **ईषदर्थ इति**। 'सह' इति योगविभागेन सिद्धे इदं व्यर्थम्, अत आह — **सह सुपेत्यत्रेति**। एतेन नित्यार्थमिदमित्यपास्तम्, तद्भाष्यप्रामाण्येनेह वार्तिकेषु नित्यग्रहणासंबन्धादिति भावः। 'पुनर्गवः' इति समासान्तः, टजिति योगविभागात्। **त्रयाणामिति**। गतिविशिष्टतिङन्तेनाव्ययस्य समासविधानादित्यर्थः। 'उदात्तवता' इत्यनेन तु न विना समासः, निघाते तस्योदात्तत्वा[माव]दिति भावः। **तत्पुरुषे तुल्यार्थेति**। 'समपादः' इत्यादौ पूर्वपदप्रकृतिस्वरेण पूर्वपदानुदात्तत्ववाराणायोदात्तस्वरितग्रहणानुवृत्त्या तद्योगिपूर्वपदस्यैव [6]'बहुव्रीहौ प्रकृत्या' इत्यत्र ग्रहणादिति भावः। **पूर्वपदत्वाभावादिति**। [7]विनाचलदित्यस्य न समासः, किं तु विविशिष्टेनानोरित्याशयः। अन्यथा वेरुदात्तत्वे उदात्तयणः परत्वादकारस्य स्वरितत्वं स्यादिति भावः॥

उपपदमतिङ् २. २. १९.

(**विवरणम्**) **उपग्रहः** कर्त्रभिप्रायत्वादिः, पुरुषस्तु प्रत्यक्त्वादिरिति भेदः। गतशब्दस्य क्रिया-

---

[1] पा. सू. २. २. १५.
[2] पा. सू. २. २. १६.
[3] पा. सू. १. ४. ९०.
[4] पा. सू. २. ३. ८.
[5] आकडार इत्यादौ— मा.
[6] पा. सू. ६. २. १.
[7] विना, अचलदित्यस्येति छेदः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

वाचित्वं नास्तीति कथं निषेध इत्यत आह — **अत्र चेति**। यदुक्तं प्रकृतिवाच्यक्रियाश्रयः प्रतिषेध इति, तत्राह — **सुबन्तेति**। ननु तथापि क्रियाविशिष्टद्रव्यवाचीति वक्तव्यम्, न द्रव्यवाचीति, अत आह — **प्रधानेन चेति**। क्रियावाचित्वाभावात् 'अतिङ' इति निषेधाप्रवृत्तावुपपदत्वात् समासः कस्मान्न भवतीत्यत आह — **अत एवेति**। **प्रत्ययोत्पत्तिरिति**। [1]"तुमुन्ण्वुलौ" इत्यत्र क्रियायामिति क्रियावाचकस्यैवोपपदत्वात्। अन्वर्थाभावेऽपि सामर्थ्यादिति भावः। 'अतिङ' इति निषेधेन कथं सुपेत्यस्य निवृत्तिः, तदनिवृत्तौ वा कथं सुबुत्पत्तेः प्राक् कृता समास इत्यत आह — **अतिङ्ग्रहणेन चेति**। 'निवृत्तं सुप्सुपेति' [इति] भाष्यदर्शनात् प्रथमानिर्दिष्टमपि सुब्ग्रहणं निवृत्तमिति भ्राम्येत्, अत आह — **सुब्ग्रहणं त्विति**। **पूर्वपदस्येति**। 'चर्मकारः' इत्यादौ नलोपादिपदकार्यार्थमित्यर्थः। **कृदन्तावस्थायामिति**। 'काष्ठैः पचतितराम्' इत्यादौ समासाभावाय कृद्ग्रहणमावश्यकमिति तु न युक्तम्, बहुलग्रहणेन शानजन्तादिभिरिव तेनापि समासस्य वारयितुं शक्यत्वात्। **ततश्च तन्निबन्धन इति**। [2]"गतिकारकोपपदात् कृत्" इत्यादिना। **धनक्रीतेति**। सुबुत्पत्तेः प्राक् समासे हि करणपूर्वं क्तान्तं प्रातिपदिकमकारान्तं स्त्रियां वर्तत इति [3]"क्रीतात् करणपूर्वात्" इति ङीषि सति 'धनक्रीता' इति न स्यात्। यदा तु सुप्युत्पन्ने समासस्तदान्तरङ्गत्वाट्टापि कृते पश्चात् सुपि समासे च करणपूर्वं क्तान्तमदन्तं स्त्रियां वर्तमानं न भवतीति ङीषभावात् 'धनक्रीता' इति सिध्यतीति भावः। **शाकलप्रतिषेधेति**। [4]"सिन्नित्यसमासयोः" इत्यनेन। ननु यदि पूर्वं धातुः साधनेन युज्यते पश्चादुपसर्गेण [तर्हि] 'आस्यते गुरुणा' इत्यकर्मकः 'उपास्यते गुरुः शिष्येण' इति केन सकर्मकः स्यात्, तथा 'भूयते सुखेन' इत्यकर्मकः 'अनुभूयते सुखं देवदत्तेन' इति केन सकर्मकः स्यादित्यत आह — **अनुभूयत इत्यादिना**। ननु कर्मण्युपपदेऽणा भाव्यम्। न च द्वितीयां विना कर्मोपपदत्वसंभव इति प्राग् द्वितीययोत्पत्तव्यम्। न च तदा षष्ठ्याः प्राप्तिरस्ति, कृदनुत्पत्तेः। यदा कृदुत्पत्तिस्तदोत्पन्ना द्वितीया प्रागिति षष्ठ्याः प्राप्तिर्नास्तीति युगपदुभयप्राप्त्यभावाद्विप्रतिषेधो नोपपद्यत इत्यत आह — **पञ्चक इति**। **तत्रैवेति**। उपपदमित्यन्वर्थतायां तु नाग्रह इत्यस्मादेव भाष्याल्लभ्यत इति भावः। कथं द्वितीयायामुत्पन्नायामणुत्पादनसंभव इत्यत आह — **अपवादेति**। अपवादविषयत्वमेव कथमित्यत आह — **कृते चेति**। **अन्तरङ्गत्वादिति**। [5]"षष्ठी" इति सूत्रे संबन्धसामान्यषष्ठ्यां 'राज्ञः पचति' इत्यादौ समासाभावाय सुपेति तृतीयान्तसंबन्धस्यावश्यकत्वादिति भावः। **दोषाभाव इतीति**। [6]"गतिकारकोपपदात्" इत्यत्र 'गतिकारकोपपदानाम्' इति परिभाषायां च [7]लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इति षष्ठीसमासोऽपि सुबुत्पत्तेः पूर्वमेव। स्वरश्च तस्मिन् समास इत्यन्तरङ्गत्वमेव नास्तीति भावः। [8]"सिन्नित्यसमासयोः" इत्यत्र नित्यग्रहणप्रत्याख्यानादाह — **अन्तोदात्तादुत्तरपदादित्यत्रेति**। एवं च 'अग्निचिता' इत्यादौ विभक्त्युदात्तत्वमपि स्यादिति भावः॥

अमैवाव्ययेन २. २. २०.

(विवरणम्) नन्वेवं वचनवैयर्थ्यम्, अतस्तत्सामर्थ्यात् सुबुत्पत्त्यनन्तरमपि समासो ज्ञाप्यत

---

[1] पा. सू. ३. ३. १०.
[2] पा. सू. ६. २. १३९.
[3] पा. सू. ४. १. ५०.
[4] का. वा. ६. १. १२७–१.
[5] पा. सू. २. २. ८.
[6] पा. सू. ६. २. १३९.
[7] परिभाषा ११४.
[8] का. वा. ६. १. १२७–१.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इत्यत आह — **नियमान्तर इति**। वक्ष्यमाण इति भावः। नन्वमैव सहविधानमुपपदमव्ययेन समस्यत इतीयत्युच्यमानेऽग्रेप्रभृतीनां समासनिवारणेऽप्यलंप्रभृतीनामव्ययकृता समासो न निवारितः स्यादित्यत आह — **एवकारेति**। ततश्चायमर्थः — अमैवाव्ययेन कृतोपपदं समस्यते तच्चामैव सह विधानं चेन्नान्यथेति। 'अप्राप्तविधेः' इति विशेषणस्योपयोगमाह — **यत इत्यादिना**। **निमित्तस्येति**। 'तत्र'ग्रहणादिति भावः। **प्राप्तेति**। आभीक्ष्ण्य इत्यस्यानुवृत्तौ प्राप्तविभाषेति द्रष्टव्यम्। तस्मिश्च सत्येवेत्याद्युक्तेः प्रत्ययोत्पत्तिसंनियोगेनोपपदस्वीकारादिति भावः॥

शेषो बहुव्रीहिः २. २. २३.

(**विवरणम्**) उपयुक्तादन्यः शेषः। **सामान्यं** [1]'सह सुपेत्यादिः, **विशेषः** [2]"द्वितीया श्रित' इत्यादिः। **पूर्वोत्तरेति**। यद्यप्यन्यपदार्थवत् पूर्वोत्तरपदार्थयोस्तद्विधानं नास्मच्छास्त्रे, तथाप्यव्ययीभावादिमहासंज्ञाबलेन पूर्वाचार्यपरिगृहीतार्थस्य निमित्तत्वमस्त्येवेत्यभिप्रायः। [3]"विशेषणं विशेष्येण' इत्यादौ प्रथमाया अप्युपयुक्तत्वम्, अत आह — **द्वितीयादीनामिति**। [4]"प्रादयो गताद्यर्थे प्रथमया' इत्यादि तु व्याख्यानं, न स्वतन्त्रम्। अथवा वार्तिकोक्तं तदिति न तदुपयुक्तमिति भावः॥

इति भाष्यप्रदीपविवरणे द्वितीयस्य द्वितीये प्रथममाह्निकम्।

---

[1] पा. सू. २. १. ४.
[2] पा. सू. २. १. २४.
[3] पा. सू. २. १. ५७.
[4] महाभाष्ये २. १. १८. सूत्रे।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य द्वितीयपादे द्वितीयमाह्निकम्

अनेकमन्यपदार्थे २. २. २४.

(**विवरणम्**) नन्वनेकग्रहणस्य प्रथमस्य प्रयोजनमनभिधायातित्वरितेन[१] कस्मात् पदग्रहणस्य प्रयोजनाभिधानम्, अत आह — **अनेकेति**। ननु तथापि प्रथमातिक्रमे कारणाभावादन्यग्रहणस्यादौ विचारः कर्तुमुचितः, अत आह — **वह्विति**। **वर्तिपदानां चेति**। तेषां सुबन्तत्वादिति भावः। **एतानि पदानीति**। 'समानाधिकरणानाम्' इत्यनपेक्ष्येदम्। वस्तुतोऽर्थपरमेतत्। 'यथा मदीया माता' इत्यत्रातिप्रसङ्ग इति बोध्यम्। 'सुस्नातम्' इत्याद्युपयोगायाह — **अथवेति**। अत्र सर्वत्रान्योऽर्थो व्यञ्जनावृत्त्या गम्यत इति बोध्यम्। भाष्ये पदसमूहमात्रं वाक्यशब्देन गृह्यते। **व्याप्तीति**। पदार्थग्रहणसामर्थ्याद् व्याप्तिन्यायस्यैवानुसरणम्, नान्तरङ्गन्यायस्येत्यर्थः। भाष्ये **राजपुरुषस्तक्षपुरुष इति**। षष्ठीतत्पुरुषकर्मधारययोस्तन्त्रेण निर्देशः। एतेन त्रिकतः शेषे व्यधिकरणानां बहुव्रीहिर्न प्राप्नोतीत्यपास्तम्। 'नैतदस्ति' इत्यादिभाष्यं पदतोऽर्थतो वा शेषः, प्रथमान्तेन च सर्वत्र समास इत्यर्थकं ज्ञेयम्। अन्यथा 'राजानं पुरुषम्' इत्यत्र परिनिष्ठितविभक्त्या समासे सावकाशं तत्पुरुषं बहुपदके सावकाशो बहुव्रीहिर्बाधित्वा प्रथमान्तपदद्वयेन विग्रहे स्वपदार्थेऽपि स्यादिति तद्व्यावृत्तयेऽन्यग्रहणस्यावश्यकत्वात् प्रकृतग्रन्थासंगतिः स्यात्। उत्तरपदे परतः समासविधानस्य ज्ञापकत्वमुपपादयति — **समासेति**। किमिति द्विगुग्रहणमुपलक्षणार्थं व्याख्यायत इत्यत आह — **द्विगुस्त्विति**। तत्र हि [२]'उत्तरपदेन परिमाणिना' इति बहूनां प्रतिपदविहितः समासोऽस्तीति भावः। ननु सत्यप्यनेकग्रहणे सुप् सुपेत्यस्यानुवृत्तौ सुबित्यनेन समानाधिकरणमनेकग्रहणं सर्वान्त्यसुबन्तं विहायान्यस्योपसर्जनसंज्ञां प्रतिपादयेत्, ततश्च चित्रगुरित्यादौ सुपेति तृतीयानिर्दिष्टगोशब्दस्यान्त्यस्योपसर्जनसंज्ञाभावाद्ध्रस्वाप्रसङ्ग इत्यत आह — **सत्यनेकेति**। **यथाकथंचिदिति**। पर्यायेणेत्यर्थः। **अन्यस्य** समासस्य। समासपदाद्यत्किंचिदेकविभक्तिकमित्यर्थः। भाष्ये **अध्याहृत्येति**। ज्ञानविषयीकृत्येत्यर्थः। **पर्यायेणेति**। प्रयोगभेदेनापि यत्रैकविभक्तित्वमेव तत्र यथा स्यादित्यर्थमिति भावः। तदेवं प्रत्यासत्त्यनाश्रयणेन समासापेक्षया विग्रहे यन्नियतविभक्तिकमित्यनेकग्रहणं भाष्यकृता प्रत्याख्यातम्। ज्ञापकक्लेशं परिहर्तुं सूत्रकृता पुनस्तत् कृतमितीह निष्कर्षः। समासव्युत्पादनसमये युगपदुभयं दृश्यत इत्याशङ्क्याह — **लौकिक इति**। [३]'सदव्ययतव्य' इति षष्ठीसमासप्रतिषेधात् 'सर्वपश्चात्' इति समासायोगमाशङ्क्याह — **भाष्येति**। संबन्धाभिधानपक्षे 'चित्रगुर्देवदत्तः' इति सामानाधिकरण्यायोगमाशङ्क्याह — **तत्र यद्यपीति**। संबन्धित्वाविशेषाद् गोगतलिङ्गसंख्ये अपि स्यातामित्याशङ्क्याह — **तत्रेति**। अभेदोपचाराद् द्रव्याभिधानस्योक्तत्वात् 'यदि तर्हि' इति चोद्यायोगमाशङ्क्याह — **यथेति**। एवं च 'कथमभिहितः' इति भाष्यस्य सर्वदेत्यादिर्बोध्यः। **द्रव्यशब्देनेति**। एतत् प्रदर्शितं भाष्ये 'सलिङ्गः ससंख्यश्च' इत्यनेन। **इत्यर्थ [इति]**। स चार्थः प्राधान्याद्विभक्त्यर्थ एव ग्रहीष्यत इति भावः। अर्थग्रहणसामर्थ्याच्च संबन्धादिर्विभक्त्यर्थ आश्रयाभिन्न एव बुध्यत इतीह तत्त्वम्। **समासेनेति**।

---

[१] अतित्वरयेत्यर्थः। भावे क्तान्तो बोध्यः।

[२] का. वा. २. १. ५१-९.

[३] पा. सू. २. २. ११.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

प्रथमा हि प्रातिपदिकार्थसंख्यामात्राभिधायिनीति तत्सूत्रेऽनुवृत्तम् 'अनभिहिते' इति तस्या एव विशेषणमिति भावः। **यथान्यत्रेति**। विरुद्धविभक्त्यपेक्षयानुवादकविभक्तेर्न्याय्यत्वमिति भावः। **अमूर्धेति**। [1]'स्थे च भाषायाम्' इति तु [2]'अनन्तरस्य' इति न्यायात् [3]'तत्पुरुषे कृति' इत्यस्यैव बाधकमिति भावः। **वैयधिकरण्यमिति**। निपातानां वाचकत्वपक्ष इदम्। द्योतकत्वपक्षेऽप्याह — **उत्तरपदेति**। भाष्ये **कष्टं श्रितमनेनेति**। भावक्तान्तादर्शआद्यच्, कर्तरि करणे वा तृतीया। यदि तु कर्तृकर्मणोः क्तः स्यात्तदोत्तरवचनाभ्यां समासः स्यादेव। नापि भावे, असामानाधिकरण्यात् तदप्राप्तेः। **अन्तोदात्तः स्यादिति**। समासस्वरेण। **आद्युदात्तश्चेति**। पूर्वपदप्रकृतिस्वरेणेत्यर्थः। **विशेषणविशेष्यभावाभावात्त्विति**। परिच्छेद्यपरिच्छेदकभावो हि विशेषणविशेष्यभावः। **तथा हि समान इति**। [4]"समाने ब्रह्मणि चरेर्णिनिर्व्रतलोपश्च' इति वचनादिति भावः। ननु समुदायस्य [5]समासार्थत्वेऽवयववचनेन सामानाधिकरण्यं न स्यादित्यत आह — **समुदायावयवानां चेति**। ननु संयोगादिलक्षणसंबन्धेन तद्वत्यन्यपदार्थे समुदायव्यतिरिक्ते बहुव्रीहावयत्नसिद्धमेकवचनमित्यत आह — **द्वयोः पूरण इति**। द्वितीयशब्दस्यावयववचनत्वेनावयविन्येव द्व्यात्मकसमुदायरूपेऽभिधेये बहुव्रीहिर्वक्तव्यः, अन्यथा सापेक्षत्वेन समासाभावप्रसङ्गात्। तस्मिश्चोद्भूतावयवभेदे द्विवचनं प्राप्नोतीत्यर्थः। **द्विवचनप्रसङ्गादिति**। अर्धं तृतीयमनयोरिति विग्रहे द्वित्वसंख्याविशिष्टान्यपदार्थोपादानादिति भावः। **अयमर्थ इति**। न चैवमन्यपदार्थाभावः, उद्भूतावयवभेदस्य समुदायस्य तत्त्वादित्यभिप्रेत्याह — **यथा चेति**। अवयवे द्रोणशब्दानुपपत्तौ को दोष इत्यत आह — **अर्धस्येति**। नन्ववयवो विनाप्यवयविनं च वर्तत इति कथम् 'अर्धद्रोणो द्रोणं न व्यभिचरति' इति, अत आह — **द्रोणेनेति**। अर्धद्रोण इति व्यपदेशो द्रोणेन विना न भवतीत्यर्थः॥

संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये २. २. २५.

(विवरणम्) आत्वाभावादिति। 'द्व्यष्टनः' इत्यात्वस्य बहुव्रीहौ निषेधात्। कथं प्रकृते न्यायसिद्धत्वमित्यत आह — **अयमर्थ इति**। 'अनिर्ज्ञाते' इति भाष्यस्य निश्चयेनाविज्ञात इत्यर्थोऽस्मिन् पक्षे बोध्य इति भावः। केचिदुक्तमते तु परस्परप्रतिक्षेपकत्वं वार्थः। कदाचिद् द्वयोः कदाचित् त्रयाणामित्यनिर्णीतसंख्यार्थकत्वाद्वचनेन बहुवचनं साध्यमित्याशयो ज्ञेयः। **विरुद्धानेकेति**। विकल्पार्थ एव वाशब्दः, क्रियाविषयत्वस्यैव विकल्पः, न तु बोधविषयत्वस्यापि स इति भावः। भाष्ये **द्विदशा इति**। अत्रापि [6]डजात्वाभावाभ्यां बहुव्रीहित्वनिश्चयः। द्वौ दश येषामुन्मुग्धानामिति विग्रहे डजनुपपत्तिः, संख्येये समासावर्तनात्। तस्माद्विग्रहविषय एवात्रापि प्रश्नः। तत्र स्वपदपरित्यागेनास्वपदविग्रहः कस्मादित्यत आह — **अयं भाव इति**। **दशत्वावृत्तीति**। दशत्वावृत्तिजन्मगतेत्यर्थः, क्रियाभ्यावृत्तिगणने कृत्वसुज्विधानात्। **अभ्यावृत्तिसंख्याभिधायीति**। अभ्यावृत्तिजन्मगतसंख्याभिधायीत्यर्थः। **स एवेति**। उपस्य सामीप्यार्थवादी॥

---

[1] पा. सू. ६. ३. २०.
[2] परिभाषा ६२.
[3] पा. सू. ६. ३. १४.
[4] का. वा. ६. ३. ८६–१.
[5] समासार्थत्वे संघिवचनेन — मा.
[6] डच् चात्वाभावश्च, ताभ्यामित्यर्थः।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

तत्र तेनेदमिति सरूपे २. २. २७.

(विवरणम्) क्रियायामित्यनुपादानात् कथं तदभिधानेन सूत्रप्रत्याख्यानमित्यत आह — **इतिकरणादिति**। ननु सूत्र आरब्धेऽपि कथमिवैकशेषो बाधितुं शक्यः, [1]समासस्य कृतेऽप्येकशेषेऽवशिष्टविषयत्वेन संभवादिति शङ्कामेकशेषप्राप्ति प्रतिपादयन् निरस्यति — **केशेष्विति** । **सरूपत्वादिति**। विरूपाणां त्वनभिधानात् समासो नेति भावः। **समूहान्यथानुपपत्त्येति**। सुप् सुपेत्यधिकारात् तस्याः पदसमूहवृत्तित्वादिति भावः। नन्वारब्धेऽप्यस्मिन् परत्वात् [2]'अनेकमन्यपदार्थे' इत्यनेन बहुव्रीहिरेकशेषं बाधित्वा भविष्यतीत्यत आह — **पूर्वेति**। आकारप्रश्लेपाकरणमेव ज्याय इत्याह — **एवं चेति**॥

चार्थे द्वन्द्वः २. २. २९.

(विवरणम्) सूत्रैकदेशानुवादः पक्षान्तरे दोषाभावद्योतनायेत्याह — **यदीति** । सुकृतस्य कथं संतापकत्वं सुखहेतुत्वादित्यत आह — **कृतमिति**। नन्वत्र वैयधिकरण्यात् कथं [3]'क्तेन नञ्' इत्यस्य प्राप्तिः, अत आह — **कर्मसामान्यं चेति**। यत्तु 'कर्मसामान्यमेकमधिकरणम्' इति, तत्राह — **न ह्यत्रेति**। कथं पाणिनीयसूत्रेण युगपदधिकरणवचने द्वन्द्वो लभ्यते, तत्राह — **न्यासेति**। पुराशब्दो भविष्यदर्थेऽतीतेऽपि वर्तते। 'दर्शनीयामाता' इत्यत्र सामानाधिकरण्याभावात् पुंवद्भावाप्राप्तिमाशङ्क्याह — **वृत्ताविति**। **न दोष इति**। अनयैव रीत्या [4]"विरूपाणामपि' इत्येकशेषो वारणीयः। द्वन्द्वारम्भसामर्थ्येन वाक्ये यस्य समानार्थत्वं तस्यैवाश्रयणादिति भावः। द्योशब्दपृथिवीशब्दाभिहितार्थद्वयापेक्षया 'संनमेते' इति द्विवचनमुपपत्स्यत इत्यत्राह — **पृथिवी इतीति**। अन्यवाचकेन कथमन्यस्य विग्रहेऽप्यभिधानमिति शङ्कां निवर्तयन् कैमुतिकन्यायमुपपादयति — **साहचर्यादिति**। समुदायेऽभिधीयमाने कथं 'द्व्यर्थो बह्वर्थश्च' इत्युच्यत इत्यत आह — **उद्भूतेति**। भाष्ये 'प्लक्षोऽपि द्व्यर्थः' इत्यस्यार्थः — द्व्यवयवसमुदायः प्लक्षशब्दवतः समासस्याभिधेयः, इति। एवं 'न्यग्रोधोऽपि' इत्यस्यापि। परो यथोक्तमर्थमजानान एकैकस्यार्थद्वयमुक्तमिति मत्वाह — **यदीति** । अत्रान्तरा युगपदधिकरणवादी सिद्धान्तिनः स्वाभिप्रायप्रकाशनेनावकाशमददत् प्रत्यवतिष्ठते — **तयोरित्यादिनास्तीत्यन्तेन** । सिद्धान्तिनस्त्वभिप्रायप्रकाशनम् 'इयं युगपदधिकरणवचनता' इत्यादिना भविष्यति। **प्रक्षरणमित्यादि**। विस्तारेणावस्थानं प्लक्षशब्दार्थः, स न्यग्रोधे वर्तते। एवमधःशाखावस्थापनं न्यग्रोधपदार्थः, स प्लक्षेऽपि वर्तत इत्यर्थः। न्यग्रोधोऽपि प्लक्षशब्दस्यार्थ इति वदन् प्रष्टव्यः — किमभिधेयः, उत गौणः। नाद्य इत्याह — **न च तत्रेति**। द्वितीयं निरस्यति — **न च गौणेति**। एकैकस्यानेकार्थत्वे प्रतीत्यावृत्तिः स्यात्, न च सा दृश्यत इत्याह — **न चेति**। अर्थापत्तेरन्यथाप्युपपत्तिमाह — **समासस्येति**। 'यदा' इत्यादिना साक्षात्सामर्थ्याभावात् समासो न भविष्यतीत्युक्तम्। एकस्यां क्रियायामन्वयेन दध्योदनादिवत् समासः स्यादिति चेत् तत्राह — [5]**तत्र चेन कृत इति**। सामर्थ्ये सत्यप्याह — **प्रधानेति**। प्राण्यङ्गादीनां समाहार एव द्वन्द्व इत्यादिविषयविभागावगमायाप्येकवद्भावो न वाच्य इत्याह — **न चेति**॥

---

[1] समासस्येत्यस्य संभवादित्यनेनान्वयः।

[2] पा. सू. २. २. २४.

[3] पा. सू. २. १. ६०.

[4] का. वा. १. २. ६४–२२.

[5] तत्र चकृत इति — मा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सप्तमीविशेषणे बहुव्रीहौ २. २. ३५.

(विवरणम्) एवमर्थमेवेति । अल्पाच्त्वाद्धि संख्याशब्दस्य पूर्वनिपाते प्राप्ते शब्दपरविप्रतिषेधार्थमित्यर्थः ॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीश्रीचरण-
विरचिते भाष्यप्रदीपविवरणे द्वितीयस्याध्यायस्य
द्वितीये पादे द्वितीयमाह्निकम्।

॥ पादश्च द्वितीयः समाप्तः ॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य तृतीयपादे प्रथममाह्निकम्

अनभिहिते २. ३. १.

(विवरणम्) अश्वाभिधानीमिति। अभिधीयते बध्यतेऽनयेत्यभिधानी, स्त्रियां करणे ल्युट्। ततोऽश्वस्याभिधानीमिति विगृह्य षष्ठीसमासः[१] **पूर्वोक्तेनेति**। बन्धनाद्यर्थचतुष्टयासंभवाभिप्रायेणेत्यर्थः। **यत्नेनेति**। षष्ठीसमर्थादपत्यार्थेऽणा भाव्यम्। न च षष्ठ्यन्तात् परौ प्रत्ययौ संभवत इति भावः। अविशेषणस्य वर्तिपदार्थस्य संसृष्टत्वे हेतुमाह — **वर्तिपदयोरित्यादिना**। कर्मणीत्यभिधेयप्रतिपादनसप्तम्या कथमेकत्वादीनां विभक्त्यर्थत्वमित्यत आह — **कर्मणि द्वितीयेत्यादीति**। एकत्वादीनामपि [१]"बहुषु बहुवचनम्" इत्यादौ श्रुतत्वात् प्राथम्याच्च तेषां विभक्त्यर्थत्वमिति भावः। एकत्वादीनां विभक्त्यर्थत्वे कर्मादीनामभिधेयतया निमित्तत्वं न संभवतीत्यत आह — **कर्माद्याश्रितानामिति**। विभक्तिमात्रं मा भूदिति न वाच्यमित्याह — **केवलानां चेति**। 'अस्ति खल्वपि' इति भाष्यस्यायमर्थः — प्रकृतिप्रत्ययौ प्रत्ययार्थं प्रकृत्यर्थविशिष्टं सह ब्रूतः। न च कृत इत्यत्र प्रकृतेर्द्रव्यवचनत्वम्, येन तदवच्छिन्नः कर्मविशेष उच्येत। किं तु क्रियावाचिनी प्रकृतिः, ततश्च तया यद्यदाप्तुमिष्टतमं द्रव्यं गुणो वा तत् सर्वं तस्याभिधेयम्। द्वितीया तु प्रातिपदिकाद्विधीयमाना तदर्थावच्छिन्नमेव कर्माभिधत्ते, न त्वनवयवेनेति प्रातिपदिकान्तरार्थावच्छिन्नकर्माभिधानाय ततो द्वितीयोत्पत्तिरिति। **तद्वत इति**। एकत्वविशिष्टे यदेकत्वं तत्र विभक्तिर्वर्तत इत्यर्थः। **अभेदपक्ष इति**। द्वावित्यादौ प्रवृत्तिनिमित्तविशिष्टे द्वित्वाद्यसंभवेनापरितोषादिति भावः। ननु पर्युदासे शक्तिभेदात् सदिक्रियां प्रत्यधिकरणशक्तेरभिहितत्वेऽप्यासिक्रियां प्रत्यधिकरणशक्तेरभिधानाय सप्तमी भविष्यतीत्यत आह — **द्रव्यं चेति**। अर्थापत्तिरपि न तत्र प्रमाणमित्याह — **कार्यं चेति**। **कार्यव्यतिरेकात्** कार्यभेदादित्यर्थः। **सावकाशत्वमिति**। कस्यायं पुरुषः, राज्ञोऽयं पुरुषः, इत्यादौ॥

यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी २. ३. ९.

(विवरणम्) 'अवचनात्' इत्यनुपपन्नम्, वचनाभावेऽशास्त्रीयत्वेन सप्तम्यसाधुत्वप्रसङ्गात्, [२]"सप्तम्यधिकरणे च" इति वचनस्यान्यार्थस्य भावाच्चेत्यत आह — **एतत्सूत्रेति**। **ब्रह्मदत्ताधीना इति चेति**। [३]"सप्तमी शौण्डैः" इति समासे [४]"पुरुषाध्युत्तरपदात्" इति खः। **अधिब्रह्मदत्तमिति चेति**। [५]"अव्ययं विभक्ति" इत्यनेन समासे सतीति भावः। **ईशितव्यस्यापीति**। स्वामिविशेषितसंबन्धे पञ्चालानां ब्रह्मदत्तशब्दादुत्पन्नया सप्तम्या प्रतिपादितेऽपि स्वविशेषितसंबन्धं स्वामिनः प्रतिपादयितुमधिना च कर्मप्रवचनीयेन योगात् पञ्चालेभ्यो द्वितीया प्राप्नोतीति भावः॥

---

[१] पा. सू. १. ४. २१.
[२] पा. सू. २. ३. ३६.
[३] पा. सू. २. १. ४०.
[४] पा. सू. ५. ४. ७.
[५] पा. सू. २. १. ६.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २. ३. १२.

(विवरणम्) अत एव प्रत्याख्यानेन भिन्नफलत्वात् चतुर्थी वेति वक्तव्ये द्वितीयाग्रहणमपवादविषये[ऽपि] द्वितीयाविधानार्थमव्याख्यानीयमिति योजना ।।

मन्यकर्मण्यनादरे विभाषाप्राणिषु २. ३. १७.

(विवरणम्) भाष्ये 'यावत्तीर्णं न नाव्यम्' इत्यादौ यावच्छब्दो यस्मादर्थे ।।

इति भाष्यप्रदीपविवरणे द्वितीयस्य तृतीये प्रथममाह्निकम् ।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य तृतीयपादे द्वितीयमाह्निकम्

कर्तृकरणयोस्तृतीया २. ३. १८.

(विवरणम्) प्रथमा षष्ठी 'वेति[1]। यदा गोत्रशब्देनापत्यस्यैकस्याभिधानं तदा प्रथमा प्राप्नोति, अपत्यसमुदायस्याभिधेयत्वेऽवयवावयविसंबन्धे षष्ठी प्राप्नोतीत्यर्थः। **पञ्चक इति**। [2]'संख्याया अतिशदन्तायाः कन्' ॥

सहयुक्तेऽप्रधाने २. ३. १९.

(विवरणम्) 'तत्र करण इत्येव' इत्ययुक्तम्, मिश्रणे साधकतमत्वेऽपि वपने तथायुक्ततया परत्वात् कर्मसंज्ञाप्रसङ्गात्, अत आह — **अन्तरङ्गत्वादिति**। उभयस्मिन् कर्तरि लादयो भवन्त्वित्यत आह — **तत्रैकेनेति**। ननु प्रकृत्यभिहितक्रिया प्रधानान्विता चेदप्रधानस्य कर्तृत्वाभावात् कथं तृतीयेत्यत आह — **अप्रधानस्येति**। **शिष्येण सहेति**। क्रियाद्वारोपाध्यायस्य शिष्यसाहित्यादिति भावः ॥

हेतौ २. ३. २३.

(विवरणम्) करणाद्धेतोर्विशेषमाह — **योग्यतेति**। अनेकविभक्तिविधानसाम्यात् [3]'सर्वनाम्नः' इत्यत्रेदं पठितुमुचितमित्यत आह — **असर्वनाम्नोऽपीति** ॥

अपादाने पञ्चमी २. ३. २८.

(विवरणम्) अमूर्तस्य ज्ञानस्य कथमपक्रम इत्यत आह — **चक्षुरिति**। सान्तरग्रहणादेर्न विषयदेशगमनं चक्षुष इत्यत आह — **प्राप्येति**। अन्यथा कुड्यादिव्यवहितमपि गृह्येतेति भावः। चक्षुः प्राप्यकारि, इन्द्रियत्वात्, स्पर्श[न]वदिति प्रयोगसंभवाच्चेति भावः ॥

षष्ठ्यतसर्थप्रत्ययेन २. ३. ३०.

(विवरणम्) प्रत्ययग्रहणादर्थग्रहणमिति यत् तत्राह — **नञ्पूर्वस्येति** ॥

---

[1] चेति — मा.

[2] पा. सू. ५. १. २२.

[3] पा. सू. २. ३. २७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

पृथग्विनानानाभिस्तृतीयान्यतरस्याम् २. ३. ३२.

(विवरणम्) 'अनधिकारः' इत्ययुक्तम्, तथा सति [1]"अन्यारादितरर्ते" इत्यादेरसंबद्धत्वप्रसङ्गादित्यत आह — **अन्यारादिति योगादिति** ।।

सप्तम्यधिकरणे च २. ३. ३६.

(विवरणम्) क्तेनाभिहितत्वाद् द्वितीयायाः प्राप्त्यभावमाशङ्क्याह — **यथेति**। कर्मसामान्ये भावे वा क्तस्य विधानात् कर्मविशेषाभिधानाय द्वितीया प्राप्नोतीत्यर्थः। ननु मासस्यापीनन्तं प्रति कर्मत्वात् सप्तमी प्राप्नोतीत्यत आह — **मासमधीतीति** ।।

इति भाष्यप्रदीपविवरणे द्वितीयस्य तृतीये द्वितीयमाह्निकम्।

[1] पा. सू. २. ३. २९.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य तृतीयपादे तृतीयमाह्निकम्

प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २. ३. ४६.

(विवरणम्) ननु सूत्राभावे प्रातिपदिकार्थे प्रथमाविधिः कथमित्याह[1] — **ङ्याप्प्रातिपदिकादिति**। ङ्याप्प्रातिपदिकात् स्वादीनां विधानात् [2]'स्वौजस्' इत्यनेनैव प्रथमा भविष्यतीति योजना। [3]'अनिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवन्ति' इति न्यायात् प्रातिपदिकार्थे सा भविष्यतीत्यभिप्रेत्य 'प्रातिपदिकार्थे' इत्युक्तम्। न च कर्मादिषु प्रथमानिवृत्तये सूत्रमित्यभिप्रेत्य 'विहितानाम्' इत्याद्युक्तम्। कर्मणि द्वितीयैवेत्येवं कर्मादीनां नियतत्वात् प्रातिपदिकार्थ एव प्रथमा भविष्यतीत्यर्थः। न च द्वितीयादीनामनियतत्वात् प्रातिपदिकार्थमात्रेऽपि प्राप्तानां निवृत्तये प्रातिपदिकग्रहणम्, यतः 'प्रथमा' इत्येव यत्र प्रथमा चान्या च प्राप्नोति तत्र प्रथमैव भवतीत्येवं प्रातिपदिकार्थे प्रथमैव भविष्यतीति भावः। **अस्येति**। 'प्रथमा' इत्यस्य, स्वादिविधायकवाक्यस्य वा। **प्रातिपदिकग्रहणात्त्विति**। मात्रग्रहणात् कात्स्न्र्यवचनादिति भावः। अथवा 'अर्थलिङ्गपरिमाणवचनमात्रे' इत्युच्यमाने प्रातिपदिकार्थेऽपि प्राप्नोतीत्यत आह — **ङ्याप्प्रातिपदिकाद् विहितानामित्यादिना**। किमित्युपलक्षणमित्यत आह — [4]**वृक्षकुण्डयोरिति**। **अर्थे कार्यस्येति**। [अर्थ]-परत्वे प्रथमायाः संभवो नास्तीत्यर्थः। **स चेति**। संबन्धिनां त्रयाणां भेदादित्यर्थः। **अनभिहितेति**। इहाधिकृतेनानभिहित इत्यनेन प्रातिपदिकार्थादेः सर्वस्य प्रातिपदिकादिभिरभिहितत्वेन विशेषयितुमशक्यत्वादेकत्वादि विशेषणीयम् — **एकत्वादावनभिहित इति**। ततश्चैकादिशब्दैरेकत्वादेरभिहितत्वात् प्रथमा न प्राप्नोतीत्यर्थः। मात्रग्रहणकरणेन कथमिवोक्तेष्वप्येकत्वादिषु, लक्ष्यावधारणार्थे तस्मिन्नित्यत्राह — **मात्रशब्द इति**। **सामान्यवचन इति**। कात्स्न्र्यवचन इत्यर्थः। एवं तु प्रत्येकमभिसंबन्धार्थस्य द्वन्द्वान्ते श्रूयमाणस्य वैयर्थ्यमाशङ्क्याह — **अन्ये त्विति**। [5]अनपेक्षितः शब्दान्तरार्थसंसर्गेणोपहितः संपादितो [6]विशेषभावो व्यावृत्तिलक्षणविशेषसत्ता यस्येति बहुव्रीहिः। प्रथमाविधानमपि निरवकाशमित्यत आह — **तद्विषय इति**। [7]लङादिविषय एव प्रथमावकाश इत्यर्थः। ननु कर्मण्येव द्वितीयेति प्रत्ययनियमे कर्मादीनामिहाभावाद् द्वितीयाद्यभावे कथमप्रथमासामानाधिकरण्यम्, तदभावे वा कथं शतृशानचौ निमित्तवन्तावित्यत आह — **कर्मणि द्वितीयैवेति**। प्रसज्यप्रतिषेधादर्थनियमे शतृशानचोरप्रवृत्तावप्यविशेषविहितानां द्वितीयादीनां कथं व्यावृत्तिरित्यत आह — **शतृशानचोरिति**॥

षष्ठी शेषे २. ३. ५०.

(विवरणम्) श्रुतायामश्रुतायां वा कारकेभ्यो व्यतिरिक्तः क्रियाकारकपूर्वको यः संबन्धः स

---

[1] इत्यत आहेत्यर्थः।
[2] पा. सू. ४. १. २.
[3] परिभाषा १२२.
[4] प्रदीपे 'वृक्षकुण्डशब्दयोः' इत्यत्र 'वृक्षकुण्डयोः' इति पाठोऽभिमत इति भाति।
[5] नापेक्षितः — मा.
[6] विशेषो व्यावृत्ति — मा.
[7] लिडादिविषय एव — मा.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

षष्ठ्याभिधीयत इति योजना। ननु 'तन्नियमार्थम्' इत्ययुक्तम्, द्वितीयादिप्राप्तौ युगपत् ङ्याप्प्रातिपदिकात् [1]परत्वेन विभक्तिद्वयासंभवेन षष्ठ्यप्रसङ्गाद् युगपत् तत्प्रसङ्गेऽन्यतरनिवर्तनफलपरिसंख्यारूपनियमायोगादित्याशङ्क्य परिसंख्यारूपनियमासंभवेऽप्यप्राप्तांशपरिपूरणफलनियमः [2]संभवतीत्याह — **यथेति**। यागस्य देशविषयं विनासंभवादर्थात् समविषमदेशयोः प्रसङ्गे एकेन चरितार्थत्वात् पर्यायेण प्राप्तौ 'समे देशे यजेत' इति समविधिरर्थाद् विषमनिवारणफलत्वाद् यथा नियमः संपद्यते, तथा षष्ठीविधिरर्थाद् द्वितीयादिनिवारणफलो नियम इति योजना। **गुणेषु व्यतिरिच्यत इति**। गुणेषु पदं न्यस्यतीत्यर्थः। 'क्रियाकृताः' इत्यत्र करोतिरपेक्षाभिधायीत्यभिप्रेत्य वस्त्वर्थमाह — [3]**क्रियापेक्षयेति**। विशेषशब्दार्थमाह — **शक्तय इति**। उपजायन्त इत्येतद्व्याचष्टे — **आश्रीयन्त इति**। कदा व्यभिचरन्तीत्यत्राह — **यदेति**। दृष्टान्तदार्ष्टान्तिकयोः साम्यमाह — **तदेवमिति**। **स्वशब्दैः** करणादिशब्दैरित्यर्थः। **स धर्म इति**। क्रियाविशेषलक्षणः, शक्त्यतिरेकलक्षणो वा॥

अधीगर्थदयेशां कर्मणि २. ३. ५२.

(विवरणम्) कर्मणः कर्माभावादकर्मकत्वं सिद्धम्, करणादीनामकर्मकत्वमपि सिद्धमिति 'कर्मादिषु' इत्ययुक्तमित्यत आह — **आदिशब्द इति**। धातूनां कर्माश्रयत्वं कथमित्यत आह — **द्वितीयेति**॥

द्वितीया ब्राह्मणे २. ३. ६०.

(विवरणम्) ननु शेषत्वेन विवक्षिते षष्ठीति तदविवक्षायां द्वितीया सिद्धेत्यत आह — **अत्र चेति**। [4]'दिवस्तदर्थस्य' इत्यत्र। **पूर्वेति**। [5]'विभाषोपसर्गे' इत्येतत्॥

कर्तृकर्मणोः कृति २. ३. ६५.

(विवरणम्) 'यथोक्तप्रयोजनम्' इति बहुव्रीहिः। धातोरिह कः प्रसङ्ग इत्यत आह — **इह कर्त्रिति**। **अकृतस्त्वव्ययस्येति**। योग इति शेषः। भाष्ये **तस्य कर्मकर्त्रर्थमिति**। [6]अयमर्थः। कृतं पूर्वमनेनेति वाक्ये न काचनानुपपत्तिरित्यत आह — **कृतपूर्वी कटमित्यनेनेत्यर्थ इति**। **विशेषेति**। कृतादिशब्दैः कर्माभिधायिभिः कटादिसमभिव्याहाराद्विशिष्टकर्मसंबन्धेऽनुभूतेऽपि कृतः पूर्वं कटोऽनेनेत्येवमस्यामवस्थायां वृत्त्यभावाद् वृत्तिविषयः कृतशब्दः कर्मसामान्यवचनो भाववचनो वा प्रवर्तते। **एवम्** उक्तप्रकारेण, कर्मविशेषाभिधायित्वाभावे सति तत् क्तान्तं वृत्तिविषयं भावाभिधायि कर्मसामान्याभिधायि वा भवति। ततश्चेनिप्रत्यये सतीनन्ताभिधेयक्रियावता कर्त्रा कटादीनां कर्मविशेषाणां संबन्धो भवति। न चोपसर्जनकरोत्यभिधेयक्रियायां कटादीनां संबन्ध

---

[1] परत्वे च विभक्ति — मा.
[2] संभवतीत्यत आह — मा.
[3] प्रदीपे 'क्रियाफलापेक्षया' इत्यत्र 'क्रियापेक्षया' इति पाठोऽभिमत इति भाति।
[4] पा. सू. २. ३. ५८.
[5] पा. सू. २. ३. ५९.
[6] 'अयमर्थः' इत्यस्यानन्तरं कियांश्चिद् ग्रन्थस्त्रुटित इति भाति। मातृकायां 'कृतं पूर्वमनेनेति' इत्याद्येवोपलभ्यते।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

इति वाच्यम्, यतः **अविग्रहा** विशिष्टग्रहणरहिता प्राधान्येनागृह्यमाणापि गतादिशब्दवाच्यत्वेन स्थिता ग्रामादिकर्मभिः संबध्यते क्रिया तद्वत् कृतपूर्वीत्यादिषु कटादिकर्मसंबन्धित्वेन क्रियाया अवस्थानमित्यर्थः। कृद्ग्रहणेन कथमिवाप्रधानकर्तरि षष्ठी लभ्यते, तस्य विशिष्टप्रत्ययाभिधायित्वात्, अत आह — **करोतीति कृदिति**। प्रयोजकव्यापाराप्यमानतया कर्मत्वात् कर्तृत्वमेव नेति चेत् तत्राह — **गत्यादिसूत्रेति** ॥

उभयप्राप्तौ कर्मणि २. ३. ६६.

(विवरणम्) नञभावात् 'षष्ठ्याः प्रतिषेधे' इत्ययुक्तमित्यत आह — **नियमेनेति** ॥

क्तस्य च वर्तमाने २. ३. ६७.

(विवरणम्) अत्राधिकरण इति। [1]"ध्रौव्यगति' इत्यनेन ॥

न लोकाव्ययनिष्ठाखलर्थतृनाम् २. ३. ६९.

(विवरणम्) सल्लिड्ग्रहण एव वक्तव्ये 'लादेशे' इति किमर्थमुक्तमित्यत आह — **लग्रहणमिति**। तत्स्थाने इदं कर्तव्यमिति द्योतनायेत्यर्थः। इण्णुच्संग्रहार्थमाह — **उकारान्तेति** ॥

कृत्यानां कर्तरि वा २. ३. ७१.

(विवरणम्) भाष्ये अनेन सूत्रेण कर्तृग्रहणात् षष्ठ्यभावेऽपि [2]'कर्तृकर्मणोः' इत्यनेन षष्ठी प्राप्नोतीत्यत उक्तम् — **एवं तर्हि योगेति** ॥

इति श्रीमन्महाभाष्यप्रदीपविवरणे द्वितीयस्य तृतीये तृतीयमाह्निकम्।

॥ पादश्च तृतीयः समाप्तः ॥

---

[1] पा. सू. ३. ४. ७६ [2] पा. सू. २. ३. ६५.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य चतुर्थपादे प्रथममाह्निकम्

द्विगुरेकवचनम् २. ४. १.

(विवरणम्) संख्यैकाश्रयत्वं समाहारस्य भिन्नविभक्त्यन्तवाच्यत्वेऽपि घटत इति न संख्यासामानाधिकरण्यं समाहारशब्दस्य कर्मसाधनत्वे प्रमाणमित्यत आह — **संख्याशब्देनेति**। तेन द्व्यर्थापि संख्या गृह्यते 'द्विपूलीत्येवमादाविति योजना[1]। 'एकशेषप्रतिषेधश्च' इत्ययुक्तम्, 'पञ्चपूल्यः' इत्येकशेषस्येष्टत्वात्। विषयसप्तम्यन्तेन समासस्त्वयुक्तः, लक्षणाभावात्। सुप् सुपेत्यपि न, अगतिकगतित्वादित्यत आह — **एकशेषविषय इति**। 'न हि द्वयोर्बहूनां वा पुरोडाशानां पञ्चसु कपालेषु संस्कारः क्रियते' इत्युक्तन्यायेन पञ्चकपालादौ दोषाभावात् तद्धितार्थद्विगौ किं तदुदाहरणम्, यत्र समाहारग्रहणं विना निवृत्तिः कर्तुं न शक्यत इत्यत आह — **तेनेति**॥

अनुवादे चरणानाम् २. ४. ३.

(विवरणम्) **प्रतिपत्ता** श्रोता। **अद्यतनी** लुङः संज्ञा॥

विशिष्टलिङ्गो नदीदेशोऽग्रामाः २. ४. ७.

(विवरणम्) 'उभयतः' इति व्याचष्टे — **ग्रामनगरेति**। 'ग्रामाणाम्' इत्येतद्व्याचष्टे — **ग्रामसंबन्ध्येवेति**॥

क्षुद्रजन्तवः २. ४. ८.

(विवरणम्) अर्हे कृत्यमुपपादयति — **ये क्षुद्यमाना इति**। एतेन क्षुद्रशब्देऽर्हार्थे रक्प्रत्ययः, तेन जन्तुशब्दस्य कर्मधारय इति ध्वनितम्। [भाष्ये] **स्वं शोणितं नास्तीति**। **यूकाप्रभृतीनाम्**॥

शूद्राणामनिरवसितानाम् २. ४. १०.

(विवरणम्) तृतीयान्तभ्रमं व्यावर्तयति — **एनबन्त इति**। मृतं शवं पान्ति रक्षन्ति करग्रहणायेति मृतपाः, [2]'आतोऽनुपसर्गे कः'॥

गवाश्वप्रभृतीनि च २. ४. ११.

(विवरणम्) द्वन्द्ववृत्तं नाम द्वन्द्वकार्यमित्यभिप्रेत्य व्याचष्टे — **इदं कार्यमिति**॥

---

[1] प्रदीपे 'द्विग्रामी' इत्यत्र 'द्विपूली' इति पाठोऽभिमत इति भाति।

[2] पा. सू. ३. २. ३.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् २. ४. १२.

(विवरणम्) द्वन्द्वप्रकृतिर्वर्तिपदानि, तेषां बहुत्वे त्रिप्रभृतिष्वेव स्यात्, अत आह — **बहव इति**। **जातिरिति**। [1]'जात्याख्यायामेकस्मिन्' इत्यनेनैकस्मिन् बहुवचनप्रयोगे वदराण्यामलकानि चेति विग्रहे इदमुक्तम्। अन्यथा जातिप्राधान्ये तस्या एकत्वान्नित्य एकवचने 'बहुप्रकृतिः' इति वार्तिकोदाहरणस्य [2]'जातिरप्राणिनाम्' इति नित्य एकवद्भाव इति व्याख्यानासंगतिः स्यात्। **अनेन** 'बहुप्रकृतिः' इत्यनेन। अन्यत्रत्यस्यापीह पाठसामर्थ्याद्विकल्पो बहुप्रकृतित्वं चानेन विधीयत इति। अत एव वार्तिकव्याख्यानभाष्ये 'विभाषा' इत्युक्तम्। एतस्य वचनस्य विध्यर्थत्वे एवं स्यात्, नियमार्थत्वं तु 'नियम्यते' इति भाष्येण प्रतीयते, अत आह — **अन्ये त्विति**। वार्तिकव्याख्यानभाष्ये विकल्पो न वाचनिकः, किं तु 'विभाषा वृक्ष' इति सूत्रप्राप्तिविषयानुवादकः। तस्मादेषां य एकवद् भवति, यश्च विभाषैकवद् भवति, स सर्वोऽपि बहुप्रकृतिरेवेति वार्तिकव्याख्यानभाष्यार्थः। एवमेव 'यूकालिक्षाः' इत्यपि भाष्यं व्याख्येयम्। 'हस्त्यश्वाः' इति तु साधुरेवेत्याह — **सेनाङ्गत्वेऽपीति**। इदं च [3]'द्वन्द्वश्च' इति सूत्रेऽविशेषात् सेनाङ्गशब्देन हस्त्यादयस्तदारोहाश्च [4]गृह्यन्त इति पक्षाभिप्रायेण। 'शङ्खतूणवान्' इति [5]'अल्पाच्तरम्' इति सूत्रभाष्यप्रयोगस्तु शङ्खस्यातूर्याङ्गत्वादिति कैयटोक्तदिशा वोध्यः। एवं 'हस्त्यश्वरथपदातिभिः' इति [6]'येन विधिः' इति सूत्रभाष्यप्रयोगो हस्त्यश्वरथेन सहितैः पदातिभिरिति समासाभिप्रायेणेत्याहुः। फलापठनेन प्राप्त्यभावेन संशयायोगादाह — **येषामिति**। 'अश्ववडवयोः' इति पूर्वविप्रतिषेधोपन्यासस्यास्मिन् सूत्रे कः संबन्ध इत्यत आह — **पशुत्वादिति**। एवं चाश्ववडवग्रहणं सूत्रे न कर्तव्यमिति वार्तिककारस्याशयः। भाष्ये **विभाषा पशुद्वन्द्वनपुंसकम्, यदा न पशुद्वन्द्वनपुंसकं स पूर्ववल्लिङ्गस्यावकाशः, अश्ववडवाविति**। न चाश्ववडवयोः सेनाङ्गत्वात् 'फलसेना' इति वार्तिकेन बहुप्रकृतेरेकवद्भावस्य नियमनादेकवद्भावपक्षे बहुवचनस्योदाहर्तुं योग्यत्वाद् द्विवचनोदाहरणानुपपत्तिरिति वाच्यम्, [7]'हस्त्यश्वरथपादातं सेनाङ्गं स्यात्' इति सेनाङ्गलक्षणे स्वाश्रयातिरिक्तार्थेऽविशेषणत्वरूपप्राधान्यस्य तत्तत्प्रवृत्तिनिमित्ते विवक्षितत्वादश्वत्वसमानाधिकरणस्त्रीत्वरूपवडवापदप्रवृत्तिनिमित्तैकदेशेऽश्वत्वे तदभावात्। अत्र चार्थेऽस्यैव भाष्यस्य प्रमाणत्वात्। एतेन [8]"रथवाजिपत्तिकरिणीसमाकुलम्' इत्यादयः प्रयोगा व्याख्याताः। 'अश्ववडवेति प्रतिपदं नपुंसकत्वं विधीयते' इत्ययुक्तम्, एकवद्भावविधानादित्यत्राह — **नात्रेत्यादिना**। पूर्वविप्रतिषेधादश्ववडवग्रहणमेव ज्याय इत्याशयः। **नित्यो विधिरिति**। प्राण्यङ्गादीनां समाहार एवेत्येवं नियमेनैतत्प्रकरणानुपात्तानामेकवद्भावाभाववोधनार्थमिदं प्रकरणं स्यादिति भावः। 'नित्यार्थमित्युक्तम्, वाक्यस्येष्टत्वादित्यत आह — **प्राण्यङ्गादीनामिति**। **व्यतिकरेति**। मृगस्य सेनाङ्गादिना द्वन्द्वनिवृत्त्यर्थमिति केचित् ॥

विभाषा समीपे २. ४. १६.

(विवरणम्) अव्ययीभावस्य सत्त्वप्रधानत्वेऽप्याह — **सत्यपि वेति** ॥

---

[1] पा. सू. १. २. ५८.
[2] पा. सू. २. ४. ६.
[3] पा. सू. २. ४. २.
[4] गृह्यन्ते वेति — मा.
[5] पा. सू. २. २. ३४.
[6] पा. सू. १. १. ७२.
[7] अमरकोशे क्षत्रवर्गे श्लो. ३३.
[8] शिशुपालवधे सर्ग १३. श्लो. १७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २. ४. २६.

(विवरणम्) यदावयवार्थातिरिक्तो द्वन्द्वार्थः स चालिङ्ग इति दर्शनं तदा द्वन्द्वापेक्षया विध्यर्थम्। यदा त्ववयवार्थाविव परस्परापेक्षितौ समासार्थः, यदापि व्यतिरिक्तः स चावयवार्थलिङ्गेन लिङ्गवान् तदा नियमार्थम्। इदं च विध्यर्थत्वनियमार्थत्वपक्षद्वयं षष्ठीनिर्देशेन समासार्थस्य लिङ्गातिदेशे। सप्तमीनिर्देशेन तु पूर्वपदार्थस्य लिङ्गातिदेशे विध्यर्थत्वमेवेति विवेकः। **व्यतिरिक्तसमुदायदर्शनं**[1] **चेति**। स च समुदायोऽवयवार्थलिङ्गेन लिङ्गवानित्यपि [2]द्रष्टव्यम्। **स्वलिङ्गबाधनायेति**। अनेनास्मिन् पक्षेऽपि नियमार्थमिति दर्शितम्। **यणो मय इति**। अत्र मय उत्तरस्य यण इत्यर्थः। समानविभक्त्यन्तविषयत्वात् समानाधिकरणसमासस्य वैयधिकरण्यविषयत्वाच्च षष्ठीसमासस्य युगपदेकत्र प्राप्त्यभावाद्विप्रतिषेधायोगमाशङ्क्याह — **अयमर्थ इति**॥

इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ २. ४. ३२.

(विवरणम्) द्वेष्यावगमे निमित्तमाह — **प्रत्यासत्त्येति**। अन्त्यो मकारश्चेत् 'अकारस्याकारवचने' इति परिहारभाष्यमननुगुणं स्यात्, अत आह — **त्यदादित्वादिति**। भाष्ये 'अकारस्यादेशः' इत्यनेन पररूपादयो विवक्षिताः। **अनुदात्तत्वमात्रमिति**। अनुदात्तत्वे ह्यन्तोदात्तत्वाभावात् [3]'ऊडिदम्' इत्यनेनासर्वनामस्थानविभक्तेरुदात्तत्वाभावे सर्वानुदात्तं पदं भवति। प्रवृत्त्यप्रवृत्तिभ्यां तद्धितवैचित्र्ये हेतुमाह — **महेति**॥

एतदस्त्रतसोस्त्रतसौ चानुदात्तौ २. ४. ३३.

(विवरणम्) **एतावत् सूत्रमिति**। अनुदात्तार्थमित्यर्थः॥

द्वितीयाटौस्स्वेनः २. ४. ३४.

(विवरणम्) ननु [4]'इदमो हः' इति हप्रत्ययेन बाधनात् त्रलोऽभावात् कथमिदमोऽश् त्रलि स्यादित्यत्राह — **इदंशब्दादिति**। अपेक्षाप्यानन्तर्यादेतद एवास्त्विति न वाच्यमित्याह — **अपेक्षा चेति**॥

आर्धधातुके २. ४. ३५.

(विवरणम्) ननु [5]'अचो यत्' इत्यस्य ण्यदुत्सर्ग एव न भवति, तत् कथमुच्यते 'तत्रोत्सर्गलक्षण' इति, तत्राह — **उत्सर्गशब्देनेति**। 'आर्धधातुकासु' इत्ययुक्तम्, [6]'बह्वचोऽन्तोदात्तात्' इति ठञन्तत्वात् ङीपा भाव्यम्, अत आह — **तत्रेति**॥

---

[1] वेति — मा.
[2] द्रष्टव्यः — मा.
[3] पा. सू. ६. १. १७१.
[4] पा. सू. ५. ३. ११.
[5] पा. सू. ३. १. ९७.
[6] पा. सू. ४. ३. ६७.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

हनो वध लिङि २.४.४२.

(विवरणम्) वधेत्यकारान्ते पठ्यमाने कथं संदेह इत्यत्राह — **किं कार्येति**। उपसंख्यानं [1]"वहुलं तणि, अन्नवधक' इत्येतत्॥

गाङ लिटि २.४.४९.

(विवरणम्) 'इणादेशस्यापि' इत्ययुक्तम्, [2]"गातिस्थाघु' इति सिचो लुकि ङित्त्वभाजोऽभावात्, अत आह — **ततश्चेति**। ननु सत्यामित्संज्ञायामुगिल्लक्षणङीम्नुमौ प्राप्नुतः, निरनुनासिकत्वे तूकारस्येत्संज्ञाभावान्न कश्चिद्दोष इत्यत आह — **भुज्विति**॥

चक्षिङः ख्याञ् २.४.५४.

(विवरणम्) णत्वाभाव इति। [3]'कृत्यचः' इत्यनेन। प्रत्ययलक्षणनिषेधात् [4]"अत्वसन्तस्य' इति दीर्घाभावात् 'नृचक्षाः' इत्यनुपपन्नमित्यत आह — [5]**'प्रयोगोऽयमिति**॥

अजेर्व्यघञपोः २.४.५६.

(विवरणम्) प्राप्तिज्ञश्चेदिष्टिप्राप्तिमपि जानातीति 'न त्विष्टिज्ञः' इति व्याहतम्, अत आह — **सौत्रीमिति**। 'देवानांप्रियः'-इति कथं निन्देत्यत्राह — **देवशब्द इति**। **वेञ इति**। निष्ठायां प्रसारणे चेति भावः॥

इति भाष्यप्रदीपविवरणे द्वितीयस्य चतुर्थे प्रथममाह्निकम्।

---

[1] का. वा. २.४.५४–११, १२.
[2] पा. सू. २.४.७७.
[3] पा. सू. ८.४.२९.
[4] पा. सू. ६.४.१४.
[5] प्रदीपे 'प्रयोगश्छान्दसः' इत्यत्र 'प्रयोगोऽयं छान्दसः' इति पाठोऽभिमत इति भाति।

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायस्य चतुर्थपादे द्वितीयमाह्निकम्

तद्राजस्य बहुषु तेनैवास्त्रियाम् २. ४. ६२.

(विवरणम्) बहुत्व उत्पन्नस्य तद्राजादेर्लुग्विधीयते। न च "'प्रियाङ्गाः' इत्यादौ तद्राजस्य बहुषूत्पत्तिरिति लुकः प्राप्त्यभावान्नार्थो निषेधेनेत्यत आह — **इहेति**। बहुवचनस्य प्रत्ययविशेषसंज्ञात्वेन विनियोगात् तदेकदेशस्तत्रासाधुरित्यत आह — **संज्ञानामिति**। न च वर्णात्मकैकदेशस्यापि प्रयोगः स्यादिति वाच्यमित्याह — **पदेति**। 'तेनैव'ग्रहणस्य प्रत्ययग्रहणे लिङ्गत्वमुपपादयति — **अर्थेति**। विचारस्य कोटिद्वयावलम्बित्वात् पक्षान्तरमपि सलिङ्गं दर्शयति — **अस्त्रियामितीति**। समासो बहुव्रीहिरेक एव 'प्रियवाङ्गाः' इत्यादाविति 'समासबहुत्वे' इत्यनुपपन्नमित्यत आह — **समासार्थेति**। बहुत्वस्यैव च निषेधः क्रियत इति भ्रमं वारयति — **अन्येति**। आख्यातद्वयस्यैकस्मिन् वाक्येऽयोगादाह — **एतावदिति**। क्रियमाणेऽपि कर्तव्यमित्यभिधाने किं प्रयोजनमित्यत आह — **बहुवचनेति**। परत्वात् सुपो लुकि कृते बहुवचनपरत्वाभावात् 'बहुवचन इत्येव' इत्यनुपपन्नमित्यत आह — **शसमेवेति**। 'न चात्र' इत्ययुक्तम्, सुब्लुकः प्रागेव तद्राजलुको भावात्, अत आह — **अन्तरङ्गानिति**। अयं लुग् बाधत इत्यन्वयः। तत्र हेतुः — **प्रत्ययोत्तरेति**। लुगन्तरस्य बाधकत्वे इदं ज्ञापकं भवत्विति न वाच्यमित्याह — **अस्यैवेति**। अन्यथाभिधाने सूत्रभेद इति भ्रमं वारयति — **यथास्थितमिति**। बहुषु वर्तमानानां पदानां द्वन्द्वे सौत्रो लुक् सिद्ध इत्यत्राह — **अत्रेति**। न च व्यवहितेऽपि परशब्दो वर्तत इति लुक् सिध्यतीति वाच्यमित्याह — **प्रत्ययेति**। पुनरभिधानेऽत्राङ्ग इत्यतो विशेषमाह — **सुबन्तेनेति**। 'गोत्रस्य' इत्येतद्व्याचष्टे — **अपत्येति**। 'बहुषु लोपिनः' इत्यस्य व्याख्यानम् — **लोपेति**। 'बहुवचनान्तस्य' इत्येतद् व्याचष्टे — **यदेति**। 'प्रवृत्तौ' इत्यादेर्व्याख्यानम् — **युवेति**। प्राप्तस्तदन्तविधिः कथं नाभ्युपगम्येतेत्यत आह — **प्रत्ययादर्शनस्यैवेति**। क्व तर्हि वर्णाश्रये नास्ति प्रत्ययलक्षणमित्यत आह — **अयं भाव इति**। 'प्रथमात्' इत्यभिधानात् प्रथमस्यैवेति कथं लभ्यते, अत आह — **प्रतियोगमिति**। प्राथम्यं च प्रत्ययान्तरापेक्षं न भवतीत्याह — **प्राथमेति**। लौकिकं न भवतीत्युक्ते शास्त्रीयमिति प्रतीतेरित्यत आह — **यद्यपीति**। 'लोप्यलोपिनाम्' इत्यत्र ण्यदन्तत्वभ्रमं वारयति — **लोपभाजामिति**॥

आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् २. ४. ७०.

(विवरणम्) 'आगस्त्यकौण्डिन्ययोर्बहुषु लुग् भवति' इत्ययुक्तम्, अप्रत्ययत्वात् तददर्शनस्य लुक्संज्ञाभावात्, अत आह — **बहुषु वर्तमानयोरिति**। 'प्रकृत्यादेशौ' इति कथं लभ्यते, अत आह — **सामर्थ्येति**॥

गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु २. ४. ७७.

(विवरणम्) ननु पिबादेशो लुङि नास्तीति कथं तत उत्तरस्य सिचो लुग् भवतीत्युच्यते, अत आह — **पिबतेरिति**॥

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

अव्ययादाप्सुपः २.४.८२.

(**विवरणम्**) यस्यां शालायां [इत्यत्रेव] यत्र शालायामित्यादौ त्रकारान्तस्य स्त्रीत्वविशिष्टे वृत्त्यभावेऽपि स्त्रीसमानाधिकरणाट्टाबादयो भवन्तीत्युक्ते टाबाद्युत्पत्तौ तदश्रवणाय लुग् विधेय इत्यत आह — **न चेति**॥

तृतीयासप्तम्योर्बहुलम् २.४.८४.

(**विवरणम्**) 'एकविंशतिभारद्वाजम्' 'त्रिपञ्चाशद्गौतमम्' इत्यत्र [1]'यञञोश्च' इति [2]'भृगु' इति च बहुपूत्पन्नयोरणञोर्लुक् कस्मान्न भवतीत्यत आह — **तत्रेति**। भाष्यकारवचनप्रामाण्यादन्तरङ्गन्यायो विप्र[3]क्रुष्ट ...बाध्यत इति हृदयम्॥

लुटः प्रथमस्य डारौरसः २.४.८५.

(**विवरणम्**) 'श्वः कर्ता' इत्यादावुभयप्राप्त्यभावेन डारौरसामवकाश इत्युपपादयति — **तिबिति**। 'आत्मनेपदानाम्' इत्युक्तेऽतिप्रसङ्गं वारयति — **लुट इति**। भाष्योदाहृतोक्तार्थकानामयमर्थः — परत्वाट्टेरेत्वे कृते पुनः प्रसङ्गविज्ञानाड्डारौरसो भवन्ति, यथेजतुरित्यादौ परत्वात् संप्रसारणे कृते पुनः प्रसङ्गविज्ञानाद् द्विर्वचनं भवति। एवं तावत् पूर्वविप्रतिषेधार्थमात्मनेपदग्रहणं न कर्तव्यमिति स्थितम्। संख्यातानुदेशेनापि प्रयोजनं नास्तीति तदर्थमप्यात्मनेपदग्रहणं न कर्तव्यम्, यस्मात् [4]"स्थानेऽन्तरतमः' इत्यनेनार्थान्तराः सदृशा इति तिबादिस्थाने डादयः सिद्धाः। इमे सूत्रे श्रूयमाणास्त्रय एव डारौरसः प्रथमस्येति प्रत्यायितानां सर्वेषां षण्णां वचनानां भवन्तु, एतेष्वर्थत आन्तर्याद्व्यवस्था भवति। परत्वाट्टेरेत्वम्, तस्मिन् कृते इमेऽपि पुनःप्रसङ्गविज्ञानात् सन्त्विति पूर्वोक्त एवार्थो व्युत्क्रमेण संगृहीतः। [5]"आद्युदात्तश्च' इति प्रत्ययस्वरस्यापवादो लसार्वधातुकानुदात्तत्वं यतस्तेन तत्र शब्दे कदाचित् प्रत्ययस्वरो न प्रवृत्तः। तथा चाविद्यमानोदात्तत्वेनानुदात्तत्वात् 'त' इत्यस्य तदादेशोऽप्यनुदात्तः। अनेन 'यस्मिन्ननुदात्ते' इति लब्धम्। उदात्तलोप इत्येतदु[पपाद]नार्थमाह — **प्रत्ययस्वरश्चेति**। तासेः प्रत्ययस्वरः प्रवृत्तिसंनियोगशिष्टः, तेनासावुदात्त एव लोप्स्यते। तथा सति स्वरे दोषो नास्तीति॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीश्रीचरणविरचितभाष्यप्रदीपविवरणे
द्वितीयस्याध्यायस्य चतुर्थे पादे द्वितीयमाह्निकम्।
॥ पादश्च समाप्तोऽध्यायश्च ॥

---

[1] पा. सू. २.४.६४.
[2] पा. सू. २.४.६५.
[3] 'क्रुष्ट' इत्यस्यानन्तरं ग्रन्थपातो मातृकायाम्।
[4] पा. सू. १.१.५०.
[5] पा. सू. ३.१.३.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

आकरग्रन्थानां सूची

ऋ. सं. — ऋक्संहिता.
का. वा. — कात्यायनवार्तिकम्.
चौ. — चौखाम्बामुद्रितं महाभाष्यं नवाह्निकपर्यन्तं प्रदीपोद्द्योतसहितम्, उपरि प्रदीपमात्रसहितम्.
तै. आ. — तैत्तिरीयारण्यकम्.
तै. ब्रा. — तैत्तिरीयब्राह्मणम्.
तै. सं. — तैत्तिरीयसंहिता.
नि. — निर्णयसागरमुद्रितं महाभाष्यं प्रदीपोद्द्योतसहितम्.
परिभाषा — परिभाषेन्दुशेखरः चौखाम्बा. १९४३ विद्याविलासमुद्रितः ।
पा. शि. — पाणिनीयशिक्षा.
पा. सू. — पाणिनिसूत्रम्.
पू. — पुण्यपत्तन (पूना) प्रकाशितं महाभाष्यम् F. Kielhorn महाशयशोधितम्.
प्रवर्तकीयम् — प्रवर्तकोपाध्यायकृतमहाभाष्यप्रदीपप्रकाशः आस्माकीनकोशालये T. No. 99 अङ्कितः ।
रामायणम् — मद्रपुरी-ला-जर्नल-मुद्रणालये मुद्रितम्
लौ. न्या. — लौकिकन्यायाञ्जलिः
लौ. न्या. साहस्री. — (भुवनेश) लौकिकन्यायसाहस्री.
श. कौ. — शब्दकौस्तुभः
श्लो. वा. — श्लोकवार्तिकम्. महाभाष्यस्थम्.
ह. — हरयाणासाहित्यसंस्थानप्रकाशितं प्रदीपोद्द्योतसहितं महाभाष्यम्.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायप्रथमपादादिचतुर्थपादान्तविषयसूचिका

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१.	समर्थः पदविधिः २. १. १.	...	१
२.	सुबामन्त्रिते पराङ्गवत् स्वरे २. १. २.	...	५१
३.	प्राक् कडारात् समासः २. १. ३.	...	५६
४.	सह सुपा २. १. ४.	...	६०
५.	अव्ययीभावः २. १. ५.	...	६५
६.	अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्द-प्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्त-वचनेषु २. १. ६.	...	६५
७.	यथासादृश्ये २. १. ७.	...	६७
८.	सुप् प्रतिना मात्रार्थे २. १. ९.	...	६८
९.	अक्षशलाकासंख्याः परिणा २. १. १०.	...	६९
१०.	विभाषापपरिबहिरञ्चवः पञ्चम्या २. १. ११–१२.	...	७०
११.	आङ् मर्यादाभिविध्योः २. १. १३.	...	७१
१२.	यस्य चायामः २. १. १६.	...	७२
१३.	तिष्ठद्गुप्रभृतीनि च २. १. १७.	...	७३
१४.	पारेमध्ये षष्ठ्या वा २. १. १८.	...	७४
१५.	नदीभिश्च २. १. २०.	...	७६
१६.	द्विगुश्च २. १. २३.	...	७८
१७.	द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २. १. २४.	...	७९
१८.	खट्वा क्षेपे २. १. १६.	...	८१
१९.	अत्यन्तसंयोगे च २. १. २९.	...	८१
२०.	तृतीया तत्कृतार्थेन गुणवचनेन २. १. ३०.	...	८१
२१.	पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः २. १. ३१.	...	८३
२२.	कर्तृकरणे कृता बहुलम् २. १. ३२.	...	८४
२३.	कृत्यैरधिकार्थवचने २. १. ३३.	...	८४
२४.	अन्नेन व्यञ्जनम् २. १. ३४.	...	८४
२५.	भक्ष्येण मिश्रीकरणम् २. १. ३५.	...	८४
२६.	चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २. १. ३६.	...	८५
२७.	पञ्चमी भयेन २. १. ३७.	...	८७
२८.	सप्तमी शौण्डैः २. १. ४०.	...	८७
२९.	ध्वाङ्क्षेण क्षेपे २. १. ४२.	...	८७
३०.	कृत्यैर्ऋणे २. १. ४३	...	८८

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
३१.	क्षेपे २. १. ४७.	...	८८
३२.	पात्रेसमितादयश्च २. १. ४८.	...	८८
३३.	पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन २. १. ४९.	...	८८
३४.	तद्धितार्थोत्तरपदसमाहारे च २. १. ५१.	...	८९
३५.	संख्यापूर्वो द्विगुः २. १. ५२.	...	९७
३६.	कुत्सितानि कुत्सनैः २. १. ५३.	...	९९
३७.	उपमानानि सामान्यवचनैः २. १. ५५.	...	१००
३८.	उपमितं व्याघ्रादिभिः सामन्याप्रयोगे २. १. ५६.	...	१०६
३९.	विशेषणं विशेष्येण बहुलम् २. १. ५७.	...	१०६
४०.	पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च २. १. ५८.	...	११०
४१.	श्रेण्यादयः कृतादिभिः २. १. ५९.	...	११२
४२.	क्तेन नञ्विशिष्टेनानञ् २. १. ६०.	...	११४
४३.	युवा खलतिपलितवलिनजरतीभिः २. १. ६७.	...	११६
४४.	वर्णो वर्णेन २. १. ६९.	...	११७
४५.	चतुष्पादो गर्भिण्या २. १. ७१.	...	१२६
४६.	मयूरव्यंसकादयश्च २. १. ७२.	...	१२६
४७.	अर्धं नपुंसकम् २. २. २.	...	१२८
४८.	द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् २. २. ३.	...	१२९
४९.	प्राप्तापन्ने च द्वितीयया २. २. ४.	...	१३१
५०.	कालाः परिमाणिना २. २. ५.	...	१३२
५१.	नञ् २. २. ६.	...	१३७
५२.	ईषदकृता २. २. ८.	...	१४४
५३.	षष्ठी २. २. ७.	...	१४४
५४.	न निर्धारणे २. २. १०.	...	१४८
५५.	पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन २. २. ११.	...	१४८
५६.	कर्मणि च २. २. १४.	...	१५१
५७.	नित्यं क्रीडाजीविकयोः २. २. १७.	...	१५२
५८.	कुगतिप्रादयः २. २. १८.	...	१५२
५९.	उपपदमतिङ् २. २. १९.	...	१५५
६०.	अमैवाव्ययेन २. २. २०.	...	१५९
६१.	शेषो बहुव्रीहिः २. २. २३.	...	१६१
६२.	अनेकमन्यपदार्थे २. २. २४.	...	१६२
६३.	संख्ययाव्ययासन्नादूराधिकसंख्याः संख्येये २. २. २५.	...	१७५
६४.	दिङ्नामान्यन्तराले २. २. २६.	...	१७९
६५.	तेन सहेति तुल्ययोगे २. २. २८	...	१७९
६६.	तत्र तेनेदमिति सरूपे २. २. २७.	...	१८१
६७.	चार्थे द्वन्द्वः २. २. २९.	...	१८२

24

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रमाङ्काः	सूत्राणि	पृष्ठाङ्काः
६८.	उपसर्जनं पूर्वम् २. २. ३०. ...	१९०
६९.	अल्पाच्तरम् २. २. ३४. ...	१९१
७०.	सप्तमीविशेषणे बहुव्रीहौ २. २. ३५. ...	१९२
७१.	निष्ठा २. २. ३६. ...	१९२
७२.	कडाराः कर्मधारये २. २. ३८. ...	१९३
७३.	अनभिहिते २. ३. १. ...	१९४
७४.	कर्मणि द्वितीया २. ३. २. ...	२०६
७५.	तृतीया च होश्छन्दसि २. ३. ३. ...	२०७
७६.	अन्तरान्तरेणयुक्ते २. ३. ४. ...	२०८
७७.	कालाध्वनोरत्यन्तसंयोगे २. ३. ५. ...	२०९
७८.	अपवर्गे तृतीया २. ३. ६. ...	२१२
७९.	सप्तमीपञ्चम्यौ कारकमध्ये २. ३. ७. ...	२१२
८०.	कर्मप्रवचनीययुक्ते द्वितीया २. ३. ८. ...	२१३
८१.	यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी २. ३. ९ ...	२१४
८२.	गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २. ३. १२. ...	२१६
८३.	चतुर्थी संप्रदाने २. ३. १३. ...	२१८
८४.	नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च २. ३. १६. ...	२२०
८५.	मन्यकर्मण्यनादरे विभाषाप्राणिषु २. ३. १७. ...	२२१
८६.	कर्तृकरणयोस्तृतीया २. ३. १८. ...	२२२
८७.	सहयुक्तेऽप्रधाने २. ३. १९. ...	२२३
८८.	येनाङ्गविकारः २. ३. २०. ...	२२५
८९.	इत्थंभूतलक्षणे २. ३. २१. ...	२२६
९०.	संज्ञोऽन्यतरस्यां कर्मणि २. ३. २२. ...	२२७
९१.	हेतौ २. ३. २३. ...	२२८
९२.	अपादाने पञ्चमी २. ३. २८. ...	२२९
९३.	अन्यारादितरर्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते २. ३. २९. ...	२३०
९४.	षष्ठ्यतसर्थप्रत्ययेन २. ३. ३०. ...	२३१
९५.	पृथग्विनानानाभिस्तृतीयान्यतरस्याम् २. ३. ३२. ...	२३२
९६.	दूरान्तिकार्थेभ्यो द्वितीया च २. ३. ३५. ...	२३३
९७.	सप्तम्यधिकरणे च २. ३. ३६. ...	२३३
९८.	यस्य च भावेन भावलक्षणम् २. ३. ३७. ...	२३५
९९.	पञ्चमी विभक्ते २. ३. ४२. ...	२३५
१००.	साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः २. ३. ४३. ...	२३६
१०१.	प्रसितोत्सुकाभ्यां तृतीया च २. ३. ४४. ...	२३६
१०२.	नक्षत्रे च लुपि २. ३. ४५. ...	२३७
१०३.	प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २. ३. ४६. ...	२३८
१०४.	षष्ठी शेषे २. ३. ५०. ...	२४५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१०५.	अधीगर्थदयेशां कर्मणि २. ३. ५२.	...	२५०
१०६.	रुजार्थानां भाववचनानामज्वरेः २. ३. ५४.	...	२५३
१०७.	द्वितीया ब्राह्मणे २. ३. ६०.	...	२५४
१०८.	प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने २. ३. ६१.	...	२५४
१०९.	चतुर्थ्यर्थे वहुलं छन्दसि २. ३. ६२.	...	२५४
११०.	कर्तृकर्मणोः कृति २. ३. ६५.	...	२५५
१११.	उभयप्राप्तौ कर्मणि २. ३. ६६.	...	२५८
११२.	क्तस्य च वर्तमाने २. ३. ६७.	...	२५९
११३.	न लोकाव्ययनिष्ठाखलर्थतृनाम् २. ३. ६९.	...	२६०
११४.	अकेनोर्भविष्यदाधमर्ण्ययोः २. ३. ७०.	...	२६१
११५.	कृत्यानां कर्तरि वा २. ३. ७१.	...	२६२
११६.	द्विगुरेकवचनम् २. ४. १.	...	२६४
११७.	द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् २. ४. २.	...	२६७
११८.	अनुवादे चरणानाम् २. ४. ३.	...	२६८
११९.	विशिष्टलिङ्गो नदीदेशोऽग्रामाः २. ४. ७.	...	२६८
१२०.	क्षुद्रजन्तवः २. ४. ८.	...	२६९
१२१.	येषां च विरोधः शाश्वतिकः २. ४. ९.	...	२७०
१२२.	शुद्राणामनिरवसितानाम् २. ४. १०.	...	२७०
१२३.	गवाश्वप्रभृतीनि च २. ४. ११.	...	२७१
१२४.	विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् २. ४. १२.	...	२७१
१२५.	विभाषा समीपे २. ४. १६.	...	२७४
१२६.	तत्पुरुषोऽनञ्कर्मधारयः २. ४. १९.	...	२७५
१२७.	परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २. ४. २६.	...	२७६
१२८.	रात्राह्नाहाः पुंसि २. ४. २९.	...	२८१
१२९.	अपथं नपुंसकम् २. ४. ३०.	...	२८१
१३०.	अर्धर्चाः पुंसि च २. ४. ३१.	...	२८४
१३१.	इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ २. ४. ३२.	...	२८४
१३२.	एतदस्त्रतसोस्त्रतसौ चानुदात्तौ २. ४. ३३.	...	२८६
१३३.	द्वितीयाटौस्स्वेनः २. ४. ३४.	...	२८७
१३४.	आर्धधातुके २. ४. ३५.	...	२८८
१३५.	अदो जग्धिर्ल्यप् ति किति २. ४. ३६.	...	२९१
१३६.	लुङ्सनोर्घस्लृ २. ४. ३७.	...	२९२
१३७.	हनो वध लिङि २. ४. ४२.	...	२९२
१३८.	लुङि च २. ४. ४३.	...	२९२
१३९.	इणो गा लुङि २. ४. ४५.	...	२९३
१४०.	गाङ लिटि २. ४. ४९.	...	२९३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१४१.	चक्षिङः ख्याञ् २. ४. ५४.	...	२९७
१४२.	अजेर्व्यघञपोः २. ४. ५६.	...	३००
१४३.	ण्यक्षत्रियार्षञितो यूनि लुगणिञोः २. ४. ५८.	...	३०१
१४४.	तद्राजस्य बहुषु तेनैवास्त्रियाम् २. ४. ६२.	...	३०३
१४५.	यञञोश्च २. ४. ६४.	...	३१३
१४६.	बह्वच इञः प्राच्यभरतेषु २. ४. ६६.	...	३१३
१४७.	न गोपवनादिभ्यः २. ४. ६७.	...	३१३
१४८.	उपकादिभ्योऽन्यतरस्यामद्वन्द्वे २. ४. ६९.	...	३१४
१४९.	आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् २. ४. ७०.	...	३१४
१५०.	यङोऽचि च २. ४. ७४.	...	३१६
१५१.	गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु २. ४. ७७.	...	३१६
१५२.	तनादिभ्यस्तथासोः २. ४. ७९.	...	३१७
१५३.	आमः २. ४. ८१.	...	३१७
१५४.	अव्ययादाप्सुपः २. ४. ८२.	...	३२०
१५५.	नाव्ययीभावादतोऽम् त्वपञ्चम्याः २. ४. ८३.	...	३२१
१५६.	तृतीयासप्तम्योर्बहुलम् २. ४. ८४.	...	३२२
१५७.	लुटः प्रथमस्य डारौरसः २. ४. ८५.	...	३२३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

द्वितीयाध्यायव्याख्याननिर्दिष्टसूत्राणामकाराद्यनुक्रमणिका

सूत्राणि	पृष्ठाङ्काः
अकेनोर्भविष्यदाधमर्ण्ययोः २. ३. ७०. ...	२६१
अक्षशलाकासंख्याः परिणा २. १. १०. ...	६९
अजेर्व्यघञपोः २. ४. ५६. ...	३००
अत्यन्तसंयोगे च २. १. २९. ...	८१
अदो जग्धिर्ल्यप्ति किति २. ४. ३६. ...	२९२
अधीगर्थदयेशां कर्मणि २. ३. ५२. ...	२५०
अनभिहिते २. ३. १. ...	१९४
अनुवादे चरणानाम् २. ४. ३. ...	२६८
अनेकमन्यपदार्थे २. २. २८. ...	१६२
अन्तरान्तरेणयुक्ते २. ३. ४. ...	२०८
अन्नेन व्यञ्जनम् २. १. ३४. ...	८४
अन्यारादितरर्तेदिक्छब्दाञ्चूत्तरपदाजाहियुक्ते २. ३. २९. ...	२३०
अपथं नपुंसकम् २. ४. ३०. ...	२८१
अपवर्गे तृतीया २. ३. ६. ...	२१२
अपादाने पञ्चमी २. ३. २८. ...	२२९
अमैवाव्ययेन २. २. २०. ...	१५९
अर्धं नपुंसकम् २. २. २. ...	१२८
अर्धर्चाः पुंसि च २. ४. ३१. ...	२८४
अल्पाच्तरम् २. २. ३४. ...	१९१
अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृश्यसंपत्तिसाकल्यान्तवचनेषु २. १. ६. ...	६५
अव्ययादाप्सुपः २. ४. ८२. ...	३२०
अव्ययीभावः २. १. ५. ...	६५
आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच् २. ४. ७०. ...	३१४
आङ् मर्यादाभिविध्योः २. १. १३. ...	७१
आमः २. ४. ८१. ...	३१७
आर्धधातुके २. ४. ३५. ...	२८८
इणो गा लुङि २. ४. ४५. ...	२९३
इत्थंभूतलक्षणे २. ३. २१. ...	२२६
इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ २. ४. ३२. ...	२८४
ईषदकृता २. २. ७. ...	१४४
उपकादिभ्योऽन्यतरस्यामद्वन्द्वे २. ४. ६९. ...	३१४

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सूत्राणि पृष्ठाङ्काः

उपपदमतिङ् २. २. १९. ... १५५
उपमानानि सामान्यवचनैः २. १. ५५. ... १००
उपमितं व्याघ्रादिभिः सामान्याप्रयोगे २. १. ५६. ... १०६
उपसर्जनं पूर्वम् २. २. ३०. ... १९०
उभयप्राप्तौ कर्मणि २. ३. ६६. ... २५८
एतदस्त्रतसोस्त्रतसौ चानुदात्तौ २. ४. ३३. ... २८६
कडाराः कर्मधारये २. २. ३८. ... १९३
कर्तृकरणयोस्तृतीया २. ३. १८. ... २२२
कर्तृकरणे कृता बहुलम् २. १. ३२. ... ८४
कर्तृकर्मणोः कृति २. ३. ६५. ... २५५
कर्मणि च २. २. १४. ... १५१
कर्मणि द्वितीया २. ३. २. ... २०६
कर्मप्रवचनीययुक्ते द्वितीया २. ३. ८. ... २१३
कालाः परिमाणिना २. २. ५. ... १३२
कालाध्वनोरत्यन्तसंयोगे २. ३. ५. ... २०९
कुगतिप्रादयः २. २. १८. ... १५२
कुत्सितानि कुत्सनैः २. १. ५३. ... ९९
कृत्यानां कर्तरि वा २. ३. ७१. ... २६२
कृत्यैरधिकार्थवचने २. १. ३३. ... ८४
कृत्यैर्ऋणे २. १. ४३. ... ८८
क्तस्य च वर्तमाने २. ३. ६७. ... २५९
क्तेन नञ्विशिष्टेनानञ् २. १. ६०. ... ११४
क्षुद्रजन्तवः २. ४. ८. ... २६९
क्षेपे २. १. ४७. ... ८८
खट्वा क्षेपे २. १. २६. ... ८१
गत्यर्थकर्मणि द्वितीयाचतुर्थ्यौ चेष्टायामनध्वनि २. ३. १२. ... २१६
गवाश्वप्रभृतीनि च २. ४. ११. ... २७१
गाङ् लिटि २. ४. ४९. ... २९३
गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु २. ४. ७७. ... ३१६
चक्षिङः ख्याञ् २. ४. ५४. ... २९७
चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः २. १. ३६. ... ८५
चतुष्पादो गर्भिण्या २. १. ७१. ... १२६
चतुर्थी संप्रदाने २. ३. १३. ... २१८
चतुर्थ्यर्थे बहुलं छन्दसि २. ३. ६२. ... २५४
चार्थे द्वन्द्वः २. २. २९. ... १८२
ण्यक्षत्रियार्षञितो यूनि लुगणिञोः २. ४. ५८. ... ३०१
तत्पुरुषोऽनञ्कर्मधारयः २. ४. १९. ... २७५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सूत्राणि पृष्ठाङ्काः

तत्र तेनेदमिति सरूपे २. २. २७. ... १८१
तद्धितार्थोत्तरपदसमाहारे च २. १. ५१. ... ८९
तद्राजस्य वहुषु तेनैवास्त्रियाम् २. ४. ६२. ... ३०३
तनादिभ्यस्तथासोः २. ४. ७९. ... ३१७
तिष्ठद्गुप्रभृतीनि च २. १. १७. ... ७३
तृतीया च होश्छन्दसि २. ३. ३. ... २०७
तृतीया तत्कृतार्थेन गुणवचनेन २. १. ३०. ... ८१
तृतीयासप्तम्योर्वहुलम् २. ४. ८४. ... ३२२
तेन सहेति तुल्ययोगे २. २. २८. ... १७९
दिङ्नामान्यन्तराले २. २. २६. ... १७९
दूरान्तिकार्थेभ्यो द्वितीया च २. ३. ३५. ... २३३
द्वन्द्वश्च प्राणितूर्यसेनाङ्गानाम् २. ४. २. ... २६७
द्विगुरेकवचनम् २. ४. १. ... २६४
द्विगुश्च २. १. २३. ... ७८
द्वितीयतृतीयचतुर्थतुर्याण्यन्यतरस्याम् २. २. ३. ... १२९
द्वितीयाटौस्स्वेनः २. ४. ३४. ... २८७
द्वितीया ब्राह्मणे २. ३. ६०. ... २५४
द्वितीया श्रितातीतपतितगतात्यस्तप्राप्तापन्नैः २. १. २४. ... ७९
ध्वाङ्क्षेण क्षेपे २. १. ४२. ... ८७
नक्षत्रे च लुपि २. ३. ४५. ... २३७
न गोपवनादिभ्यः २. ४. ६७. ... ३१३
नञ् २. २. ६. ... १३७
नदीभिश्च २. १. २०. ... ७६
न निर्धारणे २. २. १०. ... १४८
नमःस्वस्तिस्वाहास्वधालंवषडचोगाच्च २. ३. १६. ... २२०
न लोकाव्ययनिष्ठाखलर्थतृनाम् २. ३. ६९. ... २६०
नाव्ययीभावादतोऽम् त्वपञ्चम्याः २. ४. ८३. ... ३२१
नित्यं क्रीडाजीविकयोः २. २. १७. ... १५२
निष्ठा २. २. ३६. ... १९२
पञ्चमी भयेन २. १. ३७. ... ८७
पञ्चमी विभक्ते २. ३. ४२. ... २३५
परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः २. ४. २६. ... २७६
पात्रेसमितादयश्च २. १. ४८. ... ८८
पारेमध्ये षष्ठ्या वा २. १. १८. ... ७४
पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन २. २. ११. ... १४८
पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन २. १. ४९. ... ८८
पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः २. १. ३१. ... ८३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सूत्राणि		पृष्ठाङ्काः
पूर्वापरप्रथमचरमजघन्यसमानमध्यममध्यमवीराश्च २. १. ५८.	...	११०
पृथग्विनानानाभिस्तृतीयान्यतरस्याम् २. ३. ३२.	...	२३२
प्रसितोत्सुकाभ्यां तृतीया च २. ३. ४४.	...	२३६
प्राक् कडारात् समासः २. १. ३.	...	५६
प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा २. ३. ४६.	...	२३८
प्राप्तापन्ने च द्वितीयया २. २. ४.	...	१३१
प्रेष्यब्रुवोर्हविषो देवतासंप्रदाने २. ३. ६१.	...	२५४
बह्वच इञः प्राच्यभरतेषु २. ४. ६६.	...	३१३
भक्ष्येण मिश्रीकरणम् २. १. ३५.	...	८४
मन्यकर्मण्यनादरे विभाषाप्राणिषु २. ३. १७.	...	२२१
मयूरव्यंसकादयश्च २. १. ७२.	...	१२६
यङोऽचि च २. ४. ७४.	...	३१६
यञञोश्च २. ४. ६४.	...	३१३
यथासादृश्ये २. १.७	...	६७
यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी २. ३. ९.	...	२१४
यस्य च भावेन भावलक्षणम् २. ३. ३७.	...	२३५
यस्य चायामः २. १. १६.	...	७२
युवा खलतिपलितवलिनजरतीभिः २. १. ६७.	...	११६
येनाङ्गविकारः २. ३. २०.	...	२२५
येषां च विरोधः शाश्वतिकः २. ४. ९.	...	२७०
रात्राह्नाहाः पुंसि २. ४. २९.	...	२८१
रुजार्थानां भाववचनानामज्वरेः २. ३. ५४.	...	२५३
लुङि च २. ४. ४३.	...	२९२
लुङ्सनोर्घस्लृ २. ४. ३७.	...	२९२
लुटः प्रथमस्य डारौरसः २. ४. ८५.	...	३२३
वर्णो वर्णेन २. १. ६९.	...	११७
विभाषापपरिबहिरञ्चवः पञ्चम्या २. १. ११–१२.	...	७०
विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम् २. ४. १२.	...	२७१
विभाषा समीपे २. ४. १६.	...	२७४
विशिष्टलिङ्गो नदीदेशोऽग्रामाः २. ४. ७.	...	२६८
विशेषणं विशेष्येण बहुलम् २. १. ५७.	...	१०६
शूद्राणामनिरवसितानाम् २. ४. १०.	...	२७०
शेषो बहुव्रीहिः २. २. २३.	...	१६१
श्रेण्यादयः कृतादिभिः २. १. ५९.	...	११२
षष्ठी २. २. ७.	...	१४४
षष्ठी शेषे २. ३. ५०.	...	२४५

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

सूत्राणि	पृष्ठाङ्काः
षष्ठ्यतसर्थप्रत्ययेन २. ३. ३०. ...	२३१
संख्ययाव्ययासन्नाढूराधिकसंख्याः संख्येये २. २. २५. ...	१७५
संख्यापूर्वो द्विगुः २. १. ५२. ...	९७
संज्ञोऽन्यतरस्यां कर्मणि २. ३. २२. ...	२२७
सप्तमीपञ्चम्यौ कारकमध्ये २. ३. ७. ...	२१२
सप्तमीविशेषणे बहुव्रीहौ २. २. ३५. ...	१९२
सप्तमी शौण्डैः २. १. ४०. ...	८७
सप्तम्यधिकरणे च २. ३. ३६. ...	२३३
समर्थः पदविधिः २. १. १. ...	१
सहयुक्तेऽप्रधाने २. ३. १९. ...	२२३
सह सुपा २. १. ४. ...	६०
साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः २. ३. ४३. ...	२३६
सुप् प्रतिना मात्रार्थे २. १. ९. ...	६८
सुबामन्त्रिते पराङ्गवत् स्वरे २. १. २. ...	५१
हनो वध लिङि २. ४. ४२. ...	२९२
हेतौ २. ३. २३. ...	२२८

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

TABLE DES MATIÈRES

उपोद्घातः			V
द्वितीयाध्यायप्रथमपादे	प्रथममाह्निकम्	...	१
	द्वितीयमाह्निकम्	...	५१
	तृतीयमाह्निकम्	...	८९
द्वितीयाध्यायद्वितीयपादे	प्रथममाह्निकम्	...	१२८
	द्वितीयमाह्निकम्	...	१६२
द्वितीयाध्यायतृतीयपादे	प्रथममाह्निकम्	...	१९४
	द्वितीयमाह्निकम्	...	२२२
	तृतीयमाह्निकम्	...	२३८
द्वितीयाध्यायचतुर्थपादे	प्रथममाह्निकम्	...	२६४
	द्वितीयमाह्निकम्	...	३०३
अनुबन्धः		...	३२९
आकरग्रन्थानां सूची		...	३६७
द्वितीयाध्यायप्रथमपादादिचतुर्थपादान्तविषयसूचिका		...	३६८
द्वितीयाध्यायव्याख्याननिर्दिष्टसूत्राणामकाराद्यनुक्रमणिका		...	३७३

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

Nos.

1. Kārāvelane —*Kāreikkālammeiyār*, œuvres éditées et traduites. Introduction par Jean Filliozat. 1956.
2. Jean Filliozat — *Les relations extérieures de l'Inde* (1)
   1. *Les échanges de l'Inde et de l'Empire Romain aux premiers siècles de l'ère chrétienne.*
   2. *La doctrine brahmanique à Rome au IIIème siècle.* 1956.
3. Madeleine Biardeau — *Le Tattvabindu de Vācaspatimiśra.* Edition critique, traduction et introduction. 1956.
4. J. Monchanin, J. Filliozat, A. Bareau — *Entretiens* 1955. 1956.
5. Louis Renou — *Etudes sur le vocabulaire du Ṛgveda.* Première série. 1958.
6. Suzanne Siauve — *La voie vers la connaissance de Dieu* (*Brahma-Jijñāsā*) *selon l'Anuvyākhyāna de Madhva.* 1957.
7. Dev Raj — *L'esclavage dans l'Inde ancienne d'après les textes palis et sanskrits.* Avec une préface du Dr. Jean Filliozat. 1957.
8. Alain Daniélou — *Tableau comparatif des intervalles musicaux.* 1958.
9. Alain Daniélou — *La musique du Cambodge et du Laos.* 1957.
10. André Bareau — *La vie et l'organisation des communautés bouddhiques modernes de Ceylan.* 1957.
11. Alain Daniélou et N.R. Bhatt — *Textes des Purāṇa sur la théorie musicale.* Vol. I, Edition critique, traduction française et introduction. 1959.
12. Charlotte Vaudeville —*Kabīr Granthāvalī* (*Dohā*). Avec introduction, traduction et notes. 1957.
13. Madeleine Biardeau — *Sphoṭa Siddhi* (*La Démonstration du Sphoṭa*) *par Maṇḍana Miśra.* Introduction, traduction et commentaire. Texte sanskrit établi par N.R. Bhatt avec la collaboration de T. Ramanujam. 1958.
14. Suzanne Siauve — *Les noms védiques de Viṣṇu dans l'Anuvyākhyāna de Madhva* (*Brahma-Sūtra* I, 1, *adhikaraṇa* 2 *à* 12). Texte avec traduction et notes. 1959.
15. Charlotte Vaudeville — *Etude sur les sources et la composition du Rāmāyaṇa de Tulsī-Dās.* Traduction en hindi par J.K. Balbir. तुलसीदास रचित रामचरितमानस का मूलाधार व रचनाविषयक समालोचनात्मक एक अध्ययन, fasc. I. 1959, fasc. II. 1965.
16. Alain Daniélou et N.R. Bhatt — *Le Gītālaṃkāra.* L'ouvrage original de Bharata sur la musique. Edition critique, traduction française et introduction. 1959.
17. Rasik Vihari Joshi — *Le rituel de la dévotion kṛṣṇaïte.* Préface par Jean Filliozat. 1959.
18. N. R. Bhatt — *Rauravāgama*, édition critique, Vol. I. Introduction : Les Āgama çivaïtes, par Jean Filliozat. 1961. Vol. II, 1972.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

19. R. Dessigane, P.Z. Pattabiramin et J. Filliozat — *La légende des jeux de Çiva à Madurai d'après les textes et les peintures*. Vol. I Texte — Vol. II Planches. 1960.
20. Claude Jacques — *Gayāmāhātmya*. Introduction, édition critique et traduction française. 1962.
21. Charlotte Vaudeville — *Les duhā de Dhola Mārū*. Avec introduction, traduction et notes. 1962.
22. Sayida Surriya Hussain — *Garcin de Tassy, Biographie et étude critique de ses œuvres*. 1962.
23. N.R. Bhatt — *Mṛgendrāgama* (*Kriyāpāda et Caryāpāda*) *avec le commentaire de Bhaṭṭa Nārāyaṇakaṇṭha*, édition critique. 1962.
24. N.R. Bhatt — *Ajitāgama*, édition critique. Vol. I. 1963. Vol. II. 1967.
25. Hélène Brunner-Lachaux — *Le rituel quotidien dans la tradition śivaïte de l'Inde du Sud selon Somaśambhu — Somaśambhupaddhati*, Introduction, traduction et notes. 1ère partie: Le Rituel quotidien. 1963. 2ème partie: Rituels occasionnels I. 1968. 3ème partie: Rituels occasionnels II. 1977.
26. Pierre-Sylvain Filliozat — *Le Pratāparudrīya de Vidyānātha* — avec le commentaire *Ratnāpaṇa* de Kumārasvāmin. Traduction, introduction et notes. 1963.
27. Dessigane, P.Z. Pattabiramin et J. Filliozat — *Les légendes çivaïtes de Kāñcipuram*. 1964.
28. Ch. Vaudeville — *Bārahmāsā*. Les chansons des douze mois dans les littératures indo-aryennes. 1965.
29. J. Filliozat et P.Z. Pattabiramin — *Parures divines du Sud de l'Inde*. 1966.
30. Michèle Lupsa — *Chants à Kālī de Rāmprasād*. Introduction, texte bengali, traduction et notes. 1967.
31. R. Dessigane et P.Z. Pattabiramin — *La légende de Skanda*. 1967.
32. M.E. Adicéam — *Contribution à l'étude d'AiyaNār-Śāstā*. 1967.
33. J.Filliozat — *Un catéchisme tamoul du XVIe siècle en lettres latines*. 1967.
34. P. Joshi — *Industrialisation et Société dans l'Inde du Nord*. Introduction par J. Filliozat : Observations sur l'étude des sociétés et de l'économie de l'Inde. 1967.
35. F.Gros — *Le Paripāṭal*, Texte tamoul, introduction, traduction et notes. 1967.
36. P.S. Filliozat — *Œuvres poétiques de Nīlakaṇṭha Dīkṣita*. I. Texte, traduction et notes. 1967.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

37. *Index des mots de la littérature tamoule ancienne*, Vol. I. 1967; Vol. II. 1968; Vol. III. 1970.
38. Suzanne Siauve — *La Doctrine de Madhva*. 1968.
39. François Gros et R. Nagaswamy — *Uttaramērūr*. Légendes, Histoire, Monuments, avec le *Pañcavaradakṣetramāhātmya* édité par K. Srinivasacharya. 1970.
40. B. Dagens — *Mayamata*. Traité sanskrit d'architecture. Edition critique, traduction et notes. 1ère partie 1970. 2ème partie 1976.
41. N.S. Shukla — *Le Karṇānanda de Kṛṣṇadāsa*. Édition et traduction annotée. 1971.
42. P.Z. Pattabiramin — *Sanctuaires rupestres du Sud de l'Inde*. Vol. I. Andhra. 1971. Vol. II. Tamilnad et Kerala. 1975.
43. Suzanne Siauve — *Les hiérarchies spirituelles selon l'Anuvyākhyāna de Madhva*. 1971.
44. Capitaine de Vaisseau Cordier — *Historique et Statistique de Karikal*. Texte rédigé en 1825. Présentation par François Gros. Vol. I. 1971.
45. Jean Filliozat — Un texte tamoul de dévotion vishnouïte. *Le Tiruppāvai d'Āṇṭāḷ*. 1971.
46. Marie-Claude Porcher — *Rāghavayādavīya* par Veṅkaṭādhvarin. Texte sanskrit édité par M.S. Narasimhacharya. Etude et Traduction. 1972.
47. Neelakanta Sarma — *Textes sanskrits et tamouls de Thailande*. Introduction par Jean Filliozat. 1972.
48. Marie-Claude Porcher — Un poème satirique sanskrit, la *Viśvaguṇādarśacampū*. Introduction, traduction et notes. 1972.
49. Jean Filliozat — Un texte de la religion kaumāra, le *TirumurukāRRuppaṭai*. 1973.
50. Association Internationale des études Tamoules. Compte rendu de la IIIème Conférence Internationale (Proceedings of the Third International Conference Seminar, Paris 1970) édité par François Gros et X.S. Thani Nayagam. 1973.
51. *Mahābhāṣyapradīpavyākhyānāni*, Commentaires sur le Mahābhāṣya de Patañjali et le Pradīpa de Kaiyaṭa, édition critique par M.S. Narasimhacharya. Présentation par P.S. Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1973. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1975. Vol. III. : Adhyāya I, Pāda I, Āhnika 8-9. 1976. Vol. IV. : Adhyāya I, Pāda 2-4. 1977.
52. Alix Raison — *La Hārītasaṃhitā* : Texte médical sanskrit avec un Index de nomenclature âyurvédique. 1974.
53. Tara Michaël — Le joyau du Śiva-yoga, *Śivayogaratna* de Jñānaprakāśa.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

(*suite*)

Nos.

Edition, traduction et notes. 1975.

54. *Le Mahābhāṣya de Patañjali* avec le Pradīpa de Kaiyaṭa et l'Uddyota de Nāgeśa. Traduction par Pierre Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1975. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1976. Vol. III. : Adhyāya I, Pāda I, Āhnika 8-9. 1978.

55. Vasundhara Filliozat — *Le Temple de TirumaṅkaiyāLvār à Hampi*. 1976.

56. N. R. Bhatt — *Mataṅgapārameśvarāgama*, avec le commentaire de Rāmakaṇṭha, Vol. I. : *Vidyāpāda*, édition critique, 1977.

57. B. Dagens — *Les Enseignements architecturaux de l'Ajitāgama et du Rauravāgama, Etudes sur les āgama śivaïtes*, I. 1977.

58. *Aṣṭādaśabhedanirṇaya* de Śrī Vātsya Raṅganātha par Suzanne Siauve 1978.

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry

Digitized by eGangotri/Sarayu Trust. Funding IKS-MoE-Grant-2 Equipment Heritage Foundation, Jalgaon

CC-0. In Public Domain Sri Aurobindo Library, Pondicherry